कारणे मुख्यत्वेऽपि कार्यस्य क्लेशस्य दृश्यते भावो योऽन्यथा यथा कारणत्वाभिमतं बीजादि कारणमकारणमपि कार्या-भिमतयोः कार्यभावाभावयोर्दर्शनात् तथा कारणस्य कार्याकार्याभिमताकार्यत्वेनाभिमतमपि कार्यमकार्यमपि भवतीति कार्यत्वाभिमतो विशेष एवाह यद्येतादि मूलेन यथा कारणस्य कार्यनिरूपितकर्तृत्वाकर्तृत्वाभिमतस्तथा कार्यस्यापि कारणत्वेऽपि-तत्कर्तृत्वाकर्तृत्वाभिमत इति भावः। व्यवस्थितिभिरन्यानुवृत्त्यैव स्वरूपविरहितस्वामिकार्यप्रदर्शनाभिप्राय—प्रधानमेवेति। प्रवृत्त्यैव—कथमेवेति। अनियतमिति कस्यापि सेवादितः केवलं क्लेशप्राप्तिरेव भवति न स्वर्थप्राप्तिः कस्यचित्तु क्लेश-समर्थप्राप्तिस्तु क्लेशप्राप्तिरित्युभयत्र व्यभिचार इति भावः। ननु यदि कारणे सेवादौ क्लेशप्राप्तिरपि नियता तर्हि साऽपीप्सिता भवेत् न तथा दृश्यत इत्यत आह—एवं सतीति सन्निहितेति सन्निहिता ईप्सितार्थप्राप्तिरूपवैव प्रकृतस्य पुरुषस्य सेवादौ प्रवृत्तिरिति प्रथमपुरुषपक्षं सेवकस्य सन्निहितेप्सितार्थप्राप्तिफलका सेवैव प्रवृत्ते., सेवा सन्निहितानीप्सितार्थप्रापकत्वा-भावीति विपर्यय सेवकस्य तत्र प्रवृत्तेरिति द्वितीयपुरुषपक्षौ। प्रकृतपक्षेऽपि देशकालादिप्रतिबन्धकाभावेऽप्सितार्थस्यापि प्रसभमर्थोपलभ्येत देशकालेत्यादि। व्याख्यानिमित्तमपि च सेवादिक्रियायाः सर्वात्मकं तदनुभवं व्यभिचरतीति भावः। अथ देशादयः किमेतस्तेऽवबन्धकाः एकैकमेव कारणमुत नेति विकल्पे भवति विकल्पद्वयं दर्शयति—अथेति।

अथ देशादयः किमिति, विकल्पद्वयासम्भवापादनेन निरोद्धुमप्येतदिदमभिप्रायः । ये देशा-
दयोऽव्यक्तकाभिमतास्ते यथेष्टाव्यवपेक्ष्यत्वात्तेषामकारणत्वादसर्वत्वम्, कारणभावाद्धि सर्वं सर्वा-
त्मकं स्यात्तदभावादसर्वत्वं देशादीनां प्राप्तमसर्वत्वाच्च तेषामव्यक्तत्वं तेषु कस्यचिदपीन्द्रियस्याभा-
वात्, ततोऽव्यक्तत्वादप्रतिबन्धकत्वमपि । अथाऽऽशङ्कीथास्ते देशादयः कारणमिति, ततः कारणत्वे
5 सर्वकारणत्वात्सर्वात्मकत्वात् किमिति सर्वं न भवति, भवत्येवेत्यर्थः, कस्मात्? समुदितकारणत्वात्,
समुदितकारणस्य सर्वकारणत्वात् सर्वात्मकत्वाच्च, अत्र प्रयोगः, सर्वं सर्वत्र स्यात् समुदितकारणत्वात्,
संयुक्ततन्तुपटवत्, यथा तन्तूनां परस्परसंयोगे सति नियमात् पटो भवति, अकारणत्वाभिधानात्,
एवं सर्वकारणत्वसर्वात्मकत्वसद्भावे को देशादिप्रतिबन्धो नामान्य इति किमिति सर्वं न भवतीति ।

अथवा सर्वं न भवतीत्यादि स एव लौकिक आशङ्कते—

10 अथ मतं भवतः सर्वं न भवति, अनभिव्यक्तत्वाद्देशादेः कारणस्य, प्रधानसाम्या-
वस्थानवत् ।

(अथेति,) अथ मतं भवतः लौकिकस्य सर्वं न भवति यदीदं सर्वसमुदायात्मकमसर्वात्मकमपि कुतः?
अनभिव्यक्तत्वात्, 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' अभिव्यक्तमभिव्यक्तं स्फुटीकृतम्, अनभिव्यक्तम-
स्फुटम्, अनभिव्यक्तत्वाद्देशादेः कारणस्य सर्वं न भवति, को दृष्टान्तः? प्रधानसाम्यावस्थानवत्,
15 यथा प्रधानं सत्त्वरजस्तमस्त्रिगुणसाम्यावस्थानेनानभिव्यक्तत्वात् सर्वकारणमपि सत् सर्वभावान्न प्रक-
रोति घटपटादीन्, अत एव प्रकरणात् प्रकृतिः प्रधीयन्ते भावा अत्र इति प्रधानमित्यादिभिर्नामभिरभि-
धीयते, तस्य चानभिव्यक्तत्वं तत्साम्यावस्थानात्मन्येवात्र, तथा देशादिकारणं साम्यावस्थानादनभिव्यक्तं
प्रधानवत् सर्वं कार्यं न कुरुते, लोकप्रसिद्धमप्यत्रोदाहरणं मयूराण्डकरसगतनीलादिवत्, यथा मयू-
राण्डकरसावस्थायामेव मेचकवर्णनीलाद्यवयवानभिव्यक्तिः तत्साम्यावस्थानात्तः सर्वं न भवति मयू-
20 राण्डकरसाम्ययूराण्डावस्थायामेव तद्दृष्टादि तद्वदिति ।

अत्रोच्यते—

नैवं मंस्थाः ननु च त्वयाप्येतदादिष्टं सर्वं देशादेरिति, तस्मात्सर्वात्मकत्वं सर्वात्मक-
त्वाच्च वैषम्यावस्थैवेति लौकिकप्रकृतित्वमेव प्रकृतेः, सर्वात्मकत्वाद्देशादिवत् साम्यावस्थैव
वा देशादेरपि प्रकृतिवत् ।

---

25 यद्यपि सांख्यमते प्रकृतेर्भेदरूपस्यो देशादयो न कारणं तथापि न तर्हि [illegible] मतमिति [illegible]
[illegible] बाधकोऽपि देशादिकारणत्वं [illegible] । एतदिति [illegible] कारणं देशादि । [illegible]-
तयेति [illegible] । कारणमूलत्वादेव [illegible] कारणमावादीति । सर्वात्मकत्वे हि देशं सर्वं तत्र
[illegible] भवतीति [illegible] देशं स्यात्त भवतीत्याह–असर्वत्वाच्चेति । [illegible] कारणं देशादि-
त्वयेति । देशादेर्यत्सर्वकारणेऽपि साम्यावस्थानं प्रधानस्यानभिव्यक्तत्वात् सर्वं न भवतीत्याशङ्कते–अथ मतमिति ।
30 यथा प्रधानमिति [illegible] सत्त्वं प्रकाशात्मकत्वात् रजो [illegible] रजस्तमसत्वात् तमः [illegible] प्रधानं
[illegible] [illegible] न सर्वभावान् प्रकरोति [illegible] एव प्रकरणादिति भावः । मयूराण्ड-
केति, यथा [illegible] [illegible] न तत्र [illegible] [illegible] [illegible] यथा

मेव मस्याः ननु चेत्यादि, मन्विमनुज्ञापने, तथाऽप्येतदाविष्टं सर्वं वैशादेरिति, यस्मादे-
मादेः सर्वस्यात्सर्वात्मकत्वात्सर्वात्मकत्वाच्च वैषम्यावस्थैव, इतिशब्दो हेत्वर्थे, यस्माल्लौकिकप्रकृतित्वमेव
प्रकृतेरिष्टत्वाभिमतायाः, कथं ? यथाहि लौकिकी प्रकृतिर्वैषम्यादिविषमावस्थैव सती सर्वकारणात्मिका
कार्यात्मिका विषमा समा च व्यक्ता चाव्यक्ता च तथा सांख्यपरिकल्पितप्रकृतिरपि स्यात्, किं कारणं ?
सर्वात्मकत्वादेवाविकल्पमयूराण्डकरसवत् वैषम्यावस्थैवेत्यर्थः। साम्यावस्थैव वा वैषम्येऽपि सर्वात्म- 5
कत्वात् प्रकृतिवदिति।

एते अपि च कल्पने नोपपन्ने, अप्रयोजनत्वात्, निर्वृत्तानिर्वृत्तार्थक्रियौदासीन्यवत्।

(एते इति) एते अपि च कल्पने नोपपन्ने वैषम्यादीनामनभिव्यक्तिः प्रकृतेः साम्यावस्थान
मिति, कस्मात् ? अप्रयोजनत्वात्, न हि वैषम्यादीनामनभिव्यक्तौ प्रयोजनमस्ति पुरुषविमोक्षणहेतोर्भ्य-
स्वरूपतया प्रवर्तमानानां यथा पुरुषार्थसिद्धेरनिर्वृत्तौ, अनिर्वृत्तौदनस्य पचिक्रियायामौदासीन्यवत्, 10
नापि निर्वर्तितार्थायाः प्रकृतेः पुनरपास्मामनुपसंहृत्य साम्यावस्थाने किञ्चित् प्रयोजनमस्ति सिद्धौदन-
स्यौदनार्थपाचनादिप्रवृत्तिवत्। अथवा प्रकृतेरेवाभिव्यक्तिसाम्यावस्थाने न युक्ते अप्रयोजनत्वात्,
अप्रयोजनत्वं निर्वृत्तानिर्वृत्तार्थत्वात्, यदि निर्वृत्तार्था सिद्धौदनस्यपचनवदयुक्तं साम्यावस्थानम्, अनिर्वृ-
त्तार्था चेत् प्रधानस्यासिद्धौदनस्यौदासीन्यवदयुक्तं साम्यावस्थानम्। तथाऽनभिव्यक्तिः, किं कारणं ?
प्रकाशनार्थं प्रवृत्तयो व्यक्तिवैषम्याभ्यां तदर्थसिद्धेस्साम्यावस्थेनाप्रसिद्धेः, अनभिव्यक्तिसाम्यावस्थान- 15
योरपि प्रवृत्तिविक्षेपत्वात्, द्विधाऽप्यप्रयोजनत्वादयुक्तमिति। अथवा प्रयोजनानभिव्यक्तिः निर्वृत्तार्थ-
त्वात्, वैषम्यादिरूपेण प्रकाशितात्मवृत्तिः किमर्थं नाभिव्यज्यते ? किमर्थं सर्वं पुरुषार्थमकृत्वा साम्ये
नावतिष्ठते ? सांख्येन द्विविधपुरुषार्थसिद्धये प्रकृतिप्रवृत्तिरिष्टा नाकस्मिकी यदृच्छावादिमतवत्, न
वैश्वरत्वभावादिकारणवादिमतवद्वा कारणान्तरम्, यथार्थस्वभावात्र दृष्टान्तद्वयं दर्शयति—निर्वृत्तानिर्वृत्तार्थ-
क्रियौदासीन्यवदिति, पचनापचनवदोदनस्येत्यर्थः। 20

च मयूराण्डकरसे सत्यप्येकस्याभावे तथैवेत्येकोऽप्यभिव्यक्तिः [illegible] तेषामनभिव्यक्तिरेवमेव वैषम्यादि
कारणव्यापारभावेन प्रकृतेः सर्वं कार्यं न दृश्यत इति भावः। अभिव्यक्तिभावेऽपि सत्कार्यपक्षानुसारतोऽपेक्षणीयविरहत्वमुक्त
एव तथाप्यसौ न च न सम्भवति वैषम्यादेः सर्वात्मकत्वमनुपपन्नमतो वैषम्यस्य दुर्वारत्वमाह—सर्वं वैषम्यादेरिति प्रकृ-
तत्वस्य हि सत्त्वरजस्तमसां गुणप्रधानभावमुखेन [illegible] नाख्यानम् तथाऽप्येकस्यापि तेषामभिव्यक्तिभावानु-
पपत्तेस्तथा च सर्वकालं [illegible] वैषम्यादिरपि [illegible]—साम्यावस्थैव वेति। 25
ननु [illegible] न [illegible] किन्तु परिणामित्वसत्त्वेन यस्मिन् विभिन्नमात्रेऽपि [illegible] न [illegible] तदपि [illegible]
[illegible], तथा च [illegible] वैषम्योऽप्यप्रयोजनत्वात् [illegible]—एते अपि च
कल्पने इति। पुरुषार्थद्विविधत्व च निवृत्तौ भोगमात्रमस्मात् न हीति पुरुषविमोक्षणहेतोरिति प्रधानप्रवृत्ते-
र्भोगमपवर्गं द्विविधपुरुषार्थः [illegible] प्रधानं [illegible] यतेत अभि-
[illegible]ति भावः। यदि तु तदा सर्वपुरुषार्था निर्वर्तितः प्रयोजनमात्राभावात् पुनः साम्यावस्थाने प्रवृत्ति- 30
[illegible]—मापीति। द्विविधेति पुरुषस्य भोगापवर्गार्थमेव प्रवृत्तिः प्रकृतेः न हि तस्याः [illegible]
तथा [illegible] परिणमते [illegible] न [illegible] भावः। यथा [illegible]
[illegible]

आशङ्कते—

तस्याः प्रकृतेरनभिव्यक्तिसाम्यावस्थाने कालनिमित्तिपरम्परास्वभावेश्वराद्यन्यतमकारणवशाद्विशेषस्याप्युक्तम्, प्रकृतिकारणत्यागेन हि अभ्युपेतविरोधः, कारणान्तरस्य वा तथा प्रणेतुरापत्तिः । आत्मान्तरत्वप्रकाशनमर्थं हि प्रधानस्य धर्मः ।

5 (तस्या इति) तस्याः प्रकृतेरनभिव्यक्तिसाम्यावस्थाने कालनिमित्तिपरम्परास्वभावेश्वराद्यन्यतमकारणवशाद्विशेषस्याप्युक्तम्, प्रकृतिकारणत्यागेनाभ्युपेतविरोधदोषसम्बन्धिनी कस्मात्, कारणान्तरस्य वा प्रथमप्रणेतुरापत्तिः, कारणानन्त्यात् कारणान्तरं प्रकृतेरन्यत् कारणं, यत् प्रकृतिं तथा प्रवर्तयति, तदपि समानमिति तत्कारणपरम्पराऽनवस्थाप्रसङ्गमित्याशयमभिप्रेतवत् । कारणान्तरनिरपेक्षस्य कारणस्य स्वकार्यकरणाद् युक्तिविरुद्धमित्यत आह—आत्मान्तरत्वप्रकाशनमर्थं हीत्यादि प्राकृतप्रधानस्य धर्म इति,

10 आत्मनोऽन्य आत्मा आत्मान्तरं तस्य भाव आत्मान्तरत्वं परस्परविभिन्नसत्त्वकारणप्रत्यात्मान्तरत्वं तस्य प्रकाशनं, हि शब्दो यस्मादर्थे, यस्मादभिव्यक्तेः साम्यावस्थानस्य च प्रतिपक्षोऽयमात्मान्तरप्रकारत्वेनात्मप्रकाशनमर्थं प्रकृतेर्धर्मः ।

आशङ्कते—

उपादानभिन्नत्वात् कारणान्तरं साविष्यगुणोपेतमपेक्षत इति, तन्न ज्ञानार्थत्वात्

15 स्वतन्त्रत्वादप्रतिहतगतित्वाच्च तस्य ।

(उपायेति) उपादानभिन्नत्वात्कारणान्तरं साविष्यगुणोपेतमपेक्षत इत्येवमाशुक्तं ज्ञानार्थत्वात् उक्तञ्च "धर्मज्ञानवैराग्यैश्वर्याणि बुद्धिधर्माः, अधर्माज्ञानावैराग्यानैश्वर्याणि च" इति, तेषामष्टानां समुदितैर्ज्ञानेन मोचयतीति, तत्र प्रधानस्य ज्ञानार्थस्य परितःप्रकाशत्वात्मुच्य सविशेषात् । स्यान्मत परतन्त्रत्वात् सहायान्तरमपेक्षते, तच्च न, स्वतन्त्रत्वात्, स्यान्मतं क्वचित् प्रयासे कार्य

20 कश्चिदस्मात्, अन्यासत्वाल्लौकिककामादिकारणविशेषस्याप्युक्तम्, अप्रतिहतसर्वगतत्वाच्च । अत आऽऽत्मान्तरत्वप्रकाशनमिति, आत्मा पुरुषः, आत्मनोऽन्य आत्माऽऽत्मान्तरं तस्य भाव आत्मान्तरत्वं पुरुषान्तरं त्रिगुणस्वभावं सामान्यं प्रधानं पुरुषाय प्रकाशयति । पुरुषादन्यः पुरुष आत्मान्तरं तस्य भाव आत्मान्तरत्वं पुरुषान्तरत्वं तस्मै पुरुषाय प्रकाशनम्यात्मस्वरूपं पुरुषान्तराणां प्रकाशयति ।

परिणमन्ती विशेषान्तं प्रथममारभते निवर्तते चेत्यवद्भूते तस्याः प्रकृतेरिति । प्रकृतेरेव सर्वधर्माणां धर्माणि कारिकान्त-

25 स्यात् अप्रतिबन्धस्य महेतया च तत्तित्कान्तर्भेदाः प्रत्यक्षादर्थान्तरं दोष स्यादित्यविशेषकारणमपरमपीदेति स्यात् कारणान्तरेति । आत्मनोऽन्य आत्मा आत्मान्तरमिति । आत्मनैव प्रधानत्वं प्राप्तं तद्विवक्षत्वं महदा-द्यवस्थास्वन्तरापि तत्कार्यत्वं प्रकृतेर्मैः अनभिव्यक्तत्वं तस्यावस्थानत्व परिणाम महदहङ्कारादिस्वरूपस्य स्वकार्यान्तरं प्रकृतेर्धर्मं इत्यर्थं तेन रूपेण तथा सोऽयमारब्धम्, तत्र तथा प्रकृतेरात्मनेतरपेक्षमिति मतम् । प्रकृतेर्धर्माः कार्यकरणभूतं साविष्यगुणेन घटादिष्वपेक्षते तत्र तथाविधोपायमवैचित्र्यविशेषकारणोपादानभिन्नत्वादिति ।

30 ज्ञानार्थमिव सर्वमात्मास्वात्मना मोचयत्येवेति भावेनाह ज्ञानार्थत्वादिति । पुरुषस्य प्रकाशनात्मकत्वं प्रकृतेर्धर्म-इत्यभिप्रायेणाह आत्मा पुरुष इति आत्मनोऽन्य इत्यादि । आत्मान्तरं पुरुषान्तरमित्यर्थः प्रकाशते पुरुषा-देति । एतत्र पुरुषस्य चैतन्यत्वमात्मान्तरस्वरूपधर्मः परन्तु पुरुषनिष्ठत्वं प्रतिपाद्य पुरुषः पुरुषान्तराणामात्मप्रकाशनरूपकार्य-

पुरुषान्तरत्वं वा चैतन्यस्वरूपमात्ररूपाणुपुरुषैकत्वैः परस्परभिन्नैः पुरुषान्तरैः पुरुषान्तरेषु प्रकाशितेष्वप्यन्येषां पुरुषाणां यत्पुरुषान्तरत्वं तेनैव चैतन्यादिभिर्युक्तं प्रकाशयति प्रकृतेर्वा स्वयमचेतनायाः, अचेतन्यस्वरूपस्य प्रकाशनमयं हि धर्मस्तस्य ज्ञानार्थस्य स्वतन्त्रस्याप्रतिहतसर्वगतस्य प्रधानस्य ।

एवं तस्य स्वभावस्य समर्थ्यैतामीमननिर्व्यक्तिसाम्यावस्थानप्रतिपक्षभूतं नित्यप्रवृत्तत्वं प्रधानस्यानुमिमीते— 5

अतस्तेन नित्यप्रवृत्तेनैव भवितव्यम्, सामान्यतस्तत्स्वभावत्वात्, यथाऽग्निर्दहनप्रकाशनप्रवृत्तः ।

(अत इति) अतस्तेन नित्यप्रवृत्तेनैव भवितव्यमिति प्रतिज्ञा, अत इत्यनन्तरोक्तधर्मत्वात् प्रधानस्य, तद्धर्मत्वमिदानीं हेतुत्वेन व्यापारयितुमाह-सामान्यतस्तत्स्वभावत्वात्, स स्वभावो यस्य तत्तत्स्वभावं प्रधानं पूर्वोक्तहेतुभिर्विशेषितमतस्तन्नित्यप्रवृत्तं भवितुमर्हति, इह यद्यत्स्वभावं तत्तेनैव स्वभावेन 10 नित्यप्रवृत्तं दृष्टम्, यथाऽग्निर्दहनप्रकाशनप्रवृत्तः, यत् पुनर्नित्यप्रवृत्तं न भवति न तत्तत्स्वभावम् यथा न किञ्चिदादरिति ।

दहनादिस्वस्वभावस्याग्नेस्तथा प्रवृत्त्यदर्शनात् साध्यवैकल्यं दृष्टान्तदोष इति तन्निदर्शयन्नाह—

ननु भस्मच्छन्नोऽग्निरपि न दहति, अत्रोच्यते, अथ कथं जीवति, स्थितेर्जीवितपर्यायत्वात्, स्थितिप्रकाशदहनात्मकस्याग्नेः प्रत्यक्षानुमानविषयस्य सतस्तथाऽग्रहणेऽस्तित्वे प्रमा- 15 णान्तराभावात् कथं ज्ञायतेऽग्निरिति, अप्रकाशयन् वा द्रव्यान्तरं तावत्कोशकादि स्वाश्रयमात्रं तत्परिमाणं तावत्, यथा गृहप्रदीपकः पुञ्जितमात्रमपि ।

(नन्विति) ननु भस्मच्छन्नोऽग्निरपि न दहति, न प्रकाशयतीति, दहनप्रकाशयोरभेदात्, अत्रोच्यते अथ कथं जीवतीति जीवनस्थितेश्चेतनत्वात्, चैतन्यमाहारलाभालाभयोः पुष्टिम्लान्यादिदर्शनादनुमीयते, सचेतनत्वं दहने जीवति, स्थितेर्जीवितपर्यायत्वात्, अचेतनत्वमभ्युपगम्यापि स्थिति- 20 प्रकाशनदहनात्मकस्याग्नेः प्रत्यक्षानुमानविषयस्य सतस्तथा प्रत्यक्षानुमानाभ्यामग्रहणेऽस्तित्वे प्रमाणान्तराऽसिद्धेः कथं ज्ञायतेऽग्निरिदहनप्रकाशमानः, अप्रकाशयन् वा द्रव्यान्तरं तावत्कोशकादिस्वाश्रयमात्रं, तत्परिमाणं तावत्—स्वपरिमाणमात्रमपि, स्वाश्रयद्रव्यं कोशकमप्रकाशयन् कथमग्निरित्युच्यते कोशक

चैतन्यचेतनत्वेन कल्पितचेतनप्रतिपादनं वा प्रकृत्यात्मनस्तत्त्वोऽध्यापितत्वात्तस्य प्रधानस्य धर्म इति भावः । अत इति अनन्तरोक्तधर्मस्य प्रतिधर्मत्वमित्यर्थः तेन-प्रधानेन प्रधानं नित्यप्रवृत्तिमत्, स्वभावतः आत्मान्तरत्वप्रकाशनस्वभाव- 25 त्वात्, दहनप्रकाशनप्रवृत्ताग्निवदित्यनुमानकल्पं बोध्यम् । दृष्टान्तेऽस्मिन् प्रकाशनाऽदर्शने साध्यभावं नित्यप्रवृत्त्यमानमाश्रयते शङ्कितेति अथ यदि सोऽग्निर्न दहति तर्हि कथमसौ जीवतीत्युच्यत इति पर्यनुयुज्यते अथेति बोध्यमुपकल्पेरत्वात्- चेतनत्वादात्मस्येति । तथा-स्थितिप्रकाशदहनात्मकत्वात् । प्रत्यक्षानुमानविषयो वस्तुतो न दहतीत्यत्र तदनुपलब्धिमात्रेणोक्तं न प्रकाशयतीति कथं दहनस्य प्रत्यक्षाविषयत्वम्—दहनप्रकाशनयोरिति, अप्रकाशयन् प्रकाशपरिमाणमात्रम् स्वरूपमात्रं तदीयस्वरूपम्—यथोक्तैर्दृष्टैरनुमानम्, सचेतनं तेजः यथाऽग्नीन्धनादाहारोपयोगपुष्टतानामर्थं दृष्टिमिविशेषवत्त्वात् 30 पुरुषवदिति अग्नेर्जीवत्वसिद्धेः कथं भस्मच्छन्नो यद्यग्निर्न तर्हि जीवति न प्रकाशयतीत्यभिमानेनाह कथं जीवतीति, तस्याजीवत्वाभ्युपगमेऽपि प्रत्यक्षमात्रविषयोऽग्निरन्येन स्वाश्रयस्यचेतनस्यमिति ततोऽपि अविदितं प्रकाशस्वाश्रयमात्रमिति, ततोऽपि अविदितं कथं प्रकाशं यथैव तत्परिमाणमिति अस्वरूपाभिप्रायेण बोध्यम् । एवं

प्रसुप्यते, अत्र पुत्तिकादृष्टान्तो गृहप्रदीपकः, गृहे प्रज्वालितः प्रदीपको गृहप्रदीपकः, यथा गृहप्रदीपकः पुत्तिकामात्रमपि यदि न प्रकाशयति प्रकाशात्मकः सन् प्रदीप इति नामधेयमस्तीति वा, वैधर्म्य-दृष्टान्तो वा गृहप्रदीपो गृहं प्रकाशयन्नपि, यदि न तथाऽग्निः समानत्वं प्रकाशयति प्रकाशात्मकः संश्चेतो नास्तीति गम्यते ।

5 किञ्चान्यत्, प्रसज्यमानाभिसाधर्म्याभावोऽपि च प्रधानस्य छादनाभावादित्याह—

छादनाभावोऽपि च प्रधान इति निरावरणाभिव्यञ्जनप्रकाशनवचस्स्वभावत्वान्नित्यप्रवृत्तेनैव भवितव्यमिति तदवस्था नित्यप्रवृत्तता, तदवस्थानभिव्यक्तिसाम्यावस्थानानुपपत्तिः ।

छादनाभावोऽपि च प्रधान इति, अयमेवमर्थः प्रकृतेरावरणाभावमूलमच्छादनाभिमुखत्वं न भवति प्रधानमतो विशिष्य ब्रूमो निरावरणाभिव्यञ्जनप्रकाशनवचस्स्वभावत्वान्नित्यप्रवृत्तेनैव भवितव्यमिति
10 तदवस्था नित्यप्रवृत्तता तदवस्थानभिव्यक्तिसाम्यावस्थानानुपपत्तिः ।

साम्यमर्थं यद्यपि प्रधानं महदादिभावेनास्मान्तरस्वप्रकाशनार्थं पुरुषस्य प्रवर्तते तथापि केषा-ञ्चित्पुरुषाणां कृते प्रयोजनेऽन्येषामकृते कालक्रमेण व्यक्तव्यक्तिसाम्यवैषम्यावस्थाः प्रतिपद्यते सा चास्य प्रवृत्तिः समावासितयोः कालापरम्पारेर्वा, तदपि नोपपद्यते—

कालादिकारणान्तरनिरपेक्षस्य तस्य निरवशेषपुरुषविषये स्वात्म्यत्वज्ञापने कृते कृतकृत्य-
15 त्वात् किं साम्यावस्थानेन ? अकृतेऽप्यकृतकृत्यत्वात् किं प्रतिनिवृत्त्या प्रयोजनमसिद्धेरिव सूपकारनिवृत्तिवदिति तदवस्थमप्रयोजनत्वम् ।

कालादिकारणान्तरनिरपेक्षत्वादि, प्रधानं हि नियतिकालस्वभावेश्वरपरमाण्वादिनिरपेक्षं कार्यं जगतोऽभ्युपगतं भवता, न तु यथा लोकमये कश्चित्कालोऽपि निवर्तिष्यतीति, स्वतंत्र-त्वाच्च तस्य प्रकृतिपुरुषयोः सत्त्वभेदपरिज्ञापनस्य स्वार्थमानुरूप्ययोगापेक्षावद्देन्द्रियभावस्य सम्यग्-
20 ज्ञानादिविकल्पभावस्य यथायथमविरत्यानन्त्योत्सर्गकर्मसम्प्रदायभावस्य च निर्वर्तने स्वतन्त्रत्वान्न कार-णान्तरापेक्षाऽस्ति, सर्वपुरुषार्थप्रवृत्तत्वाच्च कृतार्थस्याकृतार्थस्य च यथार्थत्वं साम्यावस्थानस्य निवृत्तेश्च

प्रकाशको यदि प्रकाशाभावात् [illegible] प्रयोगे [illegible] समर्थो यथा गृहप्रदीपक इति वैधर्म्यदृष्टान्तमिप्रेत्याह वैधर्म्येति । प्रकाशारम्भमपि न सम्भवति [illegible] छादनाभावोऽपि चेति । अस्य यथालोमाने तदनुरूपमर्थे न तथा प्रवृत्तेः [illegible] इति [illegible] भावः । [illegible]-
25 [illegible] यदि प्रकाशयति च तत्स्वभावत्वात् [illegible] प्रकृत्य [illegible]—निरावरणेति । पुरुषनिमित्ता हि प्रवृत्तिः [illegible] पुरुषो यदा [illegible] लक्ष्यते [illegible] [illegible] [illegible] इति न [illegible] [illegible] [illegible] [illegible] [illegible] वाच्यम् [illegible] [illegible]
30 [illegible] समावासमानरूपमितिप्रत्याह—स्वातन्त्र्यमिति । [illegible] [illegible] साम्यावस्थाने कृते तदा [illegible] पुनः [illegible] [illegible] यदि [illegible] कृतमि कुरुते तर्हि तदापि साम्यावस्थानं न [illegible] [illegible]—कालादीति, प्रकृतिपुरुषयोः [illegible] [illegible] किन्तु [illegible]

प्रयोजनाभाव इत्यत आह—निरवक्षेपपुरुषविषये साम्यस्वभावापने कृतकृत्यत्वात् किं साम्यावस्थानेन ? अकृतेऽप्यकृतकृत्यत्वात् किं प्रतिनिवृत्त्या प्रयोजनमसिद्धेर्वन्सूपकारनिवृत्तिवदिति सततमप्रयोजनत्वम् । अत्र चोद्यं प्रागुक्तमनभिव्यक्तिसाम्यावस्थाने चायुक्ते, अप्रयोजनत्वादिभिर्हेतुभिर्हि कार्यक्रियोदासीन्यमिति अतः पुनरुक्तमिति, अत्र ब्रूमः, कारणान्तरापेक्षामतिषेधपरत्वादस्य, प्रवृत्तिनिवृत्त्योः प्रधानस्याप्रयोजनत्वमात्रप्रतिपादनपरत्वाच्चस्येत्यदोषः । 5

अभ्यक्तिसाम्यावस्थानानुपपत्तेश्च किमिति सततसमवस्थितसमनुप्रवृत्ति प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावमेवेदं जगदिति नाभ्युपगम्यते, किमित्यदृष्टं कारणान्तरं परिकल्प्यते ?

अभ्यक्तिसाम्यावस्थानानुपपत्तेश्चेति, अप्रयोजनत्वादिभिरनभिव्यक्तिसाम्यावस्थाने अनुपपन्ने, तस्मादभिव्यक्तिसाम्यावस्थानानुपपत्तेः किमिति—किं कारणं जगदेव स्वभावमिति नाभ्युपगम्यत इत्यभिसम्बन्धः, सततसमवस्थितसमनुप्रवृत्तीति, सततं सर्वकालं समवस्थिता नित्यानुपरता 10 समनुप्रवृत्तिः कारणकार्यप्रवृत्त्यात्मिका, प्रकर्षेण वृत्तिर्यस्य तदिदं जगत् सततसमवस्थितसमनुप्रवृत्ति, प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावमिति, प्रत्यक्षाणि च तानि कारणानि च प्रत्यक्षकारणानि मृत्पिण्डदण्डचक्रचीवरकसूत्रकुम्भकारादीनि घटादीनां कार्याणां तानि नानाप्रकाराणि तन्तुतुरीवेमकुविन्दादीनि पटादीनामित्येवं प्रकाराणि तेषां भेदाः प्रत्यक्षकारणनानाभेदास्तेभ्यस्तेषां वाऽभिव्यक्तिर्घटपटादिकार्यरूपेण सैव स्वभावो यस्य तदिदं प्रत्यक्षकारणनानाभेदाभिव्यक्तिस्वभावं, किं तत् ? जगत्, यदेतदवधार्यते, 15 किमवधार्यते ? प्रत्यक्षदृष्टशुक्रशोणिताहारादिकारणमेवैतदवधार्यते, किमतो निरस्तं ? अव्यक्ताद्यदृष्टकारणान्तरम्, यस्माद् दृष्टकारणनानाभेदाभिव्यक्तिस्वभावमेवेदं जगत् किमिति नाभ्युपगम्यते ? किमित्यदृष्टं कारणान्तरं परिकल्प्यत इति ।

एवं तावत्कारणे कार्यसदसत्त्वानियम उक्तः कार्यानियमोऽपि च, तथानुगम्यमानदृष्टान्ताभावात्, किन्तु मृत्पिण्डशिवकस्थासकोशकुशूलघटकपालशर्करिकापांशुवातायनरेणूनामेव 20 लोके दृष्टत्वात्, पुनरुपचयप्राप्तानन्त्यस्कन्धस्य वातायनरेणुपांशुमृत्पिण्डादेः क्रमाक्रमेण कारणकार्यानियमदर्शनादित्यनियतादि सदसद्भूतकारणाध्यासायिमुक्त्यनिर्मूलत्वं कार्यभूतस्य जगतः ।

(एवमिति) एवं तावत्कारणे कार्यसदसत्त्वानियम उक्तः कार्यानियमोऽपि च काममेव सद्-सदात्मकतद्विशेषकारणमेवेत्यनियमः प्रधानादिप्रसक्तकारणपरिकल्पितकारणपूर्वकमेवेति वा, किं कारणं ? 25

तदेतदपेक्ष्याह प्रकृतिपुरुषयोरिति । असिद्धेर्वदिति यथौदनस्य भोजनाय पाके प्रवृत्त ओदननिष्पत्तिमतिरेकेण यदि निवर्तते वा निवृत्तिर्निष्प्रयोजना तथाऽकृतकृत्यस्य प्रवृत्तिर्निवृत्तिरपीति भावः । 'एते अपि च कल्पने दोषवत्ये' इति मन्येनास्य पौनरुक्त्यं चाह—अत्र चोद्यमित्यादिना । एव स्वभावमिति अवयवं कारणमवयवेन यत्कल्प्यते कारणमपि प्रत्यक्षमिदमेव यदेतदभिव्यक्तमित्यर्थः नाभ्युपगम्यत किमिति किं नाभ्युपगम्यत इति भावः । एतच्च लोकायतमतमवलम्ब्य कारणसतोऽ चैतस्य कार्यं यद्यपि दृश्यते न कार्यकारणसम्बन्धनियम इति तात्पर्यम् । कार्यानियमोऽपि चेति याव- 30 त्कारणं न नियमः, इदं यदेव तत्र तदेव कारणमेव वा अविचारिता कारणमेवेति वा प्रधानमेवेति वा न नियमः नाभिमतलक्षणपरदत्त्वाभावात् किन्तु कार्यं किमिव तु निर्मूलं कारणाभावे कार्यमात्रदर्शनेन नियम इत्यभिप्रायः ।

तथानुगम्यमानद्रष्टव्याभावात्, किन्तर्हि ? एतावानियमः कारणाभ्यासाविमुक्तनिर्मुक्तत्वं कार्यस्येति, तथानुगम्यमानत्वार्थत्वात्, मृत्पिण्डशिवकेऽपि पांसुमृत्पिण्डादेरिवान्वय एतत्कलोर्थनियमो सदसद्भूतकारणाभ्यासाविमुक्तनिर्मुक्तत्वमिति वक्ष्यमाणसम्बन्धात् कार्यमेव सदेवावयेन वा कार्यं भवति वाऽऽविष्करणमित्यस्य वाऽनियमप्रदर्शनार्थमुदाहरणमाह—मृत्पिण्डशिवकेऽपि पांसु-
5 मृत्पिण्डादेरिति, यथा मृत्पिण्डादवयवाविक्षेपायां यावावयवेषु पर्यन्तानामेव लोके दृष्टत्वात्, पुन-रवयवात् मासमानत्वं येषां तन्तूनां ते पुनरवयवमासमानत्वात्मका, यावावयवेभ्यः प्रभृति पुनरवयवक्रमेण पांसुमृत्पिण्डशिवकपालकोशकुसूलघटकपालकर्पररिकापांसुयावावयवेष्व इति एक-क्रमेण कारणकार्यानियमो दृष्टः, एकक्रमेणापि च भेदसंघाताभ्यां कार्यकारणसदसत्त्वानियमो दृष्टः पिण्डमुपमृद्य शिवककरणात्, शिवकमुपमृद्य पिण्डकरणात् स्थाल्यादीनामन्यत्रमप्रकाशविशेषेषु-
10 पमृद्यापि पिण्डादिकरणात् क्रियाभिप्रायक्रमेण च कदाचित्कारणकार्यानियमप्रदर्शनार्थमिति नियतानि, एवमनियत आविष्करणमनियतानि जगतीति सम्भाव्यते तथैवानियतानि सदसद्भूतकारणकार्यं सदसद्भूतं कार्यं तदाभ्यासः येन वा कारणेनाभ्यासोऽविप्रमं तेन कारणाभ्यासेनाविमुक्तिरक्षणः कारणसामा-न्याविनाभावः, न त्वनन्वनिर्मुक्तेस्यविशेषसम्भवकार्यत्वं सम्भवत्, तथैव लोके दृष्टत्वात्, तथा-ऽविमुक्त्याऽनिर्मुक्तत्वं कार्यभूतस्य जगतः ।

15　　अतोऽन्यगम्यतां न किञ्चिदन्यत्र फलं तद्व्याजेन क्रियते तस्मादिदं जगल्लोकप्रसिद्धमे-वानियतानुपरतव्यापाररहितकारणकार्यप्रबन्धमिति पूर्वपक्षवादी शास्त्रारम्भः ।

(अत इति) अतः मोक्षहेतोः दृष्टकार्यकारणसदसत्त्वानियमात् तत्परिकल्पितप्रमाणकार्य-कारणानुपपत्तेः कामविनिर्मोक्षकरणैक्यानुमानाभावात् कारणसामान्यमात्रज्ञानाभावात्मकं न किञ्चिदन्यत्र फलं तद्व्याजेन क्रियते निरर्थकानि शास्त्राणीत्यर्थः । किं तत् ? जगल्लोकप्रसिद्धकारणक-
20 रिक्त वर्तते यदपेक्ष्य शास्त्राणि सार्थकानि स्युः, तस्मादन्यगम्यतामिदं जगल्लोकप्रसिद्धमेवानियतानुप-रतव्यापाररहितकारणकार्यमनन्तमिति, न तु यथाऽन्यैः कल्पितमुपरतव्यापारं सत् मृषा सतीन्द्रियं पुन-रिन्द्रियप्राह्यत्वाविभावेन जगत् सृजति पुनरस्मात् संहृत्योपरतव्यापारं तिष्ठति, न चाभ्यासस्कार्यं

तथानुगम्यमानत्वार्थत्वादिति कारणभावे कार्यभावाभावे तत्समय एवोत्पत्त्यनुपपत्तौ दृश्यते न तु सद्भूतकार-णानि कार्यत्वमिति दृश्यत इति भावः । रेणुपर्यन्तानामेव लोके दृष्टत्वादिति न तु तदपि कार्यं परमाणुपर्यन्त-
25 मपरिदं कारणपरिकल्पितं युक्तमिति भावः । यावानवयवपर्यन्तं विभाज्य वस्तु दृश्यते तावत् पर्यन्तमेवावयवानुपलम्भ-कार्यकारणभावाभ्युपगमः—पुनरवयवपर्यन्ताविति । तथा चैतस्य न कल्पनीयं वाऽन्ये दृश्यत एवं कल्पनोऽतीत भावः । कारणकार्यानियम इति यथाऽपि कार्यमपि कदाचित्कारणमपि पौर्वापर्ये कारणबीजादिवन्नियमो न दृश्यते । तावत्कारणत्वे संघातेन भवतीत्यपि न नियम इत्याह—एकक्रमेणापि चेति । तथैव भवतीत्येव कल्पनीयं—तदपेक्षयारित्वं कारणसत्ता नियमरहितं वस्तुस्वभावत एव कारणकार्यम् । एवं शास्त्रविदो वस्तुस्वरूपविपरीतव्यवस्थानुपपत्तेः न
30 किमपि प्रयोजनमिति शास्त्रारम्भो निष्फल एव—अतोऽन्यगम्यतामिति । अनियतेत्यादि, तत्कारणैककार्यत्वेन वाऽनियतविकारं प्रत्युपलभ्यमानैकत्वबीजं कथं तथा लोकव्यवहारानुगतम् । पूर्वपक्षी—अपराकरणीयत्वे सत्यपि तत्त्वं कारणमिति दृष्टकार्यत्वाविशेषात् कर्तृत्वमपरत्वमप्यविशेष तथानियतानुपलभ्यमानत्वाभावात् तथा एव कारण-मीश्वर एव वैलक्षण्यरूपैक्यस्यासम्भवमात्रात् कारणमावर्तनप्रस्थानमहाप्रलयोऽकार्यः । शास्त्रारम्भो वृथा, तस्मान्न कार्य-

भूयोऽन्यथाविनष्टमसम्बद्धमूर्छं चेतनेति । इतिशब्दो हेत्वर्थः को हेतुः ? शास्त्रनैरर्थक्यम्, कस्मिन् साध्ये ? शास्त्रारम्भप्रयासाभावे, अत आह-नैवमादौ शास्त्रारम्भः ।

क तर्हि शास्त्रमर्थवत्स्यादिति चेत् ? अतीन्द्रिये पुरुषार्थसाध्यसाधनसम्बन्धे, कोऽसावित्यत आह—

अत्र तु शास्त्रमर्थवत्स्यात्, इदं कृत्वा इदं कुर्यादित्याद्यभ्यासे क्रियाक्रियाफलसम्बन्धे, अर्थो हि ससाधनायाः फलादिसम्बद्धायाः क्रियाया एवोपदेशश्चित्रादिवत्, न तु लौकिक एव गृह्यमाणेऽर्थे विचार इदमेवं न चैवं वेति सार्थकः ।

(अत्रेति) इत्यनेन सर्वनाम्ना सामान्यवाचिना सर्वाः क्रियाः फलेच्छाभेदिताः ससाधनाः सूचयति, अग्निहोत्रं जुहुयात् स्वर्गकामः पशुकामो यजेत पुत्रकामो यजेतायुष्कामो यजेतेत्याद्याः, क्रियाक्रियाफलसम्बन्धस्यातीन्द्रियत्वादभ्यासे शास्त्रमर्थवत्, प्रत्यक्षादिप्रमाणैरनधिगम्य इत्यर्थः । अर्थो हीत्यादि, अर्थादनपेतोऽर्थ्यः, हिशब्दो यस्मादर्थे, यस्मात् क्रियाया एवोपदेशोऽर्थ्यः साधनायाः फलादिसम्बद्धायाः, चित्रादिवत्, आदिमध्यान्तचित्रपुस्तकाष्ठकर्मादिवत्, यथावयवस्थानविन्यासवर्णसंयोगप्रविभागविपर्ययविनियोगपुरुषेण एवोपयोगात् सार्थको न कृष्णवर्णचित्रकारादिस्वरूपोपदेशस्तत्र तदनुपयोगात्, तथा मिथ्यामिथ्यात्वादिलक्षणवर्णनं पटपटादेस्त्रिगुणकारणपूर्वकत्वादिवर्णनं जगतः सततप्रवृत्तिप्रवृत्त्युपरमत्वादिवर्णनं वा । आम्नायं यथानक्षणपक्षाद्युपादानारम्भोऽप्रत्यक्षविषयत्वात्सार्थकः, क्रियाक्रियाफलसम्बन्धोपदेशवदितीयदपि सोपपद्यते, यस्मान्न तु लौकिक एव गृह्यमाणेऽर्थे इदमेवमेवेति नैव वेति सार्थकः, विचार इत्यभिसम्बन्धः, प्रसिद्धार्थविषयस्य विचारस्य निरर्थकत्वादित्युपयुक्तत्वात् । चेति प्रतिषेधे, दुर्विज्ञेयत्वे, लोके भवो लौकिकः, देशकालपुरुषक्रियाविशेषापेक्षरूपादिमदर्थे कार्यकारणसन्निवेशादिविषयपाकरागादिके प्रत्यक्षत एव गृह्यमाण इदं सर्वं सत्त्वरजस्तमःसंज्ञत्रिगुणात्मकमेव, न चैतदेवं यथमास्तम्भाम्भसकमित्यादिविचारः किं सम्बन्धः ? किम्फलः ? को वाऽत्र पुरुषार्थसाधनमपरिज्ञानोपयोगः ? इति विचारयतां भवद्भिरेव । आम्नायं लोकदर्शनमप्रमाणमनुपलभलोकप्रसि-

---

त्यादिसमुत्पन्नमात्—को हेतुरिति । ननु भवतु लोकप्रसिद्धेऽर्थे शास्त्रारम्भाभावाभावः [illegible] लोक एव तत्सिद्धेः [illegible] एव [illegible], [illegible]ऽर्थे न शास्त्रारम्भाभाव इति तत्र [illegible]ऽर्थपरमविभागरूपे क तर्हीति, अतीन्द्रियरूपस्य पुरुषार्थस्य [illegible] साध्यसाधनसम्बन्धस्य प्रत्यक्षादिप्रमाणैरनम्युपगमात् [illegible] एव शास्त्रस्य-[illegible]—मतीन्द्रिय इति । [illegible]मित्रहोत्रमिति । यद्यपि [illegible] [illegible] इदं [illegible] [illegible] [illegible] [illegible] न च [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ससाधनायाः फलादिसम्बद्धाया इति [illegible]मनुपपन्नम् । चित्रेति, सामान्य-[illegible], [illegible] [illegible] त्रिगुणेति [illegible] [illegible] सततप्रवृत्तीति [illegible] निरुपाख्यत्वेति [illegible] । [illegible] [illegible] [illegible] । [illegible] न [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]

व्यभिचारात् मृगतृष्णिकादिष्विवेति, अत्रोच्यते तथासति प्रत्यक्षस्याप्रमाणीकरणं प्रमाणत्वेन,

माऽभूदस्याः मृगतृष्णिकादिप्रत्यक्षज्ञानव्यभिचारात् सर्वं प्रत्यक्षं व्यभिचरतीति, किं तर्हि? अनुपहतेन्द्रियमनस्प्रत्यक्षं यत्तन्न व्यभिचरतीति गृह्यताम्, तथा च प्रत्यक्षेण लोके घटादिर्यथा व्यवस्थितस्तथा गृह्यत एव स्वस्थेन्द्रियमानसैस्तत्रार्थे पुनर्वचनमिदमर्थं नैवेति
5 प्रत्यक्षप्रसिद्धेर्बाधकमापद्यते यदि तद्वचन प्रमाणं स्यात्, न पुनस्तत्प्रमाणं तथा प्रसिद्धत्वा स्वयमेव बाध्यमानत्वात्। अनुवादादिभावाभावे यः सिद्धे तस्यारम्भो नियमार्थः स इति परिभाषाया लोके दृष्टत्वात्। नैवं यथेदं लोकेन गृह्यत इति, किन्तु तथा तथा भवतीति वचनम्।

(माऽभूदस्या इति) यथा येन प्रकारेण येन स्वरूपेण, प्रसिद्धार्थं वचनं नियमाद्युपा-
10 दानादन्यत्र प्रमाणं स्यादित्यतो व्यावर्तयन्नाह—अनुवादादिभावाभावे यः सिद्धे तस्यारम्भो नियमार्थः स इति परिभाषाया लोके दृष्टत्वात्। लोकव्यवहारानुवादिव्याकरणादिशास्त्रमपि लोक एवेति कृत्वा, ध्रियत्र पुनर्वचनमित्यत आह—नैव यथेदं लोकेन गृह्यत इति, इतिशब्दो मतार्थेन, इदं वचनं प्रसिद्धेर्बाधकाभिमतमिति भवन्मते कथं नेति प्रतिषेधः? येन प्रकारेण यथा, यथा [illegible] [illegible]परिसरनिर्वृत्तो घटः पृथुबुध्नादिस्वरूप उदकाद्याहरणसमर्थ इति लोकेन चक्षुरादि-
15 भिर्गृह्यते नायमेव स्वभावः। किं तर्हि? यथाऽहं ब्रुवे—द्रव्यं, सर्वोत्पत्तिमत्त्वात्, घटपटदयादिरूपोऽपि गुणकर्मसामान्यविशेषसमवायाश्रयः परमाण्वाद्यारब्धद्व्यणुकादिक्रमेणारब्धकार्यद्रव्यव्यतिरिक्तोऽवयवी [illegible] विभज्यमानो विभज्यमानो न परमाणुषु न रूपादिषु न बुद्धिमात्रे वा तिष्ठति निष्पादकत्वादिति वा यथा तथा भवतीति शास्त्रवचनं मा भूदनर्थकमिति प्रसिद्धेर्बाधकमापद्यत इति व्याख्यायते, यथोक्तम्—"प्रमाणानि प्रवर्तन्ते विषये सर्ववादिनाम्। संज्ञाभिप्रायभेदात्तु विवदन्ते
20 तपस्विनः" इति। तस्मादप्रमाणं प्रत्यक्षविरुद्धत्वाच्छास्त्रकारवचनम्।

शास्त्रकारवचनप्रामाण्ये वा प्रत्यक्षाप्रामाण्यम्, तत्र सर्वविपर्ययापत्तिस्तर्कता, तद्यथा अलोमा हरिणश्चतुष्पात्त्वे सत्युत्प्लुत्य गमनात् मण्डूकवत् मण्डूकोऽपि लोमशस्तस्मादेव हेतोर्हरिणवत्। शूका पक्षिणी पदवत्त्वात् भ्रमरवत्, भ्रमरोऽपक्षः पदवत्त्वात् शूकवत्, तथा पृथिव्यप्सु वा, पदार्थत्वादाकाशादिवदित्यसाधारणधर्मसम्बन्धेनापि, रूपरसगन्धस्पर्शधर्म-

25 [illegible] [illegible] च प्रमाणेषु [illegible] तथा सतीति। [illegible] [illegible] [illegible] [illegible] [illegible]—अनुपहतेति। अनुवादादीति [illegible] [illegible] परिभाषितं [illegible] पुनर्वचनमिति [illegible]
30 नियमस्यैव [illegible] भवतीति [illegible] [illegible] इति प्रति-[illegible]। तथेति [illegible] [illegible] परिदृश्यमान[illegible] विपरीत[illegible] [illegible] इति भाव। [illegible]—अलोमेत्यादिना चतुष्पात्त्वे [illegible] हेतुः [illegible]। [illegible] वैपरीत्यमाह—तथेति, तत एव—पदार्थत्वेन [illegible]

सम्बन्धिनी न भवति तत एव तद्वत्, तथा बौद्धमतेऽपि पृथिवी न भूः, महाभूतत्वाद्रूपवत्त्वाच्च जलवत्, न कक्खटधारणधर्मा सत एव तद्वत्, एवं शेषपदार्थभेदेष्वपि ।

(शास्त्रेति) शास्त्रकारवचनप्रामाण्ये वा प्रत्यक्षाप्रामाण्यम्, एवं सति को दोषः ? तत्र प्रत्यक्षाप्रमाणीकरणे सर्वविपर्ययापत्तिलक्षणः सर्वभावानां प्रत्यक्षप्रमाणसिद्धानां विपर्यय आपादयितुं शक्यते । एवं शेषपदार्थभेदेष्वपीति, अनागतकालिकेषु व्योमनीन्द्रियादिष्वात्मादिषु यथाप्रक्रियं यथा सम्भवञ्च स्वरूपनिराकरणम्, असाधारणधर्मनिराकरणे च पदार्थस्य महाभूतत्वरूपवत्त्वादिहेतुकानि साधनानि योज्यानि ।

महदहङ्कारतन्मात्रेन्द्रियपञ्चाद्यादिष्वात्मनि च द्रव्यगुणकर्मसामान्यविशेषसमवायेषु समभेदेषु नामरूपयोः संज्ञाविज्ञानवेदनासंस्कारेषु चित्सुदकज्वलनपवनेषु चक्षुरादिषु रूपादिषु च दृष्टान्तभेदात् ते ते धर्मा निराकार्याः ।

दृष्टान्तभेदादिति, भूमेराकाशदृष्टान्तवदाकाशस्य भूम्यादिदृष्टान्तेन तथा जलादेरपि परस्परतो ते धर्मा निराकार्या इतरमितरस्य दृष्टान्तं कृत्वेति ।

तार्किक आह—

शास्त्रनिरूपणविपरीतमप्रमाणं न हरिणस्वरूपादि, निरपवादत्वात्, न, सर्वस्यैवापोदितत्वात्, देशकालकृतविशेषैकान्तिनः प्रतिप्रदेशं प्रतिसमयञ्च सर्वं विशिष्टमेव न समानं किञ्चिदतो यावदणुशो रूपादिशो विज्ञानमात्रशो निरुपाख्यत्वशश्च भेदात्कुतो हरिणः कुतस्तस्य लोमायतिष्ठते ?

शास्त्रनिरूपणविपरीतमप्रमाणमित्यादि, शास्त्रेण निरूपणं शास्त्रे निरूपणं वा शास्त्रनिरूपणं सन्दिग्धविपर्यस्ताव्युत्पन्नबुद्ध्यनुग्रहार्थं, किं निरूपयन्ति शास्त्रेण वस्तु अनुमात्रन्यः शिष्येभ्यः ? महर्षिपुरुषादेव क्षणभङ्गो विज्ञानमात्रमेव द्रव्यगुणादि वेति, शास्त्रस्यापवादत्वाच्छास्त्रेणापोदितादि परीक्षते वस्त्वित्यनुमानं प्रमाणं शास्त्रस्य संदिग्धापवादत्वात्, न हरिणादिस्वभावप्रमाणं तत्र शास्त्रस्य मोह एव व्यापार इति तन्निरपवादं हरिणस्वरूपादि, तस्य निरपवादत्वात्, वस्तु लोकेन यथा गृहीत

वैशेषिकाभिमतेनोक्तम्, महदहङ्कारेति सांख्याभिप्रायेण द्रव्यगुणेति वैशेषिकाभिप्रायेण नामरूपयोरिति वैयाकरणाभिप्रायेण नामरूपे व्याकरवाणीति श्रुतेरभिधानं नामरूपव्याकरणमभीष्टं तथा न तु वास्तवमिति । संज्ञाविज्ञानेति बौद्धाभिप्रायेण चित्सुदकेति लोकायतमतमवेत्योक्तमिति । यस्य निरूपणं शास्त्रेण इदं तद्विपरीतायैकरूपमेव प्रत्यक्षादि न प्रमाणम् हरिणस्वरूपादि तु शास्त्रेण न निरूपितमिति तत्र प्रत्यक्ष एव प्रमाणं निरपवादत्वादित्याशङ्कते–शास्त्रनिरूपणेति । शास्त्रेण सर्वमेवापोदितमिति प्रतिपादयति–सर्वस्यैवेति । प्रथमं विशेषैकान्तवादिभिमतमेवाभ्युपगम्य–देशकालेति । सन्दिग्धेति चतुःप्रकाराः पुरुषाः सन्दिग्धो विपर्यस्तो निश्चितमतिश्च तत्र निश्चितमतयः शास्त्रकाराः तत्पक्षपातेनाध्ययनं शास्त्रमनुग्रहमर्हन्ति संदिग्धस्य संशयमुत्पादयन्ति विपर्यस्तो विपर्यासमुपलभ्यन्तीति । तत्र महर्षयः महर्षिपुरुषादेव तत्त्वमिति बौद्धाः क्षणभङ्ग इति विज्ञानवादिनो विज्ञानमात्रमेवेति वैशेषिकाद्यो द्रव्यगुणादि वेति निरूपयन्ति शास्त्रस्य प्रत्यक्षप्रमाणत्वेन तत्त्वाधिगतिरप्रत्यक्षप्रमाणादेरेव प्रत्यक्षानुमानयोः प्रवृत्तिरित्याह–शास्त्रस्येति हरिणादिस्वरूपे तु न शास्त्रस्य प्रवृत्तिः किन्तु प्रत्यक्षादेरेव तत्र प्रत्यक्षादिप्रमाणप्रतिपत्तेऽपि वस्तुनि मोहादितः प्रवर्तन्ते प्रत्युत्पद्यते तथापि यथार्थं मोहतुरुपकारोपेक्षितत्वात् न हरिण्यादीति यथार्थ

तथैव । आत्मिष्टमात्मन्यनुभवरूपमपि तथात्वमेव निरपवादत्वादग्नेरिवौष्ण्यमभिव्यज्यते, न सर्व-
स्यैवापोदितत्वात्, यथा हि शास्त्रं यथाविवक्षुपुरुषविकल्पनात्मकवाक्यप्रभवं तथा हरिणादिस्वरूप प्रत्यक्षे
लोकप्रसिद्धमप्यपवदति, निरङ्कुशत्वात्, तत्कथमिति चेत्? देशकालाकृतिविशेषैरभिन्न इत्यादि ।
अथवा शास्त्रनिरूपणविपरीतमप्रमाणं निरपवादत्वादिति शास्त्रनिरूपणं पृथिवीत्वाद्यपि मनुष्य-
5 पुरुषादि वा तस्य वा विपरीतं सर्वतः प्रतिपाद्यमानमप्रमाणं प्रत्यक्षतर्कयोरविषयार्थत्वात्काल-
केनापोह्यते शास्त्रम्, न केनापि, हरिणस्वरूपादि विपरीतमप्रमाणमिति वर्तते, कथम्? प्रत्यक्षप्रसिद्धेः ।
कस्मात्? सापवादत्वात्, यदि हरिणालोमत्वादि प्रत्यक्षप्रसिद्धेन लोमशत्वादिना विरोधिस्व-
त्वादप्रमाणमेवेति, लौकिक आह—सर्वस्यैवापोदितत्वादिति, शास्त्रेणापि हि हरिणस्वरूपादि प्रत्यक्ष-
सिद्धमपोह्यत एव, कथम्? निरपवादत्वाच्छास्त्राणाम्, वरं हरिणादिस्वरूपविपरीतप्रतिपादनं तर्कतथा-
10 त्वात्सापवादत्वात्, तार्किकैस्तु शास्त्रेण सर्वमपोह्यते प्रत्यक्षतो लोकप्रसिद्धं कारणं कार्यञ्च, तत्कथमिति
चेत्? देशकालाकृतिविशेषैरनन्वितः—देशकृतः कालकृतश्च विशेषो देशकालाकृतिविशेषः, स एवान्वयं,
सोऽस्यास्त्यसौ देशकालाकृतिविशेषैरन्वयी तस्य भावितः प्रतिनियतेर्ष यतिसमयत्र सर्वं विशिष्टमेव न
समानं विशिष्टतो भावतस्तु यो रूपादिर्यो विज्ञानमात्मन्नेव निरपवादत्वात् भेदात् कुतो हरिणः कृष्ण-
स्य लोमात्पवशिष्यते, अतः सर्वमपोदितम्, किं वा नापोदितं किं चात्र प्रत्यक्षमनुमानं चेति ।

15 तथा सर्वसर्वात्मकैकान्ते मण्डूकोऽपि लोमश एव, स्थावरस्य जङ्गमतां जङ्गमस्य स्थाव-
रस्य स्थावरतां, जङ्गमस्य स्थावरतां जङ्गमस्य जङ्गमतां गतस्येति वचनात् ।

(तथेति) ननु तेन वादिना सर्वं समर्थितं नापोदितमिति चेत् सर्वस्य सर्वात्मकत्वे सर्वैक्यात्
किं तत्सर्वमिहापोदितमेव, भिन्नार्थसमूहाभिधानात् सर्वशब्दस्य ।

अर्थानर्थविषयसामान्यविशेषज्ञानानामैकान्त्येऽप्यसदात्मकत्वात् कुतोऽस्य हरिणमण्डूकस्य
20 गुणकार्यपरमितसंयोगगुणोत्क्षेपणकर्मभवनप्राप्तिपराङ्गमवायाः, सर्वथा सत्त्वानुपिण्डितत्वात्
खपुष्पवत् अन्यथा वाठकुमारवत् ।

(अर्थेति) अर्थानर्थविषयसामान्यविशेषज्ञानानामैकान्त्ये—अर्थविषयं सामान्यमर्थविषयश्च विशेषः,
तद्यथा—द्रव्यस्य पृथिव्यादेरर्थविषयं सामान्यं रूपरसगन्धस्पर्शवती पृथिवी वर्णवायुगुणवं सा
पृथिवी, रूपरसस्पर्शद्रवस्नेहवन्त्य आपः, एवं यत्र रूपस्पर्शौ तत्तेजः, यत्र स्पर्श एव स वायुरिति
25 सामान्यं, विशेषः पृथिवीतरेतरधर्मव्यावृत्तिनिमित्तिरूप चतुर्गुणाद्यपेक्षगुणत्वं पञ्चसंख्यम्, तेजसोऽपरत्वे-

---

पर्यायेण प्रत्यक्षविषयाणामनुमानविषयावयवोत्तरवर्ती न सर्वस्यैवेति । अत्र अस्ये [illegible]
प्रत्यक्षस्य विचारः इत्यत्र अस्यैति अस्ये वार्ता निरपवादं तर्कः तापनार इति मत्वा प्रत्यक्षादिनिषिद्धं निरपवादं तर्कमनुमानतो
हरिणादिस्वरूपादि तथैव प्रतिपाद्यते येनवादि [illegible] विशेषैरनुमते कथमेतदत्र तथैव कालेन सर्वमपोदितमिति
[illegible] विवरणयेनम् । अर्थविषयं सामान्यमिति [illegible]
30 अन्ते भेदे सामान्यविशेषलक्षणा पृथिवीत्वमाने रूपादिचतुर्गुणत्वाद्भावत पृथिवीत्वस्य रूपादिचतुर्गुणसमवेतत्वं तत्र-
अनुमते तथैव चातुर्गुण्यं [illegible] विशेषः, एवं जलादावपि भाव्यम् [illegible] पृथिवीत्वं विशि-
ष्टरूपत्वात्सामान्यं [illegible] प्रति भावः । एतेन [illegible] परस्परस्वरूपभेदे [illegible]

सामान्यं पृथिवीत्वं तत्सम्बन्धकत्वात् पृथिवीबुद्ध्यभिधानयोः, एवमप्तेजोवायुत्वानि सामान्यानि, विशेषा इतरेतरेभ्यश्च एव स्वसामान्यभेदा विशेषाः, एतानि द्रव्याणि गुणाः कर्म सामान्यानि विशेषा स्तत्समवायलक्षणश्च सम्बन्ध इत्येते पदार्थाः, तेषां भावास्त्वं तत्त्वं प्रमेयत्वप्रत्ययाभिधानमेवानिति ये वदन्ति तेषां यथानयस्यैकान्तेऽवधारणकत्वात् कुतोऽण्डहरिणमण्डूककारणकार्यपरमितसंयोगगुणो- त्पतनकर्मभवनव्यावृत्तिसमवायाः, अण्डग्रहणेन हरिणमण्डूकसमवायिकारणद्रव्यग्रहणं परमत्वेन 5 हरिणमण्डूकग्रहणेन च समवाय्यणुद्व्यणुकाद्यारम्भनिर्वृत्तावयविद्रव्यं कार्यं गृह्यते, तत्र हरिणमण्डूकाधि- द्रव्ययोः मरण्यां संयोगो गुणः, उत्पतनं कर्म भवनं भावः सत्ता व्यावृत्तिरपि भवनमविलक्षणो विशेषः तेषां तथा समवायः सम्बन्ध इति षडप्येते पदार्था वक्ष्यमाणखपुष्पदृष्टान्तान्न सन्ति, का तर्हि भावना ? नास्ति परपरिकल्पितं द्रव्यं गुणकर्मसामान्यविशेषानात्मकत्वात् खपुष्पवत्, असामान्यविशेषानात्म- कत्वात् खपुष्पवत्। न पृथिवी पृथिवीत्वव्यपदेश्या पृथिवीत्वादत्यन्तमन्यत्वादुदकवत्, पृथिवीत्व 10 न पृथिवीत्वव्यपदेश्यं पृथिव्या अत्यन्तमन्यत्वात्, जलत्ववत्, न सन्ति गुणकर्मसामान्यविशेषसम वायाः, अद्रव्यात्मकत्वात् खपुष्पवत्, एवमेकैकस्यपरीतरानात्मकत्वात् खपुष्पवदास्ति, इतरस्वरूपवद्वा न स्वात्मस्वरूपमिति शेषपदार्थदृष्टान्तमेवाभायोज्यमिति। द्रव्यञ्च भव्य इति वचनात् भवतीति भव्यं द्रव्यं भवनं च भावः भवनादन्यत्वाद्द्रव्यादयो न सन्त्येव वन्ध्यापुत्रवत्, भवनमपि द्रव्यादन्यत्वा- भावत्सेव वन्ध्यापुत्रवत्, न भवति वा द्रव्यं भवनस्वरूपानापत्तेः वन्ध्यापुत्रवत्, एवं भवनमपि द्रव्य- 15 स्वरूपानापत्तेरसत्, एवं गुणादयोऽपि व्यावृत्तिः समवायश्चेति, अथवा क्रियागुणव्यपदेशाभावात् सदेव कार्यमिति शाक्य इति यथोपपद्यते निर्मूलत्वात् खपुष्पवत्, एवमगुणत्वाद्गुणादन्यत्वसामा- न्यत्वात् सामान्यादन्यत्वविशेषत्वाद्विशेषादन्यत्वकारणत्वात् कारणादन्यत्वकार्यत्वात् कार्यादन्यभाक्ति, एतेभ्यो हेतुभ्यः कुतोऽण्डहरिणमण्डूककारणकार्यपरमितसंयोगगुणोत्पतनकर्मभवनव्यावृत्तिसम- वायाः, न सन्तीत्यर्थः। तदुपसंहृत्योच्यते सर्वथा तत्त्ववृत्त्यव्यतीतत्वात्, तत्र भावस्तत्त्वं, तत्त्वस्य 20 वृत्तिस्तत्त्वेन तत्स्वरूपाव्यतिरेकेण च वृत्तिर्यथा द्रव्यमेव वर्तते तथा तथा रूपरसादिगुणाः क्षितिगत्यादिक्रियाः भवनव्यावृत्तिसम्बन्धिन्यः, एकपुरुषपितृपुत्रत्वादिधर्मसम्बन्धिवदिति तां वृत्ति सर्वथा व्यतीतत्वात्, द्रव्यगुणादिषट्पदार्थानां सविकल्पानामसत्त्वं खपुष्पवदित्यन्ये दृष्टान्तं व्यपदिश

[illegible]त्वादिपर्यायाभ्यामेव भवनपुरुषस्यैवैकत्वेनावस्थानादित्यादि, यो हि कश्चित् तत्त्वम् [illegible] यान्तुवेति च न तत्स्वरूपानपायेन, इति [illegible] न तु सर्वथा भेदः [illegible] 25 न सन्त्येव, तत्र तत्रापि तत्स्वरूपानपायेऽपि। अण्डग्रहणेनेति, हरिणमण्डूकयोः समवायिकारणीभूतं कार्यं गृह्यते [illegible] इति भावः हरिणमण्डूकग्रहणेन चेति, परमाण्वणुद्व्यणुकाद्यारम्भस्वरूपाभिप्रायेण [illegible] [illegible]। क्रियागुणेति [illegible] [illegible] [illegible] प्रागभावप्रतियोगी तदर्थं [illegible] तत्र हेतुः क्रियागुणव्यपदेशाभावादिति तदर्थं क्रियावत्त्वेन गुणवत्त्वेन [illegible] [illegible]। [illegible] गुणादीनां [illegible] 30 [illegible]। तथा च द्रव्यादिपदार्थेषु [illegible] कुतोऽण्डहरिणमण्डूकस्य इति भावः। द्रव्य- गुणादिषट्पदार्थानां [illegible] सर्वथेति [illegible] भवनव्यावृत्तिसम्बन्धित्वं तद् [illegible] द्रव्यगुणादिषट्पदार्थ [illegible] भावः। तत्र [illegible]

सर्वत्र दृष्टव्यस्तथा च बोधितः । अन्यथेति, वैधर्म्येण बालकुमारवत्, यथाहि तत्तत्स्वरूपतत्त्वाद् विप्रतीत न भवति यथा बाल एव कुमारः कुमार एव च बालोऽन्यो च तावत्स्वाभेदात् बालत्वमूर्ध्व कुमारत्व कुमारत्वान्वय बालत्वमिति तत्तत्स्वरूपा तत्त्ववृत्तिः, तां व्यतीत्य न स बालः कुमारो वेति स च संस्कारस्वावृत्तिव्यतीतो न भवतीति ।

5 हरिणादिस्वरूपविषयोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेवातथात्वमिति चेन्न, तत्कस्यानुभ्यत्वात् ।

(हरिणादीति) चेदित्याशङ्कायाम् आशाशङ्का हरिणस्वरूपं लोमशत्वं तस्य विषयोक्तिर्लोमा हरिण इति, तस्यां विषयोक्तौ प्रसिद्धिविरुद्धा प्रतिज्ञा यस्य सः प्रसिद्धिविरुद्धप्रतिज्ञः, तद्भावः प्रसिद्धिविरुद्धप्रतिज्ञत्वं तस्मादेवातथात्वमिति, अत्रोच्यते नोक्तमनुल्यत्वादिति, नेति प्रतिषेधे, नैतदुपपद्यते किमत् ? तत्कस्मात्, एतेन तुल्यमुक्तवत्, यथोक्तं प्रत्यक्षनिरूपणविपरीतमप्रमाणं निरपवादत्वादिति तेनैतदपि तुल्य हरिणादिस्वरूपविषयोक्तौ प्रसिद्धिविरुद्धप्रतिज्ञत्वादेवातथात्वमिति अत्रापि उत्तरस्यापि तुल्यत्वात्, कथमिति चेत् ? न सर्वस्यैवापोनितत्वादिसादि सर्वं तदेव भावस्तद्रूप्य भवत्यथा बालकुमारवदिति ।

किञ्च—

15 लोकस्य चाप्रामाणीकृतत्वात्तथा कुतः प्रसिद्धिविरोधः कथं वा तत्प्रसिद्धिः । एवं वच-नेऽभ्युपगमविरोधात् ।

(लोकस्येति) ननु भवतामेकान्तवादिनां लोकमप्रमाणीकृत्य लोकप्रसिद्धिविरुद्धप्रतिज्ञत्व दोषापादनमभ्युपगमविरोधाय कल्पते, तस्मादयुक्तमेव वक्तुमिति ।

स्यान्मतं प्रतिज्ञादोषपरिहारेण स्वरूपादिविपरीतप्रतिपादनाप्रामाण्यं न शक्यते वक्तुं भवदभ्युपेतवि 20 रोधात् हेतुदोषपरिहारेण तु शक्नोमीत्यत आह—

लोमशालोमिकये सपक्षासपक्षावृत्तिवृत्त्योरसर्क इति चेन्न दृष्टान्तस्य प्रत्यक्षप्रसिद्धिविष-यत्वादसिद्धेर्लोकस्याप्रमाणीकृतत्वात् कुतस्तर्कासर्कत्वविचारः ।

न तत्त्वैवा तत्त्वहतिव्यतीतं बालकुमारवदिति व्यतिरेकदृष्टान्तं संस्करोति वैधर्म्येणेति योऽसौ बालः स एव कुमार इत्येवस्वरूपोऽभेद बालत्वकुमारत्वे अवस्थे तद्रूपे ते चाविरोधेन तत्र वर्तेत इति तत्त्वहतिव्यतीतो न भवति बालकुमारः 25 तत्त्वादिति भावः । अलोमा हरिण इत्यनुमानस्य प्रसिद्धिविरुद्धप्रतिज्ञत्वं भवते इत्याशङ्कते इति मतथात्वमिति हरिणस्य लोमेत्यभिप्रायः । यथाप्रत्यक्षाद्या बालकुमारत्वविपरीतेऽप्यविरुद्धता वर्तते तथोक्तेतरमेवात्रापि स्वकालभिकार उपपद्यते इति अनुमानाभिप्रायार्थविपरीतप्रतिपादकस्यापि प्रमाणत्वं तत्रैव च तत्रैव निराकृतत्वात् यद्वा तत्त्वादि-व्यतीतत्वात् इत्ये हरिणादि लोमादि वा येन प्रत्यक्षप्रसिद्धिर्न तत्त्वा भवेदिति भावः । अभ्युपगमविरोधादिति, लोकेऽ प्रमाणनिराकृतगमाः हरिणस्येत्यादि लोके प्रसिद्धमना निर्लोमा हरिण इति प्रतिज्ञा लोकविरुद्धेति प्रतिज्ञत्वं निराकृतमिति 30 नेव सिद्धमिति भावः । प्रतिज्ञाय हरिणस्वरूपविपरीतार्थप्रतिपादकत्वान्निर्लोमा हरिण इत्येवंरूपाया प्रतिज्ञाप्रतिविधिसत्त्वादमनोत्थ निराकरणमप्यरेऽपि तत्परपक्षेलोर्लोकविरोधप्रतिज्ञत्वेन निराकर्तुं वक्तुं शक्यत इत्यभिप्रायेण वादी आह स्यान्मत मिति । सपक्षासपक्षावृत्तिवृत्त्योरिति सपक्षेऽवृत्तेरसपक्षे वृत्तेश्च साध्यसाधनयोर्व्याप्तिरित्याशङ्कायामेतदिति

(लोमशेति) लोमशालोमशैकत्वे सपक्षासपक्षानुवृत्तिव्यावृत्त्योरतर्क इति चेत्, मनुष्यास्ते सत्सु क्षुद्र गमनादरिणो निर्लोमा लोमशो मण्डूक इत्युभयोरुभयधर्मोपपत्तौ लोमशालोमशैकत्वे समर्थ हेतुधर्मपरिकल्पनकृतानेकान्तादरिणोऽलोमशत्वे साध्ये सपक्षे निर्लोमन्यवृत्तेरसपक्षे च लोमशे वृत्तेर्विरुद्धो हेतुर्मनुष्यत्वे सत्सु क्षुद्र गमनादिभावपत्ते, सपक्षासपक्षवृत्तित्वात्साधारणानैकान्तिको वा, लोमशालो मैकत्वे पक्षायेकधर्मभेदे च सपक्षासपक्षाभावादसाधारणानैकान्तिको वा तस्मादेषोऽतर्कः, मतर्कत्वाच्च हरिणादिकरूपविपरीतमविपादनमप्रमाणम्, चेदित्याशङ्क्याह, एतल्लोकमन्यसे तव, दृष्टान्तस्य प्रत्यक्षप्रसिद्धिविषयत्वात्, दृष्टान्तो हि लोके प्रत्यक्षप्रमाणप्रसिद्धो घटपटादिरर्थः, तद्विषयत्वा साध्यसाधन समन्वयव्यतिरेकविभावनम्, सर्वोऽनुमानस्य सर्वावयवानां च तद्बलेन साध्यसिद्धौ सामर्थ्यसिद्धेः। यथोक्तम् "दृष्टान्तबलसमन्वयप्रसिद्धिप्रधानत्वात् सर्वावयवानां येन दृष्टान्तत्वमभिधीयते प्रत्यक्षत्वाच्च तस्य तदसत्प्रतिपत्तेरसेयं तत्सिद्धान्तदर्शनमदमोऽस्मद्वे प्रत्यक्षमाहे च सिद्धवति परोक्षमाहः सिद्धोपदसिद्धौ संभावनाभाव एवे"ति। ततस्तस्य दृष्टान्तस्यासिद्धिर्लोकस्याप्रमाणीकृतत्वात्, प्रत्यक्षस्य च दृष्टान्तस्याभावे कुतो धार्मान्विकसाध्यसाधनसमन्वयव्यतिरेका इति प्रत्यक्षनिराकरणे तर्कासिद्धिरेव। कुतस्तर्कोऽतर्कत्वविचार इति, ततश्चासौ हरिणादिकरूपविपरीतापत्तिदोषः।

किञ्चान्यत्—

इहैव भवान् यं दोषमापादयति स तव, अप्रमाणीकृतत्वाल्लोकस्य, सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वापत्तेः।

इहैवेत्यादि यावदसत्त्वापत्तेरिति, यथा च हरिणादिकरूपनिराकरणे भवान् यं यं दोषमापादयति स स तवैव, अत्र च वीप्सार्थो द्रष्टव्यः, तव—तवैवैकान्तवादिनः, एवकारोऽवधारणे, यथाऽस्मिन् साधने मम दोषो नास्ति तवैवेति, त्वदभ्युपगमानुरूप्येणोपपादितम्। तथा मात्रैव, किं तर्हि ? सर्वत्राप्यत्रापि पक्षहेतुदृष्टान्तेषु दोषस्तवैव न ममेत्यर्थः, अप्रमाणीकृतत्वाल्लोकस्य प्रत्यक्षस्य चेति वर्तते, कारणान्तरोपन्यासोऽप्ययोऽभिधीयते सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वापत्तेः यदि हि भवतामन्वयव्यतिरेकाभ्यामर्थानुमान तौ च सपक्षासपक्षयोर्वृत्त्यवृत्ती तद्बलेन साध्यसिद्धिस्तयोरेव चाऽसत्त्वमापद्यते, ततश्चैतौ सपक्षासपक्षवृत्त्यवृत्त्योर्यथासंभवमसत्त्वापत्तेस्तवैवाविशेषैकान्तवादिनस्त्वनुमयानेकलैकान्तवादिनो चेति हेतूदेशमात्रमेवत्।

विपक्षित्वात् विरोधसाधारणासाधारणानैकान्तिकदोषप्रसङ्गः। सपक्षे निर्लोमनि मनुष्ये हेतोरस्तीत्यसपक्षे लोमशेऽपि मण्डूके दोषोऽस्तीति हेतुः एवं विरुद्धो मण्डूकादिः निर्लोमत्वादिकमोक्षमुभयोरुभयधर्मोपपत्तिमिति यदीयदि प्रमाणमेवस्वीकारे सपक्षे मण्डूके विपक्षे लोमशे नानावृत्तौ हेतोर्व्यभिचारो हेतोरित्याह—सपक्षासपक्षेति [illegible] पक्षमात्रवृत्तित्वाद्धेतोरसाधारणानैकान्तिकत्वमित्याह—पक्षा मेवादिति दृष्टान्तस्य प्रत्यक्षत्वादुक्तेन हेत्वापत्तावनुमानं [illegible] प्रत्यक्षाप्रमाणे दृष्टान्ताभाव तर्कस्य तत्स्वीकारो न भवितुमर्हतीत्यादर्शेन निराकरोति दृष्टान्तत्वेनेति। यं दोषमापादयसि स तवैवेत्यत्र वीप्सार्थो विवक्षित इत्याह—यत्र चेति। तवैवेत्यत्रैवकारस्य विवक्षितार्थमाह तव तवैवेति। हरिणादिकरूपनिराकरणायोपन्यस्ते अन्यत्र च हेतौ ये ये दोषा त्वयोद्भाव्यन्ते ते ते दोषाः तवैव स्युर्न मम। भवता लोकस्य प्रत्यक्षस्य चाप्रमाणीकरणात्, व्याप्तिर्निरेव व्याप्तिर्हि अन्वयव्यतिरेकाभ्याम् अन्वयश्च तत्सद्भावे व्यतिरेकश्च तदभावेऽभाव एतयो सम्यग्ग्रहीतो विशेषादिनो वा भवतोऽप्यत्वं व्यवस्थापयेनाह—यथासिद्धिविचारे। तस्मान्नैवान्यथा सपक्षासपक्षवृत्त्यवृत्त्योरसत्त्वमाह—तत्र तावदिति। तथा-

तदिदानीं प्रत्येकं विवियते—

तत्र तावदविशेषैकान्ते कुतोऽन्यपक्षोऽसपक्षो व्यावृत्तिर्वा, अन्यस्याभावादविशेषात्, तद्वदसमानस्याभावात् ।

(तत्रेति) अविशेषः सामान्यमविशेष एवैकान्तः सत्र सर्वात्मकमिति, तस्मिन्नविशेषैकान्ते
5 तव मते कुतोऽन्यपक्षः, अन्यस्य पक्षोऽन्यपक्षः, प्रतिवादिनोऽन्यस्याऽभावात्, तथापि वाऽन्येनाविशे-
षात् सर्वसर्वात्मकत्वाविशेषात् । अथवाऽन्यस्य वचनस्याभावात्, तद्वचनात्मकत्वादेव सर्ववच-
नानाम्, तदन्यवचनत्वविशेषाभावादेव वा, अथवा किं नः परवादिवचनयोरभावाभ्युपगमविहितवच-
नाभ्याम्, अन्यथासौ पक्षमेवान्यपक्षोऽर्थोऽस्तु, न, कुतः ? तत्पक्षात्तपैकात्म्यस्यादर्शादविशेषैका-
न्तात् । एव निरः सम्बोऽसत्वकत्वमिति वादिनोऽनित्यमन्यपक्षवचनवाच्यामाससमाः तद्वचनि-
10 सधर्मसामान्येव सभासस पदार्थरभावाभिविशेषान्यवादिनोऽसपक्षाभावस्वरूभावात्तस्याभावः । वा-
क्यात् कुतस्तपक्षः सपक्षः व्यावृत्तिर्वा, सर्वसर्वात्मकत्वाभेदादेव ।

सांख्यम्—

आविर्भावतिरोभावयोरभूत्वा भावाभूत्वा चाभावादनित्यत्वकृतकत्वे क्व एवेति येन तत्त्व एव तथाभिव्यक्तेः ।

15 (आविर्भावेति) आविर्भावतिरोभावयोरभूत्वा भावाभूत्वा चाभावादनित्यत्वकृतकत्वे क्व एवाविशेषवादिनोऽपीष्टेत्यभ्युपगम्य, कुतः ? तत्त्व एव तथाऽभिव्यक्तेः, तस्यैकत्वं तस्यैव एव तथा—येन प्रकारेण तथाऽभिव्यक्तेः, किमुक्तं भवति ? घट एवाभिमाता अन्वयीनाविर्भावतिरोभाव मात्रत्वादनुत्पत्तिकत्वाद्गुणावयवयोरिवावयवाविशेषाभिव्यक्तेः किमन्यामूत्वा मृत्पिण्डशिवकपरतापघटादुः, तथा तत्त्व एव तथाऽभिव्यक्तेः कुतोऽन्यपक्षोऽसपक्षो व्यावृत्तिस्तपक्षः सपक्षस्तत्त्वमेति यात्-
20 न्यते तदेवाविशेषैकान्तवादिनः सपक्षासपक्षयोरुभयोर्विपक्षस्वरूपविपरीततायामसाधनम्येवास-
त्त्वापत्तिरिति ।

[illegible]

तथा—

विशेषैकान्ते कुतस्तत्पक्षः सपक्षस्तत्सत्त्वं वा, देशतः परमाणुशो रूपादिशो विज्ञानमात्रशोऽनुपाख्यत्वावधि भेदात्, कालतोऽत्यन्तपरमनिरुद्धक्षणादूर्ध्वमनवस्थानाच्च कुतस्तत्पक्षः, धर्मधर्मिणोर्विशेषणविशेष्ययोश्चासम्भवात् कुतः सपक्षः, ? सत्त्वं वा तत्र तदभावात्, तथाऽसिद्धेः ।

(विशेषैकान्त इति) अत्रापि तस्य पक्षो बहुवचनस्य वा स एव वा पक्ष इत्यर्थः, पक्षमानिनः अन्य इति धर्मधर्मिणोर्विशेषणविशेष्ययोश्चासम्भवात् कुतः सपक्षोऽर्थान्तरसम्बन्धसामान्याभावात्, साम्याभावसामान्याभ्युपगमे सपक्षासपक्षाविशेषप्रसङ्गात् कुतः सत्त्वम् ? तत्र तदभावात्—कृतकत्वादिसविकल्पधर्मान्तराभावात् परस्परविलक्षणनिर्व्यापारधर्ममात्रत्वात् सर्वधर्माणां निरुपाख्यस्वलक्षणपरमार्थत्वाच्च प्रतिज्ञादिपक्षव्याप्त्यभावः, वाक्यत्वात् पूर्ववत्, उपसंहृत्य तदर्थावबोधनो हेतुरुच्यते 'तथाऽसिद्धेः' तेन प्रकारेण तथा, क्षणिकनिर्व्यापारशून्यत्वप्रकारेणासिद्धेः कल्पितधर्मत्वेति विशेषैकान्तेऽपि सर्वत्र पक्षसपक्षपृथक्त्वाद्यसत्त्वापत्तिरित्यर्थमिति ।

तथा—

तदुभयानेकान्तैकान्ते नोभयमिति साध्यसाधनधर्मधर्मिण एव कुतः ? तथाऽपूर्वत्वात् ।

(तदुभयेति) सामान्यविशेषौ तदुभयमनर्थ-मिश्रं परस्परतः इत्येवमिमप्येकान्ते साध्यसाधनधर्मधर्मिण एव कुतः ? साध्यस्य तावन्नित्यत्वस्याभावो धर्ममात्रस्य निर्मूलत्वात्, खपुष्पवत्, तथा साधनस्यापि कृतकत्वस्य, कृतमित्यनुकम्पितं कुत्सितमज्ञातं वा कृतकं, निर्मूलत्वं पुनर्द्रव्यासम्बन्धिमत्त्वादिति धर्मयोरभावः, धर्मिणोरपि शब्दघटयोरगुणकर्मत्वादिभ्यो हेतुभ्यः पूर्वोक्तवदभाव एव, तत्सङ्ग्रहहेतुरप्युच्यते—तथाऽपूर्वत्वात्, अपूर्वत्वममूलत्वं द्रव्यगुणादीनां परस्परतोऽत्यन्तमन्यत्वात्, एवं तावत्पक्षासपक्षपृथक्त्वविपरीतत्वाद्यनेकावयवदोषो दृष्टान्तवचनादर्शसिद्धेरित्यविशेषविशेषोभयानेकान्तैकान्तवादेषूक्त दोषाः ।

किञ्चान्यत्—

दृष्टान्तस्य प्रत्यक्षत्वाद् दृष्टान्ताभ्युपगमात् प्रत्यक्षप्रमाणीकरणमापन्नं तस्माच्च लोकत्वं दृष्टान्तसंवादित्वप्रतिपादनार्थत्वाच्छास्त्रार्थस्य, ततश्च प्रतिज्ञातव्याघातः ।

---

१ [illegible] विशेषैकान्त इति । तत्पक्ष इति [illegible] इति [illegible] वा एकत्वे स एव पक्ष इति [illegible] । पक्षश्चेति, [illegible] विशेषणविशेष्ययोः [illegible] सामान्याभावात् परमाणुरिव सोऽपि न [illegible] [illegible] किन्तु क्षणिक एव तथापि न [illegible], तथापि [illegible] विज्ञानमपि [illegible] [illegible] विशेषैकान्ते [illegible] न धर्मधर्मिणो विशेष्यविशेषण[illegible] [illegible] इति भावः । विशेषणविशेष्यभावस्य[illegible] तथाऽसिद्धेरिति [illegible] विशेषणविशेष्यभावासम्भवात् [illegible] इति भावः । क्षणिकनिर्व्यापार[illegible] । [illegible] तदुभयेति । धर्ममात्रस्येति [illegible] । निर्मूलत्वात्—[illegible] । [illegible] । दृष्टान्तस्येति, [illegible]

(दृष्टान्तस्येति) दृष्टान्तस्य प्रत्यक्षत्वादनुमानत्वाद्वेति लोकव्यवहारोपमानत्वादागमत्वात् प्रतिज्ञाया दृष्टान्ताभ्युपगमात् प्रत्यक्षप्रमाणीकरणमापन्नं तस्मात् लोकस्य दृष्टान्तसंवादित्वप्रतिपादनार्थत्वाच्छास्त्रार्थस्य, तार्किकाणां तर्केणपरिशुद्धत्वं व्याख्यातं, यथोक्तम् "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" इति (गौतमसू० अ० १ आ १ सू, २५) यथालोके दृष्टान्तत्वमित्थं
5 यदभिधीयते तद्दृष्टान्तविरुद्धमिति । ततः को दोष इति चेत् प्रतिज्ञातव्याघाता, किं प्रतिज्ञात ? शास्त्रनिरूपणविपरीतमप्रमाणं न इतिप्रकारणापि, निरपवादत्वादिति, तदुपगम्यते शास्त्रप्रमाणीकरणे, प्रत्यक्षप्रमाणलोकस्य प्रवृत्तत्वात् ।

शास्त्रस्याप्येवालौकिकत्वमिति चेन्न, लौकिकत्वादेषां शास्त्राणाम् ।

(शास्त्रस्याप्येवेति) स्यान्मतं मनूक्तं "शास्त्रकाराः कार्यार्थप्रतिपादनकुशलाः युक्तिसंवाद
10 सार्थं दृष्टान्तमार्गस्थैः शास्त्रार्थान् प्रतिपादयन्ति, न पुनः शास्त्रार्थो लोकैः प्रत्यक्षीकर्तुं शक्यास्तत एव तदर्थंवादीनि शास्त्राण्यलौकिकाः" इति, तच्च न, लौकिकत्वादेषां शास्त्राणाम् ।

तानि हि शास्त्राणि सामान्यविशेषकारणकार्यमात्राणां सामान्यमात्रस्याग्नेः कारणमात्रस्य स्पर्शशीतत्वादेर्दृष्टस्य विशेषमात्रस्यार्चिष्मतु मथनतोत्पादविनाशकस्य दृष्टस्य सर्वप्राण्यारोपेण प्रणीतानि ।

15 (तानीति) तानि हि शास्त्राणि यस्मादर्थे हितम्, यस्मात्तानि सामान्यविशेषकारणकार्यमात्राणां सामान्यमात्रस्य वह्नेः कारणमात्रस्य स्पर्शशीतत्वादेर्दृष्टस्य विशेषमात्रस्य चार्चिष्मतु मथनतोत्पादविनाशरूपस्य दृष्टस्य सर्वप्राण्यारोपेण प्रणीतानि । शीतस्यैव सेवाविसामान्यस्य कारणात्मनस्संज्ञानमात्र दृष्टा सम्यायसम्बन्धान्तरेण तस्य सामान्यस्य भिन्नमात्रमपरमविशेषेण संज्ञानमात्रं न कार्यं न विशेषस्तथाऽन्येऽपि यदयदायोऽर्थाद्वे गुणमप्यसंज्ञानमात्रमिति सर्वप्राण्यारोप्य तदर्थानि
20 शास्त्राणि प्रणीतानि कारणमेव सामान्यमेव सर्वत्रैवत्यार्थेन प्रतिपादयमसङ्गेन । तथाऽर्थिषां प्रतिज्ञाकोत्पत्तिविनाशपार्थक्यानि दृष्टा रूपरसस्पर्शगन्धसूक्ष्मसंविदसामान्याव्यवसानमन्तरेण तदसम्भवमपदपनिर्णयेन विशेषमात्रं न सामान्यं न कार्यं तथाऽन्येऽपि मद्दीमहीप्रसरित्समुद्रद्वीपगगनतारागणग्रहगणादयो भावा इति सर्वप्राण्यारोप्य तदर्थानि शास्त्राणि तत्प्रतिपादनप्रसङ्गप्रचरणनाविमहत्तरापारलोकसमुद्रीभूतानि प्रणीतानि ।

---

25 स्वतन्त्र नियमसुखादयन्तैप्यतो तेन पूर्वप्रत्यक्षविषयप्रतिपाद्यमानं प्रत्यक्षकरणत्वात् प्रत्यक्षमिति । हेतुः वाक्यानुमितिवाक्यसमत्वादनुमानम्, इतरच तत्कार्यं व्योतुरुदाहरण वाक्यार्थतत्वस्य प्रतिपादकत्वात् प्रतिज्ञाऽऽगम इति बोध्यम् । लौकिकपरीक्षकाणामिति लोकयान्ननयातीता लौकिका वैयर्थिक वैनयिकं च बुद्ध्यतिशयमप्राप्ताः तद्विपरीताः परीक्षकाः तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्ति यमर्थे ज्ञातारौ लौकिकपरीक्षकौ तमर्थं बुद्धिसाम्यत्वे लौकिक परीक्षक इत्यत्र जानन्ति बुद्धिसाम्यात् तद्भावे लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः । एतदर्थं दृष्टान्तसमुदेशं तदित्याभिधानं
30 दृष्टान्तविरुद्धमुच्यते तथा च प्रतिज्ञाहानिः स्यात् तत्प्रतिरूपणविपरीतमप्रमाणमिति हि प्रतिज्ञा निरपवादत्वादिति हेतुः तथा च वार्तं प्रत्यक्षार्थं तत्र लोकनिरूपणनिरपवादीति दृष्टान्तविरोध इति भावः । युक्तिसंवादमर्थमिति प्रयोगप्रयोजनमात्मप्रतिसंवदनतात्पर्यार्थविषयत्वे तात्पर्यादिपूर्वकशास्त्रार्थमात्रतत्वे न तु तत्र युक्तिर्निर्णयत्वम् । तत्र दृष्टान्तमूलकार्थयुक्त्यैव तदेशेऽलौकिकत्वमतिप्रसिद्धा तथार्थप्रतिपादनतात्पर्यकस्य न लोकत्वमिति भावः । स्पर्शशीतत्वादेर्दृष्टस्येति प्रत्यक्षपरिदृष्टानि हि सर्वशास्त्रविशेषार्थं कारणमुक्तमेकं सामान्यं दृष्टा तदेव मूलं निर

अन्यत्र दृष्टस्याध्यारोपाद् घटत्वस्य पटे अलौकिकत्वमिति चेन्न तथा व्यामोहस्य मृगतृष्णिका-वदलौकिकत्वात्, मृगतृष्णिकायामेव तस्याप्रामाण्यप्रसंगात् ।

(अन्यत्रेति) स्यान्मतं लौकिकमितीन्द्रियप्रामाण्यमुच्यते घटरूपादिवत् यत्र घटे घटत्वस्य विज्ञस्यापाकारविशेषस्तस्यान्यत्र पटान्तरेऽध्यारोप्यते, तत्र मास्त्वध्यारोपादेव, लोकसंवादात्तु प्रतिपाद-नार्थोऽध्यारोपः, एवं शास्त्राणामप्यध्यारोपादेवालौकिकत्वमिति नास्ति प्रतिज्ञातव्याघातदोषो न भवान् 5 मन्यते लोकस्यापरोक्षत्वादिति, अत्र ब्रूमः न, तथा व्यामोहस्य मृगतृष्णिकावदलौकिकत्वात्, तेन प्रकारेण तथा, तथा—सत्यं भवति तदलौकिकमविप्लुतत्वान्मृगतृष्णिकाविज्ञानवत्, विप्लुतलोकस्य न पुनः सम्प-द्यते, मृगतृष्णिकायामेव तस्य च व्यामोहस्याप्रामाण्यप्रसङ्गात्, रूपरसादौ मीष्मोष्मसम्पातचक्षुषो रश्मि-विरूपाः पतिताः प्रत्युत्पतन्तो दूरव्यामोहदेवमस्त्रोपपद्यमानत्वे तथाप्यलौकिकविज्ञानस्य मृगतृष्णिका-विज्ञानवदप्रामाण्यप्रसङ्गादसमञ्जसोऽग्राहम् । 10

किञ्चान्यत्—

तथा च तत्र प्रतिज्ञादीनामप्यनुपपत्तिः यदि यथा लोकेन गृह्यते न तथा वस्तु ।

(तथा चेति) न केवलं शास्त्रविज्ञानाप्रामाण्यमेव, किं तर्हि ? तेन प्रकारेण तथा, तथा च एवं कृत्वा तत्र सति तस्मिन्नलौकिके मृगतृष्णिकावत् प्रतिज्ञादीनामप्यवयवानामनुपपत्तिः, कथं ? यदि यथा लोकेन गृह्यते न तथा वस्तु, यदीति पराभ्युपगमं दर्शयति यथा प्रतिपादनकौशलेन प्रतिपादनमनु- 15 विसंवादमात्रत्वेन दृष्टान्तमुपादाय यथाहं युक्त्योपपादयामि शास्त्रेण च तथा तद्वस्तु, न तु यथा लोकेन गृह्यते तथेति भवतोऽभिप्रायः ।

तत्र प्रतिज्ञा तावदयोक्ता गृह्यमाणाऽविशेषादेर्न तथा स्यात् । तत्रार्थांशे प्रत्यक्षवि-रोधः स्ववचनविरोधोऽभ्युपगमविरोधः, स्वोक्तविपर्ययस्याभ्युपगमात् ।

(तत्रेति) अविशेषैकान्तवादे तावत् सर्वस्य सर्वात्मकत्वाभिमतः शब्द इति प्रतिज्ञा यथा 20 श्रोत्रेण गृह्यते न तथा भवितुमर्हति, किं कारणं ? नेत्रादिमात्ररूपाद्यात्मिकापि सेति कृत्वा, एवं विशे-षैकान्तवादेऽप्यनित्यः शब्द इति प्रतिज्ञा अक्षरनिकायविवर्णविज्ञानानां देशकालकृतासन्त्वनानात्वम

स्यादिति यथा सर्वत्रापि अन्यस्यान्यत्राध्यारोप्य सर्वं सामान्यमयमिति व्यवस्थापयितुं प्रणीतानि विशेषवादिशास्त्राण्यपि प्रयोजनवशात् अविकल्पप्रवृत्तेस्तत्रापि तदारोप्य सर्वं क्षणिकमिति प्रतिपादयितुमारचितानि एवं संस्थानविशेषप्रतिपा-दकमप्यपीति लोकप्रमाणं तेषामिति भाव । अन्यत्र दृष्टस्यान्यत्रारोपाद् घटस्य पटेऽध्यारोपस्य च अलौकिकत्वमलौकिकत्वात् 25 लोकप्रमाणं शास्त्रेऽध्यवसीयते—मन्यसे इति । अन्यत्र घटधर्मसामान्ये किमर्थमारोप्यते इत्यत्राह—लोकसंवादादिति । [illegible] मृगतृष्णिकायामुदकोपलम्भवत्तेन व्यामोहमात्रत्वादलौकिकत्वेऽपि न तदिष्टवस्तुनः उपलब्धिः, तथा च मृगतृष्णिकाविज्ञानवदेव व्यामोहमूलं शास्त्रविज्ञानमपि न प्रमाणं भवेदित्याशयेनोत्तरयति अत्र ब्रूम इति । प्रतिज्ञा-दीनामिति तदनिर्देशादेवापि मृगतृष्णिकावदप्रामाण्यमिति भावः । लौकिकपरीक्षकबुद्धिसाम्यादर्थं दृष्टान्तमुपादायापि यथैव लोकेन गृह्यते न तथा वस्त्विति लौकिकव्यवहारापेक्षम् [illegible] यथा प्रतिपादनकौशलेनेति । 30 प्रतिज्ञादीनामनुपपत्तिं सामान्यविशेषोभयवादाश्रयेण दर्शयति तत्रेति । नेत्रादीति [illegible] रूपादात्मकत्वेन शब्दं श्रोत्र-ग्राह्यत्वं [illegible] केवलं [illegible] [illegible] भावः । अनित्यः शब्द इति प्रतिज्ञा हि अक्ष-रोत्पत्त्यपेक्षतोत्पत्तिरूपत्वादिरूपेण गृह्यते तत्र [illegible] विशेषैकान्तवादे परस्परापेक्षाभावेन उपलभ्यमानानामनेकत्वात्— अनित्यः शब्द इतीति । उभयानेकान्तैकान्तवादे [illegible] [illegible] [illegible]—

णिकत्वादन्यस्यानिरपेक्षत्वात् परस्परापेक्षाभावे सर्वभावाभावे च यथा गृह्यते न तथा स्यात्, एवमु भयानेकत्वैकान्ते पूर्ववदन्यतरमात्रस्येतरपक्षनिरपेक्षस्याभावात् । तदभावे प्रत्यक्षविरोधः, तदभ्रेति तस्यैव हेतोरुक्तेः गृह्यमाणस्य विपरीतत्वादविशेषैकान्ते तावत् प्रत्यक्षविरोधः, अंशे भागे तस्यैव वस्तुनः, अविशेषैकान्तवादिपरिकल्पितस्य प्रत्यक्षोपलभ्यस्य विशेषत्वात् प्रत्यक्षविरोधः, अंशे स्ववचन-
5 विरोधस्तत्काले प्रतिपाद्यप्रतिपादकविशेषत्वेष्टेः, अंशेऽभ्युपगमविरोधः, सम्प्रति सर्वत्र प्रसिद्धेन पूर्वकाला- भ्युपगतेन सर्वात्मकत्वेनापुनरुक्तधर्मधर्मिविशेषस्य विरोधात्, लोकविपर्ययरूपाभ्युपगमादित्यत्र कार णमुक्तम्, प्रत्यक्षस्ववचनाभ्युपगमानामनभ्युपगमाविशेषात् । एवं विशेषैकान्ते श्रोत्रेन्द्रियमात्रस्य शब्दस्य तावन्मात्रकालावस्थानपूर्वोत्तरवर्णसम्बन्धपदतुल्यावस्थानलोपात्मकस्वप्रत्यक्षत्वात् प्रत्यक्षविरोधः, तथैव च तल्लोपपदे स्ववचनेनाभिन्नप्रत्यक्षप्रतिज्ञा विरुध्यते, अत एव चाभ्युपगमेन विरोधः, पूर्ववत्स्व एव
10 हेतुरत्रापि । तथोभयानेकत्वैकान्ते प्रागभिहितसाधनाभ्येषात्र व्यापार्यमिति, अनुज्यमानानित्यस्य च वा प्रत्योऽप्यतीतानित्यस्याभावः । 'अथाणुपरमाणुगुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यं सतो क्रियाभा- वात् कार्यत्वात् कारणतो विभागात्' (वैशे अ १, आ १) इत्यादिप्रकारविहितहेतूपन्यासानर्थं तत्प्रतिपादनकाले तदयोगात् प्रत्यक्षीकरणाद्यानित्यस्वप्रत्ययाभावात् प्रत्यक्षविरोधः, स्ववचनस्य तत्प्रत्यक्ष तथावस्थानाभ्युपगमात् स्ववचनविरोधः, पूर्वाभ्युपगमेन वैशेषिकमस्य विरोधादभ्युपगम-
15 विरोधः, पूर्ववत् लोकविपर्ययरूपाभ्युपगमादिति सर्वत्र हेतुरिति ।

अथ तथाऽभ्युपगम्यते न तर्हि लोकगृहीतमभ्युपेत्यापगमम्, लोकस्याप्रतिज्ञात व्याघातस्तदवस्थः ।

(अथेति) अथ तथा, अथैते दोषा मा भूवन् नित्यत्वाभावा इति तथैवाभ्युपगम्यते परेणातो न तर्हि लोकगृहीतमभ्युपेतापगमम्, लोकस्याप्रतिज्ञातव्याघातस्तदवस्थ इति ।

20 किञ्चित्तथा किञ्चिदन्यथा, सम्यक्तत्प्रतिपत्तिरिति चेदेवं तर्हि साक्षाल्लोकप्रज्ञापत्याऽ- भ्युपगमविरोधः, किञ्चिद्ग्रहणात्तथाग्रहणादन्यथाग्रहणाच्च ।

प्रत्यक्षेण निर्मूलस्यैवाप्रत्यक्षीकृतस्य—एवमुभयेति । अंशे—भागे इति एकत्वैकस्याप्रत्यक्षासिद्धत्वं तत्र विशेषत्वात् अंशेन सर्वविशेषकत्वविरोध इति भावः । तत्कार्यं वर्णं वर्णात्मकमिति येन तद् भिन्नः शब्द इति प्रयोगकाले विशेषयेत् [illegible] विशेषस्यैव प्रतिपादकविरोधः एवमेवाभ्युपगमविरोधोऽपीत्याह—सर्वत्रेत्यादि इति । सर्वत्रेति सर्वकाल-
25 मभ्युपगमार्थं प्रयोगकालेऽनभ्युपगमस्य [illegible] भावः । श्रोत्रेन्द्रियमात्रस्येति [illegible] इति [illegible] पूर्वोत्तरवर्णसम्बन्धस्य [illegible] लोपस्वरूपस्य च [illegible] प्रत्यक्षत्वात् [illegible] भावः यथापीति [illegible] एव हेतुरित्यर्थः । अथाणुपेति [illegible] एव [illegible] [illegible] कर्मभिः साधर्म्यार्थं न [illegible] तत्र [illegible] विशेषत्वात् [illegible]
30 [illegible] प्रतिपादनार्थं [illegible] शब्द इति प्रयोगात् [illegible] [illegible] इति भावः । अथ तथेति [illegible] लोकेन [illegible] तथैवेत्यभ्यु- पगमे [illegible] प्रतिज्ञातव्याघात एवेति भावः । तथा—लोकवत् अन्यथा—[illegible] साक्षादिति, एवं यदि [illegible] व्याघात इत्यर्थः । [illegible]—किञ्चिदिति ।

(किञ्चिदिति) साम्प्रतं किञ्चिल्लोकेन गृहीतं तथैव भवति प्रतिज्ञातं, किञ्चिदन्यथा पतति, लोकस्यापरीक्षकत्वात्, परीक्षकाश्च पदवाक्यप्रमाणविदः, दृष्टान्त उन्मत्तप्रतिपत्तिः, यथोन्मत्तोऽपरीक्षकः पदवाक्यप्रमाणानभिज्ञः किञ्चित्तथा प्रतिपद्यते किञ्चिदन्यथा, तत्प्रतिपत्तिश्चाप्रमाणम्, सदसतोरविशेषापादनच्छोपलब्धेश्च तद्वल्लोकप्रतिपत्तिरपीति, अत्रोच्यते, एवं तर्हि साक्षाल्लोकपक्षापत्त्याऽभ्युपगमविरोधः, साक्षादिति प्रक्रान्त एव लोकपक्षापत्तिः, किञ्चिद्ग्रहणात्तथाग्रहणादन्यथाग्रहणाच्च, किञ्चित्त्वादेव न सर्वं सर्वात्मकं सर्वासर्वत्वसिद्धिश्च विभागनिर्देशात् किञ्चिदिति । एवं तेन प्रकारेण तथेति स चान्यश्च तयोश्च कश्चिद्धर्मः प्रकारोऽन्यापेक्षमाणेऽपि तथ्यः, तेषु त्रिष्वपि सिद्धेषु सत्सु तथेति पठ्यते । एवमन्यथेत्यपि, अयमन्यस्मादन्यः, अन्यश्चासावन्यश्च इति सर्वासर्वत्वसिद्धेर्लोकपक्षापत्तिः । एव विधेऽनेकान्ते देशकालक्रमात्मसम्भवेऽपि निरुपाख्यत्वशून्यत्वेषु किं तत् स्यात् किञ्चिदिति विभज्यान्यस्मादवस्थितादनवस्थितमसद्वाऽन्यदिति चोक्तेव विलक्षणमिति, एवं तथाऽन्यथेति च न घटते । एवमुभयानेकत्वैकान्ते पूर्ववद्द्रव्यादीनामितरेतरात्मकत्वात् सामान्यविशेषयोः कार्यकारणयोर्वा निर्मूलत्वादिभ्यो वा हेतुभ्योऽसत्त्वाद्वस्तुनः किञ्चित्तथाऽन्यथेत्यनुपपत्तेर्लोकपक्षापत्तिः, तथा च सह सर्वसर्वात्मकत्वादिशास्त्राभ्युपगमो विरुध्यते । एष तावत् प्रतिज्ञा दृष्टा, प्रतिज्ञावदेव दृष्टान्तावपि दृष्टावेव, तत्साम्यत्वात् ।

उन्मत्त इति च दृष्टान्तो लौकिकस्तमभ्युपगम्य लोकः प्रमाणीकृत एव, तन्निराचिकीर्षव एवोन्मत्ततराः ।

(उन्मत्तेति) उन्मत्त इति दृष्टान्तो लोकपक्षपाताद्वै न सिध्यति, यत्सद्भावे माद उन्माद इति मदान्यतरापेक्षो विमदत्वापेक्षो वा निर्देशः, स च लौकिक एव तमभ्युपगम्य—तस्माल्लोकाभ्युपगमाल्लोकः प्रमाणीकृत एव किञ्चित्किञ्चित्तथाऽन्यथेत्यादिपरस्परविलक्षणः, तन्निराचिकीर्षव एवोन्मत्ततरा इति, एवं तावद्वाक्यविषयो दोषः ।

इदानीमेकपदविषय उच्यते—

भेदवदभेदपदार्थोपादानाच्च न तथेति पुनर्नयोऽभ्युपगमविरोधः ।

(भेदवदिति) भेदवदभेदपदार्थोपादानाच्च न तथेति, भेदोऽस्यास्तीति भेदवान्, नास्य भेद इत्यभेदः, भेदवांश्चाभेदश्च स एवेति भेदवदभेदः, कोऽसौ ? पदार्थः, घट इत्यादिः, कार्यद्रव्यलिङ्ग

विभागनिर्देशादिति, किञ्चित्तथा किञ्चिदन्यथेति विभागेन निर्देशादित्यर्थः । एवमिति, किञ्चित्तथा किञ्चिदन्यथेत्यत्र किञ्चित्त्वस्य तथात्वस्यान्यथात्वस्य च [illegible], तत्र किञ्चित्त्वात्सर्वत्वमिति [illegible] तथा—यथा लोकेन गृह्यते तथैव पदार्थः [illegible] तयोः प्रकार [illegible] तथेति [illegible] एवं सर्वसर्वैकत्वे तत्र स्यात् [illegible] सर्वासर्वत्वसिद्धिरिति भावः । अन्यथाग्रहणमपि [illegible] धेत्यपीति । [illegible] यथा लोकेन [illegible] किञ्चित्तथा किञ्चिदन्यथेत्यपि न घटते [illegible] इति । [illegible] लोकपक्षापत्तिरिति । [illegible] इति । [illegible] एवं [illegible] तावदिति । [illegible] दोष इति [illegible] इदानीमिति । पदार्थ इति, [illegible]

संख्याकर्मादिविकारकरूपः । यदुक्तं शब्दप्रयोगपदपङ्क्तावाम् "स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्। समवेतस्य च वचने लिङ्गं संख्यां विभक्तिं च॥ अभिधाय तान् विशेषानपेक्षमाणस्तु कृत्स्नमात्मानम्। प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः॥" (महाभाष्ये अ० १ पा० २ सू० ७४) इति व्याकरणे सर्वतन्त्रसिद्धान्ते । तत्र स्वार्थं इति जातिराकार उच्यते स एवार्थः स्वार्थं इति,
5 सोऽप्यपेक्षत्वादन्येन विना न स्वातन्त्र्यो द्रव्यादिसिद्धेर्भेदयन् पदार्थः, तेषामेव च कार्योदीनामन्योऽन्यानात्मकत्वे सम्पूर्णपदभावः स्यात्, कैवल्यमपरमेयोपलब्धेर्वाक्यार्थसिद्धेरभिन्नः पदार्थः, तस्मादेव पदमेव पदार्थं उपादाय पदं प्रयुञ्जानेन शास्त्रविदा स्वार्थमात्रवादिनाऽपि, यथा द्रव्ये लिङ्गे संख्यायां कारके कुत्सादौ पदार्थे च बोध्यम्, क्रमेण युगपद्वा वाच्य इत्यभ्युपगम्याविशेषवादिनो विशेषवादिन समवायेऽवस्थानादिनो वा न तथेति तथैव पुनर्वदते, अतोऽभ्युपगमविरोधः, तत्र इति न शास्त्राभ्युप
10 गमेन, किं तर्हि ? तत्प्रकाराभ्युपगमेनेत्यर्थः । स च सर्वत्राभ्युपगमविरोध इति ।

अथ प्रतिज्ञैवाभ्युपगमस्ततो लोकाप्रामाण्यात्, न, अविशेषादिप्रसक्तः पक्षादेरुपादानाल्लोकाभ्युपगमाल्लोकाप्रामाण्यं न सिद्ध्यतीति ।

(अथेति) अथ प्रतिज्ञैवाभ्युपगमः—स्याम्मतं न हि पदप्रयोगविषयोऽभ्युपगमोऽस्ति, पदार्थाभावात्, पदार्थस्तोऽभेद्यानिषयत्वाद्वाक्यार्थाविनाभावत्वेनोपोद्बलकस्य वाक्यार्थस्य व्यापकत्वात् ।
15 वाक्यस्यैव शब्दः, तदर्थ एव च शब्दार्थः, तस्मात् प्रतिज्ञैवाभ्युपगमः, तस्याप्यनर्थत्वाल्लोकवाचकस्य व्यापारस्य । कस्मात् ? ततो लोकाप्रामाण्यात्, यतः—यस्याः प्रतिज्ञाया हेतुभूतायाः, पक्षादिलक्षणः

इत्यर्थः । स्वार्थमभिधायेत्यादि, [illegible] स्वार्थः च [illegible] जातिगुणक्रियाद्यन्यतमस्वरूपः यथा गौः शुक्लः पाचकः डित्थः इति । तं स्वार्थमभिधाय तेन स्वार्थेन समवेतं सम्बद्धं द्रव्यमाह शब्दो निरपेक्ष इति यथा शब्दोऽभिधायको स्वार्थोऽपेक्ष्यते न तथा स्वार्थेऽभिधायकोऽपेक्ष्यते निमित्तान्तरम-
20 पेक्ष्यते द्रव्यमिति [illegible] तदिति पदार्थं [illegible] तत्र जातिशब्दो यदा जातौ वर्तते [illegible] जातिमाहेति तदा तेन करणं कार्यं जातिस्तु द्रव्यम् । यदा तु जातिविशिष्टं द्रव्यमाह तदा जातिः कार्या । गुणशब्दो यदा गुणमात्रे वर्तते तदा तेषां करणं कार्यः जातिर्द्रव्यम् । यदा तु गुणे वर्तते तदा गुणसामान्यं कार्यः गुणो द्रव्यम्, यदा द्रव्ये वर्तते तदा गुणः कार्यः । समवेतस्य द्रव्यस्याभिधाने सति लिङ्गं वचनं विभक्तिं चाहेति सम्बन्धः । तान् विशेषानिति लिङ्गादीनेव परामर्शः लिङ्गं [illegible] वचनं संख्या विभक्तिः कारकं कर्मादि । [illegible]
25 कार्यं यथा श्रीः कुमारः मधुरम्, एको द्वौ बहवः कर्म करणं सम्प्रदानमिति [illegible] [illegible] तत्र यथा च [illegible] निवर्तितेति तथान्येव [illegible] । यत्र तु [illegible] कुमारः श्रीः कुमारेभ्यो द्वौ बहवः इति तत्र [illegible] यद्यपि लोके [illegible] पदार्थः [illegible] [illegible] व्यापाराभावात्, [illegible] [illegible] [illegible] व्यापारात् एवं
30 स्वार्थमभिधायैव वाक्यम्, [illegible] द्रव्यस्याभिधानेन [illegible] [illegible] [illegible] [illegible] संख्या [illegible] [illegible] । एवम् विशेषानभिधाय स्वार्थादिव्यवहारं [illegible] प्रियकुत्सनादिषु विभक्त्यन्तः पुनः प्रवर्तते [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति भाष्यव्याख्यानम् । ततो लोकाप्रामाण्यादिति । यद्यपि [illegible]

लोकाप्रामाण्यात्—लोकस्याप्रमाणत्वसिद्धेः, नित्यः शब्दोऽकृतकत्वादाकाशवदिति नित्यत्वे सिद्धे घटवद-
नित्यानित्याद्यनेकरूपैकवस्तुप्रतिपत्तिर्लोकेऽप्रमाणं भवतीत्यत्रोच्यते न, अविशेषादित्यसतः पक्षादेरुपा
दानाल्लोकाभ्युपगमादिति सर्वं सर्वात्मकमित्यत्राभिन्नविशेषैकान्तेऽभ्युपगते पुनर्नित्यः शब्द इत्यस्य
पक्षस्य तदेकत्वोदाहरणस्य चाभावः पूर्वोक्तेभ्यो हेतुभ्यो निर्विशेषत्वादिभ्यः । तथा विशेषैकान्ते पूर्वोक्त-
हेतुभ्य एव पक्षादीनामभावः, निर्मूलत्वादिभ्य उभयानेकत्वैकान्तेऽपि परस्परविभिन्नत्वभावानां 5
सामान्यविशेषकार्यकारणानामभाव इत्युक्तम्, तस्मादविशेषादित्यसतः पक्षादेर्लोकप्रसिद्धस्योपादाना
ल्लोक एव पुनरभ्युपगतो भवद्भिरिति शास्त्रविद्भिः, तस्माल्लोकाभ्युपगमाल्लोकः प्रमाणीकृत एव,
किञ्चित्किञ्चिद्यथाऽप्यपेक्षाभिः परस्परविलक्षणव्यवहाराभ्युपगमात् लोकाप्रामाण्यं न सिध्यतीति, ते
यूयं सुदूरमपि गत्वा लोकमेव शरणं गन्तुमर्हाः शास्त्रविदः ।

एवं शास्त्रव्यवहारो लोकदर्शनमन्तरेण न सिध्यति, लोकवदेव चार्थ इति व्यव- 10
स्थाप्य शब्दप्रयोगात् ।

(एवमिति) एवं शास्त्रव्यवहारो लोकदर्शनमन्तरेण न सिध्यतीति, वाक्यविषयः पदविषयो
वा, ततः साक्षात् लोकसमापत्त्याऽभ्युपगमविरोध इत्युक्तः, तथा तद्विषयः स्ववचनविरोधोऽपि प्रति-
पत्तव्यः । कस्मात् ? लोकवदेव चार्थ इति व्यवस्थाप्य शब्दप्रयोगात्, लोकेन तुल्यं वर्तते, लोकस्येव,
लोक इव वा लोकवत्, एवेत्यवधारणे, किमवधारयसि ? लोकेऽर्थमवधारयसि, नार्थे लोक शास्त्रविदा- 15
मपि लोकत्वात्, पृथक्त्वेऽप्यर्थलोकयोरुभयत्र चाऽयमेवकारो द्रष्टव्यो लोकवदेवार्थोऽर्थवदेव लोक इति
द्वयोरपि परस्पराव्यभिचारात्, शास्त्रविदां लोकपृथक्त्वे लौकिकार्थपृथक्त्वे च तत्कल्पितार्थाना-
मिति । इतिशब्दः प्रकारे, अनेन प्रकारेण व्यवस्थाप्य—युक्त्याऽभ्युपगम्य स्वनिश्चितार्थप्रतिपादनार्थं
परेषां शब्दप्रयोगात्, पदात्मको वाक्यात्मको वा शब्दप्रयोगव्यवहारो लोकानुपातीत्यनिष्टैरपि
शास्त्रकारैः । 20

तत्र च—

यथा सत्यत्वसिद्धे शब्दार्थे ततः पुनर्न यथालोकमाह चास्त्विति विरुध्येत ।

(यथेति) येन प्रकारेण यथा, येन प्रकारेण सत्पादिरपुरुषत्वादिकेऽर्थे घटशब्दो लोकेन
प्रयुक्तस्तेनैव प्रकारेण सत्यत्वेन सिद्धे—सत्यत्वसिद्धे लोके शब्दं प्रयुञ्जानैः शास्त्रविद्भिर्लोकोऽभ्युपगतोऽ-

---

पपन्न एव नास्ति परस्परविलक्षणकार्यनिबन्धनात् किन्तु शास्त्रेभ्योऽन्येभ्यश्च—वचनानुसार एवं पृथक् निष्पन्नमेव 15
शब्दैरेव प्रस्तव वचनस्य तदर्थ इत्यादिरूपता क्रियते केवलं पदार्था एव शब्दार्थबुद्धिविषयाः पदानि च तत्
समर्थसंनिधान नित्यवाच्यतामि न वाक्यार्थं [illegible] पदार्थेभ्यश्च पृथक्त्वे [illegible]
तदर्थ एव शब्दार्थत्वात् प्रतीतेन शब्दार्थः तदर्थगतिसम्भावेऽपि [illegible] शब्दान्तरेण प्रतिज्ञानार्थस्य लोकप्रामा-
ण्यस्य [illegible] परस्परविलक्षणानामपि लोकप्रामाण्यसिद्धिरिति पूर्वपक्षाभिप्रायः । सामान्यादिवादे पक्षादेरसतोऽभ्युपा-
दानेन व्यवहारे तु तत्र लोकप्रामाण्यं सिद्धमित्याह—अविशेषादित्यादिना । वाक्यविषयः पदविषयो वा 20
व्यवहारो लोकदर्शनमन्तरेण न सिध्यति तदनुगमे लोकप्रामाण्याभ्युपगमविरोध इत्याह एवमिति । कुतो न
सिध्यतीत्याह—लोकवदेवेति । नार्थानुसारेण लोकः किन्तु लोकानुसारेणार्थ इत्याह—लोकेऽर्थमिति । ननु शास्त्र-
विद्भिर्लोकाः निर्णीयन्ते न तु लोकैरित्याह—शास्त्रविदामपीति । इत्यत्रापीति शास्त्रविद इत्यर्थः । शास्त्रवि
दामिति, एकत्वेऽपि लोकभिन्नत्वे तत्कल्पितार्थानां लौकिकार्थभिन्नत्वे च लोकवदेव चार्थ इत्यभ्युपगमविरोध इति भावः ।

स्वामिभिरित्युक्तमेव भवत्यपीति, ततः पुनर्न यथालोकमाह वस्तिवति विरुध्येत, लोकस्य भावो लोकभावः, भाव इव भावः, यो यो लोकभावो यथालोकभावम्, किं तत् ? वस्तु, यथैवाऽऽलोपालम्भसिद्धं वस्तु तथायो भावी यो यो यथा शब्दः प्रयुज्यते स स न तदर्थः स्वामिभ्यामपि स्ववचनेनैव विरुद्धमाह, स्ववचनेन तद्वचनं विरुध्येत, विरुद्धवचनेनाशङ्कावचने सिद्धे कथं मुखमिथुनं विरुध्यत एवेत्य-
५ र्थोऽभ्येत ?, कथमिति विरुध्येतेति दाक्षिण्यमाचार्यः स्वकं दर्शयति एवं तावत्स्ववचनविरोधः ।

लोकविरोधः प्रस्तुत एव, तद्विरोधेऽप्रवृत्तेः ।

(लोकेति) स्मृतिविरोधो लोकविरोधः, स तु प्रस्तुत एव, तद्विरोधेऽप्रवृत्तेः, तेन लोकेना-विरोधे शास्त्राणामप्रवृत्तेः, तस्मा स्वैः शब्दप्रयोगादैवाभ्युपगतया विरोधमनुपपाद्य शास्त्राणामविशेष-विशेषोपसंपादनेऽस्यैकान्तप्रतिपादनानामप्रवृत्तेः, कथमप्रवृत्तिः ? तानि स्वधर्मार्थमनुमुपु, कथं
१० लोकस्यापेक्षुः, यदि स्वयमनुवदन्ति स्वधर्मान् । यथाऽर्थं व्युत्पादयन्ति स्मृतिविरोधिनमर्थं विरुध्यन्त एव लोकेन निःसंशयमिति साधूच्यते तद्विरोधेऽप्रवृत्तेर्लोकविरोधः प्रस्तुत एवेति ।

किञ्चान्यत्—

लोकप्रामाण्ये वा शास्त्रकाराणां सर्वत्र पदे वाक्ये प्रत्यक्षानुमानविरोधानुपस्थितावेव, तत्स्वरूपात्ययोः ।

१५ (लोकेति) यत्र वाक्यांशे प्रत्यक्षविरोध इत्यादिमिदं पूर्वमिदानीं सर्वत्र प्रत्यक्षविरोधो वाच्य इति विशेषः, अनुमानविरोधो वा नोक्तः सोऽभिप्रेतः तदनुपादेन पुनः प्रत्यक्षविरोधवचनं च तत्पूर्वकत्वादनुमानस्येति शास्त्रकाराप्रवृत्तेर्लोकविरुद्धत्वादेव प्रत्यक्षानुमानविरोधानुपस्थितावेव यदेतद्भवति, न न भवतो भवत एवैतयोः । किं कारणं ? तत्स्वरूपात्ययोः लोकादिति लोकः अनुपहतेन्द्रियमनस्कः प्राणिगणो लोक इत्युच्यते तयोर्लोकसिद्धौ स्थितत्वात् प्रत्यक्षानुमानयोः, लोकस्यैवप्रमाणं लोकस्य प्रत्य-
२० क्षानुमाने प्रागेवाप्रमाणे, अथवा स एव स्थितः तस्याः 'भुवि भाः' (पा० अ० १ पा० १ सू० ४) इति वचनात्, लोक एव प्रमाणत्वेन व्यवस्थितः, क ? तयोः प्रत्यक्षानुमानयोः, स एव लोकः प्रत्यक्षानुमानाभ्यामाधारत्वात्तदपायत्वेन प्रत्यक्षमनुमानञ्च तदन्यप्रामाण्ये तयोरप्रामाण्यमिति ।

स्यान्मतं भवताम्—

कथं प्रमाणद्वयेऽपि प्रत्यक्षमप्रमाणीक्रियेतेति, तत्र वः सम्प्रधारणमिदं प्रयच्छामि, शास्त्र
२५ एवेव प्रत्यक्षमपि लौकिकप्रत्यक्षविलक्षणं तथानुमानमप्यस्तु तयोरप्यलौकिकत्वकल्पनार्थं सामान्यविशेषैकान्तसंवादि यथादिकल्पनायोऽपि प्रत्यक्षं कल्प्यम् ।

विरुध्यत इति नियमेन किं नोक्तं कथमयमर्थ विरुध्येतेति इव स्वधर्मिणमुद्भावनामात्र विरुध्यतेतीति यदि लोकोऽनुकम्पते यदि तत एव तद्विरोधः कथमारभ्यते इव यदि नाभ्युपगम्यते यदि लोकविरोध इत्यवचेनात्-तद्विरोध इति लोकविरोधेन सर्वं प्रवर्तनीयमन्यथा तत्प्रामाणिक्यमिति भावः । प्रत्यक्षमित्यस्यैव व्याख्या इतीति लौकिकमिति । यैवम-
३० प्यनयोऽन्यथेति तत्र तावदिति । एतदपरोऽन्यारम्भेण भवत इति यदेव बोध्यतया नामत्वमेवैव कल्पनाभेदमात्रेति । तयोरिति प्रत्यक्षानुमानयोर्नैव एव स्थितत्वादित्यर्थः । लोकस्य स्थितौ प्रत्यक्षानुमानयोरप्रामाण्ये तदभिरक्तो विनयव्यवस्थया व्याख्या तयोरेवैति यद्यपि तथा अपि सूचिभवन्नं व्युत्पत्त्यन्तरकारणस्मय वेति, प्रत्यक्षानुमानयोर्निर्णये लोक एव प्रमाणेन व्यवस्थितो यतः यदीत्यादि तत्प्रयत्ने तयोरप्रामाण्येऽभिमतः । तदनन्तरं इत्यतो व्यापत्-

(कथमिति) यदपि प्रत्यक्षमेवं कल्प्य शास्त्रवदेवेत्यादि, शास्त्रे ज्ञातेऽपि तद्विहितक्रियासा-ध्यस्वाविष्टफलस्य क्रियायाश्च व्यभिचारात्, ज्ञाने यथोक्तम् "जानाना सर्वशास्त्राणि छिन्नसंशयाः सर्व संशयाः। न च ते तत्करिष्यन्ति गच्छ स्वर्गं न ते भयम्" इति, तस्माज्ज्ञान फलसाध्यभिचारि कारणं क्रियासाधनवादिनोऽपि, किमङ्ग पुनर्ज्ञानमात्रसाधनवादिन इति । तदेव विचार्यते प्रत्य-क्षमेवेत्यारभ्य यावल्लक्षणमिति, शास्त्र इव शास्त्रवत्, यथा शास्त्रेऽभिहिताः पदार्था अलक्ष्य विलक्षणास्तथा प्रत्यक्षमपि लौकिकप्रत्यक्षविलक्षणं तथाऽनुमानमप्यस्तु, तयोरप्यलौकिकत्वकल्पनार्थं— प्रत्यक्षानुमानयोरप्यलौकिकत्वस्य कल्पनार्थं लक्षणान्तरं कल्प्यम्, किं तत्? सामान्यविशेषैकान्तवा-दादि—सामान्यं च विशेषश्च सामान्यविशेषौ, सामान्यविशेषौ च सामान्यविशेषौ च सामान्यविशेषा इत्येकशेषः, सरूपत्वात्। सामान्यमेव न विशेषः, विशेष एव न सामान्यं वा परस्परविलक्षणौ चेति न एवैकान्ता लौकिकपदार्थविलक्षणाः शास्त्रेषु कल्पिताः। तन्मतिर्नु लौल्यमस्य तदिह सामान्य-विशेषैकान्तवादि, घट आदिर्येषां कल्पनानां सा घटादिकल्पना, घटसंख्योत्क्षेपणसत्ताघटत्वा-द्यध्यारोपात्मिका, तया कल्पनाया अपोढं प्रत्यक्षं कल्पनीयम्। स्यादाशङ्का कल्पनापोढं प्रत्यक्षं विशे-षैकान्तवादिन एव मत भेदग्रहोऽस्मयोः कथमलौकिकत्वमिति चेदुच्यते यत्तावद्विशेषमात्रलक्षण विषयमनिर्देश्यं प्रत्यक्षं तत्कल्पनापोढत्वादलौकिकं तत्सामान्यानात्मकत्वात् खपुष्पवदसदिति सिद्धम्, तथा विशेषानात्मकत्वात् खपुष्पवत् सामान्यमात्रं सर्वं सर्वात्मकं कल्पनापोढं वस्तु तदसत्, अत स्यात् तद्ग्राहकमपि तद्वत्। तथोभयानेकत्वैकान्ते तयोरितरेतरात्मकत्वात् खपुष्पवदभाव इत्यलौ-किकत्वम्। यद्यपि सामान्यविशेषकल्पनापोढं लक्षणमभिहितं—श्रोत्रादिवृत्तिः प्रत्यक्षम्, "आत्मेन्द्रिय-मनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्" (वै० अ० ३ आ० १ सू० १८) इत्यादि। तथापि सामा-न्यविशेषैकान्तवादिनां यथायथमेव कल्पनापोढमलौकिकत्वेनापन्नम्, तस्य चोभयात्मकत्वाभ्युपगमे प्रतिज्ञाहानिः, अथवा तेनैव दूषितत्वात् कश्चो हतो हन्यतीति तस्यैवोपरि कथ्यते परिकर इत्यनेनाभि-प्रायेण पूर्वमेव तत्परिकल्पितप्रत्यक्षलक्षणमनुपपद्यमानं दूषयितुकामः सूरिरित्यसमस्तमिदमाह ।

शास्त्रे ज्ञातेऽपीति । प्रत्यक्षस्य पर्येषणं पूर्वदर्शितत्वात्, निश्चितप्रत्यासेवनीयत्वात्, सर्वदर्शित्वमपरिप्रश्नविरोधेन । एकदेश इति, येनैकदेशेन प्रत्यक्षमपि लक्ष्यं योग्या । घटसंख्येति घटस्य द्रव्यगुणकर्मसामान्यविशेषभेदेन । सामान्यविशेषवत्त्वोक्त न [illegible] निरूपितो न [illegible] । श्रोत्रादिवृत्तिः प्रत्यक्षमिति इदं [illegible] लौकिकं [illegible] सूत्रे [illegible] 25
यथा घटे [illegible] तथा च [illegible] दूषितत्वं [illegible] न च [illegible] हेतुः [illegible] एव दूषितत्वं, तच्च न [illegible] हेतुतः [illegible] । एतदुक्तमेव [illegible] प्रत्यक्षं [illegible] लक्षणमित्येतन् [illegible] इति 30

प्रकृतमुच्यते अथ का कल्पना यथाऽपोढं ज्ञानं प्रत्यक्षमिति ? अत्रोच्यते—

नामजातिगुणक्रियाद्रव्यस्वरूपापन्नवस्त्वन्तरनिरूपणानुस्मरणं विकल्पना ततोऽपोढं प्रत्यासत्तेनोत्पन्नमसाधारणार्थविषयमभिधानगोचरातीतं प्रत्यात्मसंवेद्यत्वात् प्रत्यक्षमक्षं प्रति वृत्तेः पञ्चेन्द्रियजम् ।

5 (नामेति) नामजातिगुणक्रियाद्रव्यस्वरूपापन्नवस्त्वन्तरनिरूपणानुस्मरणं विकल्पना ततोऽपोढमपेतं, नाम संज्ञा शब्द इत्यनर्थान्तरम् व्यवहारिका कल्पना, सा द्विविधा समासतो यादृच्छिकी नैमित्तिकी च, नामग्रहणाद्यादृच्छिकी, जातिग्रहणाच्च नैमित्तिकी गृहीता, निमित्तनिरपेक्षं नाम यादृच्छिकं डित्थो डवित्थ इत्यादि शब्दद्वारा च यासामपि जात्यादिनिमित्तापेक्षायां भिन्नाम्, तत्र गौरिति जात्या, शुक्ल इति गुणतः, मधुच्छोपाधेरभेदोपचाराच्च विशेषणविशेष्यभावं ततो विशेषणादन्यादृश्च तयोर्विशेष 10 णविशेष्ययोरभेदसम्बन्धनात्मिकया कल्पनया पूर्वं मनसा निरूप्यते पश्चादनुस्मर्यते । तथा डित्थादिष्व-प्यभेदं सोऽयमिति वा भिन्नयोरर्थाभिधानयोरभेदसम्बन्धतया निरूपणानुस्मरणे, शब्दार्थयोर्निमित्तनैमित्तिकयोर्भिन्नयोरभेदाध्यारोपात् । क्रियाशब्देषु पाचक इत्यादिषु नाम्नेऽभेदोपचारेऽभिन्नरूपत्वात् क्रियाक्रियावतोस्ततो न निरूपणं विकल्पानुस्मरणमेव, सर्वत्र शब्दार्थाभेदोपचाराभिनिरूपणानुस्मरणे च एव । तथा द्रव्यशब्देषु संयोगसमवायनिमित्तादण्डी विषाणीत्यादिषु । तस्याः कल्पनाया अपोढं, असा-15 धारणेनोत्पन्नमिति, "रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्तते । विज्ञानं मणिसूर्यांशुगोशकृद्भ्य इवा-नलः ॥" चक्षुः प्रतीत्य रूपं चालोकं चाकाशान्तरं मिलत्समनःसंस्थितं चित्तं विज्ञानान्तरसमनन्तरत्वा-त्मकं प्रतीत्य चक्षुर्विज्ञानमुत्पद्यते, चक्षुर्निमित्तमेवैतत् इति सिद्धान्तात् । तथापि चाधिपतिना चक्षुषा व्यपदिश्यते चक्षुर्विज्ञानमिन्द्रियसाधारणकारणत्वात्, यथा यवाङ्कुर इति बीजाङ्कुरादिसाधारणसंयोगे सत्यपीति, असाधारणार्थविषयमिति चक्षुरादिविज्ञानानां परस्परविविक्तस्वादिभिर्विकल्पस्वलक्षणविषय-

20 त्वान्यत्वमप्यायतेति । यस्यामपि जात्यादिनिमित्तापेक्षायामिति [illegible] विभागतो वै शब्दा प्रतीयन्तेऽपि [illegible] यतिमभिधेयत्वेनोपादीयते [illegible] वस्तुभेदात् तथापि [illegible] रूप इत्थं [illegible], [illegible] हि शब्दा लोके [illegible] प्रतीता [illegible] संज्ञाशब्दा एवेति । एवं च कल्पना भवन्ति [illegible] भेदात् तत्र कल्पना [illegible] भेदोऽपि नैव [illegible] भेदेऽप्यभेद [illegible] तथेति । मधुरिति पुष्पकोशो मधुमे [illegible] इति वचनात् । मधुमात्रेऽपि [illegible] 25 इति व्यवह्रियते [illegible] विशेषण [illegible] ततो विशेष्यविशेषण [illegible] यथाह—विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम् । गृहीत्वा सङ्कलय्य तथा प्रत्येति नान्यथा ॥ इति ॥ अपोढमिति, अपेतं कल्पनातः [illegible] । अधिपतिना चक्षुषेति [illegible] चक्षुर्विज्ञानमेव [illegible] विशेषावस्थाप्यौत्पत्तिक [illegible] हि चक्षुर्विज्ञान [illegible] इति सिद्धान्त 'चक्षुरूपे प्रतीत्य उत्पद्यते चक्षुर्विज्ञानम्' [illegible] 30 परस्परं [illegible] सम्प्रयोगात् यथा परस्परेण [illegible] हि [illegible] चक्षुर्विज्ञानं [illegible], [illegible], [illegible], [illegible] इति प्रोच्यते । यथेति यथा बीजादिकारणसामग्र्यां [illegible] यवाङ्कुर [illegible] इति व्यपदिश्यते [illegible] 35 इति यावत् । असाधारणार्थविषयमिति [illegible]

स्यात्, अभिधानगोचरातीत मनोभिरूपितार्थविषयत्वादभिधानस्य तद्गोचरातीतम्, किं कारणम्? प्रत्यात्मसंवेद्यत्वात्, आत्मानमात्मानं प्रति प्रत्यात्मम्, प्रत्यात्मना संवेद्यते भाव्यते प्रत्यक्षमात्मनाऽऽत्मैव सुख विवेचनास्वरूपवत्, ज्ञानमिवान्यत्रासम्भवात् सम्बन्धः प्रत्यक्षसमक्षं प्रति वृत्तेः परोक्षमिन्द्रियजम्।

चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमित्यभिधर्मागमोऽपि, प्रकरणपदेऽप्येतमेवार्थं भावनयाऽनया विशेषयत्यर्थेऽर्थसंज्ञी न त्वर्थे धर्मसंज्ञीति,

(चक्षुरिति) चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमित्यभिधर्मागमोऽपीति विधेः तमेतल्लौकिकप्रत्यक्षविकल्पनं कल्प्यमानमपीत्युपः, तथागमोऽप्येवमेवेति दर्शयति, चक्षुर्विज्ञानसमङ्गी चक्षुर्विज्ञानसमन्वयी सन्तानः, अगि रगि लगि गत्यर्थाः चक्षुर्विज्ञान समङ्गितुं शीलमस्येति चक्षुर्विज्ञानसमङ्गी, एवं श्रोत्रादिविज्ञानसमङ्गिनः, नीलं विजानाति—रसादिविविक्तं रूपं स्वलक्षणं विजानाति, नो तु नीलमिति विजानाति, इतिशब्दस्य शब्दपर्यायत्वादिदं तन्नीलमिति शब्दनिर्देश्यं न विजानाति, अपटुत्वादिन्द्रियविज्ञानस्य कुतः शक्तिरेव कल्पयितुम्। प्रकरणपदेऽप्युक्तमिति, भदन्तस्तद्भवाग व्याख्यानमभ्यन्तरेण तदर्थोऽनुसारिणाऽभिहितमिति दर्शयति। नीलः स नामनीलं निर्लोकः पदे तथा समेतमिति नाम्ना निर्देशो नीलस्य नामैतन्निरूपणविकल्पकृतं न नीलार्थः, नीलस्य रूपस्य वस्तुनश्चक्षुरिन्द्रियविषयस्य परमार्थः। स्वरूपतोऽनाख्यः, अपरैरन्यैश्च जनपदभाषाकारैरनभिलप्यनीयः, स च पुरुषो निरूपणकाले स्वय निमित्तमनुस्मरणकाले चानुस्मरन् परं प्रतिपिपादयिषया नीलमिति वाचं भाषमाणो नीलस्यार्थमनभिलाप्यस्वरूपं स्वलक्षणाख्यविकल्पं न पश्यति तदा तत्स्वरूपविषयत्वाविकल्पस्य नीलार्थविज्ञानस्य च विरुद्धत्वात्, तदन्यस्य नीलशब्दाभिलाप्यस्याध्यारोपितस्य सामान्यस्येन्द्रियगोचरातीतस्यैवार्थस्य भावनात्, तुशब्दो विशेषणार्थः, एनमेवार्थं भावनयाऽनया विशेषयति, अत एवार्थः, तं भवन्त भव भवेति पुनः भावयति यया व्याख्यया सा भावना का पुनः सा? अर्थेऽर्थसंज्ञी न त्वर्थे धर्मसंज्ञीति, एतस्य भावनावाक्यस्य पुनर्व्याख्या—अर्थे रूपादिके प्रत्यक्षविज्ञानविषये रूपरसगन्धस्पर्शशब्दस्वलक्षणे स्वरूपसंज्ञी, रूपादिमात्रसंज्ञी, संज्ञानातीति संज्ञी, स्वरूपसंज्ञाऽस्यास्तीति वा स्वरूपसंज्ञी। किमालम्बना सा संज्ञा किंस्वरूपा वा यया सम्प्रयुक्तं तत्स्वलक्षणं रूपादिचित्तं निर्विकल्पं चैतसिकया सम्प्रयुक्तधर्मात्मिकया योगात् संज्ञया संज्ञीत्युच्यते तत्सन्तानः? इत्यत आह—अर्थस्वरूपविशेषमात्रालम्बनया निर्विकल्पया संज्ञया सम्प्रयुक्तमिति, गतार्थं व्याख्यातत्वात्प्राप्त्यैव। तदेवं स्वलक्षणविषय स्वलेव विशेष एव लक्षण लक्ष्यत इति लक्षणं "कृत्यल्युटो बहुलम्"मिति (पा० ३।३।११३) कर्मणि ल्युट् प्रत्ययः, स्वलक्षणमनन्यविषयमित्यर्थः। अस्य सन्तानस्येति, चक्षुर्विज्ञानसमङ्गिनः, चक्षु-

---

पचयार्थेन तदतीतमित्यतीतमभिधानात्ययमिति। चक्षुरिति, अभिधर्मप्रमाणैर्नामाभिधानमनुपलभ्य [illegible] नीलमन्योऽर्थ प्रवर्तत इति तृतीयानिर्लोप्यम्। परमार्थ इति चक्षुरिन्द्रियविषयस्य परमार्थस्य नीलरूपादेर्दर्शनो न निरूपणविकल्पकृतो निर्देशः [illegible] परमार्थेन च नीलादेरभिधानमध्यारोपितत्वमिति भावः। नीलस्यार्थमिति परमार्थस्वलक्षणमित्यर्थं यदि भवितव्यमिति सामान्यमारोप्य न तत्र, यथाभिधानस्योपनं नीलमिति अध्यारोपितं सामान्यं च तदनुपपत्तिरिन्द्रियविषयं [illegible] [illegible] नीलादिरूपं स्वलक्षणं निरूप्यमिव इति भावः। तुशब्द इति, नो तु नीलमित्यत्र तुशब्द इति भावः विशिनष्टि—एवमिति। पुनर्व्याख्येति

विज्ञानवत् चक्षुरादिप्रतिनियतविषयतया व्यवस्थितं ज्ञानं कल्पनापोढम्, इति। प्रत्यक्षे, वस्तुसत्कं कल्पनात्मकं ज्ञानं न तत्सामर्थ्यबलभावित्वात्, गन्धर्वनगरमिति सामान्यं एतत् सविकल्पकं भ्रान्तमिति मिथ्याविज्ञानं न प्रत्यक्षम्, विशेषणाध्यारोपाद् उत्पन्नं चाक्षुषमभिलापवदिति, इति परिसमाप्त्यर्थः, यद्येऽप्येवंतदोषेतस्य व्याख्यानमिति परिसमाप्तम्। न त्वर्थधर्म संज्ञी यस्य व्याख्या,
5 न त्वर्थे, नेति प्रतिषेधे सुविशिष्टे तदर्थसमारोपविशिष्टं प्रतिषेधति, तस्मिन्नेव रूपादिकेऽर्थे प्रत्यक्षाभिमान संज्ञी—प्रत्यक्षतात्विकगुणक्रियाद्रव्यसम्बन्धी, धर्मस्वरूप सम्बन्धीयत्वात्संसंज्ञी न भवति सम्बन्धी न भवतीत्यर्थः।

नैषा समनीपिकोच्यते किं तर्हि ?—

एवमभिधर्मेऽप्युक्तं धर्मो नामोच्यते नामकायः पदकायो व्यञ्जनकाय इति, एवं
10 तावत् कल्पितमेव भवत्सिद्धान्ते, किं सम्भारणया ? ।

(एवमिति) एवमभिधर्मेऽप्युक्तं अभिधर्मपिटकेऽभिहितं, किमुक्तं ? धर्मो नामोच्यते नाम काय इत्यादि नामैव कायो नामकायः, कायशब्दस्त्विह समूहवाचकत्वात् सर्वसंघातत्वात्, नाम्नां वा विज्ञानादीनां संघातत्वात्। संघातव्यापारे धर्मिकाणामपि संस्कारामिवोत्पत्तिविनाशाभ्युपगमात्, यथोक्तम् "वर्णो गन्धो रसः स्पर्शश्चत्वारोऽपि च धातवः। अष्टावेते विनिर्मीणाः सहोत्पादाः सहव्ययाः" इति
15 सिद्धान्तात्। पदानि नामाख्यातोपसर्गनिपातात्मकानि पदकायः, व्यञ्जनान्यक्षराणि, अर्थस्य व्यञ्जनत्वात्, तत्कायो व्यञ्जनकाय इति, एवं तावत् कल्पितमेव भवत्सिद्धान्ते किं सम्भारणया।

अथेदानीं परमार्थो विचार्यते—

कल्पितमपि त्विदमफलमलौकिकत्वात् स्ववचनाद्यपेक्षाक्षेपपुरस्सरविरोधपरिहारं हि त्वद्युक्तिवत्त्वेवेदमसम्यक् कल्पनात्मकत्वात्।

20 कल्पितमपि त्विदमफलमित्यादि, नाम फलमित्यफलम्, किं कारणम् ? अलौकिकत्वात्, परविघातार्थमनीश्वराभिकल्पनवत्, कस्मादलौकिकत्वमिति चेत् ? स्ववचनाद्यपेक्षाक्षेपपुरस्सरविरोधपरिहाराभावात्, यं भवन्तं स्ववचनं समस्तकल्पनापोढमिति स्फुटमिति:, स्ववचनस्य स्ववचनेन वा व्यपेक्षा भवत्यर्थः स्ववचनव्यपेक्षा क्षेपाक्षेपः तेनाक्षेपेण दूषणे विरोधस्य परिहारोऽस्तीति कल्प-

---

अभिधर्मोक्तस्य अन्यासिद्ध्यावस्था व्याख्या क्रियत इति भावार्थः। सर्वलक्षणासाधारणात्वादिति अर्थः
25 एवार्थे हेतु उपन्यस्य अभिलापसमर्थं परमार्थसत्त्वं भवति च तत्त्वनिश्चयमिव निश्चयात्मकत्वं नाम। अथोऽभिलाप-अभावात्, अभावत्वं हि सर्वाभिलापसमर्थविषयत्वे सर्वलक्षणामयीकरणमिति न तदात्मकत्वेन विकल्पोऽपीति भावः। विशेष-णाध्यारोपादिति विशेषणं भौतिकत्वावधारणमित्यादिति विशेष्यं तदवस्थाय विज्ञानं विशेषणविशेष्ययोरभेदाध्यारोपात्मक-मिति नियम्यते भवति, अतश्च प्रत्यक्षव्यक्तवीथीनिरूपणपरत्वेन च एव सत्त्वमिति न्यायः। धर्मीपरत्वेऽपि ध्यान-व्यापारत्वेन वर्णो द्विविधः प्रसिद्धमपि संस्कृता सर्वो वक्तव्यः तथाविकल्पनात्मकं संस्कारो धर्मः सोऽपि कल्पनो
30 एव विज्ञाने इत्यत्र एव कल्पनादि तत्त्वान्तर्भावात् न सर्वप्रत्यक्षसर्वांशोऽपि अलौकिक इति भावः, अपि चाभ्युपगमे—एवमिति। कल्पितमिति इदं नामकायप्रत्यक्षोत्पादात्, अलौकिकप्रतिपादनात् हेतुविनिश्चयाभिप्रायो नाभावादिति। स्ववचनेति, स्वोक्तलक्षणसमर्थे इति विज्ञानविकल्पाद्यनभिलापत्वमिति भावः। एव एतत्

नन्वपेक्षाक्षेपयुक्तविरोधपरिहारं छलेनैव वचनेन पौर्वापर्येण प्रसज्य प्रदर्शयमानेन विरुध्यते सदाऽहं मौनव्रतिकोऽस्मि, पिता मे कुमारब्रह्मचारीत्यादिवचनवत्, न त्वस्मदुपपत्तिपूर्वमिदम्। तदर्थं दृष्टान्त-माह—स्वयुक्तिबलेनेदम्, यथेयं त्वदुक्तिः कल्पनात्मिका सती न प्रत्यक्षं तथेदमप्रत्यक्षमिति प्रतिज्ञा, कल्पनापोढत्वलक्षणलक्षितं ज्ञानमत्र धर्मि, तदप्रत्यक्षत्वविशिष्टं साध्यते, को हेतुः? कल्पनात्मकत्वात्।

न त्विदमसिद्धं निरूपणविकल्पात्मकत्वात्, घटत्वादिज्ञानवत्, आलम्बनविपरीतमति- 5
पत्त्यात्मकत्वात्, यथाऽप्रतिपत्तिः।

(नत्विति) न त्विदमसिद्धं कल्पनात्मकत्वं तस्य ज्ञानस्य कल्पनापोढत्वात्, अत्रेदं तत्सा-धनार्थमभिधीयते धर्मान्तरं तत्कल्पनात्मकं निरूपणविकल्पात्मकत्वात्, इदमिदमिति ज्ञानं निरूपणं स एव विकल्पस्तदात्मकं तत्समस्तं घटत्वादिज्ञानवदिति। आह—निरूपणविकल्पात्मकत्वमप्यसिद्धमि-न्द्रियज्ञानस्येति, आचार्यस्तु तत्साधनार्थमाह—आलम्बनविपरीतप्रतिपत्त्यात्मकत्वात्, यथाऽप्रतिपत्ति- 10
रिति, द्रव्यसतामेवाणूनां नीलपीताद्याकारत्वात् संवृतिसत्त्वात्तस्यापि नीलपीताद्याकारस्य प्रत्येकं तदाल-म्बनत्वात् यथाऽप्रतिपत्तिरिति।

स्यान्मतं द्रव्यसतामेवाणूनां नीलपीताद्याकारस्यात्र विपरीता प्रतिपत्तिरित्येतदयु-क्तम्, आकारस्याध्यारोपात्मकत्वात् माणवकसिंहत्वाध्यारोपवत्। सदाऽध्यारोपित इति कुतो गम्यते? सामान्यरूपविषयत्वात्, तत्सामान्यञ्च कारीषतौषतार्णपार्णादिविशेषाणामग्नि- 15
ताग्नित्ववत्। तदप्यसिद्धमिति चेत्, सिद्धमेव तदतद्विषयवृत्तित्वात्, तैमिरिककेशोण्डु-कादिज्ञानवत्।

(स्यान्मतमिति) स चासत्य विषयो तदतद्विषयो, तत्र वृत्तिरस्येति तदतद्विषयवृत्ति तत्का-रणानेकपरमाणुसमूहत्वात्, तस्य समूहे तेषु च वृत्तित्वात्, समूहस्यासत्त्वात् समूहिनामेव द्रव्यस-तामणूनां सत्त्वात्तयोश्चाभेदेन नीलाद्याकारपरिग्रहेण ज्ञानोत्पत्तेः, समूहासत्त्वाच्च तद्ग्रहे वस्तुस्वभा- 20
वात्, समकापहृतमुद्रिमन्ध्यादिवत्। उक्तञ्च "गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु

[illegible]

द्विपक्षप्राप्ते तस्मादेव प्रत्यक्षम्" इत्यतः सदसद्भेदपरिग्रहात्मकत्वात्तैमिरिकादेर्योऽनुमानि ज्ञानवत्प्रत्यक्षमतत्त्वमस्य ।

किञ्चान्यत्—

सर्वथा साधारणार्थत्वादेर्हेतुपारम्पर्येण कल्पनात्मकत्वसिद्धेः । एकैकस्माद्वा हेतोरप्रत्य-

5 क्षमिदं कल्पनापोढलक्षणलक्षितं ज्ञानमनुमानादिज्ञानवत् ।

(सर्वथेति) साधारणोऽर्थोऽस्य ज्ञानस्येति साधारणार्थम्, तत्साधारणार्थत्वमभेदपरिग्रहात्मकत्वात्, जातिमदपोहान्यव्यतिरेकार्थविषयत्वात् सामान्यविशेषात्मकार्थविषयत्वादित्यादिभ्यो हेतुभ्यः, इमान्यनुमानादिज्ञानानि यथैवोदाहृतानि "भ्रान्तिसंवृतिसंज्ज्ञानमनुमानानुमानिकम् । स्मार्ताभिलाषिकञ्चेति प्रत्यक्षाभं च तैमिरम्" इति, तत्साधर्म्यादेव हेतुपारम्पर्येण कल्पनात्मकत्वसिद्धेः । एकै-
10 कस्माद्वैकस्माद्धेतोरप्रत्यक्षमिदं कल्पनापोढलक्षणलक्षितं ज्ञानमनुमानादिज्ञानवदिति, यथाऽनुमानादिज्ञानं कल्पनात्मकत्वादप्रत्यक्षं तथा भवदिष्टमिन्द्रियज्ञानम् ।

मा मंस्थाः मोहकल्पनात्मकत्वादिहेत्वसिद्धिरिति, उक्तं हि योऽभिधर्म एव सञ्चिता लम्बनाः पञ्च विज्ञानकाया इति, रूपादिपरमाणोरेकस्यासञ्चितस्यालम्बनस्य घटादिषु नीला-दिषु प्रत्यक्षाभिमतेषु संवृतिसत्स्वभावात् सञ्चिताणुघटनीलाद्याकार एव गृह्यते चक्षुरादिभिः,
15 चक्षुरादिविज्ञानानां रूपादिपरमाणुसङ्घात एवालम्बनम्, ततः प्रत्येकमालम्बनपरमाणूनां परमार्थसतां भवत्सिद्धान्तेनैवाविषयता ।

(मा मंस्था इति) अभिधर्म एव—अभिधर्मपिटक एव बुद्धवचनेऽभिहितं—सञ्चितालम्बनाः पञ्चविज्ञानकाया इति, नियतसम्प्रयुक्तधर्मैर्युक्तत्वाद्रागादिभिः काया इत्युच्यन्ते पञ्च चक्षुरा-दिविज्ञानानि । रूपादिपरमाणोरेकस्यासञ्चितस्यापि समानजातीयैरसङ्घातस्यालम्बनस्य—विषयस्येन्द्रि
20 यबुद्धिग्राह्यस्य घटादिषु—घटपटरथादिषु नीलादिषु—रूपरसगन्धस्पर्शशब्देषु गुणेषु प्रत्यक्षाभिमतेषु संवृतिसत्स्वभावात् सञ्चिताणुघटनीलाद्याकार एव गृह्यते चक्षुरादिभिः । तस्माज्जातत्वाद् परमाणु त्वेनावस्थानमभावत्वात् प्रत्यक्षसिद्धम्, परिणामान्तरापत्त्यभ्युपगमात्, वैशेषिकाणां परमाण्वारम्भकत्व-विप्रलम्भम्, सांख्यानां समवस्थानविशेषापन्नाः सत्त्वादयो गुणाः, लौकिकानां तु स्थूलकार्यानुमितत-ज्जातीयसूक्ष्मकारणमात्रसम्भावनम्, सन्ति केचित्सूक्ष्मा बहवः स्थूलस्य कारणभूताः घटस्येव तन्तव इति,
25 सम्भावितानां तथासम्भावनेऽपि तेषां संघातपरिणामाभ्यामृते चाक्षुषत्वाभावो लोकस्यापि तुल्यः,

---

यथाऽर्थे मतिरेवं चैवास्यं तद्विषयत्वादित्यर्थः कल्पनामनुपलभ्य तु परमाणूनां तज्जातीयमतिर्जातीयस्मात्तत्परं प्रत्यक्षस्य चान्य-व्यतिरेकार्थविषयत्वादनुमानादिवत्प्रत्यक्षं कल्पनात्मकमिति भावः । भ्रान्तीति एतानि सप्तापि कल्पनाज्ञानत्वादप्रमाणानि सन्ति । अनुमानविषयेभ्योऽनुमानप्रामाण्यार्थं पक्षधर्मत्वं मतम्, स्मार्तं ज्ञानं स्मृतिः अभिलापिकमिन्द्रियज्ञानादिरभिलाषिकं द्वेषयोऽभिलाषादि ज्ञानं प्रत्यक्षाभं च तैमिरं—तिमिरादिदोषजं ज्ञानम् । एवं चैतेन हेतवोऽभिहिताः कल्पनापोढत्वस्य । कस्मात् सर्व एव हेतवः
30 साधारणार्थत्वादयः इत्यत—एकैकस्मादिति । एवंविधाविधिनिराकरणार्थमाह—मा मंस्था इति । चक्षुरादिज्ञानानां सञ्चिता-लम्बनत्वम्. परमाणवः तावत्त्वा न विषयाः ते तदानीं संघातभावा एव भवन्तीत्यर्थः तदानीं तेषां तदवस्थानामनु-पगमात् अतीन्द्रियत्वेन तेषां चक्षुरादिभिरग्रहणमत्यनुपलभ्य तज्जातीयं सङ्घात इत्यालम्बनमिति परमाणूनां वस्तुत्वमपि द्रव्यत्वम्, न च विषयाः सङ्घातः स न परमार्थसत्, किन्तु संवृतिसदेवेति भावार्थमाह तस्यापि प्रत्यक्षावभासमित्यादिना ।

अतोऽतीन्द्रियत्वादालम्बनत्वानुपपत्तिः, अतश्चालम्बनत्वानुपपत्तेर्व्यस्तानां सतां परमाणूनामेवमविषयत्वं चक्षुरादिविज्ञानानां रूपादिपरमाणुसंघात एवालम्बनमिति, आदिग्रहणाद्रसादिपरिमण्डलादिपरमाणु-संघात एवालम्बनम्। ततः किमिति चेत् ततः प्रत्येकमालम्बनपरमाणूनाम्—आलम्बनार्थाः परमाणवः आलम्बनपरमाणवः तेषां परमार्थसतामेषां त एव हि परमार्थसन्तो न समूहो नीलादिर्घटादिश्च संवृतिसत्त्वादिति भवत्सिद्धान्तेनैवाविषयता परमाणूनाम्। 5

तत्र प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वे रूपसङ्घाते इन्द्रियसन्निकृष्टे आलम्बनविपरीता प्रतिपत्तिरव्यपदेश्यैकात्मकनीलरूपविषयाऽभिमता।

(तत्रेति) तत्र प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वे—प्रत्येकं विविक्तानि रूपान्तराणि प्रतिपरमाणु-भेदेन रसादिभेदेन वा तेषामेव रूपान्तराणामविविक्तं स्वतत्त्वं यस्य सोऽयं प्रतिविविक्तरूपान्तराविविक्तस्वतत्त्वः, कोऽसौ? रूपसङ्घातः रूपधातुभेदपरमाणुसंघातः, अधिकृतचक्षुर्विषयाभिमतरूपसंघातो 10 वा, तस्मिन् रूपसंघाते इन्द्रियसन्निकृष्टे स्वविषयाभिमुख्येनोपस्थिते आलम्बनविपरीता—परमार्थत आलम्बनभूतेभ्यः परमाणुभ्यो नीलमिति वा घट इति वा येयं प्रतिपत्तिः सा विपरीता, तस्मादेव तत्त्वस्वभावात्, तत्प्रकाशु पद्विज्ञानवत् अव्यपदेश्यैकात्मकनीलरूपविषया व्यपदेश्यानेकपरमाण्वालम्बनेभ्योऽन्योऽव्यपदेश्य एक आत्माऽस्येत्यव्यपदेश्यैकात्मकम्, किं तत्? नीलरूपं तद्विषयोऽस्या इत्यव्यपदेश्यैकात्मकनीलरूपविषयाऽभिमता प्रतिपत्तिरिति वर्तते, सैव वा प्रतिपत्तिरव्यपदेश्या एकात्मका, अनेकपरमा- 15 णुनीलरूपविपरीतैकनीलरूपविषया।

तद्व्याख्यानार्थं भवतामभिधर्मपिटके यथोच्यते नीलं विजानाति नो तु नीलमिति। ननु हेत्वपदेशाव्यपदेश्यैव सा, नच शब्दाभिधेयमेव व्यपदेश्यम्, किं तर्हि? पर्यायान्तरेणापि गम्यते तद्व्यपदेश्यम्, तथा चोक्तं सञ्चितालम्बनाः पञ्चविज्ञानकाया इति न संचयालम्बना इति, धूमेनाग्निरिवैतदपि चक्षुरादिविज्ञानं व्यपदेश्यं ततोऽन्यत् परमाणुभ्यः परमार्थसद्भ्यः 20 कस्यचिदेकं सामान्यं न साक्षादिन्द्रियैर्गृह्यते, व्यवहितमेवार्थान्तरैस्तद्द्वारेण गृह्यते।

(तद्व्याख्यानार्थमिति) नाव्यपदेश्या सा प्रतिपत्तिरित्यभिप्रायः, तां दर्शयति—ननु हेत्वपदेशाव्यपदेश्यैव सा यस्मादुक्तं "हेतुरपदेशो निमित्तं लिङ्गं प्रमाणं कारणमित्यनर्थान्तरम्" इति (वैशे० अ० ९ आ० २ सू० ४) न चावश्यं शब्दाभिधेयमेव व्यपदेश्यम्, किन्तर्हि? पर्यायान्तरेणापि

रूपधातुभेदपरमाणुसंघात इति व्याख्यानात् त चाक्षुषविज्ञाने यत् चक्षुरुपनिबन्धि यत् चक्षुर्विज्ञानानि 25 यत् रूपायतने नियता तत्र गन्धरसस्पर्शविज्ञानविषयव्यतिरिक्तानुवृत्ति भावतो रूपायतन उच्यन्ते तथैव एव धातु रत्नेऽर्थाच्चक्षुर्विज्ञानविषयभूतो भाव इत्याद्यभिप्रायति। अनेके हि रूपपरमाणवश्चक्षुर्विज्ञानस्यालम्बनानि न तेषु अतीन्द्रियत्वात् प्रतिपत्तिस्तु नीलमिति वा घट इति वा एषा मतस्यानुमितस्य भवतीत्यालम्बनविपरीतता प्रतिपत्तेरिति भावः। अव्यपदेश्येति व्यपदिश्यत इति व्यपदेश्यं [illegible] नीलादिकमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नेन विज्ञानेन [illegible] 30 [illegible]। तत्रापि विज्ञानमेवाव्यपदेश्यमनपेक्ष्य विशेषयति सैव वेति। नाव्यपदेश्येति किन्तु व्यपदेश्यैवेत्यर्थः। [illegible] प्रमाणान्तरेण तस्य व्यपदेश्यत्वमभिप्रैति सम्भवति। हेतुरित्यादि, [illegible] इति सूत्रार्थः। तथा च च [illegible]

गम्यते तद्रूपपदेशम्, यथोन्तरस्य हेतुत्वपदेशनिमित्तस्याविपर्ययस्वात्, तथापि च यतः सञ्चयमपदेशेन निमित्तान्तरमिन्द्रियज्ञानमिदं तस्मात्तद्रूपपदेशं तत् तथा चोक्तं "सञ्चितालम्बनाः पञ्च विज्ञानकायाः" इति, न सञ्चयाकारतया इति, एतस्यार्थनिदर्शनार्थमुदाहरणमाह—धूमेनाग्निरिव, यथा धूमेनार्थान्तरभूतेनाग्निरयमिति ज्ञानमुत्पद्यमानं व्यपदेश्यं तद्वत् तथैतदपि नीलरूपादिविषयं चक्षुरादिवि-
5 ज्ञानं परमाणुभिरर्थान्तरैरनेकत्वात्तद्रूपपदेशम् ततोऽन्यदिति—यत एव व्यपदेश्यं धूमादग्निरिव तन्नीलरूपं ततः परमाणुभ्यः परमार्थसतोऽन्यत् कल्पितमकल्पितेभ्य एव चक्षुभ्यः सामान्यं विशेषेभ्यः, न चाक्षादिभिरिन्द्रियैरव्यवहितं गृह्यते, किं तर्हि ? व्यवहितमेवार्थान्तरैः परमाणुभिर्द्वारेण परमाणुद्वारेण गृह्यते न स्वत एवेति ।

अत्राह—

10 ननु च सञ्चयस्य कारकहेतुत्वेनापदेशः प्रत्यक्षप्रतिपत्तेः, न धूमवज्ज्ञापकहेतुत्वपदेशस्तथाऽग्नेरिवार्थान्तरस्यैकरूपत्वस्य ।

ननु च सञ्चयस्येत्यादि यावदर्थान्तरस्यैकरूपत्वस्येति, नन्वित्यसूयापने, चशब्दः प्रसिद्धभेदसमुच्चये, नन्विह प्रसिद्धमन्यः कारको हेतुरन्यो ज्ञापक इति, तस्मादणूनां तत्सञ्चयस्य नीलस्य च कारकसम्बन्धात् धूमस्याग्नेश्च ज्ञापकसम्बन्धात् प्रत्यक्षानुमानप्रतिपत्त्योरयं एव गम्यः, अतः साधर्म्य-
15 वैकल्यं दृष्टान्तस्य, एवमित्यादिविकलता हेतोरिति वाक्यार्थः, अपरमनुपात्तार्थान्तरेति न विरुध्यते ।

आचार्यो दोषमिमं परिहरन्नाह—

नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिर्यदीदं प्रत्यक्षं स्यात् कारकत्वेन, सञ्चयात्मात् संवृतिसतो न स्यात् भवति तु तस्मात् प्रत्यक्षं ज्ञापकधूमाद्यपेक्षाग्निज्ञानवत्, वैधर्म्येण दाहानुभववत्, प्रत्यक्षत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्य, तथा तस्य
20 स्वलक्षणविषयत्वादनध्यारोपात्मकत्वादिति यावत् ।

(नन्विति) नन्विदमस्यैवार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिः नैतदस्मिन्नस्माकं न वा साध्यधर्मवैकल्यम्, यत्सञ्चयस्य ज्ञापकत्वमथ प्रत्यक्षप्रतिपत्तेरदोषप्रसङ्गस्यापाद्येत न पुनरेवमेतत्, यस्यैव प्रतिनियतविषयत्वात्, तदुच्यते यदि भवत्यविदं प्रत्यक्षं स्यात्कारकत्वेन—निष्पादकत्वेन

प्रतिपत्तिः कल्पितैवैकेन सामान्येनार्थान्तरभूतेन सञ्चयेन तस्यार्थान्तरत्वस्य हेतुधर्मत्वेन हेतुत्वपदेशत्वेनैव च प्रति-
25 पत्तिर्व्यपदेश्येति भावः । न सञ्चयाकारतया इति परमाणूनां कल्पितः सञ्चयो न विज्ञानविषयः किन्तु सञ्चयद्वारेण परमाणव एवालम्ब्यन्त इत्यर्थः तथा च प्रत्येकं चक्षुरादिविज्ञानं व्यपदेश्यं अर्थान्तरेण सञ्चयेन कल्पितमात्रत्वात् धूमेनाग्निमत्त्व- प्रतीतिः प्रत्यक्षं हि सञ्चयो नीलादीनां कारकहेतुरुच्यते अग्नेस्तु धूमः ज्ञापकहेतुरुच्यते इत्येतयोः प्रतिपत्त्योरयं एव भेदो भवति तथार्थान्तरेणाविकल्पमयत्वादिति हेत्वर्थान्तरत्वेन ज्ञापकहेतुर्यदि स्यात् तर्हि प्रत्यक्षप्रतिपत्तिर्न तेन व्यपदि- श्यते व्यपदिश्यतामिति प्रत्यक्षस्य नीलादिव्यक्तिसत्त्वैवाव्यभिचारि विरुध्यते पक्षे च तथाविधतायामप्यपि यदि
30 च कारकहेतुरर्थान्तरत्वेन गृह्यते तर्हि प्रत्यक्षविज्ञानस्य तेनैव व्यपदेश्यता दृष्टान्ते ज्ञापकत्वेन साधर्म्यमित्यत्र तत्र अन्यदपि दृष्टान्ते हेतुभावो येन इति भावार्थं प्रत्याह—ननु चेति । पूर्वोक्तं दोषार्थं तत्रैव न भवेदाह—नन्विति । अस्यैवार्थस्य—इत्यभिप्रायज्ञापकस्यैकरूपत्वस्य । कारकत्वेनेति एकत्वेन ज्ञापकत्वस्य तदेव ज्ञेयः । संवृतिसतः—इत्याह, एवं कारकत्वं परमार्थतः एव भवति सञ्चयस्तु न परमार्थसदिति कथं तत्र कारकत्वमिति ज्ञापकत्वेन

चक्षुरादिविज्ञानस्य नीलपीतादेः स्वार्थाभिमतादालम्बनभूताद्धेतोर्भवेत्, संचयात्मनात् संवृतिसतो न परमार्थसतोऽण्वादेरपि स्यात् । वैधर्म्येण दाहानुभवनवत् स्वार्थमात्रालम्बनं वा स्यात् प्रत्यक्षत्वाद्दाहानुभवनवत्, यथोक्तं "अन्यथा दाहसम्बन्धाद्दाहं दग्धोऽभिमन्यते । अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥" इति (वाक्यपदीये कां० २ श्लो० ४२५) अव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्येति तस्यैवोपपत्तिहेतुः, अर्थान्तरेणाव्यवहितस्वार्थस्य ग्राहकं प्रत्यक्षं दृष्टं यथा दाहानुभवः । तथा 5 तस्य स्वलक्षणविषयत्वात्—प्रत्यक्षस्यार्थान्तरनिरपेक्षता स्यान्न पुनरस्तीति, स्वलक्षणविषयत्वादनध्यारोपत्वादिति यावत्, सर्वत्रार्थान्तराध्यारोपवृत्त्यर्थान्तराद्युपपत्तेस्तस्य न ज्ञानमिति, यावदुक्तं भवति स्वलक्षणविषयत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षत्वादिति । अर्थान्तरनिमित्तमात्रप्रत्यक्षं दृष्टम्, यथा दाहशब्दजनितज्ञानमिति, एवं तावत्कारकत्वं संचयस्याभ्युपगम्य दोष आपादितः ।

इदानीं कारकत्वमपि दूषयितुमना आह— 10

कारकतापि सञ्चयस्य नैवास्ति परमार्थतोऽसत्त्वात्, अजातपुत्रवत् ।

(कारकतापीति) कारकतापि सञ्चयस्य नैवास्तीति प्रतिज्ञा, परमार्थतोऽसत्त्वादिति हेतुः, अजातपुत्रवदिति दृष्टान्तः परमार्थतोऽसत्त्वं संवृतिसत्त्वात्तु घटवत्, यथोक्तम् "भेदे यत्र न तद्बुद्धिरन्यापोहे धिया च । घटाम्बुवत्संवृतिसदन्यत् परमार्थसत्" (अभिधर्मकोशे अ० ६ का० ४) इति यथोक्तं प्रमाणान्तरेऽप्यकारकतामाति न तत्क्रमस्ति, अभिक्षणानां नैरन्तर्याभावात्, 15 पक्षस्य परमार्थतोऽसत्त्वादक्षविज्ञानस्याकारकता, एवं सञ्चयस्य संवृतिसत्त्वान्नीलविज्ञानस्याकारकता, यथाऽतीन्द्रियत्वादणुनीलानाम् ।

इतश्च सञ्चयस्याकारकता प्रत्यवयवव्यवस्थानमात्रत्वात् ।

(इतश्चेति) अवयवमवयवं प्रति प्रत्यवयवं, अवस्था नीलादिपरमाणवः, तेषामेव संहतैकत्र परस्परापेक्ष्या व्यवस्थानमात्रं सञ्चयो न तेभ्योऽर्थान्तरमिष्टं भवताम्, अतः परमार्थतो नास्त्येवासौ 20 सञ्चयः, तदेवं सञ्चयस्यासतः खरविषाणस्येव न कारकता ।

अभ्युपेत्यापि सञ्चयस्य सत्त्वं दोषं ब्रूमः—

लोकवत्तु सञ्चयसत्त्वे व्यपदेशोऽस्त्येवेति गृह्यताम्, ततश्चाव्यपदेश्यो विषयः प्रत्य-

स्यैतस्य व्यसनविज्ञानपरम्पराभावात् दुष्करमिति भावः । यदि तु नीलादिविज्ञानस्य चाक्षुषस्य प्रत्यक्षत्वमभ्युपगम्यते तर्हि दाहानुभवाद्युपपत्तेः केवलं स्वार्थ एव परमार्थसत् परमाण्वालम्बनं स्यादित्याह—वैधर्म्येणेति । तथा च नीलादीन्द्रिय- 25 विज्ञानं स्वार्थमात्रालम्बनम् प्रत्यक्षत्वात् अव्यवहितप्रतिपत्त्यात्मकत्वात् स्वलक्षणविषयत्वाद्वा दाहानुभववदिति प्रयोगः । स्वार्थमात्रेत्यत्र मात्रपदेन व्यवधानस्य स्वरूपस्य व्युदासः । उपपत्तिहेतुः पक्षहेतुरित्यर्थः स्वलक्षणार्थान्तराध्यारोपे तस्याभ्युपगम्यमाने त्वाह—अर्थान्तरेति । अजातेति वन्ध्यापुत्रदृष्टान्तोऽयम् अस्तीति निरस्यति परमार्थत इति । बौद्धमतेन दृष्टान्तमाह—भवन्मतेनेति । यस्मिन् घटबुद्धिर्निरस्यते बुद्ध्या वा रूपादिकं व्यपोह्यते तदा वस्तु तदपि निरस्यते एवं कल्पितापेक्ष्यापि स्वपदो यो व्यवहारः स संवृतिसत्, अतोऽन्यः परमार्थसदित्यभिप्रायेणाह 30 घटाद्—भेद इति । दृष्टान्तं भावयति यथेति चक्षुर्विज्ञानं प्रति परमार्थतोऽसत्त्वात् यथा न कारकत्वं तथा सञ्चयस्यापि परमार्थतोऽसत्त्वाद् नीलादेरतीन्द्रियत्वाच्च कारकत्वाभाव इति भावः । परमाणुसमुदायोऽवयवसमवायेन स्थितिरेव सञ्चयः स च न परमाणुभ्यो व्यतिरिक्तः कल्पितोऽकल्पितः कारक एव इत्याह—इतश्चेति । सञ्चयस्य सत्त्वे कारकत्वे च तेन व्यपदिश्यत एव तज्ज्ञानमिति तस्याव्यपदेश्यत्वाभिधानमसङ्गतमित्याह—लोकवदिति । दुष्टोऽयमसिद्धोऽव्यपदेशक-

थस्य, प्रत्यक्षं वाऽव्यपदेश्यमित्युभयमनूद्यम्, विशिष्टोऽपदेशो व्यपदेशः, विशिष्टोऽस्य इत्यर्थः, माहात्म्यः सम्बन्धतद्व्यपदेशेन व्यपदेश्यं प्रमेयं तदनुमेयं प्राप्नोति, व्यपदेश्याव्यपदेश्यत्वात् प्रत्यक्षं धूमानुमिताग्निवत् यथा धूमेन व्यपदेशेन साधितोऽग्निरनुमेयोऽप्रत्यक्षश्च तथा नीलं रूपम् ।

5 (लोकवदिति) लोकवत् तत्त्वमसत्त्वे यथा लोकस्यात्मन्यभावस्यापि सद्भावादिव्यतिरेकेण सर्वेपाववी परिणामान्तरपरत्वसमुदायो वा योऽस्तु सोऽस्तु परैर्मृत्पादिवत् सर्वेषामेवासौ, तन्तुत्वादिषु बुद्धिप्रतिपत्तिकार्याभिमानसंख्यादिभेददर्शनात्, इत्यसूत्रभाष्यार्थानुसारेण व्यपदेशोऽस्त्येवेति गृह्यताम्, तत्राव्यपदेश्यो विषयः प्रत्यक्षस्य, प्रत्यक्षं वाऽव्यपदेश्यमित्युभयमनूद्यम्, तत्कथमिति चेत्? विशिष्टोऽपदेशो व्यपदेश इति विग्रहस्य विशिष्टार्थतामपदेशशब्दस्य हेत्वर्थतां दर्शयति । विशिष्टोऽस्य इत्यर्थः, 10 कुतोऽस्य इति चेदुच्यते माहात्म्यात्, माहात्म्यो नीलादिविशेषमाहात्म्यः सम्बन्धः, तद्व्यपदेशः, तेन सम्बन्धेन व्यपदेशेन हेतुना व्यपदेश्यम्, किं तत्? प्रमेयं नीलादि रूपमिन्द्रियसम्बन्धप्रमाणगम्यम्, किं भवति? तन्नीलादिरूपमनुमेयं प्राप्नोति व्यपदेश्याव्यपदेश्यत्वात् प्रत्यक्षम्, तस्य हेत्वाभासत्वेन हेतोः प्रत्यक्षत्वा-भावोऽनुमेयभावश्च साध्यते, तस्मात्प्रत्यक्षत्वाऽनुमानता च साध्यते को दृष्टान्तः? धूमानुमिता-ग्निवत्, यथा धूमेन व्यपदेशेन साधितोऽग्निरनुमेयोऽप्रत्यक्षश्च तथा नीलं रूपम्—यथा च धूमाख्य-15 लोत्पादिताग्निज्ञानमनुमानमप्रत्यक्षं तथा नीलज्ञानं सम्बन्धोत्पादितमिति ।

किञ्चान्यत्—

सर्वथा तत्त्वेन व्यपदेश्यं तदविनाभावात्तस्य कारकतायामकारकतायां वा न कश्चि-द्विशेषोऽर्थान्तरनिमित्तत्वेन पितृधूमादिवत्, तत्तुल्ये व्यपदेशस्य हेतौ व्यपदेश्यविशेष-कोऽयमनर्थको विचारः कारको ज्ञापक इति, एवं साधकत्वतो व्यपदेश्यमेव ।

20 (सर्वथेति) सर्वथा तन्नीलादिज्ञानं तेन—सम्बन्धेन व्यपदेश्यं तदविनाभावात्तस्य कारकता-यामकारकतायां वा न कश्चिद्विशेषो व्यपदेश्यत्वसिद्धौ वस्तुनः, कुतः? अर्थान्तरनिमित्तत्वेन पितृ-धूमादिवत्, यथा पिता पुत्रस्य जनकत्वेन व्यपदिश्यते कारकेण पुत्रः, धूमेन ज्ञापकेनाग्निरविशिष्ट-त्वाद्वस्तुनः, तत्तुल्ये व्यपदेशस्य हेतावप्रत्यक्षत्वानुमानत्वसाधनसमर्थे सति व्यपदेश्यत्वविशेषकोऽय-

---

कोत्तर। । लोकापेक्षया [illegible] बुद्धिप्रतिपत्तिकार्याभिमान[illegible] [illegible]
25 [illegible] बुद्धिः घटे न पट इति बुद्धिभेदः [illegible] [illegible]
[illegible] [illegible]
इति [illegible] [illegible] परिणामान्तर[illegible] [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
30 [illegible]
[illegible]

मनर्थको विचारः कारको ज्ञापक इति । एवं तावदर्थैकत्वोऽस्य नीलस्य व्यपदेशः सिद्धो यत्सिद्धेर् प्रत्यक्षानुमेयत्वे सिद्धे स्याताम्, तत्सिद्धेश्च तज्ज्ञानस्यानुमानत्वं सिद्ध्येत्, व्यपदेश्यत्वविरुद्ध-धर्मविरोधश्च ।

यद्यपीष्टमभिधानतो न व्यपदेश्य तन्नीलादिपरमाणुरूपं परमाणुसमूहाभेदात्वेकं येनैते द्वे अपि नैव स्तः, अनुमिताभिधानबहुविषयत्वात्, तथा ज्ञानमपि ।

(यद्यपीति) अभिधानाव्यपदेश्यैकात्मकत्वे अपि नैव स्तो नीलादिरूपस्येति प्रतिज्ञा, दृष्टान्तोऽनुमिताभिधानमिति, प्रतिपत्तिसौकर्यात् प्रागेव हेतोर्दृष्टान्त उक्तः, तद्गताव्ययसिद्धेर्हेतुसमर्थनार्थ-त्वात् दृष्टान्तस्य । हेतुस्तर्हि क इत्यत्रोच्यते बहुविषयत्वात्, यथा धूमज्ञानानुमितोऽग्निरनावृतविभि-न्नस्वरूपलक्षितो देशकालादिभेदभिन्नोऽप्यभिधानव्यपदेश्योऽनेकात्मकत्वात् एव गृह्यते तथा नील-वर्णोऽपि स्थूलपरमाणुविषयत्वात्, तथा ज्ञानमपीति ।

इदानीं प्रागभिहितकल्पनात्मकत्वादिभिर्हेतुभिरनुमानात् पापीयस्त्वं तस्य प्रत्यक्षस्य प्रतिपाद-यितुकाम आह—

तद्धि नीलरूपनिरूपणमर्थव्यपदेशेन शब्दव्यपदेशेन वा दृष्टं स च विकल्प एवातः कल्पनापोढमिति दुष्टं लक्षणं ज्ञानार्थयोरध्यारोपाच्च निरूपणात्तस्य, प्रतिपरमाणु प्रतिभिन्नानि स्वानि तत्त्वानि, तथा तेषां नीलरूपाण्यप्यनेकरूपाण्येव, तेषाञ्च यथासंख्यमेकत्वस्यैकरूपा-ध्यारोपात्वर्णान्तरनिरूपणम्, स चाध्यारोपो रूपान्तरसामान्यरूपविषयत्वात्, यदपि सामान्यं तदसद्विषयवृत्तत्वात् ।

तद्धि नीलरूपनिरूपणमित्यादि, तदिति प्रागपदिष्टमविकल्पात्मकं प्रत्यक्षो यस्मादर्थं, यस्मान्नीलरूपस्य निरूपणमुक्तन्यायेनार्थव्यपदेशेन शब्दव्यपदेशेन वा दृष्ट स च विकल्प एवेत्यविक-ल्पकत्व भाव्यतः कल्पनापोढमिति दुष्ट लक्षणम्, ज्ञानार्थयोरध्यारोपाच्च निरूपणात्तस्य, तत्कथमिति चेदुच्यते प्रतिपरमाणु—परमाणुं परमाणु प्रति प्रतिपरमाणु परस्परतः प्रतिभिन्नानि स्वानि तत्त्वानि—यो यस्य भावः स तस्य तत्त्वं न सोऽन्यत्र भवति, भवनमेव हि तत्त्वमतो विभिन्नानि प्रतिपरमाणु तत्त्वानि, एकैकस्य परमाणोः परमाण्वन्तरेभ्योऽत्यन्तभिन्नं स्वं तत्त्वं, भावान्तरमनपेक्ष्य स्वरसत एव

त्वमिति परत्वात् अथवा योऽर्थे विचार क्रियते सोऽनर्थक इति भावः । एवं तावदिति एतावता ग्रन्थेन साधितमुच्यते नीलादेर्व्यपदेश्यत्वसिद्धौ तस्याप्रत्यक्षत्वमनुमेयत्वञ्च सिद्ध्यति तत्सिद्धौ च नीलादिज्ञानस्यानुमानत्वं सिद्ध्यति तत्र नीलादि ज्ञानसाव्यपदेश्यत्वादिव्यपदेशत्वं विरुद्ध्येत इति । ननु पूर्वं नीलादिज्ञानस्याव्यपदेश्यत्वसमर्थनं नीलत्वमभिधानतस्तदुत्पन्नत्वेन व्यप-देश्यत्वमनभ्युपगम्य यदि ना तदिति प्रतिपादिना सम्प्रति व्यपदिश्यतेऽप्येवेति धर्मपरमाणुरूपत्वमुपगमेन नीलादेः धर्मतोऽव्यपदेश्यत्वं यदि भूतानमपि एवं निरुक्तमभिधानमिधानेति । तथा च नीलत्वं नामिधानाव्यपदेश्यं प्रत्यक्षं बहुविषयत्वात् अनुमिताभिधानवदिति प्रयोगः । प्रतिपत्तिसौकर्येण दर्शयति—तद्गतेत्यादिना, यतो हेतुं प्रदर्शयितुमपि यावता दृष्टान्ते न प्रदर्शिते तावत् न हेतुरविनाभूतत्वमित्येव [illegible] अतो दृष्टान्तस्य प्रतिपत्तौ व्याप्तिदर्शनाद् प्रागुक्तेति भावः । तदेवं नीलादेर्विषयस्य शब्दव्यपदेशेन व्यपदेश्यत्वं समर्थ्य नीलादिज्ञानस्यापि तत्समर्थयन्नाह तथेति—तथा ज्ञानमपीति । कल्पनारोपमध्यारोप्य कल्पनात्मकत्वं समर्थयति—स च विकल्प एवेति । अध्यारोपं दर्शयति प्रतिपरमाण्विति, एकैकं हि परमाणोऽन्योऽन्यानपेक्ष स्वलक्षणत्वात् [illegible] भिन्नभिन्न तथा तेषां नील-

भवनात्, भावानामेकस्य च सामान्यभवनत्वात् परमाणूनां तानि रूपाणि भिन्नानि, तथा तेषां परमाणूनां नीलादिरूपाण्यप्यनेकरूपाण्येव, तेषां च स्ववयवानां तेषां च नीलादिस्वरूपाणामेकद्वित्रिगुणादिभिन्नानां यथार्थस्यमेकत्वस्यैकरूपाध्यारोपात्—सर्वपरमाणुवर्त्तनानामेकत्वस्याध्यारोपात् सर्वपरमाणुरूपाणामेकनीलरूपाध्यारोपात्तदर्थान्तरनिरूपणम्, स चाप्यध्यारोपो रूपान्तरसामान्यरूपविषय-
5 त्वात्—रूपान्तरमपूर्वं रूपान्तरं परमाणुरूपात् परमाण्वन्तररूपं रूपान्तरम्, एवं सर्वाणि परमाण्वन्तररूपाणि, तेषां रूपं नीलमित्यभेदेन तत्सामान्ययुक्त्या गृह्यते सोऽध्यारोपस्तद्विषयः, तदपि सामान्य एव तद्विषयवृत्तत्वात्, सामान्यमिति गृह्यते स चान्यथार्थो विषयोऽस्येति कृत्वा ।

ततश्चात्र प्रत्यक्षेऽप्यस्यानपोहादनुमाने त्वपोहात्प्रत्यक्षमविविक्तविषयमतोऽनुमानादेव पापीयः, सङ्कीर्णतरविषयत्वात्साम्यनुमानमप्येवत्, अपोह्यार्थापोहाशक्तिशून्यत्वात् ।

10 (ततश्चेति) ततश्चात्र प्रत्यक्षेऽप्यस्यानपोहः, अनुमाने त्वन्यैरन्यस्यापोहः—तस्मादेव त्वपोहात् प्रत्यक्षमविविक्तविषयम्—स्वविषयाभिमतेऽन्यत्र चापरिच्छेदेनाभेदेन च वृत्तेः, अनुमाने स्वविषये सामान्यमात्र एव वृत्तेरतोऽनुमानात् तत्—परपरिकल्पितं प्रत्यक्षं पापीयः, सङ्कीर्णतरविषयत्वादिति तस्मात्साम्यनुमानमप्येवत्—अप्यनुमानतुल्यमपि तत्र भवति, अपोह्यार्थापोहाशक्तिशून्यत्वात्, तस्मात्सामान्यात्मकत्वेनाप्यनुमानस्य न प्रत्यक्षमेव तत्र नीलादेरर्थस्य प्रत्यक्षविषयस्य ज्ञानस्य च
15 तत्त्वतः सङ्कीर्णरूपता ।

किञ्चान्यत् तदतद्विषयवृत्ततापि न नीलरूपादेरन्यज्ञानस्य चोपपद्यते, किं कारणम् ? तदतदोः सम्बन्धाभावात्, खपुष्पवत्, तत उपचरितमत्र तदतद्विषयवृत्तत्वमपीति तत्प्रदर्शनार्थमाह—

प्रज्ञप्तिपरमार्थस्थितसञ्चयपरमाणुपरिग्रहसमकत्वात्तदतद्विषयवृत्तता, सा च सर्वथा सा चारण्यार्थत्वाविशेषेऽन्येष्वेतेषु हेतुषु, ततो मूलहेतुरेतैः साधितस्तस्मात् तत्प्रत्यक्षं नानुमानवदस-
20 ङ्कीर्णस्वविषयम् ।

(प्रज्ञप्तीति) प्रज्ञप्तिसत् सञ्चयः, परमार्थसन्तस्तु तदाश्रिताः परमाणवः, तेषां परिग्रह

एकस्यापि प्रतिपरमाणु भिन्नानि परस्परापेक्षकत्वानि तथा च स्थिते तत्तुल्यभावे परमाणुवर्तनानामेकत्वं तदीक्षणत्वैक-त्वसमध्यारोप्य निरूपणं प्रत्यक्षो भिन्न एकार्थान्तरमिक्षणं बोध्यम् । प्रत्येकं परमाणुवर्तनस्य भवनात् एकमेकत्वमि-त्याह—भावानामिति । रूपाण्येवाह—तथेति । यथार्थत्वमिति एकत्वाध्यारोपः परमाणुवर्तनस्य तदीक्षणस्य
25 चैकत्वाध्यारोपे यथार्थत्वम् । रूपान्तरेति रूपान्तराणां—भिन्नपरमाणुरूपाणां [illegible] च रूपमिति समान-रूपाऽभेदेन विपरीतसमारोपस्वैकत्वं । अतदपोहादिति इतरव्यावृत्त्यकरणात् तद्विषयेऽपि प्रत्यक्षस्य तत्-परिच्छेदं । अपोहेति अपोह्यो व्यावर्तनीयो योऽर्थस्तस्यापोहे व्यावर्तने शक्तिशून्यत्वात् सामर्थ्यविहीनत्वात् प्रत्यक्षस्यैवं । सामान्यात्मकत्वेनेति सामान्यं हि अव्यावृत्तरूपम्, अनुमानस्यापि तत्स्वरूपविषयत्वं सामान्यात्मकत्वा तत एवासङ्की-र्णविषयत्वं प्रत्यक्षस्यापीत्येकोऽपि [illegible] एव च सङ्कीर्णविषयमिति भावः । तद्रूपत्वं तेषां
30 परमाणूनामसङ्घातात्मकत्वेन [illegible] [illegible] सम्बन्धात्मकत्वात् तदतद्विषयेऽपि सर्वथा न घटनमपि [illegible] अर्थापत्ति किञ्चान्यदिति । प्रज्ञप्तीति प्रज्ञप्तिश्च परमार्थश्च प्रज्ञप्तिपरमार्थौ ताभ्यां स्थितौ प्रज्ञप्तिपरमार्थस्थितौ सञ्चयश्च परमाणुश्च सञ्चयपरमाणू, तत [illegible] तयोः परिग्रह स [illegible] [illegible]

सदसदमेदात्मकः, प्रत्यासत्त्यसत्त्वमेव परिग्रहात्मकत्वात् तद्विषयत्वात्, सा च सर्वथा साधारणार्थत्वा-न्निर्दोषत्वेऽप्यनन्वयोऽप्येषु हेतुषु, ततो मूलहेतुः कल्पनात्मकत्वान्निर्दोषैः साधितः, तत्राप्र तत्प्रत्यक्ष न चानुमानवद्गृहीतस्वविषयमित्येतदर्थमाचनार्थाः पुनश्च एव हेतवो व्यापारिताः प्रत्येकमपि पूर्ववदे-तस्मिन्नर्थे योज्याः ।

इतश्च तज्ज्ञानमप्रत्यक्षमप्रत्ययप्रत्ययात्मकत्वाच्छब्दाभावणस्थप्रत्ययवत् । 　5

(इतश्चेति) प्रत्ययः कारणं हेतुरित्यर्थः, न प्रत्ययो हेतुरस्येत्यप्रत्ययः, कोऽसौ ? प्रत्ययः, प्रत्ययो विज्ञानम्, द्वितीयप्रत्ययपदस्य विज्ञानार्थत्वात्, अकारणज्ञानत्वादित्युक्तं भवति, कथं पुनर कारणं तज्ज्ञानं ? संवृत्यतीन्द्रियत्वाभ्याम्, यस्मात् प्रमाणुषु न सञ्चये प्रत्ययता तथा प्रतिपत्तिं प्रति द्रव्य सत्तामविषयत्वात्, द्रव्यसत्त्वो हि परमाणवोऽतीन्द्रियत्वादेव न प्रत्यक्षज्ञानहेतवः, तथा नीलत्वादयः संवृतिसत्त्वात्तत्प्रत्ययोऽसत्त्वादेवाकारणम्, तस्मादुभयथाऽप्यप्रत्ययः स प्रत्ययो नीलरूपमिति, को 10 दृष्टान्तः ? यथाऽश्रावणः शब्द इति प्रत्ययोऽप्रत्ययः तथेदमपीति ।

स्यान्मतं कल्पनात्मकत्वादिभ्यो हेतुभ्योऽनुमानज्ञानं तर्हि चक्षुरादिविज्ञानं भविष्यतीत्यत्रोच्यते—

अनुमानज्ञानमपि तत्र प्रतिपूर्यते सम्यगगृहीतस्यान्यथा प्रतिपत्तेः, यथा विरुद्धादि ज्ञानम् ।

(अनुमानज्ञानमपीति) कर्मकर्तर्यभ्यासमेतत्पदम्, यद् क तत्प्रतिपेयात्म प्रतिपूर्यते इति 15 रूपम् ? यथाऽयमोदनो विपमत्वात् पूतिमांसवदात्मानं न भोजयति न भुज्यते स्वयमेव तथेदमपि ज्ञानमात्मानमपि न पूरयति न प्रतिपूर्यते, कस्माद्धेतोः ? सम्यगगृहीतस्यान्यथाप्रतिपत्तेः, सम्यग् एव गृहीतस्य सम्यगगृहीतस्यान्यथाप्रतिपत्तेः तस्य ज्ञानस्यान्यथाप्रतिपद्यमानसम्यगगृहीतार्थत्वादि त्यर्थः, यद् ज्ञानं सम्यगेवार्थं गृह्णत्येवार्थमन्यथा प्रतिपद्यते तज्ज्ञानं नानुमानमपि सम्पूर्णं भवति, तद्यथा विरुद्धादिज्ञानम्, यथा कृतकत्वादिभिः शब्द इति पक्षधर्मज्ञानं शब्दसम्बन्धे घटादिष्वनि 20 त्यानुगमसम्बन्धं गृहीत्वा नित्यं शब्दं प्रतिपद्यमानं विरुद्धहेत्वाभासज्ञानं भवति, आदिग्रहणात् प्रमेय त्वादयत्वादौ नित्यत्वं वा सपक्षविपक्षयोरनैकान्तिकाभासे यथा तथेदमपि न सम्पूर्णमनुमानमपीति ।

परिग्रहात्मकत्वस्य प्रत्यासत्त्वादिति भिन्नः । सदसदिति सत्त्वः परमाणवोऽसत्त्वमवयवेषामभेदरूपेण परिग्रह इत्यर्थः । अनन्वयोऽप्येषु हेतुष्विति सर्वथा साधारणार्थत्वादन्वयव्यतिरेकार्थविषयत्वात् सामान्यविशेषात्मकार्थविषयत्वान्निर्दोषत्वे एषु कल्पनात्मकत्वादिषु हेतुषु प्रत्यक्षज्ञानस्य कल्पनात्मकत्वं साधयन्ति तत्र कल्पनात्मकत्वे सिद्धे तज्ज्ञा- 25 नस्याप्रत्यक्षत्वं तेन सिध्यतीति भावः । अथ कल्पनात्मकत्वे ज्ञानस्याप्रत्यक्षत्वे कारणान्तरमाह—इतश्चेति । नीलादिप्रत्ययं न प्रत्यक्षं कारणं विना जायमानत्वात्, अप्रत्ययः शब्द इति प्रत्ययवदिति मानम् । तत्र हि प्रत्ययस्य परमाणुरूपं कारणं वा भवत् कारणत्वेनाभिमतं तत्र न सम्भवति परमाण्वपेक्षया परमाणोरतीन्द्रियत्वेन प्रत्यक्षकारणत्वायोगात्, संवृतिसत्त्व सत्त्वस्य चासत्त्वादेवाकारणत्वात् अतोऽप्रत्ययप्रत्ययात्मकं तदिति भावः कर्मकर्तरीति यदा योग्यांशियत्वं योऽतिदि- कर्मव्यापारे न विवक्ष्यते तदा कर्मादिकारकान्तराण्यपि कर्तृसंज्ञां लभन्ते स्वव्यापारे स्वतन्त्रत्वात्, तदा कर्मकर्तृकाः 30 कर्तरि प्रत्ययास्तदा भवन्ति पूरी आप्यायने तुदादि प्रत्ययात्मकमात्मानं न पूरयति तदनुमानज्ञानं प्रेरयतीति अनुमान ज्ञानं प्रत्यक्षज्ञानमात्मानं न पूरयति तत्र कर्मणः प्रत्ययवाचकं कर्तृत्वविवक्षायां कर्मस्वविवक्षया कुम्भक्रियात्वात् प्रत्यक्षज्ञानमा- त्मानं न प्रतिपूर्यते इत्यात्मनेपदप्रयोगः अत एतान् तज्ज्ञानं नानुमानमपि सम्पूर्णं भवतीति भावार्थो वर्णित इति । यथा कृत- कत्वादिति, कृतकत्वं हि अनित्यत्वेन सम्बद्धं तदेव गृहीतं घटादिविज्ञानं यदि शब्दं नित्यत्वेन प्रतिपादयति तदा तज्ज्ञा-

अथवा तिष्ठतु तावत् स्वलक्षणमात्रविषयप्रत्यक्षत्वस्य प्रत्यक्षविधिविधानाभ्युपगमेन विरोध इति, इह तु चक्षुर्विज्ञानसमङ्गीत्येतदेव तु न घटते ।

(अथवेति) अथवा तिष्ठतु तावत्तावत् प्रत्यक्षविषयस्याभ्युपगमविरोध इति स्थितम्, यात इत्यु विदूरक्षेमागमेनाभ्युपगतेन प्रत्यक्षविषयत्वस्य विरोध इत्येतत्—इदमेवास्मिन् प्रकरणे चतुरार्यं
5 चक्षुर्विज्ञानसमङ्गीत्यादि तदेव न घटत इति वाक्यार्थः । प्रत्यक्षस्य विधिः—प्रत्यक्षस्य जन्म, तस्य विधानं—व्याख्यानं सञ्चितालम्बनाः पञ्चविज्ञानकाया इति, स एवाभ्युपगमः, प्रत्यक्षविधिविधानाभ्युपगमः, स्वलक्षणमात्रविषयप्रत्यक्षत्वमेव—स्वलक्षणमात्रं विषयो यस्य तत्स्वलक्षणमात्रविषयं, किं तत्? प्रत्यक्षं तस्य भावः स्वलक्षणमात्रविषयप्रत्यक्षत्वं तस्य प्रत्यक्षविधिविधानाभ्युपगमेन विरोधः समनन्तर ग्रन्थोपपादितः स स्थित एव । चक्षुर्विज्ञानमित्येतदेव तु न घटते, तुशब्दो विशेषणे, किं विशि-
10 नष्टि? पूर्वस्माल्लक्षणवाक्यादागमस्यासाधुतरतां विशिनष्टि, चक्षुषः चक्षुषि चक्षुषा वा विशिष्टं ज्ञानं विज्ञानमसाधारणविषयं तत्समङ्गि समन्वेतीति चक्षुर्विज्ञानसमङ्गी कः? सन्तानः, विज्ञानस्य तदुपैं क्षणमात्रात् तद्द्वारेण तत्सन्तानोऽपि समङ्गीत्युच्यते तत्समङ्गिनो नीलविज्ञानं तदेव प्रत्यक्षं यस्य नापोढमनिर्दिष्टं स्वलक्षणविषयमित्याविधानं तेन सञ्चितस्योदाहरणमिदं तदिति प्रत्यक्षीकरणं प्रदर्शनम् यथा 'वृद्धिरादैजिति' (पाणि० अ० १ पा० १ सू० १) सूपलक्षितमेव व्याकरणमित्युदाहरणम् ।

15 कथं पुनस्तन्न घटते? तत आह—

एवं ते सञ्चयस्य तद्रूपे तत्प्रत्यक्षत्वाद्रूपमात्रत्वात् सञ्चितालम्बनकल्पनावैयर्थ्यम् ।

एवं ते सञ्चयस्येत्यादि यावत्सञ्चितालम्बनकल्पनावैयर्थ्यमिति, एवं ते उदाहरणत्वेनेष्टौ सत्यां सञ्चयस्य रूपमात्रत्वात्, किं भवति? सञ्चितालम्बनकल्पनावैयर्थ्यं स्यादित्यभिसम्बध्यते, रूपमात्रत्वं सञ्चयस्य कुतः? तद्रूपे तत्प्रत्यक्षत्वात्, यद्रूपे यस्य प्रत्यक्षत्वं तदाकारमात्रमेव दृष्टं यथा
20 दाहघटे दाहप्रत्यक्षत्वे दाहमात्रमेव नातोऽन्योऽर्थं दृष्टः, एवं सञ्चयघटे नीलरूपमात्रमेव अतः किं? सञ्चितालम्बनकल्पनावैयर्थ्यम्, सञ्चयाभावात् सञ्चयाभावो रूपमात्रत्वात् सञ्चितालम्बनकल्पनावैयर्थ्योदाहरणमेव तु न घटते चक्षुर्विज्ञानसमङ्गीत्यादि ।

अतन्मात्रत्वे संवृतिसत्त्वात्सञ्चयस्याकल्पत्वं करविपाक्यवदित्यचाक्षुर्विषयो रूपम्, ततो

यत्र विस्तरे [illegible] पुरस्तीति एवं [illegible]
25 [illegible] च पुरस्तीति [illegible] । अथवा तिष्ठत्विति, [illegible] विरोधो न [illegible] चक्षुर्विज्ञानसमङ्गी [illegible] तु न घटत इत्येवं [illegible] । पूर्वस्मादिति [illegible] । विज्ञानस्येति [illegible]
30 [illegible] चक्षुर्विज्ञानसमङ्गी भवति । इदं तदिति [illegible] चक्षुर्विज्ञान [illegible] । अतन्मात्रत्वे [illegible] संवृतिसत्त्वेन [illegible] चक्षुषा [illegible] ।

रूपस्याग्राहकत्वाच्चक्षुरचक्षुः श्रोत्रवत्, अथासन्निहितमेव परमाणुनीलरूपमिदं तथाप्यतीन्द्रियत्वादचक्षुर्विषयो रूपमित्युभयथापि रूपाग्राहित्वाद्घटादिवच्चक्षुर्नैव चक्षुः स्यात्।

अतन्मात्रत्वे संवृतिसत्त्वादित्यादि यावदुभयथापि रूपाग्राहित्वाद्घटादिवत्, अथ मा भूदेष दोष इति न रूपमात्रं समुदायः स एव च गृह्यत इतीष्यते ततः समुदायस्य संवृतिसत्त्वादरूपत्वं खरविषाणवत्, संवृतिसत्त्वञ्च प्रागुपपादितम्, अरूपत्वाच्च न चक्षुर्ग्राह्यः स्यात् समुदायो रूपादन्यत्वात् 5
शब्दवत् खपुष्पवद्वा, ततः को दोष इति चेदुच्यते चक्षुर्नैव चक्षुः स्यात्, रूपस्याग्राहकत्वात् घटवत् श्रोत्रवच्चेत्यादि, कथं रूपस्याग्राहकं चक्षुरिति दृष्टप्रसिद्धिविरुद्धमुच्यत इति चेत् तथैव दृष्टप्रसिद्धिविरोधापादनायैते मया, किं कारणम्? उभयथा रूपाग्राहित्वात्, यदि समुदायस्याप्यसत्त्वरूप एवं सुखत्वादचक्षुर्विषयो रूपं ततो रूपस्याग्राहकत्वाच्चक्षुरचक्षुः श्रोत्रवत्, अथासन्निहितमेव परमाणुनीलरूपमिदं तथाप्यतीन्द्रियत्वादचक्षुर्विषयो रूपमतो रूपस्याग्राहकत्वाच्च चक्षुर्न चक्षुः स्यादुक्तमिति सूत्र 10
मुभयथापि रूपस्याग्राहकं चक्षुरिति। एवं तावच्चक्षुर्विज्ञानसमाश्रितमत्र चक्षुषोऽचक्षुष्ट्वं चक्षुर्ग्रहणमनर्थकम्।

विज्ञानमाहरणमप्यत एवानर्थकमित्यत आह—

विज्ञानमपि न विज्ञानं स्यात्, अन्यथाऽर्थप्रतिपत्तेरज्ञातचक्षुर्विज्ञानवत्, न च चक्षुर्विज्ञानं समश्नुते चक्षुर्विज्ञानस्य रूपादन्यत्रासम्भवात्, न वा तत्सम्बन्धोऽन्यत्र सम्भवति, समुदायापेक्षो व्यभिचारोऽस्त्यतो विशेष्यत इति चेन्न, न हि समुदायो रूपमरूपस्याचक्षुर्विज्ञान- 15
समश्नुत्यभावः। यदपि च तद्रूपं रूप्यत इति तद्विषयं तदेकगमनं चक्षुर्विज्ञानस्येति, तदपि नास्ति, अविषयत्वादन्येन्द्रियविषयवत्, समुदायविषयमपि चक्षुर्विज्ञानस्य समश्नुते न, संवृतिसत्त्वात् खपुष्पवत्।

विज्ञानमपि न विज्ञानं स्यादित्यादि यावत् खपुष्पवदिति, विशेषेण ज्ञानं विज्ञानं तावद्रूपमिदमर्थं प्रत्यक्षं मुख्यं विज्ञानं न स्यात्, इतरथा कथमाचार्यैर्भीमवादी विज्ञानं न स्यादिति स्ववचनविरोधं 20
मापेमविभाविष ब्रूयात्। किं कारणं पुनर्विज्ञानं तन्न स्यात्? अन्यथाऽर्थप्रतिपत्तेः, अरूपस्य समुदायस्य रूपत्वेन प्रतिपत्तेः, समुदायत्वेन वा रूपमात्रस्य प्रतिपत्तेः, को दृष्टान्तः? अज्ञातचक्षुर्विज्ञानवत्, यथो स्थाणावपि पुरुषमात्रमर्थं चक्षुरिति प्रतिपद्यमानं न विज्ञानमेवं तदपि, आविभ्रमणात् स्थाणुपुरुषज्ञानवदि-

---

अथ रूपस्य स्वस्वरूपसमक्षत्वे यदतीन्द्रियत्वेऽपि चक्षुर्ग्राह्यताऽनुपपत्तिरित्याह—अथासन्निहितमेवेति। तथा च चक्षुर्नैव चक्षुः रूपाग्राहकत्वात्, घटादिवत्, अन्नाविविक्षारूपत्वं रूपं न चक्षुर्ग्राह्यमतीन्द्रियत्वात् अतीन्द्रियत्वं स्वरूपासत्त्वात्, समुदायो न 25
रूपं संवृतिसत्त्वात् खपुष्पवदित्यनुमानानि। दृष्टप्रसिद्धीति, चक्षुषा हि रूपं दृश्यते तदभावे दृष्टविरोधः, रूपग्राहकं चक्षुरिति प्रसिद्धं लोके तदभावे प्रसिद्धिविरोध इति रूपस्याग्राहकं चक्षुरिति न युक्तं वक्तव्यमिति भावः। मायद्भिमत मिति अनेन विशेषणद्वयेन विज्ञानं विज्ञानं न स्यादिति स्ववचनविरोधमस्तो व्युदस्तोऽन्यथा यदि अविज्ञानं कथं तर्हि विज्ञानं न स्यात्, विज्ञानमेवास्य, यदि तत् विज्ञानं कथं तर्हि विज्ञानं न विज्ञानमित्युच्यते स्ववचनव्याघातस्तदभावादिति विरोधः स्यादिति भावः। भावेन—अतीतो मायासूनवीयो वा [illegible] अभिहोत्र। मुख्यमिति, प्रमाणभूतमित्यर्थः। तेन तस्य अप्रमाण- 30
त्वात् विज्ञानं न विशिष्टं ज्ञानमित्यर्थेन न विरोधः। तस्य विज्ञानत्वाभावे हेतुमाह—अन्यथाऽर्थप्रतिपत्तेरिति अर्थस्य वस्तुनोऽरूपस्य समुदायस्य रूपत्वेन प्रतिपत्तेः [illegible] रूपस्य समुदायत्वेन प्रतिपत्तेरिति भावः। यथेति, यथा स्थाणुप्रभृतिर्यत्नमेवार्थं प्रवर्तमानं भ्रान्तात्मा पुरुषेण चक्षुरिति प्रतिपद्यमानं न विशिष्टं ज्ञानमुच्यत इत्यर्थः।

न पुनरभियोक्तुमिच्छयाहतो भ्रमो गतार्थो चाक्यप्रयोगनिमित्तमिति, यदा चेत्यादिरारभ्य चाक्यप्रयोगनिमित्त-मित्येव प्रकार व्याहृतो भ्रमः पूर्वभाग्ये न तूत्तरभाग्ये, तद्युक्तं न द्रव्यादिव्यतिरिक्ता सा सिद्धिरित्यादिवक्ष्यमाण-मसम्बद्धम् तदात्मनिमित्तस्य सत्त्वस्यानुपपत्तेः—असत्ता मता द्रव्यादीनां मुख्यौ सदभिधानप्रत्ययौ कथं मुख्यमिति एतदाचार्यवचनमन्तरे पतित परस्माकौशलस्याऽऽख्यापनार्थम्, मनोरथमात्रमिति, वैशेषिकस्य

5 मनोरथ एव द्रव्यादिव्यतिरिक्ता सत्तेति, यदि भवेत् स्यात्, अन्यथा तु पूर्वोत्तरपक्षौ व्याख्यातावेव ।

द्रव्यादिभाक्तत्वनिवृत्तिः स्वतः सत्त्वं सत्तादियमैतस्य वचनस्य व्याघात इत्येतद्दोषद्वय दर्शनादिति चेन्नैव च दोषः दण्डिस्वदण्डत्वयोर्यथार्थ्यं स्वत एव सतोः तत्सम्बद्धत्वात्, सत्त्वतः सत्त्ववत् सदेव स्वं सत्त्वतः—सत्त्वात्, सदेव सत्, न सत्तातोऽन्यत् सत्, तस्मात् सर्वस्य सतो नास्त्यतादात्म्यं सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्यापत्तेः, सदादिवच्च स्वतः सत्त्वम् ।

10 (द्रव्यादीति) द्रव्यादिभाक्तत्वनिवृत्तिः स्वतः सत्त्वं सत्तादिवचैतस्य वचनस्य व्याघातः इत्येतद्दोषद्वयदर्शनादिति वैशेषिकेणोक्ते आचार्य आह—नैव चमादि, दण्डित्वं दण्डत्वञ्च यथार्थं स्वत एव सतोः तत्सम्बद्धत्वात्—सत्तासम्बद्धत्वादित्यर्थः, सत्त्वतः—सत्त्वात् सत्त्ववत्, सदेव सत् सत्त्वतः सत्त्वात् आत्मत्वात् स्वतः सत्त्वादित्यर्थः एवं तावन्मायो भवत सदेव सत् सत्त्वमेव सत्, न सत्त्वव्यतिरिक्ता सत्ता न सत्तातोऽन्यत् सत्, तस्मात् सर्वस्य सतो नास्त्यतादात्म्यम्—असदात्मत्वं तदभावात्

15 सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्यापत्तेः नायं दोष इत्यर्थः, सदादिवच्च स्वतः सत्त्वमिति, आदिमत्त्वात् द्रव्यत्वगुणत्वकर्मत्ववत् ।

यदर्थेन सता सतो भावः सत्तेति द्रव्याद्यव्यतिरिक्तसत्तार्थैव ज्ञायते, कर्तरि षष्ठीयुक्ते यद्वत् सन्नि सदित्यभिधानप्रत्ययकारणं सत्तैव, एवमपि

यदुक्तं स्वतः सत्त्वमिति, एतद्युक्तं मम हि सत्तावदिति सर्वमिदं त्वदनुवृत्त्या

20 न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति कर्तरि षष्ठीयुक्तत्वात्, ततोऽनुपपन्नं द्रव्यादीनामनेकत्वम् ।

[illegible]

[illegible] —द्रव्यादीति । [illegible]

[illegible] —दण्डित्वमिति [illegible]

25 [illegible] —स्वतः सत्त्वादित्यर्थ इति [illegible]

[illegible]

[illegible]

[illegible]

[illegible] —यदर्थेनेति । [illegible]

30 [illegible]

यतश्चैवमित्यादि, यस्मात् सत एव सत्ताद्रव्यादीनां मुख्या, तस्मात् सतो भावः सत्तेति या अस्मन्मुखनिर्गतवचनमुपाददानानां मा द्रव्याद्यव्यतिरिक्तसत्तार्थैव ज्ञायते सतो भावः सत्तेति, किं कारणं ? कर्तरि षष्ठीसूचेः, तद्व्याख्यानं वचनम् सन्निधिरित्यादि गतार्थं यावत् सदभिधानप्रत्ययकारणं सत्त्वेति, अथ एवमपीत्यादि पूर्वोत्तरपक्षौ सम्भावयन्तौ गतार्थौ वैशेषिकस्यैव यावदुपन्यस्तम्, यदुक्तं स्वतः सत्त्वमिति एतदयुक्तमिति आचार्यो यथैतत्प्रत्ययोद्भवः भवति तथाऽऽह—अत्र हि सत्तावदिति सर्वमिव स्वरूपसत्त्वा 5 त्वां प्रतिपादयितुमुच्यते, न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति, कर्तरि षष्ठीयुक्तत्वात्, द्रव्यादीनामकारणत्वाविशेषाः प्रसक्ताः ततोऽनुपपन्नमिति, एवं तत्प्रसङ्गात्, कुतोऽनुपपन्नता ? ममात्र नियतिताऽभ्यागता त्वन्मतेन तु सत्तामभ्युपगम्य मया सत्तावद्द्रव्यादीनामनिष्टापादनं कृतम्, मम तु द्रव्यगुणकर्मणां सामान्यविशेषसमवायानां चानेकत्वमनुपपन्नमिति ।

तद्व्याचष्टे— 10

कर्तृणाऽकर्तृणा च यो भवति स एव भावः सामान्यं देशकालादिभेदेऽपि भवनतुल्यत्वात्, स एव विशेषोऽन्यभवननिरपेक्षः कर्ता उत्पत्, भवत्येव भवति तदेव द्रव्यं भव्यं कलनं गुणः युगपदयुगपत्पर्यायत्वेन भवनात्, स एव भावः क्रिया, स एव विशेषः भावान्तराद्विशिष्यमाणत्वात् अन्यनिरपेक्षत्वात् सदसदात्मकत्वात् वक्ष्यमाणवच्च, स एव समवायः, एवमेव भवतः कर्तृत्वेन सत्त्वेव कारणत्य तदेकीभावगत्या कार्यत्वापत्तेः, सदसत्त्वेन कर्तृत्वात् 15 नासंयोगः, कार्यकारणप्रतिपादनात् नासमवायः, ताभ्यां सम्बद्धत्वाभिन्नत्वासत्त्वे न स्तः ।

कर्तृणाऽकर्तृणा चेत्यादि, भवतीति भाव इति कर्तरि, भवनं भाव इति भावे, इत्यादि कारकविवक्षायां यो भवति स एव भावः सामान्यम्, देशकालादिभेदेऽपि भवनतुल्यत्वात्, स एव विशेषोऽन्यभवननिरपेक्षः कर्ता, उत्पत् कर्तरि षष्ठीति, भवतो भवनात् भवत्येव भवति तदेव द्रव्यं भव्यम् भवद्भवनादेव कलनं गुणनं गुणः युगपदयुगपत्पर्यायत्वेन भवनात्, स एव भावः क्रिया 20

कर्तरीति भावं स्पष्टयति—सा द्रव्यादीति द्रव्यादेः सतो भवनलक्षणाव्यतिरिक्तसत्तार्थं मुख्यमिति ... सत् भवति—सद्गुणरूपसामान्यसमवायमेऽनुभवोऽवस्थित इति सत् कर्तृत्वम्, ... भवत् सता भूयते तदेव सत्ता सामान्यं ... भाव । ... कर्तरीति सतो भाव इति कर्तरि षष्ठी सा सतो भवनक्रियाकर्तृत्व ... द्रव्यगुणकर्मणां सामान्यविशेषसमवायानामनेकत्वमेवोपपद्यते—कर्तृत्वमिति ... 25 तथैव भवतीति ... भवतीति भाव इति ... तेन रूपेण भवति ... हि ... भवति ... देशकालभेदेऽपि भवनसामान्यात् भाव एव सामान्यमुच्यते न सतो भिन्न ... भाव । पूर्वोत्तरभावानपेक्ष ... द्रव्यमेव विशेष न हि विशेष सामान्याद्व्यतिरिक्तो ... सामान्यमयो भाव एवेत्यर्थः । ननु ... भवतो भवनादिति ... तदेव ... भवति ... भवतीति 30 द्रव्यमुच्यते स एव च गुण ... पर्यायत्वेन च भवनात्, ... क्रियाऽपि भवनात् स एव भावान्तरेण विशिष्यमाणत्वात् भावान्तरनिरपेक्षत्वाच्च विशेष ... हि सामान्यमेव ... विशिष्यते इति

भवन भाव इति, स एव विशेषः सामान्यादिभिर्विविच्यमानत्वात् अन्यनिरपेक्षत्वात्, सदसदात्मकत्वात्–सत्त्वेनासत्त्वेन च तस्यैव विविच्यमानत्वात् वक्ष्यमाणवेति कारणाकारणाद्यैक्यमनन्तरं वक्ष्यते, स एव समवायः एवमेवेति, भवतः कर्तृत्वेन तस्यैव कारणत्वं तदेकीभावगत्या कार्यत्वापत्तेः, प्रतिपादितेन विधिना सम्बन्धाभावः प्रत्याख्यातः, समवायसम्बन्धानात्, सदसत्त्वेनेति, अनेनैवासत्त्वमपि प्रत्याख्या-
5 तम् सदसदात्मकत्वात् कर्तृत्वात संयुज्यमेव कार्येणेति नोऽसंयोगः। कार्यकारणाविपादनप्रकाससमवायोऽस्ति, ताभ्यामेति संयोगसमवायाभ्यां सम्बन्धत्वात् भिन्नत्वासत्त्वे न स्तः, अजातिमन्ति स्थिति प्रतिपादय एव द्रव्यव्यतिरिक्तत्वाः नैरपेक्ष्येभिविक्तत्वात्, एवं तावत् कारणवत्त्व द्रव्यादेः ।

अथ वा अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि स्वतः सत्त्वात् सामान्यादिवत्, कारणादि वा सामान्यादीनि स्वतः सत्त्वात् द्रव्यादिवत् तदात्मत्वात्, उभयं वा, इतरेतर
10 रूपैकभवनाविशेषात् ।

अथ वेत्यादि, अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि स्वतः सत्त्वादुच्यत सामान्यादिवत्, कारणादि वेति कारणनित्यसम्बन्धजातिमन्त्यानि सामान्यविशेषसमवायानां स्वतः सत्त्वाद्द्रव्यादिवत्, असत्सत्त्वादिसर्वः तदात्मत्वात् यद् यदात्म तत् स्वतः सत् सत्तादिवदित्युक्तम्, उभयमिति, कारण-

---

विशेष अनुपत्सेन कारणकारणयोरैक्यमुच्यते तस्मात्तयोरेकरूपत्वात् स एव समवाय इति द्रव्यमेव सर्वं न द्रव्यात् गुणकर्मादि-
15 भावस्तेनैवेति भाव । ननु भवत्येव द्रव्य तर्हि वैविक्त्यात् समवाय कथं सम्भवति इत्यत आह–एवमेवेति तत्प्रकारेण भवतो भवनात् कर्तुः भवतः कार्यस्य भवनस्य चैकीभावगत्या तथैव समवाय इति भाव । एवं समवायस्यैकत्वेनात् कार्यकारणयोः सम्बन्धो न सम्भवतीति पुनः परावर्तनात्–प्रतिपादितेनेति । सर्वथा कारणं कार्येण संयुज्यमेव तस्मात् कार्यमसदेवेति कारणं मिथ्या-
तम्, भवत सदसदात्मकत्वेन कर्तृत्वात्तस्यैव कार्येण सह संयुज्यमेव, इत्यतः तयोः अनुत्पत्तिस्त्व सत्त्वे नासंयोग कार्य-
कारणभावात्तु तयोर्वा समवाय इत्यत–सदसत्त्वेनेति एवम् समवायोऽप्येतस्य सम्बन्ध संयोगस्य भेदस्य नैवानेन
20 कार्यकारणयोरिति भाव । कारणं सत् कार्येणैकीभावं भवत्यतो न भिन्नं अतश्च कार्यं संयुज्यते नासंयोग–संयो-
गेति । ननु सामान्यादीन्य द्रव्यादिभ्योऽतिरिक्तान्यभवन्ति अथ द्रव्यादीनि सामान्यवन्ति भवन्तीत्यत आह–अजातिमन्तीति
द्रव्यस्येव सामान्यरूपत्वात् सामान्यापेक्षा नास्तीति भाव । एवं द्रव्यस्यैव गुणकर्मसामान्यविशेषसमवायात्मकत्वात् एवत्वात्
सदसदात्मकत्वात् कार्यकारणादिभावो नानुपपन्न अपि त्वसौ तु कारणे कार्यस्य सत्त्वात् कारणकार्यानुपपत्तिरेव प्रत्युक्तिविधि-
रूपेणाह–एवं तावदिति । प्रकारान्तरेण द्रव्यादेः कारणकारणत्वं नित्यत्वानित्यत्वं सम्बन्धासम्बन्धं च जातिमत्त्व-
25 जातिमत्त्वयोरपि दर्शयति–अथ वेति । तत्कथमिति–अकारणेति यथा सामान्यविशेषसमवाया न कारणात्मकाः न समवायि-
कारणस्यवत् भिन्नाः अनन्ताः–समवायरहिताः अजाताः –जातिशून्याः स्वतः सद्रूपत्वात् तथैव द्रव्यादीन्यपि स्वतः सन्ति
एवैकत्वात् तस्मात् अकारणनित्यासम्बन्धाजातीनीति भाव । स्वतः सत्त्वादेव च सामान्यादीना द्रव्यादिवत् कारणकार्यत्वं
सम्बन्धत्वं जातिमत्त्वं भवन्तीत्यत–कारणेति । यदेव सत् तत् कारणत्वात्–स्वतः सत्त्वात्, सत्त्वस्य सत्ता न तु तत्स्थि-
तिः तदात्मत्वात्, यद् यदात्म तत् स्वतः सत् यथा सत्ता सत्तान्तराद् स्वतः सतीति न स्वतः सत्त्वं द्रव्यादावपि भिन्ना-
30 रूपेण–असत् सत्त्वादिसर्वं इति । द्रव्यादि सामान्यात्मकं सामान्यादि च द्रव्यात्मकम्, इतीतरेतरैकभवनात्मकं
सत् तदात्मकैतरेतरधर्मात्मकमपि तस्मात् एवं सत् कारणत्वेन कारणकार्यत्वं, नित्यानित्यं सम्बन्धासम्बन्धं जातिमत्त्वा-
जातिमत्त्वैकत्वात्–उभयमिति । ननु वैशेषिकेन समवायस्यैकत्वं स्वाभाविकमुक्तेन शङ्करमिश्रमतस्य मतस्य परिहारो विहितो न

---

१ सि क कार्यं योग्य । २ सि क. प्रतिविविविक्तत्वात् । ३ सि क द्रव्यत्वादेः ।

कारणनित्यानित्यसम्बन्धासम्बन्धजातिमदजातिमत्त्वानि द्रव्यादीनां सामान्यादीनाञ्च सर्वस्य वस्तुत्वात् द्रव्यात्मकत्वं भवत्येव इतरेतररूपैकभवनाविशेषात् ।

यदपि च समवायस्यैकत्वे सङ्करप्रसङ्ग इति दोष उक्तः स तदवस्थ एव, बहूनां सम्बन्धिनामेकसम्बन्धभावात्, वागादिगवाद्यभिधानवत्, तस्माद् द्रव्यत्वसम्बन्धाश्रयया द्रव्ये द्रव्यत्वबुद्धिं तथा गुणे कर्मणि च द्रव्यत्वबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्याताम्, 5 पदार्थलक्षणव्यवस्थानस्याभावात् षडपि पदार्था निवर्तन्ते कथम्? समवायस्यैकत्वात् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद् द्रव्यत्वाश्रययोश्च स्वरूपस्य हानिः, तत्त्वविशेषणमेवाद्धि तत्रैव स्यात्, छिन्नदण्डिवत् ।

यदपि चेत्यादि, निष्ठायाः सम्बन्धस्य च सत्त्वैककालत्वप्रतिपादनार्थं समवायस्यैकत्वादेककाल इत्युक्त्वा पुनरत्र यो दोषश्चोदितः सङ्करप्रसङ्ग इति स तदवस्थ एव दुष्परिहारः, बहूनां सम्बन्धिना- 10 मेकसम्बन्धभावादिति हेतुः बहवो हि सम्बन्धेनैकसम्बन्धीभूताः ततः तेषां सङ्करः, वागादिगवाद्य- भिधानवत् यथा गौरित्युक्ते वाग्दिग्भूरश्म्यादिभिरेकस्य गोशब्दस्य वागादिशब्दपर्यायत्वात्तत्र माऽसौ, तदर्थप्रतिपादनात् तत्सम्बन्धात्तुल्यैवेद सम्बन्धीति निर्णये व्यवस्थापयितुमशक्यत्वात् सर्वेषां दशानामिष्टः कारणकार्याधारः समवायोऽपि तथा ज्ञेयः, द्रव्यत्वेनेव गुणत्वकर्मत्वादिभिश्च सम्बन्धः इह लिङ्गविशेषाद्विशेषलिङ्गाभावादेकः समवायः तस्माद् द्रव्यत्वसम्बन्धाश्रयया द्रव्ये द्रव्यत्वबुद्धिं तथा गुणे 15 कर्मणि च द्रव्यत्वबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्यातामिति सामान्येन सङ्करदोष उक्तः, पदार्थेष्वपि द्वितीयः सङ्करप्रकारः पदार्थानां षण्णां द्रव्यादीनां लक्षणव्यवस्थानस्याभावात् षडपि पदार्था

पृ० ८ [illegible] दोषान्तरमप्यतिदिशन्नाह—यदपि चेति । व्याचष्टे—निष्ठाया इति वैशेषिकेन यदैव कार्यस्य निष्ठा तदैव सत्ता सम्बन्ध इत्येककालत्वप्रतिपादनार्थं समवायो ह्येक एव तस्मात् यदैव समवायः सम्बध्यते तदैव सर्वे तत्सम्बन्धिनोऽपि सम्बध्यन्ते [illegible] समवायस्य नानात्वं स्यात्, नो हि तदा न सम्बद्धस्तत्समवायोऽपि तत्कार्ये नास्ति [illegible] भवतीति तत् नेष्यते 20 तस्मात् सम्बन्धस्यैकत्वाविरोधात् [illegible] सम्बन्धस्य चैकः काल इति समवायस्यैकत्वं व्यवस्थाप्य ननु समवायस्यैकत्वे समवायसम्बन्धिनां सर्वेषामेकेन [illegible] सङ्कर स्यादिति सङ्करप्रसङ्गमाशङ्क्य तस्यैकत्वेऽपि यथा प्रतीति व्यवस्थेति निराकृतः तत्सङ्कर प्रसङ्ग परिहृतमकृत्वैव एवेति भाव । तत्र हेतुमाह—बहूनामिति [illegible] द्रव्यादीनां बहूनां सम्बन्धिनां समवायस्यैकत्वे सति सम्बन्धत्वाविशेषः । बहवो हीति अनेकेऽप्यमा एकेन समवायस- म्बन्धेनैकस्यैव सम्बन्धिनो [illegible] न तु पृथक् पृथक् सम्बन्धिन [illegible] इति भाव । दृष्टान्तमाह—वागादीति 25 [illegible] । [illegible] गौरिति [illegible] तत्र गौरित्युक्ते [illegible] वागादिशब्दपर्यायत्वेन [illegible] तत्र तत्र [illegible] गोशब्दस्यार्थे [illegible] इति निर्णये [illegible] सर्वाभिधानप्रसङ्गात् [illegible] एवमेव [illegible] समवायस्यापि [illegible] सम्बन्धिनां तु परिहार एवेति भावः । समवायस्यैकत्वे [illegible] द्रव्यत्वेनेवेति [illegible] समवायस्य [illegible] द्रव्यत्वगुणत्वकर्मत्वादिषु [illegible] 30 [illegible] समवाय इति भावः । तथा तत्संकरे [illegible] तु परिहारमाह—तस्मादिति [illegible] समवाय- [illegible] द्रव्ये द्रव्यत्वबुद्धि [illegible] गुणकर्मणोरपि द्रव्यत्वसम्बन्धस्य समवायस्य सत्त्वात् द्रव्यत्वबुद्धिरपि स्यात् [illegible] भाव । एवं द्रव्यत्वगुणत्वकर्मत्वादिसामान्यानां परस्परसङ्करप्रसङ्गमुक्त्वा पदार्थेषु [illegible] सङ्करं [illegible]—पदार्थेष्विति । [illegible] सङ्करं [illegible]—लक्षणेति [illegible] तस्य तत्र [illegible]

निवर्तेयाताम् इति । कथमित्यादि व्याख्या–समवायस्यैकत्वात् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद्द्रव्यत्वात् तयोश्च स्वरूपस्य गुणत्वस्य कर्मत्वस्य च हानिरिति दोषौ तत्तद्विशेषणभेदादि यथैतत् स्यात्, छत्रि-दण्डिवदिति वैधर्म्यदृष्टान्तः–छत्रविशिष्टः छत्री, दण्डविशिष्टो दण्डी, न तथैव द्रव्यत्वस्य कश्चिद्भेदोऽस्ति ।

कार्यकारणाधाराधेयसमवायाच्चौ गुणकर्मभावौ भविष्यत इति चेत्, न, तयोर्गुणकर्मणो-
5 र्गुणकर्मभावनिवृत्त्या प्रथमद्रव्यभावनिवृत्तिः, तद्यथा य एकः कार्यकारणाधाराधेयसमवाया
स्तस्यैकत्वात् स द्रव्यभावेन सम्बध्नाति द्रव्यमेवैकं करोति, ततश्च द्रव्यलक्षणं नास्ति, क्रिया
वद्गुणवत् समवायिकारणमिति, तदभावाच्च द्रव्यम्, न गुणकर्माणि तथा लक्षणानीति द्रव्य
स्यापि द्रव्यभावनिवृत्तिः, एवं गुणकर्मणोरपि ।

कार्यकारणेत्यादि, कारणमाधारश्च द्रव्यम् आधेयं कार्यं च गुणकर्मणी, तयोर्भिन्नयोः
10 कार्यकारणयोराधाराधेययोश्च समवायाच्चौ गुणकर्मभावौ भविष्यत इति चेत्– एवञ्चेत् मन्यसे मा संस्थाः,
यतोऽत्तरं तयोर्गुणकर्मणोरित्यादि यावत् प्रथमद्रव्यभावनिवृत्तिरिति तावदुपदेशवचनम् तदरिगनो भव्यवा-
व्याख्या–गुणकर्मणोर्गुणकर्मभावनिवृत्तिद्वारेण द्रव्यस्य द्रव्यभावनिवृत्तिराख्यायते तद्यथा–य एकः कार्य-
कारणाधाराधेयसमवायः तस्यैकत्वात् यो द्रव्यभावेन गुणकर्मणोः समवायः स एकः, तेन द्रव्येण
सम्बध्नाते गुणकर्मणी द्रव्यमेवैकं करोति ततो गुणकर्मणी निवर्तेते तन्निवृत्तौ द्रव्यस्योऽप्यन्यभावत्वाभ्यो
15 न च कारणम् समवायिनो गुणकर्मणोरसमवायात् ततो द्रव्यस्य द्रव्यलक्षणं नास्ति क्रियावद्गुणवत् समवा-
यिकारणमिति –क्रियागुणाभावात् द्रव्यं तद्वत् गुणकर्माणि तथा लक्षणानीति, इतिशब्दो हेत्वर्थे, यस्मात्

यस्मात् इति पदार्थवत् यदन्यत् व्याख्या दीयत इति भाव । अवयवाद्यसम्बन्धेनैव तर्कयति–समवायस्यैकत्वादिति गुणक-
र्मणोर्हि गुणत्वं कर्मत्वं कारणम्, यदि समवाय एकस्तर्हि गुणत्वकर्मत्वादिसमवायस्यैव द्रव्यत्वसमवायत्वात् तत्र गुणत्वादिसम-
वायात् गुणत्वादित्वाद्द्रव्यत्वसमवायत्वाद्द्रव्यत्वसम्पत्तिरिति गुणस्य गुणत्वमेव कर्मणश्च कर्मत्वमेव कारणमिति न स्यात्, तथा च
20 द्रव्यगुणकर्मणां परस्परं भेदो न स्यात्, धर्मभेदप्रयुक्तो हि धर्मिभेदः धर्मश्च द्रव्यत्वादि सर्वत्रैवाविशिष्ट एव भेद इत्यपि भाव ।
विशेषणभेदाद्विशेष्यभेदे दृष्टान्तमाह–छत्रीति छत्रविशिष्टो न दण्डविशिष्टः दण्डविशिष्टश्च न छत्रविशिष्ट इति छत्रदण्डविशेषण
भेदात् विशेष्यस्य पुरुषस्यैकस्य भेदो न तथा द्रव्यत्वस्य सर्वत्र सत्त्वेन भेदोऽस्तीति भाव । अथ नास्ति गुणत्वकर्मत्वयोर्भि
द्रव्याविशेषे गुणकर्मणो विशेषाभिव्यक्तिः समाधत्ते–कार्यकारणेति । ननु समवायस्यैकत्वेऽपि तत्सम्बन्धिन एकत्वं न सम्भवति,
एकत्वा द्रव्यत्वं सामान्यमेव न स्यात् अनेकवृत्तित्वाभावात् तस्मात् धर्मभेदाभावेऽपि कारणान्तरेण धर्मिभेदसिद्धिर्न च सम्भव-
25 त्यैकत्वयुक्त सम्बन्धेकत्वम्, तत्र हि द्रव्यं हि गुणकर्मणोः समवायिकारणमत एवाधारश्च गुणकर्मणी च द्रव्याश्रितत्वेन प्रतीय-
मानतया तदाधारकारणतया आधेये कार्ये च तस्मात् गुणत्वात् क्रियात्वात् समवायिकारणत्वाच्च असमानाधारत्वधर्मिणो
भावात् द्रव्यमिति द्रव्यगुणकर्मणां धर्मिभेदात् समवायैकत्वेऽपि गुणकर्मणोरसमवायात् गुणत्व कर्मत्व भवत एव तयोर्भेदस्य
सम्बन्धैकत्वप्रयोजकत्वाभिप्रायेण व्याचष्टे कारणमाधारश्च द्रव्यमिति । तदेतन्मतं निराकर्तुं प्रतिज्ञावाक्यमाह–
तयोर्गुणकर्मणोरिति यस्य गुणकर्मणोर्गुणकर्मभावो निवर्तते तस्य द्रव्यभावनिवृत्तिरित्यर्थः । तदेव समर्थयति–य एक
30 इति द्रव्यभावेन–द्रव्यत्व रूपेण गुणकर्मणो समवाय एव स द्रव्येण सम्बद्धे गुणकर्मणी द्रव्यमेव करोति, ते निवर्तेते
द्रव्यरूपतापत्त्या, एवं गुणकर्मणोरभावे निमित्ताभावात् समवायस्य कारणत्वं द्रव्यं भवेत्, तस्मात् क्रियावद्गुणवत् समवायिकार
णमिति द्रव्यलक्षणमसम्भवदोषयुक्तम्, तदेवं द्रव्याभावात् गुणकर्मणी समाश्रितेताम्, कस्याश्रयत्वमिति ते अपि न स्त इति
भाव । एतदेवाह–लक्षणाभावात् गुणानां कर्मणां चाभावात् द्रव्यस्यैवोऽभावत्वस्य द्रव्यस्य निवृत्तिरित्याह–यस्मादेवेति । क्रियाव-

१ सि क्ष डे °रम्याविषयोश । २ सि क्ष. °मावभावाद ।

सम्स्येवैकद्रव्यलक्षणानि गुणकर्माणि, तेषामाश्रयिणां समवायिनामभावाच्चाभिवृत्तौ द्रव्यस्यापि द्रव्यभावनि वृत्तिः,—गुणवत्समवायिकारणं क्रियावद्द्रव्यमनेकद्रव्यं वा द्रव्यं स्यात्, तदेव नाद्रव्यं नानेकद्रव्यं सम्भवति, तस्माद्गुणकर्मणां गुणकर्मभावनिवृत्तौ द्रव्यभावसम्बन्धेऽसति गुणकर्मण्यनाश्रयत्वाद्द्रव्यस्य द्रव्यभावनिवृत्तिरिति द्रव्यपदार्थनिवृत्तिरुक्ता, अथवा स्वविशिष्टेन द्रव्यत्वेन सर्वगतेन सम्बन्धे सति गुणस्य कर्मणो वा द्रव्यं द्रव्यत्वेनासम्बद्धमिति द्रव्याभावः, तथाचाद्गुणकर्मणी न द्रव्याश्रिते, ततो द्रव्यलक्षणा   5
युक्तेर्द्रव्यभावनिवृत्तिः, किं द्रव्यलक्षणमिति चेदुच्यते क्रियागुणवत्समवायिकारणमिति, यत्तु कार्यकारणा धाराधेयसमवायस्यैकत्वात् गुणकर्मणोर्द्रव्यभूतत्वात् क्रियावत्त्वम नास्ति यस्मान्न तु गुणकर्माणि तथा लक्षणानीति-गुणस्य द्रव्याश्रयादिलक्षणत्वात् एकद्रव्यादिलक्षणत्वात्कर्मणः एवं लक्षणाभावापेक्षा द्रव्यस्य द्रव्यभावनिवृत्ति, गुणकर्मलक्षणायुक्तरिति ततश्च द्रव्यस्यापीत्यादि आश्रयाभावाद्गुणकर्मभावमा- पाद्य आश्रयभावेऽपि द्रव्यस्याश्रयत्वाभाव इति गतार्थम्, एवं गुणकर्मणोरपि गुणकर्मलक्षणाभ्यवस्थानात्   10
गुणकर्मभावनिवृत्तिरुक्ता वेदितव्या एवं चाद्रव्यगुणकर्मणां व्यवस्थितलक्षणाभावात् निवृत्तिः ।

तथा—

द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादीनामाश्रयाभावादनुपपत्तिः, परस्परस्वरूपापत्त्या परस्परभावनिवृत्तौ द्रव्यादिषट्पदार्थनिवृत्तिः, यथाधाराधेयभावभेदे संयोगवद्वृत्तिस्यात् समवायस्यानित्यत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिकः, न बहूनामेकत्वात्, न तु   15
द्वयोर्द्वयोः सम्बन्धत्वं संयोगवत् समवायस्येति एतेनापि सङ्करप्रसङ्गः, पदार्थलक्षणव्यव स्थानासम्भवात् षट्पदार्थनिवृत्तिर्या, यत्तु प्रत्युक्तं नाधाराधेयनियमात्—यद्यप्येक एव समवायः तथाप्याधाराधेयनियमोऽस्ति द्रव्य एव द्रव्यत्वं गुण एव गुणत्वं कर्मण्येव कर्मत्वं सर्वत्र चैकः समवाय इति एतदपि प्रत्युक्तं सर्वत्र सर्वाधेयवृत्तौ सर्वाभिधानप्रत्ययसांकर्यात् कथं द्रव्यादीनि प्रतिनियतानीति ।   20

द्रव्यगुणेत्यादि, द्रव्यत्व[गुणत्व]कर्मत्वादीनामाश्रयाभावादनुपपत्तिः सामान्यविशेषाणाम्, आनिमत्त्वात् सत्तायाः, तथाचाह—परस्परेत्यादि भावितार्थं यावत् षट्पदार्थनिवृत्तिरिति, यथेत्यादि,

स्यादिलक्षणमितीदं द्रव्यत्वं वा भावत्वं वा उभयमपि नास्तीति प्राह—गुणवदिति । निगमयति द्रव्यपदार्थनिवृत्ति- रूपाश्रयम्—तस्मादिति । प्रकारान्तरेण व्याचष्टे अथवेति, सर्वगतस्य द्रव्यत्वस्य सम्बन्धाद्गुणकर्मणी द्रव्यम्, न तु द्रव्यं द्रव्यत्वेनासम्बन्धात्, अत एव त न द्रव्याश्रित इति द्रव्यलक्षणाभावम् द्रव्यं नास्ति क्रियावत्त्वं गुणवत्त्वं   25
हि द्रव्यलक्षणम्, एतत् क्रियागुणयोरभावात् अलक्षणमिति भाव । तथा गुणकर्मणोरपि नास्ति लक्षणं तयोरन्याश्रय त्वात्तेनाह—यस्मान्न तु इति द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्, एकद्रव्यमगुणं संयोगवि भागेष्वनपेक्षकारणमिति कर्मलक्षणम्, गुणकर्मणोश्च द्रव्यत्वादेव लक्षणे सम्भवत एवं लक्षणाभावाद्द्रव्यभावनिवृत्तिरिति भावः । उपसंहरति एवमभावात् आश्रयस्य द्रव्यस्याभावे गुणकर्मणोरभाव इत्याह आश्रयाभावादिति । द्रव्यभावनिवृत्तिपर्यन्तमिद गुणकर्मभावनिवृत्तिरपि व्याचष्टे द्रव्यलक्षणानीत्यादि विवृणोति एवं गुणकर्मणोरपीति । द्रव्यादीनामभावमाह द्रव्य-   30
गुणेति । तदेव विवृणोति—परस्परेति द्रव्यादीनां परस्परेण गुणकर्मत्वादिपरस्परधर्मसम्बन्धापत्त्या द्रव्यादिनिवृत्तौ द्रव्या-

१ सि. क्ष क्रियावद्द्रव्यं ।

आधाराधेयभावेन भेदे सति संयोगवद्बहुवृत्तित्वात् समवायस्य तदनभिन्नत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिको–न बहूनामेकत्वात्–बहूनां द्रव्यादीनामेकः समवाय इति स्वरूपवर्णनं द्विवृत्तिप्रतिषेधार्थम्, न तु द्वयोर्द्वयोरित्यादिसंयोगेन वैधर्म्यं गवार्थं यावत् समवायस्येति आचार्य आह–एतेनापीत्यादि एतेन अभिन्नत्वपरिहारवचनेनापि सङ्करप्रसङ्गः, सामान्येन व्यवस्थाभावात् सर्वत्र सर्वापेक्षत्वो
5 सर्वाभिधानप्रत्ययसङ्करः, विशेष्य च पदार्थव्यवस्थाव्यवस्थानासम्भवात् षट् पदार्थाभिवृत्तिर्वैयर्थ्यप्रतिरूपकत्वस्य एव दर्शितः बहूनामेकसमवायाभ्युपगमात् तदा सङ्करयुक्तत्वात् यदपि पदार्थो निवर्तिताः, तन्निवृत्तौ समवाय्यभावात् समवायनिवृत्तेस्तस्यासतः खपुष्पस्येव कुतो नित्यत्वमनित्यत्वं वा ? यत्तु प्रयुक्तमित्यादि सङ्करदोषस्य यदुत्तरमुक्तं न आधाराधेयनियमादिति यथाऽप्येकं द्रव्यादि तत्रत्यास्था यावत् कर्मण्येव कर्मत्वमिति, सर्वत्र चैकः समवाय इत्यनेन द्विवृत्तित्वपरिहारेणाभिन्नत्वमपि परिहृतमिति वैशेषिकः, आचार्य
10 आह–एवमपि प्रयुक्तमित्यादि गवार्थं यावत् प्रतिनियततामीति द्विवृत्तित्वमेवास्येति च वक्ष्यति ।

यदुच्यतेऽभ्युपगम्यतां तावत् यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यादीनां समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति इदमपि स्ववादेनैवोत्तरमार्गविधानं कृतं त्वया, न तु तथा सङ्कराभावो घटते, यदि दधिमधूदकादिभिर्बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? यदि सर्वात्मकः समवाय एक एव
15 भवति तदा किमिति संकरो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयो-

यमाधाराधेयाभावात् सामान्याद्यनभिन्नत्वे पदार्थनिवृत्तिरिति भावः । बहूनामेक समवायः न तु संयोगवद् द्वयोर्द्वयोः तथा सति संयोगवदनभिन्नत्वं स्यादिति वैशेषिकमतमाकृष्य आधाराधेयेति आधाराधेयभावेन समवायस्य भेदे द्विवृत्तित्वात् संयोगे यथाऽभिन्नत्वमप्यस्ति स्यादिति पूर्वपक्षं विधाय प्रत्युत्तरमाह नैव भेदः समवायस्य, बहूनामेकत्वाभ्युपगमेन संयोगवैधर्म्यात् नाभिन्नत्वमिति भावः । अनेनाभ्युपगमेन सङ्करप्रसङ्गो दुर्वार इत्याशयेनाह आचार्य इति । सामान्येनेति
20 सम्बन्धविशेषेण सामान्यस्य प्रतिनियतपदार्थानां प्रतिनियतधर्मिषु प्रसिद्धो सत्ता विशिष्य पदार्थेषु व्यवस्थाप्यभिधानं भवेत्, तच प्रतिनियतेति तत्र मते बहूनां समवायाद्याधारेष्वाधेयानां सर्वेषां निखिलेषु आधारेषु रोधविशेषसम्बन्धानुपपत्तिभिर्धर्माणां द्रव्यगुणकर्माद्यभिधानाभिधेयप्रसङ्गात् सामान्यात् कथं प्रतिनियतानि कार्याणि भवेयुः यतो व्यवस्थानस्याभावात् षट् पदार्था इति व्यवस्था न स्यादिति भावः । न च समवायोऽभिन्नोऽपि कथं षट्पदार्थनिवृत्तिप्रसङ्ग तन्निवृत्ताविति, द्रव्यादिपदार्थनिवृत्तौ समवाय्यभावात् समवायोऽपि नास्ति तस्मान्नित्यत्वानित्यत्वमपि निराधारमिति भावः । ननु कुण्डदध्यादौ किं
25 समवाय इदमिव प्रतिनियतं इदमत्र तदनुपपत्त्या कल्प्यमानो हि समवाय एको वा स्यादनेको वा तदविरोधेनैव कल्पनीय इति प्रमाणं चाह इहेदं तदिदम् नाम इदमिव द्रव्यं गुणकर्मसामान्याधारत्वेन विवक्षितोऽपि न तु गुणकर्मणोराधारतया द्रव्यस्याधारत्वं वा गुणकर्मसमवायानि च द्रव्याधेयत्वेन विवक्षितोऽप्याधाराधेयनियमात् समवायस्य बहूनां सम्बन्धेऽपि न सङ्कर इति वैशेषिकाशयं दर्शयन्–यदुत्तरमुक्तमिति । तदेवमाधाराधेयनियमात् सङ्करानुपपत्तौ च समवायस्य निरपेक्षत्वम् संयोगवत्त्वानिर्वचनप्रसङ्गोऽपि तु एव एकैक आचार्यो वैशेषिकस्य दूषयति–सर्वत्र चैक इति । अथ वैशेषिके
30 ननु समवायो यद्येकः तदा द्रव्यादीनां सङ्करप्रसङ्गः गुणकर्मसमवायस्य द्रव्ये सम्बन्धाभिन्नत्वाद्याधाराधेयनियमादिसम्भवः यद्यपि द्रव्यगुणकर्मसमवाय एक तथापि तथा न द्रव्याधारः तत्र वेधानमतीत इत्येवं हि द्रव्यं गुणवत् गुणिवत् गुणं कर्मेव कर्मणि सम्बन्धस्वसम्बन्धितोपदर्शनादेव नियमः यथा कुण्डादौ संयोगविशेषेऽपि कुण्डमेवाधारो न दध्याधाराधेयभावनियम इति सामान्यसमवायविशेषत्वरूपेणापि नियम उपपद्यत इत्याह तद्वत्सम्बन्धेनान् संयोगोऽपि न भाति–यदुच्यत इति । नियमोऽभिन्नत्वाभावाद्भावानवस्थितौ तामन्यम्, अन्यत इदमत्र वर्तमानत्वविशेष तदैव समवायविधि-

1 दे न तु इत्यादि ।

गाद्वैधर्म्यमुच्यते सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, द्वयविशिष्टा-भिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे दध्ना कुण्डेन वा विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते तद्द्विवृत्तित्वाच्च तथा समवायेऽपि द्रव्यगुणयोः विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च स्यात् तद्द्विवृत्तित्वाच्च, तथा च समवायस्य संयोगवत् द्विवृत्ति-त्वादनित्यत्वमेव ।　5

यदुच्यतेऽभ्युपगम्यतां तावदित्यादि, इद तस्य दोषपरिहारमाणसर्वसामान्यपञ्चाशिरेकार्म्या-नियमाविप्रसङ्ग[1]मापन्न गतार्थं यावत् समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति आचार्य आह–इदमपीत्यादि, स्वभावेनैवोत्तरमार्गो विहितोऽस्य त्वया–इहेदमित्यादिना समवायलक्षणं व्याचक्षाणेनाधारा-धेयसम्बन्धज्ञानलक्षणत्वात् कार्यकारणयोराधाराधेयभावसम्बन्धिनोः कुण्डदधिदृष्टान्तेन च तुल्यादितोऽ-पसर्पः तेनैव वयं ब्रूमः–न तु तथेत्यादि, न तु तथा सङ्करभावो घटते वचनप्रकारेण, कुण्डदधिसंयोगदृ-　10
ष्टान्ते यदि दधिमधु[२]कादिभिः बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? तथा यदि सर्वात्मकः समवायो द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसत्तासामान्य एक एव भवति तदा किमिति सङ्करो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयोगाद्वैधर्म्यमुच्यते त्वया द्वयोर्द्वयोरि-त्यादिना, तत्र साधनं सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, साधनसमर्थनं द्वि-वृत्तित्वं सम्बन्धे द्वयविशिष्टाभिधानप्रत्ययत्वात्, कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे विशिष्टे　15
तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते दधिकुण्डं कुण्डदधि चेति तद्द्विवृत्तित्वाच्च तथा समवायेऽपि द्रव्यगुण-योरित्यादिद्विवृत्तित्ववर्णनम् तस्मात्त्वत्पूर्वपक्षितदोषासङ्गस्तदवस्थः समवायस्येत्यत आह–तथा चेत्यादि यावदनित्यत्वमेवेति गतार्थम् ।

व्यतिरेक–द्रव्यत्वादिनिमित्तानां तुल्यत्वाभाव । इदमपेक्ष्य दोषपरिहारमाशङ्कते तत्र पूर्वस्मिन्नेव इति दर्शयति–इदं तस्येति । उत्तरयति–इदमपीति । इहेदमित्यादिनेति इहेदमिति यत कार्यकारणयो स समवाय इति सूत्रम्, कार्यकारणयोरित्य-　20
नेनाकार्यकारणयोरपि ग्रहणम्, असम्बद्धयोरवियुतसिद्धयोरिति तत्र इह कुण्डे दधि इह कुण्डे बदराणीतिवत् इह तन्तुषु पट इह वीरणेषु कट इह द्रव्ये गुण कर्म वा इह पत्नि गोत्वमित्यादिबुद्धिजननात् सर्व तत्त्वादिस्पष्टाधेयेन सम्बन्धान्तरेण भोत्स्यामहे इति तस्मात् प्रतिनियताधिकरणत्वेन समवायोऽनुमीयत इति तस्मिन्नस्मात्स्वभावेनैवोत्तरं विचार्यं मार्गो विहित इति भाव । कुण्डदधिदृष्टान्तेनाधाराधेयभावनियम एकसमवायत्वे न लभ्यते तदेकत्वप्रकारेण भवत् तेन च सङ्करो दुर्वार एव न ह्येकत्वनिरूपितत्वे समवायस्य प्रत्ययसङ्करोऽभ्यासपर्यायाधाराधेयभेदनियमः सामर्थ्यं [illegible] सङ्करः　25
दोषविमुक्तत्व यदि स्यात् स्यात्, आधाराधाराधेयनियमत सङ्कराभाव तथा तु नास्तीत्याशयेनाह–न तु तथेति अनेकनिरूपितसंयोगसमवायोः सङ्करमाह–यदीति । न वा समवायस्य द्विवृत्तित्वनिवृत्ति यतः संयोगवैधर्म्येण द्वयोर्द्वयोरेव विशिष्टाभिधानप्रत्ययदर्शनात् तथा त्वयाऽपि तत्र तत्र द्वयोरेव समवायप्रदर्शनात्तेनाह यतापि चेति । द्विवृत्तित्वं समवायस्य साधयाम इत्याह साधनसमर्थनेति यत्तया समवायस्य द्विवृत्तित्वमुपवर्ण्यते तदेव वयं समवाये साधयाम इत्यर्थं । दृष्टान्त दार्ष्टान्तिकयोरेकरूपे गमयति–यथेति । एवम् द्विवृत्तित्वसिद्धौ संयोगदृष्टान्तेन तस्यापानित्यत्वमित्याह–तथा चेति । ननु　30
समवायैकत्वेऽपि द्रव्यत्वगुणत्वादीनां विशेषणभावेनाना महिम्नाधाराणां द्रव्यादीनां नियमो भवति उच्यते हि तत्रत्वा-

---

१ सि क ॰व्याभावि । २ सि डे. ॰विव्यासेचाभासा । ३ सि क ॰भवा. स । ४ सि क वद्दत्वों । ५ सि क दधिकत्वाख्य ।

यस्त्विदं स्वतत्त्वानुरूपप्रत्ययोत्पत्तेः परस्परव्यतिरिक्तैरापेयैर्द्रव्यत्वादिभिरसाधारणैः द्रव्यादीनां नियमेन द्रव्येष्वेव द्रव्यमिति ज्ञानमित्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया, न हि समवायस्यैकत्वे व्यतिरेको नियमश्चास्ति, अविशिष्टत्वात्तो न स्यात् द्रव्येष्वेव द्रव्यमिति ज्ञानम्—एवं ते द्रव्येष्वपि गुणज्ञानं स्यात्, गुणज्ञानकारणत्वात् समवायस्य, गुण-
5 वत्, एकत्वे योऽयं द्रव्यस्य द्रव्यभावेन सम्बन्धः स एव गुणस्यापीति प्राप्तं द्रव्यस्यापि गुणत्वम् तस्य गुणभावेन सम्बद्धत्वाद्गुणवत् द्रव्यभावनिवृत्तिरिति । तस्य द्रव्यस्य गुणभावेन सम्बद्धत्वाद्गुणभूतस्य गुणानामाश्रयस्याभावः, असति द्रव्ये कस्य गुण इति गुणभावनिवृत्तिः लक्षणानुपपत्तेः क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम् द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणमिति, ततश्च गुणेष्वपि द्रव्यज्ञानं
10 स्यात् किं कारणम्? द्रव्यज्ञानकारणत्वात् समवायस्य, द्रव्यवत्, एकत्वे योऽयं गुणस्य गुणभावेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्ते गुणस्यापि द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तस्य द्रव्यत्वापत्तिर्गुणत्वस्याभावश्च द्रव्ये अनवस्थाने ।

यस्त्विदमित्यादि परोक्तमेव [illegible] यावज्ज्ञानमित्यादि, द्रव्यादीनामसाधारणैर्द्रव्यत्वादिभिरसाधारणैः परस्परव्यतिरिक्तैर्विशेषैर्नियमो भवति स्वतत्त्वानुरूपप्रत्ययोत्पत्तेरिति, अत्रोच्यते—
15 अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया कथम्? न हीत्यादिना भावयति, हिशब्दो हेत्वर्थे यस्मात् समवायः एकः तस्यापेक्ष्यत्वे द्रव्यत्वादिभिरविशिष्टत्वात् व्यतिरेको नियमश्च नास्ति, अतो द्रव्येष्वेव द्रव्यमिति ज्ञानं न स्यात् तस्य व्याख्या एवमित्यादि—एवं ते समवायैकत्वे द्रव्येष्वपि गुणज्ञानं स्यादविशिष्टत्वात्, गुणेष्विव अविशिष्टत्वात् कर्मत्वपि किं कारणम्? गुणज्ञानकारणत्वात् समवायस्य, किमिव? गुणमिति गुणेष्विव गुणमिति साधनं तदेव व्याचष्टे—एकत्वे योऽयमित्यादि यावत् द्रव्यस्यापि
20 गुणत्वम् यदि द्रव्यभूतगुणादीनां कुण्डसदृशानामविवेके निर्मलमाश्रयस्यैव स्वभाव इत्यवधारयितुं

[illegible] एव प्रसज्येत द्रव्यमेव न गुणो न कर्म वा गुणोऽपि न द्रव्यं न कर्म [illegible] पठ्यते—यस्त्विदमिति । तदेव व्याख्ये- परोक्तमपि [illegible] पदार्थविशेषेऽपि [illegible] भूतस्य [illegible] पदार्थे इदं द्रव्यं कर्म गुण इदं [illegible] भवन्ति ता [illegible] इति [illegible] द्रव्यमिदं गुणोऽयं [illegible]
25 मायार्थः । [illegible] न हि [illegible] न [illegible] तथा न द्रव्यत्वस्यापि [illegible] [illegible] तथा तु नास्ति [illegible] द्रव्यं [illegible] इति [illegible] स्यात्, न तु द्रव्य—एवेति भाव । [illegible] इति द्रव्येऽपि गुणज्ञानं स्यात् [illegible] गुणज्ञानं भवति, [illegible]
30 [illegible] भाव । हेतुमाह—गुणज्ञानकारणत्वादिति [illegible] गुणेष्विव द्रव्यादिष्वपि [illegible] भाव । गुणज्ञानकारणत्वं समवाये [illegible] भाव तेन द्रव्यस्य [illegible] एकत्वं इति,

---

१ सि. क्ष. वेविद० । २ सि. क्ष. डे. °व्यादीन । ३ सि. क्ष. डे. महत्वेषिव ।

संयोगे दधिकुण्डमेव मधुकुम्भमेवोदककुम्भमेवेति, एकत्वात् संयोगस्य सर्वेष्वपि सम्बन्धात् तथात्रापि यो द्रव्यभावेन सम्बन्धः स एव गुणस्यापीत्येतस्मात् कारणात् प्राप्तं गुणत्वं-द्रव्यस्यापि गुणभावः, द्रव्यं गुणो भवतीत्यर्थः गुणत्वाभिसम्बन्धाच्च तस्य द्रव्यभावहानिः, एवं गुणभावापत्तौ द्रव्यभावो हीयत इति पररूपतामापाद्य स्वरूपत्यागमापादयति, तच्चेत्यादि व्याख्यानसाधनं भावयितुम्, द्रव्यं गुणभावेन सम्बद्धत्वात् तच्च द्रव्यभावं गुणवदिति एवं तावद् द्रव्यस्य गुणत्वापत्तिर्द्रव्य[त्व]त्यागश्च[द्वे अ]- 5 नवस्थाने, तस्य द्रव्यस्येत्यादि, तद्द्रव्यं गुणभावेन सम्बद्धमतो गुणभूतं नाश्रयो गुणान्तरस्येति द्रव्यानाश्रित तस्य च गुणस्याश्रयाभावस्ततो गुणनाश्रयस्य द्रव्यस्याप्यभावः, तदभावादसति द्रव्ये कस्य गुण इति गुणभावनिवृत्तिर्गुणस्य तल्लक्षणानुपपत्तेः क्रियावद्गुणवदित्यादिसूत्रद्वयेन लक्षण दर्शयति, तदभेदापुरिष्टार्थो पनयः किं कारणमित्यादि कारणप्रश्नपूर्वकं पूर्ववत्रापि द्रव्यत्वापत्तिगुणत्वत्यागौ द्वे अ[न]वस्थाने ।

तथा— 10

योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्त गुणस्य कर्मणश्च द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तयोर्द्रव्यत्वापत्तिः गुणकर्मभावत्यागश्च, तस्य द्रव्यस्य गुणभावे न कर्मभावेन च सम्बद्धत्वात् गुणभूतस्य कर्मभूतस्य च गुणक्रियानाश्रयत्वाभावः, असति द्रव्ये कस्य गुणः कर्म चेति न गुणकर्मणी तथा लक्षणे, तयोरलक्षणत्वादसत्त्वात् आश्रयोपलक्ष्यद्रव्याभावः, तस्मिंश्चासति निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावादाश्र 15 यिणां द्रव्यत्वादीनामप्यभावः, तथा कार्यकारणयोः　　　गुणस्येत्यादिः ।

योऽयं गुणस्य कर्मत्वेनेत्यादि कर्मणा सह पररूपापत्तिः स्वरूपत्यागश्च द्वे अनवस्थाने लक्षण[ा]योगद्वारेण सैव्याख्याने गतार्थे भावय गुणकर्मणी तथा लक्षणे इति लक्षणाभावापादनम्, तयो[र]लक्षणत्वादसत्त्वात्-तयोर्गुणकर्मणोरलक्षणत्वात् असत्त्वं खपुष्पवत्, तदसत्त्वादाश्रयोपलक्ष्य-

गुणत्वात्तथा दधिमधूदकादीनां संयोगस्यैकत्वे यथाऽन्येषामपि संयोग इति नियमस्तु न लभ्यते दधिकुम्भादीन् नियमाभावप्रसङ्गेन 20 विशेषविशुद्धमनवस्थानात् तदभावात् दधिकुण्डमेवेदं मधुकुम्भमेवेदमिति न नियम तथैवात्र समवायो द्रव्यस्यैव न गुणस्येति नियमसम्भवात् द्रव्यसमवाय एव गुणसमवाय इति कृत्वा तदसम्बन्धाद् द्रव्यस्य गुणत्वात् द्रव्यत्वं निवर्तत एवेति परस्परापत्तिरिति भावः । एवं परस्परापत्तौ स्वस्वरूप त्याग इत्याह गुणत्वाभिसम्बन्धाच्चेति । एवं तावत् द्रव्यस्य गुणत्वापत्तिरेकम-नवस्थानम्, द्रव्यत्वत्यागश्चापरमित्यनवस्थानद्वयमापादितमित्याह-एवं तावदिति । प्रोक्तनिर्देशेन गुणस्यापि द्वे अनवस्थाने दर्शयति-तस्य द्रव्यस्येति । व्याचष्टे-तद्द्रव्यमिति समवायस्यैकत्वात् द्रव्यं गुणत्वेन सम्बद्धं तत् गुणात्मकमतो गुणाना- 25 माश्रयत्वाच्च तदपि तदभावे गुणोऽप्याश्रित. तत्र द्रव्याश्रयगुणत्वात् द्रव्यापत्तिगुणाश्रयानुपपत्तौ गुणाभावः एवञ्च गुणेषु गुणत्वाभावे न स्यात्, द्रव्यमिवेव तु भावं स्यात् द्रव्याश्रयत्वे समवायस्य द्रव्य इव गुणेऽपि समवायित्वात्, एकत्वे हि समवायस्य च एव गुणत्वसमवाय गुणेऽपि स एव द्रव्यत्वस्यापि समवाय इति गुणेषु द्रव्यभावाभावात्समवायस्यैकत्वात् द्रव्यत्वं प्राप्तम्, तथा च समवायस्यैकत्वाद्द्रव्यत्वापत्तिर्गुणस्य गुणत्वत्यागश्चेति गुणाश्रये द्वे अनवस्थाने भवत इति भाव । एवं द्रव्यस्य कर्मत्वापत्तिर्द्रव्य-त्वत्यागश्च कर्मणश्च द्रव्यत्वापत्तिः कर्मत्वत्यागश्चेत्यनवस्थानद्वयम्. तदेकमेवैकसमवायसम्बन्धद्वारेणाश्रयद्रव्यासम्भवाद्गुणत्वं कर्मद्रव्यसंयोगेना- 30 श्रयत्वाभावस्त्वादौ-योऽयमिति । व्याचष्टे-कर्मणा सहेति कर्मणा सह गुणस्य द्रव्यत्वापत्ति गुणकर्मभावत्यागश्चेत्यर्थः, कर्मत्वसमवायस्य द्रव्यवत् गुणेऽपि सत्त्वात् योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीत्यत्रापि योज्यम्, सिद्धं सर्वं पूर्वमविशिष्टम्, तथोऽभिधीयते-लक्षणायोगद्वारेणेति । आश्रयेति आश्रयो द्रव्यम्, आश्रयिणी गुणकर्मणी तयोरसत्त्वे

१ सि क्ष द्रव्यभवा । २ सि. क्ष. सं्व्याने ।

द्रव्याभावः—गुणकर्मणोरपद्रव्ययोरुभयविधयोरभावाद्वाऽऽश्रयो द्रव्यं नास्ति, औपम्याभावेऽप्यभावात्, उपलक्षणाभावात् खपुष्पवत्, तस्मिन्नसति द्रव्ये निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावात् त्रयाणामपि द्रव्यत्वादीनामप्यभावः उक्तं हि '[illegible]' (वैशे०) इति एवमेतानि त्रिकसं-
योगेन द्रव्य[स्य] गुणेन सह, कर्मणा च द्वे, गुणस्य द्रव्येण कर्मणा च सह द्वे कर्मणो द्रव्येण गुणेन च सह
5 द्वे इति षट् चक्राणि, द्रव्यत्वेन गुणस्य कर्मणश्च द्वे गुणत्वेन द्रव्यस्य कर्मणश्च द्वे कर्मत्वेन द्रव्यस्य गुणस्य द्वे इति षट् एवं द्वादशचक्राणि यत्र द्रव्यत्वस्य कर्मणा गुणेन च, गुणत्वस्य द्रव्येण कर्मणा च कर्मत्वस्य द्रव्येण गुणेन च षट् चक्राणि द्रव्यस्य गुणत्वेन कर्मत्वेन च गुणस्य द्रव्यत्वेन कर्मत्वेन च, कर्मणो द्रव्यत्वेन गुणत्वेन च षट् तान्यपि द्वादश, एवं त्रिकसंयोगेन चतुर्विंशतिरनवस्थाचक्राणि भवन्ति। कस्मात्? तथा कार्यकारणयोरविभागात् [illegible] इति हेतुं व्याख्यातमेवोपनयति ।

10 आह—

ननु सर्वगतत्वात् समवायस्य स्वतत्त्वेनापि सम्बन्धात् द्रव्यभावः गुणभावः कर्मभावो वा सिद्ध्यतीत्यभिधीयते, नन्वत एव सङ्करः चोद्यते, परतत्त्वेनापि सम्बन्धादतत्त्वमपीति सङ्करदोषाभिमोक्षः एवञ्च स्वविषयसर्वगतानि हि तत्त्वानि समवायस्य सर्वगतत्वे तान्यधुना सर्वगतानि प्राप्तानीत्यभ्युपगमविरोधः अतो द्रव्यगुणकर्मणां व्यवस्थितानामभावात् कथं द्रव्येषु द्रव्य-
15 ज्ञानं? गुणेषु गुणज्ञानं? कर्मसु कर्मज्ञानमिति ।

ननु सर्वगतत्वादित्यादि, समवायस्य सर्वगतत्वात् स्वतत्त्वेनापि सम्बन्धोऽस्ति द्रव्यस्य द्रव्यत्वं स्वतत्त्वम् एवं शेषयोरपि शेषद्वयम् सर्वेण सह समवायसद्भावात् तेनापि तत्त्वेन सम्बन्धात्, तर्ह्यस्तु सत्त्वम् [?] द्रव्यभावो गुणभावः कर्मभावो वा सिद्ध्यतीत्यभिधीयते—नन्वत एव सङ्करः चोद्यते, परतत्त्वेनापि सम्बन्धात् अतत्त्वमपीति, इति[सम्बन्धो]ऽस्त्यर्थे यस्मात् परतत्त्वेनापि सम्बन्धः तस्मादतद्-
20 योऽप्यतद्रूपोऽपीति सङ्करदोषाभिमोक्षः अभिसम्बन्धेन तद्गुणेनैव समर्थितत्वात् किञ्चान्यत् दोषोपचय—एवञ्च स्वविषयेष्वपि स्वविषयसर्वगतानि हि तत्त्वानीष्यन्ते तत्समवायस्य सर्वगतत्वात्त्वं

द्रव्यं उपलक्ष्यते गुणकर्मभ्यामिति तयोरभावे द्रव्यमपि नास्तीति भावः । [illegible] दृष्टान्तं [illegible] आश्रयविपर्ययोरभावादेति । उपलक्षणाभावात्खपुष्पवदित्यत्र—उपलक्षणाभावादिति । एवं द्विकसंयोगेन [illegible] सर्वाधि-
पत्यमेतानीति धर्मिणि धर्मिद्रव्येण धर्मिद्रव्ये एकेन धर्मेण एकस्मिन् धर्मे धर्मिद्रव्येण एकस्मिन् धर्मिणि धर्मिद्रव्येणानवस्थानानि
25 भवन्ति । ननु द्रव्यादौ गुणत्वादिसम्बन्धात् द्रव्यत्वादिसम्बन्धोऽप्यस्ति, समवायस्य [illegible], एवञ्च द्रव्यभावादिर्नियतोऽस्तीति [illegible]—समवायस्येति [illegible] शेषयोरपि—गुणकर्मणोरपि गुणत्वं कर्मत्वं स्वतत्त्वमित्यर्थः । व्याचष्टे—नन्वत एवेति [illegible] तत्त्वेन समवायसम्बन्धात् [illegible] अपि सम्बन्धात् द्रव्यादेः [illegible] प्रसज्यत इति सङ्करो दुर्वार एवेति भावः । एवं परतत्त्वसम्बन्धेन स्वतत्त्वेनापि सम्बन्धाभिसम्बन्धेन तदेव प्रसाधितमित्यर्थः—अभिप्रायेणैवेति । दोषान्तरमाह किञ्चान्यदिति [illegible] सामान्यं स्वविषयसर्व-
30 गतमिष्टम्, न तु सर्वसर्वगतम्, यत्सामान्यं यत्र वर्तते स स्वविषय [illegible] सर्वस्मिन् सर्वं स्वविषयसर्वगतम्, [illegible] समवाये भेदेन सर्वगतत्वं तदा तत्त्वानामपि सर्वगतत्वं प्रसज्यत इति अभ्युपगमविरोधदोष इति भावः ।

---

१ सि॰ क॰ °[illegible]। २ सि॰ क॰ डे॰ यथाभूतं। ३ सि॰ क॰ डे॰ सर्वगतैकत्वम्।

तान्यधुना सर्वगतानि प्राप्तानि, ततोऽभ्युपगमविरोधो जायत इति, क्षेपपक्षार्थोमाव उच्यते—अतो द्रव्यगुणकर्मणामित्यादि प्राक्तन एव ग्रन्थो यावत् कर्मसु कर्मज्ञानमिति, तत्र व्यवस्थितलक्षणा-नामसमावादिति लक्षणाभावद्वारेण निराकरणम्, इह तु व्यवस्थितानामसमावादिति सह तत्त्वैर्लक्षणैश्च तेषां निराकृतत्वादिति विशेषः, आधेयज्ञानमेवनिमित्तनियमनिराकरणद्वारेण चेति ।

यदपि कुण्डदधिसंयोगवद्द्रव्यादीनामाधाराधेयनियम इत्युक्तं तदपि नैव, कुण्डदध्या- 5 धाराधेयभावसमवायानामप्येकत्वात् तदवस्थः सङ्करदोषः, यथासङ्करेण नियमेन चाऽर्थो यथ-मेव स्पष्टतरं ब्रूमः, समवायनिमित्तस्य तत्त्वस्य स्वत एवात्मप्रतिलम्भः, तयोश्च लोकसिद्धिश्च भेदः स्वमूर्तिप्रतिलम्भादेव, दधिकुण्डयोर्लोकसिद्धिवद्भेदाभावात् कारकशक्तित एव तु प्रति-पद्यते भेदसिद्धिः, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्य, आधेयशक्तिर्दध्न इत्यसङ्कीर्ण आधाराधेयनियम इति, अथस्त्वयैतदेवं त्वयाऽपि प्रतिपत्तव्यं यथा त्वमेवात्र न समानत्वात् 10 इत्युत्तरमात्थ, समवायस्यैकत्वेऽपि कारकशक्तेरेव नियममेव इत्युत्तरमात्थ द्रव्यत्वादिसमवायो न सर्वत्र किन्तु कस्मिंश्चिदेवेति ।

यदपीत्यादि, यदपि परेणोक्तं यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यमेवाधारो गुणकर्मण्येवाधेयम् द्रव्यगुणकर्माण्येवाधारो द्रव्यत्वगुणत्वकर्मत्वान्येवाधेयानीति तदपि नैव कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात्—तत्रापि त्वन्मतेनाधारयोः कुण्डदध्नोराधेययोश्च 15 कुण्डत्वदधित्वयोस्तयोः, द्रव्यत्वादीनाञ्च तत्त्वानां ये समवायास्तेषामप्येकत्वात् समयमेदोपचरितमेदा-भावात्सेनैकत्वात् पूर्वोक्तविधिना तदवस्थः सङ्करदोषः, यथासङ्करेण नियमेन चाऽर्थः यथमेव स्पष्टतरं ब्रूमः तद्यथा—समवायनिमित्तस्येत्यादि—समवायस्य यन्निमित्तं तत्त्व कुण्डदध्नोः कुण्डत्व दधित्वञ्च तस्य स्वत

समवायस्यैकत्वे पदार्थानां द्रव्यादीनां व्यवस्थाकारणे तत्त्वेन न सम्भवतीत्यभावात् एवं द्रव्येषु द्रव्यत्वं गुणेषु गुणत्वं कर्मसु कर्मत्वं स्यादित्यत अतो द्रव्यगुणकर्मणामिति द्रव्यादीनां [illegible] व्यवस्थानामभावदिति । द्रव्यादीनां पूर्वं निरा- 20 कृताना पुनरत्र एवं निराकरणमित्यत आह—तत्रेति पूर्वोक्तं —तयोर्गुणकर्मणोरित्यादिग्रन्थेन [illegible] एव इह तु अनेन वाक्ये [illegible] [illegible] तत्त्वान्तरस्वाभे [illegible] द्रव्यादयो निराकृता एतमाधेयज्ञानमेतेन योऽयं नियम तस्यापि निराकरणात् च निराकृता इत्यर्थः । यथा कुण्डदध्नो संयोगाविशेषेऽपि कुण्डमेवाधारो न दधि [illegible] नियमस्तथा [illegible] [illegible] यदि द्रव्येष द्रव्यत्ववत् गुणत्वकर्म-त्वाद्यभिव्यज्यते तथा [illegible] प्रति पूर्वपक्षं दूषयति—यदपीति । व्याचष्टे—यदपीति स्पष्टा 25 व्याख्या । एवं हेत्वाह—कुण्डदध्याधारेति [illegible] हि समवाय एक तथा च कुण्डत्वदधित्वद्रव्यत्वादीनां समवाय-[illegible] सर्वे कुण्डदधिद्रव्यादिषु वस्तुत एकमेव भेदस्तु [illegible] औपचारिक इति [illegible] [illegible] तदवस्थमेवेति [illegible] [illegible] [illegible] व्यवस्था भवत इति भाव । यथासङ्करेण नियमेन चार्थश्च प्रयोजनं तर्हि वयं ब्रूमः न [illegible] स च यथावत् किन्तु तदिदं [illegible]—यथासङ्करेणेति । [illegible] समवायस्येति यदि समवायस्य तत्त्वं सामान्यं दधित्वकुण्डत्वादिरूपं [illegible] आत्मलाभं प्रतिलभते—आत्मलाभं दधिकुण्डादिरूपं प्रति प्राप्नोति न तु 30 समवायात्, स च कुण्डदधिभ्यो [illegible] भिन्नो तयोः प्रतिलम्भादिति भाव । दधिकुण्डयोस्तु लोकेन यथा भेदो गम्यते तथा एव न तु तत्त्वादिभि [illegible] [illegible] भेदः भवतु, तत्त्वतस्तु भेदो नास्ति दधिकुण्डयोः [illegible] [illegible] औपचारिक [illegible], [illegible] धर्मिणो वा [illegible]

पृथक्सम्प्रतिबन्धः, तयोश्च भेदसिद्धिप्रसङ्गः व्यावृत्तिप्रतिबन्धादेव त्वन्मतेऽप्याकाशात्मनोरिव दधिगुणयो- र्योगेन प्रतिपन्नो भेदो नार्थान्तरात् तस्मात् ततो वयमपि लोकविरुद्धं मा भूमेति भेदसिद्धिवद् भेदाभावात् कारकशक्तित एव तु प्रतिपद्यते भेदसिद्धि[:] संयोगपरिणामकृत सम्बन्धमनाश्रम, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्याधेयशक्तिर्दध्न इति नियममसङ्कीर्णमाचक्ष्महे, अस्मार्थस्य भावनाम्न्यो

5 गत्यर्थो यावदाधाराधेयनियम इति अयमर्थं चैतदेव त्वया समवायमपि कल्पयित्वा एतदेव प्रतिपत्तव्यं त्वद्वचनप्रामाण्यादेव यथा इहेदमिति, संयोगैकत्वेऽपि कारकशक्तित एव कुण्डदध्नोराधाराधेयनियमो भिन्न इत्युत्तरमात्र किं तदुत्तरमिति चेदुच्यते न समानत्वादिति, तथेहापि समानमुत्तरं समवायैकत्वेऽपि कारकभेदेनैव नियमभेदः, तस्मादन्या गत्यर्थी यावत् कर्मिभिरेवेति।

यदुच्यते व्यंग्यव्यञ्जकत्वभेदाद्द्रव्यद्रव्यत्वादीनां भेदो घटप्रदीपवत् समवायैकत्वेऽपीति

10 न सङ्करप्रसङ्ग इति, एतच्च व्यंग्यव्यञ्जकत्वं द्रव्यद्रव्यत्वादेस्तदा स्यादपि प्रदीपघटदृष्टान्तवत् पृथक् सिद्धं स्यात् न तु तदात्मभेदनियमः, सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, ततो न दृष्टान्तसाधर्म्यं भवत एतदिति नासङ्करः स्यादेवम् समवायस्यैकत्वेन व्यतिरेकाभाव मयोरभावात् तथा यदि य एव गुणकर्मभावाभ्यां सम्बन्धः स एव द्रव्यत्वस्यापीति प्राप्त गुण कर्मणोरपि द्रव्यत्वम् द्रव्यत्वाभिसम्बन्धाच्च तयोर्गुणकर्मभावनिवृत्तिरिति सर्वं प्रपञ्चनीयं

15 यथास्वार्षमिति।

यदुच्यते व्यङ्ग्यव्यञ्जकेत्यादि, व्यङ्ग्यव्यञ्जकत्वभेदाद् द्रव्यद्रव्यत्वादीनां भेदो घटप्र- दीपवदिति परिहारान्तरं गत्वाय यावत् सङ्करप्रसङ्ग इति वैशेषिकस्य, आचार्यवचनमनु एतच्च व्यङ्ग्यव्यञ्ज- कत्वादि स्यादेवेह यदि दार्ष्टान्तिकस्य [द्रव्यद्रव्यत्वादर्व्यञ्जकत्वाभावः प्रदीपघटदृष्टान्तवत् पृथक् सिद्धः स्यात् न तु तदात्मभेदनियमः सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, तदर्थोऽयमर्थं

20 एकात्मप्रतिबन्धात् व्यावृत्तिप्रतिबन्धाच्च धर्मान्तरसम्बन्धात्तदात्मकत्वादाधाराधेययोरसङ्कीर्ण नियम उपपद्य एवमन्योन्य- दधिकुण्डयोरिति दधिकुण्डयोरपि संयोगपरिणामकृतैकत्वमस्ति तथापि लोकविरुद्धं मा भूमेति तस्मात्तत्र कारक- शक्तिभेदाभिमानेन भेदसिद्धिवदेव इत्युच्यते यदि ततो वयमपीति। कारकशक्तित एव भवद्भिरपि समानमनुमेयमपि संयोगस्यैकत्वेऽपि तदाधाराधेयभावनियमोऽभ्युपेय तथा च समवायव्यतिरेकेणापि कारकशक्तित एवाधाराधेयनियमसिद्धेः किं समवायेनैवाश्रयणेनाह भवानपीत्येवमिति। तदेवोत्तर व्याचष्टे दर्शयति-यथा इहेदमिति, एवं कारकशक्तित एव

25 नियमे समवायकल्पना निरर्थिकेति भावार्थ। समवायस्यैकत्वे सङ्करप्रसङ्गे व्यावृत्ते वैशेषिकेण तदेकत्वे आधाराधेयनियमा- भाव आपादित कारकशक्तितआधाराधेयनियमे प्रतिपादिते च वैशेषिकेऽपि तथैव नियममुपपादयितव्याद्-न समानत्वादिति। तत्र संयोगैकत्वेऽपि तथा कुण्डदध्नोराधाराधेयभावनियम उपपादितमात् तथा समवायस्यैकत्वेऽपि द्रव्यत्वादिभावाभावनियमो नियमो व्यङ्ग्यव्यञ्जकत्वभेदात्, घटप्रदीपवत्, नात्र पदार्थसङ्करप्रसङ्ग इति प्रकृत तदिदमभिप्रेत्य यदुच्यत इति। व्यङ्ग्यव्यञ्जक- नियमाच्च सङ्कर इति दर्शयति व्यङ्ग्येति, द्रव्यत्वाभिव्यक्तिर्हि द्रव्येणैव व्यञ्जकेन व द्रव्यमेवाधारोऽपि नियम अत

30 एवैष एव आश्रये यत एव व्यञ्जकं इति तयोर्व्यङ्ग्यव्यञ्जकत्वमेव इति न सङ्कर इति भाव। समाधत्ते-आचार्यवचनमनु एतदिति यतु प्रदीपो घटस्य पृथक् पृथक् सिद्धौ तयोर्व्यङ्ग्यव्यञ्जकभावनियम स्यात्, इमौ द्रव्यत्वं न पृथक् सिद्धम् तदात्मकत्वात्

१ सि. क्ष [illegible]भेदनियमोऽपीति।

भावत्सङ्करः स्यादेवमिति, तस्य हेतोरसिद्धिप्रतिपादनार्थमाह—समवायस्येत्यादि, उक्तोत्तरमेवैतदाधाराधे- यभेदनियमाभावस्य तुल्यत्वात् दृष्टान्तसाधर्म्य न भवत एतदिति प्राग्विस्तरेण व्याख्यातार्थत्वात्, तदेवं स्मारयति—तथा यदि च भवेत्यादि भावगुणकर्मभावविनिवृत्तिरिति यत्र—सर्वविकल्प प्रपञ्चनीयमिति पूर्वोक्तार्थातिदेशः आ-कुतः ? इति चेदुच्यते—अस्माद् भावचेः यथास्वार्थमिति—यो यः स्वार्थो यथा स्वार्थं द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसंयोगाभ्यवस्थानचक्रकाण्यव व्याख्येयानि पूर्ववदिति । 5

यत्पुनरिदमाशङ्कित समवायैकत्वं पञ्चत्वउपचारेण विरुध्यत इति तदेवमेव ममापि प्रतिभाति यत्पुनरिदं प्रत्युच्यते, न आश्रयविशेषात्, भाववत्, अलघ द्रव्य तथा सम वायस्यैकत्वेऽप्याश्रयाणा नानात्वादुपचारेण नानात्वव्यवहारो भविष्यतीति, इद निर्मूलमेव, व्यञ्जकस्याऽऽधेयनियमादाश्रय एवासिद्धेः कुतस्तस्य व्यङ्ग्यो व्यञ्जको वाऽऽधेयोऽर्थः ? कुतो वा ऽऽश्रयाणां वैचित्र्यम् ? समवायैकत्वे षट्पदार्थनिवृत्तेः सुभावितत्वात्, भवलघव्यपदेकत्वात्, 10 समवायस्य भावस्य च अलघद्रव्येण साधर्म्याभावात्कुतो नानात्वोपचारः ? छायामात्रत्वाच्च अलघद्रव्यस्य, भावो वा कुत इत्यलमतिविकासिन्या सङ्कथया ।

यत्पुनरिदमाशङ्कितमित्यादि, समवायैकत्व पञ्चत्वव्यवहारेण विरुध्यत इति यदाशङ्कितं त्वया तदेवमेव ममापि प्रतिभाति विरुध्यत एवेति यत्पुनरिद प्रत्युच्यते—तदाशङ्कितस्योत्तरं वैशेषिकेण, न, आश्रयविशेषात्, भावनदित्यादि द्रव्यादिसत्ताव्यय दृष्टान्तः, प्रतिदृष्टान्तश्च अलघद्रव्य, तथा 15 समवायस्यैकत्वेऽपीत्यादिरादार्ष्टान्तिक गतार्थं यावद् भविष्यतीति, अस्योत्तरमाहाचार्यः—इदं निर्मूलमेव व्यञ्जकस्याऽऽधेयनियमात् पूर्वोक्तवाक्य एवासिद्धो व्यञ्जको व्यङ्ग्यो वा [illegible] कुतस्तदुपज्ञो व्यञ्जको वा

इति मुख्यता प्रकृतस्तेनापेक्षत्र वार्थसदर्थस्वयन्त द्विविधस्याप्यनुमानस्य ग्रहणमिति। अर्थभिन्नाया विशेष एव सम्बन्धि तथैव प्रतिपत्तेरपेक्षया सम्बन्धस्यात् वाच्यत्वं तथाऽनुमेयत्वमपि, न तु सामान्यस्य, अर्थक्रियाऽक्षमत्वेनासत्त्वात् वाच्यत्वमनुमेयत्वं च खपुष्पवदिवाद्–तत्र विशेषस्यैवेति अत्र वाच्यवाचकयोः विशेषेण विशेषेण भवितव्यम्, अन्यस्यार्थस्याभावात्, स हि पूर्वमदृष्टः नापि पूर्वदृष्टेन सम्बन्धः श्रोतुरवाच्यवाचकत्वान्नावश्यम्भावस्य स एव विशेष सामान्योपसर्जनोपायेन शब्देन ज्ञाप्यते अतः स एव वाच्यः शब्दोऽपि न सामान्यस्य वाचकः सामान्यस्यासत्त्वात्, किन्तु सामान्योपसर्जनद्वारेण विशेषस्य एव तथा वाच्यत्वात् लिङ्गलिङ्गिनोः विशेषस्य धूमादिविशिष्टधूम एव वाचकः अन्यस्मादपि विशिष्टः विशेषोऽनग्नित्वादिविशिष्टाग्निरेव वाच्य इति भावः। विशेषस्यैव वाच्यत्वेऽनुमेयत्वे च तेषामनन्तत्वेनाभिधानाकल्पत्वानुपपत्तेः शब्दस्य धूमस्य वा गमकत्वं कथं स्यादित्याशङ्कते भवन्त्वस्यादिति। विशेषभावाना परस्परवैलक्षण्यानामविवक्षया तेषु सामान्यादेकत्वमापाद्य लिङ्गलिङ्गिवाच्यवाचकभावाविवक्षायां तद्व्यपदर्शनस्यापि लिङ्गलिङ्गिनोर्वाच्यवाचकयोरभेदात्तेऽप्यविवेकत्वेऽपेक्षितत्वात् तयोः प्रकाश्यप्रकाशकसम्बन्धविवक्षया प्रकाशकत्वस्यात्मनैवात्मन आप्यत्वात् तद्भावमात्रस्य च पश्यपश्यमात्रोपपत्तिरित्युच्यते भेदानामविवक्षयेति। तथा भावितेति अत्र शब्दधूमयोरेकत्वं भावितं तथैव वाच्यस्य तयोर्लिङ्गिनश्चाभेदेकत्वं भाव्यमिति भावः। अविवक्षितविशेषभेदमनेकविशेषात्मकं सामान्यं लिङ्गं तदेव च तदविनाभिन्नपरिणामभूतमीश्वरवाच्यार्थविशिराद्वाहकयानाद्विशेषप्रतिपादकत्वमिति दर्शयति–तद्व्यपदर्शनादेवेति, धर्मिभावोपन्यासव्यवहारकमिति–तद्भावेनैवेति। एवमनन्तरमुक्तमे चोपपाद–यदि त्विति।

1 सि भ दे का सामान्यसैकत्वापादितं।

यदि तु न तथेत्यादि, परमते दोषः, यदि येन प्रकारेण दृष्टः [घटो]ऽनेनैव प्रकारेण सिद्धं दृष्टं तेनैव च प्रकारेण विधिना प्रकाशकत्वसिद्धं न[ ]त्वया तु किमिष्टम्? अन्यापोहेनेति चेत्। किं? ततो नैव प्रकाशकं स्यात्, कस्मात्? सर्वसामर्थ्येनात्, यथा विवेकमदृष्ट त्वन्मतेन तथा न्यायवर्त्मापि किञ्चिद् एकमप्रधानत्वात्सत्त्वम्, घटपटादिविशेषाणामानन्त्यात्, वृक्षं वृक्षं प्रति प्रतिवृक्षमपोहसामर्थ्यमयात्

5 किं घटमादिवशेषीत्यात्–अप्रधानात्वात्सत्त्वमत्यन्तमेव भवेत् अतश्च बुद्धेरर्थोत्पत्तिरिति? न तदाऽर्थमर्थं मयसर्वं न भवतीत्यन्यत्वमतिरेकौ भवितुमर्हतः बुद्धेर्देशनेन हि बुद्धिरभिधायकेन तेन एव च न्याय र्थितं यथा देवदत्तोऽयं यज्ञदत्तो नेत्यादि, नात्यन्ताद्दृष्टपुष्पवन्ध्यापुत्रादिविषया, एतदर्थप्रकाशनार्थमाह– न हि स घटोऽभिन्नो भवति ततोऽन्यो वा घटादिः, अदृष्टत्वात् वन्ध्यापुत्रवत्, एवं यथा[व]मत्र [भवति] न भवत्यन्यो वा ततः न च तेन घटेनानुपमप्रकारं–न स वृक्षमन्योऽभिसम्बन्धो वा घटोऽस्य तदितरमतत्त्व-

10 रूपम् अघटोऽन्यत्वादि वा, तथा च तस्य रूपं रूपमस्य–अदृष्टम्, किं कारणं? यस्मात्तथा तथा–येन येन प्रकारेणादृष्टम्–घटपटवृक्षादिविशेषप्रकारेणादृष्टत्वात् प्रतिपत्तुमशक्यम्, ततश्चाप्रतिपत्तेर्नेत्यादि न्याय्या वार्यभिन्नरूपेण वचनेऽपि नास्ति सति व्यापकेऽन्यस्य व्याघातात् कस्य कथ वाऽपोहः स्यात्?–प्रागुक्तविधिना किं येन घटोऽपोह्येत इत्यादि मन्त्री योज्य इति।

[illegible] स्यात्–परमत इति। तत्र प्रकाशकत्वसिद्धं [illegible] –यदि येनेति [illegible]
15 [illegible] प्रकाशकत्वेति [illegible] भावः। तथा [illegible] त्वया किमिति, अन्यापोहेन प्रकाशकत्वसिद्धिरिति भावः। अन्यापोहेन तु [illegible] नैव भवतीत्याह–ततो नैवेति। हेतुमाह–सर्वेत्येति, यथा तव मते विविक्तेन वस्तु न [illegible] किन्तु [illegible] तथा न्यायवर्त्मापि न [illegible], ततो [illegible] न्यायवर्त्म, ते च [illegible] यथा विवेकमिति। [illegible]
20 [illegible] बुद्धिरिति? [illegible] भवतीति। [illegible] –बुद्धेर्देशनेनेति [illegible] बुद्धिरभिधायिका [illegible] न [illegible] भवति न [illegible] बुद्धि [illegible] इति भावः।
न हि स इति, [illegible] घटोऽभिन्नो भवतीति [illegible], ततोऽन्यो वा घटादिरिति [illegible]
25 [illegible] भवतीति भावः। [illegible] –एवं यथेति [illegible] न्यायवर्त्म हि [illegible] न हि [illegible] –न च तेनेति [illegible] घटोऽभिन्नो [illegible] वा तेन न [illegible] इति [illegible] भावः। [illegible] –तथा तथेति। [illegible] न हि प्रतिपत्तुं शक्यमिति भावः। [illegible]
30 [illegible] कथं न [illegible] कोऽसौ [illegible]? [illegible] इत्याह–न्याय्यावार्येति [illegible]

---

१ सि० क्ष० डे० तेनैव। २ सि० क्ष० डे० मन्त्रवाद। ३ सि० क्ष० डे० बुद्धिरभिधायकत्वेन [illegible] न्यायवर्त्मना।

अपितृत्ववत् स्यादिति चेत्—यथा पितुरन्ये सर्वे पुरुषा अनाभिन्नभेदरूपा अन्यत्वव्यावृत्तिबुद्धिमात्रेण निरवयवा एव प्रतीयन्ते तथाऽवृक्षाम्बलना वृक्षग्रहणपर्युदासेनानन्तभेदा अपि व्यावृत्तिबुद्धिमात्रेण निरवयवाः प्रतीयेरन् को दोष इति चेन्न, सर्वस्यादर्शनात्, सा हि पितरि असमदर्शनेन दृष्टे तत्पर्युदासेनान्यस्मिन् पितृविपरीतबुद्धेर्गृहीतेरेव पिता देवदत्तो नेमे वसुरातादय इति प्रत्ययोत्पत्तिरिति युक्तम्, स्वदर्शने पुनर्गुणसमुदायस्य न तु 5 पितुरेवादर्शने, असति वा ।

(अपितृत्ववदिति,) अपितृत्ववत् स्यादिति चेत्-स्यादित्याशङ्का पक्षवादिनः, यथास्या पितुरन्ये सर्वे पुरुषा अनाभिन्नभेदरूपाः तदन्वयाद्वेऽपि दृष्टात् पितुरन्यत्वव्यावृत्तिबुद्धिमात्रेण स्वभेदान-पेक्षा निरवयवा एव प्रतीयन्त इति दृष्टान्तः, तथाऽवृक्षाम्यामन्येऽवृक्षाम्बलनाः वृक्षग्रहणपर्युदा सेनानन्तभेदा अपि व्यावृत्तिबुद्धिमात्रेण निरवयवाः प्रतीयेरन् को दोष इत्यत्र दोषमुद्भावयन्नाह–न 10 सर्वस्यादर्शनान्न स्यात्, युक्तं पितुरसमदर्शनेन विधिरूपेण दृष्टस्य 'अद्भावद्भावात् सम्भवति' (द्वा न, ६ ४ १) इत्यादि न्यायात् स्वतन्त्रस्य गुणसमुदायरूपस्य प्राप्यम् तद्वतः पर्युदासेनान्यस्य प्रत्याये स्वजनस्य पितृ विपरीतबुद्धेरभ्यासेन मातरस्यैव पिता देवदत्तो नेमे वसुरातादय इति पितुरपितुश्च व्यवस्थापणोत्तरकाल परजनस्य योऽन्यस्यापितृत्व प्रतिपाद्यतेऽभिप्रायोऽस्ति न्यायः, स्वदर्शने पुनर्गुणसमुदायस्य न तु पितुरेवादर्शने युक्तमिति वर्तते,–न घटते पितुरेव ग्रहणासम्भवे, असति वा पितरि गुणसमुदायमात्रार्थग्रहणाभिमाना- 15 भावप्रकारेण वचनेन, स[ा]हि पितरीत्याभिना दर्शनविधिं पितुः पितृदर्शनाद्यापितृत्वं तद्वितरभेदानाञ्च कल्पयति दर्शनविधिं यावत् प्रत्ययोत्पत्तिरिति प्रत्येन, एषा दृष्टान्तवर्णना ।

प्रत्यायैकैकं । अत्र तद्रूपेण ग्रहणमात्रेऽन्यस्यानन्यापरिस्फुरते प्रश्नं समाधेयमाशङ्कते–अपितृत्ववदिति । आशङ्के– स्यादित्याद्याह इति पितृव्यतिरिक्ता सर्वेषां पुरुषाणां तद्रूपेण ग्रहणमात्रेणानाभिन्नभेदरूपाणां विधिरूपमन्तरेणापि पितुरन्यत्वव्यावृत्तिबुद्धिमात्रेण निरवयवतया ग्रहणं यथा भवतीति भावः । दार्ष्टान्तिकमाह–तथाऽवृक्षाम्यामिति 20 भाविना स्वरूपेण न भासन्ते यद्यपि वृक्षविधायकत्वेन प्रतिषेधकस्यापि तेषामन्यापितृव्यतिरिक्तात् समानत्वात्- बुद्धिमात्रेणानपेक्षितस्वान्तरभेदाः प्रतीयेरन् को दोष इति भावः । तत्र दोषमादर्शयति–सर्वस्येति तत्र मतेन पितुरन्योऽपि न दृश्यते गुणसमुदायरूपो हि पितृरूपोऽर्थः गुणाश्च सर्वे प्रतिषिद्धाः अत एव तत्समुदायरूपस्य पितुरप्यग्रहणात्तस्य प्रतिपत्तिर्न भवेदित्येव वयमुपपादयामः पिता विधिरूपेण दृष्टः तदन्यस्य वचना प्रत्यायक पितृग्रहणाभावेन पितृविपरीतबुद्धेरभ्यासेनैव मे पिता देवदत्तः नेमे वसुरातादय इति प्रत्ययः तदेवं पितुरपितुश्च युक्तं परिज्ञानानन्तरं परजनेषु पितुरन्यत्वं प्रतिपत्तुं शक्यत 25 इति भावः । तदेव समर्थेन प्रतिपत्तव्यमित्याह–युक्तमिति अत्र प्रयोगः तव मते तु नैवं प्रतिपत्तिः सम्भवतीत्याह– स्वदर्शने पुनरिति, तव मते पिता गुणसमुदायरूपः न हि सर्वेऽप्यनन्ताः सम्भवन्ति इति पितुरदर्शनम्, तदा कथं तदन्यत्व- प्रतिपत्तिर्भवेत इति भावः । गुणसमुदायमात्रेति पितृरूपेऽर्थे गुणसमुदायमात्रे अत एव तस्य ग्रहणं देवदत्तव्यक्त्यभिमानं वा न सम्भवतीति ग्रहणाभावापेक्षाभिमानाभावकत्वेन च पिताऽसदिति भावः । सूत्रेण तत्र स्वरूपेण पितुर्दर्शनविधिः प्रत्ययग्रहणेषु प्रत्यभिज्ञत्वेनापितृणां दर्शनविधि वेदेन प्रत्येन तद्वितरभेदाना दर्शनविधि प्रत्यय इति दर्शयति–सा हीति व्यावृत्तिबुद्धि- 30

---

१ सि. क्ष डा० दे °भ्यासेन । २ सि क्ष डा दे भाव्यत ।

दार्ष्टान्तिकं समासयत्येतामिम्—

यथा त्विदं तुल्ये वृत्तिरतुल्येऽवृत्तिरिति व्याख्यानस्य तव मते पितृकस्यस्य दर्शनवत् स्वार्थस्य परार्थस्य तदन्यस्य तदपोहस्य चाऽप्रतिपत्तिरिति, अथ वा यदि हि स्वार्थः सामान्योपसर्जनो विशेषः समस्तः शिंशपादिरभिहितः स्यात् तेनापोहश्च संपिण्ड्यायमन्योऽस्मादिति गृहीतः स्यात् तत एवं प्रतिपद्येतायं अयमेव भवति, ततोऽन्योऽयं न भवतीति, मत्वेव स्यादुभयस्य, नास्त्यन्तावधिरितवृक्षावृक्षसम्भवतायां न चास्यन्तादृष्टवृक्षावृक्षस्वरूपतायां वा सा प्रतिपत्तुर्भवितुमर्हति, खपुष्पवन्ध्यापुत्रादिवत् ।

यथा त्विदमित्यादि, यथा त्वयेदं तुल्ये वृत्तिरतुल्ये चावृत्तिरित्युक्तादेव यावत् सर्वथाऽनुमानाभ्यास इति नैवं व्याख्यानेनैव गतप्रत्यागतन्यायेन स्वयुक्त्येव यथा सर्वस्यादर्शनात् पितृकस्यस्येवाविस्य दार्ष्टान्तिकस्यैवम्भावात् गतार्थं चास्य तदपोहस्य चाऽप्रतिपत्तिरिति, तन्मतेन कस्याचिदेव स्वार्थस्य परार्थस्य चादर्शनादपि विलक्षणसामान्य एवेति पिण्डार्थः अथवा सर्वस्यादर्शनादित्यादिना प्रकारान्तरेण दोष भूमा यदि हि स्वार्थ इत्यादि वृक्ष इत्युक्तेऽवृक्षत्वेन न्यायेन सामान्योपसर्जनो विशेषः समस्तः शिंशपादिरभिहितः स्यात्, तेनापोहमात्रः समेतो घटपटादिः सम्पिण्ड्यायमन्योऽस्माद्वृक्षादिति गृहीतः स्यात् तत एव प्रतिपद्येत—अयं वृक्षोऽयमेव-वृक्ष एव भवति ततोऽन्योऽयं-घटपटादिरवृक्षो वृक्षो न भवतीति, किं कारणं? प्रत्यक्षतायामुभयस्य नास्त्यन्तावधिरितवृक्षावृक्षसम्भवतायां न चास्यन्तादृष्टवृक्षावृक्षस्वरूपतायां वा सा प्रतिपत्तुर्भवितुमर्हति अयं वृक्षोऽयं न भवतीति, खपुष्पवन्ध्यापुत्रादिवदिति ।

मात्रेण प्रतीतिर्दृष्टा । अथ दार्ष्टान्तिके घटयति—यथा त्विदमिति । ननु त्वया तुल्ये वृत्तिरतुल्ये चावृत्तिरिति कथं व्याख्यानेन [illegible] इति सर्वथाऽनुमानाभावात् [illegible] सर्वस्यादर्शनात् [illegible] यथा त्वयेदमिति । [illegible] स्वमतनेति । [illegible] [illegible] इति [illegible] वृक्ष इत्युक्ते इति [illegible] [illegible]

1 सि० क० डे० [illegible] गतप्रत्यागतन्यायेन ।

एतदर्थनिदर्शनार्थं दृष्टान्तमाह—

वृक्षशब्दार्थवद्विपर्यशब्दोऽनन्यत्वाद्वृक्षः तथा तदर्थोऽभेदाद्घटादिः, उभयत्र वा सत्त्व-द्रव्यत्वादि सामान्यविशेषधर्मेभ्योऽनभिरवृक्षश्चेति विदितसकलवृक्षावृक्षाद्यनभिधानशब्दार्थस्यैव तज्ज्ञान दृष्टम्, न हि कश्चिद्दर्शनमात्राद्वा प्रवृत्तिनियमौ भवतः, व्यभिचारात्, घटमानपादपलाशशाखिभेदवृक्षव्यभिचारात् वृक्षोऽवृक्षो घटोऽघटश्च, अन्योऽपि हि भवन्ननन्यो भवति, पीलुवस्तिवृक्षवत् सामान्यविशेषशब्दपर्यायशब्दार्थेभ्यः ।

(वृक्षशब्दादिति) वृक्षशब्दाद्वि[प]र्ययोऽनन्यत्वाद्वृक्षः, तथा तदर्थः, अभेदाद्घटादिः, उभयत्र वा सत्त्वद्रव्यत्वादिसामान्यविशेषधर्मेभ्योऽनभिरवृक्षश्चेति विदितसकल[वृक्षा]वृक्षाद्यनभिधानार्थस्यैव तज्ज्ञान दृष्टम्, तथाऽऽकाशशब्दादिषु तद्गतविषयादिसत्त्वद्रव्यत्वादिधर्मापेक्ष तदुदाहयोज्यम्, न हि कश्चिदित्यादि न हि किञ्चिद्दर्शनमात्राद्वा[तद]प्रवृत्तिनियमौ वा भवतः, कस्मात्? 10
व्यभिचारात्-वृक्षान्येऽपि तत्तत्पुरुषव्यभिचाराद्भवनधर्माभावव्यभिचारादवृक्ष एव, अवृक्षघटोऽपि घटमानपादपलाशशाखिभेदवृक्षव्यभिचाराद्वृक्षोऽवृक्षो घटोऽघटश्च, अन्योऽपि हि भवन्[न]न्यो भवति पीलुवस्तिवृक्षादिवत् सामान्यविशेषशब्दपर्यायशब्देभ्यः ।

सामान्यशब्दार्थेषु तावत् सविकल्पश्च भवतीति, अत्र टुप्पी वृत्तिः—भगवच्छ्रीकृतार्या-

एतदर्थेति । पर्यायशब्दानां तदर्थानामानन्यत्वमाह—वृक्षशब्दादिति । [illegible] 15
[illegible]—वृक्षेति [illegible] उभयत्र [illegible]
[illegible] इति भावः । तदर्थानामप्यनन्यत्वमाह—तथा तदर्थ इति [illegible]
[illegible] भावः । अन्यत्वमाह—उभयत्र वेति, [illegible] वा [illegible] वा
[illegible] न हि [illegible]
धर्मभेदादिति भावः । [illegible] 20
[illegible] इति विदितेति । [illegible]
[illegible]—तथाऽऽकाशशब्दादिष्विति [illegible]
[illegible] योज्यमिति भावः । न हि [illegible]
[illegible]—न हि किञ्चिदिति [illegible]
[illegible]—व्यभिचारादिति व्यभिचारमेव दर्शयति—वृक्षान्येऽपीति [illegible] 25
[illegible]
[illegible]
[illegible] दर्शयति—तत्तत्पुरुषव्यभिचारादिति [illegible]
[illegible] दर्शयति—अवृक्षघटोऽपीति [illegible]
[illegible] इति भावः । 30
अत्र [illegible]—पीलुवस्तिवृक्षादिवदिति [illegible] ।
[illegible] । अत्र सामान्यशब्दार्थेषु [illegible]—सामान्यशब्दार्थेषु तावदिति ।

१ सि. [illegible] । [illegible] । २ सि [illegible] ।

न्तरवृत्तिः शब्दोऽङ्गीकृतार्थान्तरवृत्तिर्वा स्यात्, तत्र व्युदस्तभेदसामान्यमात्रवृत्तिरनङ्गीकृतार्थान्तरवृत्तिः शब्दोऽपोहः केवलो व्यावृत्त्यर्थो निर्निबन्धनः, सविस्तुकेऽस्तम भवतीति, द्विर्नञ्प्रयोगाद्विध्यर्थ एव ज्ञायते, ततः सिद्धे सत्यारम्भो नियमार्थ इति नियम्यते सत्त्वमेव, यो न भवति यथा वा न भवतीति, तस्य द्विविधस्याप्यत्र सम्बन्धो नास्तीत्युक्तं भवति,
5 स च प्रतिषेधो न विधिप्रधानपर्युदासः, प्रसज्यप्रतिषेधमात्रं तत्, ततश्च अयमस्माद्वन्य इत्यन्यस्याभावात् पर्युदासात्मकान्यशब्दार्थान्तरापोहस्वार्थाभिधानलक्षणाभ्युपगमत्यागदोषाः स्युः।

(सामान्यशब्दार्थेष्विति) सामान्यशब्दार्थेषु तावदुदाहरणं सविस्तुकेऽस्तम भवतीति, अत्र द्वयी वृत्तिर्विमृश्यते–अनङ्गीकृतार्थान्तरवृत्तिः शब्दोऽङ्गीकृतार्थान्तरवृत्तिर्वा स्यात्, तत्र प्रथमं तावत्–व्युदस्तभेदसामान्यवृत्तिरनङ्गीकृतार्थान्तरवृत्तिः शब्दः, स कीदृश इति मेवमिरूपणार्थमाह–अपोहः केवलो
10 व्यावृत्त्यर्थो निर्निबन्धन उच्यते, तदुदाहरणं–सविस्तुकेऽस्तम भवतीति, द्विर्नञ्प्रयोगात् प्रकृतार्थगमकत्वेनेति विध्यर्थ एव ज्ञायते ततः किं संवृत्तम्? सिद्धे सत्यारम्भो नियमार्थ इत्यस्तम भवतीति शब्दो प्रतिषेधाम्बर्थं नियम्यते विधिर्न सत्त्वमेव तत्त्वमिति वेत्युच्यते यो न भवति घटपटादिः यथा वा न भवति–पटवदादिप्रकारेण, तस्य द्विविधस्यापि–प्रकारस्यार्थस्य–अत्र सम्बन्धो नास्तीत्युक्तं भवतीति, स च प्रतिषेधो[न] विधिप्रधानः पर्युदासः ततोऽन्यत्र विधिः, प्रसज्यप्रतिषेध एवार्थः इत्यत्रोक्तन्यायेनासज्यमानार्थो विधि
15 प्रधानपर्युदासात्मकः सक्तः स्यात् स[न]एव एषो भवति सत्त्वात्, ततोऽन्यस्मात्ततोऽन्यस्याभावात् प्रसज्यप्रतिषेधमात्रम[स]त् प्रसक्त प्रतिषिद्धमित्ययोऽर्थः स्यात्, तस्मात्–प्रसज्यप्रतिषेधमात्रार्थत्वात् ततश्चायमस्मादन्य इत्यन्यस्याभावादन्यापोहः स्वा[र्थः] इत्यस्याभ्युपगमस्य त्यागः स्य इति

तदनन्तरं [illegible] सामान्यशब्दार्थे व्याचष्टे–सामान्येति, नहि [illegible] भवतीति तत्र [illegible] प्रतिषेधमात्रोऽन्य तस्तोऽविरुद्ध [illegible] प्रतिषेधमनुपपन्नेति विचारितमिति भावः। तत्र [illegible]
20 वा वर्तेत तत्र [illegible] प्रवृत्तिरिति [illegible] उच्यते इत्याह–व्युदस्तेति। [illegible] सामान्यमर्थं [illegible] वा [illegible] अपोह इति। तत्र [illegible]–सविस्तुक इति, [illegible] प्रतिषेधद्वयेन [illegible] इति भाव। तत्र व्याचष्टे–ततः किमिति। [illegible] तत्र [illegible] किन्तु [illegible] भवति किन्तु [illegible] स्यात्, [illegible]
25 [illegible] सम्बन्धो नास्तीति, [illegible] प्रतिषेधोऽन्यत्र [illegible] एव [illegible] न पर्युदासस्य इति भाव। [illegible] प्रतिषेधमात्रार्थत्वात् न स प्रधेति, [illegible] प्रतिषिद्धत्व इति भाव। तथा च [illegible] प्रसज्येति। प्रसज्यप्रतिषेधेति तत्र [illegible] न न भवति [illegible] न भवति [illegible] सत्, [illegible] प्रतिषेधमात्र इव स्यात्, [illegible]
30 [illegible] प्रसज्यप्रतिषेधत्वात्, तथा [illegible] स्य [illegible] इति भाव., [illegible]

1 सि. क्ष डे. वे [illegible] ।

दोषः स्यात्, किञ्चान्यत्—तत एवार्थान्तरापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्येतस्यार्थान्तरापोहेन स्वार्थाभिधानमिति क्रमस्य त्यागः कृतः स्यात् यथोऽप्यभ्युपगमत्यागदोषोऽपर इति, एवन्तावदनङ्गीकृतार्था न्तरवृत्तिः सवित्यसत्त्व भवतीति सामान्यशब्दार्थेऽन्यापोहो न युक्तः, विधिरेव युक्त इति ।

अथैतेभ्य एव भयादङ्गीकृतार्थान्तरापोह इष्यते तत इदं विघटते सवित्यसत्त्व भवतीति, प्रतिस्वं सत् सर्वमपि घटादीति, सर्वमपि हि प्रतिस्वं प्रत्यात्म सदेवासदपि भवतीतरेतरा 5 भावादिभ्यः, अत्र प्रयोगः—असताऽपि हि तेन सता केनचिद्भवितव्यम्, प्रत्येकवृत्तित्वात्, यथा घटादन्यः पटो घटत्वेनासन्नेव पटत्वेन सन् दृष्ट इति, एवमङ्गीकृतार्थभेदत्वे सत्त्वस्यैवासत्, अभ्युपगतमपि नैतत्त्वयापि घट इत्यघटो न भवतीति वृक्ष इत्यवृक्षो न भवतीत्येवमाद्य न्यापोहशब्दार्थवादित्वादिति ।

अथैतेभ्य एवेति, अथ मा भूदेते पर्युदासात्मकान्यशब्दार्थान्तरापोहस्वार्थाभिधानक्रमा 10 भ्युपगमत्यागदोषा इति तेभ्य एव भयादङ्गीकृतार्थान्तरवृत्तिरपोह इष्यते तत इदं विघटते सवित्यसत्त्व भवतीति, कस्मात्? प्रतिस्वं सत् सर्वमपि घटादीति, इतिशब्दस्य हेत्वर्थत्वात् प्रतिस्वं सर्वस्य सत्त्वात्, सर्वं हि प्रतिस्वं प्रत्यात्म-प्रत्येकमात्मना सदेवासदपि भवति, न त्वसत्त्व भवति, कुतः? इतरेतराभावादिभ्यः प्रागभावप्रध्वंसेतरेतर[ात्यन्त]संयोगसमवायप्रमाणसामर्थ्यादिभेदेन सदेवासद्भवतीति विस्तरतः स्वतन्त्रैरेव प्रतिपादितमस्माभिः घटो घटात्मना सन्नेव भवत्यसन्नेव पटात्मनेत्यादि अत्र प्रयोगः—असताऽपि हि तेन 15 सता केनचिद्भवितव्यमिति प्रतिज्ञा यो भवति येन प्रकारेण न भवति तेन द्विविधेनाप्यसता भवितव्यमित्यर्थः, कस्मात्? प्रत्येकवृत्तित्वात्-प्रतिस्वमात्मरूपेण वर्तमानत्वात् अथवा सत्त्वाद्यः सन् प्रत्येकं वा वर्तते

न्तरापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इति क्रमस्यापि त्यागः प्रसक्त इत्याह तत एवेति अन्यशब्दार्थवादिनोक्तः । अभ्य- पगमाभ्युपगमदोष एवेत्याह—यथोऽपीति । उक्तं स्वीति सामान्यशब्दार्थे प्रथमा दृष्टिरनङ्गीकृतार्थान्तरवृत्तिरपा वृत्तिरेवाह—एवं तावदिति । अङ्गीकृतार्थान्तरवृत्तिपक्षप्रयोगेनाङ्गीकृतार्थान्तरवृत्तित्वं सामान्यशब्दस्य न सम्भवतीति सामान्योप- 20 सर्वस्यारेव विधिरूपो विशेष एव शब्दार्थ इत्यस्येनाह—विधिरेवेति । नन्वेवमपि विधिवादपक्षं शब्दस्य नाभ्युपगच्छामः किन्त्वङ्गीकृतार्थान्तरवृत्तिरूपेण इत्याह अथैतेभ्य इति । व्याचष्टेऽथ—अथ मा भूदिति पर्युदासात्मकं शब्दार्थं शब्दान्तरमर्थान्तरस्य तदपोहद्वारेण स्वार्थाभिधानक्रमस्य योऽभ्यनभ्युपगमः तत्त्यागदोषो मा भूदिति तदोषभयादनङ्गी- कृतार्थान्तरवृत्तित्वमपहायाङ्गीकृतार्थान्तरवृत्तिरपोह स्वीक्रियत इति भावः । तत्पक्षेऽपि सवित्यसत्त्व भवतीति न युज्यत इत्याह- तत इदमिति । यानि सन्ति पदार्थजातानि तानि सर्वाणि प्रत्येकं स्वरूपेणैव तेऽसत्त्वसम्भवानुपपत्तिः सर्वं वस्तु सदपि 25 असदपि भवति नहि किञ्चिदसत्त्व भवतीत्याह—प्रतिस्वमिति प्रतिस्वं सर्वस्य सत्त्वात् न भवत्यसदिति कथं वाऽपि युज्यते प्रागभावप्रध्वंसाभावेतरेतराभावादिभिः सत एवासत्त्वात्, स्वतस्त एव हि घटस्याभावः घटस्य एव स्वासत्त्वमात्मा स एव ध्वंसेतरेतराभाव प्रध्वंसेतरेतराभाव इत्येवं सत एवासद्भूयस्तेति भावः । तदर्थं दृष्टान्तमाह—घटो घटात्मनेति । अनुमानेनापीदं साधयति—अत्र प्रयोग इति असताऽप्यसता भवितव्यम्, सत् अवश्यमपि साध्यमर्थं तथा केनचिद्रूपेण सताऽसताऽपि भवितव्यम्, नहि किञ्चित् सर्वथा सद्भवति तच्च न केनचिद्रूपेण असत् तदपि असत् साध्यमिति साध्यार्थः । एतदेवाह—यो 30 भवतीति सामान्यतः सदसत्पक्षार्थं येन प्रकारेण भवति तत्त्वेन रूपेण सत् असदपीत्यर्थः । हेतुमाह प्रत्येकवृत्तित्वादिति

---

१ सि क्ष क्ष डे डवृत्ति । २ सि क्ष क्ष डे सत्त्व ।

सोऽसन्नपि केनचित्प्रकारेण दृष्टो भावः यथा घटात्मना घटो घटत्वेनासत्त्वेन पटत्वेन सन् दृष्ट इति तदनि-
दमप्यसत्त्वेन सद्भवतीति तथा मत्वेन व्यक्तिमानिति एवमङ्गीकृतार्थान्तरत्वे सत्त्वमेवासत्, अभ्युपगममपि
नैतत्त्वमाऽपि विरुद्धमभूना यथा व्यर्थमेवत्, यथा घट इत्यघटो न भवतीति पृष्ट इत्यघटो न भवती-
त्यस्मादप्यापोहस्यार्थवादित्वाद्भवतः एव सम्बन्धसामान्यार्थ उक्तः ।

5 द्रव्यादिसामान्यसम्बन्धार्थेष्वपि द्विविधा सैव, तत्र तावदनङ्गीकृतार्थान्तरतायां द्रव्य-
मित्युक्तेऽद्रव्यं न भवतीति द्विर्नञ्प्रयोगात् द्रव्यमेव 'सिद्धे सत्यारंभो नियमार्थः' इति नियम्यते
यो न भवति यथा वा न भवतीति तस्य द्विविधस्याप्यत्र सम्बन्धो न भवतीत्युक्तं भवति, स च
प्रतिषेधो न विधिप्रधानः पर्युदासः, प्रसज्यप्रतिषेधमात्रं तत्, ततश्च भावितवदभ्युपगमत्यागः,
अर्थान्तरापोहतायां प्रतिसंख्यायात् यथायोगं तथैव योज्यम् ।

10 (द्रव्यादीति) द्रव्यादिसामान्यसम्बन्धार्थेष्वपि द्विविधा सैव, अ[नङ्गीकृता] ङ्गीकृतभेदार्थत्वविकल्पात्,
तत्र तावदनङ्गीकृतार्थान्तरतायामित्यादि, स एव न्यायः प्राप्नोऽद्रव्यं न भवतीति [द्वि] र्नञ्प्रयोगात् द्रव्य-
मेवेति 'सिद्धे सत्यारम्भो नियमार्थो' यो न भवति येन न भवतीत्यादि स एव ग्रन्थो विधिप्रधानपर्युदा-
सात्मकाद्रव्यसम्बन्धार्थत्यागविरोधापादनः प्रसज्यप्रतिषेधमात्रार्थत्वादित्येवमर्थोऽतिदेशो गतार्थो भावितवद-
भ्युपगमत्यागः द्वितीयविकल्पेऽप्यर्थान्तरापोहतायामित्यादि तथैव न्यायप्रतिविहितप्रतिसंख्यानमात्-प्रति-
15 संख्यानात् सर्वद्रव्याणां द्रव्यमित्युक्तेऽर्थं भवति, इतरेतरात्मपादित्य इत्यादि यथायोगं योज्यं तथैव ।

अत्राह—

ननूच्यमानसम्बन्धव्यवच्छेदस्थितिः, या सम्बन्धः स सतः स्थापनादाह्वानात्, यतो यथा
घटघटः एव सद्भावी एवञ्च नासम्बन्धः तथा सद्भस्त्वपि स्यादिति, अत्र ब्रूमः—यदि सम्ब-

न्धं हि भवतु घट आत्मरूपेण वर्ततेऽसत् पटात्मरूपेण न वर्तत इति विकल्पतीति भावः । एवं सतोऽसत्त्वमप्यर्थसत्त्वेऽपि तत्स्वभाव-
20 मथ वेति घटत्वेन वा सन् न आत्मरूपेण वा वर्तते स केनचित्प्रकारेणासत्त्वमपि सन् दृष्टः तेन प्रकारेण अर्थसद्भावित्वादेव सत्त्व-
मसत्त्वेनासत्त्वेन घटः पटत्वेन सन् दृष्ट एवं केनचिद्रूपेणासत्त्वमपि सद्भवतीति भावः । यदि त्वयाऽर्थान्तरमङ्गीक्रियते तर्हि तत्त्वेनार्थान्तरं
भवतीति सत् अतएव भवत्येवैतत् एवमिति । एवं त्वयाऽप्यनुमतमेवैतत् विरुद्धोऽन्य एव मया व्यर्थमित्यत अभ्युपगत-
मपीति । तत्र एतदर्थान्तरतयैवोऽत एवार्थान्तरमनुमतमेवेति दर्शयति—यथा घट इतीति तथा हि अर्थान्तरापोहेन कार्य
कल्पोऽभिधान एतदनुभवते इत्यादिरतद्वे न भवतीत्युक्ती तेन घटोऽघटादित्येवावसीयते स्यात्, घटो भवघटो न भवतीत्यर्थ
25 पर्युदासस्तत् भवनमभवनमनुमन्योऽपगतयेवमात्रसम्बन्धार्थत्वादभ्युपगमविरोध इत्युक्ति भाव । द्रव्यादिसामान्य-
सम्बन्धेषु योज्यमानमतिदिशति द्रव्यादीति । विकल्पेऽप्यनङ्गीकृतार्थान्तरतविकल्पसम्बन्धोऽङ्गीकृतार्थान्तरतविकल्पे इति पूर्ववदेवाह
द्रव्यादिसामान्येति । अद्रव्यं न भवतीति अर्थान्तरमनभ्युपेत्य द्रव्यशब्दार्थो यद्युच्यते तर्हि अपूर्वत्वयोगेन प्रकारान्तर
निरस्य पुनरुक्तमेव नियमान् द्विविधद्रव्यमसम्बन्धप्रतिषेधमात्रमेव विधिप्रधानपर्युदासत्यागाभ्युपगमत्याग पूर्ववत् प्रसज्यत
इत्याह—तत्र तावदिति । अङ्गीकृतार्थान्तरतापोहतामनुपगमे तु सर्वस्य द्रव्यस्याद्रव्यमात्रत्वमद्रव्यं न भवतीति नियम्यते अपितु
30 सर्वस्य द्रव्यत्वादितरेतरात्मत्वापत्तिरप्यापद्यते, यतोऽहि केनचिद्रूपेण द्रव्यं भवत्यद्रव्येणाप्यसम्बन्धमपि प्रतिषेधतीति अनुपगमे
न्यायप्रतिविहति—द्वितीयविकल्पेऽपीति । ननु यथा घोष्यमाना उच्यन्ते वर्तमानाः, भावरूपं, अन्यथाप्यसम्बद्धोऽपि न सत्त्वम्,
तथा घटस्यापि सत्त्वरूपेण भावस्य सम्बन्धादाह—ननूच्यमानेति । उच्यमानस्याप्यसमानत्वविशेषप्रयोजनं सूचयति—सिद्ध

ब्दोऽसच्छब्दोऽपि भवति तत एव लोकेऽन्यापोहवादे च घटशब्दाद्युदाहरणमवकाशं लभते, सच्छब्द एव सन्नसच्छब्दो भवति, एवं सर्वेष शब्दयन् घटादिः घटाद्यशब्दतां गमनादसच्छब्दो भवत्येव, इतरथा सत्त्वाभावात् सङ्करादिदोषाच्च, एवमर्थतोऽसच्छब्दो न भवतीत्ययुक्तम् शब्दतोऽपि रूपसिद्धिकृतनानात्वात् सच्छब्दो भवत्येव न भवतीति ।

(नन्विति) नन्वुच्यमानसच्छब्दवदेतत्सिद्धिः—सिद्धं सच्छब्दमसत्स्वरूपविनिर्मुक्तं मन्यमानस्यो- 5 दयति—यः स[त्] शब्दः [स] सतः स्वपर्यायाभिधानात्, अतः शब्दादयः सच्छब्द एव सैवाच्येव च, नासच्छब्दः, नासदर्थवाची वा, यथा सदस्त्वपि स्यादिति, घटशब्दादिरप्यविशेषशब्दः, तदर्थश्च तथा न घटादिशब्दतदर्थौ वा भवितुमर्हतीति, तस्मादयुक्तमुच्यते सदसद् भवतीति, अत्र ब्रूमः—यदि सच्छब्दोऽ- सच्छब्दोऽपीत्यादि, नाभ्युपगच्छाम एवं [सच्छब्दोऽ] सच्छब्दो न भवतीति, तयोरुदाहरणस्यासम्भवात्, सच्छब्दासच्छब्दत्व यथोदाहरणत्वसिद्धेः, यदि हि सच्छब्दोऽसच्छब्दोऽपि भवति तत एव लोकेऽन्या 10 पोहवादे च घटशब्दाद्युदाहरणमवकाशं लभते, अन्यथा कुतोऽस्य घटाद्युदाहरणस्यावकाशः, तदुपपादे— सच्छब्द एव हि सन्नसच्छब्दो भवति, एवं सर्वेव शब्दयन् घटादि पैटाद्यशब्दतां गमनादसच्छब्दो भवत्येव, इतरथा—घटस्य सतः पटाद्यसत्त्वाभावे सत्त्वाभावः, सत्त्वाभावात् सङ्करादिदोषाच्च, न लोकस्य सतः स्वपर्यायशब्दः स्यात् शब्दोऽङ्गीकृतमेवार्थत्वे, तस्मादयुक्तमुक्त सच्छब्दमवदसत् भवति सदस्त्विति, एवमर्थतः—सतः शब्दः सच्छब्द इत्यर्थद्वारेण सच्छब्दोऽसच्छब्दो न भवतीत्ययुक्तम्, शब्दतोऽपि चास्ति 15

सच्छब्दमिति अभिधानात् प्राक् सच्छब्दोऽभिधेयस्य तत्समर्थेति तदानीं सोऽसच्छब्दरूपोऽपीति न तत्र विवादः उच्य- मानसच्छब्दस्तु सिद्धोऽसत्स्वरूपविनिर्मुक्तोऽपीति उच्यमानसच्छब्दः स्यादित्याह । तत्र आक्षेप इति बहुधा विभक्ता शब्दाः सतः शब्दः सच्छब्दः सदभिधायीत्यर्थं इत्याह—य इति । उच्यमानत्वेन स्वपर्यायस्य सच्छब्दः सच्छब्द एव, नासच्छब्द सत्त्वाभिधानात्, असदर्थाभिधानात् तथा सदस्त्वपि शब्द एव नासद्रूप इत्याह—अतः शब्दादिति । एवं शब्दस्यासदर्थ योरेकत्वस्याभ्युपगमात् विशेषशब्दार्थयोरभावाद्—घटशब्दादिरपीति असच्छब्दोऽपि घट शब्द एव असत्त्वाभावात् न 20 विशेषशब्दो न भवतीत्याह अतएव नापरस्वरूपपदार्थाभिधायकः तथा तदर्थोऽपि घट एव नापरः पटादिः एवम् सदसत् भवतीति अयुक्तं तदुक्तमिति भावः । सच्छब्दो न भवत्यसच्छब्द इति न वयमभ्युपगच्छाम इत्याह—अत्र ब्रूम इति । सच्छब्दस्यासच्छब्दत्वं न चेष्यमस्ते सच्छब्दोऽभिधेयमर्हतुं कर्म पारयति, सत एवासच्छब्दत्वमभिधानमपेक्ष्य कस्तेन [illegible] तत्रोऽभिधायकस्य भावतोऽपि शब्दस्याभ्युपगमस्ते समस्तत्वाभावादिति दर्शयति—नाभ्युपगच्छाम इति । कथं उदाह- रणस्याभिधानाद्—सच्छब्दासच्छब्दत्व यथेति ततोऽसत्त्वाभिधायकस्य एव शब्दस्य सच्छब्दत्वे असच्छब्दत्वाप् 25 तस्यापेक्षोदाहरणसिद्धिरिति भावः । तदेव स्फुटयति—यदि हीति । व्याख्यया तदेव व्यतिरेकेण—सच्छब्द एव हीति । सद्रूपं व्यावृत्तस्वमित्यभिधान एव सच्छब्दत्वे व्यावृत्तिरूपोऽप्यसद्रूपत्वमभिधानात्सदसदर्थः; असच्छब्दो भवति सद्रूपस्य असत्त्व पटाद्यसत्त्वात्, असत्त्व यदि व्यापकरूपं नैष्यते सद्रूपमेवेष्यते तथा नेतरार्थतया अभ्युपगमात् सर्वेकरूपसत्त्वमा एव अतः व्यावृत्तस्वरूपतया च सकलघटादिविरोधः स्यात्, तथाविधैकस्यासिधाभिधानात् शब्दत्वाभावात् व्यावृत्तेश्च इत्युप- रोधमवलम्ब्य एव वाचीति भावः । एवं युक्त्या सतोऽसमानसच्छब्दत्वम् सदसद् भवति इति तदुक्तमित्याह—तस्मादिति । एवं 30 सदसद्रूपत्वमभिधायकत्वापेक्षया शब्दस्य सदसद्रूपत्वमुपपाद्य—एवमर्थत इति । शब्दरूपेणापि तदाह शब्दतोऽपीति,

---

१ सि क्ष सत्त्वाभ्येकत्वासच्छब्दोत्वात । २ सि. क्ष डा. °रमिति । ३ सि क्ष. डा. दे घटाद्यशब्द भावमवगाहन । ४ सि क्ष. डा. दे सत्वेकस ।

सच्छब्दः अस्य वाच्यः अन्यस्य सदिति रूपसिद्धेः यः सच्छब्दः सोऽस्य एव सर्वार्थतो भिन्नस्य वा सच्छब्दः सोऽन्यस्य एव सदिति सच्छब्दो न भवत्येवासिप्रसिद्धसच्छब्दः तस्मात् सच्छब्दोऽपि सच्छब्दो भवत्येव न भवतीति ।

एवं द्रव्यादिशब्देष्वपि सत्त्वासत्त्वे द्रष्टव्ये, एवं तावन्महासामान्यापरसामान्यशब्दार्थेषु
5 सर्वस्यादर्शनाद्युक्तोऽप्यपोहः ।

एवमित्यादि, यथा सच्छब्दस्य रूपसिद्धिव्यञ्जनानात्वकृते सत्त्वासत्त्वे तथा द्रव्यशब्दस्यापि द्रष्टव्ये, तथा द्रोर्विकारो द्रव्यम्, द्रोरवयवो वा द्रव्यम्, द्रव्यञ्च भव्ये भवतीति भव्यं द्रव्यम्, द्रवतीति द्रव्यं द्रूयते वा द्रवणात् गुणान् गुणसन्द्रावो द्रव्यमित्यादिव्युत्पत्त्या पृथिव्यादित्वभेदापेक्षया च द्रव्यशब्दः समद्रव्यसन्नम द्रव्यादिशब्देष्विव्याविभक्त्यात् पृथिव्युदकादिसामान्यशब्देष्वपि स्वभेदापेक्षेषु वाच्य-
10 मिस्रवृत्तेरर्थः, एवमर्थेष्वपि द्रष्टव्यम्, एवं तावन्महासामान्यापरसामान्यशब्दार्थेषु सर्वस्यादर्शनाद् युक्तोऽप्यपोहः ।

विशेषशब्दार्थेषु तु घट इत्यघटो न भवतीत्यत्रापि न भवत्यघटो भवत्यघटः, तद्यथा—मातृपिण्डादिघटोऽघटः घटनसामर्थ्याभावादचेष्टत्वात्, अघटोऽपि च घटो भवति चेष्टार्थत्वात् घटते घटयति वा तन्तुतन्तुवायवाग्ध्यादिरिति, तथा प्रत्यक्षसिद्धे हि वागादिषु
15 वर्तमानस्य गोशब्दस्यैकत्वम्, अतोऽनन्यत्वमनाशङ्कनीयं भिन्नयोऽन्यो गोशब्द इति, तच्छब्दविशेषानिरूप्यत्वात्, यदि हि विशेषरूपस्यानिरूप्यत्वाभासस्यानन्यत्वं ततः तत्सम्बन्धा-भाव्यत्वात् शब्दानामर्थप्रत्यायनमन्याय्यम्, तस्मादेकत्वमकृतं गोशब्दस्य, तस्मिंश्च सति शब्दस्य शक्तिभेदात् सम्बन्धिभिरभिव्यक्तार्थप्रत्यायनशक्त्या प्रकल्प्याः, एकपुरुष-पितृपुत्रादिवत्, प्रतिसम्बन्धमन्यथावृत्तेः, तस्मात्—वागादिभिरर्थवाचित्वाद्गौरेवागौर्भवति,
20 अगौरपि गौर्भवति ।

विशेषशब्दार्थेष्वित्यादि, तुल्यो भेदाभेदरचनाकल्पविकल्पसामर्थ्यं सामान्यशब्दार्थवद्विशेष-शब्दार्थेषु दर्शयति, घट इत्यघटो न भवतीत्यत्रापि न भवत्यघटो भवत्यघट इति, तद्यथा मातृपिण्डादीति,

---

[illegible] भवतीति भावः । एवं द्रव्यादिशब्देष्वपि [illegible] एवं द्रव्यादिशब्देष्वपीति । व्याख्ये यथा सच्छब्दस्येति । [illegible]
25 [illegible] द्रोर्विकार इति, [illegible] द्रवतीति द्रवन् इति वा द्रव्य [illegible] भावः । [illegible] द्रव्यादीति । [illegible] एवं तावदिति । विशेषशब्दार्थेष्वपि [illegible] विशेषशब्दार्थेषु त्विति । [illegible] तुशब्द इति [illegible]
30 [illegible] तुल्यो [illegible] भावः । घट इत्यघटो न भवतीत्यत्रापि [illegible] घट इतीति । [illegible] मातृपिण्डादीति, [illegible]

आमघटच्छिद्रघटो न भवति, आविर्भाव्यात् चित्रलेप्यादिघट इत्यादयो घट एवाऽघटाः, घटनसामर्थ्या-
भावापेक्षत्वात्, घटत्वादघटः स्यात् प्रयोक्तृकर्तरि, तदभावादप्यघटो भवत्येवेति, किञ्चान्यत्—अघटोऽपि
च घटो भवति चेष्टार्थत्वात् स्वतन्त्रः प्रयोज्य च, तद्दर्शयति—घटते घटयति वा कुसुमकुड्यवायव[वा]यवादिरिति,
प्रकृतत्वात् ण्यन्ताच्च कर्तृरूपो विहितत्वात्, तथा प्रत्ययेत्यादि, गौरित्यगौर्न भवतीत्येतदपि न युक्तम्,
यस्मादगौरगौर्भवति, अगौरपि गौर्भवतीत्येतत् प्रदर्श्यते—तत्र हि द्वयी शब्दानां गतिः, एकः शब्दोऽनेकार्थोऽनेकः 5
शब्द एकार्थो भवति, तत्र य एकोऽनेकार्थः स चिन्त्यते—गोशब्दस्य वाग्दिग्भूरश्मिषु वर्तमानस्यैकत्वं प्रत्यक्षसि-
द्धम्, सकृदुच्चरितस्य वाग्दिग्भूरश्मीत्यादिषु दृष्टत्वात्, अतः प्रत्यक्षप्रसिद्धेरनन्यत्वं सिद्धम्, तथानात्वमनुमीय-
मिमन्योऽनन्यो गोशब्द इति, तस्मादन्यत्वानन्यत्वम् स्वान्यत्व भिन्नार्थगतेर्गोशब्दस्यान्यत्वम्, सादृश्यात्तु
स एव भवतीत्येतच्च न, तच्छब्दविशेषानिरूप्यत्वात्, अयमनुदात्तोऽनुदात्तः स्वरितो वा विवर्तते, यदि हीत्यादि,
विशेषरूपस्यानिरूप्यस्याभावान्[न]न्यत्वं प्रत्यक्षस्यानुमानाद्बलीयस्त्वाच्च, यतः किं? तदवस्थसम्बन्धाऽनन्य- 10
त्वम् अनिरूप्याणामरूपाणामसतां पृथगनुपलभ्यमानां नानार्थैः सह च न शक्यः सम्बन्धः कर्तुम् अहत्वस-
म्बन्धानाञ्च शब्दानामर्थप्रत्यायनसामर्थ्यम्, श्लेष्ममधुकशब्दवदन्यवदप्यर्थप्रतीतिप्रसङ्गात्, तस्मादेकात्मकत्व

घट इति घट इत्येवादिरूपो घटार्थे [illegible] घटो न भवतीति अवस्थतोऽन्यघट एवेति भावः।
एवं घटनक्रियाया कर्मान्तरापेक्षकर्तरि घटत इति घट इति घटनमये घटेऽप्यघटत्वमुक्त्वा घटयतीति घट इति णिजन्ततया कर्तुः प्रयोज्यकर्तृ-
त्वव्यपेक्षयोऽपि प्रयोक्तृकर्तुः तदाविर्भावापादनसामर्थ्यापेक्षयाऽपि घटत्व[illegible]विशेषसामान्याभावादघटत्वमपीत्याशयेनाह– 15
प्रयोक्तृकर्तरीति । घटते चेष्टां करोतीति व्युत्पत्त्या यः कोऽपि चेष्टावान् कर्मान्तरानपेक्ष स्वतन्त्र तदपेक्षो वा प्रयोज्य
एतादृशः तत्पुरुषादिर्वा घटत्वसामान्यविशेषविशिष्टतयैवाऽघटोऽपि घटो भवतीत्याह–अघटोऽपि चेति । घटत इति घटः
घटयतीति घट इत्युभयत्रापि घटनादिचेष्टावत्त्वेन [illegible] यः कोऽपि घटो वा तद्भिन्नो वा
[illegible] सोऽपि घटो भवतीत्याह–घटत इति । एवं गोशब्दोऽप्यगौर्गौर्भवतीत्येत-
द्दर्शनायाह–गौरितीति । अनेकार्थप्रतिपादक[illegible] द्विधा दर्शनायाह्वे विभागं दर्शयति– 20
तत्र हीति । तत्र [illegible]—तत्र य एक इति यथा गोशब्द एक एव सन् [illegible]नेकार्थेषु वर्तत इति
प्रत्यक्षत इत्यर्थः । वाग्दिग्भूरश्म्यादिषु अनेकार्थेषु वर्तमानोऽपि गोशब्द प्रत्यक्षेणैक [illegible]
[illegible] भवतीत्याह–गोशब्दस्येति । एकत्वे [illegible]—सकृदुच्चरितस्येति । ननु घटस्य
[illegible] अपि भेद [illegible] सर्वेषुद्गीतान्यथासिद्धत्वम् [illegible]–तथा
त्वमिति । अयं गोशब्दोऽन्योऽयं गोशब्दोऽन्य इति शब्द विशेषस्य निरूपयितुमशक्यत्वादेक एव गोशब्दो न त्वनेक इत्याह– 25
तच्छब्दविशेषेति गोशब्दानां परस्परविशेषस्य निरूपयितुमशक्यत्वम् न चायं गोशब्द उदात्तोऽयमनुदात्तोऽयम् स्वरित
इत्युदात्तानुदात्तस्वरितादिभिर्विशेषैर्[illegible] निरूपयितुं शक्या इति वाच्यम्, यत [illegible]
[illegible] वा गोशब्दस्यैकस्यैव त एते उदात्तादयो विवर्ताः, [illegible] विवर्त इत्युदीरित परिणामरूप
एव वेति भावः । विशेषे [illegible]–यदि हीति विशेषस्य [illegible] न भवतेऽन्यत्वेन भवते [illegible]
[illegible] चेदर्थैः गोशब्दानां [illegible] सह सम्बन्धः कर्तुम्, अनिरूपितस्वरूपाणां 30
[illegible] भावः । तथापि गोशब्दस्य [illegible] पार्थक्येनानुपलभ्यमानं [illegible]
सम्बन्धः कर्तुं शक्य इत्याह–पृथगिति । एतदेवाह–अनिरूप्येति । अहत्वसम्बन्ध– [illegible] इत्याह–अहत्वेति ।

---

१ सि. क्ष. डा. कर्तुर्यत्ते । २ डा. हि. वाग्दिग्भूरश्म्यादिषु । ३ सि. क्ष. डा. °नुरूपत्वं ।

गोशब्दस्य, तस्मिंश्च—एकस्मिन्नर्थे सति शब्दस्य शक्तिभेदात् सम्बन्धिभिरभिव्यक्तत्वात् तत्पर्यायत्वादनन्यत्व-मवसेयम्? किमिव? एकपुरुषपितृपुत्रादिवत्—यथैक एव पुरुषोऽनेकशक्ति[:]सम्बन्धिभेदापेक्षया पिता पुत्रो मातुलो भागिनेय इत्यादि व्यपदेशभाग् भवति तथा गोशब्दोऽपि वागादिषु? कस्मात्? प्रतिसम्बन्ध-सम्बन्धात्(?)—स एव सम्बन्धं सम्बन्धं प्रति सम्बन्धिप्रभिन्नमन्यथा वर्तते तस्मादेकस्याप्येकशब्दस्य वागादि-

5 भिन्नार्थाभिधायित्वाद्गौरेव वागादिरगौर्भवति, अगौरपि गौर्भवति।

स्यान्मतं निमित्तभेदाद्गोशब्दो भिद्यते तानि च निमित्तानि गमनगर्जनगमनगरणादीनि पृषोदरादि-त्वात्प्रसिद्धेरत्यन्तमेवैतदनभिधित्य न युक्तमप्युपगम्य—

गमनादिविशेषनिरूप्याभ्यासे वा गवान्तरवद्गौरेवेत्यस्मिन्नपि पक्षे गौरित्यगौर्भवतीत्यपि, वागादिगवाभ्यतिरेकाव्यतिरेकवत्, अनेकशब्दैकार्थत्वेऽपि एकोत्तरशतनामत्वाद्वाभ्यसो विष-

10 ममविषं मधस्यविषमपि विषं जीवनात्मकमप्युदकादि मारणात्मकं दुष्प्रयोगात्, तथा पीलुर्न योऽप्यभावात्पीलुर्भवति वनादिवत्, हस्तिवत् पीलुर्वा तथा विपर्ययेण, अतः पीलुरपीलुश्च, अपीलुरपि पीलुश्च, एवं हरिरामार्जुनादयोऽपि, शक्रसिंहवासुदेवमण्डूकवानरहयादिषु रम्य-वर्णाद्याकारभिन्नभेदेनामवत्स्वेषु तृणसुवर्णसूर्यपाण्डवशुक्लचर्यादिषु च दर्शनात्।

(गमनादीति) गमनादिविशेषनिरूप्याभ्यासे वा गवान्तरवत् गौरेव—यथाहि गोशब्दः सास्ना-

15 दिमत्यर्थकस्मिन्नर्थे गमननिमित्ते वृत्तोऽपि खण्डमुण्डशाबलेयबाहुलेयसौरभेयादिषु गवान्तरेषु गौरेव, इति[:]हिरत्यर्थे यस्मात् खण्डादिविशेषापेक्षया सामान्यशब्दो गोशब्दः, तस्मात् पूर्ववदस्मिन्नपि पक्षे

[illegible]—एकोऽनेकेति [illegible] नैकस्य [illegible] इति मुख्ये [illegible] इति भावः। [illegible]—तस्मादिति। ननु [illegible] सतीति [illegible]

20 [illegible]। दृष्टान्तमाह—एकपुरुषेति। प्रकृतेन [illegible] प्रतिसम्बन्धमिति [illegible] इति भाव। तथा च [illegible] तस्मादेकस्यापीति [illegible] गौरेव [illegible] भवति [illegible]। अथ [illegible] भवति, [illegible]

25 पृषोदरादित्वात्, [illegible]। [illegible] इति, [illegible] गमनादीति। [illegible] तथापि [illegible] एव [illegible] खण्डमुण्डशाबलेयबाहुलेयसौरभेयास्त [illegible] गौरेव [illegible] च [illegible] एवं [illegible] तथा च [illegible]

30 [illegible]—गमनादिविशेषेति। [illegible] विशेषो न [illegible] विशेषोऽस्तीति, तथा [illegible]—यथाहीति। गोशब्दो हेतुमाह—सास्नादिमत्या-

---

१ सि. क्ष डे. । २ सि. [illegible] क्ष डे. [illegible] । ३ क्ष [illegible] ।

गौरित्युक्ते गौर्भवतीत्यभिमत[म्, क]स्मात् ? वागादिगवाम्व्यतिरेकाव्यतिरेकवत्—यथा वा गौरित्युक्ते वागादिषु न व्यतिरिच्यते गोत्वं, गोशब्दवाग्दिगित्युक्ते दिगादिभ्यो व्यतिरिच्यते चौ[ः]दिगिति ततो गौरगौरपि भवतीति गत्वार्थमुदाहरणम्, एवं तावदनेकार्थैकशब्दस्यान्यापोहाभावः अनेकशब्दैकार्थत्वेऽपि तद्यथा—एकोत्तरशतनाम स्थावाम्भस इत्यादि सलिलमुदकममृत वा[रि]जीवन विषमित्याद्येकोत्तरशतमुदकनामानि निरुक्ते पठ्यन्ते, ततो विषमविषं भवति, अविषमपि विषं भवति, अपानीयं मण्यादिसर्पादि विषं म[ा]रणात्मकं न जीवनात्मकं 5 जीवना मकममृतमुदकमपि मारणात्मकं दुःप्रयोगादित्यादि गमनिका, आदिग्रहणात् घृतमघृतमित्यादि, तथा पीलु[ः]रामोऽपक्वत्वादपीलुर्भवति धनादिवत्, हस्तिवत् पीलुर्वा हस्त्यपि पीलुरपीलुर्भवति हस्तित्वात् मनुष्यवत्, तथा विपर्ययेण—अहस्तित्वादपीलुर्भवति पीलुद्रुमः, अद्रुमत्वात् अपीलुर्हस्तीति अत इत्युपसंहरति—पीलुरपीलुश्चापीलुरपि पीलुश्चेति, एवं हरिरामार्जुनादयोऽपीति व्याप्तितामस्य न्यायस्योदाहरणबाहुल्येन दर्शयति, शक्रसिंहवासुदेवमण्डूकवानरव्यालादिषु हरिशब्दवर्तनादहरिर्हरिश्च रामो रम्यवर्णदाशरथिवलदेवजामदग्न्येषु, 10 अर्जुनः तृणसुवर्णहैहयपाण्डवककुभादिषु वर्तनादित्यादि, तथात्र पूर्ववत् ।

एवं श्रुतिमात्रतत्त्वो गवादिरेकः शब्दोऽप्रतिलब्धविभागोऽनेकार्थगमकशक्तियुक्तः, घटादिवत्तानेकार्थकारित्ववत्, अस्त्यर्थवृत्तिव्यवस्थापका हेतवो यथोक्तं—'संसर्गो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ (वाक्यप० का० २ श्लो० ३१७-३१८) 15 सवत्सा धेनुरवत्सा धेनुः रामलक्ष्मणौ, रामार्जुनौ, अञ्जलिना जुहोति, सैन्धवमानय, अक्ताः शर्करा उपदधाति, अर्जुनः कार्तवीर्यः, मनुष्यरा कन्या, सीरासिमुसलैः, मधुरायाः प्राचीनाश्च

व्यतिरेकेति । व्याचष्टे—तद्यथेति सामान्येन यदि गौरित्युच्यते तदा चोक्तं वागादिषु सर्वार्थेषु समानं न तु कस्यापि विशिष्टम्, यदा च वागुरोबेन गोशब्दस्याभ्युपगमे तदा योऽसौ तस्य सर्वस्य हेतोर्यत् न विदिति दिगादिभ्यो व्यतिरिच्यते तस्माद् गोशब्दवाच्यत्वेन गौरपि सती गोशब्दवाच्याविभागव्यतिरिक्तत्वेनागौरपि भवति तथा तथोऽपि 20 तदेवमनेकार्थैकशब्दस्यान्यापोहो न सम्भवतीति भाव । एकोऽर्थो अनेके शब्दा इति पक्षेऽप्यन्यापोहासम्भवं दर्शयति—अनेकशब्देति । तद्विवरणाय—एकोत्तरेति एकोत्तरशतं सलिलनामानि निरुक्ते पठ्यन्ते जीवनात्मकममृतमुदकादिनामभिर्दुःप्रयोगादिना मरणात्मकं विषं भवति तथा विषमपि सुप्रयोगादिनाऽमृतं भवतीत्येवं विभागमनेकत्वे सर्वं चेति भावः । एतदेव दर्शयति—ततो विषमिति । अनेकार्थैकशब्दस्यान्यापोहं निदर्शनान्तराण्याह—तथा पीलुर्द्रुम इति 'द्रुमप्रभेदस्यापक्वमप्युपादि पीलुम्' इत्यमर अपक्वत्वात् पीलुरपक्वत्वादपीलुर्भवतीति पीलोर्भोज्यत्वेनाभक्ष्यत्वं स्थितम् 25 तथा च एतद्वत्वात् हस्तिवत् पीलुरपि भवति, हस्ती हि अत्र पीलुशब्दवाच्यत्वात् पीलुरपीति भाव । एवं पीलुरपि हस्ती हस्त्यादिव्युत्पत्त्याऽपीलुरपीलुरपि हस्तित्वाद्यस्तीत्याह—हस्त्यपीति । अपीलुरपि पीलुर्भवतीत्याह तथा विपर्ययेणेति । न्यायस्य तदन्तरस्याप्यस्य व्यापकत्वमादर्शयितुं अनुपनिबद्धोपन्यासमित्याह—एवं हरिरामेति । हरिशब्दस्यानेकार्थमाह शक्रेति एकहरिशब्दार्थत्वेन हरिरपि अन्यहरिशब्दार्थत्वेनाहरिरपीति बोध्यमेवं सर्वत्र । रामशब्दस्यानेकार्थमाह—राम इति । अर्जुनशब्दस्यानेकार्थमाह अर्जुन इति । एवमेव शब्दोऽनेकार्थोऽवगमयति नास्ति शब्दस्य भेद श्रुतिनिष्पत्तिमूलत्वमस्ये 30 विशेषमवादित्याह—एवं श्रुतिमात्रतत्त्व इति । व्याचष्टे अनेकेति श्रुतिनिष्पत्तिमूलत्वादेतदेव स्वल्पत्वापेक्षया गोस-

---

१ अ. °गौर्भवती । २ सि क्ष डे °निरेकवद् । ३ नि क्ष वागादिष्विति ।

यदागच्छामि, द्वारम्, ग्रामस्याथ समेत, स्थूलपृषतीमालभेतेत्यादिषु निमित्तान्तरैरर्थ-
स्यावच्छेदः ।

एष श्रुतिमात्रेत्यादि, अनेनोक्तन्यायेन श्रुतिमात्रमतो नातिरेकः शब्दोऽ[र्थ]निरपेक्ष-
विभागाऽन्तरार्थगमनं नियुक्तं किमिति? एतावदित्यादि यावत् कारितत्वमिति एतदर्थं प्रोक्तार्थोपसंहार-
5 न्यायगमनप्रत्यानयापरागेय विभागप्रतिरयमाधारभ्यन्तरउच्यमत इति, तत्र मत्वर्थवृत्तीत्यादि यावत्
'निष्प्रत्यूहितः' इति यथासंख्य सकलमाधुर्यास्य माविनाथ कारिताद्य निमित्तान्तरादैकार्थावच्छेदा-
स्थानम्, भारतिमन्यात् गौणमुख्यस्तुतिनिन्दाविभागावशादन्यावच्छेदादिति ।

अथाप्यत ननूक्तमत्र गुणसमुदायमात्रार्थस्य सर्वथा दर्शनासम्भवः सत्यपि च दर्शनेऽ-
नुमानासम्भव इति पुनरिदानीं को विचारो दर्शनं स्यादिति? स्थिते तु स्वार्थाभावे सामान्य-
10 रूपस्याभावमात्रस्य निवृत्तिः, अभावप्रदार्थसंस्पर्शात्, वृक्ष इत्यवृक्षो न भवति अग्निरित्यनग्निर्न
भवतीत्यवृक्षानग्नी अभावमेवार्थसंस्पर्शेनोच्यते तस्मात् सर्वाभावप्रदर्शनेन विनैवापोहो गमक
इत्यभाष्यत अथ स्वार्थाभावाभावमात्रस्य वृक्ष इति धूम इति सच्छब्दलिङ्गाभ्यामपोह्यो घटादि
भेदरूपाण्यसंस्पृश्य प्रसज्यप्रतिषेधेन तन्मात्रमत्र च गम्यते, न वृक्षादिपर्युदासेन घटादिरर्थान्तरमा
क्षिप्त, अन्यस्यासत्त्वादविवक्षितत्वाच्च, स्वयमनवगतः कथमभावं विशेषयितुं शक्नुयात्
15 अवृक्षो वृक्षाभावो न घटाभाव इति, तस्य भावरूपान्तरमत्रात्वात्, उभयत्र सपक्षासपक्षयो
न किञ्चित् फलविशेषयितुं शक्यम् ।

[illegible]

अपोह्येतेत्यादि, अथ परेणोच्येत ननूक्तमेव गुणसमुदायमात्रस्य काणादादेर्दर्शनासम्भवः, सत्यपि च दर्शने सर्वथाऽनुमानासम्भवः, सर्वप्रकारेणापोहस्याभि[ति] निराकर्तुमीहते सूक्त एव पुनरिदानीं को विचारो दर्शनं स्यादिति ?, स्थिते तु स्वार्थस्याभावे सामान्यरूपस्याभावमात्रस्य निवृत्तिः, अभावभेदासंसर्गात्—धूम इत्यपोहो न भवति, अभिन्नमभिन्नं घटादीनामनामी अभावभेदासंसर्गेनापोह्येते, न चाऽभावस्य भेदाः सन्ति, तस्मात् सर्वाभावभेददर्शनेन विनैवापोहो गमक इत्यत्रोच्यते—अथ स्वार्थाभावाभावमात्रत्वे 5 तद्विशिष्टे का सम्प्रार्थ इति पृच्छति—धूम इत्यादि प्रस्तुतार्थं अत्राप्यपोहाभावमापादयितुकामः तच्छब्दो—धूमशब्दः पर्यायेऽनुमाने, स्वार्थे धूमस्य लिङ्गे, ताभ्यामन्या[प]ोहो—अधूमाभावो घटादिभेदरूपाण्यसंसृज्येतामभिमतोर्थसूचनम्, प्रसज्यप्रतिषेधार्थे[न]धूमो न भवत्यधूम इति तन्मात्रमेव च गम्येत न च तस्यत इत्यभिप्रायः, धूमादन्योऽधूम इति न धूमपर्युदासेन घटादिरर्थान्तरमाऽन्यः कश्चिदुच्यते, अन्यस्यासत्त्वादविवक्षितत्वाच्च धूम एव व्यावर्त्येयो विवक्षितत्वात्, सममनवगतः कथमभाव विशेषयितुं शक्नुयात् ? अधूमो 10 धूमाभावो न घटाभाव इति खपुष्पमिव वन्ध्यापुत्रः कस्मात् ? तस्य—अभावस्य भावेन सम्बन्धासम्भवात्, सः स्वयमसन् कथमसतो विशेषणं स्यात्, उभयत्र च—अन्वये व्यतिरेके च घटादीनां भेदरूपाणां सपक्षासपक्षयोरसंसृष्टत्वेनेष्टत्वात् न किञ्चित् केनचिद्विशेषयितुं शक्यम् ।

नास्ति स्वार्थो नाम कश्चित्, तथा च सत्येन लिङ्गेन च स्वार्थाभावस्य सामान्यस्य निवृत्तिमात्रं क्रियते यथा [illegible] स्वार्थाभावेनात्मसामान्यस्य निर्देश न हि धूमसामान्याभावो घटपटादीनस्मात् व्यपैति अभावस्य भेदाभावादित्याह—स्थिते 15 तु स्वार्थस्याभाव इति, अन्यथान्यस्य धूमादिभावरूपस्य भावेस्य गुणसमुदायरूपस्याभावे निश्चितेऽधूमोऽपि धूमसामान्याभाव एव सामान्यरूपो न तु घटपटादिविशिष्टरूपो इत्याभाव तस्य घटपटादिभिर्विशेषैः संसर्गाभावात् केवलं एव इति [illegible] मात्रमनुच्यते अभिधित्सन [illegible] माव । एवमसम्भूतानां घटपटादिभिर्विविक्तोऽभावमपरिशि[illegible] पि यमस्य [illegible]—तस्मादिति एवमपोहस्वार्थाभाव अभवत्वं न भवतीत्यन्वयव्यतिरेकौ न भवितुमर्हतः स्यानेन हि बुद्धिरभिधानेन एव च व्यावर्त्येन, नासन्तावर्थान् वसुप्रकन्यापुत्रविशेषणानिरूपादयिति भाव । अत्रापार्थे 20 माह—अथ स्वार्थाभावेति स्वार्थाभावस्य सामान्याभाव एव भवतीष्यते तर्हि धर्मेण न कश्चिदर्थो धर्मेतेऽभिप्रायः । तमेव स्पष्टयति—धूम इत्यसतीति व्यक्तिना धूम इतीति भावम्, धूम इति शब्द परार्थानुमानभूतो भावः धूम इति कार्यानुमा[illegible] अत आह—तच्छब्द इति ताभ्यामन्यो हि अपोहो भवत [illegible] पूर्वेणानभिम [illegible]? मेदस्यापि घटपटादीनामसंसृष्टस्य एवं तर्हि [illegible] धूमाभाव एवार्थो न तु [illegible] व्यावृत्तिः एवमनभिमतस्यापि भवतीति चेत् तथा सति प्रसज्यप्रतिषेधेन धूमो न भवति अभिन्नं भवतीत्यभावमात्रं गम्येत न च तथा गम्यत इति भावः । 25 गम्यते च पर्युदासेन धूमादन्योऽधूमो घटपटादिरर्थः भवत्यत्र तु तदभिधोऽन्यपोहार्थो नास्ति गुणसमुदायरूपस्य तदादर्शनात् कश्चित् सत्यपि [illegible] न विवक्षित [illegible] प्रतिपिपादयिषितत्वाभिप्रायेणाह—धूमादन्य इति । ननु अन्यस्यासत्त्वं भवतु धूमस्य विवक्षितत्वात्तथा इति धूमाभावस्यैव को दोष इत्याह सममनवगत इति [illegible] हि गुणसमुदायरूपस्यासत्त्वात् एवं [illegible] व्यावर्त्य एव कथं न स्यात् अनवगतो हि [illegible] सामर्थ्य [illegible] मर्हति कथं [illegible] न [illegible] वन्ध्यापुत्र [illegible] शक्नोति [illegible] भाव । तमेव हेतुमाह— 30 तस्येति अभावस्य [illegible] भावेन भवति, अस्वभावो [illegible] अभाव [illegible] भाव एव [illegible] तथा कथं सोऽभावस्य स्वरूपं कल्पयितुं क्षम [illegible] भाव । एवमपि धूमो भवति अधूमो न भवतीत्यन्वये व्यतिरेके च [illegible] घटपटादेर्भेदरूपस्यासंसर्गात् किं केन विशेषणीयम् इति दर्शयति—उभयत्र चेति । एवम् [illegible] न भवतीत्येवं

---

१ सि ए. ब डे [illegible]र्थसूचं च । २ सि ब डा डे आलोकदृमात ।

ततश्च धूम इत्ययं शब्दो न भवतीत्युक्त इत्युक्तं भवेत् योऽभावाभावः स धूम इति नान्यद्
भावनिवृत्त्या, ततो घटपटादीनां धूमतापत्तेः धूमशब्दार्थत्वप्रसक्तेः कुतोऽपोहस्तेषां स्यात्,
सर्वथा वा गतिर्भवेत्, अतः सर्वदर्शननिराकरणाहृतायां सत्यां शब्दादनुमानाद्वाऽभावाभावमात्र-
वृत्तित्वात् विशेषवचनमत्यन्तानर्थक्यम्, अभावाभावमात्रस्यैकत्वात्, भेदविषयवचनानुमान
5 व्यवहारनिर्विषयत्वात् अभूतभेदविषयत्वाद्वा खपुष्पादिवत्, अगतिरज्ञानं वा धूमशब्दोच्चार
णाद्यवत् सर्वथा, गन्तव्याभावात्, अभावाभावमात्रवृत्तित्वाच्छब्दानुमानयोरिति ।

ततश्चेत्यादि, अस्माद्युक्त्यापातेन मन्यार्थः संवृत्तः धूम इत्ययं शब्दो न भवतीत्युक्ते इत्युक्तं भवेत्
नन्वमान्येत, योऽभावेत्यादि अभावस्याभावो धूम इत्युक्तं स्यात्, नान्यद्भावनिवृत्त्या, ततो घटपटादीनाम-
भावनिवृत्तिमात्रत्वात् धूमतापत्तेः धूमशब्दार्थत्वं प्राप्तम्, कुतोऽपोहस्तेषां स्यात्? तत्संसर्गे हि स्यादपोह
10 नऽधूमो न भवतीति इत्यभावाभावः अभिन्नत्वात्, किञ्चान्यत्—सर्वथा वा गतिर्भवेत्—अभावाभावत्वाविशेषे
हि धूमोऽभिन्नः स्यात्, न सपक्षासपक्षभेदसंसर्गेण इत्यत, अतः सर्वदर्शननिराकरणाहृता, तस्यां च सत्यां
शब्दात्—धूमात् अनुमानाद्वा—धूमादभावाभावमात्रवृत्तित्वात् धर्मभेदासंसर्गादेव अग्न्युक्त्या धूमो-
ऽग्निरिति च विशेषवचनमत्यन्तानर्थक्यं स्यात्, कस्मात्? अभावाभावमात्रस्यैकत्वादिति, शब्दानुमानयोः
सामान्येन हेतुः खपुष्पवदिति दृष्टान्तः विशेषेण वा हेतुः—भेदविषयवचनानुमानव्यवहारनिर्विषयत्वात्,
15 अभूतभेदविषयत्वादिति सामान्येन स एव दृष्टान्तः सर्वत्रान्यत्रोऽभिहितत्वात्, अयमन्यो व्याख्याविकल्पः,

---

[illegible] । व्याख्या—अस्माद्युक्त्यापातादिति [illegible] । [illegible]
[illegible] योऽभावेत्यादीति [illegible]
[illegible]
20 [illegible]
[illegible]
[illegible] —सर्वथा वेति, [illegible]
[illegible]
[illegible]
25 [illegible] सर्वदर्शनेति [illegible]
[illegible]
[illegible]
[illegible] —खपुष्पादीनि । [illegible]
30 [illegible] अभूतभेदविषयत्वादिति [illegible]
[illegible]
[illegible] —अयमन्य इति । [illegible]

तद्यथा—सर्वथा नाऽनग्निर्भवेत् प्रत्येकमभावादरत्वात् भगवियान धूमसम्बोधारणाद्भवेत् सर्वथा, कस्मात्? गम्यस्याभावात्, गम्यस्याभावश्चाभावाभावमात्रवृत्तित्वादन्यस्यानुमानस्येति ।

अत्रोच्यते न स्वभेदा अपोह्यन्ते नाप्यशेषभेदासंस्पर्शनाभावमात्रम्, किन्तर्हि? स्वसम्बन्धिसामान्यधर्मानुबन्धिभेदेष्वविनाभाविषु दर्शनसंस्पर्शने तद्व्यतिरिक्तेऽन्यस्यापोहस्य प्रवृत्तिरिति नोक्तदोषाः, अत एव चेद स्वसम्बन्धिभ्योऽन्यत्र[।]दर्शनात्तद्व्यवच्छेदानु 5 मानमिति, अस्य व्याख्या—यत्र दृष्टः सोऽत्र सम्बन्ध्यभिप्रेतो न त्वविनाभावित्वसम्बन्धेन,

अपृथग्भोऽग्निर्वा न भवतीति, एवञ्च कृत्वा धूमशब्दाद्माधानेकाविनाभाविनां पृथिवीद्रव्यत्वादीनामनुमानमुपपन्नं भवति, तद्दर्शनस्पर्शनवृत्तत्वात्, इतरथा त्वनुबन्धिनाम न्यत्वात्तुल्ये एव वृत्तेरपक्षधर्मत्वादनैकान्तिकत्वविरुद्धत्वानुमानाभासदोषाः स्युः, अनुबन्धिनां त्यागे च तदविनाभाविनः स्वार्थस्यासम्भव एव, ततः प्रत्याय्यप्रत्यायनयोरनुपपत्तिः, तस्मात् 10 स्वसम्बन्धिभावाभावाभ्यां दर्शनादर्शनयोरभिप्रेतानुमानसिद्धिरिति ।

अत्रोच्यतेत्यादि, स्वभेदाभावव्यावृत्तिलक्षणान्यापोहेऽनन्त्वात्सम्भवसम्बन्धाभिधानादिदोषा उक्ताः, सामान्याभावाभावमात्रे सर्वैकत्वानर्थक्यापोहाभावदोषा उक्ताः तेषां पक्षद्वयानभ्युपगमात् परिहारः । नाप्यशेषेत्यादि किं तर्हीति पक्षान्तरं प्रस्तौ निर्दोषं मन्यमानः स्वसम्बन्धि[नो]द्रव्यसामान्या सत्त्वाद् व्यत्वादिसामान्यधर्माः तदनुबन्धिनो भेदाश्च शिंशपादयः तेष्वविनाभाविषु दर्शनसंस्पर्शने तद्व्यतिरिक्तेषु 15 घटादिष्वदर्शनसंस्पर्शने वृक्षादिषु चान्यापोहस्य प्रवृत्तत्वात् सम्भवत्युभयपक्षगता दोषाः अत एव चेदमि-

साधितम्—अग्निरग्न्यन्तमिति । प्रथमकालं मत्वेत्यसदाह—गम्यस्याभावादिति अर्थगत्यर्थ हि शब्दप्रयोगो न चात्र पक्षे कश्चनार्थो गम्यत इति भावः । सोऽपि कथमित्याह—गम्यस्याभावश्चेति, अन्यानुमानप्रमेयनिरपेक्षाभावमात्रत्वेऽपि कारणं प्राप्यं वा न निमित्तादीति भावः । ननु प्रत्यक्षेण भेदभावमभिधायते स्वार्थाभावाभावात् सम्बन्धाभावत्वादन्यस्याभाव भावमित्येवमपि व्यावर्तमानमपि व्यपदेशीनामानन्त्यात् तेन तेन प्रकारेणाभावत्वप्रतिपत्त्यपोहासम्भव इत्यादिदोषा उक्ताः 20 अन्यसम्बन्धिरूपयोर्भेदसामान्यसर्वो भावाभावमात्रत्वेन व्यपदेशान्तरानन्त्येन सर्वोऽयमेकत्वं विशेषवचनप्रसङ्गेऽपि सर्वेषां प्रत्येकापेक्षाभावापेक्षाभावदोषा यथा तदिदं पक्षद्वयं परित्यज्य भावी प्राहते—अत्रोच्यतेति । व्याख्या—स्वभेदेति व्यापीना ये भेदास्तदभावमात्रवृत्तिलक्षणान्यापोहपक्षे भेदानामानन्त्यात् सम्बन्धाख्यानादसम्भवाद्यापोहाभावदोषाः एवं व्यतिरेके भेदनिरपेक्षेऽपि विशेषम् । भेदव्यापारत्वपक्षे दोषमाह—सामान्याभावेति व्यपदेशानामानन्त्ये भेदत्वं भिन्न-वचनप्रसङ्गान्यत्वापोहाभावापोहाभावदोषा उक्ता वाच्यत्वेनेति भावः । उक्तदोषाणां परिहारश्चोभयत्रापि अनभ्युपगमादित्याह—25 तेषामिति उक्तदोषाभावमित्यर्थः । अन्यविधापोहत्वाभिमतं नापोहत इति द्वितीयाभावं दर्शयति—नाप्यशेषेत्यादीति । द्रव्यसामान्या ये सम्बन्धिन सामान्यधर्मा तदनुबन्धिनो विशेषाश्च, एतेऽन्यतमा अत्र दर्शनं स्पर्शनञ्च सम्भवति एतद्व्यतिरिक्तेषु दर्शनस्य स्पर्शनस्य चान्यतरस्यापोहः प्रवर्तत इति पक्षान्तरं दर्शयति—स्वसम्बन्धिन इति । तेष्वविनाभाविष्विति एभिर्विना वृक्षादेरसम्भव एषु दर्शनं स्पर्शनञ्च भवति वृक्षादिव्यवहारे न गुणसमुदायमात्रता निवर्तिता दर्शनादसम्भवादिति

१ सि क्ष भा के तदभाविनः सर्वथा । २ सि क्ष भा के वृक्षान्य । ३ सि क्ष प्रा के संस्पर्शन । ४ सि क्ष भा. के संस्पर्शन ।

त्यादि—एतत्प्रसङ्गभयदर्शनार्थं भाष्यमप्याह—स्वसम्बन्धिभ्योऽन्यत्रादर्शनादित्यादि, अस्य व्याख्या टीकायामप्यः—येन यत्र इत्यादि यावद् यत्र योऽनभिप्रायो न भवतीति गतार्थः। एवञ्च वृक्षत्वादि यावदुपपन्नं भवतीति, अनेकान्तिकमभाविनां पृथिवीद्रव्यत्वादीनां वृक्षत्वाद्यभावानुबन्धिनामनुमानं युज्यते, तद्दर्शन-स्पर्शने, वृक्षत्वात् पृथिवी द्रव्यं सत्, धूमत्वाच्च धूमवदग्निमवेति, इतरथा त्वित्यादि, अन्यत्राभावानुबन्धितिरेके सम्बन्धिनामभावेऽनुबन्धिनां द्रव्य[त्वा]दीनामप्यभावानुबन्धे विपक्ष एव वृक्षेऽपि धर्मत्वादनैका-न्तिकत्वविरुद्धत्वानुमानाभासदोषाः स्युः अनुबन्धिनां द्रव्य[त्वा]दीनां त्यागे तदविनाभाविनो वृक्षस्य त्यागेनासम्भव एवेति च दोषः ततः प्रमाणप्रमाणाभासयोः—अर्थान्तरयोरनुपपत्तिः, तस्मात् स्वसम्बन्धि-भावेनापुनरुक्तप्रसङ्गः सम्बन्धिनोऽर्थान्तरस्य भावे वचनात् सम्बन्धिन एव भावाभावेऽदर्शनादनुमानस्या-सिद्धेरेतस्य सिद्धिरिति।

अत्रोत्तरमुच्यते—

एवं तर्हि यदि सत्त्वादीनि विशेषणानि वृक्षस्य वृक्षादभिन्नानि वृक्षो भवन्ति स वा वृक्षस्तानि भवति तेन तानि विशेष्यन्ते देवदत्तपाण्यादिवदेकभवनात्मना, तस्मिन्नेकभवने प्रयोगः खल्वादिमति दर्शनमित्युच्यते, तस्यासम्भवत्, ततोऽन्यत्वात् द्रव्यादिवृक्षभावदर्शनात्,

---

अन०। तद्व्यतिरिकेष्वित्ति सत्त्वादिष्वनभिन्नाविनाभाविभेदष्वतिरिकेषु व्यपदादिषु यत [illegible] दर्शनेन न भवतोऽत्र एव तदाभासोऽस्य व्यक्तिरिति यावत् पूर्वोक्तिगणदोषा इति भावः। अनन्येन यद्योऽयमर्थ सम्भव इति तावर्थव्याख्याने व्याख्यानी प्रत्यक्षेति। यत्र यतो दर्शनं च सम्भवति सत्यपि च तन्निरूपणे नानुमानसम्भवोऽत्र एव तत्र तत्र [illegible] त एव तत्सम्बन्धिपदार्थ [illegible] न तु ते विपक्षो नैर्धेना न सम्भवन्ति तु [illegible] ते सर्वं सम्बन्धिन [illegible] व्याहर्तं भाष्यविकल्पप्रयुक्तसत्ति—अस्य व्याख्यायामाह इति। तत्र तत्र [illegible] धूमादिलिङ्गस्य दर्शं तत्र [illegible] ततोऽन्यत्र [illegible] तदानुमानस्यास्य सतो न भवतीति तदन्यप्रसक्तौ—यत्र यत्र इत्यादीति। अथ चाभिधेयानुमेयस्वाभावादिरन्यत्र [illegible] विपक्षदर्शनाद्यभावाभावान्नियमेनानुमानं भवति तत्र पृथिवीद्रव्यत्वाभावेऽपि [illegible] पृथिवीद्रव्यत्वानुमानं भवतीत्याह अनेकान्तिकमभाविनामिति अनेकैः सह [illegible]। तद्दर्शन-स्पर्शने इति पृथिवीद्रव्यत्वादेरनुमानाभिमाने [illegible]। तथाह—वृक्षत्वादिति। [illegible] तत्र [illegible] भाव्यन्तो [illegible] भवति च सम्बन्धिन यदि तेषां [illegible] न [illegible] भवतीत्यर्थः। तैर्विना [illegible] स्युः एवं द्रव्यत्वादौ [illegible] तथा [illegible] एव [illegible] न स्यात्, [illegible] तस्य [illegible] [illegible] [illegible] इत्यादि—अत्यस्तेति। [illegible] अनुबन्धिनामिति। एवं [illegible] प्रमाणाभासयो वा [illegible] इति। [illegible] [illegible] [illegible] सम्बन्धिन इति। [illegible] ।—एवं

---

१ सि क डा. डे. अत। २ सि क सर्वेण डा. तद्दर्शनस्पर्शने। ३ सि क डे क वृक्षत्वादिति। ४ सि क. डा. डे अन्य-न्यायत्वे।

द्रव्याद्यभावदर्शनानभ्यनुज्ञानादतिस्फुट एवायं विधिवादस्त्वयाऽभ्युपगतः, भवनपरमार्था-
र्थाभ्युपगमात्, यः कोऽपि भवति वृक्षादिस्तदपि भवनमेव भवत एव भवनात् योऽप्यसौ
व्यावृत्त्यभिमतः तदपि भवनमेव, भवत एव व्यावृत्तेः पर्वतादेः देवदत्तादेः व्यावृत्तिवत्, वैधर्म्येण
खपुष्पवत्, एवं भवद्भवननिरूपणेऽयमस्य स्थित एवार्थः स चान्यव्यावृत्त्यान्यापोहपरिगतोऽनु
गमो विधिरेव, तस्मिंश्च सति सर्वथा वा गतिर्भवेदिति । 5

एवं तर्हीत्यादि, यदि सत्त्वादीन्यपि—सत्ताद्रव्यपृथिवीत्वादीनि विशेषणानि वृक्षस्य
वृक्षाश्चेमानि सन्ति वृक्षो भवन्ति—तानि वृक्ष एवेत्यर्थः स वा वृक्षस्तानि भवति, तेन तानि विशेष्यन्ते
दैवदत्तपाण्यादिवदेकभवनात्मनेत्यतदापन्नम्, तस्मिन्नेकभवन प्रयोगः शाखानिमित्तं दर्शनमित्युच्यते,
अस्यार्थः स एकभवनात्मकोऽर्थोऽस्य वृक्षशब्दप्रयोगस्य, किमिव? तत्सात्मवत्—सत्ताद्रव्यत्वादिवृक्षत्वात्मवत्,
वृक्षस्य सत्ताद्रव्यत्वादित्वात्मवदेकभवनात्मकत्वादित्यर्थः, कस्मात्? उभयन्यायेन ततोऽनन्यत्वात्—तेभ्य- 10
स्तस्य, तस्माच्च तेषामनन्यत्वात् द्रव्यादिवृक्षाभावदर्शनात्—वृक्षद्रव्यादिभावदर्शनादित्यर्थः, कस्मात्? द्रव्या
द्यभावदर्शनानभ्यनुज्ञानात्—पृथिवीद्रव्यसत्त्वाभावे दर्शनं वृक्षस्य वृक्षाभावे वा पृथिव्यादिभावदर्शने
वृक्षात्मविपर्ययाभ्यनुज्ञाप्रसङ्गे यस्मात्, तस्मादेकभवनात्मकत्वानुज्ञानाद्द्रव्याभावादतिस्फुट एवायं विधि
वादस्त्वयाऽभ्युपगतः, पूर्वेष्वपि पक्षेषु स्फुट एव विधिवादः अस्मिंस्त्वतिस्फुटः, कस्मात्? भवनपरमार्था-
र्थाभ्युपगमात्—वृक्षशब्दस्य सद्द्रव्यपृथिवीत्वादिवृक्षैकभवनात्मकः परमार्थतोऽर्थ इत्यभ्युपगतत्वात् यः कोऽपि 15
भवतीत्यादिना भवनमेवेति दर्शयति—यावद्वैधर्म्येण खपुष्पवदिति, योऽप्यसावित्यादि व्यावृत्त्यभिमतोऽपि

तर्हीति । सत्तादीनां वृक्षादिभिः सह तादात्म्याद्विशेषणत्वेऽभिमतेऽस्मत्पक्ष एव, सत्तादीनि वृक्षादीन्येव न व्यतिरिच्यन्ते सुरूपता
वृक्षादीन्यपि सत्तादीनि सुनिर्भिन्नस्वरूपाणीति भावः—सत्ताद्रव्येति । सत्तादीनां वृक्षरूपतया विशेषणत्वं वृक्षादीनां सत्ता-
दिरूपतया विशेषणत्वं स एव च भवतीति । वृक्षादीनां विशेषणत्वे दृष्टान्तमादर्शयति—दैवदत्तेति पाण्यादीनां दैवदत्तो विशेषणम्,
तदात्मकत्वात्तस्येति भावः । एकभवनभवनात्मनेति देवदत्तस्य पाण्यादेः सत्तादेर्वृक्षादेश्च भवनमेकमेव न पृथग्भूतम् तयोरन- 20
न्यत्वादिति भावः । तेनैकभवनेन सह वृक्षादिशब्दस्य प्रयोगदर्शनमेव तदेकभवनं वृक्षादिशब्दाभिधेयं भवतीत्याह—तस्मि-
न्नेकभवन इति । सत्ताद्रव्यत्वादिवृक्षत्वात्मत्वे वृक्षादिशब्दप्रयोग एव शाखादिमति वृक्षे वृक्षशब्ददर्शनमित्युच्यत इति भावः ।
दृष्टान्तमाह—तत्सात्मवदिति सत्ताद्रव्यत्वादीनां वृक्षसात्मत्वम्, तथा वृक्षस्य सत्ताद्रव्यत्वादिसात्मत्वम्, तयोर्हि भवनमेक-
मेवेति भावः । एकभवनात्मकत्वे हेतुमाह—उभयन्यायेनेति अन्वयव्यतिरेकाभ्याम् दर्शनादर्शनतोऽनन्यत्वात् सत्तादिभ्यो
वृक्षस्य वृक्षात् सत्तादीनामिति भावः । उभयन्यायमेव दर्शयति—द्रव्यादीति द्रव्यत्वादिभावे एव वृक्षस्य दर्शनात्, वृक्षभाव एव 25
तदात्मना द्रव्यत्वादेर्दर्शनादित्यर्थः । व्यतिरेकमाह—द्रव्यादीति तदन्यभिन्नयोऽन्यतरादर्शनाभ्युपगमादित्यर्थः । एकभवन-
नात्मकत्वं तयोरनन्यत्वं यदाऽभ्युपगतमेव स्यात्, तदा सत्ताद्रव्यपृथिवीत्वादिभ्यो वृक्षस्यैकभवनात्मकत्वं सत्त्वादिरूपत्वम्
अभावाभावादन्यापोहासम्भवेन स्फुटो वादोऽयं विधिवाद एवास्फुटमिति भावः । अतिस्फुटत्वे हेतुमाह—पूर्वेष्वपीति ।
अतिस्फुटत्वे हेतुमाह भवनपरमार्थेति सामान्यविशेषभेदविभिन्नविधिप्रधानवाद्यर्थः परमार्थत्वसाम्युपगमादिति भावः । भवतीत्य
भवति वृक्षादि भावकम्, घटपटादीनामपि भवनव्याप्तत्वाद् व्यावृत्त्यभिमतोऽपि भवनमेव भावकम्, भवत एव व्यावृत्तेः 30
पर्वतादेरपि व्यावृत्तिः स्यात्, घटपटादेरपि व्यावृत्तिः स्यादित्याशयेनाह—यः कोऽपीति । भवत एव व्यावृत्तेरित्यत्र भवत इति पदं

---

१ सि क्ष डे. पृथिव्यादीनि । २ सि क्ष डे. विपर्ययात्म । ३ सि क्ष डे. यः कोऽपि ।

अनुक्रमस्तिमयत्वादिष्वस्तिवर्तती सन्निधिप्रापिनी भवतिविषयी सामान्यभ

पर्वेषां सर्वात्मकत्वपरिग्रह एव न्याय्य इत्याह—तस्मादिति प्रभवत्वापरिणामित्वेनाप्रवृत्तिस्वारस्येनार्थं । एवम्भव सर्व न तु सर्वेषामिति परिग्रहो न्याय्य इति भाव । न त्विपति पुरुषस्य स्थितिरेव प्रभावमेव स्थित्युत्पत्तिरूपा इत्येवं स भतिभवनद्वैतं न युक्तम्, किन्तु प्रतिविधित्सुरितिः सर्वतोऽभिप्रायः भवितेत्यर्थे भाव त एव तस्य प्रवर्तकः अभिप्रेयो भाव्य इत्यरथे भाव च एव भवत्य इति भावद्वैतं विमुखभवनस्यभवतमिति भावः । यम्भवति प्रभवान्तरेण स्वरूपेण भावेनैव भवति पुरुषत्तु न भवति पुरुषरूपतयाऽभिव्यक्तिमात्रप्रतीत्यैवं प्रभावेणेत्यर्थः परन्तु चेतनोऽचेतनभ धर्मो भवतीति भाव । सांख्यसम्मतस्य सन्निधिभवनरूपस्य पुरुषसामर्थ्यं भावयति—तत्र तावदिति, सत्कार्य सनि न सन्निधिरूपम् भवप्रवृत्तिनियमात्मकत्वाभ्यामाद्युभयापीति भावः । तस्याभिप्रायं निवेदि—अनापन्नत्वादि आपत्तिरेवाविर्भाव इत्यपरेणाह—अनाविर्भूतत्वादिति न एव प्रभवः तथैव भवत्येव स एव न नियम इत्युक्त तदुपरेणाह—अनाविर्भवनमिति । आपत्त्याविर्भावयोरैक्यं अभिप्रेत्यमनुरूपमाह—अथ वेति पूर्वधर्म ति स्वरूपात्प्रच्युतो धर्मी धर्मान्तरेणाविर्भवति तथाऽवस्थानं परिणामः प्रवृत्तेरेव तस्य नियमात्मस्य तथैव प्रवृत्तिभवनमा न एव व्यक्तिः प्रकाश इत्युच्यत इति भावः । अव्यक्तपरिणामपरम्परा प्रवृत्तिरित्याह प्रवृत्तिरिति । भावान्तरेण प धर्मिणोऽवस्थानं नियम इत्याह नियमेति । प्रवृत्त्यादिनियमात्मकस्य वस्तुनो धर्मिभावत्वमेवेत्याह—अतो नि इति । एवं सति घट पुरुषादेः सन्निधिभवनस्यायुक्तत्वमाह एवंतुल्यत्वेन—अत इति । अस्मादीनां पूर्वोक्तानि प्रपञ्चे—अनुक्रममिति । अस्मादयोऽप्यभिप्रायेण तत्समासप्रभिधानिना तथा भाऽऽपत्तिप्रत्ययोरप्यभिधानस्य

१ सि. क. भाव-युक्तिमादि । २ सि क. तोविर्भूतत्वात् । ३ सि. क. °प्रवेति । ४ सि क स्थितिरम...

विनी पञ्चविंशतिपञ्चभवनवाचीति सत्यमुक्तं सर्वेऽप्यमी सत्तार्थमेवाविशेषेण ब्रुवते, पञ्चवि-
वर्तस्वर्गमप्यपृथक्त्वात्सत्ताया इत्युक्तम्, न हि द्रव्यादिषड्भेदोपादानवत् पञ्चविवर्तस्युभयोपादानम्
किन्तु अस्त्यादितुल्यार्थत्वेन, सत्तार्थं इत्यविशेषेण वचनात्, एवं तावत्सन्निधिभवनं नास्त्येव
निरूपणानुपपत्तेः ।

५ (ननूक्तमिति) ननूक्तमस्तिभवत्यादिष्वस्तिर्वर्तते सन्निधिवाचिनी, भवतिपचती सामान्य-
भवनवाचिनी, पञ्चविंशतिपञ्चभवनवाचीति, सत्यमुक्तम्, अयुक्तं तूक्तमस्त्यादीनां सन्निपातपद्यानां
सत्तार्थवाचित्वात्, सर्वेऽप्यमी सत्तार्थमेवाविशेषेण ब्रुवते, सा च सत्ता पञ्चविवर्तत्वेनार्थैकत्वात् आह-
पञ्चविवर्तस्वर्गमपृथक्त्वात् सत्तायाः, आम्नातं सद्विशेषद्रव्यगुणकर्मवदर्थवतिपञ्चस्वुभयोपादानं वैशे-
षिकपक्षेणेनैतद्वायुक्तम्, यस्मात् हि द्रव्यादिषड्भेदादि पादसुपादानमिति गतार्थम्, किन्तु-
१० पादानम्, [१] उच्यते, अस्त्यादितुल्यार्थत्वेन, कुतो ज्ञायत इति चेत् सत्तार्थं इत्यविशेषेण वचनात्, अस्ति-
भवतिविद्यतिपद्यतिवर्ततयः सन्निपातपद्याः सत्तार्था इत्यविशेषेणोच्चरणात् सिद्धसेनसूरिणा, एवं
तावत्सन्निधिभवनं नास्त्येव, निरूपणानुपपत्तेः ।

आपश्चिमभवनमपि नास्ति कर्मेति चेत्—

यद्यपि चापश्चिमभवननिरूपणं प्रधानमेव भवति महदादिविकारापत्त्या, तेन किञ्च भूयते
१५ इति तदपि न, तस्यापि भाव्यमानत्वाभावविचारमन्तरेण भाव्यत्वानुपपत्तेः, अनाप्तमतत्वात् ।

(यद्यपि चेति) यद्यपि चापश्चिमभवननिरूपणं सांख्यैः क्रियत इति शेषः, प्रधानमेव भवति
महदादिविकारापत्त्या यस्मात्तेन किञ्च भूयत इति, इतिशब्दस्य हेत्वर्थत्वात्-महदादिभावमापद्यत
इत्यस्मात् कारणात् प्रधानमेव भवति तेनैव भूयते सत्त्वादिमयत्वादित्यस्येति, क्रियाध्याहारः क्षेपे, एवं
किञ्च तेषां मतमिति, स च क्षेपोऽनुपपन्नमानत्वात्, कथमिति चेदुच्यते तदपि न, तस्यापि भाव्यमा-
२० नत्वाभावविचारमन्तरेण भाव्यत्वानुपपत्तेः, सत एव [न] भवतीत्यर्थः, भाव्यमानत्वं वक्ष्यमाणोपपत्ति-
कत्वात् सिद्धम्, तयोस्त्वागृह्य द्वितीयेन व्यापारेणान्तरेण विना न प्रवर्तितुमर्हति, अनाप्तमतत्वात्, अना

ङ्गापि भवतीति सन्निधानात् तेषूपवर्णिता सत्यमुक्तमिति । यत्र चोत्स्यमानत्वाह–अस्त्यादीनामिति । अस्तीत्यादिमन्त्र-
सर्वेऽप्यमीति अस्त्यादिशब्दं विविधभवनार्थेन वाचीत्यवदेत इति भावः । ननु पक्षे यथा द्रव्यगुणकर्माणि विशेषाश्च
तथाऽथा विशेषौ पञ्चविवर्तवैशेषिकदर्शनाव्यत्वे–आम्नातमिति विरूपयेति स्वपक्ष सन्निधिभवननिरूपणानुपपत्त्यात्ववन्ति ।
१५ आपश्चिमभवनमपि सांख्योक्त निरस्यति–यद्यपीति अव्यक्तस्यात्मैव बन्धमापि महदादिभवनानन्तरात् अरर्वकस्य
तान्मात्रेण प्रधानमनुमेयम्, तच्च न यदि तस्य भाव्यत्वमन्तरेण भावविचारं नोपपद्यते इत्याह–तदपि नेति । प्रधान-
मेव महदादिना तेन तेन रूपेण परिणमत इत्येतावता सांख्यैरापश्चिमभवनमुक्तमिति दर्शयति–प्रधानमेवेति, तच्च
भाव्यत्वस्य प्रधानस्येति. भाव्यत्वं प्रवर्तमानत्वम्, तच्च कर्तारौ व्यापारौ तथा प्रवर्तितामन्तरेण न भाव्यत्वं
तथा प्रधानमपीति भावः । एतमेवाह–तयोरिति प्रधानं व्यापारो पैरुष्येण व्यापारेण विना न प्रवर्तितुमर्हति यतेन हि

---

१ सि. क. वर्तते । २ सि. क. युक्तम । ३ सि. क. पञ्चतोभवा । ४ सि क. सत्ता । ५ सि क.
भवनादि । ६ सि. क. महदादिभावमापद्यमानतया । सि. क. व्यापारान्तरेण ।

ममस्य च सन्निधिमात्रस्याऽऽपादितासत्त्वात्, तस्मादनापन्नस्य च सत एवापरस्याभावाद्युक्त्यापत्तिमवर्त्म नोपपद्यत इति ।

किं कारणमनुपपन्नमिति चेत्—

अस्वतन्त्रत्वात्, शब्दादिवत्, तस्मात्ततोऽन्यो भवति मुख्यः, कोऽसौ? यः कर्ता, कः कर्ता? यः स्वतन्त्रः प्रवर्तनवृत्तत्वात्, प्रवर्तयद्धि कारणं तद्भावमापद्यते सत्त्वादि, तथा- 5
भवनप्रवृत्तत्वात् तन्तुपटवत् ।

(अस्वतन्त्रत्वादिति) अस्वतन्त्रत्वात्, अस्वतन्त्रं हि तत् प्रधानाख्यमचेतनत्वात्, को दृष्टान्तः? शब्दादिवत्, यथा शब्दादयः सत्त्वरजस्तमोमयत्वा[द]स्वतन्त्राः तथात्मकेन प्रधानेन भाव्यतेऽन्येन व्यापृता अपि व्यापारयिता, तस्मात्ततोऽन्यो भवति मुख्यः, कोऽसौ? यः कर्ता, कः कर्ता? यः स्वतन्त्रः, कस्मात्? प्रवर्तनवृत्तत्वात्—प्रवर्तयतः क्रियाप्रवर्तनम्, तेन प्रवर्तनेन वृत्तत्वात्, प्रवर्तयितृत्वेन वृत्त- 10
त्वादित्यर्थः, प्रवर्तयद्धि कारणं तद्भावमापद्यते सत्त्वादि—यथा प्रवर्तयत् सत्त्वरजस्तमोलक्षणं कार्यं शब्दादिभावमापद्यते स्वमतेन तथाभवनप्रवृत्तत्वात्—तेन प्रवर्त्यमानरूपेण भवनं तेन प्रवृत्तत्वात् प्रवर्तयितारमन्तरेणाभवनात्[प्र]वृत्तत्वात् तन्तुपटवत्—यथा तन्तवः पटं प्रवर्तयन्तः पटस्य कारणमिष्यन्ते पटस्य तन्तुमयं तैः प्रवर्त्यत्वात् ।

नन्वेते प्रधानशब्दादिपटादिदृष्टान्ता अद्वैतवादं समर्थयन्तीति, उच्यते प्रवर्तयितृत्वमा- 15
त्रसाधर्म्यात्तदभ्युपगम्यते, अन्यथा विप्रुमयैकान्तोत्थानाभावात्, भाव्यभावकभेदप्रसिद्धेश्च, अणुधर्मादयोऽपि भाव्यमाना एव ।

(नन्वेत इति) नन्वेते प्रधानशब्दादिपटादिदृष्टान्ता अद्वैतवादं समर्थयन्तीति, उच्यते प्रवर्तयितृत्वमात्रसाधर्म्यात्तदभ्युपगम्यते तेन निदर्श्यते, अन्यथा पुरुषादिवदद्वैताभ्युपगमे विप्रुमये

तेन तेन रूपेण भवति तथैव प्रवर्तकम्, प्रधानस्तु व्यापृतत्वात्तथा तथा भावयत इति न तत्प्रवर्तयितुमर्हतीति भावः । 20
भाव्यत्वं कथमनुपपन्नं प्रधानस्य [illegible]—अस्वतन्त्रत्वादिति कर्तैव एव प्रवर्तकं मुख्यं गौणं तु प्रवर्तकमकर्तृकोऽपि स्यात्, अतो मुख्य इत्युक्तम् । कोऽसौ मुख्यः प्रवर्तक इत्यत आह—कोऽसाविति । ननु क्रियानिर्वर्तकत्वस्य कर्तृत्वं सर्वेषामस्तीति न तेन प्रधानादिव्यावृत्तिरित्याशङ्कते—कः कर्तेति । क्रियायां निर्वर्ती न कर्ता, स एव कर्तेत्याह—यः स्वतन्त्र इति । ननु [illegible] सर्वेषां कारकत्वात् [illegible] तर्हि [illegible] कस्मादिति, [illegible] प्रवर्तयिता भवति स एव कर्ता मुख्यः कर्ता [illegible]—प्रवर्तन- 25
वृत्तत्वादिति [illegible], [illegible] प्राह [illegible] भावः । यः प्रवर्तयिता स एव अप्रवर्त्यमानरूपेण भवति यथा प्रधानं शब्दादीनां प्रवर्तयितृ, अत एव तत् अप्रवर्त्यमान[illegible] भवति यथा प्रधानमपि [illegible]—प्रवर्तयतीति । यत् अप्रवर्त्यमानरूपेण भवति [illegible]—तथा भव- तीति । ननु [illegible] सर्वेषां प्रवर्तकत्वात् प्रवर्तयितृत्वेन [illegible] एव प्रधानतत्त्वा[illegible] प्रवर्तकत्वमिति [illegible]—नन्वेत इति । [illegible] उच्यत इति । प्रधानादीनां प्रवर्तयितृत्व- 30
मात्रेण [illegible] नेव भवेत्, पुरुषादिवत् [illegible]—

1 नि क. कन्पति ।

कान्योत्थानामभावात्, साध्यसाधनभेदप्रसिद्धेश्च, अभावितश्वासस्वादम्यासप्रभवात्, अणुधर्मादयोऽपि साध्यमाना एव सुरियोगस्यापर्यन्तप्रसङ्गाः प्रत्याख्यः ।

यद्येवं प्रस्तुतं धर्माधर्मोपचयो वा कारणमस्त्येवेति सिद्धत्वात् किमनुमितेन कारणेनेति चेत्तेदुच्यते—

धर्माधर्माण्वादीनामपि च तन्त्वश्वादिवत् प्रवर्तकः पूर्वपूर्वप्राकट्यतारतम्येनेश्वरः सन्निहि

5 तत्वशक्तिः प्रतिविशिष्टबुद्धिः स्वतन्त्रः तस्याभिप्रायेणैव प्रवृत्तिमापद्यन्ते धर्माधर्माण्वादयः, सोऽपि चाभिप्रायप्रवृत्त्यापत्तेर्न सन्निधिमात्रवृत्तिरतः प्रवर्तयिता, प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात्, विष्णुसत्त्वादीनामधिकृतपुरुषाणामिव प्रवर्तनम्, तस्यैव प्रवर्तयितृत्वात् ।

[धर्मा]धर्माण्वादीनामपि च तन्त्वश्वादिवदित्यादि यावत् प्रतिविशिष्टबुद्धिः, यथा पटस्तन्तुपूर्वकः, तन्तवोऽंशुपूर्वकाः, अंशवस्त्रुटिपूर्वकाः, त्रुटीनामपि प्रवर्तने सकः सूक्ष्मः पूर्वे पूर्वे

10 यावद्द्व्यणुकस्तुवोऽपि पूर्वे पूर्वे यावद्व्यणुकः परमाणुरित्यनुमीयते तथापि यावत् प्रधानम्, तथाऽण्वादीनामप्यचेतनानां प्रवर्तकौ धर्माधर्मौ, आदिग्रहणात् प्रत्यक्षमात्रनियमादिवाद्यन्तरपरिकल्पिता, एवं पूर्वपूर्वसन्ततारतम्येनेश्वरः सन्निहितशक्तिमत्सर्वशक्तिः, धर्माधर्माण्वादेः प्रधानकल्पस्येश्वरस्य विनियोजने सन्निहिता यस्य शक्तिः सोऽस्ति, कुतः तद्विषयविनियोगसमर्थज्ञानवत्त्वात् तस्येति चेदुच्यते—प्रतिविशिष्टा बुद्धि-रस्याऽसौ प्रतिविशिष्टबुद्धिः, विशिष्टबुद्धिभ्योऽपि अपरिच्छिन्नज्ञानादिभ्यः प्रतिकर्तुं विनियोजनप्रवृत्तिनिवृत्ति

15 विनियोगेषु प्रसवात् स्वातन्त्र्याच्च तेषां भावानामीष्टे, न ते तस्येशते, नाप्यासमानो न च परस्परम्, अथा-

न्यपरेति । यथान्तरोत्थाने वा प्रत्यु, किं न विवक्षितवान्—साध्येति साध्यं भावकमेवेति इदं परस्परमिदं प्रत्युक्तं चेत् अपि च तेऽपि भावक एव पुरुषः न च भाव्यमेव प्रधानादिर्वैषम्यम्, प्रधानादिः केनाप्यन्यतरस्यैव प्रवर्तमानवपेक्ष्यमाणा-दृष्टाद्यपेक्षस्यैव, पुरुषोऽप्यनन्यकर्तृत्वात् स्यात्, प्रवर्तकाभावात्, प्रवर्तकापेक्ष्यमाणमपीति भावः । तथा च अन्या-दृशोऽप्यचेतनत्वप्रसक्तिमता प्रधानेन यथा साध्यन्ते तदप्यनुपपन्नंस्योऽप्यचेतनत्वप्रसक्त्यमाना एवेति साध्यमानत्वाद्वये

20 प्रत्यायः तावन्नोपपन्ना इत्याह—अभिवृत्तीति । ननु प्रकृतिः परिणामिनी अनुमीयमानः अभिमतत्वसर्वसिद्धात्वधर्मादयः प्रधानं वा स्यात् किमनेनाभिधेय प्रवर्तयिता प्रयोजनमिह—धर्माधर्माण्वादीनामपीति अपि च प्रकृतिः प्रवर्तकत्वे चाभिप्रायत्वात् कथं तावदेव तदर्थं निरिति च विरुद्धम्, यथा तन्त्वादिकार्यकारणपरम्परा प्रत्यक्षे प्रधाने वैशेषिक-मतेऽपि निरतिशये कारणमात्रे यदा तदा कारणमात्रादौ वा तथैव प्रवर्तकत्वविशेषावस्थायामपि अविशिष्टमतं स्यात्, न च तावदपेक्ष्यात् तृण्योऽदृष्टधर्मादिविशेषवत्त्वेनाह—यद्येवेति । इत्यादिकमपिभ्यामात् न तु यथा विष्णु तावन्नवाभिमतत्वेनान्यः

25 प्रतिपत्त्यर्थं एव पुरुष इत्याह—कुत इति । धर्मादीनां द्वयकारणत्वाद् प्रकृतित्वात् तद्विषयविनियोगसमर्थविशेषज्ञानवत्त्वात्— प्रतिविशिष्टेति इतो प्रतिविशिष्टा न तन्त्वादिवत् विशिष्टा तेन इतरापेक्षी योगिज्ञानात् प्रकृत इतरापेक्षितत्त्वात्, योगिज्ञानं तन्मात्रसमर्थत्वात्, इत्यादीन प्रवर्तनादिविशेषत्वेनाप्रवृत्त्य प्रत्ययमात्रादिति भावः । तदपेक्षया-विशिष्टबुद्धिभ्योऽपीति । योगाभ्यासजन्यमपि प्रत्यक्षविशेषविशिष्टमाचारपरिज्ञानतात्पर्यमप्रत्ययादिति भाव । तत्परत्वेन तदनन्तरं विशिष्टत्वे प्रवर्तने निवर्तने विनियोगे च स एव समर्थो भवेत्तदाह—प्रतिकर्तुमिति । नन्वीदृशं ज्ञानं सर्वज्ञत्वमप्यापाद्य-

30 मन—स्वातन्त्र्याच्चेति देवदत्तादिवत् अनेकपुरुषं स्वातन्त्र्यम्, अनेकेषु स्वातन्त्र्यस्य प्रतिबन्धत्वात्, इत्यादिविस्वातन्त्र्यस्य च नयपरवेश्वरेषितत्वात्, सुखानामप्यनीशत्वात् अनीशत्वे वा दुःखिकारणपरिग्रहत्वात्, दुःखिनश्च एव तथाविधस्वातन्त्र्याद्यभावेऽपि ईश्वरस्य च सर्वेशत्वात् विफल्ये च अनीशत्वं न विनाशप्रतिबन्धादिति भावः । तत एवाह—तेषां भावानामिति किं प्रकृत्यादिविषयाभि-मानस्यैव तस्यैवेति भाव । अन्योऽपि नित्यः अणुप्रधानादयो योगस्य धर्माधर्मादयश्च तदुपलम्भव्यतिरेकेण न प्रवर्तयितुम-

१ सि क. °विकल्पनवद् । २ सि क. प्रवृत्तिविनियोगेषु ।

स्वतन्त्रत्वाभ्याम्, स तु मतिविशिष्टपुरुषत्वात् स्वतन्त्रः, तस्याभिप्रायेणैव प्रवृत्तिमापद्यन्ते धर्माधर्माण्वा-दयः, सोऽपि चाभिप्रायप्रवृत्त्यापत्तेन सन्निधिमात्रवृत्तिः, अचलेषां प्रवर्तयिता प्रवर्तयितृत्वात् कारणस-क्षिवत् स एव, तेषां सक्रियतामपि माध्यस्थेनास्वातन्त्र्यात् तस्यैव तत्—प्रवृत्तिनिवृत्तिविनियोगेषु स्वात-न्त्र्यात् जगत्सर्गस्थितिलयप्रक्रमप्रलयमहाप्रलयेषु प्रवर्तनम्, प्रागौदासीन्येन स्थितानां धर्मादीनां सृष्टेः प्रवर्त-नम्, प्रवृत्तानां पुनरुपसंहाराभिवर्तनम्, विनियोगो देवमानुषतैर्यग्योनसरित्समुद्रादिवत्सुकरणाद्यवयव 5
विभागविन्यासः, विष्णुसत्त्वादीनामधिकृतपुरुषाणामपीह परमेश्वराभिप्रायानुरोधेन प्रवर्तनम्, अधिकृत राजमानीयादिपुरुषाणामिव, तस्यैव प्रवर्तयितृत्वात् ।

इत्यस्य साधर्म्यप्रदर्शनार्थमाह—

अधिकृतपक्तृवत् सम्भवनधारणज्वलनविक्लेदनव्यापारेषु स्थालीकाष्ठतण्डुलादीनां प्रवृत्तिनिवृत्तिविनियोगेषु स्वातन्त्र्यात् सूपकारस्तस्तदात्मा प्रवर्तयितृप्रयोजनमात्रत्वात् 10 क्रियायाः, अथवा कर्तृकर्मकरणाधिकरणसम्प्रदानानि प्रतिकारकं पचादीनां क्रियामेवाऽथया-स्वशक्ति स्वातन्त्र्यात् कर्तॄणि, यथाधिकरण स्थाली सम्भवनधारणे कुर्वती पचतीत्युच्यते तथापि उपक्रमप्रभृत्यपवर्गपर्यवसानासु क्रियासु देवदत्तस्यैव स्वातन्त्र्यादुच्यते देवदत्त एव पचति तेन पच्यत इति ।

(अधिकृतपक्तृवदिति) अधिकृतपक्तृवत्, तद्व्याख्यामाह सम्भवनधारणेत्यादि यावत् 15 प्रयोजनमात्रत्वात् क्रियाया इति, यथा राज्ञा नियुक्तः सूपकारः स्थालीकाष्ठतण्डुलादीनां सम्भवनधारण-ज्वलनविक्लेदनव्यापारेषु प्रवृत्ति[निवृत्ति]विनियोगेषु स्वातन्त्र्यात् तदर्थारम्भा भवति तथेश्वरेणेति ।

तथा भवितुमर्हन्ति, किन्तु चेतनाभिप्रायानुसारेणैवेत्याह–तस्याभिप्रायानुसारेणैवेति । ईश्वरोऽपि धर्माधर्माद्यपेक्षः [illegible] तथा भविष्यति न तु [illegible] सन्निधिमात्रवृत्तित्वादित्याह–सोऽपि चेति । न च तत्सम्ब-न्धित् [illegible] कारणपरम्परया [illegible] तस्य [illegible] स एव 20 प्रवर्तयितेत्याह–अचलेषामिति । [illegible] एव प्रवर्तयिता । [illegible]–तेषामिति । तत्र हेतुमाह–प्रवृत्तीति । जगतः [illegible] प्रवर्तयतीत्याह–जगदिति । [illegible] धर्मादयो [illegible] न [illegible] प्रयोजनमस्ति [illegible]त्वात्, न हि कार्यं कारणं [illegible]ति, न च [illegible] इति वाच्यम्, [illegible] अत एवोक्त-[illegible]–प्रागिति । [illegible] 25 प्रवर्तयितेश्वरः धर्मादयस्तु कारणम् इति भावः । [illegible] प्रवृत्तानां [illegible] प्रवर्तयिता च [illegible]त्याह–प्रवृत्तानामिति । विनियोगविभागक्रममपि तस्यैवेत्याह–विनियोग इति । जगतः स्थितिसंहारकर्तृत्वेन [illegible] विष्णुमहेश्वरादयोऽपि [illegible] परमेश्वरस्य [illegible] प्रवर्तन्ते ते तस्यैव परमेश्वरस्य [illegible] परिकल्पितमूर्तयः [illegible]त्याह–विष्णुसत्त्वादीनामिति । राज्ञा नियुक्ताः पुरुषा यथा राज्ञोऽभिप्रायानुसारेण प्रवर्तन्ते तथेव [illegible] इति दृष्टान्तमाह–अधिकृतेति । दृष्टान्तान्तरमाह–अधिकृतपक्तृ- 30 वदिति । राजनियुक्तस्य सूपकारस्य स्थाल्यादिव्यापारेषु [illegible] स्वातन्त्र्येण [illegible] प्रवर्त-यितृप्रयोजनकत्वं तथा धर्माधर्माणुविन्यासादीनां [illegible] तदभिप्रायप्रतिनियत

---

१ सि. क. °पीडन । २ सि. क. प्रवर्तयतामपीह । ३ सि. क. तत्पदात्मा । ४ सि. क. °परेश्वर ।

अथ वा कर्तृकर्मकरणाधिकरणसम्प्रदानानि प्रतिकारकं पचादीनां क्रियाभेदापत्त्यास्ति स्वातन्त्र्यात् कर्तृणि यथाधिकरणं स्थाली निदर्शनमात्र सम्भवनधारणे कुर्वती पचतीत्युच्यते ज्वलनं कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते, अभिमतयोः कस्यचनतन्दुलकापनेयोपकर्षणादिक्रिया कुर्वन् देवदत्तः पचतीत्युच्यते, इत्यादि प्रतिकारकं स्वातन्त्र्ये सत्युपक्रमप्रभृत्यपवर्गपर्यवसानासु क्रियासु तस्यैव स्वातन्त्र्यात्,
5 सम्भवनादिप्रत्ययतायामपि पचनशक्तिमतामप्यधिकरणादीनां देवदत्तस्य प्रवर्तयितृत्वाद् बोध्यते देवदत्त एव पचतीति, मार्गोऽभीष्टपरत्वात्, तां मुख्यां कर्तृशक्तिं दर्शयति—येन पच्यते स्थाल्या कर्तृविहितया, स पचतीव प्रथमया तत्र विहितविभक्त्यसमानाधिकरणया ।

पुनरपि स्फुटीकरणार्थं व्यापित्वप्रदर्शनमार्थेन—

साक्षाद्वा भवितृत्वम्, यथा च सम्भवनधारणरोहणादिसमर्थभूमिम्युदकादिव्यापारितव्रीहि-
10 भवनप्रत्ययतायामपि व्रीहिर्भूयते, भवत्यन्तसन्निविष्टस्वातन्त्र्यात् तस्यैवेश्वरस्य प्रयोजकत्वा-दुच्यते भवती च भवतीति ।

(साक्षाद्वेति) साक्षाद्वा भवितृत्वम्, तत्कर्मेव यथा च सम्भवनेऽस्मिन् पावकुर्वती च भवतीति, न केवलं पचत्यादिव्यापारक्रियाविषयमेव प्रयोजकत्वात्, किं तर्हि ? भीत्यादिभवनाद्यन्तःक्रिया-

---

तेष्वपीति भावः । प्रकारान्तरेण व्याचष्टे—अथ वेति पचादीनां हि प्रतिकारकं क्रिया भिद्यते तद्वेतुत्व कर्मादीनां कर्तृत्वमपि
15 भवति स्वव्यापारे स्वातन्त्र्यात् सर्वेषामिति भावः । एतदेव निदर्शयति—यथाऽधिकरणमिति । स्थाली अधिकरणकारकं तदपि स्वव्यापारे कर्तृ भवति । तस्याः क्रियामभिधत्ते—सम्भवनेति सम्भवनं [illegible] धारणं तिरस्कार [illegible] धारणम् तत्कुर्वती स्थाली पचतीत्युच्यते, एवं एवाधिकरणस्य पाक [illegible] कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते [illegible] करणस्य पाक [illegible] कुर्वन्नेव देवदत्तः पचतीत्युच्यते अभिमतयोः [illegible] त्यक्त्वा [illegible], [illegible], [illegible] तत्र अपर्ण [illegible] [illegible]
20 [illegible] एतत्क्रिया प्रधानस्य कर्तुः पाक इति भावः । कारकप्रयोक्तृत्वमेव कर्तुः स्वातन्त्र्यं न त्वन्यो-पित्याह—उपक्रमप्रभृतीति । ननु [illegible] प्रधानं [illegible] परिकल्पितेऽस्तानां [illegible] न सर्वकारकाणामन्यतमा क्रिया यदि [illegible] तथा [illegible] [illegible] पचतीति प्रयुज्यते न प्रयोक्तृत्वविवक्षायामेव एव [illegible] [illegible] अन्यत्र तथैव पचतीति प्रत्ययानुपपत्तेरेव प्रयुज्यते [illegible]
25 [illegible] सम्भवनादिप्रत्ययतायामपीत्युक्तम् न [illegible] [illegible], क्रिया भवे-[illegible] न [illegible] निर्देष्टुमिति महाभाष्ये [illegible] [illegible] तथाऽन्यत्रलभ्यत इति सूचितम् । यथा [illegible] [illegible] [illegible] [illegible] देवदत्तादीत्याह—पचनेति । तत्र [illegible] [illegible] भावः ।
30 देवदत्तस्य मुख्यां कर्तृशक्तिं दर्शयति—तामिति अधिकरणादिस्मरणे यत् कर्ते वा कर्मणि वा कर्मकर्तरि वा प्रयोगान्तर्गता-विति भावः अन्यथापि व्याचष्टे—साक्षाद्वेति [illegible] [illegible] न भवति यथा तथा परमेश्वर एव [illegible] [illegible] भावः । यथा [illegible] भूम्यादिना व्रीहिभवनेऽपि [illegible] [illegible] न व्रीहिर्भवते तथैव भवते [illegible]

---

१ लि क भाव्यदीपरत्वात् ।

विषयमपि प्रयोजनं तथा भवत् पृथिव्युदकादिवत् व्रीह्यादिजायते भवतीत्यन्वयवचनम्, सम्भवमधारणसमर्था पृथिवी, रोहणसमर्थमुदकम्, पाकिमहणावर्तनसमर्था वायुकाशम, तैः कारितस्य व्रीह्यादिभवनस्य प्रत्यक्षवायामपि सत्यां व्रीह्यादिजायते भवत्यन्वयसम्भिविष्टस्वार्थम्याम् तस्यैवेश्वरस्य प्रयोजकत्वादुच्यते भवती च भवतीति–भवनमपि भवदेव भवतीति, स्वरूपमात्रप्रकाशोऽपि तद्वत्वादित्यर्थः ।

अथवा प्रस्तुतप्रधानकारणत्वादिसिद्धमेवेद निदर्शनम्—

सत्त्वतमःप्रकाशनियमप्रवृत्ती स एवेत्युक्तम्, इतरयोः स्थापयतीति वचनात्, रजस्तु प्रवृत्तिलक्षणमेव, विशेषतः सत्यपि प्रवृत्तिसामान्ये करोति प्रवर्तयतीति वचनात् प्रवृत्त्या रजोभवनवत् ।

सत्त्वतम'प्रकाशेत्यादि यावद्रजोभवनवत् यथार्थस्य सत्त्वस्य प्रकाशप्रवृत्तिस्तमसो नियमप्रवृत्तिर्भे स एवेत्युक्तम्, तत्र क्रमात्मना व्यवस्थितमान प्रवर्तमानमित्यादिपरस्परोपकारवीते 10 प्रकाशादिलक्षणस्य सत्त्वस्य प्रवृत्तिः गुरुवरणलक्षणस्य तमसः प्रवृत्तिर्यथासंख्यमितरयोः स्थापयतीति वचनात्, रजस्तु प्रवृत्तिलक्षणमेव प्रवृत्त्येकमिष्टं विशेषतः सत्यपि प्रवृत्तिसामान्ये करोति प्रवर्तयतीति वचनात्, यथाऽदृष्टाद्यादिमूलकामादिप्रवर्तमानसामान्येऽपि ईश्वर एव प्रवर्तयितृत्वात् कारणमिति ।

दृष्टान्तबाहुल्यप्रदर्शनं प्रतिसिद्धान्तपरिदृष्टादृष्टादेः प्रवर्तयितृत्वस्थापनार्थमिति स एव भवति सर्वव्यक्तिप्रवृत्त्यात्मकत्वात् तासामेव चास्याप्टमूर्तितोच्यते स्वशक्त्या व्यासरूपत्वात् 15 तासु स एव भवति सोऽसौ च ।

(दृष्टान्तेति) दृष्टान्तबाहुल्यप्रदर्शनं प्रतिसिद्धान्तपरिदृष्टादृष्टादेः प्रवर्तयितृत्वस्थापनार्थम्– सिद्धान्तं सिद्धान्तं प्रति प्रतिसिद्धान्तं तेषु तेषु वैशेषिकादिसिद्धान्तेषु कल्पितानां परितोऽनुमानैः दृष्टानामदृष्टाणुप्रधानविष्णुसत्त्वादीनां प्रवर्तयितेश्वर इति दार्ष्टान्तिकोपनयनात्, इति स एव भवति– इत्यमीश्वर एव भवति परमार्थतः सर्वव्यक्तिप्रवृत्त्यात्मकत्वात्–यथासौ व्यक्तीनां प्रवृत्तय आत्माऽस्य 20 सर्वाभिव्यक्तिप्रवृत्त्यात्मकः तद्विविधप्रवृत्तिरूपतया व्योमरूपत्वात्तस्यात्मा च तासाऽष्टमूर्तितोच्यते–क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्याख्याष्टमूर्तिताऽस्य स्वशक्त्या व्यासरूपत्वात्तासु स एव भवति सोऽसौ च ।

भिन्नेश्वर एवेत्याह–किं तर्हीति । तैः कारितस्येति पृथिव्यादिकारितत्वेन व्रीह्यादिभवनस्य प्रकाशकत्वेऽपीत्यर्थः । सांख्यमतेन रजोदृष्टान्तमाह–सत्त्वतम इति सत्त्वतमसोरपि प्रकाशनियमयो प्रवृत्तिः पूर्वमुक्ता तथा च तत्प्रवृत्ति प्रति तेषां समर्थ्योऽपि प्रवृत्तिमात्र एव एव हेतुः प्रवृत्तिलक्षणत्वादस्य तथाऽदृष्टादीनां प्रवर्तकत्वेऽपि सर्वेषां प्रवर्तयितृत्वादीश्वर एव 25 कारणमिति भावः । सत्त्वं क्रमात्मना व्यवस्थितमानं प्रकाशादितरयोः स्थापयतीति पूर्वोक्तिं स्मारयति–स एवेत्युक्तमिति, अनेकदृष्टान्तप्रदर्शनस्य प्रयोजनमाचष्टे–दृष्टान्तेति प्रवर्तयितृत्वेन तत्तद्दर्शनप्रसिद्धानामदृष्टादीनां न मुख्यं प्रवर्तयितृत्वमपि तु प्रवर्तनम् तेषामपीश्वराप्रवर्तकत्वात्, तस्मादीश्वर एव मुख्यः प्रवर्तयितेति भावः । प्रवर्तकत्वेनास्य किंचित् प्रतीतेरात्म आत्मभूतोऽसौ भवत्यात्मा परमात्मेति भवति विविधबुद्धिरूपव्यक्तिरूपत्वेन सर्वेण व्याप्तत्वादित्याशयेनाह–इत्यमीश्वर एवेति । प्रवृत्त्यात्मकतया व्यक्तिप्रवृत्त्यात्मकः प्रतिरूप प्रवर्तयितृत्वादेव सर्वेषां शरीरत्वमुक्तं प्रकाशयन्नाह–तस्यात्मैव चेति । स एव तदत 30

1 सि क. °भवनवत् । 2 सि क. प्रायभवनात् । 3 सि क आरेत्युक्तम् । 4 सि क. प्रवर्तमान । 5 सि क. सत्त्वस्य । 6 सि क. °बाहुल्यप्रदर्श । 7 सि क दृष्टीनां । 8 सि क. इति । 9 सि क तत्सदृ स्यात्मानमेव वा ।

क्रियाण्यत् प्रवृत्तिफलोत्कर्षा[पकर्ष]भावप्रसङ्गादीश्वर एव कारणम्, नादृष्टमपि न प्रधाना-दीत्येव आह—

इतरथा यथादृष्टयोः प्रधानादेर्वा प्रवृत्तयः फलानि वा स्युः तर्हि तयोः स्वानुरूपकार्य-कारणानुबन्धसामर्थ्याभ्युपगमादुत्कर्षापकर्षाभावप्रसङ्गः परस्परानुरूपशालिबीजाङ्कुरादिहेतु
5 कार्यभावश्च भवेत्, दृष्टौ च तौ, ततो नान्यदस्ति कारणमीश्वरकामचारेरणादृते।

इतरथेत्यादि यावद् दृष्टौ च तौ, यथादृष्टयोः प्रधानादेर्वा प्रवृत्तयः फलानि वा स्युः क्रियाणां पूर्वकृतकर्मफलप्रेरितानां तदनुरूपत्वात् फलानां च फलप्रेरितकर्मानुरूपत्वात् मनुष्यनिर्वर्तनीया एव समा-यमार्जवादिक्रियाः कृत्वा मनुष्य एव पुनरपि स्यात्, मा भूत् सरागसंयमादिदेवगतिनिर्वर्तनीयक्रिया सम्बन्धी तदनुरूपवैक्रियशरीरादिफलाभ्युत्कर्षभावः, तथा बह्वारम्भपरिग्रहादिनिरयायुःसंवर्तनीयकर्मणा
10 तदनुरूपदुःखैकरससमारम्भनिरयफलानुभावी च मा भूत्, परस्परानुरूपशालिबीजाङ्कुरादिहेतुकार्यभा-वमप्यभवात्, [1]विशिष्टबुद्धिमत्प्रकारणभेदाभावात् स्वानुरूपकार्यकारणानुबन्धसामर्थ्याभ्युपगमाच नात्यात्म प्रधानादेर्वैषम्यं स्यात्, दृष्टेषु वैषम्यमध्ययनविपाऽऽगमानामधिगमादुत्कर्षापकर्षयोः [2]नान्यदतो विमर्देनम कारणमतीश्वरकामचारेरणादृते—तदभिप्रायसम्प्रतिपातस्य प्रवृत्तिः कामचारः, तेन प्रेरणं

दृष्टेन प्रवर्तनात्—तादृशीति। वैषम्य [illegible]माह—इतरथेति। कार्यकारणभावो हि तत्स्वभावेन
15 यथा यथादृष्टयोः प्रधानादेर्वा सम्बन्धीत्यत्र [illegible] तथैव कार्यकारण[illegible] मनुष्यकर्मण्यापादिते मनुष्य एव भवति मनुष्याच्च मनुष्यकर्मण्यापादितेन भवतीति [illegible] न स्यादेव तथा मनुष्येऽप्येकस्मिन् कस्मिंश्चित् [illegible] [illegible] तिर्यगादिषु [illegible] वैषम्यं न भवेत्, दृश्यते च वैषम्यम्, तत्र च नान्यत् कारणं [illegible] ईश्वर एव [illegible] कारणमिति भाव.। एतदेव स्फुटयति—यथादृष्टयोरिति। क्रियाणामिति [illegible] क्रियाणां [illegible] फलानां च फलप्रेरितकर्मानुरूपत्वेति [illegible] दर्शितम्। तथा च किं भवतीत्यत आह मनुष्येति। मनुष्यायुष्क [illegible]
20 रिया। समासमार्जवस्य [illegible] [illegible] [illegible] [illegible] [illegible] बह्वारम्भपरिग्रहत्वादेव प्रवृत्तम्। [illegible] देवायुषो [illegible] न सम्भव इत्याह मा भूदिति सरागसंयमो देवगतीति [illegible] [illegible] [illegible] सम्बन्ध इत्यादयो देवायुर्बन्धा क्रिया वैक्रियशरीरादिफलभव न भवेदिति भावः। नारकायुर्बन्धक्रिया [illegible] न भवे-दुरित्याह—तथा बह्वारम्भेति [illegible] [illegible] च नरकायुष [illegible] भवति [illegible]
25 भाव। तत्र दृष्टान्तं दर्शयति परस्परेति शालिबीजाङ्कुरयो परस्परं [illegible]। कार्यकारणभावे [illegible] शालिबीजात् [illegible] एव भवति, [illegible]। [illegible] इत्याह विशिष्टबुद्धीति विशिष्टा बुद्धिर्यस्य [illegible] [illegible] तस्य [illegible]। [illegible] कार्यकारणभावस्य सामर्थ्यमाह—स्वानुरूपेति। वैषम्यं च [illegible]—दृष्टेति। [illegible] [illegible] [illegible] [illegible] वैषम्यं [illegible] इत्यर्थः। तत्र [illegible] ईश्वर एव कारणमित्याह—नान्यदत इति। तेन [illegible] [illegible]
30 [illegible] [illegible] [illegible] कामचार [illegible] कामचारेरणेत्यर्थः तदभिप्रायस्येति। [illegible]-[illegible] [illegible] [illegible] [illegible] तदा तथा [illegible] [illegible] च [illegible]—[illegible]

१ सि क. विशिष्टविशिष्ट । २ सि क. दृष्टान्ते । ३ सि. क. अन्यदतो ।

मातानां प्रवर्तन स्वाचाराणामप्यनिष्टफलसम्बन्धो दुराचाराणामिष्टफलसम्बन्धः, तस्मात् स्वमीश्वरप्रवर्तित प्रवर्तते नान्यथा ।

प्रयोगश्च—

तनुकरणभुवनसाधनायादृष्टप्रधानकालादिप्रेरितानि परमाणुसत्त्वभूतादीनि विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्ते, सम्भूयैकार्यकारित्वात्, तक्षाधिष्ठितरथदारुगणवत् तथाऽचेतन- 5
त्वात्, अयथा स्थित्वा प्रवृत्तस्तुर्यादिवत् ।

तनुकरणभुवनसाधनायेत्यादि यावत्तक्षाधिष्ठितरथदारुगणवदिति, यथायथमपि शरीरेन्द्रियाणि भुवनञ्च साधयितुमधितिष्ठद्भिः अदृष्टैः प्रेरिताः परमाणवो वैशेषिकाणाम्, प्रभूतानि सत्त्वादीनि प्रधानेन सांख्यानाम्, अन्येषाञ्च भूतानि कालस्वभावनियत्यधिष्ठितानि, इत्यभिमतानि प्रवर्त्यानि
प्रवर्तमानानि विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्त इति प्रतिज्ञा, सम्भूयैकार्यकारित्वादिति हेतुः, 10
सम्भूयकारिणः पूर्वपूर्वसन्तानसम्बन्धकारणानुमानात्केः परमाणुसत्त्वाद्यः तन्मात्रत्वेनावस्थिताः परस्परेण सम्भूय गमनाद्यवयवारम्भसुखदुःखानुभवरूपाणुपलम्भविषयसत्त्वगणाधारतादिकार्य कुर्वन्तो दृश्यन्ते
तत्सिद्धमेषां सम्भूयैकार्यकारित्वम्, तक्षाधिष्ठितरथदारुगणवत्—रथार्थो दारुसङ्घातो [रथ] दारुगणः
स यथा विशिष्टचेतनेनाधिष्ठितस्तथैतानि, तथा तेऽचेतनत्वात्, तथेति, तस्यामेव प्रतिज्ञायामचेतनत्वा-
दित्युपनयहेतुः, स एव रथदारुगणो दृष्टान्तः, अन्यथाऽयो वा तुर्यादिवदिति, तनुकरणभुवनानामचेतनत्व 15

पणामर्थापत्ति । चेतनकर्तृत्वाभावेऽपि स्त्रीणामाचारमपि तदन्यचेष्टाकर्तृत्वानुष्ठितानामित्यर्थः । यथा लोके सदाचारिष्वमनिष्टं दुराचारेष्वपि इष्टं दुराचारित्वमिति दुराचारितं दृश्यते तदीश्वरप्रवर्तनमेवेति भावः । ईश्वरसाधकं तदनुमानमाह्वयति-तनुरिति तनु शरीरं करणमिन्द्रियाणि भुवनं लोकः एतेषां निष्पत्तये अदृष्टादिभिः प्रेरितानि परमाण्वादीनि
विशिष्टचेतनाधिष्ठितानि सन्ति प्रवर्तन्ते इति प्रतिज्ञार्थः अत्र तन्वादीनीति पक्षमुखं परमाण्वादीनीति परिणामिकारणमुपादान-
कारणं वापतिमवगमुखम्, अदृष्टादीन्यपेक्षाकारणमुखम्, विशिष्टचेतनाधिष्ठितत्वं साध्यम्, विशिष्टचेतनश्च निमित्तकारणं 20
सन्निधिमात्रं प्रवर्तकमुखम् । अदृष्टैरिति परमाण्वाद्यारम्भस्य कर्मण पुरुषकर्मापेक्ष ईश्वरो निमित्तकारणम् तस्मिन्नवा प्रवर्तमानोऽप्यचेतनं वस्तुभावमनुविधीयमानं धर्माधर्मसहकारी यद्येनैव नियतं तेन न स्वातन्त्र्यवती निरपेक्षत्वात्साध्यमिति
चैतन्यमैश्वर्याद्विशेषा आपादकमात्राणीति वैशेषिकम् । प्रभूतानीति योऽयमयं प्रधानं प्रभूतानि सत्त्वादीन्यपि
विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्ते अन्यथा साम्यावस्थाविरोधिनी प्रवृत्तिरिति भावः । अन्येषाञ्चेति कालादीन्येतानि एव
भूतानि तन्वादीन् साधयन्तीत्यनुपपन्नानामचेतनत्वादितरैर्विना नैव प्रवृत्तिरिति भावः । साधनमाह—सम्भूयेति । परमाण्वादयो 25
मिलिताः सन्त एककार्यं कुर्वन्ति वा एककर्तृत्वे एव ते विशिष्टचेतनाधिष्ठिता न चैकं निमित्तकारणमीति स्यादेव कृतं कार्यारम्भ
कार्यम्, तत्र तथैव रथदारूणामपि कार्यत्वम् तदेवं सम्भूयकारित्वमनुमानस्य तत्राऽपि कर्तृत्वेन तन्मात्रवतश्चाऽन्यसम्भूय
कारित्वस्थिती तत्रापि कर्तृत्वेन तथाविधकारणनिमित्तेन यावत् परमाणुसत्त्वादि सम्भूयकारित्वात् नीयते इति परमाणुसत्त्वादीनां सम्भूयकारित्वं विवृणोति—सम्भूयकारिण इति । तेनाभ्यासमाह—गमनेति गमनं तन्वीकरणमेवेन्द्रियादिकार्यम्,
अवयवारम्भं गमनं कार्यमिदकार्यम्, सुखदुःखानुभवो मनसः स्वप्रत्युत्पन्नविषयप्राप्तिः सत्त्वगणाधारता अनिपातकता भुव 30
नस्य । दृष्टान्तमाह—तक्षेति । यथा दारूणि रथारम्भे वा कुटिलता तक्षाधिष्ठितमचेतनत्वात् प्रवर्तन्ते तथा परमाण्वादयोऽपीति
पूर्वपक्षिन्यायेन हेत्वन्तरमाह—तथा त इति त परमाणुसत्त्वादयस्तथा विशिष्टचेतनाधिष्ठिता इत्यर्थः । साधनान्तरमाह—

1 सि क. सम्भूयकारित्वं । 2 सि. क. प्रभूताः ।

सिद्धम् । अथवा स्थित्वा प्रवृत्तेस्तुर्यादिवत्, यथा तुरीवेमशलाकानलिकाकरणचक्रनलिकासूत्रादीनि प्राग्-प्रवृत्तानि कञ्चित्कालं स्थित्वा [प्र] वर्तमानानि विधिप्रवृत्तिमत्पुरुषाधिष्ठितानि पटनिष्पत्तये प्रवर्तन्ते तदनुकरणभुवनानि तथेति ।

चेतनानधिष्ठितक्षीरदधिमेघादिवदनेकान्त इति चेन्न, अदृष्टकर्तृकत्वविषयप्रतिज्ञार्थाव्य-
5 तिरेकात्, शब्दानित्यत्वसाधने प्रतिज्ञानुनीततद्विभिन्नानित्यत्ववत् ।

(चेतनेति) चेतना[न]धिष्ठितक्षीरदधिमेघादिवदनेकान्त इति चेत्—आत्मनत प्रतिविहि-तपुरुषा केनचिदनधिष्ठितेषु क्षीरदधिमेघादिषु संभूयैककार्यकारित्वाचेतनत्वस्थित्वाप्रवृत्तिधर्माणां दर्शना-दनेकान्तिकता संभवहेतुत्वेनेति न, अदृष्टकर्तृकत्वविषयप्रतिज्ञार्थाव्यतिरेकात्, अदृष्टोऽस्याः कर्ता विषयः सेयमदृष्टकर्तृकविषया प्रतिज्ञा, तस्याः प्रतिज्ञायास्तदनुकरणभुवनधर्मिकायाः प्रतिविधिसिद्धपुरुषाधिष्ठि-
10 तत्वसाध्यधर्मणः क्षीरदधिमेघादिधर्मिणामपृथग्भूतत्वात् प्रतिज्ञान्तःपातित्वाद्विपक्षाभावे हेतुव्यभिचाराभावा-दनेकान्तः, शब्दानित्यत्वसाधने प्रतिज्ञानुनीततद्विभिन्नानित्यत्ववत्, यथाऽनित्यः शब्द इति प्रतिज्ञाते कृतकत्व हेतावाकाशस्यानन्तरं वेगविभक्ते पुरुषादिभेदेन पानवरते सामित्वे च दृष्टत्वादनेकान्त इति चेन्न तदाभाससंभूर्णस्याविशिष्टानामप्युपादानमेवमित्यर्थां शब्द इति श्रोत्रग्राह्यत्वाभेदेन प्रतिज्ञा-यामेव शब्दत्वानतिक्रमात् पक्षान्तर्भावित्वात् तदनित्यत्वं कृतकत्वाविनाभावि, शब्दान्यस्य नित्यस्य
15 कृतकस्यादर्शनाच, वायवे वेगकालोपादानभेदभिन्नस्यापि सत्युपलभ्यधर्मणोऽनुपलभ्यत्वात्सर्व-व्यक्तिधर्मित्वाच चानुत्तरत्वं तस्मादनुत्तरमिति ।

स्थित्वाप्रवृत्तिचेतनानधिष्ठितेश्वरवदनेकान्तः, ईश्वरस्य वा चेतनाधिष्ठितता स्थित्वा प्रवृत्तेरदृष्टाणुप्रधानादिवत्तोऽनवस्था स्यादिति चेन्न, चेतनाधिष्ठितप्रवृत्तिमत्त्वसाध्यधर्मत्वात् ।

अथ चेति यत् स्थित्वाप्रवृत्तत्वमप्यपरस्य प्रवृत्ते तद्विशिष्टस्य चेतनाधिष्ठितं तत्र, यथा नादौ [illegible] प्रवर्तते न स्थित्वा
20 परमाण्वादि [illegible] भावार्थ । तत्र हेतोर्व्यभिचारमाशङ्कते—चेतनेति क्षीरस्य दधिभवनम् परमाण्वादीनां मेघादि भवनं चेतनानधिष्ठितमेव दृष्टं तत्र [illegible] क्षीरादिषु हेतो [illegible] व्यभिचार इति भावः । [illegible] [illegible] [illegible] प्रतिबद्धचेतनकर्तृकत्व [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न हि [illegible] सिद्धम्, न वा कर्तुं [illegible] भाव [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
25 चोदयति—अदृष्टेति । अदृष्टकर्तृकत्वेन तन्वादीनामिव क्षीरादीनामपि प्रतिज्ञान्तर्भावात्ततो न व्यभिचार इत्याह—तस्या इति । अस्यार्थे दृष्टान्तमाह—शब्देति । अनित्य शब्द कृतकत्वादिति प्रयोगे [illegible] [illegible] निरन्तरं [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति तदिदं [illegible] यदि [illegible] [illegible] [illegible] अपि तु [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भाव । [illegible]—वेगेति । [illegible] [illegible] [illegible] दर्शितम्, पुरुषेति [illegible] च भिन्ने
30 कृतकत्वं दर्शितम्, तदेव पक्ष इति कृतकत्वमनैकान्तिकमिति भाव । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति प्रतिज्ञायामन्तर्भूतत्वेनानित्यत्वं कृतकत्वाविनाभाव्येवेति भावः । तस्मात् [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] तस्मादनुत्तरमिति भावः । प्रकारान्तरेण व्यभिचारमभ्यस्य [illegible]-स्थित्वेति चेतनाधिष्ठितत्वे साध्ये स्थित्वा प्रवृत्तेरिति हेतुरीश्वरेऽनैकान्तिक ईश्वरस्य स्थित्वा प्रवृत्तित्वात्, [illegible]

१–२ सि क. [illegible] । ३ सि क. [illegible] । ४ सि क. [illegible] । ५ सि.क. [illegible] ।

(स्थित्वेति) स्थित्वाप्रवृत्तिचेतनानधिष्ठितेश्वरस्यानेकान्त इति चेत्—स्यान्मतं यथेश्वरः स्वयं प्रागप्रवृत्तः स्थित्वा प्रवर्तमानमपि चेतनान्तरेणानधिष्ठितः प्रवर्तते तथा तन्त्वादीनि स्थित्वा प्रवृत्तानि स्युरित्यनेकान्तः, ईश्वरस्य वा चेतनाधिष्ठि[त]त्वेऽपि, एवमनैकान्तिकत्वमिच्छायां वा चेतनाधिष्ठितोऽसावीश्वरः प्रसक्तः, स्थित्वा प्रवृत्तेः, तन्त्वणुप्रधानादिवत्सोऽप्यन्येश्वरतः, तदधिष्ठितश्चापुरुषादिव तस्यापि चाधिष्ठातुरन्याधिष्ठितत्वेऽनवस्था स्यादित्येतच्च न, चेतनाधिष्ठितप्रवृत्ति[म]त्त्वसाध्यधर्मत्वात्, नैष दोषः, चेतनाधिष्ठितप्रवृत्ति[म]त्त्वं हि साध्यते धर्मः, स चाचेतनमेव तद्धर्मिविषयत्वात्, चेतनानां स्थितत्वात् प्रयोजनाभावाच्च, तनुकरणभुवनसाधनप्रवृत्तात्तन्त्वणुप्रधानानि ह्यचेतनानि धर्मीणि चेतनाधिष्ठित[प्रवृत्तिमत्]त्वधर्मेण विशिष्टानि साध्यन्त इति प्रतिज्ञाविषयत्वानानैकान्तदोष इति ।

देवदत्तादेस्तर्हि चेतनेश्वराधिष्ठानं न प्राप्नोति, इष्यते च त्वया चेतनानामपीश्वराधिष्ठानम्, यथा पुरुषवादनिरसनाय—'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ॥ इति (महाभारते वनपर्वे अ० ३० श्लो० २८) चेन्न, प्राण्यदिदृष्टबुद्धिचेतनप्रतिज्ञानात्, विशिष्टबुद्धित्वमपि वास्यादीनामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात् स्वपतिवत् ।

(देवदत्तादेरिति) देवदत्तादेस्तर्हि चेतनेश्वराधिष्ठानं न प्राप्नोति, ततो देवदत्तादिकचेतनानधिष्ठितानि तन्त्वादिसाधनमार्गात्तन्त्वणुप्रधानादीनीत्यनेकान्तः, सोऽपि चेश्वरस्य चेतनान्तराधिष्ठित इति प्राप्तम्, इष्यते च त्वया—इष्यत एव त्वया चेतनानामपीश्वराधिष्ठानम्, यथा 'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ॥ (महाभार० वन० अ० ३० श्लो० २८) पुरुषवादनिरसनायेति श्लोकवचनप्रयोजनमाह—मा भूत् पुरुषस्य स्वकारणत्वप्रसङ्गस्तत्र स्वामात्र तन्त्वदृष्टप्रधानाण्वादीति, अत एव भवता 'अज्ञो जन्तुरनीशोऽय'मिति, अत्रोच्यते न प्राणि-

प्रतिविशिष्टत्वाच्च यदि तस्यापि चेतनस्यान्येनाधिष्ठितत्वमिष्यते तर्हि तस्याप्यन्यस्य चेतनस्येतरचेतनेनाधिष्ठितत्वं [illegible] प्रसज्यते तस्याप्यपरचैतन्यस्येति परिहर्तुमिच्छवः । एवमेव व्याचष्टे—स्यान्मतमिति । अनवस्थां दर्शयति—एवमिति । व्याचष्टे—चेतनेति । चेतनाधिष्ठितप्रवृत्तिमत्त्वं हि साध्यम्, न तु चेतनान्तराधिष्ठितप्रवृत्तिमत्त्वम्, तथा च चेतनाधिष्ठितप्रवृत्तिमत्त्वधर्मोऽचेतन एवाऽऽयाति न तु चेतने, तत्र चेतनान्तराधिष्ठितप्रवृत्तिमत्त्वमेव प्रसङ्गात् अतश्च साध्यधर्मोऽचेतनपक्षव्यतिरेकेण कल्प्यते, न तु चेतनता प्राप्ता तस्य चेतनाधिष्ठितत्वस्य स्थितत्वात् तत्त्वादेः प्रयोजनाभावात् एवं चेतनाधिष्ठितप्रवृत्तिमत्त्वविशिष्टाचेतनस्यैव प्रतिज्ञाविषयत्वादिति भावः । पूर्वोक्तिरनुमानेनाचेतनप्रवृत्त्यधिष्ठातृत्वेनेश्वरसिद्धावपि चेतनानामधिष्ठातृत्वात् तत्रापि चेतनानां प्रवृत्तिर्न चेश्वराधिष्ठितेति त्वदभ्युपगमविरोधः चेतनप्रवृत्तीनामपीश्वराधिष्ठितत्वाभ्युपगमात्तदाह—देवदत्तादेरिति । देवदत्तादय इत्यचेतनाद्यधिकारणोऽपि चेतनाधिष्ठिता इत्युः चेतनप्रवृत्तीनामपीश्वराधिष्ठितत्वे ईश्वरस्यापि चेतनान्तरेणाधिष्ठितत्वं स्यादित्यनवस्थेत्याह—तत इति । चेतनाचेतनानामीश्वराधिष्ठितत्वे पुराणवाक्यमुदाहरति—यथा इति, प्राणी तथाविधा सतामपि सुख-दुःखभवयोग्यपरिज्ञानात् स्वतःप्रतिपत्तिविरहेण तत्कर्माधीना ईश्वरेण प्रेरित सन् निजकर्मानुरूपं स्वर्गं सुखानुभवयोग्यं नरकं वा दुःखानुभवयोग्यं गतिविशेषं प्राप्नोतीत्यर्थः । वाक्येनं पुरुषस्यैव स्वार्थकत्वमिति मतं प्रस्तावयन्नाह—पुरुषवादनिरासायेति । व्याचष्टे—अत्रोच्यत इति, विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्त इति हि पूर्वं प्रतिज्ञातं न तु चेतनाधिष्ठितान्येव प्रवर्तन्त इति चेतनो विशिष्टश्चायमयमीश्वरस्तत्त्वानेवेति दर्शयति—प्राणीति ।

१ सि क. चक्षेव । २ सि क. देवदत्तादेस्तर्हि । ३ सि क. प्रधानादीनाम । ४–५ सि क अज्ञो ।

शिष्टबुद्धिचेतनप्रतिज्ञानात्–प्रागस्माभिर्निर्दिष्टेयं विशिष्टबुद्धिमत्पूर्वकत्वमिति तन्वादीनीति, विशिष्टबुद्धिश्च व्यापारधीनं सार्वज्ञ्यम्, कुतः सिद्धमिति चेदुच्यते–विशिष्टबुद्धित्वमपि वास्यार्थानामर्थक्रियायोग्यत्वेन सन्निवेशवत्त्वात् तन्वादीनि विशिष्टबुद्धिपूर्वकाणि, अर्थक्रियायोग्यत्वेन सन्निविष्टावयवत्वात्, स्नान-गमनशयनासनाद्याधारभोग्यानि हि तन्वादिषु क्रियन्ते, तत्क्रियायोग्यावयवसन्निवेशात्, स्थपतिबुद्धि-
5 पूर्वकप्रासादवत्, यस्मादर्थक्रियायोग्यत्वेनावयवानां सन्निवेशकः स स्थपतिवत् तस्माच्च विशिष्टबुद्धिरिति ।

अनैकान्तिकत्वोद्भावनार्थमाह—

तन्वादीनि स्वभावेनैव प्रवृत्तानि न तु केनचिद्विशिष्टबुद्धिना, नीलोत्पलनालकण्टकमयूरचन्द्रिकादिवदिति चेन्न क्षीरदधिमेघादिवदुक्तोत्तरत्वात् ।

तन्वादीनीत्यादि यावन्नीलोत्पलनालकण्टकमयूरचन्द्रिकादिवदिति, नहि प्रत्यक्षानुमानवर्णगन्ध-
10 रसस्पर्शस्य अत्यन्तनियमस्य अवयवसंनिवेशस्य कण्टकस्य मृदुत्वपादोपभोगसाधनभूतस्य लोके केनचित् अनुपपत्या मा भूदिति कर्तेति कण्टकाः कृताः, नीलोत्पलनालादिष्वतिप्रसङ्गात्, न च मयूरचन्द्रिका-स्वभिन्नरूपवर्णप्रतिसर्गविचित्रिता कृता कुड्यादिषु चित्रकारेणेव केनचिद्विशिष्टबुद्धिना, चित्रकर-चेतनत्वानामभावप्रसङ्गादित्यभिप्रेत्योच्यते, न, क्षीरदधिमेघादिवदुक्तोत्तरत्वात्, क्षीरदधिमेघादिवत् पद्मना-लकण्टकमयूरचन्द्रिकादीनां तन्वादिवद्बुद्धिमत्कर्तृकत्वपक्षप्रविष्टानां व्यतिरेकाभावेनैकान्तिकत्वाभाव इत्युक्तो-
15 त्तरमेतत्, एवं तावत् सामान्येन विशिष्टबुद्धिपूर्वकत्वोक्ता ।

प्रस्तुतक्रमविभ्रमव्यपेक्षया चैव प्रतिज्ञायते—

लघुमध्यमप्रवृत्तिगुरुस्मरणनियमादयः परस्परप्रत्यनीकाः विशिष्टबुद्धिपूर्वकाः संहत्यैकार्थ-कारित्वात् पाचकाधिष्ठितानलोदकौदनसाधनवदिति ।

इत्थं चातेर्म्यं तत्र इत्य विवक्षितात्मक तन्वादये–कुत इति । विशिष्टबुद्धित्वमपीति तन्वादिष्वनर्थक्रियाव –प्रति-निमित्तयोगार्थक्रियायोग्यत्वैकावयवानां संयोजनं कर्तृविशिष्टबुद्धिचेतनव्यतिरेकेण न सम्भवति नहि स्थपत्यभावे प्रासादसम्भव
20 तदर्थक्रियायोग्यतया वयवसंनिवेशप्रासादावयवसंनिवेशः कुड्यतदाकारविरचनं सम्भवति तस्मादस्ति तस्य तादृशी विशिष्ट-बुद्धिरिति स एव चेतनात्मेश्वराधिष्ठातेश्वर इति भावः । तन्वादीनां विशिष्टबुद्धिपूर्वकत्वं साधयति–तन्वादीनीति । ननु स्वभावतः कण्टकतैक्ष्ण्यमयूरचित्रकर्मविचित्रतादयो न केनापि कृता दृश्यन्ते किन्तु स्वभावत एव भवन्ति तथा तन्वादयोऽपि स्वभावत एव भव-न्तीति विशिष्टबुद्धिपूर्वकत्वाभावेन नैकान्तिकत्वमनैकान्तिकत्वमिति चेदत्राह–तन्वादीनीति तन्वादयः स्वभावतः प्रवर्तन्ते चेत्तन्वादयस्तथा-नवधारितेति प्रसङ्गेन । न हीति नहि स्वभावत केनचित् कण्टकाः कृताः मा भूदिति पादविभेदनमिति तत्कल्प । यदि
25 केनचित्कृतार्थाः नीलोत्पलस्य कुतो न कण्टकाः कृताः स्यात्–नीलोत्पलेति । कुड्यादिषु चित्रकारेण यथा विचित्रवर्णता क्रियते नहि तथा केनचिद्विशिष्टबुद्धिना मयूरचन्द्रिकादिविचित्रवर्णता कृतेत्यत आह–न चेति । यदि तथा विचित्रवर्णता केनचित् कृता तर्हि चित्रकारेण यथा चित्रे मयूराद्यैकत्वं न भवति तथा तेनापि मयूराद्यैकत्वं न स्यात् सातिशयत्वेनाह–चित्रकरे-ति । अन्यथा क्षीरेति स्वभावत एव यदि भवेत् तर्हि दध्यादिरूपेणापि नापेक्षेत तदर्थमपि स्वभावतः हुतभुक्त्वाद्, न हि तदर्थं क्षीरमवतीर्य यत्न दधिभावादिकरणापेक्षयैव क्षीरादेर्विपरिणामः भवति इति चेत्तर्हि विशिष्टबुद्धयधिष्ठितत्वेन क्षीरादि दधि-
30 भावमापद्यते इत्येतदर्थोऽभिमते विशिष्टकत्वाभावात्, कर्ता न दृश्यत इति चेत्र उक्तेन कारणेन कारणं मतत्वाभिमतम् तत्कार्यकर्तृ-कत्वेन क्षीरादवपि प्रतिज्ञातव्यमेवेति भावः । पुरुषार्थत्वेन प्रवर्तमानानां तत्त्वार्थकर्तृत्वं साधयति पुरुषार्थेन तत्तत्कारक-व्यापारसमर्थकर्तृत्वमीश्वर एवाधिष्ठातृ इत्याशयेन तन्वादयुपपत्तिरिति हेत्वन्तरं साधयति–लघुमध्यमेति प्रत्यनीका

1 लि क. पूर्वोक्तानेकान्तिकत्वमप्रा ।

लघुप्रकाशेत्यादि यावत् पाचकाधिष्ठितानलैकत्वैवमसाधनमिति, यथा परस्परप्रत्यनीकयो रम्बुदकयोर्प्रत्यनीकत्वविघातिना विशिष्टबुद्धिना पाचकेनाधिष्ठितयोः सत्यपि मिथः प्रत्यनीकत्वे बहुधि धसवर्तिनो संहत्यकारित्वादोदनसाधन दृष्टम्, तथा लघुगुरुणोः प्रकाशावरणयोः प्रवृत्तिनियमयोश्च मिथो विरुद्धयोरपि संहत्य महदादिभावेनैककार्यकारित्वाद्विशिष्टबुद्धिपूर्वकत्वेति ।

अन्योऽन्याभिभवमिथुनवृत्तित्वपरिणामादिति चेन्न परिणामस्यापि कार्यत्वात् धर्मा ५ न्तरैक्यादिपरिणामो हि धर्मान्तरनिषेधो धर्मान्तराविर्भवनञ्च, तद्रूप कार्यम्, पूर्ववत् प्रति ज्ञार्थाव्यतिरेकात्, विशिष्टबुद्धिमद्विहितम् ।

(अन्योऽन्येति) अन्योऽन्याभिभवमिथुनवृत्तित्वपरिणामादिति चेत्—स्यान्मत सत्त्वरजस्तम सामेवाङ्गाङ्गिभावः, पुरुषार्थमुद्दिश्य प्रवृत्तानां वैषम्यपरिणामान्महदादिसाधनम्, तेषां प्रयोक्त्रे तत्र न, परिणामस्यापि कार्यत्वात्, तद्व्याचष्टे धर्मान्तरैक्यादिपरिणामो हि धर्मान्तरनिषेधो धर्मान्तरावि- 10 र्भवनञ्च तद्रूपमूर्तं कार्यं, स तु परिणामः कार्यत्वात् पूर्ववत् प्रतिज्ञार्थाव्यतिरेकात् रथादिवत्, सोऽपि विशिष्टबुद्धिमद्विहितम्, तस्मादयुक्तं स्वत एव परिणमन्ते सत्त्वादय इति ।

अन्याह 'एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्' ॥ (श्वेता० ६–१२)

अन्याह एक इति, शिवमतानुसारेण, एकोऽद्वितीयः प्रधानो वा, वशी—स्वस्वातन्त्र्यात्मा, 15 निष्क्रियाणां—अस्वातन्त्र्याणाम्, परसंज्ञा ह्या अपि निष्क्रिया एव, बहूनां—अनन्तानां प्रधानादीनां कर्मक- रणसम्प्रदानापादानाधिकरणप्रधानशक्तीनामनन्तानामपि प्रवर्तयितृत्वात् स्ववशीकर्तुं शक्त्वा[ऽ]धीति, एकं बीज—प्रधान महदादि विपरिणता बहुधा—महदादिस्थावरान्तानन्तभेदभिन्नजगत्तया यः करोति—सुबति-

---

कल्पादयो विशिष्टबुद्धिपूर्वका संहत्यैककार्यकारित्वात् अनलोदकयोः पाचकपूर्वकत्ववदिति प्रयोग परस्परविरुद्धयोः संहत्यैव कैकमिदं विशिष्टबुद्धि कल्पन विना न घटते परस्परप्रत्यनीकौ च लघुगुरु प्रकाशावरणौ प्रवृत्तिनियमौ च तथापि विशिष्ट- 20 बुद्ध्यधिष्ठितौ महदादि घटत इति भाव । ननु सत्त्वरजस्तमसां प्रयोजकाधीनत्वेनान्यतमेनान्यतमाभिभूयते यथा सत्त्वं रजस्तमसी अभिभूयात्मन शान्ता वृत्ति लभते एव रजस्सत्त्वे अभिभूय घोरा तमश्च सत्त्वरजसी अभिभूय मूढामिति तथा सत्त्वाद- योऽन्योन्यमिथुनवृत्तय सर्वस्य त्रिगुणात्मकत्वेन परस्परं मिश्रिता सर्वे सर्वगमकाः एवमन्योन्यपरिणामा अन्यतमोऽन्यतममपेक्ष्य परिणमते तस्मात् सत्त्वरजस्तमसामङ्गाङ्गिभाव एव प्रयोक्तेत्याशङ्कते—अन्योऽन्येति अन्योऽन्याभिभवात्मत्वात्, अन्योऽन्य- मिथुनवृत्तित्वात् अन्योऽन्यपरिणामात् महदादिकार्यं न तु विशिष्टबुद्धिपूर्वक इति भाव । अङ्गाङ्गिभावस्य नियमाद्वैषम्यं प्रतीत्या- याह—स्यान्मतमिति । तत्र हेतुमाह—पुरुषार्थमुद्दिश्येति सत्त्वादयः पुरुषार्थमुद्दिश्य वैषम्यपरिणाममङ्गाङ्गिभावमनुगम्य 25 महदादीन् साधयति गतत्वमपेक्ष्य सत्त्वादीनां प्रयोज्यप्रयोजकभाव एवेति भाव । अङ्गाङ्गिभावो हि तेषां वैषम्यलक्षणा परिणाम उच्यते तदपि कार्यमेव साम्यावस्थाभिरवी हि वैषम्यपरिणामो भवति यदि साम्येनावस्थिता सत्त्वादयोऽविषम हीना वा भवितुमर्हन्ति तस्मात् परिणामस्य कार्यत्वात् घटादिवत्तस्यैव विशिष्टबुद्धिपूर्वकत्वमेवेति समाधत्ते—परिणामस्या पीति । परिणामस्य कार्यत्वं समर्थयति—धर्मान्तरेति यथा तदन्यधर्मोद्भवात् पूर्वधर्मे तिरोभवन्ति सत्त्वादयस्तथा धर्मी धर्मान्तराविर्भवति तदवस्थानं परिणाम उच्यते उक्तञ्च 'अवस्थितस्य धर्मान्तरं पूर्वधर्मपरित्यागे धर्मान्तरम् । तत्त्वसमनुगते धर्मी 30 परिणम य उच्यते' इति । प्रधानादितो महदादिसर्जनमपि विशिष्टबुद्धिमत्पूर्वकमेवेत्युपनिषदं प्रमाणयति—अन्याहेति । अचेतनमचेतना जीवा अपि परतन्त्रत्वाविष्क्रिया एवेत्याह—परसंज्ञा इति । शिवादीति शिवादयोऽपि मूर्तिकाः सर्व

---

१ सि क ˚प्रसादे । २ सि क. ˚पादस्य । ३ सि क. ˚ग्योऽप्रमती । ४ सि क. पाचकेना । ५ सि क पाम्यः । ६ सि क. पूर्व ।

अविविदिषुरस्माभिप्रायानुक्रमेण यथा तथा व्यवस्थापयति, तमीश्वरं सतो मिथस्य भाव्यमानस्य प्रभा-मात्रविलक्षणस्य भावयितारं, मासस्य—आत्मनि स्थित चिदात्मकमूर्तिसर्वगत सर्वत्र तासां सद्भावात्, येऽनु पश्यन्ति—तत्प्रसादादेव तज्ज्ञानानुसारेण योगाभ्यासप्रसादक्रमेण येऽनुपश्यन्ति धीराः—अविचलितयो गससाधयः, को योगः ? 'प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा । तर्कः समाधिरित्येषः षडङ्गो

5 योग उच्यते ॥ (अमृतनादोपनिषत् ६) इन्द्रियाणां विषयेभ्यो मनसश्च प्रत्याहरणं प्रत्याहारः, प्राणायामस्त्रिविधः रेचकः कुम्भकः पूरक इति, तत्र रेचक आन्तरं वायुं बहिर्निःश्वासयति नासिका द्वारेण, पूरको वायुमन्तःप्रवेश्य पूरयति कुम्भकः पूर्णकुम्भवदवस्थाय वायुं सामीप्येनावस्थापयति, ध्यानं इष्टदेवताचिन्तन वा धारणा यथाऽभ्यासं हृदयादिषु प्रदेशेषु मनसोऽवस्थापनम्, यथा पूर्वं नाभौ ततो हृदये कण्ठे नासिकाग्रे भ्रुवोर्मध्ये ब्रह्मरन्ध्रमूर्ध्नीति । ततः शून्यागारगिरिकन्दरादेकान्ते शुचौ देशे

10 स्थिरं सुखमाऽऽसनमास्थाय प्राणायामेन सम्भाव्य पश्यञ्चक्षुःस्थिरबुद्धिसमाधानं समपादयितव्यं वाऽऽ-सार्य ध्यायतो मे समाधिर्भवतीति तर्कयेत अनेनैवं कृते क्रियाविशेषेणाऽऽहारविहारशान्त्यापारिभा ध्यानसमाधिर्भवतीति तदुपायविचार तर्कस्तर्कः ध्यानयोगादिरतिः समाधिरित्येषः षडङ्गो योगः ।

कर्मस्वेवाध्यासु सिद्धतत्परोऽसौ यथो ध्यानस्य क्रमात इति भाव । परमात्मस्वरूपसाक्षात्कारविशेषात् दिदृक्षमाणस्य मनस्य परमप्रेमास्पदे निश्चितात्मनो योगिनो मनसाऽभिमुखीभूतत्वं आभिमतमुपयाति प्रसादाधिकार-तत्प्रसादादे 15 देवेति तज्ज्ञानं हि सर्वं श्रुतिस्मृतीतिहासपुराणानि तदनुसारेण तनोत्पन्नेयाभ्यासप्राशस्त्यक्रमेण ये योगिन परमात्मानं निष्पश्यन्तीति भाव । तत्र योगमाह—को योग इति योगविचारविशेषेण तत्स्वरूपमाह षड् प्रत्याहारादीनि, चित्तस्थैर्य-करत्वात् । तत्र प्रत्याहारमाचष्टे—तत्रेति पञ्चमस्य इत्यर्थं इन्द्रियविषयसम्बन्धेनवतो इन्द्रियाणां चित्तवशानुकारिता प्रत्याहार इति पातञ्जले विजितेन्द्रियस्य हि विषयानुधावीनीन्द्रियाणि भवन्ति, अविजितेन्द्रियस्य तु चित्तमिन्द्रियानुकारि भवति । श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायाम स च रेचकपूरककुम्भकभेदात्त्रैविध्यं प्राप्नोतीत्याह—प्राणायाम 20 इति यत्र कोष्ठ्यो वायुर्निःसृत्य बहिर्विसर्ज्यते स श्वासप्रश्वासयोर्गतिविच्छेदात्मा रेचक प्राणायाम यत्र बाह्यो वायुराचम्यान्त-र्धार्यतेऽसौ गतिविच्छेदात्मा पूरक प्राणायाम यत्रोभयो सकृत्प्रयत्नेन वायुं स्तम्भयन् धारयत्यसौ तदुभयाभाव कुम्भकः प्राणायाम इत्याद्यैस्तदुक्तं तत्र रेचक इति । प्रत्ययान्तरैरपरामृष्ट ध्येयदेवताप्रत्ययैकतानतारूपप्रत्ययप्रवाहविशेषो ध्यानमित्याह—ध्यानमिति । यत्र देशविशेषे ध्येयं चिन्तयेत् तत्र चित्तस्यावस्थानं स्थापनं धारणेत्याह—धारणेति । देशविशेषमेवाह—यथेति तदुक्तं 'आद्याभ्यां हृदये मध्यम तृतीये च तयोरपि । कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्धसु । किञ्चित्तस्मात् परस्मिन् 30 धारणा दश कीर्तिता ॥ इति । विचारस्वरूपं तर्कमाह—ततः इति तर्केण विचारैर्ध्यानमवधारणं विधिवत्सर्वमत्र परीक्ष्यमाणा वक्ति भवति तदथ समाधिविषये प्रवर्तते यथा देशान्तरे शुचौ देशे मौनी सन् परमात्मस्वरूपं ध्यायन् ... ध्यायतः समाधि-र्निष्पद्येतेति चिन्तयति तथा तदनुष्ठानेन ध्यानसमाधिर्भवतीति विचारस्तर्क इति भाव । ध्यानमेव यदा ध्येयमात्रनिर्भासं स्वरूपशून्यमिव भवति ध्येयप्रत्ययाद्यन्यदपि न स्फुरति यदा ध्यानं तदेव समाधिरित्यत 30 इत्याह समाधेरिति ध्यानस्य येन तद् यो योगे निरुद्धीकरण तत्र यदि. सर्ववृत्तिनिरोधकरं स्वयं समाधिरित्यर्थं । समाधिर्द्वि-विधो भवति सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति, वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञात निरोधवशात्तु असम्प्रज्ञात सम्प्रज्ञात आद्य सालम्बन द्वितीयो निरालम्बन सम्प्रज्ञातश्च वितर्कविचारानुगत विचारादिनानुगत आनन्दादि

---

१ सि. क. धारणा ।

अनेन योगेन सर्वत्र क्षित्यादिमूर्तमीश्वरं दृष्ट्वा पश्चाद्भावितात्मा तमात्मसमेव पश्यति—यदत्र मम शरीरे कठिनं सा पृथिवी परमेश्वरमूर्तिः, मद्रूपं सलिलमूष्मा तेजः चलं वायुः सुषिरमाकाशम्, यश्चैतस्य स यजमानः, चक्षुः सूर्यो जिह्वा सोमो मनो चन्द्रमा इत्यन्येष्वप्यवयवेषु यथासम्भवं येऽनुपश्यन्ति ते धीराः शाश्वतीं शान्तिमाप्नुवन्ति ते एतत्परेण सायुज्यं निर्वाणं मोक्षमित्यर्थः नेतरे प्रधानपुरुषनियत्यादिकारणिन इति ।

नयस्वरूपज्ञानायाह—　　5

अयं विधेरुभयभाक्, विधिर्व्याख्यातः पूर्वमनपवादप्रवृत्तिः तस्योत्सर्गाद्विधानात्मा विधिर्विधीयते सर्वसर्वात्मकत्वात्, नियमः सन्निधिप्रयोग्यसतोरप्रवृत्तेरसत्त्वम्, तयोरसत्त्वात्, स्वतन्त्रस्य कर्तुरैश्वर्येण भवनात् तस्मान्नियम्यते च ।

(अयमिति) अयं विधेरुभयभाक्—उभयं विधिं नियमं च भजत इत्युभयभाक् विधिर्व्याख्यातो लोकवदिति पूर्वमिति स्मारयति, पुनः संक्षेपेण व्याचष्टे—अनपवादप्रवृत्तिः—न कश्चिदपवदन [व] इरति　10
किं न पठेन ? यदि सामान्यं यदि विशेष इत्यादि, तस्य विधेरुत्सर्गाद्विधानात्मा विधिर्विधीयते, कस्मात् ? सर्वसर्वात्मकत्वान्निरपवादः प्रवर्तन एव प्रवर्तते न क्वचिद् व्यावर्त्यते, अयं हि नयः सर्वं सर्वात्मकमिति मन्यते, यथा सूचितं, क्व ? सन्निधिप्रयोगव्याख्याने तदेवात्रापि वक्ष्यते, नियमः सन्निधिप्रयोग्यसतोरप्रवृत्तेः—यावदावनन्तरोक्तौ सन्निधिवन [न] व्यापद्यमवनसंहारौ इश्वर [:] प्रयत्नों वा प्रयोगप्रधानाव्यादिभावः तयोरीश्वरप्रवृत्तेरसत्त्वम्, किं कारणं ? तयोरसत्त्वात् तदुभय ईश्वरेण　15
सदुच्यते, स्वतन्त्रस्य कर्तुरैश्वर्येण भवनात् तद्विलक्षणस्याभवनाभवस्याप्रवृत्तस्यासत्त्वात् खपुष्पवत्, तस्मान्नियम्यते नियम्यते चेति, ततोऽयं विधिरुभयभागिति ।

शब्दार्थोऽधुना—

सादृश्यं सामान्यं च शब्दार्थः, ननु सामान्यमविकल्पात्म पुरुषनियत्यादि, सर्वसर्वात्मकत्वादिति पूर्वपक्षप्रसङ्ग इति चेन्न सर्वसर्वात्मकत्वेऽपि च सुखार्थत्वात्, अभिहितन्यायेन　20
सत्त्वादिशब्दादितन्यादिविकल्पप्रत्ययस्य सत्यार्थत्वात् अद्वैतप्रत्ययस्यासत्यार्थत्वात् ।

इत्यनुमता अभिहितमात्रयेति चतुर्थेन च प्रकारान्तरमेवाह—अनेन योगेनेति । नयस्वरूपोपसंहाराय—अयमिति अयं विधेरुभयभागिति नयोऽयं विधिनियमे विधाने नियमं च भजते सर्वसर्वात्मकत्वाभ्युपगमात् क्वचिद् व्यवच्छेदानवकाशात् विधिमुत्सर्गतो विधीयत एव न तदपवादकेन भवनमित्युभयगामितमस्योऽप्यतीत्युभयभागिति भावः । अमुमेव भावं स्फुटयति-विधिर्व्याख्यात इति प्रथमेऽरे इति भावः । सन्निधिवचनस्य ईश्वरः आपत्तिवचनस्य ईश्वर　25
स्वार्थे प्रधानोऽव्ययितः एतयोरीश्वरस्यैव अनापन्नस्य सन्निधिवचनस्यासत्त्वात् तदभावादेव च प्रधानादीनामप्य भावः भावमात्रत्वात् भावविकारमन्तरेण भावस्याप्युपपत्तेरित्याशयेनाह-नियम इति । योऽधुनास्य नये शब्दार्थं इत्याह—सादृश्यं सामान्यञ्चेति तत्तत्परिणतिरूपं सामान्यं शब्दार्थो न व्यक्तिः न वाऽन्यापोहः च पुनरेतेऽर्थं नयो विधेरुभयभाक् तथा शब्दार्थोऽपि सादृश्यमूर्तं सामान्यमिति भाव । सामान्यमत्र न वैशेषिकाभिमतं व्यक्तिभिन्नं जातिरूपं निर्दिष्टम्, किन्तु वस्तुनो व्यापकतया व्यक्तिभ्यो भिन्नाभिन्नं सादृश्यविधायकं सादृश्यं सामान्यमिति तत्र व्याख्या　30

---

१ सि. क्ष. तमेव । २ सि. क्ष. विशेषण । ३ सि. क्ष. क्वचिद् । ४ सि. क्ष. सदर्थ ।

(सादृश्यमिति) सादृश्य सामान्यञ्च शब्दार्थः वाक्यार्थस्य वक्ष्यमाणत्वात् पदार्थ इति गम्यते, सदृशैः समानमानैर्मीयत इति समानम्, समानं दृक् यत्र द्रष्टा तत् सदृशं, सदृशं समान समानभावः सामान्य जातिलिङ्गमत्ययाभिधायकमिति, नान्यापोहो न समानवस्त्वतिरिक्तवस्त्वामि वा, तदनुपपत्तेः, एवंसामान्यं शब्दार्थः । ननु सामान्यमविकल्पात्मं पुरुषनियतत्वात् सर्वसर्वात्मकत्वादिति पूर्ववाक्यसङ्ग

5 इति चेदेतदुच्यते सर्वसर्वात्मकत्वेऽपि च सत्सर्वगतत्वात्–जगत्स्थितिप्रलयोत्सर्गव्यापित्वात् तद्धर्मत्वात्तस्य नयस्य नाविकल्प इति संमतस्वाद्वे मत्वचशब्दार्थः, अभिहितान्वयेन सत्त्वादिशब्दादि तत्त्वादिविकल्पप्रत्ययस्य सत्यार्थत्वादवैतथप्रत्ययस्यासत्यार्थत्वादिति पदार्थं उक्तः ।

वाक्यार्थोऽधुना—

वाक्यमपि च पृथक् सर्वं पदम्, यथा देवदत्त ! गामभ्याज शुक्लामित्येकैकं पदं

10 वाक्यम्, तस्मादेव, देवदत्तोऽपि हि गवात्मकोऽभ्याजात्मकश्च तथाप्रवर्तनात्तदवाप्तेः, ताम्यपि तथाप्तेरिति ।

(वाक्यमपि चेति) वाक्यमपि च पृथक् सर्वं पदमिति, वाक्येऽवधारिते तदवधारण सौकर्यात्, 'आख्यातः शब्दसंघातो जातिः संघातवर्तिनी' [वाक्यप का २ श्लो० १] इत्यादिषु वाक्यलक्षणविकल्पेष्वस्य नयस्य मतेन पृथक् सर्वं पदं वाक्यं, वाक्यार्थः पृथक् पृथक् सर्वपदार्थ

15 इति, यथा 'देवदत्त ! गामभ्याज शुक्लां' (महाभा० अ० १ पा० १ सूत्रे १) मित्यत्रैकैकं पदं वाक्यम्, किं कारणं ? तस्मात्–सर्वसर्वात्मकत्वादेव, यस्माद्देवदत्तोऽपि गवात्मकोऽभ्याजात्मकश्च तथाप्रवर्तनात् तदवाप्तेः तान्यपि तथेति तस्मात् सर्वसर्वात्मकत्वात् पृथक् पृथक् सर्वं पदं वाक्यमिति ।

एतस्य विध्युभयनयस्य शब्दार्थभेदोऽर्थः, पूर्वविकल्पस्वाश्रयानाम्, सङ्ग्रहदेशस्या-

---

20 विशेषेण क्रमेण गावो न सामान्यं भवतीति तात्पर्यम् । व्याख्यानान्तरम्–नान्यापोह इति न तावद् यथाऽन्यापोहोऽर्थो बौद्धस्य शब्दार्थो वैशेषिकस्य नाप्यसामान्यापोहो युक्तः एवेति कथं स शब्दार्थः स्वपरवस्तुत्वादन्यापोहस्य अनुपपत्तेरिति भावः । न समानेति वस्त्वन्तरवस्तुव्यतिरिक्तस्य वस्तुत्वमूलस्य सामान्यस्य व्यक्तिव्यतिरेकेणाप्रदर्शनात् तस्यानुपपत्तेश्च न सामान्यरूपतेति भाव । एतदर्थमभिप्रेत्य हेतुमाह–तदनुपपत्तेरिति । ननु यदि सामान्यं शब्दार्थस्तर्हि तस्य पुरुषनियतत्वे

25 रिव नामजात्यादिकल्पनानियतत्वेन तत्त्वविकल्पसामान्यमनुपपन्नमुक्तस्य नयस्य पूर्वनयतिरिक्तता स्यादित्याशङ्कते–ननु इति, सामान्यमिदं यमादपि विरुद्धं तदपि वक्तव्यं, न तत्रैवोपात्तत्वमपत्र इत्यनुपपन्नम्, पूर्वानयाभ्यां भिन्नत्वादिसाधनेन इत्याह–सर्वसर्वात्मकत्वेऽपीति सामान्यस्य प्रमाणात् सर्वसर्वात्मकत्वेन व्यापकत्वेऽपि तदात्मकेन व्यवस्थितत्वेनार्थवत्त्वमिति भाव । नयान्तरात्तस्य भेदमाह–सत्त्वादीति । यो वाक्यार्थं इति तदात्मा तत्स्थितात्मकार्थं प्रथमं व्याख्येय इत्येवमाह–वाक्यमपीति इत प्रथमं वाक्यस्य निरूपणं न तु वाक्यार्थस्यातएव–वाक्येऽवधारित इति । यथेति देवदत्त ! गामभ्याज शुक्लामित्यादौ देवदत्तादिपदार्थस्य वाक्यम्, अन्यथाऽप्रत्ययेनाप्यवक्त्रा पूर्वपरसम्बन्धविरहात्

30 एकपदमात्रप्रयोगेण वाक्यमनर्थकं स्यात्, तस्मादेकैकपदस्यार्थप्रतिपादकत्वम् तदपि न देवदत्तादिपदमात्रं केवल वाच्यमस्यात्, ननु यदेकस्यैव पदस्य तत्समासार्थत्वेऽपि तदपरपदोपादानवैयर्थ्यं प्रसज्यत इति चेन्न प्रतिपत्तृ वाक्यार्थस्य व्याख्यानस्य तात्पर्यात्, देवदत्तेन देवदत्तपदमात्राप्रयोगेऽपि तदुपस्थितेर्न तु देवदत्तपदेनोक्तमेवेति भावात् तदात्मकैकस्यैव पदात् सर्वपदोपस्थितौ वाक्यार्थोऽपि पृथक् तदन्यपदोपस्थापित एवेति भाव तथाऽपि किं इत्येवार्थः पदानां देवदत्त–पदत्वादिति । इत्यभिप्रेत्यैतस्य नयार्थं पूर्वनयसम्मततत्त्वप्रत्ययविकल्पप्रत्ययासत्यत्वाश्रय विध्युभय

द्रव्यार्थः, द्रव्यमपि गुणसन्द्रावः, विध्युभयनयत्वात् सन्निहिततद्विपक्षकीश्वराप्पृथक्त्वाद्भ्वा-दीनां तदेकैकसर्वात्मकत्वाच्च तेनापि तद्वशित्वात् ।

(एतस्येति) एतस्य विध्युभयनयस्य द्रव्यार्थभेदोऽयं , पूर्वविरुद्धस्वाभयानाम्, अविकल्पाभा-द्विविधविधिनयाद्विकल्पार्थद्रव्यार्थता भिद्यते, अयोध्यानां नयानां कस्मिमन्तर्भाव इत्यत आह सङ्ग्रहदेशत्वाद्द्रव्यार्थः, सङ्ग्रहनयस्यापि सतथा भेदावदेशः सर्वेकदेशः द्रव्यस्यार्थः, कथमस्मिन् 5 विग्रह इति चेदुच्यते द्रव्यमपि गुणसन्द्रावः, तद्व्याख्या सम् एकीभावे द्रु गतौ तस्माद्गुणानामेकीभावेन द्रवणम्, कारणे कार्यस्य सत्त्वात्, सतामेव मृदादीनां रूपादीनां पृथक् पृथक् सन्निहितानामैक्य गमनाज्जीवपरिणामः, सङ्ग्रमनमाह–विध्युभयनयत्वात् सन्निहिततद्विपक्षकीश्वराप्पृथक्त्वाद्भ्वादीनां तदेकैकसर्वात्मकत्वाच्च, तेषां भवत्वेकीभावो मा भूदीश्वरस्येति [चेत्] नेत्युच्यते तेनापि तद्वशित्वात्–सन्निहिततच्छक्तिनापि सहेश्वरेणैकीभावे तच्छक्तिव्यक्तेर्नान्यमेति, तत एव चास्य नयस्याविशेषावादभेदः । 10

आह—

किं स्वमनीषिकया तदुच्यते ? न, उपनिबन्धनमस्य 'दुविहा पण्णवणा पण्णत्ता जीव-पण्णवणा अजीवपण्णवणा चे' ति, अथवा 'किमिदं लोएत्ति पवुच्चई ? गोयमा ! जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि' ॥

(किमिति) किं स्वमनीषिकया तदुच्यते ? आहोस्विदस्त्यस्य किञ्चिदुपनिबन्धनमापमपीति ? 15 अत्रोच्यते–उपनिबन्धनमस्य 'दुविहा पण्णवणा पण्णत्ता, जीवपण्णवणा अजीवपण्णवणा चे'ति, (पण्ण० सू० १) अथवा 'किमिदं लोएत्ति पवुच्चई ? गोयमा ! जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि' (स्था० २ ४ ४) ॥

इति विध्युभयारस्तृतीयो नयचक्रस्य ॥

द्रव्यार्थतया भिद्यत इति भावः । अत एवाह–पूर्वविरुद्धत्वादिति । द्रव्यार्थे कस्मिन्नन्तर्भाव इत्यत्राह–सङ्ग्रहदेशत्वा 20 दिति । केन विग्रहेण द्रव्यार्थोऽयमित्यत्राह द्रव्यमपीति सत्त्वरजस्तमांसि गुणास्तत्परिणामरूपाश्च तदात्मका एव सत्त्वादयः एव गुणाः तत्त्वपातरूपाश्च महदादिद्रव्यम्, न तु तदतिरिक्तमवयविद्रव्यमस्ति भिन्नस्यैकीभावेन द्रवणमेव द्रव्यमित्याशयेनाह–तद्व्याख्येति । ननु ईश्वरव्यतिरिक्तस्य प्रधानात्मादेः प्रत्येकं सर्वात्मकत्वैकीभावेन तद्गमनलक्षणं द्रव्यत्वं स्यात्, नत्वीश्वरस्य तदात्मकत्वाभावादित्यत्राह–तेषामिति ईश्वरो हि स सर्वज्ञः प्रधानात्मादीनां तत्तद्भावनिमित्तत्वात् सन्निहितत्वान्निर्व्यापार एव प्रधानात्मादीनां च तदेकीभावं गच्छति तदेव प्रधानात्मादीनामीश्वरस्य च चकि व्यक्तीभवति, नान्यमेति तदात्मेकी- 25 भावोऽप्यस्त्येवैकत्वेन उच्यते–तेनापीति । उपपादितनयस्यार्थं निबन्धनमाह–किमिति । दुविहा इति, द्विविधा प्रज्ञापना प्रज्ञप्ता जीवप्रज्ञापना अजीवप्रज्ञापना चेति, । तथा किमिदं लोक इति प्रोच्यते ? गौतम ! जीवाश्चैव अजीवाश्चैव एवं रत्नप्रभा यावत् ईषत्प्राग्भारा समयावलिकादि, इति छाया ।

इत्याचार्यसिंहसूरिगणिवादिक्षमाश्रमणविरचिते द्वादशारनयचक्रस्य विषमपदविवेचने तृतीयो विध्युभयारः ॥

चतुर्थो विधिनियमारः ।

नन्वेव त्वदुक्ता एवोपपत्तयः प्रत्यक्षं सर्वप्राणीश्वरत्वं साधयन्ति, बाह्याध्यात्मिकसुख-
दुःखमोहमात्रत्वाज्जगतः, सदसद्वेद्यमोहान्तरायभेदानां सुखादित्रयविपाकफलत्वानतिवृत्तेस्त-
दात्मसंवेद्यलक्षणत्वात् कर्मणः, सुखादिसंवेदनेनैव हि लक्ष्यते, अतः कारणे कार्यस्य सत्त्वात्
5 कार्ये कारणोपचारात् सुखादयः कर्म, अन्नप्राणत्ववत् ।

नन्वेवमित्यादि, पूर्ववदभिन्न दर्शने न परितुष्यतः त्वामामित्यभिसम्बन्धः, नन्वित्यसूया-
पने, नन्वेव त्वदुक्ता एवोपपत्तयः प्रत्येकं सर्वप्राणीश्वरत्वं साधयन्ति, बाह्याध्यात्मिकसुखदुःखमोह-
मात्रत्वाज्जगतः, सदसद्वेद्यमोहान्तरायभेदानां सुखादित्रयविपाकफलत्वानतिवृत्तेस्तदात्मसंवेद्यलक्षणत्वात्
कर्मणः, सुखादिसंवेदनेनैव हि—स्वकार्येण फलेन लक्ष्यते—अनुमीयते सामान्यतो दृष्टानुमानेन देशा-
10 न्तरप्राप्त्येवाऽऽदित्यादिगतिः, अतः कारणे कार्यस्य सत्त्वात् कार्ये कारणोपचारात् सुखादयः कर्म,
अन्नप्राणत्ववत्, अदृष्टं धर्माधर्माख्यं परैरिष्टमेव कर्मेति ।

आत्मापि कर्म ततः सुखादि, पुनरपि सुखाद्रागादिफलं ततः पुनः कर्म ततः सुखादि
फलम्, तच्च जीवपरिणामात्मसात्कृतकर्मणयोग्यपरिणामपरमाणुसमूहः एवात्मस्वमेकीभूतमा-
त्मना, तच्च संवेद्यम्, कर्तुः संवेदनात्, प्राक् प्रतिपादितं हि द्व्यणुकत्र्यणुकादिसंयोगैः
15 पृथिव्युदकाग्नीध्रकुट्यादिपरिवृत्तिरूपेणात्मनस्तेषामैकत्वं सर्वसर्वात्मकत्वाच्च, तस्मात् कर्मकारणां
जगत्प्रवृत्तिं साधयन्ति त्वदुक्ता एवोपपत्तयः ।

(आत्मापीति) आत्मापि कर्म, यथाऽऽत्ममात्मनो रागादिकर्मविपाकपरिणतत्वात् [illegible] प्रयोग-

---

एवमपि मायीपुरुषस्य परस्परात्मकतामात्रतो धर्मकत्वमन्यथाभावे स्वात्मैकत्वानुपपत्तेरीश्वरस्यापि च प्रकर्षेऽनुपपत्ते-
रुत्कर्षात्मप्रयोगस्य कर्मकारकत्वात् एवं सर्वं कर्मैवेति विधिनियमरूपत्वाद्विधिनियमचतुर्थोऽरकमिति प्रदर्शयितुं पूर्वमतं
20 पूर्वपक्षयति—नन्वेवमिति । चतुर्थे नयारमिदेष [illegible] योग्या । यथा पूर्वं नियत्यादिवादेन
परितोषाद्विधिनियमारम्भ [illegible] परितोषमप्राप्तोऽविधिनियमारम्भ इति [illegible] दर्शयति—पूर्वव-
दिति । [illegible] धर्मपूर्वकत्व [illegible] साधयति—बाह्याध्यात्मिकेति बाह्याध्यात्मिकजगत् [illegible]
सुखदुःखमोहात्मम्, तत्र सुखादि सदसद्वेद्यमोहान्तरायभेदा [illegible], [illegible] सुखसातवेद्यादु [illegible] मोहान्तरायात्मा-
मात्रत्वात् [illegible] भाव । ननु [illegible] किं मानमित्यत्राह—तदात्मेति [illegible]-
25 [illegible] धर्मे [illegible], तथा च कार्येण [illegible] भवतीति भावः । पूर्व [illegible]
[illegible] निमित्तेन [illegible] सामान्यत इति यथा [illegible] देशान्तरप्राप्तिर्वा तथ
[illegible] सामान्येन देशान्तरप्राप्त्या [illegible] तत्र देशान्तरप्राप्ति [illegible] सुखादि [illegible]
कार्यं कर्मानुमीयत इति भाव । ननु कारणे कार्यस्य [illegible] कार्यं [illegible] इति यथा [illegible]
[illegible] कर्मसु कारणेषु सुखादीनां [illegible], कार्ये सुखादौ कारणस्य कर्मण उपचारोऽयमित्याह—अत इति । परैरपि
30 कर्मत्वेनाभिमत [illegible]—अदृष्टमिति [illegible] बाह्याध्यात्मिकं जगत् कर्मेति सिद्धमिति भावः । न [illegible]
कर्म [illegible]—आत्मापीति । [illegible] प्रयोगपरिणमात् कर्मतामा-
पन्नः [illegible] तथैवेति [illegible] कर्मता [illegible] सुखादिविकल्पितो

1 सि॰ क॰ कर्मक्षणं । 2 सि॰ क॰ [illegible] ।

परिणामात् कर्मतामापन्नम्, [ततः सुखादि] पुनरपि सुखाद्यरागादिफल—फलादि, ततः पुनः कर्म ततः सुखादिफलं तच्च जीवपरिणामारम्भसाकृतकार्मणयोग्यपरिणामपरमाणुसमूह एवात्मसमनेकीभूतमात्मना। यथोक्तम् 'योगैः सकृत् स्वयोगाग्मूर्तः सत्त्वादपमर्यमात्रके। आत्तस्य चाशुभयन शस्य प्रति स च ततोऽनन्यः ॥' (   ) तच्च संवेद्यम्, कर्तुः संवेदनात्, ततः संविषयलक्षणत्वात्

कर्मणः 'सर्वप्राणीश्वरतेति सम्मत्स्यते, कर्म हि प्रतिप्राणि नियतकर्तृकत्वं विपाकसुखादित्वेन संवेद्यते, 5
नाण्वनामेव कर्मपरिणामापन्नानामात्मैकीभावेन वेदनं संवेदनम्, तेन च पुरुषेण तेषां तथा प्रयोजनात् कर्तृत्वम्, अतः सुखाद्यदृष्टाणूनामपि च कर्मत्वादित्याह—प्रागू प्रतिपादितं हि द्व्यणुकत्र्यणुकादिसंयोगैः पृथिव्युदकज्योतिरङ्कुरादिपरिवृद्धिरूपेणात्मनः तेषामेकस्य सर्वसर्वात्मकत्वञ्च, तस्मात् कर्मकारणो जगत्प्रवृत्तिं साधयन्ति तद्युक्त्या एवोपपत्तयः।

इतश्च कर्मपूर्वकं जगत्, कर्मप्रवर्तनाभ्युपगमात् सर्वप्राणिनाम्, कर्तृत्वात् कर्तुरेव 10
भवितृत्वाभ्युपगमात् तस्यैव भवितुश्च प्रयोजनात्।

(इतश्चेति) इतश्च कर्मपूर्वकं जगत्, कर्मप्रवर्तनाभ्युपगमात् सर्वप्राणिनाम्—कर्मवशादेव हि प्राणिनः शुभाशुभजातिकुलरूपायुष्कर्षापकर्षाः, यथोक्तम् 'स्वकर्मणा युक्त एव सर्वोऽप्युत्पद्यते जनः। स तथाऽऽकृष्यते तेन न यथा स्वयमिच्छति ॥' (सूत्रकृ० टी० पृ० २१०) 'यथाऽऽहाराः काले परिणतिविशेषक्रमवशात् सुखं पथ्योऽपथ्योऽसुखमिह विधत्ते तनुभृताम्। तथा धर्माधर्माविति 15

परम्परा प्रवर्तते अनवस्थिताऽऽत्मनाऽऽरम्भ स एव संसार इत्यभिप्रायेणाह—पुनरपीति। रागादिप्रत्ययोपात्तकषायादिकरणयोगात्मनोऽनात्मोपनिबद्धकर्मपरिणतिर्भवति तदाभिवसात्मन कर्मशरीरपरिणाम आत्मैकत्वात् योगकषायपरिणतियुक्तोऽपि कर्मयोग्य पुद्गलग्रहणे आत्मसात्करणे एकत्वपरिणामापादने समर्थो भवति तदेवमात्मनाऽनुगतकर्मयोग्यपरमाणुसमूह एव कर्मेत्यत इत्यभिप्रायेणाह—तच्चेति। तत्र सुखादिफलमित्यस्य सुखादीनामेषां पौद्गलिकत्वात् कार्यकारणयोरभेदादेवेति भाव तत्र सुखाद्यभिन्नं कर्म कर्ता संवेदनात् संवेद्यमतस्तस्य सर्वेश्वरत्वमित्याह—तच्चेति सुखाद्यात्मककर्मसर्वं। अथवा कर्ममात्रस्य कर्मणात्मसर्व- 20
वैकत्वात् सर्वेषामात्मना सर्वज्ञता कर्मात्मनोरैक्यपरिणामात् कर्मणो जगत् तेनात्मनोऽपि जगत्कर्तृत्वमीश्वरत्वमिति सर्वप्राणिनामीश्वरत्वमित्यभिप्रायेणाह—ततः संविषयलक्षणत्वादिति। एतदेवोपपादयति—कर्म हीति कर्मत्वपरिणतानणूनिवासौ वेदयति न अपि तु सर्वं सुखादि तथैवाणून् प्रयोजयति सुखादीनामपि पौद्गलिकत्वात्सर्वकर्तृत्वमिति भाव। सर्वसर्वात्मकत्वं पूर्वप्रतिपादितं स्मारयति—प्रागिति तथा च कर्माणूनामेव द्व्यणुकादिक्रमेण जगद्रूपेण सुखाद्यात्मना च भवते कर्मपूर्वकं जगदिति भावः।
कर्मैवेश्वरत्वं जगद्वैचित्र्यकारणम्, तत्कर्तृक आत्मा सोऽपि न सर्वविध्यानशक्तिः किन्तु तथा तथा भविता अन्यथा 25
कर्मण एव कर्तृत्वात् तत्फलभोग आत्मनो न स्यात्, अकर्तुर्भोक्तृत्वेऽकृताभ्यागमकृतविप्रणाशदोषौ भवत इत्यभिप्रायेणाह—इतश्चेति। कर्मण एव हेतोर्जीवस्य शुभाशुभादिरुत्कर्षापकर्षौ भवत इत्याह—कर्मवशादेव हीति। कर्मप्रवर्तनमेव कर्मविचित्र्यात् प्रमाणयति—स्वकर्मेति। आगमबोधाधिगताहितफलस्वकर्मयुक्त एव सर्वो भावी नरादिभावेनोत्पद्यते कर्मणैव जीव सुखी दुःखी वा धर्मीऽधर्मी वा सुखम् दुःखं वा प्रियते न स्वसौ जीवो यथेच्छति तथा भवितुं शक्नोतीति प्रयत्नपरिश्रयः।
यथाऽऽहार इति यथाऽऽहारकाले आहृतोऽऽहारः परिणतिविशेषक्रमवशात् रसरक्तमांसाद्यात्मना परिणमति 30
मानयति तथा रागादिपरिणामवशेनात्मनोऽभ्युपगतकर्मपरमाणवो यथा भवति तथा कर्मप्रवर्तनमेवाशयेत्यभिप्रायेणाह कर्मवशेनेत्यादि

१ सि. क सर्वेश। २ सि.ग °कर्तृकत्व। ३ सि पदमिदं नास्ति। ४ सि क स्वकर्मयुक्त एवायं सर्वोऽप्युत्पद्यते नरः। स तथा क्रियते तेन न यथा स्वयमिच्छति।

विगतसङ्गमपि कर्ता कथं भोक्तु नेमे विषमविषमेगस्वयिव ॥' (   ) किञ्चा-
न्यत्—कर्तृत्वात्, प्राणिनामिति वर्तते, मा भूवमकृताभ्यागमकृतप्रणाशकर्मान्तरफलसंक्रान्त्या-
दयो दोषा इति सदसद्वादाः प्राणिन एव कर्तारो मोक्षश्चाभ्युपगम्यस्मात्, अन्यथा हिता-
हितप्राप्तिपरिहारार्थानां शास्त्राणामानर्थक्यप्रसङ्गात्, ततः कर्तुरेव भवितृत्वाभ्युपगमात्, कः
5 कर्ता ? यः सर्वज्ञः, यः सर्वज्ञो भवितापि स एव । स्यान्मतं नन्वीश्वरः प्रयोक्तृत्वात् कर्तेत्युच्यम्
नेत्युच्यते—तस्यैव भवितुश्च प्रयोजनात्—सर्वः प्राणी प्रत्येकं भविता प्रयोजयत्यात्मनाऽऽत्मानं स्वकृत-
कर्मविपाकसमकालगोचरसमयगौरवाभिधर्मचोदितः । यथोक्तम् 'प्रयाम एवापरजन्मजाऽत्र सूर्यसमः प्राक्
तनमपारः । व्यवस्यतामेव हि दैवसिद्धिमुत्साहिनं श्रीभजते मनुष्यम् ॥' (   ) इति । तस्मात्
सत्त्वादिप्रभावाण्वादिषु सत्स्वपि प्रवर्त्येषु तेषामेव कर्मसङ्गतानां प्राणिनां भवितृत्वात्तदुपपत्तेः सर्व
10 प्राणिनां स्वातन्त्र्यात् कर्मवशमेरिवकायकरणमात्रेण सततभवनात् तथाप्रवर्तकस्यैकैकस्य सर्वात्मकत्वात्
सर्वेश्वरतेति साधूक्तम् ।

इदानीं त्वविशेषेश्वरकारणत्वे तु दोषा वक्ष्यन्ते—

ईश्वरात्तु कर्मणः प्रवर्तनं किं सतः ? असतो वा ? तद्यद्भूतस्य तत्तथाद्वैतम्, तस्यापि
तदात्मकत्वात्, भूतस्य चेत् प्रागपि सत्कर्मास्ति कारणे कार्यस्य सत्त्वात्, तथेश्वरात्मैव,
15 तनुकरणादिभाव्यवत् तथापि सुतरामद्वैतम्, तदात्मकत्वादेव पुरुषादस्थानवत्, ईश्वरो भाव्यः
तदात्मककार्यापि भवनवद्वा ।

ईश्वरात्त्वित्यादि, इदं चिन्त्यं ईश्वरात् कर्मणः प्रवर्तनं किं सतोऽसतो[वा], किञ्चातः ?
तद्यद्भूतस्य कर्मण ईश्वरः प्रवर्तकः तदद्वैतेव पुरुषाद्वैतवत् प्राप्तम्, तस्यापि तदात्मकत्वात्
कर्मणोऽपीश्वरात्मकत्वात् ईश्वरस्यैव कर्मत्वेनोपपत्तेः । भूतस्य चेत्—अथ भूतस्य कर्मण ईश्वरात्
20 प्रवृत्तिस्तत एतस्मात् प्रागपि सत्कर्मास्ति कारणे कार्यस्य सत्त्वात् तथेश्वरात्मैव तनुकरणादि भाव्यवत्,

---

योऽभ्युपगम्यते पुरुष स्वयमेव प्रभवति परिणमति तत्कालस्वभावविशेषात् [illegible]
[illegible] यावद्भवयोग्यता [illegible] सर्वज्ञत्वाभ्युपगमात् [illegible]
[illegible] तादृशी कर्ता नि ग्राह्यमपि [illegible]
[illegible] इति प्रतिपादितम् । [illegible]
25 [illegible] अनुप्रेक्ष्यम्, न तु [illegible] सामान्यभावविशेषात् [illegible]
कर्तृत्वादिति । न चैवं प्रयोक्तृत्वात् कर्ता भवितुमर्हति यो हि कस्त्रा कर्ता भविता स एव प्रयोक्ताऽपि न तद्वोऽन्य
इत्याद—स्यान्मतमिति । इदं चिन्त्यमिति [illegible] ईश्वरः प्रवर्तकत्वात् [illegible] प्रवर्तकत्वेऽपि
[illegible] ईश्वर एव [illegible] तत्र एव [illegible] ।
तत्र कर्मैव प्रवर्तकत्वेऽभ्युपगमे दोष इत्याह—भूतस्य चेदिति कारणे ईश्वरे कार्यस्य कर्मण [illegible] एव तथाऽभ्युपगम्यते तथा
30 प्रवर्तते तथा [illegible] कर्मेश्वरत्वमेव [illegible] तथापि हि [illegible]
[illegible]
[illegible] ईश्वरस्याभाव एव भवेत्, तथा च [illegible] पुरुषाद्वैतवत् [illegible]

१ सि. क. क । २ सि च सत्ता ।

तथामूर्तेस्तथाप्रवृत्तेस्तत्प्रापणेरित्यादिभिर्युक्तिभिः, तथापि सुतरामतैव तत्रासमञ्जसादेव पुरुषावस्थावत्, ईश्वरो मान्यः तत्रासमञ्जसकार्यादिमत्त्वाच्च ।

अथ यस्मै प्रवर्त्यते यया तेन तत्तत्प्राप्यात्मकं तदित्यत्रोच्यते तस्मात्तर्हि तत्तथामूर्तं प्रत्येकं प्राणिनः कारणात् तद्वशात्तयेश्वरप्रवृत्तेः कृतं त्वदिष्टेनेश्वराख्येन, अथ तत् कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्त्तत इत्यत्रोच्यते कर्तृतां प्रति स्वातन्त्र्यं सिद्धं 5 तस्यैव, पुरुषकर्मजन्यप्रसादराजवदेव ईश्वरस्याप्यन्यतरपुरुषकृतकर्मप्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्यं प्रवृत्तौ फले वा ।

(अथेति) अथ यस्मै प्रवर्त्यते यथा—यथाऽऽपन्नीया न कर्मेश्वरात्मकम्, किं तर्हि ? यस्मै प्राणिने शुभमशुभं वा नरकतिर्यगमर[नर]विचित्रभेदरूपेण येन येन प्रकारेण प्रवर्त्यते तेनेश्वरेण तत्तत्प्राप्यात्मकं तदित्यत्रोच्यते, तस्मात्तर्हि तत्तथामूर्तं प्रत्येकं प्राणिनः कारणात् तस्मात्तस्मात्तथा तथा 10 मूर्तमित्यर्थः, तद्वशात्तयेश्वरप्रवृत्तस्तत्तस्य प्रवर्तने स एवेश्वरः कृतं त्वदिष्टेनेश्वराख्येन, आत्मवशेन तथाप्रवर्त्तयतस्तस्य तस्य प्राणिन ईश्वरस्य नेश्वरस्य, तथाप्रवर्त्यत्वात्, कर्मकरवत् । अथ तत्कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्त्तते—अत्र मत प्राणिभिः कृतमपि कर्मेश्वरकृतमेव, ईश्वरवशात् प्रवर्तमानत्वात्, यथा द्वयोः पुरुषयोस्तुल्यपुरुषकारयोरपि राजा एकस्यैव प्रसीदति नेतरस्येति फलं राजवशेन दृष्टं न पुरुषकर्मवशेन, तथेश्वरवशात्तत्कर्मप्रवृत्तिरित्यत्रोच्यते, कर्तृतां प्रति तावत् 15 स्वातन्त्र्यं सिद्धं तस्यैव—प्राणिनोऽपितेश्वरेण प्राप्यशुभेतरकर्मप्रत्ययप्रसादोत्पत्तेः, तत्र च राज्ञो निमित्तमात्रत्वात्, पुरुषकृतकर्मजन्यप्रसादराजवदेव ईश्वरस्याप्यन्यतरपुरुषकृतकर्मप्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्यं तत्कृतं हि कर्मैवेश्वरप्रसादमुत्पादयति, अन्यतरेण कृतं नेश्वरेणेत्यर्थः, अन्यतरपुरुषकृतकर्मप्रत्ययस्येश्वरप्रसादस्य तेनोत्पादितत्वात्, तस्मात् पुरुषकर्मापेक्षस्यापीश्वरप्रवृत्तेः कर्मप्रामाण्यं प्रवृत्तौ फले वेति । 20

ईश्वरस्य पुरुषकृतत्वात् पुरुष एव सर्वं तथाप्रवर्तयतीति भावः । अथवा ईश्वरस्यैव प्रधानात्मादिवदनुपकारकत्वान्मान्यत्वेऽप्यमान्यः स्यात्, तथा च मानमन्तरापेक्षायामनवस्थाप्रसङ्गान्न—ईश्वर इति । ननु कर्मकृतमेव किन्तु न तदीश्वरात्मकम्, यस्मै प्राणिने येन येन प्रकारेणेश्वरेण कर्म प्रवर्त्यते तत्प्रत्ययं तदित्याशङ्कते—अथेति । प्राणिभिर्हि यथा कर्म कृतं तथा कर्मेश्वरस्याश्री प्रवर्तत इति पक्षनिरासेन तदीश्वर एव प्रवर्तः प्रवर्तकश्च कर्मेति कर्मैव एवेश्वरत्वमित्युत्तरयति—तस्मात्तर्हीति । आत्मवशेनेति कर्मवशेन सतो वा कर्मात्मकत्वमिति एवेदं प्रवर्तकमतीति सर्वे प्राणिन ईश्वरास्तथाता इति भावः । यथा 25 राजा प्रवर्त्यं कर्मकरो नेश्वरः पराधीनत्वात्तथेश्वरोऽप्यधीनात्—कर्मकरवदिति । ननु प्राणिभिः कृतमपि कर्म राज्ञानामेश्वरेण प्रवर्तित एव प्रवर्तत इति मतमुत्थापयति—अथेति । दृष्टान्तं व्याचष्टे—यथेति । समाधत्ते—कर्तृतामिति जीव एव कर्मकर्त्री स्वतन्त्र इति तदुचित एव सिद्धः । प्राणिकृतकर्मणा सम्युक्त ईश्वरः प्रत्युपक्रितकर्मानुगुणं प्रसादी भवतीत्यभ्युपगमात्, कर्मकरकर्मसु राज्ञो निमित्तत्ववत् प्राणिभिः स्वातन्त्र्येण कृतेषु कर्मसु निमित्तत्वमेवेश्वरस्य न स्वातन्त्र्यमिति प्रत्युक्ता सिद्धमिति भावः । तथा च कर्मैव एव स्वातन्त्र्यमीश्वरस्य प्रवर्तने फलदाने च यथा कर्म तथैवेश्वरेण फलदानात्, न 30 तेनानपेक्षणात्—तत्कृतं हीति । प्राणिकृतं तीव्रं । अन्यतरेणेति । तयोः कर्म अन्यतरेणैव पुरुषयोर्द्वयोः कृतं नेश्वरेण

१ सि क. कृतं त्वदिष्टमीश्वराख्यम् । २ सि क. प्रसादवदीश्वर । ३ सि क. कृतवत् । ४ सि क. नेतरेणेत्यर्थः ।

साम्प्रतं तत्रापरेण कर्मणः प्रवृत्तौ फलप्रदाने वा ईश्वरापेक्षत्वात् प्रधानं कारणमित्येतच्च न, यस्मात्—

द्रव्यादिपञ्चकापेक्षं हि कर्म प्रवृत्तौ फलदाने वा स्वतन्त्रम्, सेवादिक्रियाफलप्रत्ययवत् ।

द्रव्यादिपञ्चकेत्यादि यावत् प्रत्ययवत्, द्रव्यं क्षेत्रं कालं भावं भवञ्चापेक्ष्य हि कर्मणां
5 प्रवृत्तिः, इत्यनाशकफलं प्रत्ययं उपलभ्यते, स एव पुरुषः कर्ता द्रव्यं, दाता देवो वा द्रव्यं
दत्तमुपभोग्यं, क्षेत्रं ग्रामनगरारण्यभूम्यादि यत्र लभ्यते फलम्, कालः कस्मिंश्चित् काले दिवा रात्रौ
पूर्वाह्णेऽपराह्णे सन्निधिरिति, भावः प्रसन्नः कुपित इत्यादि, भवः इह्निमह्यामात्रयोः शरीरानुरूपाहार
भूषणादिदानमिति, अत्र प्रयोगः परत्रापि प्राणिकृतफलं प्रतिनियतद्रव्याद्यपेक्षम्, सुखादिक्रियायाः
फलत्वात् द्रव्यादिपञ्चकापेक्षसेवादिफलवत् तस्माद्द्रव्यादिपञ्चकापेक्षमपि कर्म फलदाने स्वतन्त्रम्—
10 [प्रति]प्राणि नियतेः प्रधानम् नेश्वरं तत्कर्मोऽपेक्षते परतन्त्रत्वाच्चेति ।

त्वदभिमतेश्वरस्तु यदि स्वतन्त्रः प्रधानादि वर्तयति ततः प्रतिपुरुषनियामककर्मान-
पेक्षायां प्राणिगणस्य स्थानविग्रहेन्द्रियोपभोगलक्षणाविशेषः, तद्विशेषहेतोरीश्वरस्य समान
त्वात्, स तु विशेषो द्रव्यक्षेत्रकालभावभवापेक्षकर्मनियतेः स्यात् तस्मात् कर्मापेक्षमीश्वरत्वं
सर्वप्राणिनाम् ।

15 त्वदभिमतेश्वरस्त्वित्यादि, अस्तु तावदीश्वरस्य स्वातन्त्र्यं कर्मानपेक्षा च तस्य जगदुत्पा-
दनार्थं प्रधानादि वर्तयतः प्राणिनो कर्मकारणत्वे तदनपेक्षायामत्र दोष उच्यते तथा ततः प्रतिपुरुषेणापि,
पुरुषं पुरुषं प्रति द्रव्यादिपञ्चकत्वेन नियामकं नियतं यदि कर्म न स्यादीश्वर एवाविशिष्टो हेतुः स्यात्,
ईश्वरात्मनः कारणस्याविशिष्टत्वादविशेषः स्यात् कस्य ? देवमानुषतैर्यग्योनात्मप्राणिगणस्य, कीदृग्-
विशेष इति चेदुच्यते स्थानविग्रहेन्द्रियोपभोगलक्षणो विशेषो न स्यात् कस्मात् ? तद्विशेषहेतोरपी
20 श्वरात्मनः समानत्वात् स तु विशेषो द्रव्यक्षेत्रकालभावभवापेक्ष[कर्म]नियतेः प्रतिपुरुषस्य नियामके

फलमित्यर्थः । [illegible] प्रधानमनुमन्यते [illegible]
द्रव्यादिपञ्चकापेक्षमपि कर्म स्वतन्त्रमेवेत्याह द्रव्यादीति । द्रव्यं प्रवर्तयति—स एवेति [illegible] स एव कर्ता
पुरुषो द्रव्यं [illegible] तदपि द्रव्यमिति भावः । भाव इति
[illegible] इत्यर्थः ।
25 [illegible] परत्रापि [illegible]
[illegible]
[illegible]
[illegible]
त्वदभिमतेश्वरस्येति । यदि कर्म न स्यादिति द्रव्यादिपञ्चकापेक्षं हि कर्म प्रतिपुरुष [illegible]
30 [illegible]
[illegible]
[illegible]
[illegible]
न स्यादिति भावः । [illegible] स तु विशेष इति [illegible]

कर्मणि तत्सहकार्यपेक्षविपाके सति स्यात्, दृष्टश्च सोऽस्मदभीष्टप्रतिनियतद्रव्यादिविपाकक्रमः प्राणिगणे प्रवर्तते सति सुखदुःखे केषाञ्चिदभ्युदयः केषाञ्चित् प्रत्यवायः केषाञ्चिदपवर्ग इति । अत्र प्रयोगः अनुपपन्नस्थानविभागेन्द्रियोपभोगाभ्युदयप्रत्यवायापवर्गादिविशेषमिदं जगत् स्यात् तुल्यकारणत्वात् पटतन्तुवत्स्ववत्, यथा पटस्तन्तुकारणत्वाविशेषात्तान्वयो न मार्त्तिकः सौवर्णो वेति जात्याकृतिवर्णा-दिविशिष्टस्वरूपं जगत् स्यात्, न तु भवति तस्मादयुक्तम् । अथवा प्रतिनियतद्रव्याद्यपेक्षविपाकयत्ने ५ केश्वरकारणपूर्वकमेवेदं जगत् प्रतिविशिष्टजात्याकृतिवर्णादिमत्त्वात्, घटपटरथादिवत्, तस्मात् कर्मापेक्ष मीश्वरत्वं सर्वप्राणिनामिति ।

अभ्युपेत्यापि कर्मानपेक्षां तत्र दोषं ब्रूमः—

अनपेक्षा च कर्मणः किं सतोऽसतो वा ? यद्यसत एव क्रियाविलोपः, दृश्यन्ते च ताः यस्मादुक्तश्च वः शास्त्रे 'योगं साधयिष्यन्निष्यादि यावन्निद्रार्तग्राममभावादस्पर्शरक्षितश्च स्या'दि 10 त्यादि, कर्माभावे च सर्वप्राणिमुक्तः तन्निन्द्रियविषयसम्बन्धाभावेन तन्वादिसृष्टिरीश्वरस्या नर्थिका, ततश्च भाव्यभावकभेदाभावादीश्वरकर्मप्रधानाद्यद्वैतकल्पनानिर्मूलता ।

अनपेक्षा चेत्यादि, किमिदमीश्वरस्य धर्माधर्मलक्षणस्य कर्मणोऽनपेक्षा सतोऽसतो, वा किमिति प्रश्नः, किञ्चातः ? यद्यसत एव धर्माधर्मयोरसतोरेवानपेक्षा, ततः किमिति चेदुच्यते क्रियाविलोपः—असतोर्हि तयोः खपुष्पखरविषाणयोरिव काऽपेक्षा, ततश्च हिताहितप्राप्तिपरिहारार्थाः 15 सर्वाः क्रिया विलुप्येरन्, दृश्यन्ते च ताः, यस्मादुक्तश्च वः शास्त्रे 'योगं साधयिष्यन्नित्यादि गताप यावत् निद्रार्तग्राममशानाध्वरक्षितश्च स्या'दित्यादि' (   ) इत्याचारविधायिग्रन्थ सारम्भः । किञ्चान्यत् कर्माभावे चेत्यादि यावन्निर्मूलता, अकर्मत्वात् प्राणिनः सदा मुक्ताः स्युः, ततश्च तन्निन्द्रियविषयसम्बन्धिनो न भवन्ति ततश्च तन्वादिसृष्टिरीश्वरस्यानर्थिका, ततश्च भाव्यभावक-

---

च पाकेऽनुमाने एव एतच कर्मविपाकश्च द्रव्यादिपाकापेक्ष कर्मकृता विपाकं जनयति विपाकोऽपि पाकापेक्षः स्यात 20 मिन्नानि जगन्ति, यतो जगतो वैचित्र्यमुपपद्यते न तु केवलतदीश्वराधीनमिति भावः । [illegible] साधकानु-मान प्रयोग इति जगत् [illegible] हेतुः सूत्रानुसारेण [illegible]—अथ वेति । तत्र जगत् पक्षः प्रतिनियतद्रव्याद्यपेक्षविपाकयत्नकेश्वरकारणपूर्वकत्वं साध्यधर्मः [illegible] प्रतिनियतद्रव्याद्यपेक्षविपाकयत्नकेश्वर पूर्वक [illegible] भावः । तस्मात् [illegible] सर्वे प्राणिन ईश्वरा इत्यु- 20 पपन्नमिति । [illegible] अनपेक्षा चेति । [illegible] हिताहितप्राप्तिपरिहारार्थक [illegible] यद्यसत एवेति । [illegible] [illegible] स्यात् । दोषान्तरमाह—कर्माभावे चेति [illegible] कर्मणोऽभावे प्राणिनां [illegible] 30

---

१ सि क. कर्म विशेषे काद् । २ सि क. निराममकेश्वर । ३ सि क. सर्वं वाक्यं नास्ति । ४ सि. क. 'किमिति प्रश्नः' इति नास्ति । ५ सि क. °मित्यादिरिका ।

सेवाभावः, तस्मात्साम्यभावकर्मेवाभावादीश्वरकर्मप्रधानाभ्यनिर्वैवकस्यनानिर्भूत्वा, एवं तावत्सतः कर्मणोऽनपेक्षा न युक्ता ।

अथ तु सदपि नापेक्षते सः स्वतन्त्रत्वादिति मन्यसे तत आ क्षीणोदितकर्माशय च धर्माधर्माभ्यामकृताभ्यागमकृतप्रणाशौ स्याताम् धर्माधर्मनिरपेक्षत्वात्, स्वभावपुरुषादिवादि
5 मतवत् ।

(अथ स्थिति) अथ तु विद्यमानावेव धर्माधर्मावभ्युदयप्रत्यवायनिःश्रेयसक्रियायां नापेक्षते स ईश्वरः स्वतन्त्रत्वात् प्रयोजनाभावाच्च तयोः, विद्यमानयोरपि निःक्रियायां बलीवर्दानपेक्षवदिति मन्यसे ततोऽकृताभ्यागमकृतप्रणाशौ दोषौ स्याताम्, कथम् ? यथासंख्यमा क्षीणोदितकर्माशयस्य मोक्षाभ्यां-यावत्क्षीणकर्मणोऽपि बन्धाभ्युदयप्रत्यवायसम्बन्धकृताभ्यागमः स्यात्, कुतः ? धर्माधर्म-
10 निरपेक्षत्वात् स्वभावपुरुषादिवादिमतवत्, तथैवाभ्युदयप्रत्यवायकर्माशयस्य भारकारेरपि सुखदुःखम् संगत्वी कृतप्रणाशः स्यात् धर्माधर्मनिरपेक्षत्वात्, स्वभावपुरुषादिवादिमतवदेव, अनिष्टञ्चैतत्, एवं तावदीश्वरस्य कर्मानपेक्षाऽनिष्टापत्तेरयुक्ता ।

अथैवं कर्मापेक्षः प्रवर्तत इति मन्यसे ततस्तान्येव कर्माणि कर्तॄणि भवितॄणि ईश्वराणि, तेषां तस्यापि तथाभावयितृत्वात्, न स तानि तथाभावयति तथाभाव्यमानत्वात्, यथा च
15 पृथिव्युदकादीन् व्रीहिरेव तथाभावयति, पृथिव्याद्यपेक्षोऽपि तथापत्तेः, न पृथिव्यादयस्य पाऽन्नाद्यपत्तेः तेषामसत्त्वात् असत्त्वज्ञानाभावस्यासत्त्वात् खरविषाणवत् अस्वतन्त्रत्वाच्छब्दादि वत् भवति कर्ता स्वतन्त्रः सर्वः पुरुषः प्रवर्तनप्रवृत्तत्वात्, प्रवर्तयति कारणं तथाभावमापद्यते घटादि, तथाभवनप्रवृत्तत्वात् प्रवर्तयितारमन्तरेणाभवनादवृत्तत्वात् तन्तुपटवत् ।

(अथैवमिति) अथैव विधानिष्टापत्तिभ्याद्रूत्वं कर्मापेक्षः प्रवर्तत इति मन्यसे ततस्तान्येव
20 कर्माणि कर्तॄणि स्वतन्त्राणि भवितॄणीश्वराणि, कस्मात्? तेषां तस्यापि तथाभावयितृत्वात्—यथाय-मपीश्वरं तेन तेन प्रकारेण भवन्तु तान्येव कर्माणि, न स तानि कर्माणि तथाभावयति, कुतः ?

भाव्यवस्तुभावेन भाव्यभावकर्मेवाभावादीश्वरप्रधानस्य तत्त्वादीत्यत्र [illegible] भाव्यभावकर्मेवाभावात्सते [illegible] ।
[illegible] कर्मणोऽनपेक्षाया दोषमाहर्तुकाम—अथ स्थिति । धर्माधर्माविति [illegible]
25 [illegible] धर्माधर्मौ [illegible] यदि नापेक्षते तर्हि [illegible] स्यादिति भाव । [illegible]
दोषोऽपि तु [illegible] श्रेयांसि [illegible]
[illegible] स्यातामित्याह—तत इति । [illegible]
[illegible] इति भाव । [illegible] मन्यते तर्हि [illegible]
भाव्यभावकर्तृत्वेन [illegible] त्वेनेश्वरत्वं न तु [illegible]—अथैवमिति । तान्येव
30 कर्माणीति कर्तॄणीति [illegible] । न स तानीति

1 सि क. तथाय ।

तथाभाव्यमानत्वात्, प्रधानेन शब्दादिवदिति वक्ष्यमाणदृष्टान्तत्वात्, यथा च पृथिव्युदकादीन् व्रीहिरेव तथाभावयति, पृथिव्याद्यपेक्षोऽपि तथाऽऽपत्तेः, न पृथिव्यादयः, तथानापत्तेः, एवं कर्माण्येवेश्वरमपि, तथाभावयितृत्वात्, न स्वविदीश्वरः, तथाभाव्यमानत्वादिति स्यान्मतम् पृथिव्युदकादीन्यपि भावयन्त्येव व्रीहित्वेन[व्रीहि]मनापन्नान्यपीत्येतदायुक्तम् तेषामसत्त्वात्, असत्त्वञ्चानापन्नत्वात्, खरविषाणवदिति सन्निधिमवचनरूपमेव प्रकान्तमेव न्यायं वर्णयति, असत्तत्त्वाच्छब्दादिव- दिति, एष दृष्टान्तः सर्वत्र प्रधानकारणत्वसाधर्म्येणोपात्तः अपिकाम् प्रति, यथा प्रधान[स्य]स्वातन्त्र्या- त्तत्कारणत्वं गमयति शब्दाद्यात्तीयकारणस्याभावप्रसङ्गात्तदयोपामिति भाव्यत्वस्य व्यक्तस्येव प्रधा- नता भवतीति यथा तथैवोक्त तथैवेश्वरोऽस्वतन्त्रत्वात् कर्मापेक्षत्वादकारणं तान्येव कारणानीति गमयति ताभिरेव त्वदुक्ताभिरुपपत्तिभिरतो यदुक्तं त्वदुक्तस्य एवोपपत्तयः सर्वमायीश्वरतां साधयन्तीति तत्साधु, तदुपपदमाह—भवति कर्त्तेत्यादि, प्रागभ्यास्यातान्येव भवन्नेकार्थपदानि यावत्तन्तुपटवदिति, यथा तन्तव एव पटनिष्पादनेन भवन्तः तथाप्रवचनभूतत्वात् पटकारणानि तथा पुरुषा एव कर्तार इति ।

ईश्वरस्यापि च तन्त्वेश्वरादिवत् पूर्वपूर्वशाकतारतम्येन प्रवर्त्तकाः सर्वाः एव पुरुषाः, कर्मणि कृताः सूत्रातिशयप्रकृपस्य, सन्निहिततद्विधशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः, स च स्वतन्त्रः, तत्प्रवृत्त्यापत्तेः, आ ईश्वरात् प्रवर्त्तयितृत्वात् ।

ईश्वरे न तानि कर्माणि तथाभावयतीत्यर्थः प्रधानेन शब्दादिवदिति अनुपदमेवासौ दृष्टान्त उपपादितोऽस्वतन्त्रत्वाच्छब्दा- 15 दिवदिति । यथा चेति यथा हि पृथिव्याद्यपेक्षोऽपि व्रीहिस्तेन तेन प्रकारेण भवन् पृथिव्यादीन् भावयति व्रीहिरेव हि अङ्कुरादिरूपेण भवति न तु पृथिव्यादयो व्रीहिं भावयन्ति पृथिव्यादीनामङ्कुरादित्वेनानापत्तेः एवं कर्माण्येव तेन तेन प्रकारेण भवन्तमीश्वरं भावयन्ति तथा भावयितृत्वात् तादृश्यात् कर्माण्येवेश्वरमपि न त्वीश्वरः कर्माणि भावयति भाव्यमानत्वादिति नात्मेश्वर इति भावः । ननु भावान्तरतामनापन्ना अपि पृथिव्यादयः सन्निधानमात्रेण भावयन्त्येवेत्याशङ्कते स्यान्मतमिति । एवं सति पृथिव्यादयो न सन्त्येव अनापन्नत्वात्प्रत्येकमविशेषेण खपुष्पवदिति सन्निधिमात्रभवनमित्यभ्युपगमपरे त्वयैवोच्ये 20 न्यायोऽत्र प्रवर्तितुमर्हति—तेषामसत्त्वादिति । दृष्टान्तेन कर्तृत्वनिवृत्तेश्वरस्येषु हेत्वन्तरमाह—अस्वतन्त्रत्वादिति । सर्वधर्मेषु प्रधानमेव कारणं सर्वस्य तत्तत्कार्यभावेनोन्मेषात्, न तु भूतादीन् प्रति सन्निहितमपि शब्दादि कारणमस्वतन्त्रत्वादिति [illegible] प्रधानमपि च सर्वकार्यापेक्षत्वात्, तथान्यस्य कारणोऽन्येन प्रधानेन प्रधानमप्यन्येन व्यापारितत्वा- त्कर्मैव भाव्यते इति व्यक्तस्य शब्दादिसाम्यरूपस्य प्रधानस्यापि यथाऽप्रधानता त्वयेष्यते तथैवेश्वरोऽपि कर्मनियन्त्रितत्वेना- स्वतन्त्रत्वात् प्रधानं कारणमपि तु कर्माण्येवेति भावः । तदेवं कर्मतामीश्वरस्य कर्माधीनभूताः प्रभवन्तोऽपीश्वरा एवेत्याशयेन सर्वत्रा- 25 पीश्वरत्वं पूर्वोक्तं स्मारयति—यदुक्तमिति । सर्वस्यापीश्वरत्वमेवेश्वरतामभिहितमायन्वेनोपनयति—भवति कर्त्तेति वा पुरुषः स एव भवति यस्य कर्ता स एव पुरुषः योऽसौ कर्ता स एव कर्ता कर्त्ता एव हि प्रवर्तयितृत्वेन वर्तते प्रवर्तयति कारणं तद्दृष्टान्तमापद्यते यथा प्रवर्तमानस्यैव प्रधानं धर्म्यादिभावमापद्यते सामान्यतोऽयं प्रवर्तमानस्यैव पटभवनेन प्रवृत्तस्यापि तन्तवः पटभवनं प्रति तन्तुकार्यं तन्तुभिः प्रवर्तितत्वात्, न च पटभवनं प्रवर्तयितारमन्तरेण भवति, तथैवेश्वरोऽपि प्रवर्त्यमानत्वेन भवनात् प्रवर्तयिता कर्मादयः सर्वे पुरुषा एवेति सर्वप्रवर्तितामीश्वरत्वमिति भावः । ईश्वरप्रवर्त्ये प्रेक्ष्य जन्ता 30 अनुसरति कर्मप्रधानपक्षेऽपि यस्मात् ईश्वरस्यापि चेति । यथा धर्माधर्मादीनामपि च तन्त्वेश्वरादिवत् पूर्वपूर्वशक्त- तारतम्येश्वराः प्रवर्तकत्वेन तथा तथा विविधेषु सन्निहितशक्ति प्रतिविशिष्टबुद्धित्वादेश्वरस्यापि प्रवर्तकं कर्म तदेव अपर- कथा तथा विविधेषु सन्निहितशक्तिमत् कर्मणैव कर्मनियन्त्रितत्वात् पुरुषोऽपि कर्माधीनत्वात् तथाविध इति भावः ।

१ सि क. [illegible] । २ सि क. [illegible] । ३ सि क. [illegible] ।

ईश्वरस्यापि चेत्यादि, तासामेवोपपत्तीनामितो मुग्धो भावयत्ननेनापि मयेन, यथा त्वया प्रागुपपादित सुवचा पूर्वपूर्वक्रमतारतम्येन सन्निहितवदिसवशक्तिर्विशिष्टबुद्धिरिति तयेहापि तामिरेवो-पपत्तिभिरेतैरेव तत्संबन्धादिभिर्दर्शनैः कर्मणि वृत्तेः—कर्मनिमित्तत्वात् उत्कर्षापकर्षस्य, कर्मणो पुरुषत्वात् सर्व एव पुरुषः सन्निहितवदिसवशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः—प्रतिविशिष्टबुद्धिना तेनैव

5 भरेण मान्येन शास्त्रकारैर्विपश्चिद्भिरपि प्रमाणीकृत[क्रियः]वरिक्रियाफलपरिज्ञानार्थत्वाच्छास्त्रकारप्रवृत्ती-नाम् सिद्धशास्त्राणामनतिशयत्वात्, स च स्वतन्त्रः तत्प्रवृत्त्यापत्तेः तेन प्रकारेण कर्मप्राप्तिप्रवृत्तिपरीत्य-रत्वापि प्रवृत्त्यापत्तेः [मा]ईश्वरात् प्रवर्तयितृत्वादिति—मा ईश्वरात् यावदीश्वरत्वात् प्रवर्तयितृत्वात् ईश्वरस्य प्रवर्त्यत्वात् कारणानि सर्वपुरुषाः ।

शक्तिमत्प्रवृत्तीत्यादि यावत्सत्त्वादिपदिति पूर्ववत् सर्वव्यक्तिप्रवृत्त्यात्मकत्वादस्य सर्व-

10 मूर्तिता एवमेव चास्य पृथिव्याद्यष्टमूर्तितोच्यते, तासु तस्यैव निमित्तत्वात्, प्रवृत्तिफलो-त्कर्षाभावप्रसङ्गात् कर्म एव कारणं नेश्वरादि, इतरथा ईश्वरादेः प्रधानादेर्वा प्रवृत्तयः फलं वा सुखादि तस्यैकरूपत्वादुत्कर्षापकर्षौ न स्याताम्, दृष्टौ च तौ न निर्बीजेश्वरकर्मचारेरणात्, अतोऽन्यग्निसर्वधर्मं कारणमस्तीति ।

शक्तिमत्प्रवृत्तीत्यादि, ईश्वरस्यापि तेषामेव शक्तिमतां पुरुषाणां शक्तिसाकल्य[सन्निध्य]-

15 सन्निध्योः प्रवृत्त्यप्रवृत्तिदर्शनादिति तदेवोपपत्तिजातं स्मारयति यावत्सत्त्वादिपदिति आदिग्रहणाद्योक्त प्रवृत्तिपरिमाणादि पूर्ववदेव ग्रन्थं चा[ति]दिशति यावदेवास्य सर्वत्वात् सर्वमूर्तिता, एवमेव चास्य पृथिव्याद्यष्टमूर्तितोच्यत इत्येतस्मादेवारादीयो ग्रन्थः सर्वो ग्रहम्यः, तामिरेवोपपत्तिभिः सर्वप्राणीश्वरत्वे तदपेक्षेति पुनरपि चोत्कर्षापकर्षदर्शनादित्यादिरीश्वरसर्गद्योतनार्थो ग्रन्थः प्रवृत्त्युद्भवफलेऽपि तदेव यावत् पुरुषाद्यप्रवृत्तेरेवोत्कर्षापकर्षौ न निर्बीजेश्वरकर्मचारेरणादिति कर्मकारणार्थो गतार्थः, तस्मात्

20 कर्मापेक्षत्वात् सर्वसर्वात्मकत्वात् सर्वेश्वरतेति ।

एतदेव व्याख्यानमपि—तयेहापीति । प्रतिविशिष्टेति तथेश्वरेण परैरपि सर्वैः शास्त्रकारैः क्रियाया प्रमाणीकृतत्वात्, प्रतिविशिष्टबुद्धिभिः प्रमाणीकृता क्रिया यस्य सर्वपुरुषस्यासौ प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रिय इति विग्रहः । ईश्वरापेक्षमेव सर्वं प्रवर्तत इति प्रत्यवस्थानतो भेद एव कर्मापेक्ष एवेश्वरः प्रवर्तत इति प्रत्यवस्थान चोच्यते इति दर्शयन्नाह—शक्तिमदिति तत्र चेश्वरस्यापि प्रवर्तिता कर्मापेक्ष्य पुरुषविशेष तदभावे तदभावप्रसङ्गात् न हि तत्र प्रवर्तकत्वमपेक्षा पुरुषे

25 स्वातन्त्र्यहते अपेक्षते चेश्वर पुरुषशक्तिमतोऽर्थो तथा प्रवर्त्यं कर्मतया पुरुषापेक्षेवनात् तस्य एव प्रवर्तकत्वम्, तस्मादे प्रधानप्रतिबन्धमर्थेऽपि तत्र एव यथा प्रवर्तकत्वं तथा कर्मैव एव प्रवर्तकत्वं तत्प्रधानत्वादेवेति भावः । सर्वेषां प्राणिनां प्रवृत्ती कर्मैव एव कारणत्वम्, सम्बन्धविशिष्टसामर्थ्यात् सर्वेण सर्वत्वादु कर्मैव एव निमित्तत्वात्, सर्वमूर्तित्व तस्यैव निमित्तरूपत्वात् पृथिव्यादिमूर्तिमपि तासु तस्यैव निमित्तत्वादिति पूर्ववदेव सर्वं व्यवस्थितम्—यस्य सर्वत्वादिति । एवमेव पूर्वं ईश्वरकारणवादिपरम्परया कर्मकारणपरतया चैव इत्याह—इत्येतस्मादेवेति । तदपेक्षेति ईश्वरकारणमर्थ-

30 परेण कर्मकारणमर्थं चार्थमिति भाव । ईश्वरकारणत्वे न प्रतिनियतोत्कर्षापकर्षप्रसङ्ग इत्यादि स एव कर्मापेक्षकारणत्वे ईश्वरकारणत्वादिसमर्थेन प्रयोजनाद्यापादनेन इत्याह—पुनरपि चेति अत्र सर्वत्र पूर्वग्रन्थसाम्येनैव सूत्रमनुमितम्, कर्मोपलभ्यमानमतीन्द्रियो निमित्तपरित्व पूर्वविधमनुसारेण तत्र सूत्रमनुमितत्वात् । कर्मापेक्षमुत्तमत्वेऽपीश्वरस्य कारणत्वाप-

---

१ सि क. प्रमाणीकृत्य । २ सि क. प्रकृर्णतो ।

कर्मापेक्षत्वेऽपि न स्वार्थमीश्वरकारणत्वं तदभावे प्रवृत्त्यभावात्, दार्वपेक्षरथकारकारणत्ववदिति चेन्न, इतरत्रापि तुल्यत्वात्, ईश्वरापेक्षत्वेऽपि न कर्मैश्वर्यं तत एव हेतो[1], रथकारापेक्षरथदारुवदिति, प्रवर्तयितृत्वाच्चेश्वरस्य दासस्य स्वामिवत् तच्च कर्मणः सिद्धम्, प्रवर्त्यत्वाच्चेश्वरस्य, तथाप्रवर्तकं कर्मेति पुरुष एवेश्वरः सर्वं इति ।

कर्मापेक्षत्वे इत्यादि यावद्रथकार[कारण]त्ववदिति चेत्—स्यान्मतं कर्मापेक्षत्वेऽपि न स्वार्थमीश्वरकारणत्वं तदभावे प्रवृत्त्यभावात् यत्र यदभावे प्रवृत्त्यभाव प्रवर्तकस्य तत्रेश्वरस्यापि नैश्वर्यं दृष्टम्, यथा रथकारप्रवृत्तौ रथार्थं दार्वाद्यपेक्षणमिति चेन्मन्यसे तन्न, इतरत्रापि तुल्यत्वात् तत्कथमिति चेत् प्रयोगत एव दर्श्यते विपर्ययसिद्धिः तद्यथा—ईश्वरापेक्षत्वेऽपि न कर्मैश्वर्यम् तत एव हेतोः, रथकारापेक्षरथदारुवदिति विरुद्धैकान्तिकः, तदुपसंहृत्याह प्रवर्तयितृत्वाच्चेश्वरस्येत्यादि यावत् पुरुष एवेश्वर[ः सर्वं] इति—प्रवर्तयिता हीश्वरो दासस्य स्वामिवत्, तच्च—प्रवर्तयितृत्वं कर्मणः सिद्धमुक्तविधिना प्रवर्त्यत्वं चेश्वरस्य तथा प्रवर्तकं कर्म, कर्मणा पुरुषः प्रवर्त्यते इति प्रकृतत्वाद्गम्यते, इति-शब्दो हेत्वर्थे, तस्मात् पुरुष एवेश्वरः सर्वं इति, एवं कर्मेश्वरतापि तु यथैव तयोरत्र भावयिष्यते, पुरुषस्य तावत् सर्वस्येश्वरत्वमुक्तमिति ।

एवं प्रतिघातप्रसङ्गोऽपि सापेक्षप्रवृत्तित्वाद्रथकारवत्, यथा रथकार उपादानोपकरणानामसामर्थ्यवैकल्ययोः प्रतिघातस्तथाऽप्यचितकुम्भकमनुजिघृक्षतः तद्विपरीतञ्चोपघित्सत ईश्वरस्य यद्यप्रतिघातः स्यात् स्यात् स्वातंत्र्यम्, न तु भवति पुरुषकर्मप्रत्ययनेश्वर प्रवृत्तेः प्रतिघातदर्शनात्, अन्यथा शुभकर्माणं दुःखेनेतरञ्च सुखेन योजयेत् तच्च नेष्टमित्यनीश्वरः सः ।

स्यान्मतमाशङ्कते—कर्मापेक्षत्वेऽपीति । कर्मेश्वरस्य कर्मापेक्षप्रवृत्तिमत्त्वेऽपीश्वरकारणता न स्वार्था ईश्वराभावे कर्मणामचेतनानां प्रवृत्त्यभावात्, यथा रथकारो रथनिर्माणाय दार्वाद्यपेक्षप्रवृत्तिमानपि तदभावे दार्वादीनां प्रवृत्त्यभावात् रथकारस्य ऐश्वर्यं प्रवर्तकत्वात्तदपेक्षत्वेऽपि प्रवर्तक इति भवत—स्यान्मतमिति । ईश्वर एव प्रवर्तयिता न कर्मेत्यत्र निमित्तस्याभावात्तदुपन्यासतुल्यैव कर्मैव प्रवर्तयितृत्वमिति साम्यतो दर्शयति—इतरत्रापीति । तत्तुल्यो हेतुरन्यत्रापि साधयन् स विरुद्धो भवतीत्याख्येनाह—प्रयोगत एवेति । कर्मणामप्यैश्वर्यमीश्वरापेक्षा नास्त्येवेति सूच्यते तत एवेति । तदभावे प्रवृत्त्यभावादिति हेतोरित्यर्थः । रथकारापेक्षत्वेऽपि न हि दार्वैश्वर्यमिति दृष्टान्तमाह—रथकारेति । ईश्वरस्य प्रवर्तयितृत्वं कर्मणः पूर्वोक्तविधिना सिद्धमत कर्मेश्वरत्वमिति कर्मात्मा पुरुष एवेश्वरो दासस्य स्वामिवदिति तथैवादो नेश्वरः कर्मैव प्रवर्तकत्वात्तत्पुरुषस्यैवेति—प्रवर्तयितृत्वाच्चेति । यो हि प्रवर्तयिता स एवेश्वर उच्यते दासस्य स्वामिवत् कर्म च प्रवर्तयितृ ततः स एवेश्वर तदीश्वरस्तु प्रवर्त्य इति भावः । ईश्वरस्यानीश्वरत्वं प्रकारान्तरेणाह—एवमिति । परापेक्षप्रवृत्तौ कदाचिदपि प्रतिघातो दृश्यते यथा रथकारेऽसमर्थमुपादानं निष्फलानि चोपकरणानि परिप्राप्य प्रतिघातो दृष्टः तथेश्वरोऽपि कर्मापेक्षप्रवृत्तेः शुभान् निग्रहीतुं दिव्याद् परिपालयितुमिच्छन्नपि कदाचिद् प्रतिहन्यत एवेति भावो वर्तते तदिच्छाविघातात् तदभावे हि तस्य स्वातन्त्र्यं स्यात्, न चैवं दृश्यते सापेक्षप्रवृत्तेः प्रतिघातस्याप्यत्यागात्, ईश्वरो हि पुरुषकृतकर्मापेक्ष प्रवर्तते यदि तु स्वतन्त्र प्रवर्तेत तर्हि शुभकर्माणं दुःखेनाशुभकर्माणं सुखेन योजयेत् न चैवमस्ति तस्मात् परापेक्षत्वात् स्वातन्त्र्याभावादनीश्वर एवेति भावः । इदमेव व्याकरोति—

---

१ सि. क. कर्मैश्वर्यं । २ सि. क. कर्मेण पुरुषः प्रवर्त्यते ।

एव प्रतिघातप्रसङ्गोऽपीत्यादि, क्रियान्यत् प्रतिहन्यते च त्वदभिमतेश्वरः सापेक्षप्रवृत्तित्वात् रथकारवत् अस्य साधनस्य व्याख्या यथा रथकार इत्यादि, उपादानं दारु, उपकरणानि वास्यादीनि तेषामसामर्थ्यं वैगुण्यं सततमेव, वैकल्यं सान्निध्याभाव एव तत्र प्रतिघातः दृष्ट इति वाक्यशेषः, तथेहाविशेषार्थोऽधिकं सापेक्षप्रवृत्तिसाधर्म्यानुगमेनोपनयनमीश्वरे द्रष्टव्यम्, वैधर्म्येण तु दर्शयति अपचितपुण्यमनुग्रहीतुम् इत्यादिना, पुरुषमपचितशुभकर्माणमनुग्रहीतुमिच्छतस्तद्विपरीतमापादयितु-मिच्छतश्चेश्वरस्य यद्यप्रतिघातः स्यात् स्यात् स्वातन्त्र्यम्, न तु भवति, अपेक्षत्वस्य कर्मणः स्वकृतकर्मणः प्रसवेन तद्वशेनेश्वरस्य प्रवृत्ति[प्रति]घातदर्शनात् न चेदेवमिष्यते शुभकर्माणं दुःखेन इतरञ्च सुखेन योजयेत् यथा चाकृताभ्यागमकृतप्रणाशौ स्यातामित्युक्तम् तच्च नेष्टम् यस्मात् पुरुषकर्मप्रसवेनेश्वरप्रवृत्तिप्रतिघातोऽस्ति, प्रवृत्तिप्रतिघाताच्च नैश्वर्यम् तस्य प्रतिघातत्वात्, पृथग्-ज[न]वदनीश्वरः स इति ।

यदुच्यते सर्गादौ धर्माधर्मविकलानां शरीरेन्द्रियविषयोत्पादने निरपेक्षोऽप्रतिहतत्व-स्वक्रियत्वादेव शरीरादीनुत्पाद्य बुद्धानां धर्माधर्ममर्यादामुपदिशति, तपोदानयज्ञादि कुरुत । हिंसां मा कार्ष्टेति मध्यकाले च तेषां प्राणिनां यथास्वं धर्माधर्ममर्यादामनुतिष्ठतामनुष्ठाना-नुरूपेण फलेनानुग्रहं करोति यदा तदा सापेक्षोऽप्रतिहतस्वाक्रियत्वादेव, ये पुनस्तदुपदिष्ट-मोक्षमार्गप्रस्थितास्तांश्च सायुज्यं गमयति, पुनरन्तकाले च शरीरेन्द्रियसमूहस्य तेषां धर्मा-धर्मावपि संहृत्य तान् दिवससंध्यायां परिश्रमाभिभूतान् बालकान् पुत्रकानिव पिता प्रलय-पार्यां स्वापयतीत्यन्तेऽपि निरपेक्षाप्रतिहतस्वातन्त्र्यः स एवेष्ट इति ।

यदुच्यत इत्यादि यावत् प्रलयपार्थं स्वापयतीति, कालभेदेन सापेक्षनिरपेक्षप्रवृत्तिपक्षयो-रभ्युपगमादुभयथापि प्रवृत्तिप्रतिघातासम्भवाददोषः तद्यथा सर्गादौ धर्माधर्मविकलानां शरीरेन्द्रिय-विषयोत्पादने निरपेक्षोऽप्रतिहतस्वक्रियत्वादेव शरीरादीनुत्पादयति, तांश्चोत्पाद्य बुद्धानां—ज्ञानोत्पत्तिमतां धर्माधर्ममर्यादामुपदिशति—तपोदानयज्ञादि कुरुत हिंसां मा कार्ष्ट—हिंसानृतस्तेयागम्यगमनादीनीति तयोश्च धर्माधर्मयोः सीमाच्छेदेन व्यवस्थां मर्यादामुपदेशेन व्यवस्थापयति, मध्यकाले च तेषां प्राणिनां यथास्वं धर्माधर्ममर्यादामनुतिष्ठतामनुष्ठानानुरूपेण फलेनेष्टेनानिष्टेन वा विषयोपभोगलक्षणेनानुग्रहं

क्रियान्यदिति । रथकारे यथा दृष्टान्ते उपदिष्टे तथेश्वरेऽप्युक्ते स्यात्—तथेत्यतीति ननु यथा प्रतिपक्षेऽन्यत्रे-श्वरस्य निरपेक्षा प्रवृत्तिरस्त्येव नास्ति तत्कथं प्रतिघात मध्यकाले च पुरुषकर्मानुरूपेण तस्य प्रवृत्तेर्भवति तथापि प्रतिघात इत्याशङ्क्य—यदुच्यत इति ग्रन्थेन पूर्वपक्षं दर्शयति—कालभेदेनेति । धर्माधर्मेति [illegible] [illegible] सर्वथा विनाशात् [illegible] धर्माधर्माभ्यां प्राणिनां [illegible] न [illegible] इति [illegible] [illegible] भाव । [illegible] शरीरेन्द्रियविषया [illegible] तेषां धर्माधर्मौ [illegible] [illegible]—शरीरादीनीति । मध्यकाले [illegible] मध्यकाले चेति [illegible]

1 सि क [illegible] । 2 सि क. विशेषः । 3 सि क. के । 4 सि क रथकारे । 5 सि क. [illegible] । 6 सि क. धर्मेऽधर्म । 7 सि क. स्थापयति । सि क. विषयोपभोग० ।

करोति यदा तदा सापेक्षोऽप्रतिहतस्वशक्तित्वादेव, स्यान्मतं धर्मानुष्ठानफलोपभोगेनेष्टेनानुग्रहो युज्यते, कथमधर्मानुष्ठानफलोपभोगेनानिष्टेन युक्त इत्यत्रोच्यते अयमनुग्रह एव तेषाम्, तदृणमोक्ष णादिति । ये पुनस्तदुपदिष्टमोक्षमार्गमाश्रिताः तांश्च मोक्षमार्गोपसेविनः सायुज्यं गमयति, कोऽसौ मोक्षमार्गः? माहेश्वरो योगविधिः, तदात्मना सह युक्त इति सयुक्, तद्भावः सायुज्यं तेषामीश्वरसा- द्भावः, तं गमयति भवति, एवं मन्ये सापेक्षमैश्वर्यम् । पुनरप्यन्त्यकाले च शरीरेन्द्रियभूतवत् यथा 5 शरीरेन्द्रियाणि भूतान्यपि विषयांश्चोपसंहरति तथा कल्पक्षयकाले तेषां धर्माधर्मावपि संहृत्य तान् पुरुषान् सर्गाहनि संसृजतः तेन धर्माधर्मफलेनेष्टानिष्टोपभोगासम्भवेन निवृत्तसंस्थायां परिश्रमाभिभूतान् स्वाप- यन् पुत्रानिव पिता सर्वपुरुषान् संसारहेतुभूतधर्माधर्मावुपसंहृत्य प्रलयक्षपायां स्वापयतीत्यन्येऽपि निरपेक्षाप्रतिहतसामर्थ्यः स एवेष्टः, तस्मादुभयथाऽप्यपेक्ष्यानपेक्ष्य च तदैश्वर्यसिद्धेरदोष एव दोषाभि- मता त्वयोक्ताविव परपक्ष इति । 10

अत्र वयं ब्रूमः कर्मणामेव तन्निरपेक्ष्य प्रवृत्तौ तस्य प्रतिघातादपरिहृतपूर्वदोषत्वाच्च किञ्चिदेतत्, तत्कारित्वात्तज्ज्ञत्वमिति यत्सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव, अस्यानर्थकार्यप्रवृत्त त्वात् बालादिप्रवृत्तिवत् धर्माधर्ममर्यादोपदेशप्रवृत्तेरनर्थकार्यविषयत्वात्, न च धर्माधर्मयोः शरीरादिकारणत्वम्, कारणलक्षणाभावात्, यस्याभावे यस्याभावो यस्य च भावे यस्य ध्रुवो भावस्तत्कारणमितरत् कार्यमिति हि कारणलक्षणम्, न च धर्माद्यभावे शरीराद्यभावः, सर्गादौ 15 तदभावेऽपि प्रभुसृष्टेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्मादिभावेऽपि प्रलयकाले शरीराद्य भावाभ्युपगमाच्च, तस्योपदेशसाफल्यानभिज्ञत्वञ्च निष्कारणशरीरेन्द्रियादिसर्जनादादिकाले, भवदफलकुशलाकुशलसंहारादन्त्यकाले च ।

(अत्रेति) अत्र वयं ब्रूमः, कर्मणामेव तन्निरपेक्ष्य प्रवृत्तौ तस्य प्रतिघातादनैश्वर्यम्, सृष्ट- भाविसंसारकाले सर्गादन्त्यमोक्षकालाभ्यागमकृतविप्रणाशादिदोषाः तदवस्था एवेत्यपरिहृतदोषत्वाच्च 20 किञ्चिदेतत्, अन्योऽपि च दोषः—तत्कारित्वात्तज्ज्ञत्वमिति यत्सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव, यदपि

स्यादधर्मफलोपभोगेन कथं दुःखमित्याशङ्क्य समाधत्ते—स्यान्मतमिति युक्त इति, अनुग्रह इत्यादिः । तेषामज्ञो यदि ह्युपमेनानुग्रहोऽर्थापत्तिः तेऽधर्मस्य फलिनो भवेयुः तत्फलाभावात्, तत्तादृशेन मोचयितुं तत्फलदानेनानुग्रहं करोत्यपेक्षा- रूपेण—अयमनुग्रह एवेति । माहेश्वर इति योगविधिरिति महेश्वरसम्बन्धियोगविधानमित्यर्थः भगवता वाचा कायेन च मनसापि सर्वकर्मार्पणपूर्वको भावनाविशेष स च भक्तिविशेष आत्मनो हृत्पुण्डरीके प्रतिष्ठिते परमेश्वरे भवति 25 यमनियमाद्यभ्यासतो विच्छिन्ने निरन्तरमात्मनि भगवत्स्वरूपानुभवात् तत्सायुज्यमविच्छिन्नं [illegible] सोऽयं भक्तिविशेषो माहेश्वरो योग उच्यत इति भावः । सायुज्यमर्थं व्याचष्टे—तदात्मनेति मोक्षमार्गोपसेविनस्तान् आत्मसाद्भावं गमयतीति भावः । अन्त्यकाले शरीरेन्द्रियभूतानि यथोपसंहरति लोकस्य तथैव जीवानां धर्माधर्मावप्युपसंहरतीत्याह—पुनरपीति । एवमुभयथापि परमेश्वरस्यापि दोषाभावदर्शने दोषतुल्यता भवतोऽप्रतिपाद्य इत्याह—तस्मादिति । सर्वेषां प्रवादिनां मतेन ऐश्वर्यप्रवृ- त्तेरपि धर्माधर्मस्य कर्मापेक्षया च प्रलयकाले भवति तन्निरपेक्षप्रवृत्तावनैश्वर्यदोषस्य कर्मानपेक्षत्वे च सृष्टिकाले 30 प्रलयकाले च कृतनाशाकृताभ्यागमादिदोषाणां पूर्वोक्तानामपरिहारात् [illegible] भवतापि दोषमनुद्धरता [illegible] इत्याशयेनाह—अत्र वयं ब्रूम इति । दोषान्तरमप्याह—अन्योऽपीति यस्य कर्तृत्वं तस्य ज्ञानं तज्ज्ञत्वम्, यो यत्करोति स तज्जानातीति व्याप्तिः [illegible] ।

धर्माद्यस्त्वे तस्य सर्वज्ञत्वं सर्वकारित्वात्, करणस्य ज्ञानाभावात् सर्वज्ञेत् कर्तृत्वं सर्वमसौ वेत्तीति सर्वकारित्वात् सर्वज्ञ इति तदपि नैवोपपद्यते, असामर्थ्यकार्यप्रवृत्तत्वात् बाह्यनिमित्तवत् अनुग्रहक्रियासामर्थ्योपयोगोऽसौ, बाह्यनिमित्तसमीक्षितप्रवृत्तित्वाविशेषवद्भया कल्पनयाऽस्माकं त्वया प्रतायी- क्रियते, किं कारणं? धर्माधर्ममर्यादोपदेशप्रवृत्तेरनर्थकार्यविषयत्वात्—अनर्थकौ धर्माधर्मावयं तत्र
5 धर्माधर्मोपदेशोपदेशस्य न च तयोर्धर्माधर्मयोः शरीरादिकारणत्वम्, विनापि धर्माधर्ममर्यादया सर्गादौ प्रसृतेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्माधर्ममर्यादायां सत्यामेव च प्रलयकाले शरीराद्यभावाभ्युपग- माच्च ईश्वरसामर्थ्यादेव, तस्मात्तयोर्नास्ति कारणता करणस्वभावायोगात्, कथं तद्योग इति चेदुच्यते, न च धर्माधर्माव् इत्यादिना ग्रन्थेन, तयोः कारणाभिमतयोरभावेऽपि शरीरादेः कार्यस्य भावं भावेऽपि चाभावमुपदेशसाफल्याभिप्रेतत्वात् दर्शयति व्यवहारव्यभिचारसद्भावसद्भावानयव्यभिचार इति गतार्थ-
10 त्वान्न विप्रियतेऽस्माभिः ।

किञ्चान्यत्—

यथा चोपदेशानभिज्ञस्य तस्य तथा प्राणिनामनुग्रहक्रियाया अपि, यदा सर्वेषं न्यायस्तु तथैव स्थितानां प्राणिनां मृतकवत् तेषां शरीरमुत्पादयामि धर्माधर्ममर्यादां प्रणयामि तत्र प्रवर्तयामि तत्फलैरनुपभामि तान् फलानुरूपमुपभोगं विधायानुगृह्णीयामुपभोगविभाग-
15 मानुग्रहक्रियायामस्तिगरीयस्यां क्रिमिति वर्तते इत्यत्यन्तपरवशत्वमेवैश्वर्यम् ।

यथा चोपदेश इति चानुग्रहक्रियाया अपि अनभिज्ञत्वमिति वर्तते, न केवलमुपदेशानभि- ज्ञत्वमेव तस्य, किं तर्हि? प्राणिनामनुग्रहक्रियानभिज्ञतामपीति तदर्शयति, तत् कथं गम्यत इति चेदुच्यते—यदा सर्वेषं न्यायमुपदेशामि प्राणिनामन्वः चाद्युपभोगविभागमनुग्रहक्रियाया[म]तिगरीयसी क्रिमिति वर्तते—तस्मिन् हि काले प्राणिनो मृतकवत् प्रकृतेरीश्वरस्यैव, तेषां शरीरमुत्पादयामि, धर्मो-

---

20 तथिरादयेति–अशोषेति अनर्थकेषु कर्मस्वसौ प्रवर्तते तस्मात्तस्य प्रवृत्तिर्नाभिप्रेतानुग्रहा [illegible] भावः । [illegible] सर्वकारित्वात् सर्वज्ञत्वं [illegible]–अनुग्रहक्रियेति । [illegible] धर्माधर्मेति धर्माधर्मयोर्मर्यादायाः [illegible] धर्माधर्मयोरनर्थकत्वस्य शरीरादिका- रिकारणत्वायोगात् [illegible] भावः । व्यतिरेकव्यभिचारं दर्शयति–विनापीति । अन्वयव्यभिचारमाह–धर्माधर्मेति । [illegible] व्यभिचारं पोषयति–कारणत्वस्येति । चोपदेशस्य [illegible]
25 न [illegible]–उपदेशसाफल्येति [illegible] तत्र [illegible] धर्माधर्मयोरपि [illegible] । प्रलयकाले च तेषां प्राणिनां [illegible] धर्माधर्ममर्यादा [illegible] करोतीति [illegible]–यथा चेति । [illegible] तयोरनभिज्ञत्वात् तथा [illegible] निरन्तरमतिक्लिष्टत्वात् [illegible] तदैश्वर्यम् न तु [illegible] धर्माधर्ममिति [illegible]
30 [illegible] भावः । प्राणिनामनुग्रहक्रियास्थितिं दर्शयति–तेषां शरीरमिति । यदा सर्वेषमिति तस्मिन् काले प्राणिनः [illegible] हि [illegible] प्राणिनामभिज्ञस्य मृतकवदित्यनेन सम्बन्धः । [illegible] तथा [illegible] प्राणिनः [illegible] च [illegible]

१–१ सि. क. धर्माधर्मोपदेश । २ सि क विप्रियते । ३ सि क. प्राणिनामनुग्रहक्रियाया ।

धर्ममर्यादां प्रणयामि, तत्र प्रवर्तयामि, तत्फलैरनुग्रहामि, तान् प्राणिनः फलानुरूपमिष्टमनिष्टं वोपभोग-
विधौ[च]अनुगृह्णामि, एवमादिक्रियाऽनुग्रहक्रियया क्लिश्यमानस्यानेकपुरुषाधीनसुखकरणसाधारणस्येव
भृतकस्यापि क्लेशः, इतिः हेत्वर्थे, तस्मादविक्लेशस्याप्यन्यपरवशत्वमेवैश्वर्यं भीतलिकापर्यायशब्दाभिधेय
तावदुच्यत इति ।

किञ्चान्यत्— 5

अनुग्रहोऽपि विपर्ययेणोच्यते दुःखहेतुदुःखात्मकत्वाभ्यामिष्टानिष्टोपभोगस्य, विषकृत-
भोजनक्लेशनवत्, यच्चोक्तं दुःखमपि तद्गुणमोक्षणवदनुग्रह एवेत्येतदप्ययुक्तम्, संसारमोचक-
व्याधधीवरादिमारितसत्त्वानुग्रहप्रसङ्गात्, सत्त्वनिकायकलिकलुषकृतात्मोपनिपातेनाऽऽज्ञा-
भावे सत्त्वानुग्रहवदज्ञानप्रसङ्गाच्च, तत्सायुज्यगमनेऽप्येवम् ।

(अनुग्रहोऽपीति) अनुग्रहोऽपि विपर्ययेणोच्यते—अननुग्रह एव सोऽनुग्रह इति, किं कारणं? 10
दुःखहेतुदुःखात्मकत्वाभ्यां दुःखहेतुत्वादिष्टोपभोगस्य हिंसाद्यारम्भोऽर्थसंरक्षणभयसङ्गदोषे दुःखात्मक-
त्वाच्च, अनिष्टोपभोगस्य दुःखात्मकत्वाच्चाननुग्रह एवासौ, दृष्टान्तः—विषकृतभोजनक्लेशनवत्, यथा
कश्चित् क्रूरमूर्खनृपतिः स्वपक्षान् भृत्यान् विषमिश्रमाहारं भोजयन्ननुगृह्णामि च इति ब्रूयात्तथा त्वदभि-
मतेश्वरोऽपीति । यच्चोक्तं दुःखमपि तद्गुणमोक्षणवदनुग्रह एवेत्येतदप्ययुक्तम्, संसारमोचकव्याधधीवरा-
द्यादिमारितसत्त्वानुग्रहप्रसङ्गात्, सत्त्वनिकायकलिकलुषकृतात्मोपनिपातनेनाऽऽज्ञाभावे सत्त्वानुग्रह- 15
वदज्ञानप्रसङ्गाच्च । तत्सायुज्यगमनेऽप्येवम्, ईश्वरेण किल सायुज्यं मोक्षः, आत्मना सायुज्यं गम-
यत्यसौ प्राणिगणमविक्लेशमापादनमेव करोति, क्लिष्टसंसारक्लिष्टेश्वरत्वमोक्षलक्षणस्याभोक्षत्वाद्दिति प-
स्यात्, अकर्मैश्वर्येण मोक्षेण च तादृशा सदा सर्वपुरुषव्यापारोपग्रहणाऽऽयासात्मना, तदरमात्मस्वाधीन-
मपेक्ष्येदं दौर्गत्यमपीति ।

एवञ्च यथास्वाभिमते स्वयाऽऽयस्थपरिमाणिना मन्येन जिनेश्वरेण क्लिश्यते दोषा इतीहाखे 20
सहापीश्वरेण तथैव भवन्तीति तदर्शयन्नाह—

आद्यन्तमध्येऽपि धर्माधर्मक्रियाः प्राणिनां न स्युः, फलाभावात्, ईश्वरवशादेवाऽऽ-
द्यन्तमध्येषु फलसङ्करात्, ततश्च सर्वप्राणिनां निर्मोक्षः सर्वानिर्मोक्षो वा प्रसक्तः, तत्प्रसक्तौ
क्रियाविलोपः, ईश्वरप्राधान्यात् ।

स्वरूपं तदर्थमात्रायासैकोऽसहमनसैव च दुःखहेतुत्वम् अनिष्टोपभोगस्य साक्षाद् दुःखस्य एव तदनिष्टोपभोगप्रसङ्गदुःखम- 25
कर्म स्यात् यस्तुतोऽननुग्रह एवेत्याचष्टे—अनुग्रहोऽपीति अनाद्यर्थनासौ हिंसादिसम्बन्धेन तदुपभोग्ये दुःखहेतु
वर्जितस्यापि रक्षणे दुःखं रक्षितमपि नश्यति दुःखमिष्टोपभोगो दुःखहेतुः दुःखात्मकत्वात्—दुःखहेत्विति । अनिष्टोपभोगस्य
दुःखरूप एवेत्याह—अनिष्टेति । तत्सीवनवद् कण्टने योऽनुग्रहः तथा योऽपि न दुःख इत्याह—यच्चोक्तमिति । एव-
मन्यद् । आद्यन्तवदिति सर्वदानी प्रत्यक्षेण नेश्वरस्य यथा निरपेक्षा प्रवृत्तिस्तथा मध्यमकेऽपि निरपेक्षप्रवृत्तिप्रसङ्गेन प्राणिनां
धर्माधर्मक्रिया न स्युः फलोपभोगाभावात्, ईश्वरवशादेवाद्यन्तमध्येषु फलप्राप्तिसम्भवात् ततश्च सर्वप्राणिनां निर्मोक्षः प्रसज्यते 30
ईश्वरवशादेव यस्य कस्यापि कस्यापि मोक्षो न स्यादेव यतो हि धर्माधर्मयोरनिमित्तत्वम्, सर्वेश्वरस्यैव प्रधान्यादिति ।

आर्येन्तमविद्यादि तथानन्तरदोषाच गतार्थं हेतुहेतुमद्भावप्रतिपादनक्रमेण पापवत्सर्वे क्रियाविशेषाः, कुतः ? ईश्वरप्रामाण्यात्, तथानन्तरदोषाचेति धर्माधर्मक्रियाः प्राणिनां न स्युः, फलमभावा ईश्वरप्रसादेन आयत्यामप्येषु फलसङ्करात्, ततश्च सर्वप्राणिनां निर्मोक्षः—निःशेषमोक्षः तद्भावेन सर्वानिर्मोक्षो वा प्रसक्त इति ।

5 ननु सर्वेशादार्थनियमनापादादनुध्यानाद्धर्माधर्मापेक्षः स एव स्वशक्तितो जगत्सर्जनाय व्याप्रियते ततश्च प्राणिगणं धर्माधर्ममर्यादामुपविश्य मध्ये तत्परिपालयन् ब्रह्मादीनाधिकारिकान् विनियुङ्क्ते, अन्ते च शारीरेन्द्रियविषयानुपसंहृत्य प्राणिगणं कुशलाकुशलफलभुजं स्थापयतीति ।

ननु सर्वशास्त्रेत्यादि एतद्दोषपरिहारार्थं कर्माणुपसर्जनत्वेश्वरप्रामाण्यकारणे मोक्षे, कथ
10 मिति ? तद्भावसुन्दरेण मन्येन—आदौ स एव स्वशक्तित इत्यादिना यावच्छरीरादि[त]कुशलाकुशलफलभुजं स्थापयतीति गतार्थः पूर्वपक्षः, धर्माधर्ममर्यादायाः परिपालयन् ब्रह्मादिकानाधिकारिकान् विनियुङ्क्त इति[वि]शेषः ।

अत्रोत्तरमाहाचार्यः—

इयमप्यर्थोऽप्युच्यते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद्वैतम्, मान्यतेऽन्यथा,
15 स एव शक्तित एवात्मनिरपेक्ष इत्यवधारणाद्द्वैतार्थभावनात् एवंनियमनायेयमपि भावना तदनुध्यानात् पुण्यमुत्पाद्येत्येवाऽन्यद्वैतभावनैव, मत्युपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्त्वा ।

इयमन्यथैवोच्यत इत्यादि, अन्यथा तावत् प्रतिज्ञायते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद्द्वैतम् मान्यते—सामर्थ्याद्धेतुत्वाभ्यासार्थं क्रियतेऽन्यथा—कथमिति चेत् स एव शक्तित एवात्मनिरपेक्ष इत्यवधारणाद्द्वैतार्थभावनात्—ब्रह्मादीनां तथाकर्तृणाम् ततो व्यतिरिक्तानां निरासेन
20 साधारणप्रयोजनेन कस्यचित् किञ्चिदप्यप्रयोजकतया साक्षात् स्वशक्तित एवावधारणया चाद्वै

हेतुहेतुमद्भावेनेति । धर्माधर्मक्रियाभावे निरपेक्षेश्वरप्रतिपत्तौ फलाभावो वा फलभावे हेतुरीश्वरस्तस्मात् फलसङ्करः, निर्मोक्षानिर्मोक्षयोः प्रसङ्गो धर्माधर्मक्रियाभावे ईश्वरप्रसादेन फलसङ्करो वा हेतुविशेषो भाव्यम् । ननु क्रियाविशेषो नास्ति ईश्वरस्य धर्माधर्मयोः कर्तृत्वात्, तथाहि हि तत्र तेनैवानुभूयते न च कोऽप्यन्यस्तत्र कर्तृत्वं युज्यते तस्मात् स एव कर्ता अन्यथा तदपि सामान्यतः प्रतिपत्तिमानिति न भवेत्, न हि तमात्मभूते क्वचित् सम्भवात्, एवासिद्धमनियामि
25 साधनानि तथापि तेन, ईश्वरस्य पूर्वपूर्वकर्मानुध्यानापेक्षया प्रवृत्तौ धर्माधर्मयोः प्रवर्तनाभि न तु स्वतन्त्रतया एव प्रवर्तनाभि तस्मात् धर्माधर्मापेक्षैवेश्वरस्य प्रधानभावत्वमिति पूर्वपक्षवादी आह अत एवोक्तम्—एतद्दोषपरिहारार्थमित्यादि । आदौ स एव स्वशक्तित एवेत्यात्मनिरपेक्ष इत्यवधारणमिति विशेषम् । सर्वशास्त्रार्थतत्त्वापेक्षया धर्मापेक्षेश्वरप्रतिपत्तिः प्रतिज्ञाता, आदौ च स्वेच्छया तु स्वतन्त्रेण प्रतिज्ञातम्, उपसंहियते च प्राणिगणं कुशलाकुशलफलभुजं स्थापयतीति तस्मात् प्रतिज्ञाभङ्ग मोक्षद्वारा परस्परविरुद्धार्थे इत्याह—इयमन्यथैवेति प्रतिज्ञात धर्माधर्मापेक्षया उपसर्जनभावेन द्वैतं प्रतिज्ञातम्, स एव
30 स्वशक्तित इत्यादिना तदेतं प्रतिविरुद्धमन्यथोच्यते इत्याह—अन्यथा तावदिति । अतोऽत्रोच्यते अद्वैतप्रतिपत्ति-ब्रह्मादीनामिति

१ लि. क. धर्मापेक्षयादि । २ लि. क. मोक्ष इति ।

तमेव भाव्यते भवता, पुनरप्याह—एवनियमनायेति—अद्वैतनियमनायैवमपि भावना, कतमा सा भावनेति चेत्तदनुध्यानात् पुण्यमुत्पाद्येत्येवमप्यद्वैतभावनेनेति, एष तावत् प्रतिज्ञाते द्वैतमद्वैत भावितमि- त्युक्तम्, प्रत्युपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्तव्येति—प्रतिज्ञातभाविते द्वैताद्वैते अपि त्यक्ता।

तत्राद्वैतस्य त्यागस्तावत् धर्माधर्ममर्यादास्थापनवचनेन, मर्यादा नामानतिक्रमस्थान विषयतस्तु सुखदुःखप्रवृत्तिसीमा, इयति विषये सुखमियति विषये दुःखमिति धर्माधर्मयोः 5 सीमनि स्वके स्वके व्यवस्थापनम्, ततश्च सर्गादौ स्थानाद्यात्मके अपि न स्याताम्, अनिय तविषयत्वात्, प्रलयवत्, अन्ते च स्यातामनियतविषयत्वात्, मध्यकालवत्, अथवा निय- तविषयत्वात्तदापि स्याताम्, मध्यकालवत् मध्ये वा न स्यातामन्तवदिति।

(तत्रेति) तत्राद्वैतस्य त्यागस्तावत्—धर्माधर्ममर्यादास्थापनवचनेन, कथ इति वाक्यशेषः, का मर्यादा? उच्यते—मर्यादा नामानतिक्रमस्थानमिति मर्यादालक्षणमाह विषयतस्तु सुखदुःखप्रवृत्ति 10 सीमा—इयति विषये सुखमियति दुःखमिति धर्माधर्मयोः सीमनि स्वके स्वके व्यवस्थापनम्—धर्मस्य दुःखप्रवृत्ति[व्यव]च्छेदेनाधर्मस्य सुखप्रवृत्ति[व्यव]च्छेदेनायमसावस्योऽयमितरस्यावस्य इति सीमा- विभागः, ततः किमिति चेत् ततश्च सर्गादौ स्थानाद्यीति—स्थानविमोहेन्द्रियविषयाः स्थानादयः तदा- त्मके सुखदुःखे अपि न स्याताम्, कस्मात्? अनियतविषयत्वात्—अनियतौ हि विषयौ तदा, सुखदुःखयोरविद्यमानस्थानादित्वात्, अविद्यमानधर्माधर्मादित्वाच्च, दृष्टान्तः प्रलयवत्—यथा प्रलये 15 [धर्मा]धर्माभावादेवानियतविषये सुखदुःखे ततश्चासती, तद्वत् सर्गादावपि स्यातामिति। किञ्चान्यत्— अन्ते च स्याताम्, सुखदुःखे इति वर्तते, कुतः? अनियतविषयत्वात्—विषयानियमोऽपि रूपादिपञ्च- कस्थापनाभावादुपसंहरणकाले, मध्यकालवत्, अथवा नियतविषयत्वात्—व्यवस्थापितधर्माधर्ममर्याद

अनुध्यानस्यैवमपि प्रतिज्ञातस्य पूर्वमद्वैतधर्माधर्माद्यनुचिन्तनस्यैवाद्वैततयैव भावितमित्याह—एवं नियमनायेति अद्वैतनियमनियमनाय पूर्वमद्वैतधर्माधर्माद्यनुचिन्तनप्रतिपादनादिनाऽपि ईश्वरसाक्षात्कारमात्रमपि भावितमिति भावः । पूर्वं 20 मम पापं पुण्यं पापं वाऽऽसीदद्वैतेऽद्वैतमित्युत्पाद्य इत्यद्वैतमित्यर्थमाह—पुण्यमुत्पाद्येति । प्रत्युपसंह्रियत इति अन्ते चैवमपि ना प्रत्येकेति शेषः । अथ भावितस्याद्वैतस्य त्यागं दर्शयति—तत्राद्वैतस्येति, इत्यादिनियमो हि मर्यादा अनतिक्रम्यस्थानं स्थानं भावोऽभ्यन्तरस्य स्थितिरित्यनतिक्रमस्थानं मर्यादेत्याशयेनाह—का मर्यादेति, इयं स्थानविमो- हेन्द्रियार्थे योज्या । विषयमयमाह—विषयतस्त्विति । स्वके स्वके व्यवस्थापनमिति व्याचष्टे—धर्मस्येति धर्मे दुःखादिप्रवृत्तिव्यवच्छेदेनाधर्मे च सुखादिप्रवृत्तिव्यवच्छेदेन तयोः परस्परं पार्थक्येन व्यवस्थापनमित्यर्थः । एवञ्च स्थानविमोहे- 25 न्द्रियविषयाणां एकत्र एव व्यवस्थापनमभावपक्षे अपि सुखदुःखयोः प्रवर्तकत्वादीश्वरसाक्षित्वाद्भवतः इति भावः । ततश्च शेषमाह— ततश्चेति सर्गे प्रारम्भे स्थानाद्यात्मके सुखदुःखे न स्याताम्, अनियतविषयत्वात् प्रलयकालवत् सुखदुःखयोर्हि नियता भावतः प्रलयकाल इव तदानीमपि नास्ति अत एव न सुखदुःखे स्त इति भावः । अनियतत्वे हेतुमाह—सुखदुःखयोरिति स्थानादयो हि सुखदुःखयोरुपादानं तान् प्रत्येव हि सुखदुःखयोरुत्पत्तेः । धर्माधर्मावपि तदानीं नास्ति धर्माधर्मयोरप्य- भावात्सुखमभावदित्याह—अविद्यमानेति । अथ नियतविषयत्वेऽपि यदि सर्गादौ सुखदुःखे नाभ्युपगम्येते तर्हि सर्गान्तकालेऽपि 30 स्यातामित्याह—किञ्चान्यदिति रूपादीति प्रथमं पञ्चभूतानां पृथिव्यादीनामुपसंहरणात् रूपादिपञ्चकस्थापनाभावा- भवविषयाभावादिति भावः । मध्यकाले यथान्ते तत्काल इव तत्त्वादयुक्तं हेतुमाह—अथ वेति । ननु धर्माधर्ममर्यादा न

---

१ सि. क्ष. सुखप्रवृत्ति । २ सि. क्ष. दुःखप्रवृत्ति । ३ सि. क्ष. स्थानादीन्स्यातामिति ।

स्यात्, सुखदुःखे तथा नियतविषये तस्मात्तथापि स्याताम्, अन्यकालवत्–सूक्ष्मपरकालवदित्यर्थः, तद्विपर्ययेण वा साधनम्–अन्ये वा न स्याताम्–सुखदुःखे नियतविषयत्वादिति वर्तते, अन्यवदिति।

अथोच्येत अत एव न सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा, ईश्वरस्यैव सुखदुःखयोः प्रवर्तकत्वात्, यदि सा न प्रवर्तयति किमर्थमसौ तां व्यवस्थापयतीति चेदुच्यते, अयं
5 धर्मोऽयमधर्म इत्येवमुपदेशेन स्वरूपसंज्ञाव्यवस्थापनमसौ करोतीति।

अथोच्येतेत्यादि, यावदधर्मोऽयमिति, साम्प्रतमत एवेश्वरस्यैव कारणत्वात् सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा–ईश्वरवचनाद्धर्माधर्मेत्यर्थः, ईश्वरस्यैव सुखदुःखयोः प्रवर्तकत्वात्, यदि सा न प्रवर्तयति सुखदुःखे धर्माधर्ममर्यादा किमर्थमसौ तां व्यवस्थापयतीति चेदुच्यते स्वरूपसंज्ञाव्यवस्थापनमसौ यथार्थोऽनव्यवहारार्थं करोतीत्यत आह–किं तर्हि अयं धर्मोऽयमधर्म इत्येवमुपदेशेन।

10 अत्रापाय उत्तरमाह–

एतदपि तुल्यं पूर्वेण, असत्त्वात्, धारणाद्धानाद्वा धर्म इति निरुक्तः, एतस्यार्थस्याभावे कथमसौ धर्म उच्यते तद्विपर्ययो वा कथमधर्म इति, धर्माधर्मावित्येते सुखदुःखकारणे व्यभिचारिते, तस्मादयुक्तं संज्ञाकरणमात्रेण मर्यादेति।

(एतदपीति) एतदपि तुल्यं पूर्वेणासत्त्वात् सदाद्यन्यवत् स्यातामनियतविषयत्वादन्ये च
15 स्याताम् नियतविषयत्वात् अन्यवत्, अन्ये वा न स्यातामन्यवदिति, इत्येव दोषजालं प्राप्तम्, किं कारणं? धारणाद्धानाद्वा धर्म इति निरुक्तः, यदि यथार्थं धारयति प्राणिनाम्, सुखे चैनां धत्ते ततो धर्म इति एतस्यार्थस्याभावे कथमसौ धर्म उच्यते तद्विपर्ययो वा कथमधर्म इति तद्विपरीतार्थाभावे, तस्मात् सुखस्यातादिधारणाद्धर्मः सुखकारणं तदव्यभिचरितमिष्यते, यस्याभावे यस्याभावो यस्य च भावे यस्य भावोऽभावस्तत्कारणमितरत् कार्यमिति कारणस्य धर्मस्य कार्यस्य सुखस्याव्यभिचारात्,
20 एवमधर्मेऽपि व्याख्या विपरीतार्था कार्या, तस्मादयुक्तं संज्ञाकरणमात्रेण मर्यादेति।

अथ तु तस्यैव रूपे सुखं दुःखं च, न धारणपानप्रवृत्त्याद्यात्मकत्वाद्धर्मस्यातत्त्व वा, उच्यते

[illegible]

१ लि॰ च तथावेत । २ लि॰ च किमर्थमसौ ।

धर्माधर्ममर्यादावचनस्यानर्थकत्वात्, यदुक्तं प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामुपदिश्यो-त्तरकाल स्वमर्यादानुष्ठानानुरूप्येणेत्यादि तत्सर्वमनर्थकम्, सदैवेश्वरशक्तिमात्रवशादेव यथा तथा सुखस्य दुःखस्य वा यस्य कस्यचित् सिद्धेर्धर्माधर्माकारणत्वादाद्यन्तवत्तन्मर्यादावचन-मनर्थकमिति ।

अथ त्वित्यादि आम्नाय तस्यैव-ईश्वरस्य स्वैरेच्छातः सुखं दुःखं वा न कारणभाव- 5
मप्रत्यारमकत्वात् धर्मस्य अधर्मस्य वा कस्यचिदिति, अत्रोच्यते धर्माधर्ममर्यादावचनमनर्थकम् । यदुक्तं प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामुपदिश्योत्तरकाल स्वमर्यादानुष्ठानानुरूप्येणेत्यादि तत्सर्वमनर्थकं संवृत्तम्, तत्साधनार्थं हेतुमाह सदृष्टान्त-सदैवेत्यादि यावदस्य कस्यचित् सिद्धेराद्यन्तवदिति, सर्गस्यादौ मध्येऽवसाने च सदैव-सर्वकालमीश्वरशक्तिमात्रवशादेवान्यस्य कारणस्याभावेऽपि यथा तथा—येन वा तेन प्रकारेण सुखस्य दुःखस्य वेष्टानिष्टशरीरादेरनियमेन यस्य कस्यचित्-मारकस्य हिंसकस्य वा सिद्धेः 10
धर्माधर्माकारणत्वम्, तदकारणत्वादाद्यन्तवत्-प्रथमावसानकालयोरिव तन्मर्यादावचनमनर्थकमिति, एष तावद्दैवत्यागः ।

न केवलमद्वैतत्याग एव किं तर्हि—

तथा द्वैतमपि त्यक्तम्, साक्षाद्व्यापारवचनात् तद्व्यापृतत्वस्य सर्वथा सर्वदा सर्वत्र चाऽ-व्याहतवृत्तित्वात् किं धर्मादिना? किं स्थानविग्रहेन्द्रियविषयैः प्राणिभिर्वा? क्रियाधिकारिकैः? 15
अथ मन्यसे तद्विना शक्तिर्व्याहन्यते तस्य तर्ह्यस्य व्याहतशक्तित्वात्तु अनीश्वरता कार्यान्त-रापेक्षः प्रमाता, इतरवत् ।

(तथेति) तथा द्वैतमपि त्यक्तम्, कुतः? साक्षाद्व्यापारवचनादित्यादि यावत् क्रियाधिकारिकैरिति, साक्षाद्व्यापारे हेत्वर्थम्, तद्व्याचष्टे तद्व्यापृतत्वस्य सर्वैः प्रकारैः सर्वकाले सर्वदेशे चाऽव्याहत-वृत्तित्वस्य, अव्याहतव्यापृतवृत्तित्वात् किं धर्मादिना? आदिग्रहणादधर्मेण, किं स्थानविग्रहेन्द्रियविषयैर्वा? 20
प्राणिनां सुखदुःखानुभवैः, प्राणिभिर्वा किं क्रियते न किञ्चिदित्यभिप्रायः क्रियाधिकारिकैः? अथ मन्यसेत्या-

---

सर्गे सर्वत्रापन्नत्वमनपेक्ष्यैव धर्माधर्मयोः सुखदुःखकारणयोरभावेऽपीश्वरेच्छयैव धार्मिकस्याधार्मिकस्य वा प्रयोगेन धर्माधर्मयोरानर्थक्याभिप्रायेणाह यदुक्तमिति स्पष्टमन्यत् । सिद्धेरिति मारकस्य हिंसकस्य वा यथा तथा सम्पादनेऽपि सुखस्य दुःखस्य वेश्वरशक्तिमात्रवशादेवाद्यस्य सम्भवात्सिद्धेर्धर्माधर्मयोरकारणत्वात्तन्मर्यादावचनमनर्थकमिति भावः । अथ यच्चोक्तम् ऐश्वर्यभावो प्रतिज्ञातं द्वैतमपि त्यक्तमित्याह—तथेति धर्माधर्ममर्यादायाः सर्वैः [illegible] तस्य कार्यार्थं 25
हेतुकाय इति भावः । साक्षाद्व्यापारवचनादिति कार्ये कस्यचिदपि प्रेरणे वचनात् यतो व्याप्रियमाणो कारणानां प्रयोजकस्य च निरपेक्ष साक्षादेव व्यापारमुपगमात्प्रतिपादनात् 'स्वेच्छया सृजति [illegible] सर्वत्र [illegible] । [illegible] महेश्वरस्य' ॥ इतीश्वरस्याप्रतिहतशक्तित्वमेवैश्वर्यमित्यभ्युपगमात् धर्मादिनिरपेक्षत्वा-पत्तस्य वैधर्म्यमित्याह—तस्मादिति तदावृते धर्मादिव्यापारे ईश्वरप्रेरितव्यापारत्वेन धर्मादिना तत्कार्यमुपपादक-स्थानविग्रहादिना प्राणिभिरधिकारिकपुरुषैर्वा किं? न किमपि भावः । यदि पुनः धर्मादीनपेक्षते तर्हि तद्व्यतिरेकेण तत्कार्य-30

निमित्तमौपसर्गमर्यादासामञ्जस्यार्थं विनियुञ्जानेनैवेति, अथ मन्यसे तैर्विना तत्सिद्ध्योऽप्यन्यते तत्सेश्वरस्य तत्कार्यस्य व्याहतशक्तिस्वास्येवमीश्वरता कार्यान्यतरासत्त्वेः प्रमाता इत्यवसितमिति पूर्वग्रन्थसंदर्भः।

ननु प्रधानोपसर्जनद्वैतमुद्भाव्य तदर्थसंवादेनोपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसम्भवात् चित्राचार्यस्येव शिष्येण विनापि सर्गादौ तथाऽदृष्टाद्यभावेऽपि प्राधान्यात्, भाव्यत्वादिति

5 चेन्न, आविष्कृतस्य कर्तृत्वात्, अभ्यस्यमानप्रकारव्यक्तिरादिः, आदानात्, आदित्योदयादिवत्, तत्प्रयोजनपरमार्थत्वाभ्युपगमस्य, यः प्रयोजयति परमार्थतः स कर्ता भविता न प्रयोज्यो मूलग्रन्थोः सर्वथास्वार्थत्वात्।

ननु प्रधानोपसर्जनेत्यादि यावत्तथाऽदृष्टाद्यभावेऽपीश्वरस्येति, आह द्वैतमेवोद्भाव्य भावितं प्रत्युपसंहृतश्च नान्यथोद्भावनोपसंहारः, कथं? प्रधानमुपसर्जनञ्च द्वैतं प्रतिज्ञातं तदेवार्थस्य संवा-

10 देनेश्वरः प्रधानं न कर्मैवेत्युद्भावनार्थं सर्गस्यादौ साक्षात्त्विषः स एव साक्षाद्भाविषयत्वमुच्यते, कस्मात्? उपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसम्भवात्, चित्राचार्यस्येव शिष्येण विनापीति यथा शिष्यमप्रयोज्य प्रादयित्वा चित्रकर्म प्रादयित्वा वा प्रधानोऽयं तेन विना सह वा चित्रकर्मणि चित्राचार्यः प्रवर्तते, एवं तत्प्राधान्यात् सान्निध्यासान्निध्ययोरपि शिष्यस्य प्रवर्तकत्वात्, एवमीश्वरोऽप्यदृष्टादिसान्निध्यासान्निध्ययोः प्रवर्तते प्रधानत्वादिति भाव्यत्वादिति भाव्यत्वादुद्भावितैवानुरूपभावनोपसंहारासम्भवान्न कश्चिद्दोषः

15 इत्येवञ्च न, आविष्कृतस्य कर्तृत्वात् आविष्कृतोऽऽविष्कृतः, स एव च कर्ता, तस्यैव कर्तृत्वात् कोऽसावा-विरिति चेदुच्यते अभ्यस्यमानप्रकारव्यक्तिरादिः तत्र पदार्थस्याभ्यासस्य केनचित् प्रकारेण व्यक्ति-रादिः, कुतः? आदानात् आदानमादिरित्यक्षरार्थमित्युक्तिमाह, हेतौ दृष्टान्तश्च आदित्योदयादित्यवदिति यथाऽऽदित्यस्योदयमभ्याहाद्यमपरप्रकारेण दिवसादिविभागानां दिवसमानानां व्यक्तिरेवम् तत्र प्रयो-

प्रकाशः अविस्पष्टवाचिस्येवमीश्वर एव सार्थिमाह—अथ मन्यस इति। तत्र पक्षान्तं दर्शयति—कार्यान्यतरासत्त्वेरिति अपरकार्य-

20 व्यवहारात् अन्यथा सामान्यं क्वचित् धर्मकरत्वानां प्रकृते कार्यं प्रति यथाऽर्थपरो भवति तादृशिति भावः। अत एव उपसर्जन-प्रधानमीश्वर इति यस्तूद्भावनाप्रसरस्य प्राधान्यमात्मनाऽऽद्यो यथाविधं दृष्टान्तमुपदर्शितम् प्रधानं हि उपसर्जनं तदपि कार्यं कर्तुमुद्यते अन्यथा प्रधानाप्रधानभेदानुपपत्तेः। प्रधानोपसर्जनभूतशिष्यव्यतिरेकेणापि चित्राचार्यवित्रे प्रवर्तत इत्याह—ननु प्रधानेति उपनय भावनोपसंहारश्च न वेदव्यभिचारदर्शनादि द्वैतमेवेति। च एव तत्पक्षित्व इति नाद्वैतं भावितमपि तु प्रधानद्वैतस्य भावितमाह—तदेवार्थस्येति प्रतिज्ञातार्थसंवादः। इति भाव्यत्वादिति व्याप्तिप्रदर्शनाय समुपसंहार-

25 विवरणं। तेन च द्वैतमर्थस्य वा सत्य इति भावः। न यथाऽसौ करोति स एव कर्ता कर्मनिरपेक्ष यथाऽसौ यदि करोति तर्हि स एव कर्ता स्यादित्युपसंहरति—आविष्कृतस्येति। आविष्कारार्थमनभिव्यक्तप्रकारव्यक्तिमेव दर्शयति अभ्यस्यमानेति। आविष्कार-व्युत्पत्तिमाह—आदानमिति उपादानं प्रकारस्येति भावः। दृष्टान्तमाह—आदित्येति उपयोगिप्रकाशित आविष्कृतोऽस्य एव तत्कर्ताऽस्तीति भावः। यथा यस्तुतः प्रयोजयति स एव कर्ता भविता न प्रयोजकत्वमात्रात् विशेषणविशेष्यत्वात्, मूलग्रन्थस्य प्रमाणविषयत्वात् तात्पर्यव्यतिरेकेण विशेषस्याभावात् मूलग्रन्थोः सर्वथास्वार्थत्वात् तथा न यथाऽसौ प्रयोजयिता सर्वथासमर्थो

30 कर्ता भविता नेत्याह—तथेति। एतच्च सर्वथाविषयत्वमाह—एतदुक्तं भवतीति सर्वाणि वस्तूनि व्यक्तिकल्पितानां

१ सि क. द्वयावभावे। २ सि व्यक्ताणि। ३ सि. क. विनापीति। ४ सि क. प्राप्तेर्थं। ५ सि. क. प्रवर्तिता। ६ क. "द्वैतमेव तु। ७ सि क द्वैतपक्षमभावितो।

स्वपरमार्थत्वान्निवृत्तस्य, यः प्रयोजयति परमार्थतः स कर्ता भविता, मृत्स्नोः सर्वधात्वर्थत्वात्, न प्रयोज्य इत्यस्मात् कारणात् य आदिकरः स कर्ता यश्च कर्ता स भवति, मृत्स्नोः सर्वधात्वर्थव्यापित्वात्, एवमुक्तं भवति यतः प्रकारान्तरेणाभिव्यक्तस्य प्रकारान्तरस्यादिकरत्वाद्भवति वस्तु तत एवैकैकस्य सर्वत्वं सर्वस्यैकस्य परस्परापेक्षाभिव्यञ्जनेनादिकरत्वादिति ।

अस्मिन्नर्थे व्यापकं दृष्टान्तमाह स्फुटीकरणार्थम्— 5

आदिकरत्वञ्च यथा व्रीहौ सम्भाव्यते, अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वात्, तथा प्रागप्यादिकरत्वं तथा पश्चादपि, तदादित्वाद्व्रीहेस्तेषामादिकरत्वं तथाभिव्यक्ते तत्प्रयुक्तत्वाच्च, ते तस्य प्रयोक्तारः ।

आदिकरत्वञ्च यथा व्रीहौ सम्भाव्यत इति, तद्व्याख्या—अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वादिति—मृत्स्नाम्बुवाय्वाकाशानामव्रीहीणां व्रीहिप्रकारेणाभिव्यक्तिं कुर्वन् व्रीहिरादिकरः, एतमर्थं 10 हेतुत्वेन व्यापारयति सिद्धं कृत्वा पञ्चम्या—[1]व्रीहित्वेनादिकरत्वादिति, तथा प्रागित्यादि—एवञ्च कृत्वा व्रीहित्वात् प्रागपि पृथिव्याद्याकाशान्तानामप्यादिकरत्वं पश्चादपि, तेन प्रकारेण तथा, व्रीहिरेव तदादित्वाद्व्रीहेः, ते आदिः पृथिव्यादिः यस्य व्रीहेः प्राक् पश्चाच्चेति, तेषामादिकरत्वं, तेन प्रकारेणाभिव्यक्तेः, किञ्चान्यत्—तत्प्रयुक्तत्वाद्व्रीहेः, ते तस्य प्रयोक्तारः, यो यस्य प्रयोक्ता स तस्य कर्ता, यथाऽसितोदयादित्वमभिहितमुक्तम् । 15

आह—

तत्प्रयुक्तो व्रीहिः, पृथिव्याद्येव न भूतो व्रीहिः, आदिकरत्वादादित्योदयादित्वमदित्य चोद्यते को वा ब्रवीति पृथिवी न भूता, उदकादिश्च व्रीहिरिति तत्प्रयुक्तत्वाद्व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वाद्व्रीहिरपि पृथिव्यप्तेजोवाय्वाकाशादि भवति पृथिव्युदकवाय्वाकाशाद्यपि च व्रीहिप्रयोजकत्वादि भवति, तत्कृताहारोऽपि पृथिव्यादि व्रीह्यादि, 20 पृथिव्याद्यपि तत्कृताहार इत्यवेतव्येति सर्वस्यैकैकस्य तदात्मकत्वात्तत्त्वेन ।

प्रकारान्तरं प्रधानभावाभिव्यक्तानि तेषां तदधीनत्वात्, वस्तुमात्रस्य परस्परापेक्षया प्रकारान्तराभिव्यञ्जनादेकैकस्य सर्वत्वं सर्वस्य चैकत्वमिति भावः । एतदेव दृष्टान्तेन भावयति—आदिकरत्वञ्चेति अव्रीहिरूपाणां पृथिव्याद्याकाशान्तानां व्रीहित्वेनादिकरत्वात् व्रीहिरादिकरः तेषां तद्रूपेण हि व्रीहिर्भवतीति भावः । व्रीहिरादौ वर्तते त न भूम्यादीन् व्रीहित्वेनाभिव्यञ्जयतीति व्रीहे प्रधानभूतत्वप्रसिद्धं सिद्धत्वेन हेतुतया व्रीहेरादिकरत्वे दर्शयति—एतमर्थमिति । पृथिव्यादयोऽपि व्रीहिरेवाऽऽदिकरा तेन 25 प्रकारेणाभिव्यक्तेरिति व्रीहे पूर्वापरभूतपृथिव्यादीनामादिकरत्वं प्रकाशयति—तथा प्रागित्यादीति । तेनेति व्रीहिप्रकारेणाभिव्यक्तेरिति भावः । हेत्वन्तरमाह—तत्प्रयुक्तत्वादिति भूम्यादिभिः प्रयुक्तो व्रीहिः यश्च प्रयोक्ता स कर्तेति भूम्यादय आदिकरा इति भावः । ननु पृथिव्यादयो व्रीहे प्रयोक्तारो भवन्तु नाम किन्तु तत्प्रयुक्तत्वात् आदित्वोदयादित्वमादिकरत्वात् पृथिव्यादिरेव व्रीहिर्भवतीति न युक्त इत्याशङ्कते—तत्प्रयुक्तो व्रीहिरिति । अथवा तत्प्रयुक्तत्वादादित्योदयादित्ववत् आदिकरत्वं पृथिव्यादीनां भवतु नाम किन्तु पृथिव्यादिरेव व्रीहिर्भूत इति तु न न ज्ञायते [illegible] आशङ्कते— 30

---

१ सि. क. व्रीहित्वेनादिति । २ सि. क. [illegible] ।

(तत्प्रयुक्त इति) तत्प्रयुक्तो व्रीहिः, कस्मात्? पृथिव्येव न भूतो व्रीहिः, पृथिव्येवोदक-
मेव वायुरेव वाऽऽकाशमेव वा तत्प्रयुक्तत्वाद्व्रीहिकरणाद्व्रीहिसोदकमावित्वमिति, यथोच्यते को वा भवति
पृथिवी न भूतः तत्कायिक व्रीहिरिति, तत्प्रयुक्तत्वाद्व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वा
द्व्रीहिरपि पृथिव्यप्तेजोवाय्वाकाशादि भवति, पृथिव्युदकवाय्वाद्याकाशादपि च व्रीहिसाधारणम्यादि
5 भवति, वस्त्वाहारोऽपि पृथिव्यादि व्रीह्यादि, पृथिव्याद्यपि वस्त्वाहारः—वस्त्वाहारशरीरेन्द्रियगु
णादि—वस्तुत्वमनुष्यविषमारकत्वेनादि च वस्त्वाहाराद्व्रीह्यादि, पृथिव्यादि च वस्त्वाहारशरीरेन्द्रिय
पुरुषमनुष्यादि सर्वं परस्परतः सर्वात्मकं भवति तत्प्रयुक्तत्वात् यथाऽभिव्यक्तेः तदात्मकत्वादिहेतुभिः,
किमयोपादीयते, व्यापकत्वाद्व्यापित्वात् सर्वं वस्तुस्वरूपमेव विश्वात्मकस्वभावमाह—इत्यमेवमेति
यदि व्रीहितो व्रीहेरनतिरिक्तत्वमथ पृथिव्यादितः पृथिव्यादेरनतिरिक्तत्वमिति तान्येवोदाहरणानि, एवं
10 वस्त्वाहारशरीरेन्द्रियादिष्वपि द्रष्टव्यम् सर्वस्यैकैकस्य सर्वात्मकत्वात्तदाह—सर्वात्मकत्वात्तदन्य-
तिरिक्तत्वात्तथैवेति तस्य तस्य प्रकारस्य हेतुत्वं दृष्टान्तत्वञ्चेति ।

एवं दृष्टान्तभूतं प्रस्तुतन्यायप्रसाधितं सर्वसर्वात्मकत्ववादं प्रदर्श्य दार्ष्टान्तिकं पुरुषकर्मणा
कर्मीश्वरकारणनिराकरणायाह—

पुरुषकर्मत्वस्यैवमेव, पुरुषः कर्ता कर्मयोग्यानां पुद्गलानां कर्मत्वेनाविष्करः, यथाविधोप
15 योगगतेः ।

पुरुषकर्मत्वस्यैवमेवेत्यादि, पुरुषः कर्ता कर्मयोग्यानां पुद्गलानां कर्मत्वेनाविष्करः,
कर्मयोग्याः पुद्गला उच्यन्ते—समानजातीयानामेकत्वो पुद्गलाऽवस्थापितानां पिण्डो वर्गणा, कुवि-
कर्णकशरीरधर्मगोपिण्डवत्, परमाणुवर्गणा द्विप्रदेशवर्गणाः—त्रिप्रदेशवर्गणा एवमग्रे

पृथिव्येव न भूत इति । पृथिव्यादपि तथा तथा भवतीत्याह—को वा भवतीति पृथिवी व्रीहिर्न भूतः तत्कायिकमेव
20 भूत इति को वा भवतीति योजना । व्रीहि- पृथिव्यादि भवति तत्प्रयुक्तत्वात् पृथिव्यादिरपि व्रीह्यादिर्भवति तत्प्रयुक्तत्वादेवेत-
त्योभयमस्याह—तत्प्रयुक्तत्वादिति । वस्त्वेति व्रीह्यादिरूपेण एवं च तत्प्रयुक्ततत्त्वमभिव्यक्तितदात्मकत्वादिहेतुभि-
रुक्ते सर्वात्मकं भवतीत्युपसंहरति—तत्प्रयुक्तत्वादिति । तत्प्रयुक्ते हेतुमाह—तदात्मकत्वादिति पृथिव्यादेर्व्रीह्यात्म-
कत्वाद्व्यापकव्यापित्वात् व्रीह्यादिरेकैकस्य, अथ दार्ष्टान्तिकं पुरुषकर्मावस्थानमाह—पुरुषेति पुरुषो हि कर्ता कर्मपुद्गला
योग्यानां कर्मत्वेनाभिव्यक्तः अतोऽसौ कर्मत्वेनाभिव्यक्तत्वादाविष्करः पुरुषस्य स्वकर्मस्वपरिणामजपुद्गलस्वभावकर्मत्व-
25 रूपत्वेनपरिणामात्तथैवं एवं पुरुषोऽप्याविष्करः कर्मपरिणामयोग्यपुद्गलान् कर्मत्वेन परिणमयति तत्सामर्थ्यं मनोऽनुसार
योगस्य यथोक्त स तत्र कर्मत्वाविष्करः स इति भावः । तत्र हेतुमाह—यथाविधेति, ... कर्मयोग्याः इति के कर्मयोग्याः पुद्गलाः इत्याकाङ्क्षायां ते अनुमेयत्व
... । समानेति समानजातीयानां पुद्गलानामेकत्वे ... पुद्गला ... व्यवस्थापि-
तानां पुद्गलानां समूहो वर्गणा । कुविकर्णेति । ...
30 ... ते ... च
...
...
...
... । सा एव वर्गणा आह—परमाणुवर्गणेति

1 सि. क. समदृश्यर्वगणा इत्यधिकं दृश्यते ।

ह्यादि संख्येयप्रदेशवर्गणाः, अनन्तप्रदेशवर्गणा अपि काश्चिद्ग्रहणयोग्याः काश्चिदग्रहणयोग्याः, ग्रहणयोग्या-योग्यत्वञ्चासिरसूक्ष्मसूक्ष्मतरनात्, मर्त इव परमाणुस्कन्धानां [अयोग्यत्वात्] योग्यत्वाच्च मध्यमपरिमाणानाम्, तत्र या ग्रहणयोग्याः पुद्गलस्तो गणनायां मानेन सिद्धानामनन्ततमो भागः, अभव्यसिद्धाना-मनन्तगुणः, एवं तावदौदारिकयोग्यस्य जघन्यस्य विधिः, तदुपर्येकपरमाणौ प्रक्षिप्ते द्वितीयाऽप्यौदारिकयोग्या, एवमेकैकवृद्ध्याऽनन्तानन्तानि स्थानान्यौदारिकाकारत्वेन ग्रहणयोग्यानि, जघन्यादुत्कर्षस्था- 5 नमसंख्येयगुणम्, यस्मात् परम्परोपनिधया प्रथमस्थानादारभ्यानन्तस्थानेषु[ग]तेषु द्विगुणता भवति तस्मादसंख्यगुणं संख्येयगुणं वा, अनन्तरोपनिधया तु रूपाधिकमेव, तस्मिन्नुत्कृष्टौदारिकयोग्यद्रव्ये रूपे प्रक्षिप्ते जघन्यं वैक्रियशरीरस्याग्रहणयोग्यम्, एवं रूपाधिकवृद्ध्या तान्यप्यनन्तानन्तानि स्थानानि पूर्ववत्, जघन्यादुत्कृष्टमसंख्येयगुणम्, को गुणकारः ? श्रेण्यसंख्येयतमभागः, तेषामग्रहणानामुपरि वैक्रियस्य जघन्यं ग्रहणयोग्यम्, तान्यपि स्थानानि पूर्ववदनन्तानन्तानि, पुनराहारकाग्रहण[योग्या]नि, 10 तथा तदुपरि तद्ग्रहणयोग्यानि तथैव, औदारिकशरीरयोग्येभ्यो वैक्रियशरीरयोग्यान्यसंख्येयगुणानि, ततोऽसंख्येयगुणान्याहारकयोग्यानि तावदसंख्येयगुणानि ग्रहणाग्रहणानि, पूर्वस्मात् पूर्वस्मात्तदुपर्याहारकोत्कृष्टे रूपे प्रक्षिप्ते जघन्यमग्रहणं तैजसस्य, जघन्यादुत्कृष्टमनन्तगुणम्, को गुणकारः ? अभव्येभ्योऽनन्तगुणः, सिद्धानामनन्ततमभागः, तदुपरि रूपाधिके तैजसशरीरयोग्यं जघन्यादुत्कृष्टमनन्तगुणम्, को गुणकारः ? सिद्धानामनन्ततमभागः, अभव्येभ्योऽनन्तगुणः, अनेन विधिनोत्तरेषां 15

एकत्वेनापरिणतानामेकैकपरमाणूनां समुदायः सजातीयत्वादेका परमाणुवर्गणा ततः एकत्वपरिणतानां द्विप्रदेशिकस्कन्धानां द्वितीया वर्गणा ततः त्रिप्रदेशिकानां एकत्वानामपि स्कन्धानां तृतीया वर्गणा एवमेकैकपरमाणुवृद्ध्या संख्येयप्रदेशिकानां स्कन्धानां संख्याता वर्गणाः असंख्यातप्रदेशिकानां स्कन्धानामेकैकपरमाणुवृद्ध्यानामसंख्येया वर्गणाः अनन्तपरमाणुनिष्पन्नस्कन्धानामनन्ता वर्गणाः अनन्तानन्तप्रादेशिकानां स्कन्धानामनन्तानन्तवर्गणाः सर्वा अप्येता अल्पपरमाणुकत्वेन स्थूलपरिणामतया च समागमनीयानां मध्ये न समागच्छन्तीत्यग्रहणवर्गणा एताः सर्वा अनुक्रमन्त इति भावः । 20 तत्र ग्रहणयोग्यायोग्यत्वे हेतुमाह-ग्रहणयोग्येति यद परमाणुवर्गणा इव या अतिसूक्ष्मा अतिस्थूलाश्च ता अग्रहणयोग्या मध्यमपरिमाणाश्च ग्रहणयोग्या इति भावः । परमाण्विति परमाणुप्रभृतिसूक्ष्मत्वात् सर्वेषां चातिस्थूलत्वादयोग्या इति भावः, तत्रेति औदारिकशरीरारम्भग्रहणयोग्या वर्गणा सर्वा एकप्रदेशिकस्कन्धानन्तगुणं सिद्धानन्तभागमात्रैरिति परमाणुभिर्निष्पन्नैः स्कन्धैरारब्धा ग्रहणयोग्या जघन्यौदारिकवर्गणा भवतीति तथा स्कन्धानामपि तावत् मात्रमिति भावः । अभव्यसिद्धानामिति भव्या एव सिद्धा न ते न भवन्ति तेऽभव्याः सिद्धास्तेषामित्यर्थः । पुद्गलद्रव्याणां हि यथा यथा प्रभूतपरमाणुनिचयः सम्पद्यते तथा तथा सूक्ष्मसूक्ष्मतरः परिणामः सम्पद्यते तत्रौदारिकाग्रहणवर्गणाः औदारिकग्रहणवर्गणाः अग्रहणवर्गणाः 25 वैक्रियग्रहणवर्गणाः अग्रहणवर्गणा आहारकवर्गणा अग्रहणवर्गणा तैजसग्रहणवर्गणाः अग्रहणवर्गणा भाषावर्गणा अग्रहणवर्गणा आनपानवर्गणा अग्रहणवर्गणा मनोवर्गणा अग्रहणवर्गणा कार्मणग्रहणवर्गणा इत्येवमौदारिकादिकार्मणग्रहणवर्गणान्ता वर्गणाः पूर्वपूर्वस्मादुत्तरोत्तराः सूक्ष्मा विज्ञेयाः । तत्रौदारिकस्य ग्रहणयोग्याजघन्यायोग्यता वर्गणा स्वल्पपरमाणुनिष्पन्नत्वात् स्थूलपरिणामत्वाच्च तस्याग्रहणप्रायोग्या औदारिकग्रहणयोग्योत्तरा अणुपरिवर्तन्ती वर्गणाः प्रभूतपरमाणुनिष्पन्नत्वात् सूक्ष्मपरिणामत्वाच्च तस्याग्रहणयोग्या एवं वैक्रियादीनामपि विज्ञेया । अनन्तानन्तानीति अनन्ते राशौ 30 भूयोऽनन्तगुणकारेऽनन्तानन्त इति प्रोच्यते । औदारिकजघन्यस्थानादसेयोत्कर्षस्थानमार्गणेऽसंख्येयगुणत्वमुपपादयति-यस्मादिति परम्परया क्रमक्रमेण वृद्धौ भिन्दन्ति स्थानानि गुणा तत कर्मोपनिधा-मार्गणे विचारणे परम्परोपनिधा

---

१ सि. क. °सूक्ष्मयोग्यत्वात् । २ सि. क. °औदारिक । ३ क. श्रेण्यसंख्येयतम ।

भाषाप्राणापानमनःकर्मयोग्यानामणूनामवरितानां भाषाणामुत्तरोत्तरानन्तगुण[त्व]मानेयम्, अनन्त-
रेषु भाषाणां जघन्योत्कृष्टो विशेषाधिकः सर्वत्र को विशेषः ? तस्यैवानन्तभागः, अग्रहणानां
जघन्यादुत्कृष्टोऽनन्तगुणः, को गुणकारः ? सिद्धानामनन्ततमभागः, अभव्येभ्योऽनन्तगुणः एवंविधैः
पुद्गलैः सर्वत्र लोकेऽवगाढनिचिते कर्मतया परिणमनयोग्यान् कायवाङ्मनःकर्मलक्षणानां त्रयाणां
5 योगानां काययोगेन गृह्णाति, तेनैव कर्मणा शरीरतया परिणमयति, पुनः स्ववीर्येण योग्यानेव
वाङ्मनःप्राणापानतया परिणमय्य काययोगेनैव वाङ्मनःप्राणापानतयाऽवलम्ब्य विसृजति, यथो-
क्तम् 'जोगेहिं तयणुरूवं परिणमयति गेण्हिऊण पंच तणू । पाउग्गे वा लंबति भासाणमणत्तणे बंधे ॥'
(कर्म प्र० गा० १७) तथा 'मनसा वाचा कायेन वाऽपि युक्तस्य वीर्यपरिणामः । जीवस्यात्मनि-
यः स तु स योगसंज्ञो जिनैर्दिष्टः ॥' (तत्त्वार्थटी० अ० ७ पृ० ७०) 'तेजोयोगाद्यथा ह्युत्का-
10 दिर्वेदस्य परिणामः । जीवकरणप्रयोगे वीर्यमपि तथाऽऽत्मपरिणामः ॥ (　　) इति । किं कारणं ?
तथाविधोपयोगगतेः,—ग्रहणयोग्यपरिणामापन्नपुद्गलद्रव्यग्रहणपरिणतत्वप्रयोगपरिणामापत्तेः पुद्गले
कर्मः, यथोक्तं 'स्नेहगुणः सन् दीपः स्नेहं वर्त्या यथा समादत्ते । आदाय शरीरतया परिणमयति
चापि तं स्नेहम् ॥ तद्वद्रागादिगुणः स्वयोगवर्त्याऽऽत्मदीप आदत्ते । स्कन्धानादाय तथा परिणमयति
तांश्च कर्मतया ॥' (तत्त्वार्थटी० अ० ५ पृ० १४२) 'स्नेहाभ्यक्तस्याङ्गे यथैव रजो मलीभवति
15 वा । रागद्वेषस्नेहाभ्यक्तस्य तथा भवति कर्म ॥ (　　) स्पृशति रूप्यतो ननु यत्र स्निह्यति च
रज्यतः पुंसः । औदारिकोऽपि देहो भाववशात् परिणमत्येवम् ॥' (प्रज्ञा० टी० पृ० ४५५　　)

एवं विधैरिति [illegible] पुद्गलैः सर्वो लोकोऽवगाढ [illegible] तत्र निचिते व्याप्ते जीवस्य यत्राकाशेऽवगाहस्तत्रैव ये
कर्मयोग्याः पुद्गलास्तान् कर्मतया परिणमय्य [illegible] [illegible] कर्मणि [illegible] [illegible]
[illegible] एव योगा उच्यन्ते तेषां मध्ये काययोगेन गृह्णाति तेनैव च कर्मणा शरीरतया परिणमयति [illegible]
20 [illegible]—पुनश्च इति । [illegible] वीर्यपरिणतिर्भवति तथाविधेन [illegible] । तत्र [illegible]-
दर्शयति जोगेहिं इति [illegible] पुद्गलद्रव्यं [illegible] वा पुद्गलस्कन्धान् [illegible] [illegible]
[illegible] वीर्यं भवति तेन योगेन औदारिकादिशरीरप्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति [illegible]
[illegible] परिणमयति तथा भाषाप्राणापानमनोयोग्यान् पुद्गलान् प्रथमतो गृह्णाति [illegible] च भाषाप्राणापानादितया
परिणमयति [illegible] च [illegible] तान् पुद्गलस्कन्धान् [illegible] [illegible]-
25 [illegible] [illegible] । [illegible] [illegible] दर्शयति मनसा वाचेति [illegible]
[illegible] [illegible] [illegible] इत्यते 'मनसा वयसा कायेण वा वि जुत्तस्स वीरिय
परिणामो । जीवस्स [illegible] [illegible] जिणक्खाओ' ॥ तथा [illegible] [illegible] [illegible]
[illegible] परिणामो । [illegible] वीरियमवि [illegible] ॥' इति । [illegible] [illegible]-
तेजोयोगादिति [illegible] [illegible] तथा जीवस्य [illegible]-
30 [illegible] एव प्रादुर्भवति न [illegible] भाव । अत्र हेतुमाह—तथाविधेति यथा च दीपः [illegible]
[illegible] परिणमयति तथा रागादिगुणयोगात् [illegible] [illegible] [illegible]
परिणमयति [illegible] स्नेहगुण इति । यथा च [illegible] [illegible] [illegible] [illegible] भवति
[illegible] च तथा रागादि [illegible] [illegible] [illegible]

1 लि० क० °[illegible]। 2 लि० क० °[illegible]। 3 [illegible] इति [illegible]। 4 लि० क० [illegible]।
5 लि० क० [illegible]। 6 लि० क० [illegible]। 7 लि० क० °[illegible]।

तस्मादात्मा करणयुक्तः कर्मत्वेनादिकरः, तदपि च कर्म आदिकरम्, बाह्यमपि घटादिकं सर्वमादिकरम् ।

(तस्मादिति) तस्मादात्मा करणयुक्तः कर्मत्वेनादिकरः, पूर्ववत् प्रयोजनपरमार्थत्वात् भवितृत्वस्य, क्रियात्मैवाऽऽदिकरः । नेत्युच्यते तदपि च कर्माऽऽदिकरम्— तदपि च ज्ञानावरणादिकर्मग्रहणयोग्यमौदारिकादिशरीरभेदादिविपाकं पुद्गलम्, किं भवति ? नरनारकदेवतिर्यगादिसूक्ष्मभवनवास्यादिनैकप्रभेदसर्वात्मशरीराणां तत्सम्बद्धात्मनां चाऽऽदिकरं भवति, यथोक्तं 'जीवपरिणामहेतुं कम्मत्ता पोग्गला परिणमन्ति । पोग्गलकम्मणिमित्तं जीवो वि तहेव परिणमइ' ॥ [प्रज्ञा-टी-पृष्ठ. ४५५] इति, न केवलमाध्यात्मिककर्मैवादिकरम्, किं तर्हि ? बाह्यमपि घटादिकं सर्वमादिकरम् ।

विपर्ययेणापि भावयितुकाम आह—

यथा चात्माऽकर्मणां कर्मत्वेनादिकरस्तथा प्राक् पश्चादपि कर्माऽऽदिकरम्, तदादित्वादात्मनः तथाऽभिव्यक्तेस्तत्प्रयुक्तत्वाच्च, आदित्योदयादित्यवत् । तत्प्रयुक्तं कर्म, आत्मैव च कर्मभूतः, आदित्योदयादित्यवदित्यत्रोच्यते, को वा ब्रवीति न कर्मभूतोऽसौ, कर्माणि चात्मभूतानि नेति, आत्मापि कर्म भवति, कर्माण्यात्मा भवति तथाविधोपयोगगतेस्तत्प्रयुक्तत्वादित्यादिभिर्हेतुभिः, तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः, का वाऽन्या प्रकृतिरिति ।

यथा चात्माऽकर्मणामित्यादि पूर्ववत् सचोद्यपरिहारं गतार्थम् यावत् को वा ब्रवीति न कर्मभूतोऽसौ, कर्माणि चात्मभूतानि नेति, तथाविधोपयोगगतेस्तत्प्रयुक्तत्वादिभिर्हेतुभिः, तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः, का वाऽन्या प्रकृतिरिति ।

इतश्चान्योन्यादिकरता कर्मकर्मिणोः, अचेतनज्ञानावरणकर्मप्रयुक्तत्वादात्मनः ।

(इतश्चेति) इतश्चान्योन्यादिकरत्वं, आदिकरत्वात् कर्मकर्मिणोः सर्वसर्वात्मकत्वेति, कारणमाह—अचेतनज्ञानावरणेत्यादि, अचेतनानि ज्ञानदर्शनावरणवेदनीयमोहायुर्नामगोत्रान्तरायाख्यानि

प्रमाद—चेतनात्मकत्वेनेति । तस्मादिति, तथाविधोपयोगमयोऽपि भवनात्मककर्मयोगात् पुद्गलानां कर्मत्वेनादिकर इत्यर्थः । एतदेव स्पष्टयितुमाह—पूर्ववदिति यो हि प्रयोजयति परमार्थेन स कर्ता भविता पुद्गलो सर्वभवनकर्तृत्वात् न प्रयोज्यः कर्ता भविता भवति न आदिकरः न कर्ता यत्र कर्ता च भवतीति भाव । कर्मणोऽप्यादिकरत्वमाह क्रियात्मैवेति । ज्ञानेति ज्ञानावरणादिकर्मग्रहणयोग्यं पुद्गलमत्र कर्मपदेन ग्राह्यम्, तद् औदारिकवैक्रियादिशरीराऽऽत्मपानादिरूपेण भवतीति भावः । तद् कथमादिकरमित्याह—नरनारकेति नरादिभवीनां सूक्ष्मे येषु भवनवास्यादिनैकप्रभेदसर्वात्मशरीरेषु तेषां तथाविधशरीराणां तदैक्यतया तत्सम्बद्धात्मनां चाऽऽदिकरमित्यर्थः । जीवकर्मणोरन्योन्यादिकरत्वे प्रमाणं दर्शयति—जीवपरिणामहेतुं इति । न केवलमाध्यात्मिकमेव कर्मपुद्गल आदिकरः अपि तु बाह्यमपि सर्वमित्याह—न केवलमिति । आत्मकर्मणोरन्योन्यादिकरत्वं साधयति—यथा चेति तदेव कर्मत्वादिवैलक्षण्यमात्मा तद्भावात्तदादित्वात्तथा कर्मैव हि आत्मा भवति अन्यथा तथाभिव्यक्तिरेव स्यात् तदसामाने आदित्यप्रकाशाभिव्यक्तेरसत्व एवाभिव्यक्त्या यथाऽऽदिकरत्वादात्मनोऽपि कर्म एवमपि आत्मप्रयुक्तमेव कर्म स्यात् न आत्मा कर्मेव इति कथं चर्चे सर्वात्मकमित्याशङ्कते—तत्प्रयुक्तं कर्मेति । कर्मात्मनोरुभयोरप्यन्योऽन्यत्वमाह—को वा ब्रवीतीति । पुनरन्योन्यादिकरत्वं साधयति—इतश्चेति ।

---

१ सि. क. तथाविधं यदि । २ सि. क. °न्योऽन्यादिकरतादिकरत्वात् । ३ सि. क. °ख्यानि, अचेतनानि-ज्ञानावरणेत्यादि ।

नन्तभेदानि कर्माणि पुद्गलात्मकानि सर्वेषामप्यात्मनोऽनन्तभागमुपयोगस्याच्छादयन्ति केवलं कार्यप्रत्यक्षम् एकेन्द्रियनिगोदसूक्ष्मापर्याप्तजीवानाम्, अमन्त्री क्षयोपशमवैचित्र्यात् । 'सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो णिच्चुग्घाडिओ चिट्ठइ, जइ पुण सो वि आवरिज्जा तेण जीवो अजीवत्तं पावेज्जा, सुट्ठु वि मेहसमुदए होइ पभा चंदसूराणं' (नदी० सू० ४२) तथा 'कर्म रजो ९[... मनः करोति ... सोमः । ...] ... ॥ ( ) इति, तस्मात् कर्मधर्मिणोरन्योन्यावि... कत्वम्, ... तथापि ... सिद्धम्, सिद्धो कर्म-धर्मनिर्मुक्तः ... ।

१० तन्त्वात्मकत्वाद्यापत्तिप्रसङ्गादेर्वा भेदपक्षोक्तः स्ववचनविरोध इत्यतस्, पाठनपूरण-पुरुषत्वात् निरुक्तिभेदाऽप्यर्थवत्त्वात् । यथैवं नृप्यते सतो नैरात्म्यं पच्यते कर्मणा, ततश्च तत्पाभूतः शुभाशुभेन पुण्यतः, विमुक्तत्वात्, मुक्तत्वात्, मुक्तो वा पच्यते, तत एव तद्वत् ।

(तन्त्विति) तन्त्वात्मकत्वेऽप्यात्मत्वनादेर्वा भेदपक्षोक्तः स्ववचनविरोध इत्येतत्, कस्मात् ? पाठनपूरणपुरुषत्वात् 'पृ पालनपूरणयोः' [पूर्वादि] धातुपाठे शुभाशुभकर्मभिर्लोकस्य पुरणा-

१५ त्पालनभेदैर्वा सम्यग्ज्ञानादिभिः पालयति वा पुरुषः पूरयति तान् तैः पूरण इति पुरुषः । पुर्यां निवसति पुंसा वा निरुक्तः इति पुरुषः पूर्णात्मकत्वात् पुरुष इति निरुक्तिभेदेऽप्यर्थवत्त्वात् [पुरुष]

पुरुषसम्बन्धयोरित्रस्तस्य[क्षण]स्यैककार्यत्वादपदोषः । अथैवं नेष्यते–यथा मयोक्तं कर्मकर्मिणोरन्योन्याधिकरत्वं यदि न स्यात्, ईश्वरवशात् स्वभावात् प्रकृत्यादेर्वा कुतश्चित् संसारवैचित्र्यं स्यादितीष्यते ततो नैवात्मा बध्येत कर्मणा–संसारबीजभूतेन शुभाशुभेन, ततश्च तत्फलभूतैः शरीरेन्द्रियस्थानविषयैः शुभाशुभैर्न युज्येत, विकर्मत्वान्मुक्तवत्, मुक्तो वा बध्येत, तत एव तद्वत् । स्यान्मतं मुक्तामुक्तविकल्पसम्भव एव परमार्थतः, सृष्टिबन्धव्यवस्थानादिति, तदपि नोपपद्यते प्रकृतीश्वरादिसृष्टिवशादेव न बध्येत तनुकरणादिभिः, न मुच्येत मुक्तेन च, अमूर्तत्वादाकाशवत्, आकाशं वा बध्येत मुच्येत तदवस्थादिभिः, तत एव त्वदभिमतपुरुष इव, अनिष्टश्चैवमेतदिमम[र्थं] इति ।

किञ्चान्यत्—

यदि स्वदृष्टाभावेऽप्यसावीश्वरः सततं मुक्तानामपि तनुकरणानि भुवनानि च कुर्यात्, ईश्वरत्वात् सर्गादिवत्, प्रलयकालेऽपि सर्वेषां कुर्यात्तत एव तद्वत्, मध्ये वा न कुर्यात्, ईश्वरत्वात् प्रलयकालवत्, अनिष्टञ्चैतत्, अस्मात् कर्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता, अत एव चाणुत एव सुखादयः, तस्माददृष्टादितः सृष्टिरिति वादान्तरपरिकल्पितं त्यक्त्वाऽस्मदभ्युपगमोऽवश्यम्भावी, तस्मात् सम्भूयकारित्वाचेतनत्वस्थित्यादिप्रवृत्तीनामपक्षधर्मता, पक्षत्वात् ।

यदि स्वदृष्टाभावेऽपीत्यादि, यथा तावन्नित्यमदृष्टाख्यकर्मत्वापन्नसर्वपुरुषेश्वरत्वमुक्तम्, तस्य तस्य तत्तदैकाधिकरत्वात्, तच्च नेदिष्यमाधिकरत्वमिच्छसि ततोऽपि त्वदनुक्त्याऽभ्युपगतेऽप्यदृष्टाख्यकर्माभावेऽपि यथा दोष उच्यते–असावीश्वरस्ततो मुक्तानामप्यमूर्तत्वानादिहेतुकर्मणां तनुकरणानि भुवनानि चासौ कुर्यात्, ईश्वरत्वात्, सर्गादिवत्, तथा प्रलयकालेऽपि सर्वेषां कुर्यात् तत एव तद्वत्, मध्ये वा न कुर्यात्, ईश्वरत्वात्, प्रलयकालवत्, अनिष्टश्चैतत्, अस्माद्वानिष्टात् कर्मात्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता, अत एव चेतानि, कर्मात्मैक्यसर्वेश्वरत्वम्यामणुत एव–कर्मैव एव सुखादयः, तस्माददृष्टात् सृष्टिः प्रधानात् सृष्टिः पुद्गलाणुभ्योऽदृष्टयोरितेभ्यो वा सृष्टिरिति

तथैव पुद्गलाः पुद्गलाः ... ... । ... ... संसारवैचित्र्यानुपपत्ते ... –अपीदमिति । ... ... परिणामस्यानुपपद्यमाने दोषमादर्शयति–यदि स्विति पूर्वं ... ... मुक्तानामपि ... ... इति चेत् । अमूर्तेति ... ... न मुक्तानि ... । ... ... प्रलयकालेऽपि ... न ... , ... न ... तर्हि मध्यकालेऽपि न ... ... –तथा प्रलयकालेऽपीति । तस्मात् कर्मैव ... ... सर्वेश्वरता–... ... –अस्माद्वेति । ... ... –कर्मात्मैक्येति । ... ... , ... परस्परमव्यभिचारेषु

1 सि क. मुक्तेऽपि । 2 सि क. नाभिमत । 3 सि क. तथानादि° । 4 सि क. °मप्यमूर्तत्वानादिहेतुकर्मणां । 5 सि क. मत्त ।

चावाम्बरपरिकल्पितं तस्मादात्मपुरुषकर्मेश्वरस्वभावसर्वात्मक[त्व]सर्वेश्वरत्वाभ्युपगमोऽवश्यम्भावी तस्मात्तयोरसम्भूयैककार्यकारित्वाच्चेतनत्वविरुद्धाप्रवृत्तीनामपक्षधर्मता, पक्षत्वात्, कस्य द्वितीयस्य केन सह सम्भूयैककार्यकारिता ? किं तदचेतनं चेतनात् पृथग्भूतं ? सत्त्वरजस्तमःसत्त्वपुरुषपाकनगमनपुरुषार्थाभिधर्मत्वाच्च का विरुद्धा प्रवृत्तिः ? इत्यसिद्धार्थत्वाद्विविधस्यैवचेतनाधिष्ठितत्वं पर्वतादीनां न साधयितुमलमिति, यदपि
5 विविक्तोक्तं भिन्नाः प्रत्यनीकसम्भूयैककार्यकारित्वादिति तदसत्त्वं तु पूर्वोक्तमेव, 'मिथ्यात्वो सम्यक्तु' इत्यादिगाथया, तस्मादेकेश्वरपूर्विका सृष्टिः, किन्त्वनेकेश्वरपूर्विकेति विज्ञेया ।

एवञ्च कृत्वा कर्मैकान्तवाददोषप्रकाशनमपि कृतं वेदितव्यम्, असम्बद्धत्वात्तस्य, पुरुषकारं निराकुर्वन्तः कर्म समर्थयन्तस्त इत्यमाहुः यदि प्रवर्तयितृत्वात् पुरुषकारः कारणं न कर्मापीति चेत्तत इदमनिष्टं ते प्राप्तम्, तत्कर्मार्थिपुरुषकारैकत्वात्, प्रधानमध्यमाधम-
10 भेदभिन्नाः पुरुषकारा न स्युः ततश्च तत्फलभूताः सम्प्रभेदास्ताः सिद्ध्योऽसिद्ध्यश्च नाना-जातीया न स्युरन्यातिरिक्तकारणत्वात्, तुल्यतन्तुपटवत् ।

एवञ्च कृत्वेत्यादि, अनेनैकान्तेश्वरपूर्व[त्व]वाददोषप्रकाशनेन कर्मैकान्तवाददोषप्रकाशन-मपि कृतं वेदितव्यम्, असम्बद्धत्वात्तस्य—कर्मैकान्तवादस्य कथं पुनस्ते कर्मैकान्तवादिन आहुः कथं वा ते असम्बद्धाः इत्यत आह—तद्दर्शनार्थत्वात् पुरुषकारं निराकुर्वन्तः कर्म समर्थयन्त त इत्यमाहुरिति
15 तदुपपत्तीर्दर्शयति यथा—यदि प्रवर्तयितृत्वात् पुरुष [कारः] कारणं स्यादिति—पुरुषकार एव कारणं न कर्मापीति चेन्मन्यसे इत्येकान्तं सूचयति—तत इदमनिष्टं ते प्राप्तं—पुरुषकारकारणैकान्तिकत्वे प्राप्तम् कथमनिष्टं ? उच्यते प्रधानमध्यमाधम[भेद]भिन्नाः सिद्ध्योऽसिद्ध्यो वा नाना न स्युः, ताश्च दृष्टाः न हि दृष्टानुपपन्नं नाम प्रमाणमस्ति, कथमनाना न स्युरिति चेदुच्यते—तत्कर्मार्थिकारै-कत्वात्—आत्मीयकर्मार्थी पुरुष एव कारणं न कर्मापि कारणमिति पुरुषकारकारणैकान्तवादसाध्ये—
20 पुरुषकारैकत्वं—तत्कर्मार्थिपुरुषकारैकत्वं—तत्कर्मार्थिनः पुरुषस्य क्रिया—कारः तदेकत्वात् प्रधानम-ध्यमाधमभेदभिन्नाः व्यापारपुरुषकारविकल्पात्मकत्वा लोकप्रसिद्धाः पुरुषकारा न सिध्यन्ति, एक एवो-

---

सर्वतं प्रत्येतव्याद्—तस्मात्तयोरेकेति इत्यत्र पक्षधर्मतायाः पक्षव्यापकतामुपपन्ने विज्ञेयम् । तत्र अपेक्षात्वापेक्षया यथा परस्परस्वरूपविरुद्धयोरपि [illegible] विविधपुरुष पक्षेनाधिष्ठितो यद्यपि भिन्न [illegible] वर्तिने [illegible] यथा कथञ्चिद् [illegible] जातिविशेषेण भिन्नो भिन्नयोरपि [illegible]
25 [illegible] परस्परविरोधि [illegible] सर्वज्ञ [illegible] देवादिषु [illegible] । एवञ्च कर्मैकान्तवादनिरासेनेश्वरपूर्विका पूर्विकेत्यादि—तस्मादिति । एकेश्वरवादनिराकरणेनैव कर्मैकान्तवादोऽपि निराकृत एवेत्याह—एवञ्च कृत्वेति । पुरुषकारै-कत्व कारणत्वे पौरुषमात्र [illegible] न स्यात्, [illegible] कर्मैकान्तवादिना कृतं पुरुषकारै-कान्तवादिनं प्रति [illegible]—पुरुषकारमिति । इदं दर्शयति—तत्कर्मार्थीति तत्कर्मार्थी पुरुषस्तस्य कार क्रिया
30 पुरुषकारस्तदेकत्वात्विति एवमेकत्वे—आरमेति । तस्य पुरुषकारस्यैकत्वे नानुपपत्तिमाह—प्रधानेति । पुरुषकारप्रायो

१ सि क. °विकल्प। २ सि. क. °न्यायसम्भव । ३ सि क. °कार्त्यैक° ।

कृष्टां प्राप्नोति, तथा च तस्याप्यानामपि फलभूतानां प्रधानमध्यमाधमानां शुभाशुभानां भेदा न प्राप्नुवन्ति, एकैवोत्कृष्टा सिद्धिः प्राप्नोति, न मध्यमाधमभेदे सिद्धी स्याताम्, नापि च पुरुषकाराणामसिद्धयः स्युः, ताश्च दृष्टा इति वस्तूपसंहृत्य साधनमाह—सम्भेदास्ताः सिद्धयोऽसिद्धयश्च नानाजातीया न स्युरव्यतिरिक्तकारणत्वात्, तुल्यतन्तुपटवदिति, पुरुषकारस्यैव कारणत्वादव्यतिरिक्तकारणाभावाद्भवतः पुरुषकारकारणैकान्तवादिनः कर्मानपेक्षत्वादिति । 5

इत्थं परपक्षे दोषमुक्त्वा स्वपक्षसाधनमाह—

कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्तयितृ, द्विविधा च सिद्धिरसिद्धिः कार्यस्य कर्मणः कारणत्वे एव सम्भवति, नेतरस्य, तत्र त्वदिष्टपुरुषव्यापारस्यावतारासम्भवात्, चेतनस्य स्वधात्म्याधानासमर्थत्वात्, चेतनामात्रसारो हि पुरुषकारः शक्तिः, न च स तां स्वां चैतन्यशक्तिमिष्टे मनुष्यत्वे पशुत्वे वर्तमान आधातुं समर्थः, मनुष्यः सन् न 10 पश्वादी वा, तस्यापि कर्मतन्त्रत्वात्, अपि तर्हि संभाव्यं गङ्गायाः स्रोतसः कर्मणाऽन्यथा प्रवर्तनमिति ।

कार्यातिरेकात्तु कारणातिरेक इति कर्मैव प्रवर्तयितृ, इतिशब्दो हेत्वर्थे, कार्याणामनेकप्रभेदानां सिद्धीनामसिद्धीनाञ्च परस्परतो व्यतिरिक्तत्वात् कारणातिरेकेणावश्यं भवितव्यम्, तच्च कारणं कर्मैव, पुरुषस्य स्वतन्त्रमितस्य प्रवर्तयितुः प्रवर्तनमनेकभेदमिति प्रतीतव्यम्, तस्य कार्येनाना- 15 त्मस्तुमितस्य कारणसामान्यस्य कर्मेति संज्ञा क्रियते, पुरुषकारस्य पुरुषादीनाञ्च कारणानां निराकृतत्वात्, तत्र सिद्ध्यसिद्धिभेदकार्यलिङ्गादनुमानम्, देशान्तरप्राप्त्यनुमेयादित्यगतेरिव, द्विविधा चेत्यादिना पक्षिसिद्धिपरिहारार्थं साधनान्तरमेवेति गतार्थम्, प्रसिद्धलिङ्गमित्यर्थः, तत्रेत्यादि, तत्र—एतस्मिन् कारणवैचित्र्यानुमानलिङ्गे कार्ये त्वदिष्टपुरुषव्यापारस्यावतार एव नास्तीत्याचष्टेऽसम्भवोक्त्यैव प्रसिद्धं कार्यलिङ्गं त्वदभिमते कारणासम्भवोऽसम्भवे कारणसम्भव एवेति च दर्शयति, कस्मात् ? स्वधात्म्याधानासमर्थ 20

एवं वैचित्र्यानुपपत्तिमाह—तथा चेति तथा सति सिद्धिरेकैव एव स्यात् मध्यमाधमसिद्धी चापुरुषवैचित्र्यात्स्ये इत्यर्थः । नापि चेति । पुरुषकारणस्य सर्वत्र [illegible] भवितव्यो न स्युरिति भावः । एवमैकरूप्यमापाद्य हेतुमाह—अव्यतिरिक्तेति एकरूपस्यैककारणारब्धत्वात्, विजातीयकारणानपेक्षकारणारब्धत्वादिति भावः । दृष्टान्तमाह—तुल्यतन्तुपटवदिति, एकजातीयतन्तु भ्योऽनेकैः [illegible] पटोऽनेकोऽपि [illegible] न [illegible] तथैकजातीयपुरुषकारकारणारब्धा अपि कार्याणि [illegible] स्युः न मध्यमाधमप्रभेदा सिद्धी न चासिद्धयः स्युः विजातीयकर्मानपेक्षकारणारब्धत्वादिति भाव । अथ 25 [illegible] दोषमाख्याय [illegible] कर्म समर्थयते—कार्यातिरेकादित्यादि कार्याणामतिरेकः परस्परं वैषम्यं तस्मात् कारणानामपि वैषम्यं भवेदेव [illegible] कर्मैव [illegible] पुरुषादिभिरपि प्रवर्तितुं पुरुषादे प्रवर्तनं सिद्धं [illegible] तस्मात् [illegible] कर्मेत्यन्यत्वासम्भवात् कारणसामान्यस्य कर्मैव एव तै पुरुषादिसंज्ञा क्रियते पुरुषस्य पुरुषकारादेर्व्यावर्तितत्वा कार्यवैचित्र्यसाधकत्वादिति भावः । कर्म कार्योऽनुमीयत इत्याह—तत्रेति [illegible] मनुष्यत्वे [illegible] विशेषो [illegible] वा वैचित्र्यं तत्र निर्हेतुकं सामान्यहेतुकं वा विचित्रधर्मत्वात् अन्यथा तदा 30 [illegible] इति कार्यवैचित्र्यं वैषम्यमिति भाव । कार्यवैचित्र्याच्च [illegible] न पुरुषादिकारणे [illegible] द्विविधा चेति । इतरस्य पुरुषादेः कारणत्वे इष्टे न सम्भवतीत्याह तत्रेति । स्वधात्म्येति पुरुषकारो हि [illegible] न च [illegible] पुरुषो मनुष्यत्वे वर्तमानो देवत्वे पशुत्वादौ वा [illegible]

त्वात्, कस्य सामर्थ्यमिति चेत्–चेतनस्य–पुरुषस्य, चेतनामात्रसारो हि पुरुषकारः शक्तिः, चिन्मात्रो यथार्थो, यतोऽस्यैषा शक्तिः, एतदेवाभ्युपगतवतोऽसाविह मनुष्यत्वे पशुत्वे वा यथाकामं इति, तत्र तथाध्यानासामर्थ्यं दृश्यते–न च स इमाविति तस्मिन्नपि चेतन्ये तां तां चेतन्यशक्तिं कर्मवशात्क्वचिदेव कुर्वन्नसमर्थो वर्तमानो न विशिष्टमनुष्यचेतन्ये स्थापयितुं शक्त इति, विपर्ययेण मनुष्यः सन् तदध्यानं चेच्छातो ध्यातुं समर्थ इति वर्तते तस्मात्मनो पशुत्वमिति तथा प्रदर्शित तत्र शक्नोति कर्मवशीकृतो योनिजात्यन्तरस्थो योनिजात्यन्तरेऽन्यत्रापयातुं, कुतः ? तथापि कर्मकल्पत्वात्–यशोर्मनु-ष्यस्य वा चेतनस्य कर्मवशादेव तथाभावात्, मनुष्यः पशुर्वा तत्तज्जातिनामकर्मोदयादेव भवतीत्यर्थः, तदुदयस्य कारणान्तरदुर्निवारत्वात्, यत्र दृष्टमाप्याद्–अपि यर्हि गङ्गाया इत्यादि सम्भावनवेद-युच्यते–अपि चेतसम्भाव्यं दैवकिंचोत्पादितमिमा गङ्गास्रोतसोऽन्यथा प्रवृत्तस्य कर्मणाऽन्यथा प्रवर्त-

10 नमिति, एवं तावदभ्युपगम्य स्वतंत्रं चेतनं पुरुषकारश्च तथोक्तम् ।

नैव चाऽभ्युपगन्तव्यम् एतत्सर्वं किञ्चित् कर्मव्यतिरिक्तकृतम्, तत्प्रतिपत्तये कर्मव्यतिरिक्त-कारणानवस्थानाविशेषदर्शयति—

यापि चेष्टानिष्टतुल्यप्रवृत्तिः पुरुषस्योपक्रमप्रभृति यावच्छरीरं स्यात्, सा कर्मैव एव चेतनाधिष्ठितशरीरवत् यथाऽङ्गारविशेषग्रहणलवणरसादिभावविभवनायसश्चेतिताम्भक्

15 क्रियास्वस्वतंत्र एव गर्भादिषु सुखः, ताः कर्मकृताः पुरुषो मत्कृता इत्यभिमन्यते तथा-भासमानत्वात् तत्कार्यतायां हि तासां कदाचिदकरणाभावादिदोषानुषङ्गप्रसङ्गः ।

यापि चेष्टादि यावच्छरीरमित्यादिशरीरवदिति, कर्मचेतनाधिष्ठो हि पुरुषोऽस्वतंत्र इष्टानिष्ट-तुल्यप्रवृत्तिः परवशत्वात् पुरुषस्योपक्रमप्रभृतीत्यादि यावच्छरीरमिति तत्कार्यत्वाभावप्रतिपादनार्थो

इति भावः । एवमेव भावमात्रस्वभावो न च स इति तः चैतन्योऽपीदं पशुत्वे वर्तमानः स्वात्मचैतन्यशक्त्यभिव्यक्तिं मनुष्य-

20 त्वादौ स्थापयितुं न समर्थ इति भावः । विपर्ययेणेति स चेतन इहे मनुष्यत्वादौ वर्तमान स्वां शक्तिमभिव्यक्तां पश्वादौ स्थापयितुं समर्थं इतीदमिदं चैतन्यविशेषाभावासामर्थ्यं प्रदर्शितमिति भावः । कुतस्तन्मात्र–तदयावस्था इति कारणं पुरुषकारे तत्स्वरूपे तद कारणं पुरुषकारं चैतन्यशक्तिमित्यर्थं । तथापीति मनुष्यपश्वादेरपीत्यर्थः. नरपतौ प्रागपि चात्यन्त-भावपत्वादीनि नीचमिति नाम यदि तावन्तं कर्मनिमित्तमिति, जातिर्नाम जातिनाम तदेव कर्म जातिनामकर्म अत्र यद्योनिज-जातिनामकर्मात्यन्तरमेवाधिष्ठान मनुष्यजातिनामकर्म पश्वादिजातिनामकर्मेति तेनाद्धुतस्य कर्मनिपाकविशेषपरिणामवशादेव मनुष्यत्वेन

25 भावित्वं । जातिनामकर्मोदयस्य कारणान्तरैरनिश्चितमवश्यत्वात् पुरुषकाराद्यभावाभावतदिच्छानामेव–तदुदयस्येति । कर्मकृतत्वात्त्वां तथाभावस्य तत्स्वभावत्वे–अपि चैतदिति । एतत्–कर्मे सत्यमतान्तरमित्यर्थ । किं तदित्यत्र–दैवेति स्वकर्मनिर्देशस्य क्रियाविशेषेण उत्पादिता वा चेतनिकल्पमेव यदाऽन्यतरस्य पूर्वाभिमुखे प्रवृत्तस्य पश्चिमाभिमुखतया प्रवर्तितं सम्भाव्यते यथास्रोतसो निवर्तितं तथा कर्मैव तत्स्वरूपं मार्गेण चेतनिकया यतो पुरुषादिकरणं कर्मैव कारणं तु पुरुष-कारोऽपीति भावः । अतो न किमपि दृश्यते कर्मस्वरूपं वा तावदेव कर्मोदयेन च पुरुषकारादिकमित्यर्थः–यापि चेति

30 इष्टानिष्टेति दृष्टेऽनिष्टे च प्रयत्ना प्रवर्तमानस्य यदि पुरुष एव कारणं स्यात् तर्हि स्वतन्त्रत्वात् इष्ट एव प्रवर्तेत नानिष्टे, दृश्यते च तथापि प्रवर्तितयो निवर्तते पुरुषोऽनिष्टस्य परवशादेव प्रवर्तते तस्मात् तदानीं कर्मैव पुरुषं प्रवर्तयेदेवाक एव पुरुषस्तु कर्मपरतन्त्र एवेति भावः । इष्टानिष्टतुल्यप्रवृत्ति–पुरुषस्येति । कर्मेऽपि तत्र प्रवृत्तिः परायत्तेत्यत्र-

---

१ सि. क. °जातिरेवाता । २ सि. क. °मिहतवत् वा । ३ सि. क. °स्वसमायातु । ४ सि. क. °स्थानीयं तु-

निषेकोपक्रमाहारादारभ्य मरणापवर्गपर्यवसान इति गतार्थः । पुनरप्यतो—यथाऽऽहारविक्षेपेत्यादि यावदिदे-
वाद्भुतमसङ्गः, मातुरोजः पितुः शुक्रम प्रथमाहारः, ततः प्रथमाहारः ततः सप्ताहं कललं भवतीत्यादिना
क्रमेण शरीरेन्द्रियादिकारणाहारः प्राणनादिपाकासमर्थः, तस्य च दशरसादिभावेन विभजनमित्याद्यसङ्के-
तिताव्यक्तक्रियासन्ततय एव गर्भादिषु सुगमम्, तास्तु क्रियाः कर्मकृताः पुरुषो मत्कृता इत्यभिमन्यते,
यथामासमानत्वात्, तत्कार्यतायां हि—पुरुषकारकार्यतायां हि तासां क्रियाणां कदाचिदकरणाभावात्— 5
प्रथमस्थितिहेतुत्वमुपरमात् मरणाभावः, तस्मादिदैवाऽमृतत्वाय कल्पेतेति दृष्टेष्टविरोधदोषप्रसङ्गः ।

तथा—

कार्येन्द्रियनिर्वर्तनेऽप्यनिष्टशरीरेन्द्रियादि न स्यात्, सम्पूर्णेन्द्रियजातिसंस्थानसंहनन नादियुक्त एव स्यात्, तस्मात्सर्वमेव तत्कर्मण एव, तद्व्यतिरेकेण क्व आत्मनि प्रतिपद्येत? तस्मादहेतुः पुरुषस्तत्कारणम् । 10

(कार्येति) कार्येन्द्रियनिर्वर्तनेऽप्यनिष्टशरीरेन्द्रियादि न स्यात्—काणकुण्ठबधिरादि, सम्पूर्णेन्द्रियजातिसंस्थानसंहननादियुक्त एव स्यात्—पुरुषकारकार्यनिर्वर्तने च धर्मोपगुणानविषयोपभोगा दावेष्टस्यैव करण स्वातन्त्र्यात् स्यात्, तस्मात्सर्वमेव तत्कर्मण एव—हेतोर्नात्मनः, कर्मण इति पञ्चम्या हेत्वर्थे विहितत्वात्, तद्व्यतिरेकेण क्व आत्मनि प्रतिपद्येत—तस्मादेवंविधात् क्व आत्मन्येवमनुपपद्यमान कर्म[णः]व्यतिरेकेणाभ्युपगच्छेत्? नाभ्युपगच्छत्येव विद्वानित्यभिप्रायः, तस्मादहेतुः पुरुषस्तत्कारणम् । 15

अकारणमपि कर्म सहायापेक्षम्, कवलास्यप्रक्षेपादिवत्, अतो भारोत्पाटवत् फलोपहाराय तत्स्वामिनः कर्तुर्नियोगोद्योगाद्यन्तरापेक्ष्यौ, बाह्या च प्रकृतिरिति न मन्तव्यम्, तान्यपि हि

पुनरपीति पुनरप्यतः—अनेन मन्येनोपन्यस्तमपि पुरुषकारकार्यं कर्मफलमिति भाव तदेवाह—यथाऽऽहारेति निषेकाद्यवस्थायामाहारस्य वहिः गर्भे च शरीरेन्द्रियादिनिर्वृत्तिकारणस्य तथा तथा परिणम्य विभजनं तथा गर्भे मातुरोजः पितुः शुक्रं प्रथमाहारः ततः सप्ताहं कललं भवति ततः सप्ताहमर्बुदमर्बुदात्तु जायते पेशी पेशीतो जायते घनमित्यादिना क्रमेण 20
शरीरेन्द्रियादिनिर्वृत्ति तत्सर्वं कर्मत एव ततस्तदनन्तरमपि प्राणनादिक्रियाद्यसमर्थस्याहारस्य दशरसादिभावेन परिणम्य यदिदं रसा-
दिभावेनाव्यक्तक्रियाभावेन विभजनमित्याद्यनभिसन्धिपूर्वकक्रियाः कर्मत एव न पुरुषादिव्यापारतस्तत्फलमिति भावः ।
एतदेवाह कर्मकृतमपि पुरुषव्यापाराविषयाहाराद्यारब्धिका शरीरादिनिर्वर्तनं मयैव कृतमित्यभिमन्यते केवलम् न तु वस्तुतः
तथैव तथा प्रथमस्थितिहेतोरुपरमाभावात् क्रियाः पुरुषेण सर्वदा क्रियेरन् तथा चैवायमेतो मयैव मरणाभावात् न चैवं दृश्यते
इष्यते च तस्मात् पुरुषकारनिरपेक्षमित्याह—तास्तु क्रिया इति । पुरुषकाराकार्यत्वे दोषान्तरमप्याह—कार्येन्द्रियेति । 25
सम्पूर्णेति शुभा ये इन्द्रियजातिसंस्थानसंहननादयस्तैर्युक्त एव स्यात् सर्वेन्द्रियपरिपूर्णोपाङ्गानि श्रोत्रादीनीन्द्रियाणि
शरीरसम्बन्धीनि शुभानि, जातिः पञ्चेन्द्रियजातिः संस्थानं चाकारविशेषः समचतुरस्रसंस्थानं शुभम्, संहननं वज्रर्षभनाराचसंहननं शुभम् जातिश्च [illegible] इत्याद्याः प्रकाराः । पुरुष-
कारेण यदि कार्यनिर्वृत्तिस्तर्हि धर्मोपगुणानविषयोपभोगादावेव तस्य प्रवृत्तिः स्यात् स्वतन्त्रत्वादात्मन इति भाव ।
एतदेवाह कर्मण एव हेतोरात्मनो हेतुत्वं नेति तस्मात्सर्वमेवेति । ननु यदि पुरुषकारो न कारणं तर्हि तं कर्म कथमपेक्षते 30
यथा च तदेव कर्मणा तथाविधकर्मसद्भावेऽपि पुरुषेण कवलमास्ये यावत् न क्षिप्यते तावत् कर्मनिमित्तकमपेक्षते
कर्मणा पुरुषकारसापेक्षणात्, यत कर्म कारणमकारणं वा भवता भारोत्पाटकसामर्थ्येऽपि पुरुषकारसद्भावेऽपि भारस्य
उत्क्षेपो निक्षेपो च विना नेव शक्नोति नेतुमिति पुरुषकार कारणमकारणमपेक्षते तथा कर्मापीत्याशङ्कते—अकारणमपीति,

1 सि. क. °हेत्वनुपरमात्।

स्वामिधर्माधर्मरक्षुनिबद्धानि तदायत्तत्वात्तद्भोग्यत्वात्तन्तुपटवत्, यदि ताम्येवं नेष्यन्ते तता सर्वाविशेषत्वप्रसङ्गः ।

(अकारणमपीति) स्वाम्यत्वमकारणमपि कर्म सहायापेक्षम्—पुरुषकारमकारणमपि कर्म सहायमपेक्षते, कचकाममक्षेपाविवत्, यथोक्तं 'भारूस्थापो निरुत्साह, स किञ्चिमामुते फलम् । तत-क्षीरादिपानश्च पौरुषाम विधिम्यते' ( ) भारो भारोत्पाटवत्—यथा भारं समुद्वहन् पुरुषः सहायमुत्क्षेप्तारं निक्षेपकश्चान्तरेण स्वयमेव न शक्नोति वोढुमिति कारण[म]कारणश्च एवमवा कर्म पुरुषकारमन्तरेणाति [कारणम]कारणश्चेत्येवमपि च न मन्तव्यम् [अ]कारणमपीत्यादिना वमेव पूर्वपक्षं व्याचष्टे, भारोत्पाटापत्रभारोत्पाटकवत् किं सहाय कर्मणाऽपेक्ष्यमिति चेदुच्यते—फलोपभोगा-पेक्षाणि फलमुपहरिष्यतः कर्मफलस्वामिनः कर्तुर्नियोगोपयोगाद्यपेक्ष्यो, भारा[व] स्वामारादि-महतीः, किं पुनः कारणमेवं न मन्तव्यम्? उच्यते—यतस्तान्यपि हि स्वामिधर्माधर्मरक्षुनिबद्धानीत्यादि यावत्तन्तुपटवत्, सहेतुकदृष्टान्तेन पटवाक्येनाभावादीनां धर्माधर्मकार्यत्वमापाद्य कर्मकारणाव्यवहार-यात् पुरुषकारं निराकरोति, तदायत्तत्वात्तद्भोग्यत्वादित्यादिना हेतुद्वैतन्यत्र दर्शयति, तन्तुपटवदिति-वचनायत्तपटवत् पटत्वेन तन्तूनामेव भोग्यत्ववत्, यदि तानीत्यादि, एवमनभ्युपगमे सर्वाविशेषप्रसङ्ग इत्यनिष्टापादनम् ।

यो॒ऽपि स्वामिपुरुषकारः सोऽप्यधर्मफलत्वात् कर्मैव क्लेशत्वात्, अथैवं पुरुषकारं संक्लिष्टा-धर्मफलं नेच्छसि ततो न तर्हि दुःखमधर्मफलमिति प्राप्तम्, शिरोरोगादिक्लेशत्वाद्यथायोग-पुरुषकारवत् । अथ प्रसिद्धिविरोधदोषभयाद्दुःखमधर्मफलमिति त्वयाऽनुज्ञायते तस्यापि क्रियायाश्च हिंसादेरिष्टफलप्राप्तिरिति प्राप्तम्, धर्माधर्मफलविपर्ययात् ।

योऽपीत्यादि यदपि चोक्तं स्वामिनियोगोपयोगाद्यपेक्ष्यादिति स्वामिपुरुषकारः, सोऽप्यधर्मफल-त्वात् कर्मैव, न पुरुषकारो नाम कर्मातिरिक्तोऽस्तीत्यवधारणार्थं प्राङ् प्रतिज्ञातं समर्थयति क्लेशत्वात्

पुरुषकारमिति चेत् पुरुषकारत्वापेक्षामीत्यादीन् दर्शयति मातरस्यादिति । एव इति पुरुषकार इति चेत् । कर्मफलापेक्षं राज्यादि निरर्थकत्वाऽभिप्राय दर्शयति फलमुपहरिष्यत इति यथो विचारः तथोक्तं प्रकृतिं—अथानन्तरम् । यथोद्योगमात्राद्रव्यादिनापि कर्मैव एव कामात् कर्मैव कारणं न त्वप्रयत्नं पुरुषकारापेक्षत्वादित्याद्येव व्यापादे यदत्यन्तमपि हीति यथोद्योगमात्रानपेक्षं अत्र प्रयोगः यथोद्योगादीनि धर्माधर्मफलान्यपि तदायत्तत्वात्, तद्भोग्यत्वात्, तदायत्तं तदात्मकम् यथा तन्त्वायत्तं पटतन्तुधर्मम् तैरात्मना च भोग्यं तदात्मा तद्धर्मम् यथा पटात्मना तन्तवो भोग्या अत एव पटतन्तुधर्मम्, एवं तदायत्तत्वात् यथोद्योगादि यथोद्योगाद्यात्मना च कर्मणामेव भोग्यत्वात् उद्योगादि धर्माधर्मरूपमिति भावः । यथोपेक्षणीयं कर्मफलं यावत्प्रयत्ने च एव यत्नोऽपि पेक्षणो हिंसादिविषयप्रयासादिष्वपेक्षा यदि तानीत्यादीति । एवं धर्माधर्मयोः पुरुषकारविनिमयात इति पुरुषकार एव कर्मेति प्रतिपादितं तत्त्वमर्थात्पाद्य याऽपीति यथोद्योगादिना पुरुषकारः कर्मैव अधर्मफलत्वात् यदि पुरुषकारः कर्मैव कर्मफलतीतोऽप्यतिरिक्त-पर्यायीति । यथोद्योगादि एवमधर्मफलमित्यादि क्लेशत्वादीति । यद्वा तत्र हेयत्वमधिकमिमात् क्लेशो हीति, यथो

१ सि क सहायापेक्षणात् । २ सि क. धर्माधर्मरज्जुनि निबद्धानी आदि ।

इष्टो हि चिन्ताव्यायामरूपो मनःशरीराऽऽयासात्मकत्वात्, ज्वरवत्, यथेष्टमपि, अथैवं 'पुरुषकारं संक्लेशाधर्मफलं नेच्छसि मनोत्साहयुक्तस्य प्रसक्तत्वेनेष्टत्वाल्लोके ततो न तर्हि दुःखमधर्मफलमिति प्राप्तं शिरोरोगादिक्लेशत्वात्, नयोद्योगपुरुषकारवत्, यथोक्तं 'अमर्षपाण्डित्यसमर्थीन यत्निवः सुतेषु दारेषु च नित्यसक्तिवः । निशासु जागर्ति हिनस्ति बान्धवानमोऽस्तु राज्याय वरं दरिद्रता ॥' इति, (　　)
अथ प्रसिद्धिविरोधदोषभयाद् दुःखमधर्मफलमिति त्वयाऽनुज्ञायते तस्यापि व्यक्रियाभावे हिंसादेर्दुःख- 5
मापनतो गतस्तोतत्कर्मणो हेतोः प्राणातिपातादेरधर्मफलप्राप्तिः, का सा ? चि[शि]रःशरीरेन्द्रियसुख- सम्यग्ज्ञानारोग्यादिप्राप्तिरिष्यैवत् प्राप्तं शुभाशुभयोरिष्टविपर्ययफलाभ्युपगमात्, धर्माधर्मयोर्योगे सुखं चेत्सुखत्वात्, अत एव प्राप्तमधर्मफलाद् दुःखात् सुखं धर्मफलमिति प्राप्तम्, किं तत् ? य[द]विष्टमात्रं प्रवर्तयति—इष्टप्राप्तिरिति, इष्टशरीरेन्द्रियादिप्राप्तिरिष्यैवत् प्राप्तम्, किं कारणं ? धर्माधर्मफलविपर्ययादिष्टतः पुरुषकारस्यैवार्थस्य प्रायश्चित्तत्वाविशेषात्, अतो यदुक्तं कर्मैव कारणं पुरुषकारस्यापि कर्मफलत्वा- 10
दिति नैषाम् पक्षः, यथोक्तं 'यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवोपतिष्ठते । तथा तथा पूर्वकृत्यानुसारिणी प्रदीपहस्तेव मतिः प्रवर्तते ॥ (सूत्रकृ० टी पृ० २१०)

अभ्युपगम्यापि पुरुषकारं दोषं ब्रूमः, स निर्हेतुकः सहेतुको वा स्यात्, यद्यहेतुकः मुक्तानामपि स्यात्, सहेतुकश्चेत् कर्मणा यथाचेतनाच्छुभादप्यनर्थावाप्तेरशुभादप्यर्थावाप्तेः शुभाशुभवैचित्र्यमनुमातुं शक्यते, युक्तिक्षमहेत्वन्तराभावात्, नान्यथाऽन्विर्वक्षमं कारणमस्ति । 15

(अभ्युपगम्यापीति) अभ्युपगम्यापि पुरुषकारं दोषं ब्रूमः, स निर्हेतुकः सहेतुको वा स्यात्, किञ्चातः ? स पुरुषकारो यद्यहेतुको मुक्तानामपि स्यात् नयोद्योगलक्षणो न चेष्यतेऽयम्, अथ मा भूदेष दोष इति सहेतुरिति ब्रूयात्तदा सहेतुश्चेत् कर्मणा यथाचेतनाच्छुभादपि पुरुषकारात्तस्यैवापि

इ चिन्तात्मकः मनआयासात्मकः शरीरश्च व्यायामरूपः शरीरायासात्मकः मनआयासात्मकः च क्लेशरूप एव यथा ज्वरशिरोरोगाद्या नयोद्योगादिरिति भावः । ननु मनोत्साहयुक्तस्य नयोद्योगवतो लोके श्रेयपुरुषतयाऽभिमतत्वात नयोद्योगी क्लेशस्याधर्मफलत्वाभिधानमनुपपन्नमत आह—न तर्हीति दुःखमपि क्लेशात्मकमपि नयोद्योगपुरुषकारवदधर्मफलं न स्यादिति भाव । नयस्य दुःखात्मकत्वं कारिकया दर्शयति—अमर्षेति निरर्थकं नीतिपात्रं सम्यगन्यायस्य पुत्रदारादिष्वपि शास्त्रानुसारिमीमांसा मिलेत् यदि तु निशास्वपि जागरूकः बन्धूनपि राज्यप्रसिद्धीक्षया हिनस्ति इत्थं राज्य चिह्न, अतो दरिद्रतैव श्रेयः तत्र हि नहि निशासु जनः स्वपितीति भावः । अथ दुःखस्याधर्मफलत्वानभ्युपगमे दुःखमधर्मफलमिति लोकप्रसिद्धिविरोधः तस्मात्तदधर्मफलमेवेष्टं तथापि दोषमाह—अथ प्रसिद्धीति दुःखमधर्मफलमिति लोकप्रसिद्धेरनुज्ञा यद्युपगम्यते तर्हि नयोद्योग- 20
स्यापि धर्मफलत्वमनुपपन्नं तर्हि यस्तु तो दुःखापन्नस्य हिंसादेस्तोषस्य धर्मफलविपरीतं भवेत् शुभाशुभ- योरिष्टविपर्ययफलत्वानुपपत्तेरिति भावः । तदेव दर्शयति—धर्माधर्मयोर्योगी सुखदुःखयोर्युक्तत्वादिति यस्तु तो दुःखापन्नस्य तु शुभादपि अशुभेनाभ्युपगतमधर्मफलं सुखमपि भवतीति प्रसज्यत इति भावः । इत्थं धर्माधर्मविपर्ययाभ्यु- पगमेन पुरुषकारो निरर्थक एव धर्माधर्मफलयोर्विपर्ययस्याविशेषादित्याह—धर्माधर्मफलेति । एवं पुरुषकारस्य कारणत्वाभ्यु- पगमापेक्षया कर्मकारणत्वाभ्युपगम एव न्याय्यः पुरुषकारस्यापि कर्मफलत्वादित्याह—अतो यदुक्तमिति । कर्मकारणत्वे 30
प्रमाणमाह—यथा यथेति । पुरुषकारं स्वीकृत्यापि दोषमभिधत्ते—अभ्युपगम्यापीति । सहेतुश्चेदिति तदर्थं

१ सि क पुरुषकारसंक्लेशमधर्मफलं । २ सि क. गतस्तोतत्कर्मणः । ३ सि क. पुरुषकाराः ।

कादर्नर्योपाप्तेरनुमानादपि भावाविपात्रादेरर्थापत्तेर्धर्माधर्मफलसंसारयोरेकरनुमातुं शक्यते—यदर्थं बुद्धिपूर्वं कार्यचेतनकर्मपक्षादेवैव शुभाशुभवैचित्र्यम्, किं कारणम् ? बुद्धिमदीश्वरमारामाभावात्, विचारितमिति सिद्धत्वात् पुरुषनियतिकालस्वभावादीश्वरान्तराणाम्, नात्राभ्यधिकमपरं किञ्चित् कारणमस्ति—अन्यदतो देवान्यात् कर्मणः।

5 यदा चैवं प्रवृत्तौ कर्मण एव कर्तृत्वं सिद्धं तदा द्रव्यतीति द्रव्यं कर्तृसाधनं न भवति, स्वतन्त्रस्य कर्तुरनुपपत्तेः, कर्मपरिग्रहविशेषात्तु द्रव्यं द्रूयते गम्यते भोग्येन कर्मपुरुषेण तेन द्रव्यं क्रियते कर्मपुरुषेणैव कर्मपुरुषः क्रियत इत्युक्तं भवति, यथा व्रीहिणैव व्रीहिः क्रियते कार्येणैव बीजव्रीहिणाङ्कुरव्रीहिरिति।

यदा चेत्यादि, यस्मिन् काले यत्नं कृत्वा पुरुषस्य प्रवृत्तौ साध्याभावो नास्ति कर्तृत्वमिति 10 सिद्धं[1]—कर्मण एवेति सिद्धं[2] तदा—तस्मिन् काले द्रव्यतीति द्रव्यं कर्तृसाधनं न भवति, स्वतन्त्रस्य कर्तुरनुपपत्तेः कर्मपरिग्रहविशेषात्तु—तुशब्दो विशेषावधारणार्थः, कर्मसाधनमुपपन्नार्थं द्रव्यं द्रूयत इत्येव विशेषोऽवधार्यते, तदिदमुच्यते—द्रूयते गम्यत इत्यादि, तदिदमेव निरूप्यते—भोग्येन कर्मपुरुषेण तेन द्रव्यं क्रियते किमुक्तं भवति ? कर्मपुरुषेणैव कर्मपुरुषः क्रियत इत्युक्तं भवति, तत्र दृष्टान्तो यथा व्रीहिणैव व्रीहिः क्रियत इति कार्येणैव बीजव्रीहिणाङ्कुरव्रीहिरिति तद्व्याख्या एवं तावदयमार 15 येन कर्मैवं निराकृतः, कर्मैकान्तवाद उपपादितः, चेतनाचेतनैकत्वात् सर्वसर्वात्मकत्वाच्च, अन्यश्च ईश्वरोऽन्यो हेतुरिति चेति।

यथाप्येवं वादिनस्ते कार्यलक्षणत्वात् कर्मणः कार्यं कर्म प्रतिपद्यते तत्कर्मेत्यव-शार्थापत्त्यानुमेयः कर्ता, तस्मात् कर्मणोऽन्यं कर्तारमन्तरेण कर्माभावात् घटस्येव कुम्भको

कुम्भकारः कोऽनुमेयो यदि तर्हि न हेतुः कर्मैव सुखदुःखभवसामर्थ्यं प्रसाधनपुरुषस्य प्रयत्नं प्रति कर्मापि नान्यत्, 20 कार्योऽनुमीयते एवमनुमानमनैकान्तं कर्मवादेन बुद्धिमदीश्वरान्तराभावादिति, हेत्वन्तराणां कारणत्वं विचारेण विधिवदेव तस्मात् कर्मैव कारणं नान्यत् पुरुषादयोऽपि न कारणमिति भावः। प्रवृत्तिं प्रति कर्मैव एव कर्तृत्वोक्तेः पुरुषे न प्रवृत्तिं प्रति करोति पुरुषस्य कर्मांशकर्मकर्तृत्वात् स्वतन्त्रत्वं भोग्यस्य स्वतन्त्रत्वात्, किन्तु द्रूयते गम्यते कर्मद्रव्यमिति कर्मपुरुषेण द्रव्यत्वं तदेवाह—यदा चैवमिति। कर्मैव एव कर्तृत्वे पुरुष कर्मद्रव्यं भवेत् द्रव्यतीति हि द्रव्यमुच्यते तत्र स्वतन्त्रस्य कर्तुः विधित्वात् कर्तृत्वेन च कर्तृत्वात् स्वतन्त्रस्य पुरुषस्य न द्रव्यत्वेऽसाधकत्वाभावात् तस्मिन् काले इति। किन्तु द्रव्य- 25 त्वस्य कर्मपुरुषस्य द्रूयते द्रव्यं भवतीत्याह—कर्मपरिग्रहेति। कर्मपरिग्रहविशेषादेवेदं तत्र च द्रव्यत्वं कर्म-साधनं द्रूयते कर्मद्रव्यमिति मनुष्यत्वादि भावः। तदर्थमाह भोग्येनेति भाग्यभक्ताविना भोग्यं हि कर्म, तेन द्रूयते पुरुष इति तात्पर्यम्। तत्र च कर्मैव पुरुष एव कर्माभ्यं पुरुषं करोति कर्मपुरुषयोरभेदोऽभ्युपगतत्वात्, कर्म एव पुरुषो भवति पुरुष एव कर्म भवतीत्युक्तत्वात् प्रयोजनपरार्थत्वादनुमितपुरुष कर्मैव प्रयोजकत्वेन परमार्थतः तदेव भवति, यथा बीजव्रीहिणा व्रीहिणाङ्कुरव्रीहिः क्रियते तथैव कर्मपुरुषेण कर्मपुरुषः क्रियत इति भावः। कर्मवादीति एवं तावदिति, 30 कर्मपुरुषेणैकत्वादेव द्रव्यमिति कर्मैकान्तवाद् कर्मैकान्तवाद उपपादितः न तु पुरुषोऽपि कारणम्, कर्मैकान्त-वादे दोषमाहाते—यथाप्येवमिति, किम इति अनुपपन्नं कर्मणः कार्यलक्षणत्वात् तस्यापि चेतन कर्तृप्रयोज्य

---

१ भि क. तदुमानम्। २ भि क. पुरुषपि पुरि। ३ भि क. सिद्धं।

व्याप्येप्यः कर्तेति, तन्न, ननु कर्मणैव करिष्यते स्वत एव कर्मणा कर्म क्रियते, न तु तद्व्यति रिक्तेन कर्त्रेत्युक्तम्, ।

यथापीति, न केवलं कर्तृसाधन एव दोषः, किं तर्हि ? कर्मैकान्तवादोऽप्ययुक्तः, तत्प्रदर्शनार्थमाह एववादिनः ते पुनः कार्यलक्षणत्वात् कर्मणः कार्यं कर्म परिकल्प्यते तत्कर्म, 'कर्तुरीप्सिततमं कर्म'ति (पा० १–४–४९) लक्षणादक्षरार्थाच्चानुमेयः कर्ता, तस्मात् कर्मणोऽन्यं कर्तारं कर्मव्यतिरिक्तमन्तरेण कर्माभावात्तदृष्टत्वेन कुम्भको व्याप्येप्यः कर्ता, प्रयोगश्च तस्यो व्यतिरिक्तचेतनकर्तृकम् सविदं कर्म, कार्यत्वात्, क्रियमाणत्वात्, घटवदिति, अत्रोत्तरं परः—ननु कर्मणैव करिष्यत इति, स्वत एव कर्मणा कर्म क्रियते न तु तद्व्यतिरिक्तेन कर्त्रेत्युक्तम्, व्रीहिणैव व्रीहिः कार्येण बीज व्रीहिणा कार्योऽङ्कुरव्रीहिः क्रियत इत्युक्तं मयेति स्मारयति ।

इतर आह— 10

ननु सुदूरमपि गत्वा त्वयाप्येतदभ्युपगन्तव्यं कर्मव्यतिरिक्तः कर्ता पुरुषोऽस्तीति, व्रीहेरव्यापकत्वात्, स्वरूपभेदात्, अक्षरार्थाच्च निर्विवादकृतकत्वात् कर्मणः कर्तुरेव भावात् सर्वस्य, एवञ्च त्वदुक्तहेतोरेव कर्मव्यतिरिक्तपुरुषसिद्धेरापर्तकधर्म्येण कर्मणः कृतकत्वं कर्त्रयोगान्तरभूतस्यावधारणमयुक्तम्, तदुक्तेः ।

ननु सुदूरमपि गत्वेत्यादि, विचार्य विचार्याप्यारम्भव्यतिरिक्तपुरुषाविनाभावित्वात् कर्मण 15 त्वयाप्येतदभ्युपगन्तव्यं कर्मवादिना कर्मव्यतिरिक्तः कर्ता पुरुषोऽस्तीति, कस्मात् ? व्रीहेरव्यापकत्वात्, अस्यापि व्रीहिदृष्टान्तस्य बिसुदककाकस्याङ्कुराद्यावृत्तिरूपत्वात् तेषाञ्च स्वरूपभेदात् स्वतः पृथग्भूतकर्त्रविनाभूतं कर्म सिध्यति, अतो विपर्ययसाधनत्वमिति क्रियान्तरम्—अक्षरार्थाच्च—क्रियत

एव यतः कर्त्राऽमुं यदिष्यमाणतमं तत्कर्म भवतीति व्याकरणेऽपि कर्तृलिङ्गः अक्षरानुपपत्तिन्याय कर्मणोऽपि कर्ताऽनुमेयस्तस्मात् कर्म कर्तारं आरभ्यमिति कर्मैकान्तवादोऽपि न युक्त इत्यर्थं वर्णयति—न केवलमिति कार्यत्वं कर्मणो लक्षणम्, 20 परिकल्प्यते तत्कर्मेत्यक्षरार्थः पक्षिमाह तस्मादिति कर्मव्यतिरिक्तं कर्तारमन्तरेण कर्मणोऽसम्भवात् कर्ता सिध्यतीति भावः । व्याप्येप्य इति व्याप्येन कर्मणोऽभिव्यक्तचेतनः कर्तेत्यर्थः । अनुमानेन तमेवार्थमाह प्रयोगश्चेति तदीयं कर्मेति धर्मः पक्षो व्यतिरिक्तचेतनकर्तृकमिति साध्यधर्मः कार्यत्वादिति लक्षणमूलो हेतुः क्रियमाणत्वादित्यक्षरार्थो हेतुः घटवदिति दृष्टान्तः इत्थं कर्तारं प्रसाध्य कर्मणः स्वातन्त्र्यं प्रतिषिद्धम् । समाधानमाह—अत्रोत्तरमिति परः कर्मैकान्तवादी अर्थः अतो व्यतिरिक्तकर्तृसाधनमसिद्धम्, कर्मणैव कर्म क्रियत इति पूर्वमुपपादितत्वादिति भावः । अमुतं विचार्य विचार्यापि 25 कर्मव्यतिरिक्तः कर्ताऽभ्युपगन्तव्य एव नहि पुरुषं विना कर्म क्रियते कर्तेति व्रीहिणैव व्रीहिः क्रियत इति दृष्टान्तोऽप्यसिद्ध एव व्रीहेर्भूम्यादिविचारात् भूम्यादेव व्रीहेर्निवर्तमानत्वाच्च व्रीहित्वमिति सोऽपि कर्मव्यतिरिक्तकर्तृकमाप्तेत्यभ्युपगमनाद् तन्निवृत्ति कर्मपुरुषेणैव कर्मपुरुष क्रियत इत्येतावतैव न विचारविरमणं भवति कर्मणोऽपि कार्यत्वात्, तस्य चापेक्षाती व्यापकत्वमपेक्ष्य व्यतिरिक्तं कारणमवश्यमेवाभ्युपगम्यमिति भावः । एतदेवाह—विचार्य विचार्यापीति, व्रीहिदृष्टान्तस्य स्वरूपभेदविपर्ययसेन साधन इति वर्णयति अस्यापि व्रीहिदृष्टान्तस्येति । क्रियत इति कर्मोत्पाद कर्मानुत्पत्त्या प्रकृतकर्मत्व 30 प्रकृतिनाशात्मकेन कर्मणो जन्यते न तु स्वतोत्पत्तम्, तथा च प्रकृतकर्तोऽन्यो नास्य यस्य प्रमाणात् कर्माऽऽत्मलाभं लभत इति तदभिप्रायकविचारतः कर्तेन पुरुषेणारब्धमित्यर्थ इत्याह—अक्षरार्थाच्चेति । कर्तुरीति न षष्ठी किन्तु पञ्चमी

---

१ सि. क. कर्तरि । २ सि. क. तत्रैवा ।

इति कर्म, कर्तुरीप्सिततमं कर्म (पा १-४-४९) इति कर्मशब्दार्थः, ततश्च कृतकत्वं निर्विकारम्, तस्माच्च निर्विकार[कृत]कत्वात् कर्मणः कर्तुरेव भावः सर्वत्रैव पुरुष एव भवति, कर्तुरेव भावः सर्वमपि पञ्चमीनिर्देशात् पुरुषादेव सर्वं भवति कारणात्, एवञ्च स्वबुद्ध्येवारेव कर्म व्यतिरिक्तपुरुषसिद्धेः—कर्मणश्च तद्व्यतिरिक्तस्य सिद्धेरावर्तकत्वेनधर्म्येण कर्मणः कृतकत्वं कर्त्रधीन 5 भूतस्वभावकारणप्रायुक्तम्, कुतः? तदुच्यते—तस्मादेव हि कर्तुः पुरुषात् कर्मणः कृतकत्वशक्तिः, कर्तुर्वा पुरुषस्य करणशक्तिः, न भीतिरेव भीतिरपादानत्वेनेति ।

न हि सा क्रियमाणाऽऽत्मलाभमनुपतित्वादस्वतन्त्रत्वाच्च भवति, अभूतदेवदत्तवत्, अनिष्टत्वेतत्तथापि । पुरुषकारप्रत्याख्याने च सर्वशास्त्रवैयर्थ्यप्रसङ्गः, हिताहितप्राप्तिपरिहारार्थानि हि सर्वशास्त्राणाम्, ताभ्यां प्रमाणान्तरसंवादेन निरूपीकृतसत्यत्वानि चिकित्सितादीनि 10 शास्त्राणि पुरुषक्रिययोरभावे निराकृतानि स्युः, नैवेष्यते तन्निराकरणमेवम्, स्वबुपदेशादि क्रियाणाञ्च दृष्टार्थानाम्, कर्मप्रवृत्तिभावप्रत्यक्षप्रतिपत्त्यप्रतिपत्त्योः ।

न हि सा क्रियमाणेत्यादि यावत्-भूतदेवदत्तवदिति, सैव भावयति तस्याः कर्मशक्तेः [अ]लब्धात्मलाभमनुपतित्वात्, अस्वतन्त्रत्वाच्च कुतो भवनम्? दृष्टान्तः—अभूतदेवदत्तवत्—यथा गर्भोपक्रमावस्थायां कार्याणामलब्धात्मवृत्तित्वादस्वतन्त्रः, अस्वतन्त्रत्वादकर्तृत्वमकर्तृत्वाच्च न भवति 15 कार्यावस्थाव्यतिरेकेण यथा देवदत्तस्य कार्यावस्थायां कथमपि क्रियमाण न भवेत्, अनिष्टत्वेतत्तथापि तस्मात् कर्म भवति तच पृथग्भूतपुरुषभवनादृते न भवतीत्यस्ति पुरुषः । किञ्चान्यत् पुरुषकारप्रत्याख्याने सर्वशास्त्रवैयर्थ्यप्रसङ्गः, कथं? यस्मात् हितप्राप्त्यहितपरिहारार्थानि सर्वशास्त्राणाम्, ताभ्यां हिताहितप्राप्तिपरिहाराभ्यां निरूपीकृतसत्यत्वानि प्रमाणान्तरसंवादेन चिकित्सितादीनि शास्त्राणि,

तच न सर्वं कर्तुः पुरुषादेव कारणाद्भवतीत्यर्थं दृष्टान्त-कर्तुरिवेति । तत्पुरुषव्यतिरिक्तपुरुषोऽस्ति एव कर्मव्यतिरिक्तः पुरुषः 20 [illegible] कर्मपुरुषयोर्व्यतिरेकमिदं दर्शयति । [illegible] कर्तुरीप्सिततमं कर्म [illegible] पुरुषस्य च कारणशक्तिः [illegible] भाव । [illegible] कर्मपुरुषयोः क्रियत इति [illegible] पुरुषात् न तत [illegible] 25 [illegible] कर्मभूतपुरुषः कथं क्रियत इति भावः । तत दृष्टान्त माह-अभूतदेवदत्तवदिति यथा गर्भस्य प्राग्भावावस्थायां [illegible] [illegible] कर्मापि [illegible] क्रियमाणं न भवेत्, क्रियमाणत्वं च न [illegible] भाव । पुरुषक्रियाया अनभ्युपगमे दोषान्तरमाह-पुरुषकारेति पुरुषक्रियाया निराकरणे 30 [illegible] पुरुषस्यार्थक्रियया [illegible] भाव । [illegible] प्रमाणभूतानि [illegible] ताभ्यामिति । [illegible] चिकित्सितादीनीति [illegible] । [illegible]

१ [illegible] । २ [illegible] । ३ [illegible] । ४ [illegible] । ५ [illegible] ।

यथा 'कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः । तद्वद्दन्ती प्रभावात्तु विरेचयति सा नरम् ॥' (चरके
सू० अ २६ श्लो० ६८) 'नागरादिविपाकमुखाश्रयः स्यादामपाचनः' (चरके चि अ १५
श्लो ९८) इत्यादीनि, पुरुषक्रिययोरभावे कर्मकारणैकान्ते निराकृतानि स्युः, इत्थ मेवेष्यते तन्नि
राकरणम्, कस्यचित् प्रामाणान्तरसंवादिनः शास्त्रस्य प्रामाण्यदर्शनात्, त्वदुपदेशादिक्रियाणाञ्च दृष्टा
र्थानां, निराकरणमेवमिति वर्त्तते, कर्मकारणैकान्ते पुनः पुरुषस्य स्वतन्त्रस्य तत्क्रियायाश्चाभावे पर 5
प्रतिपादनार्थं तच्छब्दयुक्तशब्दोच्चारणक्रिया न स्यात्, कर्मत एव प्रवृत्तेः, आतिभक्ष्यादेर्वनस्य मुख-
संयोजनादिक्रियाश्च न स्युः कर्मप्रवृत्तिमात्रत्वात्तत्प्रतिपत्त्यप्रतिपत्त्योः–त्वदुपदेशार्थप्रतिपत्तिः कर्मत एव
परस्य सा प्रतिपद्येत विनाप्युपदेशेन, न प्रतिपद्येत वा सत्यप्युपदेशे ।

कर्मप्रवृत्तिमात्रत्वात्तत्प्रतिपत्त्यप्रतिपत्त्योः कर्मत एव भवतीत्युपपद्यते, प्राज्ञपुरुषप्रति
पत्तिवत् बलीवर्दाद्यप्रतिपत्तिवच्च तस्मात् सर्वाण्येतानि कर्मण एवेति चेत्, त्वमिदमसि तावत् 10
प्रष्टव्यः, अथ तदादिकर्म कुतः? किं तदपि कर्मण एव? उत पुरुषात्? इति, ब्रूयास्त्वं ओमिति
गत्यन्तराभावात्, न, व्रीहिवैधर्म्येणाकर्तृकत्वात् कृतकत्वमपयाति, ततो बाह्यो व्रीहिर
कृतकः, ततश्चाक्रियमाणत्वान्न कर्मत्वं तस्य आत्मादिवत्, उत्क्षेपणादिवदिति, एवञ्च कृत्वा
तदपि सर्वमसम्बद्धं यत्कर्मकारणैकान्तिन आहुः, यच्च पुरुषकारकारणैकान्तिन आहुः ।

कर्मप्रवृत्तिमात्रत्वादित्यादि, यावत् कर्मण एवेति चेत्, आम्नाय उच्यते शास्त्रनिरा- 15
करणमेवं त्वदुपदेशादिनिराकरणञ्च कर्मणोऽस्वतन्त्रत्वे तत्प्रवृत्त्यासन्नवृत्तित्वादमूर्तत्वेनत्वदवयवम निर्वि
कारकत्वकरणात् कर्तुरेव भावः, तच्छक्तेः व्रीहेरप्यावर्तकत्वात् स्वरूपभेदात् पुरुष एव भवतीत्यादि

कटुक इति श्लोकनिर्दिष्टपचित्रको रसे कटुकः विपाके कटुकः वीर्ये उष्णः सम्मतः एवमभिधानेऽपि रसवीर्यविपाकेषु
चित्रकसमानगुणा भवति तत्र रसेन वीर्येण विपाकेन न इत्थं किञ्चित् किञ्चित् कर्म इष्यते एवं प्रभावेणापि दन्ती कटुकर
सवीर्यविपाकेऽपि प्रभावात् नरं विरेचयति न चित्रकः एवं रसे तुल्यत्वेऽपि विपाकेऽधिके रसविपाके तुल्यत्वेऽपि 20
वीर्यभेदेऽधिके रसवीर्यविपाकत् समत्वेऽपि प्रभावोऽधिक इति यथा दन्ती अत्र हि प्रभावेण रसवीर्यविपाका अभिभूयन्त इति
श्लोकाभिप्राय श्लोकान्तरमाह नागरेति आमिदोषविनिर्दिष्टित- आमा आमे पाचयतीत्यर्थः, एतेषां वचनानां श्लोक
निर्दिष्टज्ञानेन तदुपलम्भनाद्वे संवादेन तत्सार्थमिति भावः । पुरुषतत्क्रिययोरभिमतत्वे कर्मत एव प्रमाणपरत्वे यतः
कर्मपरपुरुषप्रत्ययमतेन शास्त्राणि वैयर्थ्यान्निराकृतानि भवेयुरित्याह–पुरुषेति । न चैवमिष्यते शास्त्रप्रमाणमनुपप
न्नमित्याह–इत्थं नैवेष्यत इति । दोषान्तरमाह त्वदुपदेशादीति त्वदुपदेशादिक्रियाणाञ्च दृष्टार्थानां निराकरणमेवमिति 25
योज्या तदर्थमाह–कर्मकारणैकान्त इति, यदि कर्मैव कार्ये भाव्यत निर्विवादं परं बोधयितुं शब्दोच्चारणं न
स्यात्, कर्मत एव प्रतिपत्त्युपपादितत्वं । त्वदुपदिष्टार्थस्य बोध परस्य यदि कर्मत एव स्यात् न तु पुरुषकारणादि त्वदुपदेश
मन्तरेणापि प्रसुयात् नैव वा प्रसुयादुपदेशे सत्यपि तत्वाभिवर्त्याभावाद्दोषबोधादिक्रिया व्यर्थैवेति निराकृता भवेत्
कर्मान्यत्वात् इत्याह कर्मप्रवृत्तिमात्रत्वादिति । अथ कर्मान्यवादी पुरुषवादिनोक्तान् दोषान् तादवस्थ्येनाह एतदपि
व्याख्यातमिति शास्त्रनिराकरणं तदुपदेशनिराकरणप्रसङ्गमेवम्, कर्मणोऽस्वतन्त्रत्वादि तु न हि तैरभिमतेन पुरुषवादिनो- 30

---

१ कि तत्प्रतिपत्त्यो: । २ सि° वचनम् ।

सूत्र नोपपद्यते कर्मैव एव भवतीत्युपपद्यते कर्मप्रवृत्तिमात्रत्वात् तथा शास्त्रार्थस्याप्युपदेशादिक्रिया-मात्र प्रतिपत्त्यप्रतिपत्त्योः कर्मप्रवृत्तिमात्रत्वात्, ग्रामपुरुषप्रतिपत्तिवत् बलीवर्दाप्रतिपत्तिवच्च तस्मात् सर्वाण्येतानि कर्मण एव हेतोर्भवन्ति पूर्वोक्तन्यायवत् वृथा स्वाध्यायादिशास्त्रपरिमाणस्यासहोक्त-फलत्वाच्चेति, वेदान्तानाम् एवाध्येष्यन्यसे तत्त्वमित्यमसि तावत् प्रष्टव्यः, अथ तदाकिर्म इव

5 इति, मम तावदभिप्रायः कृतकत्वात् कर्मणः पुरुषार्थेन भवितिति तमेष्यता त्वया वक्तव्यं कुतस्तदपि कर्म ? यत एतस्यैव प्रतिपत्त्यप्रतिपत्तिहेतुत्वात्रादीति, त्वदभिप्रायावर्णनार्थः प्रश्नः किं तदपि कर्मण एव ? उत पुरुषादिति, ब्रूयास्त्वं यो-पुरुषार्थेनेति,–एवं नामास्तु को दोषः गत्यन्तराभावात्, कर्मैव यदेतमपि प्रायः स्यादिति, अत्र ब्रूमः, न व्रीहिवैधर्म्यप्रसङ्गात्‌ व्रीहेरसाकर्तृकत्वात् कृतकत्वमपवादि ततो बाऽन्यो व्रीहिरकृतकोऽकर्तृकत्वात्, तत्प्राक्क्रियमाणत्वान्नोपपद्यते कर्मणः कर्मत्व तदादिकर्मणः

10 किमिव ? आत्मादिवत् यथाऽऽत्माकाशकालदिगादीनि न केनचित् क्रियन्ते इत्यकृतानि तथाऽऽदिकर्मापि स्यात्, वेदक्षेपणादिवदिति, वैधर्म्ये[णि]दर्शनम् यथोत्क्षेपणं कर्म तदुपरतिरेकेणो हेत्रा विना न भवति [न]वदेवमिति एवं पुरुषकारवादिम कर्मवादी दूषितः कर्मवादिना प्राक् पुरुषवादी, तस्मादयुक्तमे तन्न कृत्वा तदपि सर्वमसम्बद्धं परस्परैककारणैकान्तिन स्याद्वः एवं पुरुषकारकारणैकान्तिन स्याद्वा-दपि सर्वमसम्बद्धं परस्परदूषितत्वादिति ।

---

15 एम्, विधिवाद्यारभ्यत्वादिति यद् प्रागस्मपि यत्वेनाभि प्रत्येकोऽर्थ एवमनूद्यत सर्वो प्राप्ति कर्मैव एवोक्त कर्मैव एव भवतीत्युपपद्यते इति तत्र हेतुमाह कर्मप्रवृत्तिमात्रत्वादिति पुरुषस्य सर्वो मतम्। कर्मैव एव न हि तद्व्यति-रेकेण न हेत्वपि सम्भिन्नु भाव इति यावत् । शास्त्रोक्तविधिविशेषेष्वप्येकस्योत्पन्नपुरुषस्यैकस्यार्थक्रियामात्र प्रतिपत्त्यप्रतिपत्त्यो एवं कर्मैव एवेत्याह–तथा शास्त्रार्थस्येति । यदपि यस्तदर्थमेवार्थी प्राज्ञः पुरुषस्तदर्थमभिप्रपन्नो, यतो कर्मपरि-र्णतिप्रपन्नो प्रत्येऽपि प्रत्ये तस्यत्वर्थं कर्मनिमित्तमित्याह ग्रामपुरुषेति । पूर्वोक्तन्यायवदिति कार्यान्तरेष्वपि यस्माद्

20 देव इत्यादि पूर्वोक्तन्यायवत् कर्मैव प्रवर्तकमिति भाव । पुरुषकारस्तु वृथैव न्यायवत्सत्येन निष्फलत्वादित्याह वृथा स्विति । अथ पुरुषकारवादी निरस्य समाधत्ते–तत्त्वस्त्वमित्यमसीति प्राथमिकं कर्म इत्य त्वत्पक्षम्, द्वितीयादिकर्मार्थं पूर्वकर्मतत्प्रयुक्तोऽपि प्राथमिकं कर्म नन्वपपद्यते तदुक्तं कर्मणोऽभावात् कर्मैव क्रियमाणत्वात् क्रियमाणस्य च कर्तृत्वस्य-त्वादिति भाव । पुरुषवादी तदभिप्रायमाह मम तावदिति मध्यन्तानुवादी एवं पुरुषार्थेन तदादिकर्म भवतीति भवान् ब्रूयादथवा कोऽपि तद्बूयात्–ब्रूयास्त्वमिति निगमयति ममाभिप्राय अपि तु त्वदाक्षेपेऽप्येवम् कोऽत्र दोष इति

25 भाव । दोषमत्राह पुरुषवादी–अत्र ब्रूम इति मध्यन्तानुवादी एवं निर्वस्तु करोति, यतः कर्म तत्स्थं कर्तृत्वस्यापि यदि तत्र तत्कर्तृकं यथा व्रीहिरिति व्रीहिवैधर्म्येणाकर्तृकत्वेनाकारकत्वस्यैव विद्यते अन्यथा व्रीहेः अकर्तृकत्वादनुपपन्नो-कर्तृकत्वाद्व्रीहिरपि न कृतक स्यादिति भाव । एतच्च कर्मणोऽप्रकृतत्वसिद्धौ क्रियमाणत्वाभावेन विकल्प इति कर्मेति प्रवृत्ति-सिद्धं कर्मत्वमपि न स्यादित्याह–तत्त्वमेति । आदिकर्मणोऽपि न कर्म अक्रियमाणत्वात्, आत्मादिवत् वैधर्म्येणोत्क्षेपणादिवत्, उत्क्षेपणादि क्रियमाणत्वात् कर्म तथात्वेन नोत्क्षेपणस्यान्तरेण तत्र भवति न वैधर्म्यादिकर्मेति भाव । एवम् कृत्वा कर्मणोऽस्त्वनार

30 दोषप्रसक्तमेव कृतं वैतदन्यस्यासम्बद्धत्वप्रसङ्गेति पुरुषकारवादिनोक्त तथैव स्यादनन् तदाह इत्यादमपि यावो पुरा एवेति नियत यदि–तस्मादयुक्तमिति हेतुमाह–परस्परेति परस्परेण परस्परं दूषितत्वात् कर्मवादिना पुरुषकारस्य पुरुषवादिना च

---

१ सि प्रतिपत्तो । २ भि प्रत्यावर्तस्यापी । ३ पुरुषार्थेनेति पुरुषं भावि । ४ भि॰ स्वावर्तकत्वात्कृतपुरुषार्थि तन्मेयत्वो व्रीहि । ५ सि क॰ योत्क्षेप ।

तदुभयमिदानीमेकमेवाप्यसम्बद्धमिति प्रदर्शयितुकामः प्रश्नयति—

कथमसम्बद्धम्? नहि शुभमशुभं वाऽत्र किञ्चिदाभ्यन्तरं बाह्यं वा इष्टस्य कारणम् अनिष्टस्य वा, सर्वमेतदिष्टकारणमप्यनिष्टकारणमपि शुभमप्यशुभमपीति गृहाण, यथा त्रिदोषघ्नं मोदकादि प्रमाणाप्रमाणकालाकालाऽऽहारितं तथैक एव शुभाशुभादिधर्मा अयं पुद्गलकायः, पुद्गलनिरुक्तिकः कायः शरीरं चितत्वात् पुद्गलस्य पुद्गलस्यैव वा कायः इति भोक्तृभोग्यात्मकविपरिणामवृत्तित्वात्, आहारवत्, कायचैतन्ययोर्वा ऐक्यपरिणामापन्नयोरेव भोक्तृभोग्यविपरिणामवृत्तित्वं सिद्धमतो भोक्तृत्वाद्भोग्यत्वाद्वा शुभोऽशुभश्च कायः।

कथमसम्बद्धमिति, परवचनेन स्ववचनेन चैकत्वात्तयोः पृथक् कर्म पुरुषकाराभावादेवा-सम्बद्धमिति तत्प्रतिपादयिष्यमाणः यस्मान्न शुभमशुभं चेत्यादि यावत्कायः इति, अयं तावद् दृश्यमानः कायः पुरुषो वास्तु यत्तेऽभिरुचितं न मे कश्चिदत्र पक्षपातः, तत्र यस्मान्न किञ्चिदत्र शुभमेवाशुभमेव वा, बाह्यमपि कायादिममभिमतं रूपादि इष्टस्य सुखस्य कारणं चित्रमयूरखङ्गचन्दनभ्रमररुतादि, अनिष्टस्य वा दुःखस्यातिविवर्णदुर्गन्धसंस्पर्शकण्टकशिलातलादि, सर्वमेवेष्टकारणमप्यनिष्टकारणमपि शुभमप्यशुभमपीति गृहाण, द्रव्यक्षेत्रकालभावपुरुषान्तरसंयोगविशेषाभ्यपरिणामविशेषापत्तेः सुरभिमधुरसुरससुरूपसुखस्पर्शेतरभावमुपगच्छत्, अभक्षितभक्षितमोदकवत्, पक्वापक्वफलवत् पद्मकेसरलाभवत्, वाताभावविषमाविषमरात्रिवत्, सस्यासस्यस्त्रीपुरुषगीतरुदितादिवत्, यथोक्तमार्षे 'जे चेव पोग्गला सुब्भिगन्धत्ताए परिणमंति ते चेव पोग्गला दुब्भिगन्धत्ताए परिणमंति' (   ) इत्यादि, तस्मान्न शुभमशुभं चैकान्तेन किञ्चिदस्ति भिन्नजाति, किं तर्हि? तदेव शुभं तदेवाशुभं तदेवेष्टकारणमनिष्टकारणञ्च, यथा त्रिदोषघ्नं मोदकादि प्रमाणाप्रमाणकालाकालाऽऽहारितमिति सकलसर्पदष्टाहारितविषवद्वा, तथैक एव अयं पुद्गलकायः पुद्गलनिरुक्तिकः कायः शरीरं चितत्वात्, रोगादिदुःखनिवासत्वाद्वा सर्वोऽपि बाह्याभ्यन्तरो मूर्तद्रव्यसंघातः कायो रूपादिसंघा-

र्मपरत्व पृथक्त्वादिति भाव । द्वयमपि एकत्वे योजयन्नाह—तदुभयमिति । कथं कर्मपुरुषयोरप्यसम्बद्धमित्यर्थं दर्शयति—कथमिति । कथं कर्मपुरुषयोरप्येकत्वेनैकत्वात् पृथक्त्वाभावादेवासम्बद्धत्वात्—परवचनेनेति । बाह्यमाभ्यन्तरं वा वस्तु किञ्चिदेकान्तेन शुभं किञ्चिदेकान्तमशुभं किञ्चिदिष्टमेव साधनं किञ्चिदनिष्टमेवेति नहीदं किन्त्वेकमेव शुभमशुभमिष्टसाधनमनिष्टसाधनमपि द्रव्यक्षेत्रकालभावपुरुषान्तरसंयोगविशेषेण तथा तथा परिणामविशेषमापद्यत इत्याह—अपि त्वन्यदिति । रूपादीति चित्रादिरूपादिकम् । एकस्यैव सुरभित्वादिपरिणामापत्तौ दृष्टान्तमाह—अभक्षितेति अभक्षितं मोदकं सुरभि भवति, भक्षितमसुरभि पक्वाम्रफलं मधुररसं भवति अपक्वमामधुरम्, पद्मकेसरादि सुखस्पर्शं पद्मनालं कठिनस्पर्शं अभिघातोऽभिपद्यो वा भवन् दुःखो भवति अनभिघातो विषाभिघातो वा भवन् सुखो भवति अस्याऽस्त्रीपुरुषगीति सुखा भवति असस्त्रीपुरुषरोदनं दुःखदं भवतीति दृष्टान्तार्थः । एकस्यैव शुभाशुभत्वे निदर्शनमाह—यथा त्रिदोषघ्नमपि मोदकादि प्रमाणेन काले चाहृतं शुभं दुःखकारणं चान्यथाऽशुभमनिष्टसाधनमेवेति भाव । निदर्शनान्तरं समुच्चय-नाहेति, सर्पदष्टेनाहृतं विषमपि स्वस्य सप्तसु कालेष्वाहृतं विषं विषवेगेन दुःखसाधनम्, सर्पदष्टनिवर्त्ति-करणादिति भाव । एवमेव पुद्गलकायः शुभाशुभादिधर्मा भवति भोक्तृभोग्यात्मकविपरिणामवृत्तित्वात् आहारवदित्याह—तथैक एवेति । पुद्गलकायस्य व्युत्पत्तिमाह पुद्गलनिरुक्तिक इति । बाह्याभ्यन्तरमूर्तद्रव्यसंघातस्य कायत्वमुक्त्वा

१ क. °न्यादि । २ सि क° सकलसर्प । ३ सि° सुरा ४ ५ तथर् ।

तस्मात्, परमाणोरपि, पुरुषस्य पुरुषस्येव वा कायः, इति विग्रहसमासौ, अथवा पृथक् परिकल्पनयाऽनया किं ? इन्द्रियप्रत्यक्षोऽभिमतः शरीराख्यः पुरुषकायः, स्वसंवेद्यज्ञानात्मकक्रियाविशिष्टलिङ्गानुमेय आत्मा वा सोऽयमेक एव, न त्वत्र व्यतिरेकबुद्धिः कार्या, कर्मपरिणामैक्यापत्तेः एतयोरपर्यायेणैक एव शुभाशुभादिधर्मेति साध्यस्य कायस्य वक्ष्यमाणाहारदृष्टान्तसाम्यमापाद्य हेतुत्वेन तस्यापर्यायमाह भोक्तृभोग्यात्मकविपरिणामवृत्तित्वादिति, यो हि पुरुषकारवादिमतेन भोक्ता स एव कर्मवादिमतेन
5
भोग्यः, तस्मात् कायो भोक्तृभोग्यात्मकः, तत्र विपरिणामो वृत्तिरस्येति कायः सम्बध्यते भोग्यस्य भोक्तर्या विपरिणाम इति शुक्रशोणित कलमार्बुदमांसपेश्यादि च मातुरुदरकारणमस्य शरीरस्य चतुर्थं भोक्तृ भोग्यश्च अन्योऽन्यभावापत्तेः, तथा चतुर्विधोऽप्याहारोऽशनादिराहर्तारं मांसभोक्तृभोग्यश्च, तत्र शुभाशुभेष्टानिष्टकारणमेवेति, चेतनाचेतनयोर्वा चैतन्यपरिणामापन्नयोरेव भोक्तृभोग्या[त्मकवि]परि
10 णामवृत्तित्वं सिद्धमत आहारवच्छुभाशुभादिधर्मताऽस्येति, यथाऽऽहारः शुभश्चाशुभश्च दृश्यते संस्कृतोऽसंस्कृतः, संस्कृतोऽप्यशुभ एव संस्क्रियमाणामायशुभत्वात् संसर्गकामिमतकर्पूरादेरपि कालान्तरे दौर्गन्ध्यादिदर्शनात् सर्वपुद्गलानां प्रागुक्तविधिना शुभाशुभत्वपुद्गलत्वादाहारः शुभोऽशुभश्चेति तथा कायं इति, अथ वा चेतनाचेतनयोरात्मशरीरयोरैक्यपरिणामापत्तेर्व भोक्तृ भोग्यश्चैतनेनैवाहारदृष्टान्तेन सम्बद्धं मत्वैकमपि साधयन्नेवधर्मद्वयमभिमतमाह भोक्तृत्वाद्भोग्यत्वादिति, एवं कर्तृत्वात् कर्म

15 रूपादित्वादित्वादि परमाणोरपि कायत्वमाह–परमाणोरपीति । मूर्तिमत्त्वसत्त्वस्य कायत्वाभिधानेन अमूर्तस्यात्मनो चेतनस्यैकत्वेऽपि न कार्यं इति पक्षान्तरमाह–अथ वेति । अन्येति आत्मपुद्गलानां परस्पराश्लेषे क्षीरोदकवद् यथा च एव परिणामयोरात्मशरीरयोरैक्यमवस्थानं तस्यैव एव पुद्गलानाः शुभाशुभादिधर्मत्वात् भवतीति भावः । भोक्तृभोग्येति कायो हि पुरुषवादिमतभोक्त्रात्मकः कर्मवादिमतभोग्यात्मकश्च जीवपुद्गलयोरैक्यपरिणामैकत्वात् तयोरेव कायत्व निर्दिष्टमात्मकः शुभोऽशुभश्च इति धर्मी तथा च भोक्तृभोग्यात्मकस्य विपरिणाम भोक्तृभोग्यात्मकविपरिणामः स एव वृत्तिर्यस्मिन्
20 यस्य स भोक्तृभोग्यात्मकविपरिणामवृत्तिः भाव तद्भावस्तत्त्वादिति सिद्ध । स एव व्यक्तयति–यो हीति । कामाग्न्यादयश्च इत्यस्यावस्थैव कायस्ये तत्र भोक्तृभोग्यात्मकत्वं व्यनक्ति–शुक्रशोणितमिति कोऽपरयोः शुक्रशोणित धर्मस्य मूर्तमांसचातात्मकस्य भोक्तृभोग्यरूप अन्नमाहारः तत्र मात्राद्यपरिणतत्वादि पर्यायो भोग्यस्याहार इति यथोऽसौ भोक्तृभोग्यात्मक धर्माधर्मात्मकचेतनयोरैक्यपरिणामादिति भाव । आहारोऽप्यशनपानखाद्यस्वादिमचतुर्विध आहारः शरीराहार्ये तयोरैक्यपरिणामाद्भोक्तृभोग्यात्मकत्वं भवत्य तथा शुभाशुभधर्मत्वमपीत्याह–तथा चतुर्विधोऽपीति ।
25 आत्मशरीरैक्यपरिणामाश्रयपक्षान्तरे तु हेतु सिद्ध इत्याह–चेतनाचेतनयोरेवेति । आहारे दृष्टान्ते साध्यं शुभाशुभादिधर्मत्वं व्यनक्ति–यथाऽऽहार इति संस्कृतः शुभ असंस्कृतश्चाशुभ संस्कृतोऽप्याहारो नैकान्तेन शुभ एव संस्कारापादकानुगमनात् परस्परकृत कर्पूरादेरेकान्तेन शुभत्वाभावात् तत्र कालान्तरे दौर्गन्ध्योपलब्धेरित्याह–संस्कृतोऽ पीति व्यक्तिरिति चेत । भोक्तृभोग्यात्मकविपरिणामवृत्तित्वादित्युक्तेऽथ भोग्यात्मकविपरिणामवृत्तित्वात् भोग्यात्मकविपरिणाम इत्यादीति हेतुपरिभ्रंशेन व्याप्त्यनुमाह–अथ वेति चेतन भोक्तृभोग्यचेतनेन भोक्तृत्वभोग्यत्वयोरभिमताः अर्थिता,
30 अत एव च शुभाशुभादिधर्मत्वस्य व्याप्तेनाव्यभिचारात् प्रत्येकं तयो भोक्त्रात्मविपरिणामवृत्तित्वपक्षेण भोक्तृत्वेन निर्दिष्टं तथा भोग्यात्मविपरिणामवृत्तित्वपक्षेण भोग्यत्वम्, तत्र च पुद्गलस्य शुभाशुभादिधर्मत्वात् भोक्तृत्वात्, भोग्यत्वात्, आहारवदिति पक्षितमिति भावः । एतदेव मनसिकृत्याह–भोक्तृत्वाद्भोग्यत्वादिति । भोक्तृभोग्यो

1 सिंह विग्रहसमासौ । 2 सिंह °प्रत्यक्षाभिमत° । 3 सि क वादि । 4 सि क. मातरबीच । 5 सि क. संस्कृतासंस्कृत । 6 सि क. संस्कारवामिमत । सि क. चर्चेति ।

त्वादाहारवच्छुभोऽशुभश्च काय इति । अथ वा सुखोऽपि दुःखोऽपि स एव कायः, सुखत्वाद्दुःख त्वादाहारवत्, दुःखं सुखत्वादाहारवत्, यत् परस्परसिद्धं तदितरेण सिद्धेन धर्मान्तरेण साम्यम्, एवमिष्टोऽप्यनिष्टत्वादनिष्टोऽपीष्टत्वादाहारवदेव ।

इतर आह–

तच्च न, तदकशुभाशुभत्वे प्रतिविशिष्टसदसद्योगकृते, तस्मादुभयधर्मता सर्वद्रव्या- 5 णामित्येतच्च न, एकैकस्य सर्वरूपद्रव्यभवनपरमार्थत्वात् सर्वशुभाशुभेष्टानिष्टकारणत्वादिरूपो हि द्रव्यभवनपरमार्थः, एष हि भावादेव भवद्द्रव्यं परमार्थतो भवति, नान्यथा, भावानुमानं तदेव तत्, तत्परमार्थत्वात्, तद्वत्, एतदुक्तं भवति तत्तत्स्वरूपभवनपरमार्थत्वात्, तच्च रस्वरूपवत् ।

(तच्च नेति) तच्च न, यदकशुभाशुभत्वे प्रतिविशिष्टसदसद्योगकृते प्रतिविशिष्टकर्पूरादिकस्य 10 शुभद्रव्ययोगे सति लशुनादि अशुभगन्धमपि सत् सुरभीक्रियते, अधिकगुणाभिभवमात्रतया, एवमशु भ्यपकृष्टद्रव्ययोगे सति तदुत्कटगन्धाभिभवात् तद्भावनया कर्पूरादपि तद्गन्धीभवदुपलभ्यते, अथ वा तदेव विनष्ट शुभतरागादिगतसर्वं शुभ्यच्छुभ्यत् कर्पूरगन्धं भवदुपलभ्यते, नालिकेरफलानि सुरभीणि सन्ति पूतीभवन्ति दृश्यन्ते तस्मादुभयधर्मता सर्वद्रव्याणां तथा कायोऽपीत्येतच्च न, एकैकस्य सर्वरूप द्रव्यभवनपरमार्थत्वात्, वीप्सया व्याप्तिं सर्वरूपद्रव्यभवनस्य भावकस्य भाव्यस्य च दर्शयत्येकैकस्येति, 15 सर्वशुभाशुभेष्टानिष्टकारणत्वादिरूपो हि द्रव्यभवनपरमार्थः, एष हि भावादेव भवद्द्रव्यं परमार्थतो भवति नान्यथा यथोक्तं 'एगमेगस्स णं भंते जीवस्स एगमेगे जीवे माइत्ताए' इत्यादिर्ग्रन्थः यावत् 'असतिअदुवा अणंतखुत्तो' ... गोयम । असइं अदुवा अणंतखुत्तो एवं सव्वजीवाण वि एगजीवो एगजीवस्स वि सव्वजीवा' तथा

कर्म्मभेदत्वादाह–एवमिति । शुभाशुभयोः सुखदुःखफलयोरेव साम्यं हेतुमात्रेणाह–अथ वेति आहारस्य भोजनस्य सुखं यावत्फलस्य पूर्वमुक्तत्वेन तयोरव्यभिचारात् फलस्य तु यावत्फले तेनैव हेतुना सुखत्वफलं सुखफलत्वे च तेनैव 20 दुःखफलत्वमपि साम्यमिति भावः । ननु कायस्य भोक्तृभोग्यात्मकस्य शुभाशुभत्वधर्मयोः विपरिणामरूपा इति मनुष्यते तत्र दुष्टम्, विकल्पे वकारो शुभाशुभतायाः प्रतिविशिष्टसदसद्द्रव्यसंयोगेनैव दर्शनादित्यत्राह–तच्च नेति तदेव संक्षिपति– प्रतिविशिष्टेति अशुभगन्धमपि सदिति अपिनाऽगन्धमपि सदिति योज्यते भूयोगुणाभिभवमात्रतयेति भावः तथाऽशुभद्रव्यसंयोगे शुभगन्धमपि सत् तथाभावनयाऽसुरभीक्रियते तथा कर्पूरादपि सोत्कटगन्धाभिभवात् दुर्गन्धीभवतीति आह–एवमिति तथैवाशुभगन्धं लशुनादि प्रतिविशिष्टशुभतरागादियोजितं शुभ्यच्छुभ्यत् कर्पूरगन्धं भवति तदभावादिविवक्षयाह– 25 अथ वेति । शुभगन्धस्याशुभगन्धीभवने निदर्शनमाह–नालिकेरेति तदेवं द्रव्यस्य शुभाशुभत्वे सदसद्द्रव्यसंयोगकृते एव न वस्तुनः परिणामः तथा कायोऽपि द्रव्यान्तरसंयोगादेव शुभाशुभधर्मेति पूर्वपक्षाभिप्रायः । सर्वरूपेण द्रव्यस्य भवनं पारमार्थिकमेव ... एकैकस्येति प्रत्येकं द्रव्यं तद्भाव्यं वा भावकं परमार्थतः सर्वरूपेण भवनयोग्यमेव भाव्यं शुभाशुभद्रव्यसम्बन्धेन शुभाशुभरूपेण भवनयोग्यत्वेनाभिमतम्, भावकं शुभाशुभभवननिमित्तं द्रव्यम् । शुभत्वेनाशुभ- त्वेनाकारणत्वेनाविकारत्वेन सर्वरूपेण भवनस्य द्रव्यभावमात्रादेव द्रव्यं तथाभवितुमर्हतीति भावयेत्याह–सर्वेति । एकस्यैव 30 जीवस्य मातृत्वादिपर्यायसमानता तथैकस्यैव पुद्गलस्याहारादिरूपेण भवनसमानता सूत्रेण प्रमाणयति यथोक्तमिति ।

---

१ सि. क. प्रतिविशिष्टसदसद्योगकृते । २ सि. क. ६ गन्धमपि ।

'सम्मपोमगस्स एगजीवस्स सम्मजीवाण च आहारत्ताए उसासत्ताए भासत्ताए सरीरत्ताए इंदियत्ताए मणत्ताए आणापाणत्ताए' (   ) इत्याद्यर्थस्यापत्तौ ज्ञापकम्, सर्वलोकत्वात्, अत्रानुमानं तदेव तदिति प्रतिज्ञा,—मातृत्वाभिमावेन यज्ञदत्ति शरीराभिमावेन च तदेकैक सर्वरूपमितर्था तत्परमार्थत्वात् तद्वत्, एतदुक्तं भवति तत्तत्स्वरूपस्वभवनपरमार्थत्वात् तत्तत्स्वरूपवत्, एवमितरमपि 5 पत्नीत्वम साध्यम्, यत्स्वरूपमिद भवति कर्पूरं शरीरमभावि वा तत्रैवेत्सर्वा, यच्च यदेव न भवति [न] तत् परमार्थं यथा खपुष्पं खरविषाण वा भवम्यस्माऽन्यात् तत्तदन्यत्स्वरूपापत्तेः स्यादेवमस्मात्र इत्थं तस्य स्यात् बहिरङ्गस्य चान्यत्वमिति तदेव द्रव्यत्वाभिमतं अस्माभिस्तस्यैव तद्रूपमिति साध्यते तथाजनाश्रयान्यथात्वं न चासिद्ध तत्परमार्थत्वमिति ।

अभ्युपेत्यापि—

10 अन्यथात्वेऽपि तदनतिरेकात्, तन्तुयज्ञोपवीतवत्, यथा चात्र सर्वसर्वस्य चात्मस्य परिणाम्यपरिणामकभावादेकत्वं परिणामश्च द्रव्यमात्रम्, यदन्नयति स परमार्थोऽस्य यथा क्षीरादेर्यावच्च घटादेः तथात्मकर्मणोरपि, आत्मा परिणमयति तथाभवनसामर्थ्योद्गतिजात्या विना पुद्गलानिति परिणामकस्ते परिणाम्याः, पुद्गलाश्चात्मान मिथ्यादर्शनादित्वेन परिणमयन्ति तद्भावेनात्मा परिणम्यते, एतस्य कर्मकर्मिद्वयस्याम्योऽन्यपरिणामकत्वादनादित्वमेकत्वम्, 15 संसारस्य कर्मकर्मिद्वयस्य यत्त्वात्तस्य चानादित्वात् ।

(अन्यथात्वेऽपीति) अन्यथात्वेऽपि तदनतिरेकात्मकत्वात्, तदेव तदिति वर्तते यथा- यस्य चाऽनतिरेकः स आत्माऽस्येति तदनतिरेकात्मकत्वात् यदनतिरेकात्मकमन्यथात्वेऽपि तदेव तद् दृश्यते किमिव ? तन्तुयज्ञोपवीतवत् तन्त्वनतिरेकात्मकत्वाद्यज्ञोपवीतस्य यज्ञियसाम्यभावेऽपि तन्त्वा-

त्मकमिवाद्धवानेन घ्वनति-अत्रानुमानमिति । मीमांसकैरेव प्रतिज्ञार्थमाह मातृत्वाद्यभिमावेनेति । यद् येन येन 20 रूपेण भवति तद् तद्रूपेण सर्वं सर्वे सर्वरूपं इत्येकस्य तथात्मकत्वमिति मतम् । हेतुं वक्ति—तत्परमार्थत्वादिति तदेव परमोऽर्थो यस्य तद्रूपत्वमात्मिति विग्रहः एवो गौण एव हि मातृत्वेन पितृत्वेन भ्रातृत्वेन यावदभिमतत्वेन भवत्यतः न गौणो मात्रादिरूपस्य एव मातृत्वस्य एव न तु पित्रादिरूपस्य इति न वाच्यम्, यथा गौणस्य गौणत्वस्यैव मतमर्थं परमार्थं इति च गौणत्वस्यापि मात्रादिरूपस्यैव तत्त्वमपि परमार्थं इति इत्वा च मात्रादिरूपोऽपीति भावार्थः । दृष्टान्तमाह भावार्थं सर्वतात्र शरीरस्यात्मात्मत्वं विरुद्धवचनदोषपरिहारार्थं च-एतदुक्तं भवतीति । दृष्टान्तमपि पक्षीकृत्येदं साधनीयमित्याह-एवमितरम 25 पीति, दृष्टान्ते सर्वार्थं तत्सिद्धी-यत्स्वरूपमिदमिति इदं दृष्टान्तम् । यतासिद्धेनापि यदन्यत् तदपि तत्तदन्य-स्वरूपतयैव भवेत्, अन्यथा तस्य न तत्तद्भिन्नरूपपरिहारेणान्यस्वरूपता स्यात्तथाभिमतस्वस्मात्मभूतस्य तस्य विशेषाभिमतत्व बहिरङ्गत्वमन्यत्वं तदेवं स्यात्, तदेव द्रव्यत्वमिमतं यदि तत्त्वेनाभि यदीदं स्वरूपत्वमन्यत्वात्पूर्वं चाव्यतिरेकात् स्यात् विधित्वस्यैव न च तत्परमार्थत्वासिद्धमित्याह अभावस्येति । तदेवान्यत्वमभ्युपगम्यापि चोदयति-अन्यथा-त्वेऽपीति । अन्यथात्वमस्मात् परमात् सर्वसामान्यतत्त्वेऽपि चान्यत्वातिरिक्तस्वरूपत्वाद्यत्स्य तद् न तु तस्मै भिन्नमित्याह 30 तदेव तदिति । अतोऽन्यथात्वस्यान्यथात्वेऽपि तदनतिरेकात् तदात्मकत्वमेवेत्याह—तन्तुयज्ञोपवीतवदिति । इदं एव दृष्टान्तस्य द्रव्यार्थिकाभिमतस्य निर्विशेषस्य भोक्तृभोक्तव्यस्य व्यवस्थापितस्यान्यथात्वानतिरेकत्वं भावितमेवेत्याह

१ भि. क. °नामाद्या ।

सत्कत्वमेव, यथा सुवर्णादिषु भावनीयम्, तदनतिरेकात्मकत्वाच्च मानिवार्यमेव 'ते चेव ते पोग्गला सुब्भिगंधत्ताए' इत्यादिना। यथा चात्रेत्यादि, एवञ्च तदेव तदिति सर्वसर्वस्य चात्मनः परिणाम्यस्य परिणामयितुश्च तस्य, योऽधिकगुणस्य ताद्गुण्यं प्रतिपद्यते स परिणामी, योऽधिकगुणो न्यूनगुणस्वमा-पादयति स परिणामक इत्युच्यते व्यवहारतः, निश्चयतश्च परिणाम्यपरिणामकाद्याविर्भावतिरोभावमा-त्रभेदो सत एव चेत्यस्य नयस्य दर्शनम्, परिणामश्च द्रव्यमात्र 'द्रव्यञ्च भव्ये' यद्यद्भवति स परमा-5 र्थोऽस्येति तदन्येन भावित क्षीरादेर्यावत् घटादेश्चापद्रोद्रव्यम्, यथाऽधिकृतस्याध्यात्मिकस्य कर्मकर्मि संज्ञस्य शरीरशरीरिसंज्ञस्य वा भावमार्थमुपनयति—यथाऽऽत्मकर्मणोरपीति, तद्व्याचष्टे—आत्मा परिणम-यतीत्यादिना यावदनादित्वमेकत्वमिति, परिणाम्यपरिणामकयोरनियतत्वेऽप्येककालभावादिरूपतां दर्शयति यथाभवनसामर्थ्योद्भूतिव्यक्त्यादिना—पुद्गलानिति उपयोगलक्षण आत्मा गतिजातिशरीराङ्गोपाङ्गाद्यनुभव-नोपयोगात्मतया तान् पुद्गलान् परिणमय[ती]त्यात्मनः परिणामकत्वं तेषां परिणाम्यत्वम्, पुद्गला-10 आत्मानं मिथ्यादर्शनादित्वेनेति, मिथ्यादर्शनाविरतिप्रमादकषाययोगगुरुलघुरसोदयक्षयोपशमादिभावेन परिणमयन्ति तद्भावेनात्मा परिणम्यते स च मिथ्यादर्शनोदयादिभावो भवभ्रान्तिहेतु, तदात्मा संसर-णात्, एवमस्य कर्मकर्मिद्वयस्यान्योन्यपरिणामकत्वादनादित्वमेकत्वमेव पक्कलक्षणेन पर्यायभूतेन तत्त्वं व्याचष्टे संसारस्य कर्मकर्मिद्वयसम्बन्धत्वात्तस्य च सम्बन्धस्यानादित्वात्, यथोक्तं 'पुव्विं भंते! कुक्कुडी पच्छा अंडए, पुव्विं अंडए पच्छा कुक्कुडी' इत्यादि प्रश्नव्याकरणं 'रोहा! पुव्विं एते पच्छावि एते दोवि 15 एते सासता भावा अणाणुपुव्वी एसा रोहा'' इत्यादि, (भग० श० १ उ० ६ सू० ५३) मिथ्यादर्शनग्रहणं सर्वकर्मबन्धाधारमूलत्वाच्छेषस्यापि सर्वस्य सूचनम्।

तदनतिरेकात्मकत्वाच्चेति। एवं वाच्यवाचकचेतनाचेतनभेदत्वं प्रतिपाद्य चेतनाचेतनयोरप्येकत्वमाह—यथा चात्रेत्यादीति सर्वमेव सर्वमिति सर्वसर्वं प्रत्येकं सर्वेषां सर्वत्वतया व्यक्ताव्यक्तभेदेनाविर्भावतिरोभावत्वभेदेन व्यवहारत एव भेदः क्वचित् परिणाम्यं क्वचित् परिणामक इति भेद इति भावः। तत्त्वं एकत्वम् परिणाम्यपरिणामकयोर्भेदमाह—य इति यो 20 न्यूनगुणोऽधिकगुणस्य ताद्गुण्यं तादात्म्यं प्रतिपद्यते स परिणामी परिणामकस्तु न्यूनगुणस्वभावापादकोऽधिकगुण इति। परिणामोऽपि नातिरिक्तः क्वचित् किन्तु परिणमितात्मस्य एवेत्याह—परिणामश्चेति द्रव्यस्य भवनलक्षणत्वादिति भावः। द्रव्यस्य भवनमेव परमं तत्त्वं न त्वभवनत्वं निश्चितुं शक्तुमर्हति तथात्वाविर्भावतिरोभावी द्रव्यस्य स्वभाव इत्याह—यद्यद्भवतीति। आत्मपुद्गलयोरन्योन्यपरिणामकत्वादात्मना पुद्गलानां परिणमनमाह—उपयोगलक्षणेति उपयोगलक्षणो जीवोऽध्यवसाय-विशेषाद्भवभ्रमणप्रत्ययिकर्मयोग्यान् कर्मवर्गणायोग्यानन्तानन्तप्रदेशान् स्कन्धान् स्थित्या पुद्गलान् योग्यविशेषान् 25 गृहीत्वा गतिजातिशरीराङ्गोपाङ्गनिर्माणबन्धनसंघातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्वीनामकर्मादित्वेनानुभवयोग्यतया परिण-मयतीति भावः। पुद्गलैरप्यात्मा परिणम्यत इत्याह—पुद्गला इति अपर्यायपुद्गलसम्बन्धात्मनापि मिथ्यादर्शनादित्वेन परिणमतीत्यर्थः। मिथ्यादर्शनोदयेति मिथ्यादर्शनं विपरीततत्त्वाभिनिवेशः अविरतिः पापस्थानेभ्यो निवृत्तिपरिणामाभावः इन्द्रियविषयाभिष्वङ्गरूपः प्रमादः क्रोधमानमायालोभाः कषायाः योगा मनोवाक्कायव्यापारलक्षणाः इत्येवं प्रसिद्धे, एतेषामुदयादिभावेन पुद्गला आत्मानं परिणमन्ति अतस्तदुपात्तस्य मिथ्यादर्शनस्योदयभावो भवभ्रमणहेतुरिति भावः। 30 अनादिसम्बन्धस्य बीजाङ्कुरन्यायवदनादित्वेन संसारकालादित्वम् अन्योन्यसम्बन्धादित्वेन च तयोरेकत्वपरिणामेऽप्य-नादित्वमाह—एतस्येति। संसारस्य कुक्कुटाण्डवदनादित्वात् प्रश्नव्याकरणं प्रदर्शयति—यथोक्तमिति। अन्यत्र

---

१ सि॰ क॰ °व्यवधानात्।

आह—यदुक्तं त्वया कर्पूरादचेतनमात्रं परिणाम्यपरिणामकभावादेकत्वं चेतनाचेतनयोश्च जीवकर्मणोरिति तदुक्तं किन्तु रूपादि उपयोगीभवत् आत्मा भवति आत्मापि, रूपादि भवति तत्परिणामादिति, एतच्चोपपद्यते सभावाभिनाभावित्वाच्चोच्यते—

यद्यपि च बहिर्भिन्नं विषयजातं रूपादि तदप्यात्मन एव तत्त्वमुपयोगात्मकत्वात्, मत्या-
5 दिवत्, कथं रूपादेर्विषयस्योपयोगः आत्मेति चेदुच्यते, तदव्यतिरेकलभ्यत्वात् ।

यद्यपि चेत्यादि यावल्लभ्यत्वादिति, यदपि च बहिर्भिन्नं विषयजातमुपयोगनिमित्तभूतं रूपादि तदप्यात्मन एव तत्त्वम्, रूपादितत्त्वमात्मनश्च वक्ष्यामः कुतो रूपाद्यप्यात्मन एव तत्त्वमिति चेदुच्यते, उपयोगात्मकत्वात्, मत्यादि चक्षुर्दर्शनादिभेदभिन्न उपयोग आत्माऽस्य रूपादेर्विषयस्य सोऽयं तदात्मकः, कथं रूपादेर्विषयस्योपयोग आत्मेति चेदुच्यते तदव्यतिरेकलभ्यरूपत्वात्, रूपं रसो गन्ध
10 इत्यादिविषयस्वरूपाकारेणोपयोगेन अव्यतिरिक्त एकीभूत एवोपलभ्यते रूपादिविषयो नान्यथा, अन्यथा विषयस्वरूपानवधारणात्, तस्मात्तदव्यतिरेकलभ्यरूपत्वात् रूपादिविषय उपयोगात्मकः, तदुपयोगात्मक तदात्म[न] एव तत्त्वम्, यथा मत्यादिचक्षुर्दर्शनादिभेद उपयोग इति ।

साम्प्रतम्—

रूपादीनां देशभेदेन युगपदवस्थायिनां देशकालादितोऽत्यन्तमेवमाद्येऽभवनात्मकत्वात्
15 निर्वस्तुत्वापत्तिर्वन्ध्यापुत्रवत्, ततश्च द्रव्यमेव तथातथाभवनलक्षणं सत्यं न रूपादयो नाम केचिदिति, कथं पुनस्तत् भेदेन भवतीति चेत्, चक्षुरादिप्रत्ययोपयोगव्यपदेशेन, भागिनेयापत्यपौत्रपितृपितृव्यैकस्वरूपपुरुषवदिति सामान्यमेकमेव सर्वात्मकमिति ।

(रूपादीनामिति) रूपादीनां देशभेदेन युगपदवस्थायिनां रूपं रसो गन्ध इत्यादयः परस्परतो देशभिन्ना गृह्यन्ते यस्य देशस्य परमाणुतो भेदेन रूपं रसो गन्धश्चोपलभ्यते—देशसम्बन्धेनोपल-

20 चेतनाचेतनयोश्च तयोः [illegible] नाम आत्मा रूपादीपरिणामः [illegible] परिणमति परिणामश्च द्रव्यमात्रमिति रूपादिरात्मा भवति आत्मा च रूपं भवतीति यदुच्यते तदोपपद्यत इत्यत्राह— यदुक्तं त्वयेति इत्यादि—यद्यपि चेति [illegible] विषयाभेदात् [illegible] [illegible] तथा रूपादयो विषयास्तत्त्वमात्मनस्तत्त्वम्, [illegible] आत्मन एव तत्त्वम् उपयोगात्मकत्वात्
25 मत्यादिवदिति भावः । रूपादिविषयजातमात्मन एव तत्त्वमिति प्रतिज्ञायां हेतुं पृच्छति—कुत इति । रूपादेरुपयोगात्मकत्वम् [illegible]—तदव्यतिरेकलभ्यरूपत्वादिति । रूपादिविषय उपयोगात्मकः तदव्यतिरेकलभ्यरूपत्वात्, मत्यादिभेदवत् यथा मत्यादिभेद उपयोगाव्यतिरेकेण नोपलभ्यते [illegible] तथा रूपादिभेदोऽपि [illegible] [illegible] विषयस्वरूपनिर्भास एव च स्यादिति भावः । यद्
रूपादयो युगपदवस्थायिनः परस्परं भेदेन गृह्यन्ते तत्र देशे [illegible] भेदे [illegible]
30 च रूपादीनां भेदः स्यात् एवं [illegible] [illegible] भेदे रूपादीनामभवनमेव भवेत्, अविरत्वभिन्नेन रूपाद्यनात्मकत्वप्रसङ्गः, एवं [illegible] रूपादीनां [illegible]—रूपादीनामिति । [illegible]—रूपं रस

१ सि क्ष. °भिन्न । २ सि. क्ष. °पयोगात्मकेन वि ।

न्यमाना भवन्ति, ऐकध्योऽन्यत्वमेवमादे तेषामभवनम्, तथा क्षणभेदे प्रथमक्षणेऽन्यद्रूपं द्वितीयक्षणेऽन्यदिति गृह्यते येन रूपं नाम किञ्चित् स्यात् तत्रैकस्य कालस्य रूपग्रहणाभावसम्बन्धाभावादिभवनात्मका रूपादयः स्युः, आदिग्रहणमध्यमभेदेनैकगुणद्विगुणत्रिगुणकृष्णादिभेदेनागृह्यमाणस्यादविशिष्टस्य सामान्यस्यैव ग्रहणात्, ततः किं? अभवनात्मकत्वान्निर्वस्तुत्वापत्तिर्वन्ध्यापुत्रवत् तत्रश्च निर्वस्तुत्वापत्तेरे-
तत्प्रतिपत्तव्यं द्रव्यमेव तथा तथा भवनलक्षणं तस्य न रूपादयो नाम केचिदिति, तथा तथेति रूपर 5
सप्रकारेण भवति श्यामरक्तत्वादितत्तद्भेदप्रकारेण चेति, द्रव्यञ्च भव्ये भवति द्रवतीति । कथं पुनरद्र
व्यमभिन्नं सत् रूपादिभेदेन भवतीति चेत् चक्षुरादिप्रत्ययोपयोगापेक्षेण भवति, चक्षुरादिप्रत्यया इति
अधिपत्यालम्बनहेतुसमनन्तरप्रत्ययाः, तदपेक्षेण रूपादि भवति ज्ञानापेक्षेण–चक्षूरूपादिप्रत्ययेनेत्यर्थः,
यथोक्तं 'रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्तते । विज्ञानं मणिसूर्यांशुगोशकृद्भ्य इवानलः ॥' इति
(   ) दृष्टान्तो भागिनेयाद्यपेक्षाविशिष्टैकत्वसत्पुरुषवत्–यथैक एव पुरुषोऽनेकसम्बन्धे 10
स्त्रीपुरुषापेक्षापेक्षाविशिष्टो भागिनेयो मातुलो भ्राता पतिः पिता देवरः श्वशुरः पुत्रो भ्रातीय इत्यादि
र्भवति देवदत्त एक इतीव च तत्तथा द्रव्यमेकमेव रूपादि भवति चक्षुराद्यपेक्षादिति तादृक्-
मेकमेव सर्वात्मकमिति, एवमुपयोगात्मकस्य पुद्गलस्य रूपादिप्रभेदप्रोक्तम् ।

इदानीमुपयोगस्यापि पौद्गलत्वमुच्यते—

यथोपयोगस्तत्त्वं भवतीति तदपि पुद्गलात्मतत्त्वम् रूपाद्यात्मकत्वात् घटादिवत्, स हि 15
उपयोगलक्षण आत्मा परमाणुद्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषूपयुज्यते कृत्स्नो
व्याप्रियते, तत्प्रदेशस्यापि रूपाद्यात्मकत्वमात्मनोऽभ्युपगम्यते तदुपयोगात्तत्परिणामात्तदेव
तदिति न्यायाच्च, यद्येवं ततोऽसंख्यातप्रदेशोऽपि सर्वात्मना सर्वैः प्रदेशैर्भोग्ये उपयोगं यायात्,
मृत्पिण्डः शिवकादिभावमिव, उपयोगमगच्छन्ननुपयुज्यमानोऽचेतन एव, यद्यनुपयुक्तघटा-
दिवत्, चेतनो ह्युपयोगलक्षणस्तदभावादचेतनः स्यादिति । 20

इति । कस्तोऽभवनम्याह–तथा क्षणभेद इति । कस्मादाह–तत्रैकस्येति । कस्तोऽभवनमाह–आदिग्रहणादिति । एवं रूपादीनामभवनात्मकत्वेनावस्तुत्वादन्यमेव रूपरसादिरूपतया एतत् इत्याह–तत्रश्चेति तथा तथा भवनलक्षणत्वात् न रूपादयो नाम केचित् सन्तीति भावः । अभिन्नं द्रव्यमेव चक्षुर्ग्रहणाभावाय रूपमिति स्पर्शनग्रहणाभावाय स्पर्श इति घ्राण-ग्रहणाभावाय गन्ध इति रसनग्रहणाभावाय रस इति भवतीत्यत आह–चक्षुरादीति । चक्षुरादिप्रत्ययापेक्षेणोपयोगेनापेक्षेण चेत्यर्थः । चक्षुरादिप्रत्ययानाह–चक्षुरादिप्रत्यया इति, तत्राधिपत्यालम्बनौ पर्वतेऽधिपत्यालम्बनविषय 25
विज्ञानादिप्रत्ययः ... ... एव
हेतवो हेतुप्रत्ययाः ... ... समनन्तरप्रत्यया इति बौद्धदर्शने प्रसिद्धाः एते एतेषामपेक्षेण ज्ञानापेक्षेण
चाभिन्नं द्रव्यं रूपादिभेदेन भवतीत्यर्थः अत्रैव बौद्धकारिकां व्याचष्टे–यथोक्तमिति ... ... विज्ञाना-
दीनां चित्तं चित्तान्तरम् ... ... चक्षुर्विज्ञानमुत्पद्यते चक्षुर्भिर्विषयैश्च इति बौद्धसिद्धान्तात्, तत्रापि
चाधिपत्यवता चक्षुषा ... चक्षुर्विज्ञानमिति यथाक्रमं ... ... भवतीति तदर्थः । एतस्यैव 30
द्रव्यस्य निमित्तविशेषयोगेन नानात्वप्रतिपत्तिमिति निदर्शनमाह–भागिनेयादीति । एवं पुद्गलस्योपयोगात्मकत्वमुक्त्वो-
पयोगस्यापि पुद्गलात्मतोच्यते–यथोपयोगस्तत्त्वमिति ... ... भावः, उपयोगलक्षणो

१ सि क. °व्याविष्टस्य ।

(यथेति) यथोपयोगलक्षणस्य मत्यादि तदपि पुद्गलात्मतत्त्वमिति पक्षः, कस्मात्? रूपाद्यात्मकत्वात् घटादिवत्, स ह्युपयोगलक्षण आत्मा परमाणुद्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषूपयुज्यते कृत्स्नो व्याप्रियते–सार्वात्म्येन व्याप्य उपयुक्तः समाप्त इत्यर्थः, तेष्वेकस्यापि रूपाद्यात्मकत्वमात्मनोऽभ्युपगम्यते, असंख्यातप्रदेशोऽपि रूपाद्यात्मक एव प्रदेशसंख्येयासंख्येयानन्तप्रदेशपुद्गलवत् तदुपयोगात्मपरिणामात्वेन तदिति पूर्वोक्तन्यायात्, यथैवं रूपादिमदेकद्रव्योपयोगतादात्म्य भावे यातीति तथोऽसंख्यातप्रदेशोऽपि सर्वात्मना सार्वात्म्येन सर्वैः प्रदेशैर्मध्ये इत्थं उपयोगमयात्, उपयोगमगच्छन्ननुपयुज्यमानोऽचेतन एव, घटानुपयुक्तघटादिवत्, स्यादिति संबध्यते, कथं पुनरुपयोगं यायात्? मृत्पिण्डः शिवकादिभावमिव यथा मृत्पिण्डः कृत्स्नः शिवकादिभावे सार्वात्म्येन व्यापारं गच्छति तथा यदि न गच्छेदात्मा भावे तत्तादात्म्यमप्रतिपद्यमानः सोऽचे[त]न एव स्यात् घटेऽनुपयुज्यमानघटादिवदिति यथाक्रमं वैधर्म्येण साधर्म्येण च दृष्टान्तौ, चेतनो ह्युपयोगलक्षणत्वस्माद् अचेतनः स्यादिति, एष दोषो रूपाद्यात्मकत्वाभावे स्यादात्मन उपयोगलक्षणस्य, तस्मात् सिद्धं रूपाद्यात्मकत्वमात्मन उपयोगात्मकत्वात्, अतः पुद्गलतत्त्वमेव मत्यादीति साधूक्तम् ।

इत्थमात्मा पुद्गलतत्त्व एव—

आत्मस्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तरूपत्वादात्मा पुद्गलतत्त्व एव तादात्म्यप्रतिपत्तेः ।

भावे मत्यादि त च भावरिक्ते [illegible] प्रदेशमयमिति [illegible] परमाणुद्व्यणुकादिरूपाद्यात्मकेषु व्याप्रियते व्याप्रियमाणत्वात् सार्वात्म्येन उपयोगात्मप्रदेशत्वात् [illegible] व्याप्रियते इत्याह—स हीति उपयोगः [illegible] [illegible] आत्मा [illegible] आत्मा च [illegible] प्रतिपद्यत इति भावः । प्रदेशोति परमनिकृष्टोऽत्र प्रदेशः [illegible] पुद्गल यथा [illegible] रूपाद्यात्मका । न [illegible] प्रदेशो रूपाद्यात्मको भवति तथाऽसंख्येयप्रदेश आपि सर्वे रूपाद्युपयुक्ता रूपाद्यात्मका एव शरीरमात्मा वा [illegible] तदात्मकमेतत्परमार्थत्वात् [illegible] एव [illegible] एव तत्त्वम्, उपयोगात्मकत्वात् [illegible] पूर्वोक्तन्यायादिति भावः । यथा [illegible] रूपादिमत्त्वे [illegible] उपयुक्तो भवति तथा सर्वात्मप्रदेशैरपि तादात्म्येनोपयुक्त एव यथा मृत्पिण्डः । शिवकादिभावं सर्वात्मना याति न तु [illegible] यदि सर्वात्मप्रदेशैरपि तादात्म्येनोपयुक्तो न भवति [illegible] एव भवेत् यथा [illegible] [illegible] तस्मात् [illegible] रूपात्मक एव [illegible]—यथैवमिति । वैधर्म्य दृष्टान्तमाह—घटेति । साधर्म्यदृष्टान्तमाह—मृत्पिण्ड इति । [illegible]—तस्मादिति । [illegible] पुद्गलत्वम् इति दर्शयति—आत्मस्वतत्त्वेति [illegible] [illegible] ज्ञानावरणादि [illegible] [illegible] [illegible] रूपा [illegible] भावा एते हि भावाः परिणामविशेषा आत्मैव [illegible] अन्योन्यानुगतौ [illegible] [illegible] [illegible] भावा [illegible] [illegible] [illegible]

---

१ सि. क. [illegible] । २ सि. क. पदमिदं नास्ति । ३ सि. क. भासुव । ४ सि. क. °प्रदेशत्वादि । ५ सि. क. °पयोगेत्यादन्यमाद्यो । ६ सि. क. संबध्यते । [illegible] सि. क. यथा । ८ सि. क. [illegible] ।

आत्मस्वतत्त्वेत्यादि यावद्रूप्यमव्यतिरिक्तरूपत्वात्, आत्मनः स्वतत्त्वमौपशमिको भावः, क्षयेन भव औदयिकः कस्य कर्मणः ? ज्ञानावरणीयादेरष्टविधस्यापि स च तदुदयप्रवृत्तितोऽपूर्वम् तोऽव्यतिरिक्तो भावः स्वतत्त्वमात्मनः तदव्यतिरिक्तरूपश्चात्मा, तस्मादात्मस्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तरूपत्वाच्चात्मा पुद्गलात्मस्वतत्त्व एव, तादात्म्यप्रतिपत्तेः रूपाद्यात्मकपरमाण्वा[त्मकत्वा]-दिसर्वः । 　5

आह—

नन्वेवं पुद्गला एवात्मा प्राप्ताः, तस्योपयोगात्मनः पुद्गलत्वात्, योऽयं पुद्गलोपयोगः स चात्मोपयोग एव, उपयोगव्यतिरिक्तरूपादेरभावात्, तस्मात् कुतोऽस्य रूपाद्यात्मकतेति, एतच्च, उपयोगात्मकत्वादेव रूपादीनामप्युक्तवत्, अनेन सर्वमपि सर्वात्मकम्, आत्मपुद्गलयोरितरेतरात्मकत्वात्, एवञ्च कर्मैव कारणं पुरुषकार एव कारणमित्येकान्तमसम्बद्धमिति 10

नन्वेवमित्यादि यावत् कुतोऽस्य रूपाद्यात्म[क]तेति, ननु भोः ! त्वदुक्तेन विधिना एवं नैव पुद्गला एवात्मा प्राप्तः तस्योपयोगात्मनः पुद्गलत्वात्, योऽयं पुद्गलोपयोगो रूपं रस इत्यादिविज्ञानात्मनः स चात्मोपयोग एव, उपयोगव्यतिरिक्तरूपादेरभावात्, उपयोगस्य रूपाद्यात्मकत्वादुपयोगरूपत्वाच्च रूपादीनां, तस्मात् कुतोऽस्यात्मनो रूपाद्यात्मकतेति प्रस्तुतस्योपयोगस्य मत्यादेः पुद्गलात्मत्वमुपपन्नमिति एव विचार इत्यत्रोच्यते एतच्च, उपयोगात्मकत्वादेव रूपादीनामपि, उक्तवत् नै[व यो] यो रूपाद्या- 15
त्मनो रूपादीनामुपयोगात्मकता, यस्मादुपयोगात्मकत्वं रूपादीनामप्यनन्तरमेवोक्तम् तस्माद्रूपादीनामप्युपयोगात्मकत्वादुक्तवत् पुद्गलोऽप्यात्मा, आत्मापि पुद्गल एवेति रूपाद्यात्मकत्वमतो न दोषाय, अनेन सर्वमपीत्यादि यावदितरेतरात्मकत्वात्, एवञ्च कृत्वा पुरुषस्य रूपादिमत्पुद्गलात्मकत्वात् पुद्गलस्यापि उपयोगात्मकपुरुषात्मकत्वात् यदुच्यते कर्मैव कारणं पुरुषकार एव कारणमित्यवधारितम् तदसमप्येकान्तमसम्बद्धं बोद्धव्यमित्युभयोः पक्षयोः सहदोषोक्तिरेषा । 　20

इदानीं तु प्रत्येकमयुक्तिभावनाविक्, कर्मैकान्तवादमयुक्तिविक् तावत् प्रदर्शयितुमुत्थाप्य पुरुषस्य कारणमुत्कर्षार्थी, तस्यैवोक्तवत् सर्वत्वात्, असावेव पुरुषः प्राणादिमांश्चेतनः कर्मापि,

पुद्गलात्मकत्व एव स इति भाव । एवमेव व्याख्यते आत्मन इति ननु एवंविधा सर्वात्मप्रसक्तिरात्मनः पुद्गलेषु व्याप्तत्वे पुद्गलोपयोगात्मत्वप्रसक्तेरन्योन्यस्योपयोगव्यवस्थान एव तद्रूपाद्युपयोगात्मकत्वमात्मनो न स्यादित्याशङ्कते-नन्वेवमिति । प्रकृतेन प्रकारेण वाक्येन पुद्गलेष्वात्मनो व्याप्तत्वेन पुद्गला एवात्मा प्राप्ताः ज्ञानस्वरूपत्वादात्मनो योऽयं पुद्गलेषूपयोगः स 25 आत्मोपयोग एव वस्तुतः यदि रूपादि किञ्चिदुपयोगव्यतिरिक्तमपि स्यात्तदुपयोगस्य चान्योऽन्यमेकत्वाच्च न रूपादेस्तदु... [illegible] ... ननु भो इति । रूपादय उपयोगात्मका एवेति ... [illegible] ... अपि ... [illegible] ...-उपयोगात्मकत्वादेवेति । एवमात्मपुद्गलयोः परस्परात्मकत्वाच्च सर्वं सर्वात्मकमित्याह-अनेनेति । अथ प्रस्तुतमसम्बद्धत्वमाह-एवञ्च कृत्वेति । पुरुषस्यैवोपयोगात्मकत्वादेकान्ततः कर्मैकान्तवादः पुरुषकारैकान्तवादश्च तु एवेति पक्षद्वये चौभयपक्षेण दोष 30 आवर्तित इति भावः । सम्प्रति प्रत्येकपक्षस्य निराकरणं मनसि कृत्वाह इदानीमित्यादि । कर्मैकान्तवादे वा निराकरण-

1 सि क. सोऽप्यवृत्तितोः ।

अस्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्मेति, तस्यैव कर्मतापि, तस्मादेव पुरुषकारयत्नां तत्साध्यमानाश्च सिद्धयोऽसिद्धयश्च नाना स्युरेव उत्कर्षपरम्परया बहुप्रभेदाया अपि मानुके पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्, अहिभोगविस्तरणाकुञ्चनवत्, तथाऽनतिरेकातिरेकवत् कर्मापि प्रवर्तयितृ ।

5 (इदानीमिति) इदानीं[तु]प्रत्येकमवृत्तिभावनादिषु युगपद् विशेषणार्थः, युगपत् प्रवृत्ति-वित्तः प्रत्येकप्रवृत्तिविनिवृत्तिरिष्यते कर्मैवाप्रवृत्तावप्रवृत्तिरिह तावत् प्रवर्तयितृत्वात् पुरुषश्च कारणम् उत्कर्षार्थी, यदन्यात् कर्म येनैकान्तप्रतिषेधस्य वक्ष्यमाणत्वात् उत्कर्षप्रवर्तवतीमुत्कर्षार्थी, उत्कर्ष प[र]र्यः सोऽस्यास्तीति 'अर्शआदिभ्योऽच्' (पा० ५ २ १२७ सूत्रे का०) इति इनिः स चोत्कर्षो बाह्यो धनधान्यमित्रभूम्यादिसम्पत्, आभ्यन्तरस्त्वारोग्यज्ञानादिसम्पत्, तदर्थस्य तदर्थारम्भोपरमात्, 10 असमिद्दिताऽर्थोऽस्तीति कस्मात् पुरुषश्च कारणमिति चेदुच्यते तस्यैवोत्कर्षात् सर्वत्वात् व्रीहिरेव व्रीहिः क्रियत इत्यादिन्यायोक्तवत् असावेव पुरुषः प्राणादिमांश्चेतनः कर्मापि, अविशेषात्कर्मापि प्राणापान-प्राणापानोद्रव्यादि पुरुष आध्यात्मिको बाह्योऽपि रूपादिपुद्गलचेतनो यस्मात्तस्मात् स एव प्रवर्तयिता तस्यैव अस्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्मेति तस्यैव कर्मतापि अविशेषात् पुरुषतापि पुद्गलस्यापि, तस्मादेव प्रवृत्तं प्रधानमप्रधानमप्रधानमप्रधाना पुरुषकारयत्नाञ्च सिद्धयोऽसिद्धयश्च प्रधानमप्रधानमप्रधाना 15 नाना न स्युरिति तदयुक्तमुक्तम्, पुरुषकारयत्नाश्च तत्साध्यमानाश्च सिद्धयोऽसिद्धयश्च नाना स्युरेव किं कारणम् ? उत्कर्षपरम्परया बहुप्रभेदाया अप्यानुके पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्-स एवाव्य-तिरिक्तो भिन्नश्च कारणं तस्यैव सर्वप्रभेदात्मकत्वात् भिन्नत्वं तेषाञ्च कर्मणां बाह्यरूपादिभेदपुद्गलानां पुरुषोपयोगात्मकत्वादव्यतिरिक्तत्वम्, तस्मात् पुरुष [illegible] तत्साध्यसिद्ध्यसिद्धिनानात्वानि न स्युरेव, स चैक एव कारणम् कथमिव को दृष्टान्तः ? अहिभोगविस्तरणाकुञ्चनवत्, यथाऽहिः स्वफटाटोप-20 [illegible]युगपदवस्थादिधर्मैः रूपादिभिर्युगपदवस्थादिभिश्च भिन्नोऽप्यव्यतिरिक्तोऽहित्वसमा[illegible]

[illegible] प्रत्येकमिति [illegible] युगपदर्थं [illegible]-युगपदिति । कर्मैवाप्रवृत्तावप्रवृत्तिरिह तावदाह-कर्मैवाप्रवृत्तेति न [illegible] पुरुषोऽपीति [illegible] दर्शयति-यदन्यादिति । कर्म च [illegible] भाव. । प्रत्येकप्रवृत्तिमभिधाति, [illegible] बाह्यो चोत्कर्षे आरम्भादिनिवर्तितस्य [illegible] न [illegible]-स चोत्कर्ष इति । पुरुषस्योत्कर्षार्थित्वेन प्रवर्तयितृत्वात् [illegible] 25 [illegible] कर्मोत्पत्तिरूपत्वात्-तस्यैवेति चोत्कर्षोऽपीति [illegible] कर्मेति दर्शयति-प्राणापानेति [illegible] इति । [illegible] अस्मिन् पक्ष इति । [illegible] पुरुषकारयत्नाश्चेति । [illegible] 30 [illegible] दर्शयति-उत्कर्षपरम्परया इति । [illegible]-अहिभोगेति ।

१ नि. क. स्युरेव न स्यु । २ नि. क. [illegible] । ३ क. [illegible] ।

व्यतिरिक्तभिन्नकारणत्वात् प्रवर्तयिता यथा पाण्यादिसंघातसद्वर्तिपुरुष उपयोगात्मा गत्याद्युत्कर्षार्थी तेषु युगपत्प्राप्तेषु पुरुष एव सत्य इति । यथाऽनतिरेकातिरेकात् कर्मापि प्रवर्तयितृ, यथा पुरुषः पुरुषात्मककर्मधर्मप्रमेयभिन्नोऽप्यव्यतिरिक्तः प्रवर्तयिता तथा कर्मापि तदनतिरिक्तातिरिक्तकारणत्वात् प्रवर्तयितृ ।

किञ्च—

चेतनाचेतनपरमार्थत्वाच्च पुरुषस्य, इष्टानिष्टविधिव्याप्रियमाणत्वात्, अथैव नेष्यते 5 तथा ततोऽसौ भवेत् पशुवन्मनुष्यत्वेनापि गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञः तद्वत् पशुरपि वा विशेषज्ञः ।

(चेतनेति) चेतनाचेतनपरमार्थत्वाच्च पुरुषस्येष्टानिष्टविधिं प्रति व्यापारः, स एव हि पुरुषश्चेतनोऽचेतनश्च, कुतः ? इष्टानिष्टविधिव्याप्रियमाणत्वात्-उत्कर्षापकर्षौ इष्टानिष्टौ तयोर्विधिः—तत्प्राप्त्युपायः प्रमादाप्रमादौ च दृश्येते, तस्मादयं पुरुषश्चेतनोऽचेतनश्च, प्रमादाप्रमादयोरिष्टानिष्टविध्योः 10 व्याप्रियमाणत्वात्, अतोऽचेतनकर्मानुभावोपलम्भात् चेतनपुरुषानुभावोपलम्भाच्चेति तद्द्वयं परमार्थः, तस्माच्च कर्मापि प्रवर्तयितृ । अथैवं नेष्यते तथा यदि च पुरुषश्चेतनशक्तिरेव प्रोच्यते ततोऽसौ भवेत् पशुवन्मनुष्यत्वेनापि गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञः—यथा पशुर्भक्ष्यस्याचेतनस्तथा मनुष्यस्यापि भवेत्, व्यक्तवर्णपदवाक्यार्थप्रत्यायनसमर्थशब्दोच्चारणादिशक्तिश्च मनुष्यवत् पशुरपि भवेत् कृम्यादिवन्मनुष्योऽविज्ञः स्यात्, मनुष्यवत् कृमिरपि पण्डितः स्यादित्यादि, तस्मात् कथञ्चित् चेतनः 15 पुरुषोऽपि अचेतनः तयोरुभयमविभक्तमिति भावम् ।

एवमकृत्वा तस्यैव तत्त्वेतरवदविभक्तद्व्यात्मकतायां द्विविधः प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धः प्रागभवीयकर्माख्यपुरुषकारस्य साध्योऽसाध्यश्च, तीव्रमन्दादिहेतूपसेवनसञ्चितत्वात् साध्यासाध्यव्याधिवत्, चलनीयोऽचलनीयश्च बद्धाबद्धमूलत्वात् वृक्षद्वयवत्, निकाचितानि काचितापचयत्वात्, [illegible] । 20

पुरुषवत् कर्मोप्यव्यतिरिक्तभिन्नकारणत्वात् प्रवर्तयितृ तदि कालभेदापेक्षया पुरुषापेक्षया भिन्नमपि सत् कर्मातीव्यापाराव्यतिरिक्तत्वादपि प्रवर्तयितृ स्यात्—तथाऽनतिरेकातिरेकादिति । अथ चेतनानुभवस्योपलम्भात् पुरुषस्य चेतनत्वमचेतनानुभवस्योपलम्भाच्चाचेतनत्वं वास्तविकमतः पुरुषः कर्मापि प्रवर्तयितृ स्यात्—चेतनाचेतनेति । प्रमादरहित इष्टेषु व्याप्रियते प्रमादी चानिष्टेषु, प्रमादश्च सर्वथाऽविदितस्यैव भावः तेन मिथ्यादर्शनप्रवर्तमाने तत्र च प्रकृष्टप्रयोजनविज्ञानविषये विपरीतज्ञानदर्शनावरणादीनां तत्त्वादरीर्व तत्त्वमचेतनत्वमेवेति तथाऽचेतनत्वं परमार्थः अप्रमादस्तु ज्ञानावरणीयादि 25 क्षयोपशमादिजन्यचैतन्याविपरीतज्ञानस्वरूपत्वात् चैतन्यं परमार्थं इत्यन्वयेन हेतुं दर्शयति—इष्टानिष्टेति । शुभप्राप्त्युपायोऽप्रमादः अशुभप्राप्त्युपायश्च प्रमादः एतयोश्च चैतन्याचैतन्यत्वं तथाविधकर्मचैतन्यसिद्धिरिति भावः । यदि पुरुषस्य चेतनत्वमेव परमार्थो न त्वचेतनत्वम्, तदा पशुश्चेतनोऽपि सन् भक्ष्याभक्ष्यादिविवेकं न जानाति तथा मनुष्योऽपि न जानीयादिति— अथैवमिति । यथोक्तं प्रमादप्रमादे न प्रमादप्रमादजनितं तदेव तयोरिति विशिष्टं विज्ञानं नास्ति तथा मनुष्य 30 स्यापि न स्यादिति भावः । मनुष्यवत् पशुरपि विशेषज्ञः स्याच्चेतनत्वाविशेषादित्याह—तद्वदिति । एवञ्च द्वयं परमार्थं पुरुषस्येति स्यादत—तस्मादिति । एवं पुरुषस्याविभक्तत्वेन चेतनाचेतनात्मकतायां न किञ्चिदनुपपन्न इत्याह—एवमकृत्वेति । प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धश्च कर्माख्यपुरुषकारस्य साध्योऽसाध्यश्चेति द्वैविध्यं पुरुषस्य चेतनाचेतनात्मकतयैव

१ सि. क. तथाऽप्रतिरेकात् कर्मापि । २ सि. क. °विधिप्रियमाणत्वात् ।

(एव कृत्वेति) एवं[च]कृत्वा तस्यैव तत्तदितरपदविमर्शात्मकत्वापत्तेः—चेतनाचेतनैकरूपतायां सत्यां द्विविधः प्रवृत्तिप्रपञ्चः फलपरिणामप्रपञ्चः प्राक्तनीयकर्मणोऽस्य पुरुषकारस्य साम्योऽसाम्यश्च तत्तत्प्रयत्नहेतुमूलोपादानफलपरिणामवैचित्र्यात् तदर्शयति—तीव्रमन्दादिहेतूपसेवनसञ्चितत्वादिति[1]—तीव्रयोगपरिणामेन सञ्चितं कर्म तीव्रानुभावमिति तीव्रेण पुरुषप्रयत्नेनाभिभावितं मृदु तु तत्फलमुपक्रमितुमशक्यत्वात्साम्यमनन्यं विपद्यते, मन्देन तु सञ्चितं मन्दानुभावादि तत्प्रयत्नादुपक्रम्यम्, साम्यासाम्यव्याधिवत्—यथा व्याधिर्निदानविशेषात् निदानमन्दतीव्रताभ्यां साम्योऽसाम्यश्च भवति, तथा कर्मोऽस्य पुरुषप्रयत्नप्रवृत्तिप्रपञ्चः साम्यासाम्यभावव्याख्यानञ्च—चलनीयोऽविचलश्च वृक्षादिमूलत्वात् वृक्षवत्—यथार्थस्य साम्यमस्तित्वस्य इतरोऽविचल्या न चालयितव्यः प्रथमो दृढमूलो वृक्षवत्, द्वितीयो दृढबद्धमूलः, दुःखविशेषः सुखविशेषश्चैत्यर्थः, निराविलामिश्रविशादप्रदत्वात्—निकाचिता कर्मभेदा[illegible]परिणामेन अनिकाचिता मन्दपरिणामेन किमिव ? अयःशलाकाकलापवत् यथा सूक्ष्मारोपमिश्रा अयःशलाका एकत्वापादकप्रयासेन सर्वाः प्रत्यक्षमेव प्रत्यक्षसम्पृक्तवृत्ताः संपर्कमात्रे न शक्याः पृथक् कर्तुं तथा कर्मविधिः ।

परिणमनमपि च तस्यापि पूर्वकर्मणः पुरुषकारस्य विषयो न विषयः कश्चित्, अप्राप्तप्राप्तविपरिणामावस्थत्वात् पुष्पगुच्छफलवत् यथा च क्रियासहायश्च स फलं प्रयच्छति, क्रियासहायस्य फलप्रदानमापक्वानपक्वशक्तित्वात्, भारोत्पाटवत् ।

परिणमनमपि चेत्यादि यावत् पुष्पगुच्छफलवत्, तस्यापि पूर्वकर्मणस्तीव्रमन्दहेतूपसेवनसञ्चितस्य फलदानमित्तपुरुषकारस्य तपःप्रयत्नसाधनानियमानुष्ठानस्य विषयो न विषयः कश्चिदिति, अप्राप्तप्राप्तविपरिणामावस्थत्वात्—यथार्थस्य अप्राप्तपरिणामावस्थं पुरुषकारविपरिणम्यं पुरुषकारेण

पुष्यते नाम्नः [illegible] । तत्प्रयत्नेति । [illegible] ।
[illegible]

1 [illegible]

विपाच्यते—विपक्वतामानीयते—उदीरणाकरणेनोदीर्यते, प्राप्तपरिणामावस्थमप्तु वैयर्थ्यान्न विपचीक्रियते—पुरुषकारेण न विपाच्यते—नोदीर्यते, स्वयमेव विपक्वत्वात्, किमिव ? पुण्ड्रगुडफलवत्—पुण्ड्रोर्कदडफलस्य यथासंख्यं दृष्टान्तौ—यथा दडफलं स्वयमेव विपच्यमानं न पाच्यते पुरुषकारेण, पुण्ड्रोक्षुस्तु पुष्पायुर्वेदविधिना विपाच्यते, अथवा पुण्ड्रोक्ष्वैवोत्पन्नस्य दड फलस्य भावीति दडफलं तादृक् तस्यैवोत्पन्नमिति तस्यैव भवति, तच्छक्तिविरहितस्य न भवतीति, अप्राप्तपाककालं कनककाम्रादिफलं 5 कोद्रवपलालादिवेष्टितं निखातं वा पार्श्वभूमाग्निभिर्विपाच्यते, नेतरत्स्वयं विनाशीति, अथवा अप्राप्तवि-परिणामावस्थं पुण्ड्रोक्षमतिमदुस्वादुपक्रमेणापि न पाच्यते, पाचनायोग्यत्वात्, कुथ्यति विलीयते वा, दडफलं तु पाचनयोग्यं प्राप्तकालत्वात् पाच्यते, एवञ्च कृत्वा क्रियासहायश्च स फलं प्रयच्छति, सहा-यीभूतायाः क्रियाया अपि तच्छक्तिमात्रत्वात्, क्रियासहायस्य पुरुषकारस्य फलप्रदाने सापेक्षानपे-क्षत्वात् भारोत्पाटवत्, यथा भारमुत्पाटयन् कश्चित् पुरुषः स्वयमेवोत्पाटयति कश्चित् पुनः सहा- 10 यापेक्षः, एवं पुरुषकारोऽपि फलप्रदाने सहायां क्रियामपेक्षते कश्चिदेवेति ।

सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य, तत्र सोपक्रमस्य कर्मात्मनः पुरुषात्मनैकीभूत स्योदयोपशमक्षयोपशमक्षया अवस्थाः सापेक्षा भवन्ति, मदनफलाद्वमनवत् मलपटलाच्छा-दितभास्वद्वत्, दरविध्यातवह्निप्रज्वलनवत्, तृणदाहवच्च ।

(सोपक्रमस्येति) सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य, तत्र सोपक्रमस्य कर्मात्मन इत्यादि 15 यावत्तृणदाहवच्चेति, तस्यैव सहैकीभूतस्यात्मनश्चेतनाचेतनत्वेन पुरुषात्मनैकात्मना सापेक्षानुदयोपश-मक्षयोपशमक्षयानवस्थाविशेषान् दर्शयति सोदाहरणान् ।

एवमनयैव दिशा पुरुषकारैकान्तवादः प्रतिषेध्य[1] तद्यथा—कर्म च कारणं प्रवर्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवायतनं भावितस्य चैकस्यैवोत्कर्षवत् सर्वोपयोगत्वात् पुरुषस्यापी-ष्यादि सर्वमदोषं योजनीयम्, अनेकस्य स्वातन्त्र्यं तत्तत्प्रदर्शितत्वस्येतरस्यापीति भावनीयम्, 20

मानीयते उदयावलिकायां प्रवेश्यते [illegible] स्थितिक्षयेण वा योगपरिणामेन वीर्यविशेषेण समाकृष्योदये [illegible] नोदीर्यते प्राप्तपरिणामावस्थन्तु नोदीर्यते वैयर्थ्यात् तस्य उदये समागतत्वादिति भावः । दृष्टान्तमाह—पुण्ड्रगुडेति [illegible] । एवञ्च पुरुषकारः क्रियासहायः [illegible] [illegible] सहायापेक्ष [illegible] न निरपेक्ष [illegible] सापेक्षत्वे पुरुषस्य [illegible] एवञ्च कृत्वेति । सोपक्रमस्येति [illegible] क्रियामपेक्षते । पुरुषकर्मापेक्षा- 25 [illegible] यथा मदनफलस्य [illegible] [illegible] [illegible] [illegible] 30 [illegible] इति पुरुषकारस्याप्यपेक्षणात् कर्मैकान्तवादः प्रतिषिद्धः । अथ पुरुषकारस्य एकान्तेन कारणत्वं प्रतिषेधुमाह—एवमनयैव दिशेति [illegible] । विवृणोति—तद्यथेति ।

1 सि क. °धेयाय । 2 सि क. कर्मात्मनस्य ।

यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु पूर्वं भावितमस्माभिस्तथाऽवगाहादिविलक्षणैरस्तिकायैः सह, कर्मात्मविचारोक्तात् प्रवर्तकप्रवर्त्यन्यायात् ।

एवमनयेत्यादि यावद्भावनीयमिति, एवं तावद् द्व्यात्मकतयाऽऽत्मकर्मैकान्त्यवादप्रसुप्तिरीतिः प्रदर्शिता, अनयैव दिशा अनयैव पुरुषकार इत्याद्युक्तन्यायेन तदेव वस्तु कर्म संज्ञामात्रेण भावयित्वा पुरुषकारैकान्तवादः प्रतिषेध्यः, तद्यथा—कर्म च कारणं प्रवर्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवावतर्पमावितचैतन्यैकत्वोपपत्तेः सर्वोपभोगत्वात्, पुरुषतापीत्यादि सर्वमशेषं योजनीयम्, यत् परे नाभ्युपगतमस्मत्तरविवरत तद्विवरणमिमाभाषाम्, तत आह—अत्रैकस्य सार्वात्म्यं तदवस्थाविवक्षया सर्वस्यापि भावनीयमिति भावनोपायं प्रदर्शयति सामान्येन, तथा विशेषेण भावितमेवास्माभिरिति, न केवलं कर्मात्मनोरेवाभिन्नैकत्वम्, किं तर्हि ? यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु पूर्वं भावितमस्माभिस्तथाऽवगाहादिविलक्षणैरस्तिकायैः—अवगाहगतिस्थितिविलक्षणैराकाशधर्माधर्माख्यैः सह कर्मात्मविचारोक्तात् प्रवर्तकप्रवर्त्यन्यायात् भावनीयमिति वर्तते, यथा प्रवर्तक एव प्रवर्त्यं इत्युक्तं तथाऽवगाहादि प्रवर्तकं प्रवर्त्यश्चायमवगाहेनेव कर्मात्मवदिति ।

पुनरपि तद्भावनार्थमाह—

तद्रूप्यत्वात्, पृथिव्यादिग्रीवादिपृथिव्यादिवत्, तद्रूप्यत्वमसिद्धमिति चेन्न, अवगाहकेष्व द्रव्यं यथा नियतादि एवमात्माद्यपि, तस्यैव तथाभूतेः, तदक्ष्यादिग्रीवादित्वाशिवक्ष्यादिवदात्मवत् ।

ननु पुरुषकारस्यैव कारणत्वं तदैकात्म्यमप्युपगमात् भावमात्रमित्यस्मा न कर्मस्वेषु कर्मैवैकमिति कारणत्वेनिन्नकारणसम्भाव्य प्रत्यायनं कर्मैव पुरुषकारस्यापि कर्मैवाभिधानम् सूचयति अनयैवेति । प्रतिषेधोपायं दिशा दर्शयति—तद्यथेति । कर्म कारणं प्रवर्तयितृत्वादिति कर्मैवात्मतत्त्वं कर्म च कारणं प्रवर्तयितृत्वादिति विशेष्यं वक्तव्येन पुरुषस्य प्रसूनः कर्म चेतनाचेतनयोरेकत्वात् सर्वसर्वात्मकत्वात् एवैकस्य सर्वस्य परस्परमपरस्परात्मकत्वात् मातृत्वादिवत्वेन तदितरविवक्षेण न भवति तदैवैकं सर्वमिति तदेव तदिति भाव । यद्यपि भवत्प्रथमा अन्यस्यैवाभिमतं तदवस्थानमपि पश्चादस्य तदवस्थानं तावत इत्याह—अत्रैकस्येति कर्मैव सार्वात्म्यवत् पुरुषस्यापि सार्वात्म्यमात्मवर्ति तथा पुरुषस्य सार्वात्म्यमात्मवर्त्यपि सार्वात्म्यमात्माधीनमिति भाव । यथा च कर्मात्मनोरभेदः प्रवर्तितस्तथैवाभेदस्यापरत्वं भावनीयमित्यत—न केवलमिति । अवगाहादिविलक्षणैरिति अवगाहकत्वमात्मकम् अवकाशदानं कर्म स्थितिप्रेरणादात्मकत्वम् वस्तुतोऽपि तद्भावप्रसङ्गात् अवगाहिनां धर्माधर्मपुद्गलजीवानां अवकाशदानमाकाशस्येति तथैव तत्र व्याप्तम्, [illegible] धर्माधर्मपुद्गलजीवाः । परिमिता मते स्थितिमतां पुद्गलाः स्थितेरपेक्षाकारणं धर्माधर्मौ प्रसिद्धावप्रमये धर्माधर्मौ प्रतिपादयति [illegible] अपि च तदो [illegible] । यथा च कर्मात्मनोरैक्यं कर्मात्मत्वस्य प्रवर्तकप्रवर्त्यैकत्वापादनमुखेन प्रतिपादितं तथाऽऽकाशादावपि भावनीयमिति दर्शयति—यथा प्रवर्तक एवेति तथा चायमत्र प्रवर्तकः अवगाहकोऽपि धर्माधर्मौ प्रवर्त्यौ तयोरेकत्वात् तत्स्वरूपैक्यं तथाऽवगाहस्यावगाहकं च सर्वपुद्गलादि अवगाहक एव चावगाहकोऽवगाह्य एव गतिस्थित्योः प्रवर्तकत्वे सति प्रवर्त्यत्वात् धर्माधर्मयोरैक्यम्, एवं धर्मधर्मिणो जीवपुद्गलयोरैक्यत्वं भावनीयमिति भावः । तद्भावना तावदिहापि तद्रूप्यत्वादिति तथा एवमन्यत्रापि तदिति एवं हि भावनेन भवत्यात्मा भवति पृथिव्येव हि ग्रीवादिविशेषेण पृथ्वी पुनः पृथिव्यादित्वेन भवति तदात्मकत्वं पृथिव्येव [illegible] भावः । तदेवाह

1 सि. क. भावनीयमिति ।

(तद्रूपत्वादिति) तद्भव्यत्वात्—यद्द्रव्यं तत्तथा यथा प्राग्भावित पृथिव्यादिव्रीह्यादि पृथिव्यादिवत्, तद्भव्यत्वमसिद्धमिति चेन्नेत्युच्यते, अवगाहादेव द्रव्यं यथा वियदादि एवमात्मादयोऽपि, यथाऽवगाहोपकारगुणमाकाशं गतिस्थित्युपकारगुणौ धर्माधर्मावेवमात्मपरमाण्वादिद्रव्यमपि, कुतो हेतोः ? तस्यैव तथाभूतेः—तस्यैव आत्मपुद्गलद्रव्यस्य तथा तथाऽवगाह[गति]स्थितिरूपेण भवति, किमिव ? उदकादिव्रीह्यङ्कुरशिवकादिघटत्ववत्—यथोदकपृथिव्याकाशवातबीजाङ्कुरादय एव व्रीहीभवन्ति युगपद्भाविनो भावाः, यथा च क्रमभाविनः शिवकस्थासककुशूलकादय एव घटीभवन्ति तथाऽऽत्मादयोऽवगाहादि, अवगाहादि वियदादि, वियदादि अवगाहादि, अवगाहादि आत्मादि च भवतीति तस्य तस्य तद्भव्यत्वं तद्भव्यत्वात् प्रवर्तकप्रवर्त्यैकत्वन्यायोऽवस्थितः, तस्मादात्मपुद्गलाकाशधर्माधर्मास्तिकाया एकं तत्त्वं सर्वमभेदवृत्तमिति ।

किञ्चान्यत्—

अविभक्तावगाहस्यात्मादेरविभक्तमवगाह्यमप्याकाशमित्येकमेवेदं भवनम्, तत्पुनरन्यथा मिथ्याग्रहोत्थापितनानात्वमेवेदं विकल्पितम्, तान् प्रति सर्वगतेतराभिमतद्रव्यस्वरूपमुत्क्षेपणादि, तदव्यतिरिक्तत्वात्, घटपटभवनवत्, यथा घट एव पटभवनं न ततोऽन्यत् ततस्त दव्यतिरिक्तम्, यद्यन्यत् स्यात् घटो न भवेत् भवनादन्यत्वात्, खपुष्पवत्, भवनं वा तस्य न स्यात् ततोऽन्यत्वात् पटभवनवदिति ।

अविभक्तेत्यादि यावदेकमेवेदं भवनम्, अवगाहोऽवगाहमानादात्मादेरविभक्तः, अवगाह्य-

सूक्ष्मनिगोदापर्याप्तजीवे योगोपयोगौ । [illegible] यथेति [illegible]
[illegible]
[illegible]
[illegible] —तस्मा-
25 यावदिति । [illegible] —तस्मादयमपीति । [illegible]
[illegible]
[illegible]
[illegible] सन्निहितेति [illegible]
[illegible] द्रव्यं क्रिया च भवतीति भावः । [illegible]
30 [illegible]
[illegible] भावः ।

टि × × १ क. °तथाऽपो° । २ नि क. °[illegible]° ।

ततो नाभविष्यदिति क्रियातिपत्तौ लृङ्, अभवनमेवापद्यते न भवत्येवेत्यर्थः, क्रिया भवनं प्रवृत्ति रित्यर्थः, यदि न प्रवर्तेत—परिणमेत न क्रियापि स्यात्, द्रव्यं प्राक् केनचित्प्रवर्तनादिप्रकारेणाप्रवृत्तं तदे वेति—सामान्यकालवाचिना लङ्नेनेदानीमपि निर्देशकाले तदप्रवर्तमानं पश्चादेष्यत्कालेऽप्रवर्तिष्यमाणं तस्मादित्यर्थः, अप्रवृत्तत्वात् किमुक्तं भवति? प्राक् नासीत्, इदानीमप्रवृत्तत्वात् खपुष्पवत्, इदानीं न स्यात्, प्रागप्रवृत्तत्वात्, खपुष्पवत्, पश्चाच्च भविष्यति, इदानीमप्रवृत्तत्वात्, खपुष्पवदेवेत्यभूत तस्मात् 5 द्रव्यं क्रियात्मकत्वात् परिणामस्वरूपत्वात् अप्रवृत्तत्वादित्यर्थः, भवदेव हि भवति—प्रवर्तमानमेव हि केनचिद्धर्मेण क्वचित् क्वचित्कालीनं भवति, न निरुपाख्यम्, यदि निरुपाख्यमपि स्यात् खपुष्पमपि स्यात्, खपुष्पमपि चाऽभविष्यत् भवति भविष्यति, स्वद्रव्यमिव द्रव्यवत्, अभवनादिति, अक्रियत्वा नामित्यर्थः।

स्यान्मतम्— 10

अनैकान्तिकमेव तत्, आकाशादीनामप्रवृत्तिभवनानां सत्त्वदर्शनादित्येतदयुक्तम्, तद्विपक्षत्वासिद्धेः आत्मादयपि च प्रवृत्तमेव द्रव्यत्वात्, तन्तुपटीजवदिति, तस्माद्येन तेन प्रकारेण परिणममानं प्रवर्तमानं वस्तु भवतीत्युच्यते।

(अनैकान्तिकमेवेति) अनैकान्तिकमेव तत्—अभवनात् खपुष्पमपि नैवेत् द्रव्यवत्, द्रव्यमपि मा भूत्, अप्रवृत्तत्वात् खपुष्पवदिति, कस्मात्? आकाशादीनामप्रवृत्तिभवनानां सत्त्वदर्शनात्, 15 अपरिणामित्वादित्यर्थः, इत्येतदयुक्तम्, तद्विपक्षत्वासिद्धेः, यस्मात् आत्मादयपि च प्रवृत्तमेव द्रव्यत्वात्तन्तुपटीजवदिति, यथा तन्तवः तन्तववस्थायां पटावस्थायाञ्च प्रवृत्तत्वात्प्रवर्त्यन्त एव तथाऽऽत्मा दयः, बीजमेव अङ्कुरादिभावेषु प्रवृत्तमेव तथाऽऽत्मादय इति दृष्टान्तद्वयोपादानात् न्यायव्यापिता

क्रियातिपत्ताविति लृङ्विधिनिमित्तप्रदर्शनम्, क्रियायाः अनिष्पत्तिः क्रियातिपत्तिः एवमन्वयपरिणामित्वाभावसाधनेन भवनक्रियानि- ष्पत्तिरूपत इति तत्र अभिमतोऽभवनत्वे द्रव्यमेव हेतुरिति द्रव्यमित्येवैतदुक्तं यतो हि तद्भवत एव तदभिमतभवनमेवा- 20 पत्स्यतीति क्रियाभवनप्रवृत्तीनां पर्यायत्वसंदर्शनार्थमभवनमिति पर्यायानुसारेणोक्तम् प्रतिज्ञान्येन पुनराह—यदि न प्रवर्तेतेति क्रियायां प्रवर्तितत्वात् प्रवृत्ती कर्ता हि क्रिया स्यात् तस्या न तथ्यं भवनं स्यात् प्रवृत्तिः—परिणामः तत्र यदि द्रव्यं न परिणमेत्—यदि पूर्वं क्रमभाविना न परिणतं तदिदानीमपि न परिणामं प्राप्नोति भविष्यत्कालेऽपि न परिणंस्यते अभव एव भावात् न तमभवत् इति द्रव्यं क्रियापि न स्यादिति भावः। अनुमेन साध्यप्रदर्शनमिति—द्रव्यं प्रागिति। अप्रवृत्त- त्वादिति, अनेन प्रयोगः दर्शितः एतदेव प्रश्नमुखेन व्याचष्टे—किमुक्तं भवतीति। भवदेव भवति भावस- 25 त्त्वो नित्यत्वमिव्याह—भवदेवेति। ननु सततप्रवृत्तिप्रसाधनमाकाशादीनामप्रवृत्तत्वात् अभवनात् खपुष्प द्रव्यवत्प्रवर्तमानत्वप्रदर्शनमुखेनाप्रवृत्तत्वादिति हेत्वाभास इत्याशङ्कते अनैकान्तिकत्वाभिप्रायेण—अनैकान्तिकमेवेति। आका- शादीनामपि प्रवृत्त्याभावस्याविशेषे हेतोरनैकान्तिकत्वमाशङ्क्येदं तद्विपक्षत्वासिद्धेरिति समाधत्ते ततो द्रव्यत्वाविशेषेऽपि ... 30 ... तन्तुपटीजवदिति ... न्यायव्यापितां ...

1 क. नाभविष्यदवति भविष्यति स्वद्रव्यमिव द्रव्यवत् अभवनादिति।

मतमेवैतत्, यथोक्तं अस्तिभवतिविद्यतिपद्यतिवर्ततयः सन्निपातषष्ठाः सत्तार्थाः' ( ) । इति, तस्मात्तेन तेन प्रकारेण परिणममानं प्रवर्तमानं वस्तु भवतीत्युच्यते तेन तेन च पारिणामिकेन प्रकारेण भवति परिणमतीति ।

अत्रोपपत्तिमहेतुमाह—

5 तथा च चैतन्यादिलक्षणताऽऽत्मादेरुपपद्यते तथाभवनप्रवृत्तिसामर्थ्यात् द्रव्यत्वतुल्यत्वे सत्यपि ।

तथा च चैतन्यादिलक्षणतेत्यादि यावत्तुल्यत्वे सत्यपि, तुल्ये द्रव्यत्वे—अस्त्येव जीवद्रव्याणामजीवद्रव्याणाञ्च भवनविशेषः तद्यथा—जीवद्रव्यस्य चैतन्यवीर्यामूर्त्त्यसंख्यातप्रदेशावगाहादिः तथाभवनप्रवृत्तिसामर्थ्यम्, अजीवद्रव्येष्वपि पुद्गलानां रूपरसादिधर्मोऽपि तथाभवनसामर्थ्यम्,

10 यथासंख्यञ्च धर्माधर्माकाशकालानां गतिस्थित्यवगाहवर्तनात्तथाभवनसामर्थ्यानि, तस्मादात्मादेर्द्रव्यत्वतुल्यत्वे सत्यपि तथाभवनप्रवृत्तिसामर्थ्याच्चैतन्यादिप्रतिविशिष्टलक्षणतोपपद्यते, एवं तावद्द्रव्यस्य क्रियाविरहितस्याभाव उक्तः ।

तथैव युक्त्या क्रियाया अपि विना द्रव्येणासत्त्वमित्यत आह—

अथ तु प्रवृत्तिर्भूतिरित्येवाद्रव्या ततो नैव स्यादसमा पूर्ववत्, भवत्येव हि भवति

15 द्रव्यार्थसः, एतदनिष्पत्तोऽस्तिभवनसामर्थ्यात् खपुष्पमपि वा स्यादद्रव्यत्वात्क्रियावत्, भूतार्थसामर्थ्यादेव हि प्रवृत्तिः, गुणाद्यपि च द्रव्यमेव प्रवृत्तत्वात्तस्यादिवत् ।

(अथेति) अथ तु प्रवृत्तिर्भूतिरित्येवाद्रव्या प्रतिक्षणप्रादुरुपरमलक्षणा भूतिरित्येव, यदेतत्

स्थानमिति न किमपि द्रव्यं पारिणामिकं रूपमनापद्य वर्तत इति भावः । क्रियायत्तमेव दर्शयति—यथोक्तमिति योऽयं भवति तद् द्रव्यम् तद्रूपत्वात् तस्मात् क्रियाविरहितमपि किञ्चिदेकदाऽप्यद्रव्यमेव नास्तीति भावः । एवमेव जीवधर्मा-

20 धर्मादिषु तत्तदनुगतता द्रव्याणां द्रव्यत्वेन यथा क्रियायत्तत्वं तथाऽऽत्मीयात्मीयवैशेषिकलक्षणेभ्योऽपि परस्परभिन्नानां द्रव्याणां क्रियायत्तत्वमिति दर्शयितुमुपपत्तिहेतुमाह तथा चेति । अन्वेष्य द्रव्यत्वतुल्यतां दर्शयति—तुल्ये द्रव्यत्व इति । विशेषलक्षणानि दर्शयति जीवद्रव्यस्येति उपयोगलक्षणचैतन्यपरिणामो वीर्यपरिणामः असंख्येयप्रदेशादिपरिणामः लब्धिरूप-भावरूप जीवनाम्, धर्माधर्मयोर्गतिस्थित्युपग्रहकारित्वमात्रतासमन्ययप्रदेशपरिणामत्वमात्रताऽमूर्त्तत्वमात्रता च नभसोऽवगाह-दानलक्षणता अनन्तप्रदेशपरिणामत्वमात्रताऽमूर्त्तता च कालस्य वर्तनापरिणामलक्षणता द्रव्यपर्यायसंख्येयताऽनन्तसमयत्वादि

25 मात्रताऽमूर्त्तता च सर्वैरन्यैरसंख्यातप्रदेशत्वमनुसृत्य वर्णादिमत्त्वेनाप्युपलक्षणता मूर्त्तत्वमात्रताऽसंख्येयसंख्येयानन्तप्रदेशपरिणामलक्षणता च पुद्गलानामिति सर्वत्रास्त्येवामभवादिस्वरूपविशिष्टरूपसत्ता । तथाभवनप्रवृत्तिसामर्थ्यात्तत्तत्स्वरूपो न स्यादित्यभिप्रायमपि तुल्ये द्रव्यत्वे सत्यपि तत्तल्लक्षणतभिन्नत्वे हि स्वार्थेनमेवेन भेदो न स्यात् न भेदे तत्तुल्यत्वमात्मीयस्वरूपमिव तुल्यमित्यर्थः । एतच्च न किञ्चित् क्रियाविरहितं द्रव्यमस्तीत्युपदर्शितम्—एवं तावदिति । अथ क्रियामात्रपक्षे दोषं वक्तुमाह अथ त्विति तुल्यत्वे द्रव्यपक्षस्यानुसरणं । प्रतिक्षणं विविधक्रियायत्तत्वानु-

30 पपत्तेऽपि व्यत्यासे न सर्वक्रियाः प्रतिक्षणेति एवञ्च पर्यायस्य प्रादुरुपरमः च विनाश इति क्षणिकमनुगतमस्य सर्वं भवत्येव भावात्मकमित्यत न तु तथा स्वरूपमिति भवनस्यैकस्य द्रव्यस्वरूपस्याभावात् भावादर्शं द्रव्यमपि तद्रूपत्वात्

---

1 लि. ख. तुल्यत्वे ।

धारणात्, अद्रव्या—द्रव्यविरहिता क्रियैवेत्यर्थः, ततो नैव स्यादसौ पूर्ववत्—प्राक् पश्चाच्च वाऽद्रव्यत्वादभूतत्वात् खपुष्पवदिति व्याख्येयम्, निर्बीजत्वादस्थितत्वाविभागित्वपर्यायैः त्रिष्वपि कालेषु साधनानि योजयद्भिरिति विशेषः, भवदेव हि भवति द्रव्यार्थत इति स्थितिरूपं द्रव्यार्थभवनमाचष्टे, एतदनिच्छतोऽस्थितभवनसामर्थ्यात् खपुष्पमपि वा स्यादद्रव्यत्वात् भाववत् क्रियावत् अनिष्टापादनमेवत, भूतार्थसामर्थ्यादेव हि प्रवृत्तिः—द्रव्यार्थसामर्थ्यादेव हि प्रवृत्तिः—द्रव्यार्थसामर्थ्यादेव यस्मात् प्रवृत्तिः क्रिया न 5 निर्बीजेत्यर्थः, अत्रापि पूर्ववदनैकान्तिकाशङ्का—ननु निर्बीजगुणादिप्रवृत्तिर्दृष्टेति, अत्रोत्तरमाह—गुणाद्यपि च द्रव्यमेव, प्रवृत्तत्वात् तत्त्वादिवत्—तन्तुबीजपटादिवदिति प्राग्वत्, इह तु द्रव्यभवनमन्तरेण प्रवृत्त्यभाव इति प्रकर्षोपनेयमिति विशेषः ।

एवं क्रियापि द्रव्येण विना नास्तीत्युक्त्यायवदेवेति द्रव्यक्रियालक्षणं द्वैतमुक्त्वाऽपरार्थन्यायेनापि प्रतिपादयिष्यन्नाह— 10

भवतीति भावः स च कर्ताऽकर्ता च द्रव्यम्, यतोऽसौ भवतीति भावः तद्द्रव्यं स भावो, भवनसम्बन्धाद्भवतीति भवति तस्मात्तद्भवनं भावः सा क्रिया ।

भवतीति भाव इति, अत्र 'भुवश्च' (   ) इति कर्तरि णप्रत्ययं केचिदाहुः, इह तु भूयत इति भावे घञ् प्रत्ययः, तयो च येन भूयते स भाव इत्यर्थः सामर्थ्याद्यो भवति स एव सम्बध्यत इति भवतीति भाव इत्युक्तम्, स च कर्ताऽकर्ता च द्रव्यं तस्माद्भावशब्दो द्रव्य- 15 वाची क्रियावाची च यतोऽसौ भव[ती]ति भावः—यस्मादेतयोर्येन प्रकारेण यतो धर्मेण धर्मोऽन्य भवति तद्द्रव्यं स भाव इति, इतिशब्दस्य हेत्वर्थत्वाद्भवतीत्येतस्यतो भवति स भावः सा च क्रिया,

---

ख्यातमात्मपातिति भावः । भास्मादि चाव्ययेऽपि न स्यादद्रव्यत्वात्, अभूतत्वात् खपुष्पवदिति भावार्थः । निर्बीजत्वादिति अभिप्रायेण क्रियया उपादानकारणस्य स्थिरभूतस्य अभावप्रभावेण भूतत्वीवतत्वादिति भाव । एवं निर्बीजत्वमित्यत्र अस्थितत्वादिति तमित्यादिशब्दक प्राक् नासीत् इदानीं निर्बीजत्वात् खपुष्पवत्, इदानीं न स्यात् प्राक् निर्बीजत्वात् पश्चाच्च 20 न भविष्यति इदानीं निर्बीजत्वात् खपुष्पवदेवमुक्तं तस्मात् भास्मादि, अस्थितत्वादिति भावः । स्थितस्यैव भवनं सम्भवति न तु निर्बीजस्येत्याह—भवदेव हीति । विपर्यये दोषमाह—एतदनिच्छत इति । ननु सत्त्वादिगुणानां सामान्यरूपाणामपि प्रवृत्तिदर्शनाद्व्यभिचारिता क्रिया सम्भवतोऽनैकान्तिको निर्बीजत्वादित्युक्तस्य साधन इत्याशङ्कते ननु इति । गुणादीनामपि तत्त्वादिवत् प्रतत्त्वेन तेन तेन प्रकारेण प्रवर्तमानत्वात्, न हि द्रव्यस्य तथाभवनमन्तरेण प्रवृत्तिः सम्भवतीत्युत्तरयति—गुणाद्यपि चेति । एवं द्रव्यक्रियोरन्यतराभावेऽपराभावप्रसङ्गमभिधायेत्यर्थः प्रकाश्य भावपदार्थस्य द्वैविध्यं दर्शयति—भवतीति भाव इति । 25 भावशब्दनिष्पत्तौ विकल्पं दर्शयति अत्रेति भवतीति भाव इति केषाञ्चिन्मतेन कर्तरि णप्रत्यये भवति पाणिनीयमते तु भवतीति भव इत्यच्प्रत्ययेन भवति भाष्यमते तु प्रत्ययर्थप्रत्ययात् घञ्प्रत्यये भाव इति भवति चान्द्रादिमतेन तु भवतेर्णिमात्वा कर्तरि घञ्प्रत्यये भावः भव इति रूपद्वयं भवति । इह तस्य भावसम्बन्धनिष्पत्तिमाह—इह त्विति येन येन रूपेण हरितादिना अभावरूपेण वा भूयते स भावः । केन तथा भूयते ? सामर्थ्याद्यो भवति स एवेति भूति भवतीति भाव इत्युक्तं न तु भावशब्दप्रवृत्तिः प्रवृत्तिनिमित्तेनाह—तदाचेति । स च भावः कर्तृभूतश्चाकर्तृभूतश्च द्रव्यं भवति अकर्तृभूतस्य क्रियाया अपि द्रव्य 30 स्थैर्यरूपत्वात् तथा च द्रव्यं क्रिया च भाव इत्युक्तं भवतीत्याह—स चेति । द्रव्यस्य भावत्वमाह यतोऽसाविति । यस्मादे

---

१ क. पर्यव । २ सि. क. स च ।

कुतः पुनर्भवतीति ? भवनसम्बन्धाद्भवतीति भवति तस्य द्रव्यस्य, तस्मात्तद्भवनं भावः सा क्रिया प्रवृत्तिर्भवनमित्यर्थः ।

अत एव तदर्थगतेः प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिरिति [पात० महाभाष्ये० अ० ३ पा० १ सूत्रे २]व्युत्पत्तिः, उभयार्थवत्त्वप्रदर्शनाय च कोऽसौ
5 भावो नामेति प्रश्नोपक्रमं व्युत्पाद्यते क्रिया, पचत्यपत इति, नोच्यते योऽसौ भवति कोऽपीति, असत्साम्योपादानसाम्यभावत्वात् भावस्याक्षतुपकानुकारात्, तद्विपर्ययेण तु द्रव्यभावस्य प्रश्नप्रतिवचने दृष्टे व्युत्पादनकाले, तद्यथा कस्य भाव इति प्रश्नः, प्रतिवचनमपि योऽसौ भवतीति उच्यते नोच्यते पचत्यपते तद्भवनमेव, किं भूयते न भूयते केनापीति, स्वसम्बन्धोपादानसिद्धभावत्वात् तस्य ।

10 अत एवेत्यादि, तस्योभयार्थत्वदर्शनस्य दृढीकरणार्थं यावत् प्रत्ययपरैव प्रकृतिरिति, कथा नार्थम्, क्विप्प्रत्यये चिदादीनां प्रथमैकवचने प्रकृतिमात्रप्रयोगदर्शनात् अधुनेत्यादिषु च प्रत्ययमात्रश्रवणात् व्यभिचरतीति चेत् ? अत एव तदर्थगतेरन्यत्र चोभयप्रयोगदर्शनादनुमीयते तदर्थमिति, व्युत्पादनकालेऽपि प्रकृत्यर्थव्युत्पत्तिरन्यथा, अन्यथा प्रत्ययार्थव्युत्पत्तिः शास्त्रेऽन्वयव्यतिरेकाभ्यां क्रियते, तत्किमर्थमिति चेत् ? उभयार्थवत्त्वप्रदर्शनाय चेत्यादि यावत् कोऽपीति, कोऽसौ भावो नामेति प्रश्नोपक्रमं

15 योऽयं भावो भवति तद्भवनं क्रियेत्युच्यते [illegible] द्रव्यं भाव [illegible]–इतिप्रामाण्येति तस्य द्रव्यस्य भवनस्य सम्बन्धात् तद्भवनं भवतीति भवति भाव इति भावः । अत एवेति, अत एव भावशब्दे द्रव्यं क्रियावाद् [illegible] तथा हि द्रव्यं क्रियत्वं क्रिया च तापरस्य भाव इत्येवमस्योपात्ते एवमित्यर्थे पुनरपि [illegible] [illegible] क्रियाभ्यामुभयार्थप्रतिपादनं [illegible] अन्वयव्यतिरेकाभ्यां शास्त्रे प्रकृतिप्रत्ययविभागकल्पनयाऽर्थ- [illegible] [illegible] क्रियासां प्रत्ययमात्रः क्रियते [illegible]
20 मिति एवं [illegible] प्रकृतिप्रत्ययौ प्रत्ययार्थे तत्र एव [illegible] प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिरिति व्युत्पत्तिरपि क्रियतेति भाव । न केवलं प्रकृतिः प्रयोक्तव्या नापि प्रत्यय इति प्रकृतिपर एव प्रत्ययः प्रत्ययपरैव प्रकृतिरिति नियमयोर्व्यभिचारं शङ्कते क्विप् प्रत्यय इति [illegible] क्विपि प्रत्ययलोपे च [illegible] प्रकृतिमात्रं श्रूयते [illegible] [illegible] प्रत्ययमात्रं श्रूयत इति नैवनियमव्यभिचार इति भावः । [illegible]
25 [illegible] एवेति । [illegible] प्रकृति [illegible] व्युत्पादनकालेऽपीति प्रकृति- [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
30 [illegible] [illegible] [illegible]–उभयार्थवत्त्वेति [illegible] [illegible] [illegible] [illegible] [illegible] भाव इति च [illegible] [illegible]

1 सि. क्ष. प्रयोक्त° ।

व्युत्पाद्यते क्रिया, भवनं भूयत इति, भावे ल्युट्प्रत्ययविधानात्, भवतीति च भवनमेव प्रकृत्यर्थो निर्दिश्यते, सोऽभ्यते योऽसौ भवति कोऽपीति, येन येन भूयते योऽसौ भवति कर्ता प्रत्ययार्थः, स सोऽभ्यते यस्मिन् प्रश्ने, तस्मात् प्रकृत्यर्थपरा व्युत्पादना एव प्रकारा, किं कारणं ? असत्त्वभूतोपादानसाध्यभावत्वात्तदवस्थाप्यनुपकारात्, यथोक्तमन्यैः 'द्रव्यभावयोरुक्तिक्रियाश्रयो भेदोऽयं प्रवर्तते सत्त्वोपादानसिद्धभावः सत्त्वम्, असत्त्वोपादानसाध्यभावो भाव इत्येतदुक्तिक्रियाश्रय सत्त्वभावयोः पृथक्त्वमिति'(　　　　　5

) प्रसिद्धं हि लोके शास्त्रेषु च 'क्रियावाचकमाख्यातं द्रव्याभिधायकं नामेति'(　　　　)

'असमाप्तसिद्धं द्रव्यं क्रिया चैव हि भाव्यते' (महाभा० अ० १ पा ३ आ १) तथा 'पूर्वापरीभूतं भावमाख्यातेनाचष्टे, उपक्रमप्रभृत्यपवर्गपर्यवसानम्, परिनिष्पन्नं नाम्ना मूर्तं सत्त्वम्, यथाऽऽस्ते भवति पचति व्रज्या पक्तिरिति' (　　　　)तस्माद्घटपटादिसत्त्वा द्रव्यस्य सत्त्वाः पचतिगच्छत्यादयः क्रियायाः, भावशब्दश्च द्वयोरपि दृष्टः, तथाऽसत्त्वस्य द्रव्यवाचिनो घटपटादेरनुपादानेन 10

भावव्युत्पत्तिविधानेन भवनं भाव इत्युक्तम्, अत्र भवनशब्देन सपरिस्पन्दापरिस्पन्दसाधनसाध्यक्रियाविशेषो विवक्षितः तेन असत्त्वभूतमस्य भवनलक्षणस्य धात्वर्थं सिद्धम्, भवनं भाव इति कर्तृसाधननिरासार्थः एतदेव दर्शयति–भवतीति चेति । भवतीति भाव इति कर्तृव्युत्पत्तिं निरस्यति–सोऽभ्यत इति, इत्यभिधानात्यपि धातुसंज्ञा प्रसज्यत तान्यपि हि भवन्ति तत्प्रत्याख्येयं तथेति भावः । कर्तृव्युत्पत्तिसिद्धो भावस्तु प्रत्ययार्थः द्रव्यमर्थस्तेनेदानीं व्युत्पाद्यमानत्वात् भाववचनो धातुरिति भाववचनो न कर्तृसाधन इत्याशयेनाह–स सोऽभ्यत इति । यो भाव्यते स भाव इति साध्यमानावस्थायार्थस्य भावत्वात्प्रसिद्धं 15 प्रकृत्यैवाह तस्मादिति । द्रव्यक्रियाभिधायिनोः शब्दयोः भेदमाह–यथोक्तमिति मन्ये यथा द्रव्यं घटस्य काले लभ्यते द्रव्यात् साधनात् यथा भूतमूले दर्शयितुं न शक्यते तथैव वचनेऽपि स न साध्यमानेन किन्तु असत्त्वोपादानसिद्धमावो द्रव्यमसत्त्वोपादानसाध्यभावो भाव इति तदेतस्मिन् व्यवस्थितमिति । क्रियेति क्रियाप्रधानमाख्यातं भवति द्रव्यप्रधानं नामेति महाभाष्ये ५-३-६६ सूत्रे पाठो दृश्यते अन्यत्र तु भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति दृश्यते तत्राख्यातपदेन क्रियैवोच्यते तथैव लोके व्यवहारात्, कथमाख्यातं क्रियाप्रधानं भवतीति चेत्, क्रियाप्रश्ने तिङन्तेन प्रतिवचनात् यथा 20 किं करोति देवदत्त इति पृष्टः पचतीति तिङन्तेनाऽऽचष्टे प्रश्नावाक्येन क्रियाया एवावगमात्, तथाख्यातेनैवोपदेशोपलम्भात् समर्थत्वादपरनाम्नोऽप्यभिधानेऽपि आख्यातस्य क्रियाप्रधानत्वमवगम्यत इति । केचित्तु नामपदमाख्यातार्थभवक्रियाप्रधानो भावः नामपदार्थादि च यत्र प्रधानं गुणभूता च क्रिया तदिदं भावप्रधानमाख्यातम्, आख्यातवदेवेदं गुणभावेन सर्वभावाऽनेकधार व्यवस्थितत्वात्प्रधानत्वमस्याभिधानकत्वगुणीभूता क्रियेत्याख्यातमिति व्युत्पत्तिरिति वदन्ति । असमाप्तसिद्धमिति समाप्तेन सम्य परिसमाप्तेन सिद्धं पूर्णरूपेण सिद्धावस्थेन द्रव्यं सम्पादितम्, यद्यपि क्रियापि पूर्णरूपेण सिद्धावस्था तथापि तदवस्थि- 25 तसामान्यात् भाव्यत एव प्रतीयत इति तदर्थः । अत्र शाब्दव्यवहाराः यथोऽर्थः क्रियेत्यस्य दर्शनमात्र निरुक्तं वचनं प्रमाणयति– पूर्वापरीभूतमिति, पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् (निरु अ १ख. १४) मूर्तं सत्त्वभूतं सत्त्वनामभिः (ख. १५) व्रज्या पक्तिरिति (ख. १६) इति पाठक्रमो दृश्यते तदानुपूर्व्यात्रय क्रियाया एकत्वात्पूर्वापर च्छेदं पूर्वापरमिव भूतं पौर्वापर्येणावस्थितं भावं किं करोतीत्याख्यातेनाचष्टे–पृच्छते पचतीति, अस्य उपक्रमप्रभृत्यपवर्गपर्य- वसानं भावं भवति पचतीत्याख्यातेनाऽऽचष्टे, उपक्रमः प्रारम्भप्रभृति अपवर्गोऽन्तिमक्रिया पर्यवसानम्, एकानेकक्रियाभि- 30 व्यक्तो भाव आख्यातेनोच्यत इति भावः । कस्मिंश्चित् तमेवोपक्रमप्रभृत्यपवर्गपर्यन्तमध्यविच्छिन्नं भावं मूर्तं–किमपि स्वान्तरतमापन्नं सत्त्वभूतं द्रव्यत्वं प्राप्तं भावं सत्त्वनामभिः व्रिज्यैकसाधुकैः वर्णैराचष्टे यथा करोति देवदत्त इति प्रश्नं पृष्टा च पाचकः कारक इति नाम्नाऽऽचष्टे । तदुदाहरणं दर्शयति–व्रज्यापक्तिरितीति, इत्यभिहितभावस्य द्रव्यत्वप्रकाशनात्, अत्र मते गुणगुणभावस्य द्रव्यत्वं चेष्यम् इव द्रव्यं क्रिया च भाव उच्यत इत्याह–तस्मादित्यादीति । असत्त्वोपादानेऽस्मिन्नूर्ध्वमाह–तथेति

१ सि. क. भवनमसिद्धि० । २ सि. क. °सिद्धमावं ।

साध्यो भावः साध्यत्वं याऽसावनुमानगम्या क्रिया न स्वयमा साधनात् पृथग्दर्शयितुम्, गर्भवन्निर्लुठिता सा परतः साधन एव यथाऽऽत्मानं लभते तथाऽभिधानेऽपीतरसम्बन्धोपादानः साध्यभावो भावः क्रियेत्यर्थः तद्भावात् भवत्सम्बन्धोपादानसाध्यभवनत्वाद्भावस्य प्रवृत्तिलक्षणस्यैव प्रश्नप्रतिवचनसिद्धिरिति, तद्विपर्ययेण तु द्रव्यमात्रस्य प्रश्नप्रतिवचने दृष्टे व्युत्पादनकाले, तद्यथा कस्य भाव इति प्रश्नः कस्य क्रिया प्रवृत्तिः कर्तरि षष्ठी कृत्वा, तदनुरूपं प्रतिवचनमपि योऽसौ भवतीति यो भविता स एव वा द्रव्यलक्षणः स उच्यते, नोच्यते यदनूद्यते तद्वचनमेव किं भूयते ? न भूयते केनापीति, अनिर्दिष्टकारकं हि भावसामान्यमेव, भावस्याभिन्नत्वात्, किं कारणं ? स्वसम्बन्धोपादानप्रसिद्धभावत्वात् सत्त्वस्य स्वलक्षणेनैव पृच्छ्यते कस्य भावः ? को भवतीत्यर्थः, न पृच्छ्यते किं भूयते ? न भूयते केनापीति प्रतिवचनमपि, तथोच्यते योऽसौ कोऽपि भवतीति तस्य भावः स भवति तेन भूयत इति नोच्यते यदनूद्यते केनापीति, अतस्तदर्थं वचनमात्रं न व्याख्यायते तदभावप्रत्वात्, किं कारणं ? क्रियाकारकसाधनव्युत्पादन विपर्ययेण प्रश्नव्याकरणदर्शनात्तदर्थप्रसिद्धेः यथाविवक्षप्रवृत्तेरपि तदनुरूपत्वादिति ।

भावप्रधानं हि आख्यातं भवति तथा च पचतीत्यादौ देवदत्तादिस्तत्कर्ता पाक इति बोधात् [illegible] काशिते इति साध्यत्वेन प्रतीयमानत्वं क्रियायाः [illegible] क्रियाया [illegible] साध्यत्वेन क्रियोपादीयत इति भाव । एतदेव स्फुटयति-याऽसाविति क्रिया [illegible] निर्दर्शयितुम्, यथा गर्भो निर्लुठित [illegible] मूर्खादिषु [illegible] भावः, [illegible] स्वतः एव [illegible] निर्देष्टुमशक्या [illegible] तदेवाह यथाऽऽत्मानं [illegible] ततः साध्यत्वेनाभिधीयमानः [illegible] क्रियापदमात्रेणैव [illegible] एवं [illegible] तथा [illegible] तदनुरूपत्वमपि [illegible] क्रिया [illegible] भावप्रधाने [illegible] एतच्च [illegible] नोच्यते [illegible] साध्यभावत्वं क्रियाया इति भाव । प्रवृत्तिलक्षणस्येति [illegible] तथा द्रव्यमात्रेण [illegible] निर्देष्टुं न [illegible] क्रियाकारकसम्बन्धोपादर्शनमिति भावः । [illegible] तेन [illegible] पुनरपि [illegible] तद्विपर्ययेण स्थिरत्वं क्रियाप्रविपर्ययेण स्थितम् । [illegible] तद्यथेति [illegible] न तथा [illegible] भाव । साध्यसाध्यत्वं निरस्यति-योऽसाविति । क्रियाकारक [illegible] द्रव्यमात्रस्य च [illegible] अनिर्दिष्टेति [illegible] क्रिया [illegible] नापि क्रिया [illegible] क्रिया [illegible] योऽसौ भवतीत्युच्यते नोच्यते न यदनूद्यते इति भाव । तदभावेति [illegible] इति भाव । ननु [illegible] क्रिया न [illegible] द्रव्य एव [illegible] इति द्रव्ये [illegible] क्रिया च न [illegible]

किञ्चान्यत्—

लिङ्गादिभिर्द्रव्यं तद्रहिता च क्रिया भिन्नमुभयमेव भाव इति लिङ्गसंख्यावतो द्रव्यात् वस्त्वेकत्वगता क्रिया स्वरूपतोऽन्यैव, अलिङ्गसंख्यत्वात् प्लक्षादिवत्, भिन्नानां पदार्थानामेकसम्बन्धिविषयत्वार्थः, समुच्चयोऽन्वाचयः समाहार इतरेतरयोगश्च पदार्थोत्तरकालभाविनः द्रव्याणां गुणानां क्रियाणाञ्च दृश्यन्ते, न चैते द्रव्यं न क्रिया न गुणः किन्तु धीरपुरुषविशेषणविशेष्यैकत्ववत् वस्त्वेकत्वगत्याऽनन्यान्यत्वभावो धर्माः । 6

लिङ्गादिभिरित्यादि यावदुभयमेव भाव इति, द्रव्यं लिङ्गसंख्याकालकारकयोगि, क्रिया तद्रहिता, लिङ्गादिमत्त्वाच्च भवतो द्रव्यस्य भवनमलिङ्गसंख्यं भिन्नं वस्तु तद्भवनभूतं तद्रहिता, तस्मादुभयं वस्तु, तदेकमिति प्रतिपाद्यमुपपन्नम् इत्यतः प्रतिज्ञायते लिङ्गसंख्यावत इत्यादि, वस्तुत्वे-नैकत्वं वस्त्वेकत्वं तस्य गतिरापत्तिः, वस्त्वेकत्वमापन्ना क्रिया स्वरूपतोऽन्यैव, द्रव्यात् क्रिया- 10
स्वरूपं भिन्नमेकं वस्त्वित्यर्थः, कस्मात्? अलिङ्गसंख्यत्वात्—न लिङ्गसंख्ये यस्य तदिदमलिङ्गसंख्यं भवनम्, यदि वस्तुत्वेनैकत्वं गतं सत् द्रव्येण सहैकं स्यात्, अन्यदेवेति प्रतिज्ञार्थोऽनेन साध्यते, अलिङ्गसंख्यत्वादिति हेतुः, दृष्टान्तः प्लक्षादिवत्, भिन्नानां पदार्थानामेकसम्बन्धिविषयत्वार्थः, यथा प्लक्षश्च न्यग्रोधश्चेत्यत्र च-शब्दः प्लक्षन्यग्रोधयोरन्ययोः समुच्चेतापि समुच्चयमेकमेव सम्बन्धिनं विषयीकृत्य वृत्तत्वादनन्यत्वेऽपि स्वसम्बन्ध्येवार्थस्य वाचकः, तथा द्रव्यक्रियात्मकवस्त्वेकत्वान्यत्वमिति । अत आह द्रव्यादन्यत्वेन पदी- 15
कृतायां क्रियायां समुच्चयनमित्येव यदि दृष्टान्तत्वेनोच्यते साध्यत्वाद् दृष्टान्तः, अथ मा भूदेष दोष इति द्रव्यान्तरसमुच्चयो यदि दृष्टान्त उच्यते तथापि द्रव्यार्थभागः, प्लक्षन्यग्रोधसमुच्चयस्यापि सर्वसत्त्वार्थसङ्ग्रहार्थत्वाद् द्रव्यार्थस्य, अ[थ] द्रव्यार्थं मा भावमिश्रैकत्वमेवेष्यते पुनरपि दृष्टान्ताभावः द्रव्यादिलक्षणार्थान्तरस्याभावादित्यभिप्रेत्योच्यते, पदार्थानामिति पदार्थग्रहणादेव दो[षः], प्रातिपदिकार्थो हि क्रियासम्बन्धी,

किञ्च अलिङ्गसंख्यत्वादपि द्रव्यादन्येयमित्येतदाह—लिङ्गादिभिरिति । उभयस्य भावत्वैकत्वेऽपि लिङ्गादिमत्त्वतद्रहितत्वाभ्यां 20
तयोर्भेद इत्येतदाह—लिङ्गादिमत्त्वाच्चेति, भवतो द्रव्यस्य लिङ्गादिमत्त्वाच्च भवनमलिङ्गसंख्यं भिन्नं वस्त्विति योजना [illegible] लिङ्गादिमत्त्वात् [illegible] इति [illegible] भावस्य लिङ्गसंख्यायोगाभावात् द्रव्यक्रिययोर्वस्तुत्वेनैकत्वेऽपि भवनाभिहिता क्रिया द्रव्याद्भिन्नेति भावः । यद्यपि [illegible] तथापि ते [illegible] इत्येव बोध्यम् । तद्भवनभूतमिति द्रव्यस्य भवनभूतं [illegible] द्रव्यं क्रिया चेत्युभयमपि भावः [illegible] द्रव्यात् क्रियाया 25
भेदः साध्यत इति भावः । दृष्टान्तं निदर्शयति—प्लक्षादिवदिति यथा परस्परनिरपेक्षाः पदार्थाः क्रियायां समुच्चीयन्ते तदा समुच्चयार्थो भवति [illegible] तदा समुच्चयक्रिया- [illegible] तथैव [illegible] क्रिया द्रव्यात् [illegible] भाव । [illegible] द्रव्यात् क्रियाया भेदे साध्ये क्रियाया एव दृष्टान्तो न सम्भवति तथापि द्रव्यभेदस्य साध्यत्वेन दृष्टान्ताभावे [illegible] 30
[illegible] । [illegible] क्रियायां [illegible] न साध्य- [illegible] अथ मा भूदिति । [illegible] दृष्टान्ताभावे [illegible]—अथ द्रव्यार्थमिति । समाधत्ते—पदार्थानामितीति, नात्र क्रिया

१ सि. क्ष. [illegible] । २ सि क्ष. द्रव्यक्रिया[illegible] । ३ सि क्ष. [illegible] । ४ सि क्ष. [illegible] । ५ सि क्ष. [illegible] ।

अन्तरङ्गत्वात् क्रियायाः, न पदार्थो बहिरङ्गत्वात्, यथा पुत्रमिच्छति पुत्रीयतीति द्वितीया बहिरङ्ग-मोमिथायिनी पुत्रस्यैवमोचरं गमसम्बन्धात्, उक्तञ्च 'प्रातिपदिका[र्था]नां क्रियाकृताः सम्बन्धा भवन्ति' (पदस्तमानार्थः भा० अ० २ पा० ३ आ० १) इति, पपितुरेवरत्तस्य पुत्रेणाभिसम्बन्धो न पदार्थेन विभक्त्यन्तेन, पदान्तरसन्निधौ तु तद्व्यक्तिः 'कारकाणां प्रवृत्तिविशेषः क्रियेति' (महाभा० अ० १ पा० ३ सू० १) वचनात् क्रियया सम्बन्धमित्वा कर्मत्वमेवेतीति पूर्वमिव क्रियया सम्बन्धः, यदि क्रियासम्बन्धवत् प्रातिपदिकार्थानामेव समुच्चयादिसम्बन्धोऽपि स्यात्तदा प्रातिपदिकार्थातिरेकात् सम्बोधनवदसामर्थ्यविषया प्रथमा स्यात् द्वितीयादयश्च न स्युः, कर्माद्यधिके हि प्रातिपदिकार्थे ता विधीयन्ते, यदि तु समुच्चयाद्यधिको कर्मोपस्तीति द्वितीयादयः स्युस्तदा कर्माद्यधिक्येऽपि प्रातिपदि

[illegible]

1 सि क० 'कर्मान्तरत्वात्' ।

कार्योऽस्तीति भयमेव स्यात्, अतः पदार्थोत्तरकालभाविनि वाक्यार्थे उपजायते, तस्योपकुर्वन्त्यभावतया पदैरपि सम्बध्यन्ते इत्यत उच्यते भिन्नानां पदार्थानामिति क्रियासम्बन्धमुद्दिश्य नार्थम्, स च समुच्चय पक्षसम्बन्धिविषया, कोऽसावेकः सम्बन्धी ? वाक्यार्थः पृथगपायेऽप्येकत्वा, अन्वाचयसमुच्चययोरनय-मतयनादि, उक्तञ्च 'चार्थे द्वन्द्वः' (पा० अ० २ पा २ सू० २९) चस्य कोऽर्थः ? समुच्चयोऽन्वाचयः समाहार इतरेतरयोगश्च पदार्थोत्तरकालभाविनः, तत्र समुच्चयः 'ग्रामञ्च पुरुषं शकुनिं पशुमहरहर्नयमानो 5 वैवस्वतो न तृप्यति सुरया इव दुर्मदी (एतत्समानः पाठो महाभा० २ अ० २ पा० २९ सूत्रे) अन्वाचयो यथा देवदत्त ! भिक्षामट गाञ्चानय, पाणिपादं ब्राह्मणक्षत्रियविट्शूद्राः, रामकेशवाविति समाहारेतरेतरयोगौ, ते[1] च द्रव्याणां गुणानां क्रियाणाञ्च दृश्यन्ते यथा घटश्च पटश्चेति, रूपञ्च रसश्चेति, हसति तिष्ठति रमते चेत्यादयः पदार्थोत्तरकालभाविनः समुच्चयविकल्पादयः, न चैते द्रव्यं न क्रिया न गुणः किन्तु द्रव्यस्यैव क्रियात्वात् वीरपुरुषविशेषणविशेष्यैकाश्रयवत् वस्त्वेक- 10

पदार्थैस्तद वाक्यस्य सम्बन्धो न भिन्नैरित्याह–तस्योपकुर्वन्त इति । एकसम्बन्धिनं दर्शयति–कोऽसाविति वाक्यार्थमुप एकाश्रयत्वात् समूहः एकः सम्बन्धी स च धर्मभूतत्वादेकदेशस्य इति भावः । अनयेतरेतरसमाहारस्तौ साम्याः अन्वाचयसमुच्चयस्तु तु भिन्नैरित्याह–अन्वाचयेति । चार्थे द्वन्द्व इति अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्व इति सूत्रार्थः । चस्यार्थमाह समुच्चय इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः, अत्र च– शब्देन समभिव्याहृतपदार्थे इतरापेक्षत्वं द्योत्यते तदसमभिव्याहृते तु न अत एवात्रैकस्याप्रयोगः अनेकं सुबन्त 15 मस्येति अनेकस्यान्यस्यैकस्मिन्नितराविशेषेऽप्येकस्य क्रियायामन्वयेऽप्यन्यस्य चार्थेऽनेकसुबन्तस्य तद-भावात् समुच्चये समासः । ग्रामञ्चेति भाष्ये 'अहरहर्नयमानो ग्रामञ्च पुरुषं पशुम् । वैवस्वतो न तृप्यति सुरया इव दुर्मदी' ॥ इति दृश्यते तु येन यो मायति स यथा सुरया न तृप्यति एवं यमो पशूनादीन् नयमानः इति तदर्थः, सुरया इति दोषनी अत्र नयत्यासावपि अहरहः इत्यनेन चार्थसम्बन्धसामान्यादितरेतरयोगसमुच्चयप्रतीतेः द्वन्द्वः प्राप्नोति परन्तु नयत्यैवैव अनेकेतरेतरयोगः प्रतीयते तत्रैव समासो भवति अत एव न समुच्चयसमासोदाहरणमिदम् । अन्वाचय इति, 20 अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः असमभिव्याहृतपदनिष्पाद्यत्वम् तथाप्रधानम् अवयवी हि यं भावयति तयोः प्रधानस्य भावात्तत्र समासः । पाणिपादमिति अङ्गत्वात्प्राण्यङ्गानां समूहः समाहारः अयमेव विशेष्योऽत्र एव तदेकवचनम् । ब्राह्मणेति परस्परापेक्षाणामुद्भूतावयवभेदसमूहस्यानामेकधर्माभिसम्बन्धितवैराग्यम् इतरेतरयोगः अत्र साहित्यं विशेषणं द्रव्यं प्रधानं समाहारे साहित्यं प्रधानं द्रव्यं विशेषणम्, अन्नाभ्योऽभ्यासिकयोऽभ्यसाहित्यं गम्यते यथा ब्राह्मणक्षत्रियविट्शूद्राः । क्षत्रियपदेन स एव विट्पदेन शूद्रपदेन च स एव अत एव साहित्यस्य प्रतिपदं वचनप्रयोग 25 इति बोध्यम् । रामेति इतरेतरयोगस्यैवोदाहरणम्, अत्रापि रामपदेन रामकेशवयोः केशवपदेन च तयोरभिधानाद्गुणाति द्वन्द्वः समासयोगेन पुनरुक्तत्वबोधसामर्थ्यम्, अतो भाष्यकारवैचित्र्यम्, समूहापेक्षया द्विवचनमिति बोध्यम् । समुच्चयादीनां द्रव्याद्यन्यत्वाद्–ते चेति । इत्यनिच्चयसमूहपदार्थे दर्शयति–न चैत इति, तेऽर्थाः समूहादयो न द्रव्यगुणक्रियात्मकाः अपि तु भेदाभेदरूपा प्रतीतेरित्याह–किन्त्विति नाम चार्थः क्रिया क्रियागुणयोश्चार्थत्वमाश्रयत्वात् द्रव्यापेक्षे द्रव्यस्यैव क्रियात्वसम्भवात् किन्तु द्रव्यगुणक्रियासाधारण्य प्रतीतेरिदं चार्थभूतसमूह इति भावः । वीरेति, अत्र वीरादिः 30 शब्दोऽभ्येतिविशेषणपदसम्बन्धो व्यतिरिक्तः कार्यमात्रगत पदान्तरसम्बन्धेऽपि तत्र तादात्म्यभावात् निर्दिश्यते तत्र च दृश्यन्ते गुणप्रधानभावगतसम्बन्धाद्विशेषणविशेष्यभावो वाक्यार्थः न तु स प्रातिस्विकार्थे पदान्तरविधान एव तत्र प्रतीते विशेषणविशेष्यत्वयोर्भेदेऽनन्यत्वेऽप्यप्राधान्यभावापत्त्या, विशेष्यं हि सामान्यात्मना क्रियासम्बन्धित्वया-नुपपन्नं ज्ञातमपि अपरविशेषैर्नानिश्चितत्वाद्विवक्षया ज्ञापकत्वेन विधित्वे वीरादिगुणः प्राधान्ये विशेषणं भवति तत्त्वेन प्रधानं विशेष्यम् ज्ञापकन्तु परोपकारत्वेनार्पितस्वार्थं देशभूतमप्रधानं विशेषणम् द्रव्यं हि साक्षात् क्रियासम्बन्धात

1 सि क. ते च । 2 सि क. च चेद्रव्यं ।

त्वगताऽनन्याश्रयत्वमावो धर्मः प्रवृत्तिरेवेति सम्बन्धः, यथाऽत्र वीरत्वस्य पुरुषसामानाधिकरण्यात् वस्तुत्वेनैकत्वं गतः तथा पुरुषत्वस्योऽपि वीरसामानाधिकरण्यात्, अन्यथा वैयधिकरण्यप्रदर्पणादि[दम्] सम्बन्धादिदोषाः स्युः, द्वयोरप्ययोरैकस्य सामानाधिकरण्यात्, अथ च वीरो विशेषणं पुरुषो विशेष्य इति परस्परतो भिन्नार्थत्वमनयोः, इतरथा सामानाधिकरण्याचावास्यात् पौनरुक्त्यादिदोषाः स्युः
5 द्वयोरप्ययोरैकत्वं सामानाधिकरण्याद्विशेष्य[विशेषण]भावाभाव्यत्वम् एव प्रमाणविषयम्, तेन द्रव्यान्य- परिपूर्णत्वे सत्युपरक्तभाविनमार्थसैकसम्बन्धिविषयत्वं प्रमाणवाक्युपायैकसमुच्चयगोचरत्वमित्यनन्य- त्वम्, अन्यत्वमपि प्रमाणयोरेवासौ समुच्चय इति, तथा द्रव्यादभिन्नसंख्यो भावो वस्तुत्वेकत्वगतिर न्याय्योऽप्यत्रेति । इत्थं वा व्याख्यानेऽप्यत्रैकान्तो द्रव्यार्थभागोऽन्यपदभागमेति परिहृता दोषाः ।

अतः परमभिन्नसंख्यत्वमविप्रतिपन्नतयोक्तवते ग्रन्थः—

10 साधु भवतीत्यादौ भवने भवितृषु लिङ्गसंख्याभेदवत्सु याः लिङ्गसंख्यास्ता न भवन्ति, भवने नपुंसकलिङ्गमेकवचनमानुमीयते भूयते च तद्विशेषणे साधुशब्दे, तस्मादन्यत्वकर्म भवनस्य ।

साधु भवतीत्यादि यावद्भवत्सु याः [लिङ्ग]संख्यास्ता न भवन्तीति, एकस्मिन् द्वयोर्बहुषु वा देवदत्तादिभवितृषु लिङ्गसंख्याभेदवत्सु यल्लिङ्गं संख्याभेदवत्त्वात्ता न भवन्ति भवने नपुंसकलिङ्ग-
15 मेकवचनमेव चानुमीयते, तद्विशेषणे साधुशब्दे भूयते साधु भवनं पश्येत्यादिकारकत्वातिरेकेऽपि, तस्मादन्यत्वमयं भवनस्य देवदत्तादिभ्यः करणतो वस्तुत्वैकत्वे ।

साम्प्रतं किमर्थं नपुंसकलिङ्गं प्रथमैकवचनमत्रोच्यते—

प्रत्ययपरप्रकृतिव्यवस्थायामपि प्रथमैकवचने अतिक्रमकारणाभावात्, नपुंसकत्वं भवन-

प्रधानम्, पुरुषस्तु तदाश्रयत्वेन भिन्नस्वभावमस्तु धर्मः, द्रव्यात्मकोऽर्थस्यैकत्वस्याभावात्मकतः अतस्तु विशेषणविशेष्यभावः सामानाधिकरण्य-
20 समासः च न चानयोर्भिन्नप्रवृत्तिनिमित्तकत्वे तदेकार्थत्वमितरम्, धर्मिणोस्तु विशेषणत्वं वीरे पुरुषविशिष्टं विशेष्यत्वम् पुरुषे वीरविशिष्टं तयोः सम्बन्धः तद्विशिष्टं सम्बन्धः, तथा वीरत्वपुरुषत्वसमुच्चयात् वीरपुरुष इति बोधः, पुरुषस्वैकत्वसंयोगतोऽर्थैव- कोऽपि विशिष्टत्वात्सामानाधिकरण्यम्, तत्र भिन्नाभिन्नत्वमिति यथैव समुच्चयतो वस्तुतः तद् भिन्नाभिन्नत्वम् इति भावः । अयमेव व्यनक्ति—यथाऽत्रेति वीरत्वस्य वीरत्वप्रतिपादक वीरत्वं पुरुषत्वं च समानाधिकरणौ धर्मौ, धर्मधर्मिणो- र्भेदाभावात्तयोरैकत्वं गतस्य इत्यर्थः । विशेष्यत्वाविशेषणत्वाभाव तयोर्भेदोऽभिप्रायः—अथ चेति वस्तुत्वं न सामानाधिकरण्येन
25 वीरपुरुषस्य पुरुषत्वस्येन च वीरपुरुषस्य बोधात् पौनरुक्त्यं भवेदिति सेयोऽप्यनुमेयं इति भावः । प्रमाणे भेदाभेदस्याद- यत्वमिति । द्रव्यविषयेऽप्यर्थभिन्नयोर्भेदाभेदमनुवदति—तथा द्रव्यादिति । अथ क्रियायां भिन्नसंख्यत्वं प्रदर्शयति— साधु भवतीत्यादाविति । एतदेव विवृणोति—एकस्मिन्निति । साधु भवतीत्यत्र साधुशब्दो भवनक्रियाविशेषणम्, अत एव द्रव्यधर्मान् लिङ्गसंख्यादीन् न च प्राप्नोति भिन्नलिङ्गसंख्याभेदवत्स्वपि भवनेषु तद्विशेषणभूताभिधायि साधुशब्दे निर्दिश्यते अतः तु क्रिया द्रव्येण एकत्वेनोपस्थाप्यते साधु भवनं पश्येति तदा तु तस्या द्रव्यवद्व्यवहारात्, कर्मत्वमुपैति
30 इदं कर्तृत्वमपि भवनं पश्येत इतीति भावः । भवन इति भाववाच्यप्रत्ययस्य तत्र लिङ्गविशेषं नपुंसकलिङ्गमेव भवति भेदाभावादव्ययमेकत्वस्य न लोकव्यवहारमेति भावः । तदेव पुनः स्फुटयति—प्रत्ययपरेति साधु भवतीत्यत्र क्रियाविशेषणस्य साधुशब्दस्योक्तं कर्मादिनामभावात् द्वितीयाविभक्त्यभावात् प्रातिपदिकार्थमात्रविवक्षायां प्रथमैकवचनमेव कर्मी

स्याम्यकत्वात्, यथा लोके दृष्टं किमपि दृश्यत इति, तथा त्रिकालविषयाद्द्रव्याद्न्यो भावो न च तेन विना कारकः त्रिकालत्वात्, द्रव्यं त्रिकालविषयम् भावस्य त्रिधा भिन्नकालस्येऽप्ये करूपत्वात्, वर्तमानत्वेनावतिष्ठमानं तत्सम्बन्धे द्रव्यं त्रीणपि कालान् विषयीकरोति गमनगन्तृवत्, वर्तमान एव देवदत्ते गन्तरि गतेस्त्रैकाल्य दृष्टम्, अगमद्गच्छति गमिष्यतीति तथाऽभूद्भवति भविष्यति द्रव्यमिति ।　　5

(प्रत्ययेति) प्रत्ययपरप्रकृतिव्यवस्थायान्तु प्रथमैकवचने, किं कारणं? अतिक्रमकारणाभावात् अवश्यञ्च प्रत्ययपरा प्रकृतिः प्रयोक्तव्या 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा० २ अ० ३ पा० ४६ सू०) इति सत्तामात्रेऽपि प्रथमाविधानात् ततोऽतिरिक्तार्थासम्भवात् प्रथमातिलङ्घने फलाभावात्, वचनस्य वचना[न]न्तरोपकत्वात् सत्तामात्रार्थकारणत्वात् कारणान्तराभावात्, कारणाद्धि तदतिक्रमः स्यात्, नपुंसकञ्च भवनसामान्यत्वात्, अव्यक्ते गुणसन्देहे [च] नपुंसकलिङ्गं प्रयोक्तव्यमिति, 10 किं यथा लोके दृष्टमिति चेदुच्यते किमपि दृश्यत इति—यथा हस्त्यश्वनरादिसमूहं दृष्ट्वा वक्तारो भवन्ति किमपि दृश्यत इति, इतिः प्रदर्शने, एतदेव वाक्यमुदाहरणत्वेन प्रदर्शयति तथात्रापि, पूर्वसाधने तस्मि- न्नेवपक्षे हेत्वन्तरमुपनयरूपेणोच्यते तेन प्रकारेण तथा, यथा पूर्वं वस्तुत्वैकत्वगत्याऽनन्यद्द्रव्यमिति पक्षीकृत्य साधितं तथाऽत्रापि त्रिकालविषयाद्द्रव्यादन्यो भावः, न च तेन विना कारक इति पक्षः द्रव्येण विना न स्वयं कारको भावः, तत्सद्वृत्तिरेवास्यस्येऽपीत्यर्थः, कस्मात्? त्रिकालत्वात्, त्रयः काला 15 अस्येति त्रिकालः, कोऽसौ? भावः क्रियालक्षणः, अभूत् भवति भविष्यतीत्युपनेयमानत्वात्, भेदेन

विभक्तेरप्यभावेन स्थितिरर एव प्रत्ययः प्रत्ययपरैव च प्रकृतिः प्रयोक्तव्येति व्यवस्थया प्रत्ययमात्रप्रयोगार्थसम्भवेन प्राति- पदिकार्थे प्रथमैव भवति तत्रापि प्रथमोपस्थितत्वात् विभक्त्यन्तरमिव्यक्त्यैकत्वस्यैकवचनमेव भवतीति भावः । तदेवाह- अतिक्रमेति । प्रातिपदिकमात्रव्येन निरपेक्षमाणोऽर्थः सत्ता सा हि सर्वैरन्यानभिधीयमाना प्रथमं प्रतीयमाना विभ- क्त्यन्तरमनपेक्ष्य प्रातिपदिकमात्रस्यार्थः तत्र प्रथमाविभक्तिर्भवतीति विधायकं सूत्रं प्रमाणयति—प्रातिपदिकार्थेति । 20 ततोऽतिरिक्तेति तदतिरिक्तार्थस्य तादृशस्येतरस्याभावादिति भावः । अत एव प्रथमाविभक्तिपरित्यागे बीजाभाव इत्याह- प्रथमेति । सत्तामूलार्थस्य एकत्वात् भेदव्यवहारार्थभेदकस्यैकत्वविनाभावात् तत्प्रथमार्थाभिधाने भेदनिमित्ता- भावेन एकवचनमेवाभिधातुं योग्यतया तदतिक्रमे हेत्वभावादेकवचनमेव प्रयुञ्ज्यात इत्याशयेनाह—वचनस्येति वचनं वक्ता विवक्षितमर्थं तत्परत्वात् तदभिप्रेतं भावः । एकवचनप्रयोगे सत्तामूलार्थ एव नैतदं हेतुर्नास्य इत्याह—सत्तामात्रार्थेति । अथ नपुंसकत्वे हेतुमाह—नपुंसकञ्चेति भवनस्य इत्यादिव्याख्यातमेव पूर्वम् । पुनरपि द्रव्यात् क्रियाया अनन्यत्वं समर्थयति- 25 द्रव्येऽस्मादीति द्रव्यं सत्तया भिन्नत्वात् न भावत्वं तत्सत्तामात्रभिन्नमपि क्रियात्वमन्यान्भूतभविष्यद्वर्तमानभेदो भवति तदेव त्रिकालविषयम् कालत्रयेऽपि तस्य भवनात् क्रिया तु वर्तमानोऽभिन्नकाल एव च कालत्रयमनुभवति तत एवेति त्रिकाल एककाल क्रियायाः कालत्रयानुपपन्नात् प्रत्यक्षे भिन्नत्वेऽपि वर्तमानैकविषया भवतीति त्रिकालविषयादभिन्नत्व- द्रव्यात् वर्तमानविषया क्रियाऽन्या त्रिकालत्वादिति भावः । अनुमानमिदोपनयमाह—त्रिकालविषयादिति कारकः क्रिया भाव इत्यर्थः त्रिकालत्वमस्य दर्शयति—अभूदिति भूतकालत्वेन सर्वेनामिधेयत्वात् अभूत् भवति भाव भूतत्वं न तावद्द्रव्य 30 एव इत्यतोऽन्य पर्यायार्थस्तथापि क्रियात्वमेव हि तावत्तमावानां कालेन सम्बन्धात् कालत्रयात्मा स्वार्थभूता तथाऽऽत्मा क्रिया स्थेनुत्पन्ने प्रत्यय च प्रत्ययत्वात्रितयीति परस्परैव कालेन सम्बन्धो न तु पदार्थान्तरप्रत्ययोऽस्त्यत्र च कालत्रयात्मा क्रियायाः कालत्रयवतीति त्रिकाला सा तथात्विकनिमित्तादेव द्रव्यं सम्बध्यत इत्यनिवार्यं द्रव्यं त्रिकालविषयमिति तत्र

त्रिभिरपि कालैरभिसम्बन्धदर्शनात् भावस्य त्रिकालत्वं सिद्धत्वाद्धेतुः, द्रव्यं त्रिकालविषयमिति, भावस्य त्रिधा भिन्नकालस्यैकरूपत्वात्, वर्तमानेनावच्छिन्नमानं तत्सम्बन्धे द्रव्यं त्रीनपि [कालान्] विषयीकरोतीति त्रिकालविषयमित्युच्यते त्रिष्वपि कालेषु तदेव भवतीत्यर्थः, अत्रिकालं द्रव्यं त्रिकालविषयमिति, क्रिया तु त्रिकालस्य वर्तमानविषयेत्युक्तं भवति, गमनगन्तृवदिति दृष्टान्तः, तत्सामर्थ्ये वर्तमान एव देव
5 दत्तं गन्तरि, एवकारोऽवधारणे, त्रिष्वपि कालेषु गन्तुर्वर्तमानैककालत्वादवधारयति गतेः त्रैकाल्ये गमनस्य त्रयोऽपि कालाः अव्यभिचारित्वैकरूपा दृष्टाः, तथैवर्तमाने अगमद्गच्छति गमिष्यतीति यथाऽयम् [भि] न्नाविषयत्वयो व्याख्यातार्थः।

भावस्य द्रव्यात् पृथक्त्वासिद्धिवत् गन्तुर्गमनपृथक्त्वासिद्धेरि दृष्टान्तः साध्यैकदेश इति चेदुच्यते देवदत्तगमनयोः त्रैकाल्यात्रैकाल्यमेवसिद्धेः द्रव्यभावयोरपि तद्वत्, युगपदयु
10 गपदत्वस्वलपटवत्।

भावस्वस्यापि परमवाह्या आग्मत भावस्य द्रव्यादन्यत्वेन तत्पृथक्त्वेन च साध्यत्वात्प्रभागमनयोरेकार्थत्वात् द्रव्याभूतमपृथक्त्वासिद्धिवत् गन्तुर्गमनपृथक्त्वा[सिद्धे]रि[1] दृष्टान्तः साध्यैकदेश इत्येतस्यां विचिकित्सायां कथं साधनमिति चेदुच्यते, देवदत्तगमनयोस्त्रैकाल्यात्रैकाल्य-भेदसिद्धेर्द्रव्यभावयोरपि तद्वदिति सामान्यविशेषयोः साध्यसाधकत्वाभ्यां विवक्षितत्वाददोषः, तद्विचिकि-
15 त्सायामपि दृश्यतेति, युगपदयुगपदत्वस्वलपटवदिति दृष्टान्तः, तत्र भावः तत्त्वम्, तैरेव भवतीत्यर्थः, ननूक्तं द्रव्यभेदे द्रव्यार्थभागः, भावाभागोऽन्यथाभाव इति नैव दोषः युगपदयुगपत्त्वविशेषणात्, आत्मा-

'परतो भिद्यते सर्वं आत्मा तु न भिद्यते। [illegible] परतोऽपि भिद्यते ह' इति, [illegible] [illegible] [illegible] [illegible] न तु [illegible] तत्त्वं। [illegible] भावस्येति भावस्य-क्रियायाः [illegible] द्रव्यस्यैकत्वसत्त्वेऽपि [illegible]
20 हेतुं [illegible]-वर्तमानेनेति [illegible]-[illegible] इति। तत्सर्वमाह-अत्रिकालमिति। दृष्टान्तमाह गमनगन्तृवदिति देवदत्ते द्रव्यं वर्तमानैकरूपत्वादव्यभिचारित्वम् [illegible] [illegible] भावमात्रिता [illegible] अगमत् गच्छति गमिष्यतीति एवं द्रव्यं भावश्च त्रिकालमिति भावः। अथ गमनगन्तृदृष्टान्ते द्रव्यक्रियात्मतया साध्यैकदेश एव तयोर्भेदासिद्धेरत्र [illegible] तत्र दृश्यते-भावस्येति। भावस्य हि द्रव्यान्यत्वे [illegible] [illegible] तत्र न [illegible] [illegible] तथा [illegible] [illegible] भावस्य [illegible] [illegible]
25 साध्यत्वमिति। ययोरपि भिन्ना गमनमपि [illegible] तयोरैक्यमाह-भावगमनयोरिति [illegible] साध्यैकदेश इति भावः। गन्तुरैकत्वस्य गमनस्य च विशेषत्वात् तयोश्च त्रैकाल्यात्रैकाल्यत्वेऽपि भेदः सिद्ध एवेति तथैवत्वेन द्रव्यभावयोरन्यत्वं साध्यत इत्याशयेन व्याचष्टे-देवदत्तगमनयोरिति। सामान्यविशेषयोरन्यत्वे दृष्टान्तमाह-युगपदिति युगपत्त्वं सं तत्सामान्यं [illegible] सामान्यम् अयुगपत्त्वो [illegible] क्रमभावी विशेषः तयोरन्यत्वेऽपि [illegible] तथा [illegible] [illegible] भाव तदेव-युगपदयुगपत्त्वस्थलपटवत् इव। [illegible]
30 [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]-ननूक्तमिति। व्याचष्टे-युगपदिति [illegible] न द्रव्यार्थभागे न [illegible] इति भाव। द्रव्यार्थभागे दर्शयति-आत्मादीति। तत्रैव भेदं दर्शयति-प्रत्यात्मैव वेति। [illegible] द्रव्यार्थविशेषत्वे

1 लि. क. दृष्टान्त्या। 2 लि. क. त्रैकाल्या। 3 लि. क. वदत।

सिद्धमैकाल्यायुगपत्त्वं तं द्रव्यार्थस्याभेदत्वादेः द्रव्यस्यैव चाऽयुगपत्त्वो यतः तथा त्रैकाल्यात्रैका-
ल्यवत्त्वम्यानन्यत्वे द्रव्यभावयोः ।

अथ मतं द्रव्यार्थाभेदत्वादस्य नयस्य द्रव्यार्थस्य च नित्यत्वात् कथमिदं प्रागभावप्र-
ध्वंसाभावात्मक त्रैकाल्यम्, पूर्वापरकालतुल्यत्वात् द्रव्यार्थाभ्युपगमात् द्रव्यस्यैव चाऽत्रैका-
ल्याभ्युपगमे भावस्य द्रव्यार्थत्याग इत्यत्रोच्यते, प्रवृत्तिनित्यत्वात् नात्रापि द्रव्यार्थत्यागः, 5
वस्तुनो द्रव्यभवनारम्भकत्वोभयत्वादेव नित्यत्वस्यापि स्थित्वम् तदपि नित्यं यस्मिंस्तत्त्वं न
विहन्यत इत्युक्तत्वात् ।

अथेत्यादि, अथ मतं द्रव्यार्थाभेदत्वादस्य नयस्य द्रव्यार्थस्य च नित्यत्वात् कथमिदं प्रागभाव-
प्रध्वंसाभावात्मकं त्रैकाल्यम्, युज्यत इति वाक्यशेषः, नैवमाभावयुना भवति तद्वर्तमानमित्यु च्यते
तद प्रागभूतम्, पश्चिनष्टमतीतं प्रध्वस्तम्, अभूतं यद्भविष्यति तदपि प्रागभूतमिदानीमभावात्, 10
मृत्पिण्डघटकपालादिदर्शनात् तच पूर्वापरकालतुल्यत्वान्नित्यस्य न युक्तम् न भवतीति नित्यमिति
विरुद्धेः, तस्मात् सिद्धं भावस्य(।) त्रैकाल्यमं द्रव्यार्थाभ्युपगमात्, द्रव्यस्यैव चाऽत्रैकाल्याभ्युपगमे भावस्य
द्रव्यार्थत्याग इत्यत्रोच्यते न दोषः, प्रवृत्तिनित्यत्वात्—नात्रापि द्रव्यार्थत्यागः प्रवृत्तिनित्यत्वात् भवनं प्रवृ
त्तिर्भाव इत्यर्थः, सा च प्रवृत्तिर्नित्या सदा प्रवृत्तेः वस्तुनो भावोऽपि नित्य एवेति न द्रव्यार्थत्यागोऽत्रै
काल्यमिति । इतर आह—कुतो नित्यत्वस्य द्वैतमिति अत्रोच्यते वस्तुनो द्रव्यभवनारम्भकत्वोभयत्वादेव 15

वस्तुनाऽभिन्नेन नित्येन भवितव्यम्, तस्मादनं क्रिया योगमयपि नित्यमेवेति कथं क्रियाप्रक्रियात्वं नित्यस्य द्रव्यवत्
प्रकारवत्त्वान्यासम्भवाभिप्रायाद्रुते—अथ मतमिति । प्रागभावेति विद्यमानवर्तमानप्रतियोगिसमयत्वं भूतत्वं वर्तमानप्राग-
भावप्रतियोगिसमयत्वं भविष्यत्त्वम्, प्रारब्धापरिसमाप्तक्रियाविशिष्टत्वमयत्वं वर्तमानत्वम्, इमानि च नित्यप्रतिपत्तिरूपाया क्रियायां
न सम्भवन्ति यथा पर्वताः तिष्ठन्ति नद्यः स्यन्दन्ति स्थितो सर्वदा प्रवृत्तमिति भावः । प्रकृतार्थं व्याचष्टे—यद्भावा-
दिति यत्पूर्वमविद्यमानं इदानीं भवति तद्वर्तमानमित्युच्यते यतो हि प्रथममविद्यमानं इदानीं भवतीति वर्तमानं स इति 20
यद्विनष्टं प्रध्वस्तं तदतीतं यथा घटस्य इदानीमभावात्, यथाभूतं तद्भविष्यति यथा कपालानि तत्राभिदानीमपि नास्ति
एवमादिरभविष्यतोरभावस्तथा तत्तत्प्रतिपत्तिकस्य द्रव्यार्थतो नित्यस्य भावस्य तौ कालौ न भवत इति कथं त्रैकाल्यं युज्यत
इति भावः । एतदेव हेतुपूर्वकमाह—तच्चेति सर्वथा तुल्यत्वेनाऽऽत्मत्वान्नित्यस्यैव न युक्तमिति भावः । नित्यत्वं वर्तमानमि-
त्येति यो न भवतीति—विरोधेन न गतिः यदि नित्यम् न हि क्रियाभावस्य कदाचिदपि भावोऽस्ति तस्मात्क्रिया सेति न त्रैकाल्यं
युज्यत इति भावः । अत्रैकाल्ये हेतुमाह—द्रव्यार्थेति । यदि द्रव्यमेवाऽनित्यत्वं न तु क्रिया तर्हि भावे द्रव्यार्थता कथं भवेत् 25
क्रियाभावमभ्युपगम्याशिङ्काह—द्रव्यस्यैव चेति । समाधत्ते—न दोष इति भावानां प्रतिनियतेन सर्वैव सर्वदाऽनुभव
नित्यत्वात् तत्तत्प्रतिनियतस्वनित्यत्वेऽपि प्रवृत्तिसामान्यस्यैव नित्यत्वात् द्रव्यार्थस्याप्य' आह च 'अभिधानैर्न भिद्यन्ते धातु-
कर्मत्वः क्रिया । एकस्यैवाविशेषस्य प्रवृत्तिः सार्वकालिका ॥' इति प्रवृत्तिः कस्यापि नित्या न हीदं कथितरपि कस्मिंश्चिदस्मिन्
प्रवृत्तेमप्रवृत्तिर्वा वर्तते वा भावत्वेन वर्तितव्यम् अपायेन वा युज्यत इत्युक्तस्य भावे सदा प्रवर्तनात् वस्तुनो भावोऽपि
नित्य एवेति त्रैकाल्यं द्रव्यार्थत्वाऽभेदस्योपपद्यत इति भावः । एवम् कालनित्यता प्रवाहनित्यता चेति द्रव्यमेवाऽनित्यत्वं 30
द्विविधमिति प्रकारद्वयं समर्थयति—कुत इति । क्रियाया कथंचिद्भावपर्यायेऽपि सर्वत्र क्रियाभावमभ्युपगमोऽयुक्तः यस्य
त्वरे वस्तुपरम्परात् एवमैकाल्यपरपरामर्शपर्याये तथा नित्यत्वमेवेति द्विविधं नित्यत्वमेवापत्तेन समाधत्ते—वस्तुन इति ।

---

१ क xx । २ लि क. ...म्भवात् । ३ भि. ...रूपव । ४ लि क प्रवृत्तिनित्यत्व ।

नित्यत्वस्यापि स्थितं सिद्धम्, यथा भाष्यकारैर्भणितं 'नहि वयमितरानि यावत् तदपि हि नित्यं यस्मिंस्तत्त्वं न विहन्यते' (महाभा० अ० १ पा० १ आ० १) इत्युक्तत्वात् ।

इदानीमपि तदिदं प्रदर्श्यते—

कूटस्थस्य द्रव्यस्य सर्वप्रभेदनिर्भेदस्य बीजभूतस्य गमनस्थानादिसर्वात्मकत्वेनावस्थित-
५ स्यानन्तमात्मानं पर्यनुभवतस्तदर्थानुभवनात्मत्वादेव द्रव्यकौटस्थ्यं युज्यते, इतरस्य तु तथा-
तथाऽभिव्यज्यमानस्य सततप्रवर्तनात्मनो भावस्याकौटस्थ्यं सततसंप्रवृत्तिरूपं नित्यत्वम् ।

कूटस्थस्येत्यादि, द्रव्यं हि कूटस्थं नित्यं पूर्वापरकालानुस्यूतत्वात् यस्य कूटस्थस्य द्रव्यस्य सर्वप्रभे-
दनिर्भेदस्य बीजभूतस्य गमनस्थानादिसर्वात्मकत्वेनावस्थितस्यानन्तमात्मानं पर्यनुभवतस्तदर्थानुभवना-
त्मत्वादेव द्रव्यकौटस्थ्यं युज्यते, इतरस्य तु भावस्य तथातथाऽभिव्यज्यमानस्य पर्यनुभूयमानस्य क्रमेण
10 युगपद्वा सततप्रवर्तनात्मनो भावस्य प्रवृत्तेरकौटस्थ्यं सततसंप्रवृत्तिरूपं—अव्यवच्छिन्नप्रवर्तनात्मकं नित्य-
त्वमिति नित्यस्यापि स्थितमिति तात्पर्यम् ।

अत एव भूताभूतभावत्वं द्रव्यादेर्धर्म्यन्तरस्य प्रवृत्तेरन्यत्वकारि, भूताभूता क्रिया, द्रव्यं
भवदेव व्यतिक्रान्तस्यव्यतिक्रान्तिभावत्वात् यथा कृतः कटो देवदत्तेन, कृतः कर्मणा विभागः
तत्र विभागः कटकर्तृसंयोजनात्मकस्य कर्मण ईप्सिततमत्वात् कर्म, चलनेन देशान्तरं प्रापयित्वा
15 क्रियत इति सा व्यतिक्रान्तेति, विभागः कर्म च न व्यतिक्रान्तः शब्दार्थस्य पिण्डितत्वात्, न
च व्यतिक्रमो निर्निमित्तो भवितुमर्हतीति, दृष्टश्च वर्तमानयोः कर्मविभागयोर्द्रव्ययोरव्यतिक्रमे
कारणस्य व्यतिक्रमः ।

अत एवेत्यादि एतस्मादेव नित्यत्वाद्वितादन्यदिदमपि कार्यं भूताभूतभावत्वं द्रव्यादेर्धर्म्यन्त-
रस्य प्रवृत्तेरन्यत्वकारि—द्रव्यादन्यो भाव इत्यस्यार्थस्य साधनं—द्रव्यविलक्षणो भाव इत्यत्र हेतुरित्यर्थः,
20 भूताभूता क्रिया द्रव्यं भवदेव—भूता वर्तमाना च क्रिया द्रव्यं वर्तत एवेत्यर्थः, अथ वा भूतं द्रव्यममूर्तं

तथैव महाभाष्ये [illegible] भावयति—यथा भावितिति । महाभाष्ये मुख्यम् अथवा येनैव [illegible] तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते' इति, तत्परिकल्प्य
नाशेऽपि [illegible] न [illegible] इति भावः । अथोभयमपि नित्यत्वं दर्शयति—कूटस्थस्येति ।
25 द्रव्यं दीप्ति यथा हि [illegible] एव [illegible] भवति, [illegible] एव [illegible] भवति, [illegible] एव [illegible] भवति, न एव
च [illegible] भवति [illegible] एव [illegible] भवन्ति [illegible] च [illegible] भवन्ति तत्र [illegible] बीजमेव
[illegible] प्रभेदमनुभवति, [illegible] स्थिति [illegible] इति [illegible]
[illegible] इति [illegible] भावः । [illegible] च [illegible]
[illegible]
30 इतरस्य स्थितिः । अतश्च [illegible] तत एव [illegible] भूताऽपि अभूतापि [illegible] भावो [illegible]
[illegible] हेतुं [illegible]—अत एवेति । तत्पाठे—एतस्मादेवेति । [illegible]
[illegible] नित्यत्वात् न तु [illegible] नित्ये द्रव्ये [illegible]
भूतेति । यथासंख्यमिति, [illegible] वर्तमानत्वमित्यर्थः । द्रव्यक्रिया

करणं सिद्धं गतश्च यथासंख्यं व्यतिक्रान्ताव्यतिक्रान्तविभागकर्तृक्रिया क्रिया द्रव्यभावः यद्यथा कृतः कटो देवदत्तेन, देवदत्तः कटकरणकाले करणोपरमे च कटस्यैकरूप एव, क्रिया तु वीरणसंयोगावस्थाया-मव्यतिक्रान्ता कटनिर्वृत्त्युत्तरावस्थायां व्यतिक्रान्ता, तथा कृतः कर्मणा विभाग इति द्वितीयमुदाहरणम् कर्तृकर्मसमवायित्वात् क्रियायाः चैविमिरिवत् वैयाकरणसिद्धान्तेन तु 'कर्तुरीप्सिततमं कर्म' (पा० अ० १ पा० ४ सू ४९) क्रियैव तु वैशेषिकस्य, शुद्धाविशेषेण विभागहेतुः क्रिया विभागश्च　5
सम्यक्समुपरमात् द्रव्यचरमस्थित इति विवक्षितस्य विभागः कटकर्तुरसमासमकस्य कर्मण ईप्सिततम-त्वात् कर्म, येनानेन द्रव्यं देशान्तरं प्रापयित्वा क्रियत इति सा क्रिया व्यतिक्रामति विभागं कर्म च न व्यतिक्रामति, सम्प्रार्थस्य पिण्डितत्वात्—नामस्थापितोऽर्थः । न च व्यतिक्रमो निर्निमित्तो भवितुमर्हति, द्वयम वर्तमानयोः कर्मविभागयोर्द्रव्ययोरव्यतिक्रमे करणस्य क्रियायाः विभागविषयस्य व्यतिक्रमः ।

न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद्भवतो विरोधात् तस्मादेतदनुमीयते—देवदत्ते　10
द्रव्ये कटस्य कर्तरि कर्मणि वा कर्तरि चलने वीरणानां कटे वा कर्मणि करणलक्षणया प्रवृत्त्या तदतद्भवनस्वरूपया द्विरूपतया भवितव्यमविच्छेदेन ।

(नचेति) न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद्भवतो विरोधात् प्रमाणान्तरापेक्षामन्तरेण,

---

योर्व्यतिक्रान्ताव्यतिक्रान्तत्वे दर्शयति—तद्यथेति कटोदाहरणे वीरणसंयोजनादिक्रिया देवदत्तगता भाव्या । कर्तृकर्मभवपक्ष-क्रियया निदर्शनमाह—कृतः कर्मणेति । चविमिरिवदिति [illegible] कर्तृसमवायित्वम्　15
[illegible] कर्तृसमवायित्वे द्वितीयमुदाहरणमाह कर्मभूतद्रव्यसमवायित्वम्, एवमेव कृतः कर्मणा विभाग इत्यत्रापि [illegible] कर्तृभूतकर्मगता विभजनक्रिया कर्मभूतविभागगता विज्ञेया । विभागस्य व्याकरणसिद्धान्तेन कर्मत्वं दर्शयति—वैयाकरणेति । कर्तुरीप्सिततमं कर्मेत्यस्य कर्तुः क्रियया [illegible] प्रकारेणेप्सितोऽर्थः कर्म [illegible] क्रियाया [illegible] कर्मेति यावत्, तत्र कर्म [illegible] द्रव्यं वा भवतु क्रिया वा न तत्राग्रहः 'क्रिया हि नाम लोके कर्मेत्युपचरन्ति यां क्रियां करिष्यति किं कर्म करिष्यतीति तथा क्रियापि　20
क्रियेप्सिततमा भवतीति' महाभाष्ये प्रोक्तत्वादिति । वैशेषिकमते तु क्रियैव कर्मेत्युच्यते द्रव्यगुणकर्मेषु [illegible] कर्मपदेनोत्क्षेपणा-दिक्रिया एव [illegible]—क्रियैव [illegible] । अस्य कर्मपदेन [illegible] दर्शयति—शुद्धाविशेषेणेति विभागस्य हेतुभूतं तदेवात्र कर्मेत्युच्यते तथाविशेषेण क्रियाऽपि विभागोऽपि भवति [illegible] क्रियात्वाविशेषेण [illegible] द्रव्यसमवायित्वात् [illegible] भावो द्रव्यवत् [illegible] इति [illegible] भावः । कृतः कर्मणा विभाग इत्यत्र विभागक्रियाया कर्मत्वं [illegible] विभागस्य [illegible] व्यतिक्रान्ताव्यतिक्रान्तत्वं प्रदर्शयति—विवक्षितस्य विभाग इति　25
[illegible] कटकर्तुः [illegible] कर्म [illegible] ईप्सिततमो विभागः तत्कर्म भवति स च विभागः [illegible] [illegible] द्रव्यं देशान्तरं प्रापयित्वा क्रियत इति [illegible] क्रिया व्यतिक्रामति [illegible] [illegible] कर्मभूता द्रव्याश्रयत्वा क्रिया न व्यतिक्रामतीति भावः । कर्मविभागयोरव्यतिक्रमे [illegible] न प्रमाणं दर्शयति—न च व्यतिक्रम इति द्रव्याश्रित क्रियाया [illegible] [illegible] [illegible] क्रियायाश्च व्यतिक्रमत्वं युक्तमेव [illegible] न तथा व्यतिक्रमो द्रव्यासमानकर्मविभागयोरव्यतिक्रमे, [illegible] भावः ।　30
[illegible] कर्मैव [illegible] व्यतिक्रमाव्यतिक्रमौ [illegible] प्रमाणान्तरेण न [illegible], तस्मात् कर्मविभागप्रतिपत्त्यर्थं [illegible]—न चैकस्मिन्निति तथा च कर्मणि करणस्य व्यतिक्रमे कर्म मूर्तं भवति [illegible], [illegible] [illegible] इति तत्र करणं [illegible] भवतीति भावः । एतदेव विवृणोति—न चैकस्मिन् व्यति-

---

१ सि क. इति क्रिया। २ सि क. चविमिरिवत्। ३ क ×× । ४ क. व्यतिक्रमाव्यतिक्रमे। ५ सि। क. न निमित्तो।

तस्मादेतदनुमीयते यथा देवदत्ते द्रव्ये कस्य कर्तरि कर्मणि वा कर्तरि पचने वीरणानां कटे वा कर्मणि करणसम्बन्धस्य प्रवृत्त्या भवितव्यमविच्छेदेन, सा च प्रवृत्तिः क्रिया तदवकूलनस्वरूपा—तस्मिन् द्रव्येऽस्मिन्न करणे भवनमसत्याः प्रवृत्तेः स्वरूप तथा च [व्यतिक्रमा] व्यतिक्रमविभागतया द्विरूपतयाऽर्धद्वयमव्यवच्छिन्न[ा]कृष्टतया प्रवृत्तिभवनारम्भकया भवितव्यमिति ।

5 यथा देशान्तरसंयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम्, तयोः तत्कारणस्य च कर्मणो यावद्द्रव्यभावाभावात् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः गच्छति देवदत्त इति, व्यतिलंघितगमनश्च गत इत्युच्यते, तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवतीति क्रिया सिद्ध्यति अतो भिन्नं स्वतन्त्रत्वात्, यदि स्वतन्त्रस्याश्रयो न स्यात् कर्मेति न स्यात्, क्रियमाणाद्धि तत्कर्म करणव्यतिक्रमे च कृतमिति न स्यात्, तथाभवद्वा स्वसम्बन्ध-
10 व्यतिक्रममन्तरेण कृतमित्येतं व्यपदेशं न जनयेत् करणसम्बन्धाभावात्, आकाशादिवत् तथा च तन्मयकर्मसत्त्वात् करणसम्बन्धाच्च सदसत्कारणमिति भिन्नं स्यात्, सत्कारणवनित्यमिति नित्यलक्षणयोगात् ।

यथा [देशान्त]रसंयोगेत्यादि, इदमधुना गन्तृगमनलक्षणयोर्भिन्नपदार्थाम्वि कणोक्त मागुक्तकणादानभ्युपगमे दोषाभिधित्सयोच्यते, 'संयोगविभागाः [च] कर्मणाम्'
15 (वैशे० अ० १ आ० १ सू० १०) कार्य सामान्यम्, 'गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्' (वैशे० अ० १ आ० १ सू० २०) कार्य सामान्यमिति वचनात् देशान्तरसंयोग द्रव्यस्य देशान्तरविभागश्च गमनकर्माऽऽरभते गुरुत्वादिकार्यं चोत्क्षेपणं कर्म तस्मात् संयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम् तयोः संयोगविभागयोः तत्कारणस्य कर्मणो यावद्द्रव्यभावाभावात्, वैशेषिकमतवत् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः, तत्सम्बन्धमन्तरेण गमनं [न] भवति गच्छति देवदत्त

---

20 कर्मेति । देवदत्त इति देवदत्तेन कट इव इत्थं देवदत्ते द्रव्ये कर्तरि कटे कर्मणि [illegible] विभागः [illegible] कर्तरि च करणेन भवितव्यम्, तत्र [illegible] द्रव्ये [illegible] व्यतिक्रमात्मविभाग[illegible] [illegible] भाव । [illegible] तत्र विभवं [illegible]—यथेति । [illegible] [illegible] [illegible]—देशान्तरेति । अत इति, [illegible] [illegible] [illegible]—[illegible] [illegible] [illegible]
25 [illegible] [illegible], [illegible] भाव । [illegible] [illegible], क्रिया तु [illegible] भाति । [illegible]—इदमधुनेति । संयोगेति [illegible] [illegible] [illegible] [illegible] । गुरुत्वेति [illegible] [illegible] [illegible] । एवं [illegible] [illegible]
30 [illegible]—देशान्तरेति । [illegible] तयोरिति [illegible] न [illegible] [illegible] [illegible]

---

१ मि [illegible] । २ डि क. [illegible] । ३ मि क. [illegible] ।

इति हि गमनसम्बन्धात् दृष्टम्, व्यतिक्रमितगमनश्च गत इत्युच्यते, तस्मात्तद्व्यतिक्रममन्तरेण गतमिति न भवति, एष विधिः कर्मविशेषे गमने दृष्टः, तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवतीति क्रिया सिद्ध्यति यतो भिन्न स्वतत्त्वात्—कर्मत्वात् द्रव्याच्च [यदि] कर्मत्वस्य स्वतत्त्वस्याश्रयो न स्यात् कर्मेति न स्यात्, क्रियमाणाद्धि तत् कर्म करणे सति, करणव्यतिक्रमे च कृतमिति स्यात्, कर्मणि तु भिन्ने द्रव्यात् स्वतत्त्वाच्च स्यादिति, तथा भवदित्यादिना करणं भवदपि तत्सम्बन्धव्यतिक्रममन्तरेण कृतमित्येत 5 द्व्यपदेशं न लभेत् तं च दृष्टः, किं कारणं न स्यादिति चेत् करणसम्बन्धाभावात्, किमिव ? आकाशादिवत्, अतः किं स्यात् ? तथा च तद्रूपकर्मसत्त्वात् करणासम्बन्धाच्च सदसत्का[रण]मिति नित्यं स्यात् नित्यलक्षणयोगात्, किं नित्यलक्षणमिति चेदुच्यते 'सदकारणवन्नित्यम्' (वैशे० अ० ४ आ० १ सू० १) इति नित्यलक्षणं वैशेषिकमतेनेति, एवं तावत् कर्म गमनादि करण सम्बन्धानुवर्तीत्युपपादितम् । 10

यथा च कर्म क्रियया विना न भवति तथा करणमपि भवनव्यक्तिमन्तरेण नैव भवेत् तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात् ततश्च प्रागादिनिर्विशेषणः नास्त्य-भाव इत्यविशेषेणैवात्यन्ताभाव एव स्यात्, न भवेदेव सर्वम्, खपुष्पवत् असत्कारणत्वाद्वा अभूतभवनसम्बन्धव्यतिक्रमत्वात् ।

यथा च कर्मेत्यादि, यथा च गमनादिकर्म क्रियया विना न भवति तत्क्रियाविना तथा 15 करणमपि भवनव्यक्तिमन्तरेण—भवनक्रियाविर्भावेन विना नैव भवेत्—न भवितुमर्हतीत्यर्थः, तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात्—तत्सम्बन्धे भवतीति भवति, तत्सम्बन्धव्यतिक्रमे च भूतमिति पूर्वपूर्वोत्तरोत्तरकार्यकारणभावेनेति क्रियासम्बन्धप्रश्नं च मर्शयति, ततश्च प्रागादि

यदा द्रव्ये वस्तुदेशे तदैव देवदत्तो गच्छतीत्युच्यते तदुपरमे च गत इत्युच्यते तस्मात् क्रियायाः [illegible] भवति [illegible] इति भावः । एवं गमनमपि करणसम्बन्धेन भवतीत्याह—तथेति तथा च करणं क्रियातो द्रव्याच्च भिन्न 20 मिति भावः । क्रियाऽऽश्रुयमाणं हि कर्म तस्मात् क्रिया कर्मलक्षणम् तदेव कर्मत्वमुच्यते ततश्च यदि कर्म कर्मत्वस्याश्रयो न स्यात् कर्मैव [illegible] कर्मैव न स्यात् [illegible] एवञ्च कर्म क्रियासम्बन्धात् भवति तद्व्यतिक्रमे च कृतमिति भवतीति क्रियातो द्रव्याच्च कर्म भिन्नमित्याह—यदीति कर्मत्वस्येति । कर्मणि भवत् करणं तत्सम्बन्धेन तत्र कर्मव्यवहारं व्यतिक्रमेण च कृतमिति व्यवहारं जनयतीत्याह—करणं भवदपीति । आकाशादौ करणसम्बन्धाभावात् कृतमिति व्यपदेशो न भवति एवं तत्सम्बन्धाभावे कर्मणोऽपि कृतमिति व्यवहारो न स्यादित्याह—आकाशादिवदिति । तथा चापत्तिमाह—तथा 25 चेति करणसम्बन्धाभाव इत्यर्थं क्रियाजन्यकर्मणः सद्रूपत्वात् पुनः करणसम्बन्धाभावात् तस्य सदकारणवत्त्वमिति कर्मणः [illegible] नित्यत्वं स्यादिति भावः । यथ कर्मैव क्रियया विना [illegible] अपि भवनमन्तरेण [illegible] तस्माच्च भवनसम्बन्धव्यतिक्रमे [illegible] भवति भूतमिति व्यपदेशं लभते इति समर्थयति—यथा चेति [illegible] इति भावः । एतदेव स्पष्टीकरोति—यथा च गमनादीति । किं करोति इति प्रश्ने गच्छतीति गमनं करोतीति प्रतिवचनात् गमनक्रियायामपि करणं यथा करोतेः तथा किं करोतीति प्रश्ने न करोति 30 क्रियाया इति [illegible] प्रतिवचनाच्च करोतेर्भवन क्रियासामान्यविषयत्वात् करणस्यापि भवनं विवक्षितमिति भावः । पूर्वपूर्वेति पूर्वं कर्म कारणं कार्यं च परं कारणमिति

---

१ सि. क. गच्छतो । २ सि. क. न स्यात् । ३ सि. क. तत्र दृष्टः ।

निर्विशेषत्वं इत्यादि भवनसम्बन्धे तदूव्यतिक्रमे चासति प्राक्पश्चाच्चेतरेतरसंयोगाद्यभावाभावात् अभावभेदरहितो नास्त्यभाव इत्यनर्थान्तरमितरविशेषैकात्म्यावाप एव स्यात्, भवनसम्बन्धव्यति क्रमाभावात्, खपुष्पवदिति, यथा खपुष्प भवनसम्बन्धाभावात् तद्व्यतिक्रमाभावाच्च न भवेदेवं सर्वं घटादि स्यादिति, असत्कारणत्वाच्च—यदा हि वस्तुनो भवनकारणं योऽसौ कारणसम्बन्धो भवन-
5 सम्बन्धश्च स नास्ति तद्व्यतिक्रमो चेत्यसत्कारणमभावकारणत्वात्सम्भवाभाव एव स्यात् खपुष्पवत् सर्वं घटादि तदुपसंहारे हेतुमाह—अभूतभवनसम्बन्धव्यतिक्रमत्वादिति, गतिस्थितिक्रियादिकरणभवनसम्बन्ध-व्यतिक्रमसद्भावात् गच्छति तिष्ठति करोति भवति गतस्थितकृतभूतभावत्वात्सम्यक् हेतुरयमस्तु भवतु च लभ्यते [न] चाभ्येतीति।

साम्प्रतं भवनस्य तत्तत्सम्भवतस्य [न] व्यतिक्रम इत्यत्रोच्यते—

10 व्यतिक्रमश्च भवति गुणकर्मादौ कटविभागप्रविभजनभूततायां, गुणं कटो भवति गमनकर्म विभागो भवति संयोगश्चान्येनेति कथं गुण कटो भवति, कर्म विभागो भवतीत्येत-दुच्यते? ननूक्तं द्रव्यं क्रिया च द्रव्यमेव सर्वमिदमिति, तस्य भूतता व्यतिक्रमः।

(व्यतिक्रमश्चेति) व्यतिक्रमश्च गुणकर्मादौ—गुणकटस्यादीनां कर्म गुणकर्म, आदिग्रहणात्

नहि पश्चात्क्रिया कर्तारं कर्म करणादि विना भवतीति भावः। भवनसम्बन्धानुपपत्तेरिति भवनसम्बन्धव्यतिक्रमाच कर्म भूतमिति
15 व्यपदिश्यते यत्र भवनसम्बन्धात्, एवं प्रागभावः भवनसम्बन्धे भावः भवनसम्बन्धव्यतिक्रमे च प्रध्वंसाभावो भवति अत एव च क्रिया भूता भवति भविष्यतीति वासम्बन्धसम्बन्धव्यपदेशं लभते एवञ्च भवनसम्बन्धे यदि क्रियाया योगस्ते तर्हि भावस्वरूपत्वप्रमाण एव प्रसज्यते योऽन्यभावः नैरन्तर्यसम्बन्धाभाव एव एव न तु प्रागभावादिरपः भवनसम्बन्ध यदेव तत्सम्बन्धस्य प्रागपश्चाद्भावपेक्षया तत्प्रागादिव्यपदेशमाह भवनसम्बन्ध इति अभावभेदरहित—अभावस्य भाग्यरूपैः रहितः नैरन्तर्यसम्बन्धाभाव एक एव सामिलार्थ। एवञ्च भावस्वैकात्म्यात् सर्वं घटादि खपुष्पवत् भवेदित्याह
20 यथा खपुष्पमिति। हेत्वन्तरमाह—असत्कारणत्वाच्चेति यत कारणसम्बन्धाभावात्, तदूव्यतिक्रमो हि भवनसम्बन्धः करणसम्बन्धव्यतिक्रमश्च कारणम् नहि क्रियाया भवनस्य वा प्रागभावादिव्यपदेशकारणभूतसम्बन्धयोगाभावे द्रव्यं नाम किञ्चिदपि तस्मात् कारणाभावात् सर्वं घटादि न भवेदेव खपुष्पमिति भावः। अथान्ते हेतुमुपसंहरति—अभूतेति। वस्तुनः करण-भवनसम्बन्धव्यतिक्रमो नित्यसंसृष्टौ—गतिस्थितिक्रियादीति, कथ्यते गच्छति तिष्ठति करोतीति करणभावे भवतीति भवनस्य भावे यत स्थितः कृत इति करणसम्बन्धव्यतिक्रमे भूत इति भवनसम्बन्धव्यतिक्रमे एक एव हेतुत्वे भवतुलभ्यते,
25 तत्र तत्सम्बन्धव्यतिक्रमाभावे हेतुरतोऽसत्त्व सर्वोऽपीति यदेवं तदस्तु यथावतो भावः प्रत्यक्षप्य भवति भवति भवति भवति भवनस्वभावेति भवतीत्या पर्यायानभिधानात् आत्मभवनकाले हि भवति आत्मभवनेन स्वरूपानि धारणसूत्रं चतिरि प्रत्ययेन रूपम्, तच्च नैरन्तर्येण तथा भावेन वस्तुनि परिच्छिन्नत्वेऽपि चात्मकारणत्वादपि तत्र तत्स्वेन तदात्मत्वं रूपादीनाम् यथा घटे वृत्ते रूपरसादेः प्रागभावादि रूपान्तरत्वम्, एवञ्च भवति रूपादिरस कर्तृत्वेन परिच्छिन्न तत्कर्तृका करोति चेत् पश्चात्क्रिया भवतीतिक्रियाः कर्मणि भवन्तीति वा चेत् कथं तत्सम्बन्धाभावः
30 उभयस्य स्थितिविशिष्टभावस्य स्थित्वा भवनभवनसंयोगव्यवसायात् परिणामानुरूपतमात्मस्वभावानां भवनेऽपि भव-त्वपत्तम्, तदेवैकविभागपेक्षया च भवनक्रियया अपि भूतमित्यमिति। ननु भवनं हि कार्यमुत्तिरूपं तस्य कथं व्यति-क्रम इत्याशङ्क्य—व्यतिक्रमश्चेति प्रतिपक्षभावभावनयाश्रयेण तत्तत्प्रतिपक्षस्वभावैर्भावितेऽभावरूपेण स्थितिसम्पन्नताया अवस्थानेन गुणादिसंभवव्यतिक्रमेण व्यापृतत्वमावसंज्ञानात् गुणादिभावस्वभावो व्यतिक्रम एव भवतीति भावप्रतिपत्तिरिति भाव। आदिग्रहणादिति कर्मादिविभागादिपरिग्रहः विभागादिग्रहणप्रविभक्तत्वात् चविभागमेव-

१ सि. क. 'मिश्रितम्भी' । २ सि. क. 'कात्सर्विते' । ३ सि. क. भावु भावम । ४ सि. क. काय ।

संयोगः यथार्थस्य कटविभागादिभवनभूतत्वात्—अत्राप्यादिग्रहणात् पटविभागसंयोगादयो गृहीताः, भवनस्य भूतधातोरेवाव्ययस्य भवति व्यतिक्रमः, तृणं कटो भवति, गमनकर्म विभागो भवति संयोगश्चान्येन, साम्प्रतं कथं तृणं कटो भवति कर्म विभागो भवतीत्येतदुच्यते इति, अत्रापि ननूक्तं द्रव्यं क्रिया च द्रव्यमेव सर्वमिदमिति, संयोगादिसर्वगुणक्रियात्वप्रतिपादनात्, तस्य भवनस्य भूतता व्यतिक्रम एव । 5

एवञ्च भावक्रियाद्वयोऽयं कारकाणां कर्मादिभावः न नियतरूपः, न हि किञ्चिज्जाति विशेषयोगात् नियतम्, किं तर्ह्यनियतशक्तिविषयम् तदेव हि द्रव्यमन्यया क्रियया कर्म भवति, अन्यया करणमन्ययाऽधिकरणमित्यादि, तस्मात् सर्वप्रभेदनिर्भेदं बीजं वस्तु द्रव्यं तत्त्वम्, तद्भेदभिन्नमिदमन्यत्किञ्चित् ।

एवञ्चेत्यादि, एवंकृत्वा भावक्रियाद्वयः—भाव एव क्रिया, द्रव्यं भावः स एव च क्रिया, 10 द्रव्यस्य वा क्रिया तदाश्रयः द्रव्यभवनाद्वयोऽयं कारकाणां कर्मादिभावः कर्मकरणादिभावः न नियत रूपः विविधक्रियाभवनसम्बन्धाद्भवति देवदत्तः पचत्योदनं काष्ठैः स्थाल्याम्, ओदनो भवति, काष्ठानि ज्वलन्ति—संधुक्षन्ति स्थाली धारयति अधिश्रित[ा] इत्येवमादिदर्शनात्, न हि किञ्चिज्जातिविशेषयोगात् गोत्वादियोगादिवत् कर्मत्वकरणत्वाधिकरणत्वादियोगात् कर्मैवेदं करणमेवाधिकरणमेव नियतं नाप्यत्रापि

एवं भावः यथार्थस्यमित्यस्य तृणकर्मसंयोगाभ्यां कटविभागादिभवनम् तन्तुकर्मसंयोगाभ्यां पटविभागसंयोगादिभवन- 15 मित्यर्थः एवञ्च तृणसंयोगात् कटो भवति तृणकर्मणा कटविभागः तन्तुसंयोगात् पटः तन्तुकर्मणा पटविभागः तस्मात् कैवल्यादसंयोगश्चेति व्यतिक्रमते तृणादौ प्रकृतिप्रत्ययो व्यतिक्रान्त इदानीं व्यत्ययेन तस्य भवनमिति भावः । अथ द्रव्यमिदं द्रव्यं कर्म कटो भवति तदभावे वा कर्म कर्म विभागो भवतीत्याशङ्क्य भावाभावरूपतानिमित्तत्वात् सर्वत्र भेदाभेदत्वादीनामनुगमात् क्रियास्वरूपं यथादिभ्यस्त्वादीनां रूपान्तरस्वभावानुगमश्च दर्शितत्वादिति समाधत्ते- प्यान्यत्वमित्यादिना । द्रव्यतत्त्वस्यान्वयवशसामर्थ्यादैक्येनैव द्रव्यं नानात्वं भवतीत्याह—एवञ्चेति । भावक्रियाद्वय 20 स्यास्य व्याख्यानमेवाह—भाव एव क्रियेति अनेन सामान्यविशेषभिन्नयोरभेदः दर्शितः, द्रव्यं भाव इति अनेन द्रव्यक्रियोरभेदः दर्शितम्, द्रव्यस्य वेति अनेन द्रव्यक्रियोरन्यत्वं दर्शितम् । तात्पर्यमाह—द्रव्यभवनेति द्रव्याणि क्रियाभवनलक्षणत्वाविशेष कारकं साधनमिति चोच्यते विवक्षया द्रव्यस्य कारकता क्रियाभवनलक्षणानुपपत्त्या प्रत्ययाभिधानेन तत्तत् साधनमिति वचनेनैव साधनम्, तत्र कर्तृकर्मणोः आश्रयसमवेतक्रियाजनकत्वा करणादीनामाश्रयान्तरसमवेतक्रियाजनकत्वा किञ्च द्रव्यस्य कारकत्वे तत्तत्कारकत्वेन सर्वत्रैव क्रियानुपपत्तिः इत्यत्र न च यदि यस्य कर्तृत्वं तस्यैव कर्त्रे न कर्म नियमेनापत्तौ कर्मत्वेऽपि- 25 त्यम् सर्वस्य च सर्वकारकत्वे कारकनियमाभावप्रसङ्गः तथानियमाभावे क्रियानियमाभावोपपत्तिः अनियतत्वादिद्रव्यस्यापि द्रव्यो व्यवस्थानमिति व्यवहारः प्रतिक्षणविभागेऽभेदस्यापि सत्त्वात् कस्मात् करोतीत्यादौ च कर्त्रेऽपि द्रव्यस्य भावतया तत्तत्कारकत्वेन इति भावः । देवदत्त इति देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यत्रापि विशेषेण पचतेर्धातोः सर्वकारकव्या- पारसमुदायाभिधायकत्वात् तत्तद्व्यापाराभिधायी धातुरिति दर्शितम् । अथ कर्मादिभूतानामपि व्यापारविशेषेषु कर्तृत्वं प्रदर्शयति— ओदनो भवतीति अत्र कर्मैव कर्ता ओदनः काष्ठानि ज्वलन्ति काष्ठानि पचिक्रियाकरणान्यपि स्वव्यापारे स्वतन्त्राणि कर्तॄणि 30 स्युः कर्तृत्वे, स्थाली धारयति, पचिक्रियाया अधिकरणमपि स्थाली स्वव्यापारे धारणे स्वतन्त्रत्वात् कर्त्री इति कर्मादीनि न नियत- रूपाणीति भावः । गोत्वादिजात्यादिवत् कर्मत्वादीनि न प्रतिनियतजातिरूपाणि तेन कर्मत्वादौ नियमाभावो न भवतीत्याह- यतेनाह—न हि किञ्चिदिति । ननु कर्मत्वादयो न जातिरूपास्तर्हि किमात्मका इत्यत्राह—अनियतेति क्रियाभवनलक्षणत्वाविशेष

१ क अमोघस्य इत्यधिकं दृश्यते ।

भवतीति, किन्तर्हि ? अनियतशक्तिविषयम् शक्तीनां कारकत्वात्, तदेव हि द्रव्यमन्यया क्रियया प्रमाणं मेयमिति मेयमपि कर्म भवति, अन्यथा करणं नेत्रेण पश्यतीति, अन्यथाऽधिकरणं नेत्रे अञ्जनं तिष्ठतीति, तस्मात् सर्वप्रमेयनिर्भेदं बीजं वस्तु द्रव्यं तत्त्वं तद्विभजनव्यक्तिः क्रिया ।

यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं स्यात् ततस्तया विना नैव स्यात् तत्त्वात्तदात्मत्वात्त-
5 त्स्वरूपत्वात् न तदेन विना भवति देवदत्तवाग्यादिवत्, घटरूपादिवत्, दृष्टैवतु गमनादि क्रियया विनापि देवदत्तस्य वस्तु, अन्तरेणापि तु क्रियां भवत्येव वस्तु दोषादर्शनात् ततोऽन्यत्, तदन्तरेणापि भावात् यद्यदन्तरेणापि भवति तत्ततोऽन्यत्, घटपटवत् ।

यदीत्यादि, एवमभिमतो दोषो यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं आत्मा स्वरूपं स्यात् ततस्तया विना क्रियया नैव वस्तु स्यात्, तत्त्वात्तदात्मत्वात्तत्स्वरूपत्वात्, यद्यत्तत्त्वं आत्मा स्वरूपं
10 वा न तदेन विना भवति देवदत्तवाग्यादिवत्, यथा देवदत्तस्य आत्मभूतोऽवस्थाविशेषाः [illegible] न तेन विना भवन्ति तथैवापि वस्तु क्रियया विना न स्यात्, घटरूपादिवदिति घटस्य रूपादयो युगपद्भाविनस्तेन विना न भवन्ति तथा क्रियया विना वस्तु न स्यादिति विशेषः दृष्टैवतु गमनादि क्रियया विनापि देवदत्तस्य वस्तित्वमनिष्टापादनमेतत्, दोषादर्शनादपि वस्तु भवतीत्येतदर्थसाधनमाह– अन्तरेणापि तु क्रियां भवत्येव वस्तु तेस्य विनाभावे दोषादर्शनात्ततोऽन्यत् क्रियातोऽन्यदस्तित्विति यदि
15 तदन्यम् न केवलं दोषादर्शनादेव, किं तर्हि ? अन्यत्वहेतुरप्यस्तीति, तत आह–तदन्तरेणापि भावात्, यद्यदन्तरेणापि भवति तत्ततोऽन्यत् घटपटवत्, यथा घटः पटमन्तरेण भवन्नन्यः पटश्च घटमन्तरेणापि भवंस्ततोऽन्यः, तथा क्रियामन्तरेणापि भवद्वस्तु ततोऽन्यदिति ।

अतिदर्शनान्तरं विचारान्तरासत्त्वमप्याह—

दृश्यते हि देवदत्ते गच्छति कृषिं करोति यज्ञदत्त इति, अत्र यज्ञदत्तस्य कृषिकरणं
20 गमनं देवदत्तस्यैववस्तुनो द्रव्यपरमार्थः तथा क्रियापि स्यात्, गमनवत्क्रियात्वात् स्थानमपि

[illegible] प्रमेयत्वेऽपि कर्तृविवक्षायां कर्मत्वादि [illegible] इति भावः । [illegible]–तदेव हि द्रव्यमिति । [illegible]–तस्मादिति । [illegible]–यदीति । [illegible] क्रियया विना [illegible]
25 [illegible]–यदि द्रव्यवदिति । [illegible]–यथेति । [illegible] विशेष इति [illegible] इति भावः । अन्तरेणापि तु क्रियामिति [illegible] इति भावः । तया विना भाव इति क्रियया विना [illegible] । [illegible]–तदन्तरेणापीति ।
30 क्रियामन्तरेणापीत्यर्थः । [illegible] दृश्यते हीति [illegible]

१ १ ३ सि० क० दोषदर्श० । २ सि० क० [illegible] । ४ सि० क० [illegible] ।

परमार्थ इति प्रागेव स्थानक्रियया गमनविरोधिन्या यदि देवदत्तोऽवरुद्धः स्यात्तदा तस्य गमनं नैव स्यात्, देवदत्तस्यावरुद्धदेशे यज्ञदत्तस्यवत्, गमनक्रियापरमार्थदेवदत्तस्य वा स्थानं नैव स्यात्कदाचिदपि, गमनेनावरुद्धत्वात्, देवदत्तस्यावरुद्धे यज्ञदत्तस्यवदेवेति यानस्थानयोरभावाद्यज्ञदत्तस्य वृत्त्यवृत्ती स्याताम्, यानाभावाभावात् पूर्ववद्वृत्तेर्यज्ञदत्तवृत्त्यभावः, देवदत्तस्य वा गमनकालेऽपि भावे सततमवृत्तिर्वा स्यादिति, एवं स्थानाभावादपि तथेति । 5

(दृश्यते हीति) दृश्यते हि देवदत्त गच्छति' वृत्तिं करोति यज्ञदत्त इति, अत्र यज्ञदत्तस्य वृत्तिकारणं गमनं देवदत्ताख्यवस्तुनो द्रव्यपरमार्थस्तथा क्रियापि स्यात्, गमनवत्क्रियात्वात् स्थानमपि परमार्थ इति प्रागेव स्थानक्रियया गमनविरोधिन्या यदि देवदत्तोऽवरुद्धः स्यात्तदा तथाऽवरुद्धत्वात् तस्य देवदत्तस्य गमनं नैव स्यात्—कदाचिदपि न गच्छेद्देवदत्त इत्यर्थः, देवदत्त[स्य]ावरुद्धदेशे यज्ञदत्त[स्य]वत्, यथा देवदत्ताख्यं वस्तु देवदत्तस्थेनावरुद्धमिति तद्विरोधिनो यज्ञदत्तस्य स्थानवत्त्वाद्यज्ञदत्तस्य 10 नैव जातु भवति तथा देवदत्ते स्थानेनावरुद्धे गमनं नैव जातु स्यादिति, अथ मा भूद्यज्ञदत्तवृत्तिकारणस्य देवदत्तस्य गमनस्याभाव इति गमनवत्त्व एव देवदत्त इष्यते तथापि गमनक्रियापरमार्थदेवदत्तस्य [वा] स्थानं नैव स्यात्कदाचिदपि, गमनेनावरुद्धत्वाद्देवदत्तस्य, देवदत्तस्यावरुद्धे देवदत्ते यज्ञदत्तस्यवदेव, इतिशब्दो हेत्वर्थे, ततश्च देवोर्यानस्थानयोरभावात्, यानाभावाभावात् पूर्ववद्वृत्तेः—यथा प्राग्गमनोत्पत्तेर्गमनाभावस्याद्वृत्त्यभावः तथा गमनाभावाद्गच्छत्यपि देवदत्ते यज्ञदत्तस्य वृत्त्यभावः, देवदत्तस्य गमनकालेऽपि 15 भावे यथा यज्ञदत्तस्यावृत्तिर्भवत्येव सततमवृत्तिर्वा स्यादिति, एवं स्थानाभावादपि वृत्त्यवृत्ती स्यातामुक्तन्यायेन तथेति—तेन प्रकारेण प्रोक्तोपपत्तिक्रमप्रापिताभावप्रकारेण यानस्थानयोरिति ।

तत्रैव यज्ञदत्तस्य वृत्तिर्देवदत्तस्य गमने सत्येव भवति एकैकस्या द्रव्यद्वयस्थितत्वसंभवात्, तथा च तत्र यज्ञदत्तस्य वृत्तेः कारणं देवदत्तस्य गमनमेव तदन्यतरैव तदवगम्यमानत्, तच्च गमनं यदि देवदत्तस्वरूपमेव तर्हि स्यात्, गमनात् प्राक् देवदत्तस्य स्थितिक्रियापि देवदत्तस्वरूपमेवेति तया क्रियया देवदत्तस्यावरुद्धत्वात् तस्य गमने कदापि न भवेत्, गमनविरोधिन्या 20 स्थितिक्रियया तस्यावरुद्धत्वात्, देवदत्तस्यैवावरुद्धे देवदत्ते यज्ञदत्तस्य तद्विरोधिनोऽवकाशाभाववत् तथा देवदत्तस्य कदाचिद् गमनं कदाचित् स्थितिरिति क्रिया न देवदत्तस्वरूपैवेति भाव । तदुक्तं पूर्वार्धे मर्मेति—अथ यज्ञदत्तस्येति, तथा क्रियापि—गमनवत् क्रियात्वात्गमनमपि देवदत्तस्वरूपं स्यादित्यर्थः । गमनवत् स्थानमपि गमनवत् क्रियेति तदपि देवदत्तस्वरूपमिति प्रथममेव देवदत्ते गमनविरोधिस्थानक्रियाऽवस्थ इति तस्य कदापि गमनं न स्यादित्याह—गमनवदिति । तदुक्तमाह—देवदत्तस्येति । स्थानेन स्थितिक्रियया पूर्वमाप्तेनेत्यर्थः । गमनस्तत्त्व एव यदि देवदत्तस्तदा स्थितिस्तस्य कदापि न भवे- 25 दित्याह—अथ मा भूदिति । तथाऽवरुद्धत्वाद्गमनतत्त्वे देवदत्तस्य स्थितेरभावः स्थितितत्त्वे गमनाभाव इत्युभयाभाव इत्याह—ततश्चेति । देवदत्तस्य यानाभावात् यज्ञदत्तस्य वृत्त्यवृत्ती तावदुपपादयति—यानाभावादिति देवदत्तस्य पूर्ववृत्ते यथा हि तस्य गमनात् पूर्वं वृत्तिरासीत् तथैव गमनकालेऽपि देवदत्तस्य स्थितिक्रियावरुद्धत्वेन देवदत्तस्य गमनाभावाद्यज्ञदत्तस्य वृत्त्यभावः स्यात् देवदत्तस्य गमनकालेऽपि यज्ञदत्तस्य वृत्त्यविरोधेऽपि तर्हि सततं तदवृत्तिरेव स्यात् देवदत्तस्य गमनेऽगमनेऽपि तत्सत्त्वादिति देवदत्तयानाभावाभावयोरविशेषात्तयोर्भवेतामिति भावः । एवं स्थानाभावादपि यज्ञदत्तस्य 30 वृत्त्यवृत्ती भाव्येते इत्याह—एवं स्थानाभावादपीति तथैव देवदत्तस्य स्थानाभावादनुक्रमेण यज्ञदत्तस्य वृत्त्यवृत्ती भाव्येते ।

१ सि क °द्देश । २ सि. क. जातु । ३ सि क °वस्तुनि । ४ सि. क. °मपि । ५ सि क °भावात् । ६ सि. क. °वृत्त्यभावः । ७ सि क °दत्तस्य । ८ सि क. °भावेऽपि ।

तथा गमनात्मकत्वादस्य देवदत्त एवास्य वृत्तिनिमित्तमिति यावद्देवदत्तं वृत्तिप्रसङ्गः, तदात्मत्वात्तत्काळवत्, तस्य गतिपरमार्थस्याभस्थानाच, स्थित्यात्मकत्वाद्वाऽस्य गच्छत्यपि देवदत्ते यज्ञदत्तावृत्तिरेव सदा स्यात्, स्थानकालवत्, एवं तावद्देवदत्तगतिस्थितिविषयमज्ञदत्तवृत्त्यवृत्तिविचारद्वारेण दोषा उक्ताः । इदानीं यज्ञदत्तवृत्त्यवृत्तिविषयोऽपि विचारस्तथैव कर्तव्यः, अत्रापि यदि द्रव्यपरमार्थवदित्यादिग्रन्थो यावद्वृत्त्यवृत्ती यज्ञदत्तशब्दोच्चारणेन यथासम्भवं योज्यः, प्रकारान्तरेण तु यज्ञदत्तवस्तुस्वरूपवद्वृत्त्यवृत्तिक्रिययोः तदव्यतिरिक्तत्वात् देवदत्तगमनस्थानयोरपि तदव्यतिरेकाद्यावद्देवदत्तगमनस्थानञ्च वृत्तिरेवावृत्तिरेव वा स्यात्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत् ।

तथा गमनेत्यादि, गमनस्थानभावाभ्युपगम्यापि दोष उच्यते, तत्र गमने तावद्यथा देवदत्ते गच्छति वृत्तिरस्य तथा तदात्मकत्वाद्यावद्देवदत्तं वृत्तिप्रसङ्गः, यथा देवदत्तगमनकाले यज्ञदत्तस्य वृत्तिर्हेतुर्देवदत्तो गमनात्मकत्वात् तथा यावज्जीवमात्मनो यावदायुर्यज्ञदत्तवृत्तिहेतुरेव स्यात्, गमनात्मकत्वात् तदात्मकत्वमिति, तस्य—देवदत्तस्य गतिपरमार्थत्वादस्थानाभाव—देवदत्तस्य गमनात्मनः पूर्वोत्तरकालयुक्तत्वात्, भवत्वद्विपर्यार्थमाह—देवदत्त एवास्य वृत्तिनिमित्तमिति इतिशब्दो हेत्वर्थे, यतो देवदत्तो गमनात्मैव तस्मात् सतत वृत्तिप्रसङ्गः, एवं तावद् स्थानविरोधिन्या गतेर्भावेऽभिहितो दोषः गतिविरोधिन्याः स्थितेरेव वा भावे स्थित्यात्मकत्वाद्वाऽस्य—देवदत्तस्य गच्छत्यपि देवदत्ते यज्ञदत्तावृत्तिरेव सदा स्यात् स्थानकालवदेवदत्तस्थानवदिति, एवं तावद्देवदत्तगतिस्थितिविषययज्ञदत्त[वृत्त्य]वृत्तिविचारद्वारेण दोषा उक्ताः, इदानीं यज्ञदत्त[वृत्त्य]वृत्तिविषयोऽपि विचारस्तथैव कर्तव्यः अत्रापि यदि द्रव्यपरमार्थवदित्यादिग्रन्थो [यावद्] वृत्त्यवृत्ती यज्ञदत्तशब्दोच्चारणेन यथासम्भवं योज्यः प्रकारान्तरेणापि तु यज्ञदत्तादि यावद् वृत्तिरवृत्तिर्वा यज्ञदत्तद्रव्यात्म हि वस्तुस्वरूपं वृत्त्यवृत्तिक्रिये च तदव्यतिरिक्ते ततो देवदत्तगमनस्थानयोरपि देवदत्ताव्यतिरेकात्तद्यावद्देवदत्तगमनस्थानयोरिति वृत्तिरेवावृत्तिरेव वा स्यात्, यज्ञदत्तवस्तुवत्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत् ।

अथ उक्त वाक्यस्यार्थमनुपेक्ष्य दोषमाह—तथा गमनात्मकत्वादिति देवदत्तस्य गमनात्मकत्वे सदा गच्छति यज्ञदत्तस्य वृत्ति कारणत्वात् तथा तदात्मकत्वेऽपि वृत्तिप्रसङ्गेन यावद्देवदत्तं यज्ञदत्तस्य वृत्तिरेव भवेत् । तदात्मकत्व तत्काळवदिति यज्ञदत्तस्य सदा वृत्ती हेतुमाह—तस्य देवदत्तस्येति । व्याचष्टे—यतो देवदत्त इति । देवदत्तस्य स्थित्यात्मकत्वे यज्ञदत्तस्य गच्छत्यपि तस्मिन् यज्ञदत्तस्याभिवृत्त्या गच्छत्यपि सदाऽवृत्तिरेव यज्ञदत्तस्य स्यादित्याह—स्थित्यात्मकत्वाद्वेति । तथा देवदत्तगमन यज्ञदत्तवृत्ती कारणमनुपेक्ष्य देवदत्तस्य वाक्यस्यार्थमन्यथा यज्ञदत्तस्य इत्यादौ विचारित । अथ यज्ञदत्तस्य वृत्तिर्देवदत्तगमने कारणमनुपेक्ष्य यज्ञदत्तस्य वृत्त्यवृत्तिभ्यां देवदत्तस्य गमनस्थाने योजयितुं मानसे इत्याह—इदानीमिति । पूर्वग्रन्थयोजनोपायमाह—अत्रापीति अत्र यदि द्रव्यपरमार्थो यज्ञदत्तस्य वृत्ति वृत्तिमत्क्रियारूपतातिरपि परमार्थं इति मत्वा वृत्तिक्रियया वृत्तिविरोधिन्या यदि यज्ञदत्तोऽवस्थ आत्मत्व तत्र वृत्तिरेव स्यात् यज्ञदत्तगमनावस्थायां देवदत्तवत् वृत्तिविरा-
त्मार्थं यज्ञदत्तस्य वाऽवृत्तिरेव स्यात् कदाचिदपि इत्याद्यभ्यसनात् यज्ञदत्तगमने देवदत्त गच्छेदपि इत्यादयो देवदत्तस्य गमनस्थाने स्यातां इत्यभावाभावात् पूर्वग्रन्थोऽयं यज्ञदत्तस्य गमनाभाव यज्ञदत्तस्य वा वृत्तिमत्त्वेऽपि मानसे यावदं गमनाभाव एव वा स्यात्, एवमग्रेऽप्यापाद्यपि तथा तथा इत्याद्यभ्यूहनात् यज्ञदत्त एवास्य वृत्तिनिमित्तमिति यावद्यज्ञदत्तं गमनप्रसङ्गः तदात्मकत्वात् तत्काळवत्, तस्य स्थितिपरमार्थत्वादगमनात् । गत्यात्मकत्वाद्वाऽस्य वृत्तिमत्यपि यज्ञदत्ते देवदत्तस्थानमेव सदा स्यात्

1 सि. क. तथात्मकत्वादि, अत्रमनुपार्थं व्याख्यातं तु पुस्तकानि । 2 सि. क. यज्ञदत्त इत्यादिरपि अनुचितमेव व्याचक्षते किन्तु एवम् । 3 सि. क. तथावत् ।

तस्मादेतेन क्रियाया अपि नित्यत्वमित्याह—

तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद्भवनमेवेदं गतिवृत्तिस्थित्यादि, सततसंप्रवृत्तिरूपभवनात्मकत्वादतो द्रव्य क्रिया चोभयं नित्यं भावः ।

(तदतदिति) तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वात्—तद्भवनमतद्भवनञ्च सकृदेकशेषात्तदतद्भवनम् [तद्भवनं] यावत्स्थितमवस्थितिविषयं पुनःपुनर्भवत्येवेति, अतद्भवनं स्थानाद्गमनं 5 गमनाच्च स्थानमिति, तदतद्भवनं भवनसहिते ते एव स्थानगमने, तथा वृत्त्यवृत्ती, तयोरविच्छेद आत्मा यस्याः प्रवृत्तेरविच्छेदात्मिका सा तदतद्भवनाविच्छेदात्मकप्रवृत्तिः, तस्या अपि नित्यत्व तत्कूटस्थ— कूटस्थद्रव्यनित्यत्वविलक्षणं तद्भावात्—तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थत्वाद्भवनमेवेदं गतिवृत्तिस्थित्यादि—एता यानस्थानवृत्त्यवृत्त्यात्मिकाः परस्परविरोधिन्यः क्रियाख्या एता भवनमेव, सततसम्प्रवृत्तिरूपभवनात्मकत्वात् सर्वेद्भवनविलक्षणं नित्यञ्च प्रवृत्तिभवनमेवैताभिर्न क्रियामात्रमतो 10 द्रव्य क्रिया चोभयं नित्यं भावः ।

साम्प्रतं क्रियामेवाभावाद्विज्ञानव्यवहाराभावः स्यात्, इत्येते भेदज्ञानं भेदव्यवहारश्चेत्ये- तदप्युक्तम्—

तस्माद्भेदज्ञानव्यवहारौ तु क्षणभेदद्रव्यप्रवृत्तित्वानुरूप्यात्, शक्तिमतो द्रव्यस्य

[illegible] 15
[illegible] 20
[illegible] 25
[illegible] 30

---

१ [illegible] । २ [illegible] । ३ [illegible] ।

शक्तयो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः, विचक्षापि च तासां शक्तीनां यथानुरूपं प्रतिनियतनियतप्रत्यायनवृत्तित्वात्, रूपादिद्रव्यशक्तिप्रवृत्तिभेदमिय चेन्द्रियग्राह्यत्ववत्, नियतप्रवृत्तिविशिष्टवस्तुभागाभिनिवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुमयोग्यत्वात्, यथा देवदत्तो गच्छतीत्यादौ देवदत्तशब्दो गत्यादीन् नोपादत्ते
5 न वा व्युदस्यति तथाऽऽस्यातमपि देवदत्तादीन् नोपादत्ते न वा व्युदस्यति क्रियांशनियतनियतशक्तित्वात्, तदेवं द्रव्यशक्त्यंशनियतशब्दप्रवृत्त्यनुपातमयं भेदप्रत्ययः ।

(तस्मादिति) तस्माद्भेदज्ञानव्यवहारो तु गच्छति तिष्ठति इति करोमीति वा न वेति शब्दभेदो द्रव्यभेदद्रव्यप्रवृत्तित्वानुरूप्यात्—शब्दो भेदो यथा द्रव्यप्रवृत्तेः सा क्रमभेदद्रव्यप्रवृत्तिः क्रमोऽन्यो द्रव्यात्, प्रवृत्तिः क्रिया गुणोऽपि क्रियेति प्रागुक्तम्, रूपरसगन्धस्पर्शभेदास्याः प्रवृत्तेः क्रमभेदा [द्रव्य]
10 प्रवृत्तिरन्या तस्मात्तस्य वर्णानुपूर्वीसमवायादिरूपं तदनुरूप्यात् क्रमभेद[द्रव्य]प्रवृत्तित्वानुरूप्याद्भेदज्ञानं भेदव्यवहारश्च भवति शक्तिमतो द्रव्यस्य शक्तयो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः, यथोक्तं 'शक्तिमात्रासमूहस्य विश्वस्यानेककर्मणः । सर्वथा सर्वदा भावात् क्वचित् किञ्चिद्विवक्ष्यते' ॥ (वाक्य का ३) इति विवक्षापि च तासां

द्रव्यप्रवृत्तिरन्या अन्या च क्रमप्रवृत्तिभेदनेनाह—शब्दो भेदो यथा इति, [illegible] द्रव्यम् [illegible]
15 [illegible] इति पूर्वमुक्तम्, ततश्च द्रव्यं [illegible], [illegible]
[illegible] द्रव्यम् [illegible]
[illegible] भवतीति भावः ।
प्रवृत्तिः क्रियेति [illegible] क्रिया भाव इति पूर्वं [illegible], [illegible] गुणाऽपि [illegible] भावः ।
तस्मात्तस्येति, तस्य [illegible] भेदः [illegible], [illegible]
20 [illegible] 'घटे' न वर्णो [illegible] न वेति [illegible], भेदव्यवहारो भेदज्ञानं च [illegible]
[illegible] इति [illegible]
[illegible], [illegible] राज्ञा [illegible]
[illegible] न स्यात्, [illegible], एवं [illegible], अत एव
[illegible], [illegible]
25 [illegible] भवति [illegible] अत एव
इति [illegible], [illegible]
[illegible] च [illegible],
[illegible]
[illegible] गौणम् । [illegible]
30 [illegible] 'शक्तिमात्रासमूहस्य विश्वस्यानेककर्मणः' इति [illegible] च 'सर्वमात्रासमूहस्य [illegible]'
इति [illegible] हि [illegible], [illegible]
[illegible] इति [illegible] । [illegible]
[illegible]—विवक्षापि चेति [illegible] भवति च एव [illegible]

1 सि क्ष 'ज्ञाविवर्धनात् ।

शक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायनवृत्तित्वात्—सत्यपि सर्वसर्वात्मकत्वे द्रव्यार्थनयस्य चर्णोरूप-कपटक्षणप्रमुखेः पृथुबुध्नकुम्भोदराद्याकारप्रत्यायने नियता वृत्तिनामन्यत्र, रूपादिद्रव्यशक्तिप्रवृत्तिभेदनियते-न्द्रियग्राह्यत्ववत्, शब्दशक्तिप्रवृत्तिभेदाद्भेदज्ञानव्यवहाराविसर्थः, तदुपपादने नियमवृत्तीत्यादि, नियमवृत्तेः क्रमभाव्या विशिष्टो यो वस्तुभागस्तद[भि]निवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुं सर्वैरयोग्यत्वा-दिति, तन्निदर्शयति—यथा देवदत्तो गच्छतीत्यादि यावत् वा भ्युदयतीति गत्यार्थम्, यथाऽऽख्यातमपीत्यादि 5 तदेव गत्यर्थं यावत् क्रियांशविषयनियतशक्तित्वादिति, नामाख्यातयोर्नियतवस्तुभागाभिनिवेशित्वादिति तदेव कारणं तदनुपात्यं भेदप्रत्यय इत्युपसंहरति, द्रव्यशक्तत्वसमियतमात्रैमवृत्त्यनुपाति भेदज्ञानमित्यर्थः।

सर्वेष गतिस्थितिवृत्त्यवृत्त्यादिभेदव्यवहाराः, सर्वभेदपर्यनुभवार्थत्वाभिसम्प्रवृत्तेः, याऽसौ सततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भावभेदान् पर्यनुभावयामि द्रव्यमिति प्रवर्तते, यदि नानुभवेत् ततो न ते स्युः, तेनापर्यनुभूयमानत्वात्, खपुष्पवत्, सर्वप्रभेदनिर्भेदं बीज 10 द्रव्यमिष्यते तथा द्रव्यं न स्यात् भेदापर्यनुभवनात् खपुष्पवत्।

(तथैवेति) तथैव गतिस्थितिवृत्त्यवृत्त्यादिभेदव्यवहाराः सर्वभेदपर्यनुभवार्थत्वाभिसम्प्रवृत्तेः, याऽसौ सततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भवनभेदान् पर्यनुभावयामि द्रव्यमिति प्रवर्तते, यदि नानुभवेत् क्रियाभेदान् द्रव्यं ततो न ते स्युः तेनापर्यनुभूयमानत्वात् खपुष्पवत्, सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिति चेष्यते, तथा द्रव्यं न स्यात्, भेदापर्यनुभवनात् खपुष्पवत्—यदं तद्द्रव्यं बीज स्यादि- 15 तान् भेदान् पर्यनुभवेत्।

स्याद्—यथाऽनन्तरोक्तदेवदत्तशब्दो गत्यादीन् नोपादत्ते न च व्युदस्यति, नियतत्वाच्छब्दश-क्तीनां प्रवृत्तस्य तथा वस्तुनापि देवदत्तेन गत्यादयः किमनुपात्ताव्युदस्ताः ? नेत्युच्यते विशेषः—

[illegible] शब्दार्थयोः प्रतिनियतत्वप्रतिपत्त्याऽपि प्रतिनियतशब्दार्थविषयनियमोऽस्तीति तदर्थः। तदेव व्याचष्टे—सत्यपीति। 'इन्द्रियार्थं [illegible] यथा। [illegible] शब्दानां शब्दशो येनकश्च यथा' ॥ इति शब्दानां प्रतिविषयनि- 20 [illegible]। [illegible] रूपादिद्रव्येति। [illegible] तदेव [illegible] भेदज्ञानमभेदज्ञानं तथा व्यवहारमेवाह—शब्दशक्तीति। [illegible] न सर्वोऽभिधत्ते, अपि [illegible] प्रतिनियतार्थाभिधायकत्वं दर्शयति—नियमवृत्तेरिति यस्मिन् हि शब्दे व्यवस्थिते [illegible] परिच्छित्तिरपि च शब्दो बोधयति, नार्थान्तरम्, अत एव [illegible] [illegible], न तु [illegible] अत एव नामाख्यातादिपरभेदः [illegible] क्रियामेव बोधयति न [illegible] 25 [illegible] बोधयति न क्रियामिति भावः। तदेवं [illegible] द्रव्यार्थदेशोति। [illegible] [illegible] प्रवृत्तिमेवाह—तथैवेति [illegible]। गतिस्थित्यादयः [illegible] [illegible] द्रव्यमनुभवति [illegible], तदनुभवितव्यस्य [illegible] [illegible] एव द्रव्यं सर्वभेदाननुभवत् ततो निर्भेदमित्याह—याऽसाविति [illegible] क्रियैव न [illegible] 30 क्रियाभेदानिति। तच्च द्रव्यमपि न स्यादित्याह—तेऽपीति तच्च न [illegible] इति [illegible]। [illegible] प्रतिनियत [illegible] [illegible] तथा [illegible] स्यात् [illegible] व्याचष्टे—स्यादिति। [illegible] देवदत्ते [illegible]

1 सि क. °भेदाभाव । २ सि [illegible] । क. [illegible] । ३ सि. क. °[illegible] । ४ सि क. °[illegible] । ५ सि. क. °[illegible] । ६ सि क. [illegible] । ७ सि क. °[illegible] ।

देवदत्तवस्तुना शब्देनानुपादीयमानापि हि गतिरुपात्तैव, नियतभावात् तदात्मत्वादिति विशेषहेतोश्च, यद्यदात्मकं तेन तदुपात्तमग्निनेवौष्ण्यम् तथा देवदत्तेन गतिरिति, गच्छतिशब्देन च देवदत्त उपात्तः, देवदत्ताभिसम्बन्धात्, शब्देन चेदर्थ उपात्तोऽर्थेन देवदत्तार्थ उपात्त एव, तदात्मत्वात्, तथा शब्देऽप्येष विधिः, उभयवस्तुत्वात्।

5 देवदत्तवस्तुनेत्यादि, देवदत्तशब्देनानुपादीयमानापि हि गतिः—वस्तुना तेनोपात्तैवाऽसौ, नियतभावात् विशेषहेतोश्च, को विशेषहेतुरिति चेदुच्यते तदात्मत्वात्, गत्यात्मको हि देवदत्तः तत्पर्यायानुभवनात्, यद्यदात्मकं तेन तदुपात्तमग्निनेवौष्ण्यम्—यथाग्नेरौष्ण्यमात्मभूतमग्निनोपात्तं तथा देवदत्तेन गतिरिति, एवं तावद्देवदत्तवस्तुना गतिरुपात्ता न देवदत्तशब्देनेति विशेष उक्तः, किं गच्छतिशब्देन गत्यर्थेन देवदत्तार्थोऽनुपात्तः? नेत्युच्यते—गच्छतिशब्देन च देवदत्त उपात्त इति, किं—देवदत्ताभिसम्बन्धात्,
10 शब्देन चेदर्थ उपात्तोऽर्थेन गच्छतिशब्दार्थेन देवदत्तार्थ उपात्त एव तदात्मत्वादिति विशेषः, यथा च तदवयवसमाविष्टैकात्मवृत्तिनिर्वर्तनस्वरूपत्वात्स्वरूपनमेवेदं गतिस्थितिस्वरूपत्वादीति गत्यादिप्रवृत्तिमत्त्वेन भवद्रूपमनुपात्त्येव, उभयात्मत्वात्तयोः—द्रव्यक्रियात्मकत्वादर्थेन गत्यनुपात्तं देवदत्तादि गमयतीत्युक्तं "क्रियाया द्रव्यमेदपर्यनुभवन[प्रवृत्त]त्वात्"इति, तथा शब्देऽप्येष विधिः—गच्छतिशब्देनापि गच्छतिशब्देन च देवदत्त [उपात्तः] उभयवस्तुत्वात्—उभयस्य द्रव्यमेदपर्यनुभवनप्रवृत्त-
15 त्वादिति× एवं तावत् सर्वसर्वात्मकद्रव्यार्थोपात्तत्वात्तयोः भेदान् कल्पितानाश्रित्य भेदाभावव्यवहार उच्यते।

परमार्थतस्तु अर्थनियतत्वात्तु वचसः देवदत्तशब्देन गत्यादि नानुपात्तम्, तद्वचनार्थत्वात् देवदत्तशब्दस्येति गृहाण, देवदत्तशब्दो हि द्वितीयादिविनाभूतः केवले कर्तर्येव प्रयुज्यते, कर्ता

[illegible] देवदत्त [illegible] इत्याह—देवदत्तवस्तुनेति। देवदत्तवस्तुनो द्रव्यत्वात् [illegible]
20 [illegible] एव च तु देवदत्तशब्देन देवदत्तार्थ [illegible] क्रिया उपात्त इत्याह—देवदत्तशब्देनेति, हेतुमाह—नियतभावादिति [illegible] भावः। हेत्वन्तरमाह—विशेषहेतोश्चेति [illegible]। देवदत्तशब्देन [illegible] देवदत्तादि [illegible] एवेति [illegible]—किं गच्छतिशब्देनेति। किं [illegible] इत्याह—देवदत्ताभिसम्बन्धादिति [illegible] देवदत्तवस्तुना [illegible] शब्दो हि [illegible]। तत्र च [illegible]
25 देवदत्तो [illegible] देवदत्तार्थं [illegible] एव [illegible] भावः। [illegible] द्रव्यस्य [illegible] क्रियया [illegible] उपात्तार्थं [illegible] इत्याह—यथा चेति। [illegible]—यथैवेति। [illegible] क्रियारूपो द्रव्यस्य [illegible] तथा शब्देऽपि [illegible] द्रव्यस्य [illegible] इत्याह—उभयवस्तुत्वादिति। एवं [illegible] परमार्थ [illegible] एवं तावदिति [illegible]
30 [illegible] च [illegible] तत्र [illegible] एवं [illegible] भवत इति भावः। अथ [illegible] इत्याह—परमार्थतस्त्विति, [illegible]

1 सि क्ष. °मामकारि । २ सि. क्ष. °नियतभावात् । ३ सि. क्ष. °र्थे उपात्तो । ४ क्ष. ××।

च क्रियायाः साधनत्वात् क्रियामन्तरेण न भवति, तत्र स्वयमसौ कर्ता तेन तेन प्रकारेण वर्तमानः, तथा शब्दोऽपि तत्तदर्थप्रत्यायी यथाहुरन्यत्र 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति' (महाभा० अ० २ पा० ३ सू० १) स एष उपात्तगत्यर्थो देवदत्तशब्दो देवदत्तकर्मार्थप्रत्यायनार्थो नानर्थकः, अर्थप्रत्यायनार्थत्वाद्वचनप्रवृत्तेः ।

परमार्थतस्तु अर्थनियतत्वात्तु वचस इत्यादि शब्देनापि गत्यादि नैवानुपात्तमुपात्तमेवार्थवत्, कुतः ? तद्वचनार्थत्वात्—तस्य वचनं तद्वचनं गत्यादिवचनमेवार्थो देवदत्तशब्दस्येति देवदत्तार्थेनैव गमर्थोऽप्युपात्त इति एतावत्, मा भूदिष्टाच्छ्रवणार्थत्वमसिद्धमित्येतदाह—देवदत्तशब्दो हीत्यादि, यथा स्वार्थद्रव्यलिङ्गसंख्याकर्मादिवाचि प्रातिपदिकं विभक्त्यन्तसमुपश्लिष्टकाः विपक्षाभावात् कारकविशेषाभावे च कर्मादीनामपि कारकत्वात् कर्तृत्वमिष्टमेवेति सिद्धान्तवादी विशेषाणामप्यपेऽपि द्वितीयादिविनाभूतो देवदत्तशब्दः केवले कर्तर्येव प्रयुज्यते, कर्ता च क्रियायाः साधनत्वात् क्रियामन्तरेण [न] भवति, क्रियाभावासिद्धिविधिविघ्नाद्यपः तासु स्वयमसौ कर्ता तेन तेन प्रकारेण वर्तमानः तथा शब्दोऽपि तत्तदर्थवाची, यथाहुरन्यत्र इति ज्ञापकम्, विचारावसाने वैयाकरणैरेतदभिहितम् अस्तिर्भवन्तीपरः इत्यादि, तद् भवन्तीत्युच्यते, शेषं गतार्थम्, प्रथममध्यमोत्तमपुरुषमध्यवदपि क्रियापदं भवत्येव, विभागोऽभिधानात्, त्वमसि, अहमस्मि तिष्ठसि तिष्ठामीत्यादीनां नियमाभावात्, क्रियापदेन विना

धर्मिणमाभिनी, तस्मात्कारकाऽऽग्यत्वात्प्रतिपाद्या क्रिया क्रियावचना च भवतीति वाक्यतात्पर्यस्य सत्त्वप्रधानेन क्रियाऽऽर्थंका च निवर्तत इति सामान्यतः देवदत्तादिलक्षणवचनं तथैव साधनं निर्दिष्टं च भवतीति वाचकवाच्यत्वात्रापि वाक्यार्थत्वात् क्रियावाचकत्वं न्याय्यमिति देवदत्तादिशब्देन यथाविधिर्नोपात्तैवेति भावः । तदेतद्व्याचष्टे—शब्देनापीति देवदत्तादिशब्देनापीत्यर्थः । अनुपात्ते हेतुमाह—तद्वचनार्थत्वादिति, देवदत्तस्य गमनादिवचनमेव परमार्थः नहि द्रव्यं गमनादिभ्य एव प्रवृत्तिमपार्थं वक्तुमिच्छतीति तथा वाच्यवाचकयोस्तादात्म्याद्देवदत्तशब्दस्य गमनादिवचनं परमार्थः इति भावः । एतदेवोपपादयति—यथा स्वार्थेति पञ्चकस्य प्रातिपदिकार्थत्वात् प्रातिपदिकेनैव विभक्त्यर्थस्य संख्यादेरुक्तत्वात् प्रथमाविभक्तेः प्रातिपदिक एव समासेन कारकत्वेन कर्मादीनां प्रातिपदिकेन प्राप्तावपि कर्मत्वादिना तथैव विशेषविवक्षायां कर्मादिसमवायकारकविशेषाभावात्, कर्मादीनां कर्तृत्वात् कर्मादीनामपि कर्तृत्वमिष्टमेव सिद्धान्तवादिनः कर्मत्वादिविशेषानपेक्षायां द्वितीयादेर्विनापेक्षत्वात् देवदत्तादिशब्दः केवले कर्तर्येव प्रयुज्यते कर्ता च क्रियायाः साधक इति क्रियया विना न तस्य कर्तृत्वं सम्भवतीति क्रियाऽऽक्षेपको तावाद्ये सर्वे विशेषा वाच्यत्वेनाप्रतिभासमानाः सार्थत्वेन कर्तृत्वादुपक्षेपवचनसिद्धाया क्रियाक्षेपेण देवदत्तादिशब्दं वर्तत इति देवदत्तादिशब्दः तत्तद्व्यापारविशेषेण भवन्तं देवदत्तादिशब्दं प्रतिपादयतीति तद्वचनार्थत्वं तस्य न्याय्यमिति भावः । प्रथमादिविभक्तौ हि सूत्रे विभक्तौ एव भवति कर्मणि द्वितीयेत्यादिसूत्रार्थवशाद् कर्मादिविशेषत्वात्, 'लिङ्गमात्राधिक्ये प्रथमा' इति वार्तिकार्थ यत्र तु क्रियापदं न श्रूयते तत्र तदध्याहारार्थमित्याशयेनाह—यथाहुरन्यत्र इति विचारावसाने—मन्यमिदिति इति एतद्विचारावसाने भाष्ये, भवन्तीपरः इत्यत्र भवन्तीत्यस्य लट्प्रत्यये संकेतित इत्याह—तद् भवन्तीत्युच्यत इति यावं यस्तु परं प्रतिपादयितुं शब्दः प्रयुज्यते प्रथम विधायकस्तैव तथापन विचारान्तरसाप्रयोगमप्रयोगेऽर्थतः सत्ता प्रतीयत इत्यस्तीति क्रियापदसम्बन्धात् कर्तव्य इति तदर्थः एवं च यत्र क्रियाविशेषार्थं पुरुषविशेषार्थं वचनविशेषार्थमेव प्रयोगं नास्ति तथापीयत्वेन प्रथमपुरुषार्थम्, सामान्यस्य चाऽस्मभिधायित्वादिति भावः । इति विधिज्ञापके मध्यमोत्तमपुरुषयुक्तमन्यदपि क्रियापदमस्ति ज्ञापकस्य विषयानभिर्देशमर्थविशेषमाह—प्रथमेति । एवमेव वर्तमानं त्वमसीति । ननु

---

१ सि क. कर्मो नियमितानुरूपस्य इमा । २ सि. क. वाक्येपाद । ३ सि क. °वाक्यत्वामपि । ४ सि क. तथात्वा ।

[न] भवतीत्येव हि नियमः, स एव उपात्तगसर्थो देवदत्तशब्दो देवदत्तकर्तृकगमनप्रत्यायनार्थो ऽनर्थकः, सम्यक्प्रत्ययापेक्षावानिति वर्त्यते, तस्मा अर्थप्रत्यायनार्थत्वात् वचनप्रवृत्तेः—अयं प्रत्याययिष्यामीति वचनं प्रवर्त्यते, तस्मादानर्थक्यं समीहितकर्तृत्वोक्तिस्वात् प्रमाणान्तरोपलभ्यत्वाच्च देवदत्तस्य ।

देवदत्तशब्दो न देवदत्तस्य वाचकः किन्तर्हि देवदत्तशब्देन देवदत्तार्थो विज्ञायमान
5 एवानूद्यते स गच्छतीति विधानाय, स्थानविपरीतगमनप्रतिपादनाय च देवदत्तं गतिकर्तृत्वे
नाध्यारोहयामीति प्रयुज्यते यो गच्छति स देवदत्त इति ज्ञातार्थेनानूद्यमानेन विधानात्, तथा
च देवदत्त इत्युक्ते विशिष्टक्रियात्मककर्तृनिर्देशात् गतेर्गतत्वात् गच्छतिशब्दोऽनर्थकः पुनरुक्तश्च,
तौ च न विभक्तिविध्यनुवादार्थवक्तारं श्रोतारं वा प्रति भवतः ।

(देवदत्तशब्द इति) [देवदत्तशब्दो] न देवदत्तवाचकः किं तर्हि ? देवदत्तशब्देन देवदत्तार्थो
10 विज्ञायमान एवानूद्यते ज्ञातार्थो ह्यनुवादो विध्यङ्गत्वात्, किमर्थोऽनुवाद इति चेत् ? स गच्छतीति विधा-
नाय—देवदत्तविशिष्टगतिविधानाय गतिर्हि ज्ञातार्थत्वादभिधीयते देवदत्तकर्तृकत्वेन देवदत्तानुवादो गतिविधा-
नार्थोऽस्तु, गतिविधानं किमर्थमिति चेत् उच्यते—स्थानविपरीतेत्यादि, अध्यारोप्य देवदत्तकर्तृसाधनं गमनं
विवक्षितं तत्प्रतिपादनाय देवदत्तं गतिकर्तृत्वेनाध्यारोहयामीति प्रयुज्यते, तदिदर्शयति—यो गच्छति च

[illegible] इति भावः । [illegible]
15 [illegible] —स एव उपात्तगसर्थ इति [illegible]
[illegible] इति भावः । [illegible]
20 [illegible] —देवदत्तशब्द इति । [illegible]
25 [illegible]
30 [illegible] यो गच्छतीति । [illegible]

देवदत्त इति—यथा [च] योऽसौ गच्छतीति [स] देवदत्तो गतिक्रियायाः कर्तेति सामर्थ्येनानूद्यमानेन विधानात्, द्रव्यक्रियाभिधायिनोश्चाभिन्नार्थत्वोपपत्तेः, एवं सति पौनरुक्त्यमिति चेदभ्युपगम्यते, तथा चेत्थमपि, एवञ्च कृत्वा देवदत्त इत्युक्ते विशिष्टक्रियात्मकद्रव्यनिर्देशाद्गतेरवगतत्वाद् गच्छतिशब्दोऽनर्थकः पुनरुक्तश्च तथा गच्छतिशब्दादेर्विशिष्टकर्तृगमनवचनाद्देवदत्तार्थगतेर्देवदत्तशब्दोऽपि, तौ चानर्थक्य-पौनरुक्त्यदोषौ न विभक्तविध्यनुवादार्थवक्तारं श्रोतारं वा प्रति भवतः ।   5

किं तर्हि प्रति ? उच्यते—

विभक्तविध्यनुवादार्थाविवेक्तारं प्रति अन्यतरस्यैव वानयोरविवेक्तारं वक्तारं श्रोतारं वा स्यात् ।

(विभक्तेति) 'विभक्तविध्यनु [वादार्थाविवे]क्तारं प्रति—विवेक्तो विधिरयमविज्ञातार्थत्वात् शब्दोऽनुवादोऽयं विज्ञातार्थत्वात्, विध्यनुवादावेत्यविवेक्तारं वक्तारं श्रोतारं वा स्यात्—आनर्थक्यं 10 पौनरुक्त्यं वा स्यात् अन्यतरस्यै[व] वाऽनयोरविवेक्तारं विध्यनुवादार्थाविति ।

साम्प्रतमस्तु अय[म]भिमतद्रव्यक्रियात्मकैकवस्तुविध्यनुवादार्थवचनं वक्तारं प्रति, कथं पुनः श्रोतुरिति चेदुच्यते तथापि—

प्रथमपदोपादानसन्निहितार्थव्यञ्जनं द्वितीयपदं सन्निधिमात्रेण तथाप्रतिपत्तुः श्रोतुरुप कारकं नान्यस्य, न स पुनः शब्दापराधो यदसौ तदर्थं न प्रतिपद्यते, यथा न हि स सूर्यस्यापराधो 15 यदेनमुलूको न पश्यतीति, अत्र प्रयोगः—प्रथमपदोपात्तार्थमेव द्वितीयपदम्, तन्नान्तरीयकोपादानसन्निहितार्थविवर णार्थत्वात्, भाष्यमन्यवत् ।

प्रथमपदोपादानेत्यादि यावच्छ्रोतुरुपकारकमिति, प्रथमं पदमत्र देवदत्त इति गच्छतीति वा यथाविवक्षं प्रयुक्तं, प्रथमपदस्योपादानमस्य सोऽयं प्रथमपदोपादानः सन्निहितश्च द्वितीयपदाभिधेया-[भि]मतः, तस्य व्यञ्जन—शब्दो द्वितीयपदं तत् सन्निधिमात्रेण प्रयोगमात्रेण प्राक्प्रतिपन्न एवाभि 20 व्यज्यते सोऽर्थस्तेनेत्यर्थः, तथाप्रतिपत्तुः श्रोतुरिति—वक्तुरभिप्रायभूमिं समर्थस्य गृहीतसङ्केतस्येत्यर्थः, उपकारकं—प्रतिपत्त्याधानसमर्थं नान्यस्य—अविभक्तविध्यनुवादार्थस्याकृतसङ्केतस्य वा, न स पुनः शब्दाप-

पर्य सवीति । एतदेव स्पष्टयति—एवञ्च कृत्वेति तथा च नाताऽऽख्यातेन वा विधिश्चानुवादश्चाभिधीयमाना वक्तपदी विध्यनुवादविवेकाभावे पौनरुक्त्यानर्थक्यमाव वक्तृवक्तारं श्रोतारं प्रति भवेत् विध्यनुवादार्थविवेचने तु नैति भावः । तर्हि कं प्रति आनर्थक्यपौनरुक्त्यदोषौ भवत इत्याह—विभक्तेति विभक्तयोर्विध्यनुवादार्थयोरविवेचकमविवेकः विध्यनुवादयोरविवेक- 25 मावेऽन्यतरस्य वा विवेकाभावे वक्तारं श्रोतारञ्च प्रति तौ दोषौ भवतः न केवलमेकस्यैवोभयोः वक्तुः श्रोतुर्वेति भावः । ननु दोषौ वक्तारं प्रति दुष्टौ तयोरेव नाताऽऽख्यातार्थस्यऽऽख्यातेन नामार्थस्य प्रकाशनात्, श्रोतारं प्रति कथं भवतः तत्र प्रमाणाभा-वेऽविवेकस्यापि अनुपलक्षितत्वादित्याशङ्कते—साम्प्रतमिति । एकपदेनोपात्तस्यापरपदार्थस्यापरपदं व्यञ्जकं तत् वक्तुः श्रोतुश्च सन्निहितं उपकारकं भवति न तु सार्वसामान्यस्याभिधायकं तत् तदुपलभ्य अनुपलम्भश्च श्रोतुरेवापराधो न तु शब्दस्ये-त्याह—प्रथमपदेति । देवदत्तो पचति पचति देवदत्त इत्यत्र वा यथाविवक्षं देवदत्तपदं पचतिपदं वा देवदत्तकर्तृकपचनस्य 30 व्यञ्जकम्, तत्र च प्रथमपदप्रयोगेणैव सन्निहितं तथापि यदि द्वितीयपदं तद्व्यञ्जकमिति कारणाभावादानर्थक्यपौनरुक्त्यौ न स्यातां तर्हि

१ सि० क्ष० अथानर्थक्ये । २ सि० क्ष० °मित्यर्थत्वात । ३ सि० क्ष० वेदमि । ४-५ सि० क्ष० भवि । ६ सि० क्ष० वक्तारं श्रोतारं वा वानर्थक्यं पौनरुक्त्यं वा स्यात् वाऽन्यतरस्यैवानयोरविवेक्तारमित्यधिकं दृश्यते ।

परार्थो भवन्नौ वस्तु न प्रतिपद्यते, यथा न हि स सूर्यस्यापरार्थो परेणमुक्तो न पश्यतीति, तस्मादेतदर्थं सत्यपि बिम्बमुपादाय भिन्नार्थविदौ, अत्र प्रयोगः—प्रथमपदोपात्तार्थमेव द्वितीयपदम्, तदुपहितार्थविवरणा-र्थत्वात्—यदुपहितो[ऽर्थो]गमनमवनामिसम्बन्धी देवदत्तः तद्विवरणार्थो गच्छतिशब्दो देवदत्त[र्थ]स्य सूक्तः, 'आगृहीतगतिरपि न परेण ज्ञायते' ( ) इत्युक्तत्वात्, यदुपहितार्थविवरणार्थं पदं तत्पूर्व-
5 पदोपात्तार्थमेव दृष्टम्, भाष्यमन्थवत्, यथा 'वृद्धिरादैच्' (पा० अ० १ पा० १ सू० १) इति सूत्रेणैवो-पात्तमर्थं भाष्यमन्थपदानि विवृण्वन्ति—वृद्धिरितीयं संज्ञा भवत्यादैच्वर्णानामिति शब्दानुशासनादिविचार-पारेण सूत्रेणैवोपात्तत्वात् तथा चोक्तं 'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके। तदुदाहरणमन्यत्र प्रत्युदाहरणं पदोः ॥' (महाभाष्यटीकायामुद्योते पूर्वार्धमात्र दृश्यते अ० १ पा० १ आ० १) इति।

व्याख्यातम्—

10 प्रथमपदोपात्तार्थत्वेऽद्वितीयपदं प्रथमपदोच्चारणकाल एव ततः प्रतिपत्तेः पदुत्वात्वा प्रतिपत्तुः श्रोतुरुपकारकं स्यात् तेनैव व्यक्तत्वादित्यत्रोच्यते कस्यचिन्नवत्यपि केषाञ्चिदिव एव तदर्थस्य कारकं तथाव्यक्तव्यञ्जनत्वात् प्रदीपवत्।

(प्रथमेति) प्रथमपदोपात्तार्थत्वेन[द्वितीयपदं]प्रथमपदोच्चारणकाल एव तदा—तस्मादुच्चरणा प्रतिपत्तेः, केन? पदुत्वात्—पदुत्वेन वचनात्, यथा यच्छति प्रतिपत्तिः मातृपवाता गच्छति[इति पदं]
15 देवदत्तकर्तृविषयं प्रयुक्तेऽन्नमिति' [१][पदमेव]तदा प्रतिपत्तुः श्रोतुरुपकारकं स्यात्, तेनैव व्यक्तत्वादित्य श्रोच्यते कस्यचिन्नवत्यपि केषाञ्चिदिव एव तदर्थस्य कारकम्, तथाव्यक्तव्यञ्जनत्वात्—येन प्रकारेण व्यक्तवाच्यतः देवदत्तशब्दोच्चारणश्रोतुर्विशिष्टक्रियाकर्तृको देवदत्त इत्येतावदवगतोऽपि स्वे बुद्धौ, तस्मात्तत्राभ्यतः तत्र व्यञ्जनो गच्छतिशब्दो नापूर्वं किञ्चिदाह, तदनुवादित्वात्तदवाच्यव्यञ्जन-

भसार्थं योग इति निमन्त्रणमिति भावः। तत्र तात्पर्यमार्गयति—यथा न हीति। एवम् निमन्त्रणलक्षणेत्यनेन वदि
20 न योग इत्यत्र—तस्मादिति। प्रथमपदेनैव द्वितीयपदार्थं क्वचित् प्रयोगेऽपेक्षायां प्रयोग इति। हेतुमाह—यदुपहितार्थेति प्रथमपदेन सदुपहितस्य पदार्थस्य सामान्यतार्थं पदमुपहितमिति भावः। व्याख्यान-भाष्यग्रन्थवदिति भाष्ये तत्र सम्यगुपपादितमित्यत्र विचारपरता व्याकरणमहाभाष्ये 'नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते किं तर्हि? व्याख्यानतश्चेति तदेव सूत्रं विगृहीतं व्याख्यानं भवति यदि विगृहीतम्—ननु चोक्तं न केवलानि चर्चापदानि व्याख्यानम्, इति भवत् देत्, इति, किं तर्हि? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति'
25 इत्येवं विचार्य कृतः उपसंहारः 'सूत्रत एव हि शब्दान् प्रतिपद्यन्ते' इति तत्रैव व्याख्याने तत्रोक्ते 'एवमुक्तेन सर्वे सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके' इत्युक्तम्। तन्त्रवार्तिके च 'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके। एवं [illegible] पर्वं तत्र [illegible]' दृश्यते। ननु प्रथमपदं यदि द्वितीयपदार्थं बोधयेत् तर्हि प्रथमपदोच्चारणकाल एव द्वितीयपदार्थं बोधापत्तिरित्याशङ्कते—प्रथमपदेति। यद्यर्थोऽयं प्रथमपदोच्चारणकाल एव द्वितीयपदार्थप्रतिपत्त्या श्रोतुरपि स्यादिति व्याप-मानत्वेयाह—पदुत्वादिति। अभिहितान्वयवादी मीमांसकः समाधत्ते—कस्यचिन्नवत्यपीति कस्यचिद्वचनादेरर्थस्य
30 पदार्थपदार्थान्तर योगे भवत्यपि केषाञ्चित् अव्यक्तस्य एव तदर्थस्य कारकमित्यर्थः। तत्रसमाधत्ते—तथाव्यक्तेति प्रतिपत्तु वाक्यार्थसामान्यविशेषमिश्रमिश्रविषयं ज्ञाते न वैशद्यं वाक्यार्थे पदार्थम्, एतेन पदेन तदर्थपदार्थजातेति वक्तव्यज्ञानविशेषतो पदान्तरं क्रियापदानुवादतया योजयताविति भावः। अभिव्यक्तस्यार्थस्याभिव्यञ्जकमुपपत्तिर्भवति

1 लि० क० तावत्तु। २ लि० क० कारित। ×× एतच्चिह्नान्तर्गतः पाठः प्रतिषु ५२१ पृष्ठे ६ पङ्क्तौ 'वृद्धा-दिति'इत्यनन्तरं दृश्यते।

त्वात् [प्र]दीपवत्, यथा प्रदीपः प्रागभिव्यक्तं घटं [त]मःस्थं व्यनक्तीति नात्रैव एव तदर्थज्ञानस्य कारकः तथा तु वाक्ये गच्छतिशब्दोऽपीति, अथ वा द्रव्यार्थवादे कुम्भकारोऽपि विद्यमानमेव घटं तथाभिव्यनक्ति नाविद्यमानमुत्पादयति प्रदीपवत् तस्मात् कुम्भकारस्यापि व्यक्त्यभिव्यञ्जकत्वात् पिण्डावस्थायामपि व्यक्त एव घटः क्रियाक्रमाभिव्यक्तिमत्त्वात् प्रदीपव्यक्तघटवत्, तथा देवदत्तो गच्छतीत्यत्रापि व्यक्त्यभिव्यञ्जकत्वान्नात्रैव एव तदर्थज्ञानस्य कारक इति ।

मा च मस्याः केवलोपपत्तिमात्रकमेवैतदुच्यते प्रथमपदोपादानार्थमाक्षि द्वितीयपदमिति, किन्तु लोकेऽपि व्यवहारप्रसिद्धिस्तथा दृश्यते तद्दर्शयितुमाह—

तथा च विनापि तत्सन्निधिं पूर्वश्रुतशब्दवृत्तेरेव तथानियतत्वात्तथैव प्रतिपत्तारो दृश्यन्ते यथा प्रविश पिण्डीमिति प्रविशशब्दश्रवणात् सुषिरं गृहादि कर्मपदमप्रेति पिण्डीमिति च कर्मपदश्रवणात्तयोरन्यभक्षिक्रियाकर्तृकर्मकमिति ।

तथा च विनापीत्यादि यावत् प्रविश पिण्डीमितीति पदद्वयं कृत्वा तदर्थोनुवादमात्रमिदमार्थस्य शब्दस्य सन्निधिमन्तरेणापि पूर्वश्रुतशब्दोपात्तस्यार्थस्य वृत्तेरेव तथा नियतत्वात् तथा हि तच्छब्दप्रवृत्तिर्नियता यथा कश्चिदश्रूयमाणद्वितीयपदोऽपि तस्य पदार्थविषयप्रतिपत्तिहेतुर्भवति, तथैव च प्रतिपत्तारो दृश्यन्ते तथा प्रविश पिण्डीमित्यत्र प्रविशशब्दश्रवणात् प्रवेशयोग्यं प्रकरणादिभिः सुषिरं गृहादि कर्मपदमप्रेति पिण्डीमिति च कर्मपदश्रवणादनन्तरोक्तप्रविशि[भ]सम्भवात् तयोरन्यभक्षिक्रिया कर्तृकर्मकमिति प्रतिपद्यन्ते, तस्मात् प्रथमपदोपादानार्थव्यञ्जनं द्वितीयपदमिति साधूक्तम् ।

यथा देवदत्तशब्दोपादानार्थवाची गच्छतिशब्दः—

तथा गच्छतीति च तिपोपात्त एव कर्ता, 'लः कर्मणि च' (पा० अ० ३ पा० ४ सू० ६९) इति । कर्तरि विहितलकारादेशत्वात्तिपा, स च देवदत्त एव विशिष्टः, विशिष्टकर्तृविष-

भिन्नपदार्थैकत्वप्रत्ययस्य व्यक्त्यभिव्यञ्जकं प्रदीपं दृष्टान्तीकरोति–प्रदीपवदिति एतदर्थमेवाभ्युपगमेन दृष्टान्तमाह–अथ वेति । तस्मात् प्रथमपदोच्चरितात् पदात् विशिष्टक्रियाकारकोपस्थितिः तावन्मात्रेणैव एवं वाक्ये प्रयोक्तृश्रोतृपरिपूर्णं तथा व्यवहार-प्रसिद्धिमपि लौकिकीमाह–तथा चेति । अनुवादमात्रफलस्य द्वितीयादिपदस्य सन्निधिना विनापि प्रविशेत्येतावन्मात्रोक्तावपि प्रवेशक्रियाकर्मैकदेशस्य प्रकरणादितः एवासौ प्रतिपत्तिर्भवति, तथा पिण्डीमित्येतावन्मात्रोक्तं कर्म तद्योग्या क्रियामात्रभक्षण-क्रियैव प्रकाशयति तत्रानुपात्तपदस्यानुवादमात्रत्वेन भेदात् तदभावेऽपि पूर्वपदस्य एवं पदार्थकार्थ्य इति न्यायेन तदर्थ-मेवैतत्प्रवृत्तिनियतत्वमिति यदभिव्यक्तार्थप्रथमपदमेवोत्तरपदमिति व्याख्येयमिति–अनुवादमात्रमिदमार्थस्येति । पिण्डीमिति पदं हि [illegible], [illegible] प्रविशादिना पिण्डीकर्मकभक्षणक्रियाया बोधकत्वादयुक्तत्वम् एवं प्रविशेत्यस्यापि प्रकरणादिना गृहादिकर्मकप्रवेशनक्रियाबोधात् विशिष्टाभिधायकं वाक्यमेव तस्मादेव प्रथमपदे द्वितीयपद-मुपात्तमनुवादमात्रमेव केचित्तु प्रविश एवं, पिण्डीं भक्षयेति [illegible] । यथा नामपदं [illegible]–तथा गच्छतीति चेति । गच्छतीति पदं हि [illegible] प्रकृत्यर्थः क्रिया तिप्प्रत्ययार्थः कर्ता 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रेण लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च स्युः अकर्मकेभ्यो भावे कर्तरि चेत्यनेन कर्तरि लस्य

१ क. एव च तद् । २ क. तत्र पुनस्तात् । ३ सि सुषिरं गृहादीमिरित्यधिकम् ।

यगमनविवक्षितत्वात् तच्छब्दस्य वस्तुस्वरूपत्वाद्वा गच्छतिः साङ्गोपाङ्गार्थविषयक एव, चक्षुर्विषयायामभ्युपेयस्यानर्थक्यात्, अर्थप्रकरणाद्यापादनाच्च, श्रोत्राप्यश्रुतोऽपि गृह्यते स इति गच्छतीत्युक्ते, अन्ते च नाम्नः कर्तृत्वप्रतिपत्तिरिति ।

(तथेति) यथा गच्छतीति च तिपोपात्त एव कर्ता, किं कारणं ? 'लः कर्मणि च' (पा० अ० ५ ३ पा० ४ सू० ६९) इति कर्तरि विहितलकारादेशत्वात्तिपः, कोऽसौ कर्तेति चेदुच्यते स च देवदत्त एव विशिष्टः विशिष्टकर्तृविषयगमनविवक्षितत्वात्, अथवा गच्छतिः साङ्गोपाङ्गार्थविषयक एव, तच्छब्दस्य वस्तुस्वरूपत्वात्, यो यच्छब्दस्य वस्तुस्वरूपः शब्दः स साङ्गोपाङ्गार्थविषयक एव दृष्टो यथा घटशब्दस्य वस्त्वभिधायकोऽर्थो[घट]स्वामिति, एवमनिच्छतो दोष उच्यते—चक्षुर्विषयायामभ्युपेयस्यानर्थक्यादिति—देवदत्तकर्तृविषयां गतिं प्रति[पि]पादयिषता हि वक्त्रा गच्छतिः प्रयुक्तो यदि तमेवार्थं १० न ब्रूयात् तर्ह्यन्यः कोऽर्थः स्यादित्यानर्थक्यं प्राप्तमिति, किञ्चान्यत् अर्थप्रकरणाद्यापादनाच्च—संसर्गविप्रयोगसाहचर्यविरोधार्थप्रकरणलिङ्गशब्दान्तरसन्निधौ वितीर्देशकालव्यक्तिस्वरादिसामर्थ्यभेदैरर्थावा-

---

विभागादिरचनस्याभिधायकेति [illegible]–किं कारणमिति । [illegible] कर्ता विशिष्ट एव देवदत्तादिरर्थ स चेति कर्तृत्वेन तिप कर्तृसामान्यप्रतीतावपि विशिष्टकर्तृविषयगमनस्यैव विवक्षितत्वात् देवदत्तादेरेवागम इति [illegible] [illegible] इति भावः । न केवलं [illegible] [illegible] [illegible] प्रयुज्यत इति किन्तु १५ [illegible] [illegible] प्रयुज्यते [illegible]–अथ वेति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] हि [illegible] [illegible] इमे [illegible] प्रयुज्यते एवमेव [illegible] [illegible] [illegible] [illegible] भावः । तदेव चक्षुर्विषयाया [illegible] [illegible] [illegible] [illegible] प्रयुक्त य [illegible] यदि [illegible] न [illegible] तर्हि च [illegible] [illegible] [illegible] अर्थ एव [illegible] भाव । [illegible] [illegible] [illegible] २० [illegible] [illegible] [illegible] हि [illegible] [illegible] [illegible] [illegible] इति 'संसर्गो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] २५ [illegible] [illegible] [illegible] ; [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], रामो [illegible] [illegible] [illegible] रामः परशुरामः, [illegible] [illegible] [illegible] [illegible] 'रामं प्रत्यग्र' [illegible] [illegible] [illegible] [illegible] [illegible] परमेश्वर [illegible] [illegible] परमेश्वरपरं रामपरम्, [illegible] [illegible] ३० [illegible] मित्रो [illegible] मित्रं [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति । वस्तुत [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] स्वरादिसामर्थ्यभेदैरिति । [illegible] [illegible] [illegible] [illegible] हि गच्छतीत्युक्ते [illegible] च

---

१ लि० च० कर्तरि ।

भवगम्यमानस्य कर्मभिभावानुवर्तिभिर्व्यास्यातृभिर्विक्षेपेऽवस्थापनं दृष्टम्, तत्र तेनैव क्रमेणोपाचार्ये घटते नान्यथेति, तथा श्रोत्राप्यश्रुतोऽपि गृह्यते स इति गच्छतीत्युक्ते, को गच्छति देवदत्त इत्यन्ते-ऽवसाने नाम्नः कर्तृत्वप्रतिपत्तिः, यद्यपि तिपोपात्तं कर्तृत्वं तथापि यां तां गतिं गत्वा नामपदार्थं एव करोतीति प्रतिपत्तिः श्रोतुरपि भवन्ती दृष्टेति[×], [एवञ्च] अन्योऽन्याभिसम्बद्धद्रव्यक्रियावाचिनो नामा-ख्यातशब्दाविति सामूह्यम्, एवमुपपत्त्यनन्तरं शब्दार्थोऽपि द्रव्यक्रियात्मकवस्तुविषय इति भावितम्। 5

अनया च शब्दार्थगतिभावनया लोके दृष्टया भवनमेवैवमेकरूप देवदत्तभेद गतिभेद स्थितिभेदं नृत्यवृत्तिहसनकम्पनादिभेद वा भवतीति सर्वत्र व्यक्तेर्भवति तेन तथा तथा भूयत इति।

अनया चेत्यादि, एतया शब्दार्थगतिभावनयाऽस्मद्व्याख्यातया लोके दृष्टया भवनमेवैवमेकरूपं देवदत्तभेदं गतिभेदं स्थितिभेदं नृत्यवृत्तिहसनकम्पनादिभेदं वा भवतीति सर्वत्र व्यक्तेर्भवति, यस्मात्तेन तथा [तथा] भूयत इति, इतिशब्द[स्य] हेत्वर्थत्वात्—यस्मादेकमेव भवनं देवदत्तद्रव्यात्मकं गतिस्थित्या-दिक्रियारूपञ्च भवति तेनैव तेन तेन रूपेण भूयते न भवनशून्यमन्यत् किञ्चिदस्ति, भवनमेव भवतीति। 10

ननु कारकाणां प्रवृत्तिविशेषः क्रियेत्येतन्न्यायः क्रियालक्षणम्, न सत्तासम्प्रवृत्ति मात्रम्, सर्वत्र प्रवृत्तिसम्भवेऽपि केनचित्फलोद्देशेन कारकवत्याः क्रियायाः पचिपठिगम्यादेः परिग्रहार्थं विशेषग्रहणम्, प्रवृत्तिमात्रपरिग्रहे तु सर्वभावेषु हि प्रवृत्तिरस्तीति सहभाविभिरसह भाविभिर्विशेषैः प्रत्याश्रयं सहिता प्रत्ययाप्रत्ययफला सा तस्याः सर्ववस्तुनि वसन्त्या मुहूर्तमप्यन 15 वस्थानात् किं फलं लौकिकं स्यात्? विशेषास्तूपजायमानाः पच्याद्य ओदनादिफलान्तरहेतव स्वाश्रयाः कारकान्तराण्यपेक्षन्ते, यथा विक्लेदस्तण्डुलाश्रयः काष्ठादीन्यपेक्षते, तत्र या प्रवृत्तिः भवनरूपा सा कारकान्तरानपेक्षत्वेन विशेषाव्यापित्वाच्च प्रवृत्तिसामान्यं क्रिया लोकव्यवहारा-नङ्गत्वात्, भावश्च क्रिया द्रव्यञ्चेति यदुच्यते तत्र क्रियायाः फलोद्देशकारकसम्बन्धाभावात् 20 कुतः क्रियात्वम्? गच्छत्यादिव्यापिरूपता वा? प्रवृत्तिविशेषत्वेनाभूतत्वात्, कारकवत्, वैधर्म्येण तक्षेत्वत्।

इति प्रतिपत्तिः तत्र को गच्छतीति कर्तृविशेषजिज्ञासया देवदत्तो गच्छतीति देवदत्तादिनाम। तत्कर्तृविशेषाऽवगतिरित्याशयेनाह—श्रोत्रापीति। एवं नामाख्यातशब्दौ परस्पराभिसम्बद्धद्रव्यक्रियावाचिनौ क्रियाभिमुखद्रव्य—एवञ्चेति। द्रव्यमेकमेव भवत्स द्रव्यक्रियाव्यतिपत्तव्यवत् कर्मभिरुत्थमेव कर्तृत्वेनात्, देवदत्तादिद्रव्यभेदं भवत्साविभेदेन भवतीति द्रव्यक्रिययोर्भवन सामान्यानुगमभेदं सर्वमिति प्रकृतमभिप्रायमुपदर्शयति अनया चेति शब्दार्थयोर्या गतिर्भाविता तयेत्यर्थः एक एव भावरूप 25 भवत्साधनभेदो वा यथा सर्वतथित्वात् द्रव्यक्रियात्मकस्य विधिविशेषस्य बोधकाः सर्वे शब्दाः सर्वार्थाभिधानसमर्था इती-[illegible]मेव भवनं वस्तु द्रव्यक्रियात्मकं भवति भवनव्यतिरिक्तस्य कस्यापि वस्तुनोऽभावादित्याशयेन व्याचष्टे—एतयेति। तथा च सर्वे भवनरूपमेवेति भवनसामान्यस्यैव क्रियात्वे प्रतिपादिते तदयमुपपन्नफला वैयाकरणेन [illegible] तदर्शयति—ननु कारकाणामिति सूत्रस्यो भाव इति सूत्रव्याख्यानावसरे भाष्यकार क्रियावचनो धातुरिति पूर्वपक्षयन्तु [illegible] करोतीति विशेषमुपपन्नादिविशेषविवक्षितं करोतीच्च सामानाधिकरण्याभावात्तदानां धातुत्वं वक्तव्यमिति चोदितम् 30 लोके हि परिस्पन्दलक्षणा क्रिया प्रसिद्धा [illegible] न परिस्पन्दलक्षणोऽर्थ इति [illegible] क्रियालक्षणं कारकाणां प्रवृत्तिविशेष इति भाष्यकृता प्रणीतम्, सर्वेषां कारकाणामपेक्षणीयप्रवृत्तेरसम्भवात् देवदत्तः पचति काष्ठानि पचन्ति स्थाली पचतीत्येवं सर्वत्र पचिप्रयोगात् प्रवृत्तेरपेक्षणीयत्वात् प्रवृत्तिविशेषः क्रियेति कथितम्, एवञ्च पचनक्रियायां भिन्ने देवदत्ताद् प्रवृत्तिविशेषत्वं सिद्धम्, एतावता वैयाकरणानां [illegible] समाहितं तथा 'सर्वे क्रियाशब्दाः

ननु कारकाणामित्यादि, भवनमेवाविशिष्टं सर्वत्र क्रियेत्यापादिते तदयुक्ततरं वैयाकरणेन क्रियालक्षणमभिधीयते प्रवृत्तिविशेषः क्रियेत्यतस्त्वयाः क्रियालक्षणं न सततसम्प्रवृत्तिमात्रम्, तत्र कारकाणामित्येतस्य व्याख्यानमनुरूपयन्नेः [कृत्यम्] कारकस्येव क्रियात्वं मा विज्ञायि अथवा कारकपूर्वम्भूता प्रवृत्तामिति भेददर्शनार्था षष्ठी, विशेषग्रहणं पुनः किमर्थमिति चेदत आह—सर्वत्र प्रवृत्तिसम्भव
5 इत्यादि, क्षेमविस्फोटेद्देशेनेति, सांव्यवहारिकमोदनादिफलमुद्दिश्यते, कारकचेष्टा इति साधनाङ्गम् तण्डुलादिसाधनवता इत्यर्थः, सर्वा हि क्रिया कर्तृसमवायिनी वा स्यात् पचतीतिमितविक्लेदनवतीति, पर्यवसानाः पचिपठिगम्यादेः परिग्रहार्थं क्रियायेन्न विशेषग्रहणमिति, प्रवृत्तिमात्रपरिग्रहे त्वस्मिन् दोष उच्यते—सर्वभावेषु हि प्रवृत्तिरस्तीत्यादि रूपादिभिः सद्भावैरसद्भावैर्गतिस्थितादिभिश्च विशेषैः प्रत्यात्मं वस्तुनि सन्निहिता—युक्तैव सा प्रवृत्तिः प्रादुर्भावतिरोभावात्मिकेति, [स्व]रूपस्य
10 स्थाः क्रियमिति, भवत्याम्भवनपरमेति कार्यसामान्यक्रियां गृहीत्वोक्तं भाष्यकारेणेति तस्याः सर्वत्र वस्तुनि वसत्त्वाः स्वरूपस्वरूपमात्रप्रदर्शनार्थमुक्तमिति मन्य प्रयोजनमस्ति, सर्वस्या मुहूर्तमप्यनवस्थानात् किं फल

वस्तुर्दशा अन्यथा हि कारकमन्तरो प्रवर्तन्ते अन्यथा हि [१]क्रियतामित्युक्तम् । अत्र [illegible] मवनमेवेति । [illegible] किमार्ते [illegible] कारकमिति [illegible]—तत्र कारकाणामिति कारकान्वयेन [illegible]
15 [illegible] । विशेषग्रहणप्रयोजनम्—विशेषग्रहणमिति सर्वे सर्वा प्रवृत्तिरन्या, तत्र [illegible] इति भावः । [illegible]—सांव्यवहारिकमिति । [illegible]
20 [illegible]—कर्तृसमवायिनी वेति [illegible] इति भावः । [illegible]—प्रवृत्तिमात्रेति [illegible]
25 [illegible] इति भावः । [illegible]
30 भावः । स्वरूपेति [illegible] इति भावः । [illegible]—सर्वस्या इति सर्वस्याः [illegible] भावः । [illegible]

---

१ सि क. [illegible] । २ सि क. [illegible] । ३ सि क. [illegible] । ४ सि. क [illegible] ।

लौकिकी—सांव्यवहारिकमिति व्यवहारासमर्थां दर्शयति, विशेषग्रहणसामर्थ्यात् पुनर्विशेषास्तूपजायमानाः पच्यादयः ओदनादिफलसम्पत्तिहेतवः सामग्र्याः कारकान्तराण्यपेक्षन्ते, तमिदर्शयति यथा विक्लेदनस्तु-ण्डुलानाम् काष्ठादीन्यपेक्षत इति, तदुपनयति तत्र या प्रवृत्तिरित्यादि गतार्थं यावत् प्रवृत्तिसामान्यमिति इति विशेषग्रहणसाफल्यं व्याख्यातं भवति, प्रवृत्तिसामान्यस्याक्रियात्वञ्च यावच्च क्रियेत्यादि यावत् कुतः क्रियात्वम् ? फलोद्देशकारकसम्बन्धा[भा]वादुच्यते द्रव्यं च क्रियत इति प्रश्नपदच्छेदेन स्वमोच्यते 5 द्रव्यक्रियात्मको भाव इति तत्र सिद्धसति त्वदभिमतक्रियाभावासिद्धेरित्यर्थः, इतश्चासिद्धिः विशेषाव्यापित्वात् प्रवृत्तिसामान्यं क्रियेति तत्प्रदर्शनार्थमाह गच्छत्यादिव्यापिरूपता चेति, कुत इति वर्तते, गच्छत्यादिव्यापिनी न भवति त्वदिष्टप्र[वृ]त्तिसामान्यलक्षणा क्रिया, प्रवृत्तिविशेषत्वेनाभूतत्वात्, यद्यत् प्रवृत्तिविशेषत्वेनाभूतं तद्गच्छत्यादीन् न व्याप्नोति यथा कारकं कारकाणां प्रवृत्तिविशेषत्वेनाभूतमक्रिया, अक्रियात्वञ्चानयोः सिद्धमिति दृष्टान्तः साधर्म्येण, वैधर्म्येण तदेवमिति, या या क्रिया सा सा 10 प्रवृत्तिविशेषत्वेन भूता यथा गच्छतितिष्ठत्यादिक्रियाभेदो भ्रमणपतनसर्पणरिङ्खणादयो वा गमनविशेषाः, तस्माद्गच्छत्याद्यव्यापित्वादप्यक्रियात्वं प्रवृत्तिसामान्यस्य कारकवदिति ।

यगतद्रव्यार्थान्तरभूतक्रियापदार्थत्यागो दोषः, एष प्रयोगेऽपेक्ष्यते यत्तद्रव्यं ततो नान्यदित्यादि गतार्थं यावदभ्युपगमविरोध इति, एवमभिधानाद्व्युत्पत्तौ[व्युत्पत्तौ]रित्यादि, अत्र द्रव्यावस्थेत्यस्य शब्दस्यार्थद्वयकल्पना स्यात्—राजपुरुषाभिसम्बन्धवद्व्युत्पत्तिः, [व्युत्पत्ति]र्वा राजपुरुषशब्दवत्, उभयथापि अवचना[भि]विरोधः, प्रसज्यते तत्र तावद्व्युत्पत्त्यवस्थायास्ततोऽन्यत्व—द्रव्यादन्यावस्था तस्यैवापि विषयत्वस्वाच्यत्वात् तस्य स्वस्वामिसम्बन्धाविर्भावात् विषयिणोऽवस्थासम्बन्धेन वाच्यस्य द्रव्यस्य, इतरथा 5 [द्र]व्यशब्दोऽवस्थाशब्दो वाऽनर्थकः स्यात्, इह तद्विशेषवाचिनोऽपि शब्दस्य वाच्यार्थोऽन्य इत्यवश्यमभ्युपगन्तव्यम्, देवदत्ताश्ववत्, यथा देवदत्ताश्व इत्युक्ते देवदत्तस्य स्वमश्वः सोऽस्य स्वामीति तेन विषयेण स्वामिविषयेणाश्वसम्बन्धेन तस्य देवदत्तस्य वाच्यत्वात् ततोऽन्यत्व दृष्टमेव द्रव्यावस्थेति ।

शिलापुत्रकशरीरवत्तेति चेन्न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात् ।

(शिलेति) शिलापुत्रकशरीरवत्तेति चेत्—स्यान्मत शिलापुत्रकस्य शरीरमित्यत्र शिलापुत्रकादनन्य 10 स्मिन्नपि शरीरे स्वामिविषयसम्बन्धवाच्यत्वदर्शनादनैकान्तिकतेति एतच्च न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात्, यदनन्यच्छिलापुत्रकाच्छिलापुत्रकशरीरं शरीरमेव शिलापुत्रक इति यद्युच्यते, यथाममात्र प्रतीतपदार्थकं भवति अन्यतरप्रयोगानर्थक्यं स्यादुक्तार्थत्वात् तथा द्रव्यमेवावस्था द्रव्यावस्थेत्यन्यतरानर्थक्यम्, तस्मादन्यतरानर्थक्यादेवानुपपन्नं शिलापुत्रकशरीरवत्त्वानैकान्तिकतेति ।

किञ्चान्यत्— 15

अथापि शरीरावस्थाक्रियात्वादन्यत्वम्, शिलापुत्रकेण शीर्यते शरारुत्वाच्छरीरमिति शरारुर्भवति तेन शरारुणा भूयत इति द्रव्यक्रियाभिधानं नातिवर्तते, तथा च द्रव्यस्यावस्था द्रव्यमवतिष्ठते द्रव्येणावस्थीयत इत्यवस्थानस्य क्रियात्वानतिवृत्तेः, व्युत्पत्तावपि सामासिकपदत्वात् समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्तरि विहितत्वात्, सा यद्विषया द्रव्यस्य कर्तृत्व

एष प्रयोगेऽपेक्ष्यत इति । एवं द्रव्यावस्थेतिशब्देन व्युत्पत्तिस्थले चाभेदाभ्युपगमो विरुध्यत इत्याह—एवमभिधानादित्यादि, 20 द्रव्यावस्थेत्यभिधानादित्यर्थः । अर्थद्वयकल्पनेति राज्ञः पुरुष इत्यादिवदभ्युपगमव्युत्पत्तिपक्षे राजपुरुषशब्दवत्सामासिकशब्दत्वमव्युत्पत्तिपक्षे चार्थद्वयकल्पनेऽपि वचनाभिविरोधो भवतीत्यर्थः । तत्र तावदव्युत्पत्तिपक्षे विरोधं दर्शयति—तत्र तावदिति द्रव्यावस्थायामन्यत्वमभ्युपगतेऽपि द्रव्यस्यावस्थेति षष्ठीसमासार्थत्वात् स्वस्वामिभावसम्बन्धस्य षष्ठीविषयत्वेन द्रव्यादन्यत्वं [illegible] द्रव्यशब्दोऽवस्थाशब्दो वा व्यर्थः स्यादिति द्रव्यावस्थाशब्दयोर्द्वयोः द्रव्यस्यैव विषयत्वमिति भावः । तत्र दृष्टान्तमाह—देवदत्ताश्ववदिति यथाऽत्र देवदत्तः स्वामी अश्वस्य 25 अश्वश्च देवदत्तस्य स्वमिति तयोर्भेदश्च प्रतीयते तथा द्रव्यावस्थाशब्देऽपि सम्बन्धयोर्भेदार्थप्रतिपादकत्वाद्भेदोपादानं सिद्धमिति भावः । ननु स्वस्वामिभावसम्बन्धेऽपि न भेदः प्रतीयते शिलापुत्रकशरीरादौ स्वस्वामिभावसम्बन्धेऽप्यभेददर्शनादनैकान्तिकत्वमित्याह—शिलापुत्रकेति । तदाशयं—स्यान्मतमिति । एवं तर्हि शिलापुत्रकशरीरशब्दयोः समानार्थत्वेन पर्यायशब्दप्रयोगेऽन्यतरवैयर्थ्यं वैयर्थ्यमन्यतरस्य स्यात्, एवं द्रव्यावस्थाशब्देऽपीति स्वस्वामिविषयसम्बन्धवाच्यत्वं भेदव्याप्तमेव न शिलापुत्रकशरीरादौ व्यभिचारः तत्रापि शिलापुत्रकशरीरयोरभेदे समानार्थत्वेन वैयर्थ्यप्रसङ्गात् भेदस्यावश्यकत्वादित्याशयेन 30 व्याचष्टे अवस्थाशरीरेति । किञ्च तयोः परस्परं द्रव्यक्रियात्मकत्वेन शिलापुत्रकशरीरस्यापि तथात्वेन नानैकान्तिकत्वमिति दर्शयति—अथापीति शिलापुत्रकशरीरमित्यत्र शरीरशब्दः क्रियाकर्तृ [illegible] धातुनिष्पन्नत्वेन क्रियाविषयत्वादि

१ सि. क. भवे दि । २ सि. क. °भिधानात्वे । ३ सि. क. °र्थद्वन्द्वि वि । ४ सि. क. °वाध्यते ।

ततोऽर्थान्तरभूतां तां तदन्यगतिविच्छेदप्रतिबन्धात्मिकामवस्थां दर्शयति, आत्मनोऽक्रिया-त्वात् क्रियामन्तरेण कर्तुः कर्तृत्वाभावात्, तस्मात्तु पचावद्युत्पत्ती च यदि द्रव्यं ततोऽन्यत्र यतोऽन्यस्या ततो द्रव्यमिति विरुध्यते ।

(अत्रापीति) अत्रापि शरीरावस्थाक्रियात्वादन्यत्वम्—नन्वस्माभिरुपपादितं द्रव्यक्रियात्मकं

5 तत्र वस्तिवति, तथात्रापि शिलापुत्रकेण शीर्यते शरारुत्वाच्छरीरमिति शरारुर्भवति तेन शरारुणा भूयत इति द्रव्यक्रियाभिधानं नातिवर्तते, यथा च द्रव्यसाधना—द्रव्यमवतिष्ठते द्रव्येणावसीयते इत्य-वस्थानस्य क्रियात्वानतिवृत्तेस्ततोऽन्यत्वमेव, एवं तावद्व्युत्पत्तौ, अव्युत्पत्तावपि सामासिकपरत्वात् समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्तरि विहितत्वात्—कर्तरि षष्ठीयं द्रव्यसाधनेति द्रव्यस्यावतिष्ठ इत्यपि मामभूत्, सा षष्ठिप्रयमित्यादि यावत् तदन्यगतिविच्छेदप्रतिबन्धात्मिकामवस्थां दर्शयति सा—षष्ठी

10 षष्ठिपद्य द्रव्यस्य कर्तृत्वं—यां क्रियां साधयत् साधन कर्तृ भवति तद्रव्य ततोऽर्थान्तरभूतां तां—अवस्था-मक्रियां, दर्शयतीति सम्बध्यते, किं कारणं ? आत्मनोऽक्रियात्वात्—तस्य द्रव्यस्य स्वयमक्रियात्वात् क्रियामन्तरेण कर्तुः कर्तृत्वाभावात् कर्तरि षष्ठी [न]स्यात्, यता—तस्मात् द्रव्यादन्यत्र गतिः, अन्यस्य गतिः, द्रव्यादिविच्छेद—परिस्पन्दः परिणतिः पूर्वस्या [illegible] प्रच्युतिः क्रियान्तरान्तरागतो वा तयोरन्यगतिविच्छेदयोः प्रतिबन्ध आत्मा यस्या अवस्थानक्रियायाः सा तदन्यगतिविच्छेदप्रतिबन्धा-

15 त्मिका तां दर्शयति षष्ठीति अथवा तदन्यगतिरिति—तस्मिन्न नियमेन गतिर्विच्छेद शेषं पूर्ववत्, पूर्वस्मिन् व्याख्याने भेदोऽनयोः, गतिर्देशान्तरप्राप्तिः[वि]च्छेदं स्वदेशेऽपि व्यावृत्तवेति इह पुनरभेद इति विशेषः, तस्मात्तु पचावद्युत्पत्तौ च यदि द्रव्यं ततोऽन्यस्येति विरुध्यते, यतोऽन्यस्या ततो द्रव्यमिति विरुध्यते, व्याहतत्वात् लोके यथा तस्मात् प्रमाणविरोधः तथानुमेयत्वादनुमानविरोधः, तथैव

20 आह शिलापुत्रकेण शीर्यत इति अनेन क्रिया प्रतिपादिता । शरारुणा भूयत इति अनेन द्रव्यं प्रतिपादितम् । एव द्रव्यस्य साधनत्वेनापि द्रव्यक्रियात्मकं वस्त्वेव इति दर्शयति—तथा चेति । एवमव्युत्पत्तिपक्षमवेत्य येन आदर्शित द्रव्य—पचम्यादावेरिति । द्रव्यसाधनेति षष्ठ्या [illegible] क्रियाकर्तृत्वेन [illegible] अव्युत्पत्ति-मादर्शयति—अव्युत्पत्तावपीति । सा षष्ठिप्रयमिति दर्शं हि षष्ठी द्रव्यसाधनस्यानभिव्यक्तकर्तृत्वं बोधयति द्रव्यस्य क्रियाहेतुत्वात् एवं द्रव्यस्वरूपस्य अन्यत्वमपि दर्शयति द्रव्यस्य क्रियातो भिन्नत्वात्, [illegible] तद् क्रिया-

25 द्रव्यमिति अन्यच तस्य क्रियाकर्तृत्वाभावेन [illegible] कर्तृत्वं दर्शितमिति भावः । अथ द्रव्यान्तरत्वं दर्शयितुमाह तत इति तदन्यगतिविच्छेदप्रतिबन्धात्मिकामिति तस्य षष्ठिविच्छेदयोर्भेदमेवाभ्युपगम्य द्विधा व्याख्यानं कर्तुम-न्यत् व्याख्यानं दर्शयति—तस्माद्द्रव्यादिति अन्यगतिश्च विच्छेदश्च[illegible] तथान्यगतिविच्छेदे तदन्यगति-विच्छेदे इत्येवं तयोः अवस्थानक्रिया हि द्रव्यान्यत्वात्त यदि प्रतिबध्नाति, तथा द्रव्याद्विच्छेदं—द्रव्यस्य [illegible] प्रच्युतिं द्रव्यस्य [illegible] भिन्नमा प्रच्युतिर्वा, तथापि प्रतिबध्नाति षष्ठीति भावः । षष्ठिविच्छेदयोर्भेदमङ्गीकृत्य

30 व्याख्याने भेदं वेति । पूर्वस्मिन्निति पूर्वव्याख्याने षष्ठिविच्छेदयोर्भेदः अत्र व्याख्यानेऽभेद इति विशेषः । भेदस्तु षष्ठी-विच्छेदयोर्दर्शयति—गतिरिति । व्युत्पत्त्यव्युत्पत्तिपक्षयोर्व्याख्यानयोर्भेदात् [illegible] साधनविरोध एवेति [illegible] तस्मादिति । [illegible] दर्शयति—व्याहतत्वादिति [illegible] इत्याशयेनाह [illegible] । [illegible]

1 भि ॰ क॰ एतुज्य ।

त्वविरोधः, एव द्रव्यावस्थाविशेष इति क्रियालक्षणमभ्युपगमादविरोधादयुक्तम्, कारकसाधनयोगे[1] भाव इत्येतयोः का[र्या]त्म्यव्यापारलक्षण[त्व]मिति तैरेव निराकृतमिति ।

स्वमनोरथानुवृत्तेस्तु द्रव्यमात्रदर्शनाभिमुखीभूयापि बलादेवात्माभ्युपगतस्वद्रव्यशब्दार्थवशात् पुनरपि द्रव्यावस्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, भवति भवनं वा द्रव्यमिति भव्यार्थत्वात्, तत्र प्रकृतिप्रत्ययार्थव्युत्पत्तेर्द्रव्यक्रिययोः सिद्धिः, यद्भूयते 5 सा क्रिया यद्भवति तद्द्रव्यमिति साध्यसाधनभेदात् ।

स्वमनोरथानुवृत्तेस्त्वित्यादि, द्रव्यस्यावस्थामात्रं क्रिया नार्थान्तरमित्येषः सांख्यमतानुवर्तिनो भवतः परमत्ययो मनोरथः स नोपपद्यते, सर्वत्र द्रव्यक्रियात्मकभावापत्तिभावादुक्तवत्, यथापि स्वमनोरथमनुसृत्य द्रव्यमात्रदर्शनाभिमुखीभूयापि—अध्यक्षतः श्रूयमाणमपि उज्झित्वा, यद्यपि तदुपर्युक्त स्वाङ्गीकृतचेतसो न किञ्चिद् ब्रूमः तथापि बलादेव—उपपत्तेरेवात्माभ्युपगतस्वद्रव्य 10 शब्दा[र्थवशा]त्—बलादागतमभिमत तस्य तव सांख्यस्य च द्रव्यमेवार्थः, तदभिधायिनो द्रव्यशब्दस्य वशात् तदर्थवशाच्च पुनरपि—वारं वारं[2] द्रव्यावस्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, सा क्रियाऽऽपन्ना, कस्मात्? भवति भवनं वा द्रव्यमिति भव्यार्थत्वात्, द्रव्यश्च भव्ये भव्यशब्दश्च कर्तरि भावे चाऽस्तु तथा द्रव्यशब्दोऽपि, तत्र द्रव्यशब्दस्य भव्यार्थत्वात् प्रकृतिप्रत्ययार्थव्युत्पत्तिरवश्यम्भाविनी, प्रत्यय[प्रकृति]प्रत्ययार्थव्युत्पत्तेः द्रव्यक्रिययोः सिद्धिः—प्रकृत्यर्थस्य क्रियात्वात् प्रत्ययार्थस्य द्रव्यत्वात् कथं 15 व्युत्पत्तिरिति चेदुच्यते साध्यसाधनभेदात्, यद्भूयते सा क्रिया, यद्भवति तद्द्रव्यम्,—यद्भूयता वस्तुना भूयते स प्रकृत्यर्थो भावः, यद्भवति तत्कर्तृ, तस्मात् कर्तृभाव[ना]नात्वाद्द्रव्यक्रियानानात्वं स्यात्,

---

द्रव्यावस्थयोर्भेदस्य दर्शनादेवविरोध इत्याह—लोक इति । तयोर्भेदस्यानुभवसिद्धत्वेऽपि तयोरैक्यं निरस्यत इत्याह—तथेति । सर्वविरोधमाह—तद्वदेवेति । द्रव्यावस्था क्रियेति अभ्युपगमेऽपि एकत्वाभ्युपगमादविरोधादयुक्त इत्याह—एवमिति । द्रव्यस्य कारकभेदात् साधनयोगाद् भेदात् अभेदोऽप्यभावः साधनयोगो भाव इत्यपरेषां मतं तैरेव प्रकारो दोषमाहुर् 20 दर्शितमिति भाव तदस्तु इति दर्शयति—कारकसाधनेति । अथ द्रव्यमात्रं तत्त्वमिति सांख्यपक्षाभ्युपगमेऽपि क्रियाया अर्थान्तरत्वं प्रसक्ते तदन्यस्य एवेत्याह—स्वमनोरथानुवृत्तेस्त्विति द्रव्यमात्रप्रकाशस्य मनोरथमात्रत्वे कारणमाह—सर्वत्रेति भावस्य द्रव्यक्रियोभयस्वभावत्वात् प्रतिपादितत्वादिति भावः । तदुपरि स्वीकृतचेतसो वयं तव दर्शनविरोधेन स्वपक्षपरिहारेण यद्यपि किञ्चित् ब्रूमो नैवोक्तं स्वपक्षापि युक्तिभिरेव द्रव्यमिथ्या क्रिया सिद्धीत्याह—यथापीति । तद-वैयर्थ्यस्य द्रव्याभिधानक्रियापत्ते हेतुमाह—भवतीति । भवतीति कर्तृव्युत्पत्तिः भवनमिति भावव्युत्पत्तिर्भव्यशब्दस्य, 25 भव्यशब्दो हि 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' इति सूत्रेण भावे कर्तरि च निपातितः 'द्रव्यं च भव्ये' इति तद्धितसूत्रेण भव्यार्थे द्रव्यशब्दो निपातित तस्माद्द्रव्यशब्दो भव्यशब्दवत् कर्तरि भावे वा तत्तद्व्युत्पत्तिभेदेन च भावप्रधानपक्षे क्रियायाः कर्तृप्रधानपक्षे द्रव्यस्य च सिद्धिरिति भावः । द्रव्यशब्दयोगेन तत्सिद्धिमाह—'द्रव्यश्चेति । द्रव्यशब्दार्थयोगेन तत्सिद्धिमाह—तत्र द्रव्यशब्दस्येति भव्यत्वेन द्रव्यशब्दस्य भव्यार्थत्वेनैकत्वात् क्रियाकर्तृभावविशेषस्य विरोधादुभयोरपि प्रकृतिप्रत्ययविभागकल्पनाऽभिधानात् प्रकृतिभूतस्य भूधातोः क्रिया 30 प्रत्ययार्थः कर्ता द्रव्यमिति द्रव्यक्रिययोः सिद्धिरिति भावः । प्रकृतिप्रत्ययार्थव्युत्पत्तिमेव दर्शयति—साध्यसाधनभेदादिति । धात्वर्थरूपा क्रिया साध्यम्, प्रत्ययार्थरूपः कर्ता सिद्धरूपः भावप्रत्ययार्थोऽपि क्रियैवेति सिद्धसाध्यत्वाभ्यां कर्तृभाव-

---

१ सि क. योगमात्र । २ सि. क. वारं वारं । ३ सि क भावात्वात् ।

नान्यथा, तस्मान्मयोरवयानभक्तद्रव्यक्रियार्थवचनात् भव्यभवनमानिसम्बन्धाच्च भवत्येव द्वितयमितीदं साधूक्तम् ।

यत्पुनरेतदुक्तमविशिष्टदेशसंयोगो वा स्थितिरिति लक्षणं तत्र युक्तं वाक्यानर्थक्यम्, विकल्पार्थासम्भवात् द्वाभ्यामविरोधात् ।

5 (यदिति) यत्पुनरेतदुक्तमविशिष्टदेशसंयोगो वा स्थितिरिति लक्षणं तत्र युक्तं वाक्यानर्थक्यम् तथापि वाक्यस्यानर्थक्यं विकल्पार्थासम्भवात्, कस्मात् पुनरयुक्त ? द्वाभ्यामविरोधात्—क्रिया द्रव्यदर्शनान्तरमिलनेन दर्शनेनाविरोधात्, यस्मिन्नपि क्रियालक्षणेन द्रव्यक्रियालक्षणेन च प्राग्युक्तेन न्यायेन चाविरोधादिति, एवं तावत् प्रवृत्तिसामान्याभिन्नात्वमित्युक्त्वार्थविशेषग्रहणप्रयोजने दोषाभिधानं कृतम् ।

अमुनैवमपि विशेषग्रहणप्रयोजनं दूष्यते—

10 यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते सर्वदा सर्वभावानां प्रवृत्तिसम्बन्धात् देवदत्त इति नामप्रवृत्तिकम् सप्रवृत्तिकमेव, पचत्यादिवद्देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् क्रियावचनो धातुरिति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात् पुनः देवदत्तादयो विशेषा न भवन्तीति नियम्यन्ते, सर्वमेवसम्बन्धानुगुण्यात्तु प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवभवनभावविशेषे शब्दस्याविशेषार्थत्वात् न क्रियेति ।

(यदपि चेति) यदपि च द्वितीय विशेषग्रहणप्रयोजनमभिधीयते सर्वेषामपि, सर्वेषि
15 प्रवृत्त्यविनाभावि दर्शयति, सर्वभावानामिति व्याप्तिः, कुतः ? प्रवृत्तिसम्बन्धात्, हेतोः देवदत्त इत्यपि न अप्रवृत्तिक—नाकिञ्चं वस्तु तेन शब्देनाभिधीयते, किं तर्हि ? सप्रवृत्तिकमेवोच्यते, यथा पचत्यादीनां क्रियावचनत्वमेव देवदत्तादीनां द्रव्यवाचित्वाभिमतानामपि, वाक्यस्यार्थस्य प्रवृत्त्या सत्तया भवनादिसर्वभवनात्मिकया समन्वितत्वम्, ततः पचत्यादिवद्देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् 'क्रियावचनो धातुः' (महाभा० अ० १ पा० ३ सू० १) इति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात्
20 पुनर्विशेषा न भवन्तीति नियम्यन्ते, कस्मात् पुनर्देवदत्तादयो विशेषा न भवन्तीति ? उच्यते

भेदाभ्युपगमवशेर्भेद इति भावः । एतदेवाचष्टेऽपि—यदुक्तम् इति । अयोस्त्वयोरिति एतदुक्तेस्माने प्रकृते [illegible] द्रव्यक्रियार्थयोरभेदः । द्रव्यं भव्य इति द्रव्यार्थानुसम्बन्धभवनात्, भव्यभवनं भवत्येव [illegible] भेदद्वितयमित्याह—साध्विति । अथ [illegible] स्थितिलक्षणं [illegible] यत्पुनरिति । [illegible] प्रयोग [illegible] भवत्येव स्थिति [illegible]
25 इति भावः । [illegible] प्रवृत्तिसम्बन्धात् [illegible] क्रिया [illegible] विशेषग्रहणमिति [illegible] यदपि चेति । देवदत्तादेर्नाम्न एव क्रियावचनत्वमित्याह—प्रवृत्तिसम्बन्धादिति, क्रिया हि कारकाद्यैरेव [illegible] कारकाणां हि [illegible] तदेवेदं [illegible] । एवं द्रव्यस्यापि क्रियावचनत्वम् देवदत्तस्य [illegible] । प्रयोगे [illegible] किन्तु [illegible] भावस्यापेक्षैव तथा क्रियावाचकस्य द्रव्यस्यापि प्रयोगे [illegible]
30 देवदत्तादेर्नाम्नस्तदा देवदत्तादिनाम्नामपि क्रियावचनत्वम् [illegible] इति भाव । [illegible] च विशेषग्रहणे क्रिया [illegible] देवदत्तादिशब्दा न क्रियाविशेषवचना इत्याह—विशेषग्रहणमिति । तत्र कारणमाह—सर्वमेवेति [illegible]

सर्वमेवसम्बन्धानुगुण्यात् नाय विशेषः—सर्वैर्हेतिपठितगम्यादिभिर्भेदैर्देवदत्तभवनप्रवृत्तेः सम्बन्धेनाऽनुगुणत्वात् प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवद्भवमभावविशेषे तु सम्बन्ध[ा] विशेषार्थत्वात्, तस्मात् [न] क्रियेति देवदत्तादेरक्रियात्वमुपसंहरति, इतिशब्दस्य समाप्त्यर्थत्वात्, एवमय विशेषग्रहणमिति प्रकृतोपसंहारः, प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामान्यमिति न भवनमात्र नापि देवदत्त इत्युपसंहारार्थः ।

अस्यापि विशेषग्रहणस्य सदोषत्वमुच्यते— 5

इदमपि स्वकग्रन्थार्थोत्थानम्, प्रत्यास्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गश्च ।

(इदमपीति) इदमपि स्वकग्रन्थार्थोत्थानम्,—इदं हि विशेषग्रहणप्रयोजनव्याख्यानमुत्थान एव ग्रन्थार्थत्याग कुरुते, अपिशब्दात् प्रागुक्तभवनसामान्यक्रियात्वनिवृत्त्यर्थं विशेषग्रहणमन्वे क्रियमेव समवतीति स्मारयति, सर्वदा सर्वभावानां प्रवृत्तिसमन्वयादिति हेतुवचनेन देवदत्त इति नामप्रवृत्तिरिति नामवाच्यार्थस्वरूपवचनेन च प्रवृत्तिमात्रमेवेद न द्रव्यं नामेति ग्रन्थार्थस्य प्रागभ्युपगतस्य त्यागः 10 कृतो भवतनेनापि विशेषग्रहणप्रयोजनवचनेन द्वितीयेनेति, न केवल ग्रन्थार्थत्याग एव दोषः, किं तर्हि ? प्रत्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गश्च ।

इदं कथमिति चेदुच्यते—

यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे प्रवर्तत ईहते चेष्टत इत्यादीना धातुसंज्ञा न प्राप्नोति क्रियावचनानामेव धातुत्वात्तेषामक्रियात्वात् तथेहापि देवदत्तादिधातुत्व 15 निवृत्त्यर्थे विशेषग्रहणे घृतादीनां धातुसंज्ञा नैव प्राप्नोति, अक्रियावचनत्वाद्देवदत्तवत्, स वा क्रिया स्यात् सर्वमेवसम्बन्धानुगुणत्वाद्घृतादिवत्, अनिष्टश्चैतदिति । प्रवृत्तिसामान्यनिवृत्त्यर्थे देवदत्तादिद्रव्यनिवृत्त्यर्थे च विशेषग्रहणे द्विधाऽप्यस्वशब्दोपादानसाध्यमाधादिलक्षणमुक्तिवचनस्यानर्थकं स्यात्, द्वयोरपि क्रियात्वात् ।

यथा तत्रेत्यादि ग्रन्थ उपसंहृते दोषास्तत्स्या चोपमेयोत्तरत्वेन समर्थयति, मान्यथरेण भूर 20 कर्तृस्थाः फलोद्देशिन्याः क्रियास्य प्रतिपाद्योपसंहृत तस्मात् प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामान्यमिति, तत्र दोष आसज्यते यदि प्रवृत्तिविशेषः क्रिया प्रवर्तत ईहते चेष्टत इत्यादीनां धातुसंज्ञा न

धातिर्मोक्षविरोधमात्मका ये एव हि विशेषा तमोन्मुक्ता प्रकृतिः स्थितिरूपा सामान्यात्मिका इत्युच्यते अत एव सामान्ये सर्वं भवति एवमविर्मोक्षविरोधाभावधर्मैरेतस्मिन्नेऽपि सामान्यसैवस्मवता प्रकृत्यात्मत्वेन न प्रवृत्तिविशेषतेति देवदत्तादिद्रव्यवाचिनो न धातुत्वमिति भावः । तत्र व्याख्यातम्—भवनवदिति ग्रन्थस्य—देवदत्तादिशब्दस्य अविशेषार्थत्वात्—भवनमात्रवाचित्वात्, सर्वसाधारणविशिष्टानां भवनसामान्यवाचित्वेन न क्रियाविशेषवचनत्वमेवं देवदत्तादिद्रव्यवाचिनामपीति भावः । तदेवमुक्तं 25 विशेषग्रहणप्रयोजनं दूषयति—इदमपीति विशेषग्रहणेन तत्प्रयोजनवर्णनपरव्याख्यानेन च क्रियाया द्रव्यस्य च निराकरणेन इदं वस्तेति भावः । एतदेवाह—इदं हीति । प्रवृत्तिमात्रमेवैतदिति वैयर्थ्येन द्रव्यस्य त्यागस्तत्त्वाख्यानेन त्याग इत्याह—प्रवृत्तिमात्रमेवेदमिति । प्रत्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गमेव स्फुटीकरोति—यथा तत्रेति कारकवत्त्व इति वाच्यवाचिनि तत्र शब्दस्य वाचकत्वे प्रकृतिः क्रिया सा पूर्वं सामान्यस्य भावाद् प्रथम वर्तते तस्मात् कारकाणां प्रकृतिविशेषा क्रियेति 30 व्याख्यानमिदम् । तद्व्याख्यानस्य निर्वाहार्थं वर्णं दर्शयति—तस्मादिति । तत्र दोषमुद्भावयति—यदीति विशिष्टप्रयोगेण क्रियात्वे

१ सि. क. सम्बन्धिना ।

प्राप्नोति क्रियावचनानामेव धातुत्वात् तेषामक्रियात्वात्—प्रवृत्तिविशेष[स्य] क्रियात्वाविशेष दोषः यथा तत्र प्रवृत्तेः सामान्यनिवृत्त्यर्थे विशेषग्रहणे, तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे विशेषग्रहणे द्वैतादीनां धातुसंज्ञा नैव प्राप्नोति किं कारणम्? अक्रियावचनत्वात्, देवदत्तवत्, तद्धर्मस्याक्रियात्वादक्रियावचनत्वम्, तद्धर्मस्याक्रियात्वं सर्वभेदसंबन्धानुगुण्यात्, स वा देवदत्तः क्रिया स्यात् सर्वभेदसम्बन्धानुगुण्यात्, 5 द्वैतादिवत्, अनिष्टं चैतदिति, किमन्यत्—प्रवृत्तिसामान्यनिवृत्त्यर्थे देवदत्तादिद्रव्यनिवृत्त्यर्थे च विशेषग्रहणे द्विपात्त्वसम्बन्धोपादानसाम्यमाभाविकत्वमनुक्त्वा प्रत्यानर्थक्यं स्यात्—अनुक्तसम्बन्धोपादानसाम्यभावो भावस्यैव, भावाभिमुख्यात् सम्बन्धोपादानसिद्धभावः सत्त्वमिति लक्षणमुक्तं एव पूर्वमिति[न] वस्तुनोऽपि, सिद्धसंख्याविभक्तिसंख्याविशेषेण द्वयो प्रथमस्य तथा क्रियाक्रियाभिधायकत्वं भूवा-भूवमेव द्वैतादिप्रत्ययस्यग्रहणवचनमनर्थकं द्वयोरपि क्रियात्वादिति ।

10 यथा च समोप्यते नैव दोषः, विशेष इति हि भवतः क सम्प्रत्ययः? य उपादीयमानोऽर्थं निवर्तयतीति परो ब्रूयात् यथैवं द्वैतादयोऽपि उपादीयमाना विशेषाभिवर्तयन्ति तैर्हि गच्छत्यादयो विशेषा निवर्त्यन्ते न गच्छति न शेते न भुङ्क्ते वर्तते एवास्ति भवति विद्यत एव केवलमिति, तिष्ठत्यादिवत् यथा चोक्तं भाष्यकारेण 'सामान्यमपि यथा विशेषस्तद्वदिति', (महा० अ० १ पा० २ सू० २४) तत्रैषां सिद्धा धातुसंज्ञेति यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे 15 विशेषग्रहणे परिहार एवमिहापि प्रत्युच्यते, एवञ्चोच्यमाने नन्वसन्मृदय एव दृष्टं फलमभिन्नकम्, नन्वस्माभिरप्यभिहित प्रवृत्तिरेव प्रवृत्तिविशेष इति, एवञ्च कृत्वा प्रवृत्तिमात्रस्य सर्वत्र भावात् विशेषग्रहणमनर्थकमुभयोरपि व्याख्याविकल्पयोः ।

सामान्यप्रवृत्तिवाचकानां प्रवर्तेत इत्यादीनां धातुत्वं न स्यादिति भाव । द्वितीये विशेषग्रहणप्रयोजनमपि दूषयति—तथेहापीति । इत्थं विशेषग्रहणे देवदत्तादीनां सर्वविशेषाधारतया सामान्यप्रवृत्तिरूपत्वाच्च धातुत्वं यथा तथैव द्वैतादिसामान्यप्रवृत्तिवाचकानां 20 धातुत्वं न स्यात् [illegible]। सर्वविशेषाधारतया सामान्यरूपत्वेन प्रवृत्तिविशेषत्वस्य क्रियात्वस्याभावादित्याह—अक्रियावचनत्वादिति । सामान्यप्रवृत्तेरक्रियात्वे हेतुमाह—तद्धर्मस्येति द्वैतादिधात्वर्थस्येत्यर्थः । सर्वे ये भेदा विशेषास्तत्सम्बन्धानुगुण्यमित्यर्थः । सर्वभेदसम्बन्धानुगुण्यस्यापि द्वैतादिधातुत्वे देवदत्तादीनामपि धातुत्वमत एव स्यादित्याह—स वेति । प्रवृत्तिसामान्यस्य देवदत्तादेर्वा व्यावर्तनाय मन्तु यत्र विशेषग्रहणम्, उभयोरपि तयोरपि क्रियात्वात्, साध्यत्वेनासम्बन्धोपादानसाम्यो भाव [illegible] सम्बन्धोपादानसिद्धभावो द्रव्यम्, अभिधानस्याभिमान् भावः सिद्धसंख्याविभक्तिमत्त्वम्, अक्रियाभिधायको भाव. सिद्ध-25 रूपत्वं द्रव्ये मूर्ते भाव अमूर्ते द्रव्यभिन्नत्वेन द्रव्यभावसम्बन्धेऽनभिमुख्यभावात एव भिन्नं न तु वस्तुभेदेन तदुभयोर्विरन्विनैव—सिद्धमन्यदिति । भावाभिमुख्यादिति प्राप्यभावस्याभिमुख्यादित्यर्थः । भाविना तत्र भाष्यकारेण विचारद्वारेण समर्थितं द्वैतादीनां धातुत्वं निराकर्तुं भाष्यानुक्तिमत्र प्रवर्तयति—यथा चेति । प्रवृत्तिविशेषस्यैव धातुत्वस्याभिधीयते तथैव दोष. अन्यथा मत विशेषस्य अनर्थकमभिधेयं भवान् दोषवाचो इति भाष्यकारः इत्यादि विशेष इतीति । व्याख्याय विशेषपदार्थं द्वैतादीनां पदे—य उपादीयमान इति । द्वैतादयोऽपि व्यावर्तकत्वेनान्यादिति इत्येव 30 चैव धातुत्वमिति भाष्यकार आह—यथैवमिति । द्वितीयविशेषग्रहणप्रयोजनाभावेऽपि देवदत्तादीनां धातुत्वं दुर्वारम्, तेषामनुपस्थितिवा प्रवृत्तिविशेषत्वादिति दोषमभिधाय भाष्यकार उभयोरपि व्याख्ययोर्दोषमाह—एवमिहापीति । नतु प्रवृत्तिविशेषस्य

---

१ लि. क. [illegible] ।

यथा च तत्रोच्यते नैष दोष इत्यादि, एवं दोषेऽभिहिते स्यान्मतं प्रवृत्तिसामान्यनिवृत्त्यर्थं विशेषग्रहणप्रयोजनदोषं परिहरामीति विशेष इति भवतः कः सम्प्रत्ययः ? इति प्रश्नोपक्रमं दोषवादिनैव परिहारमभिधापयिष्यतस्ते दोषवादी किल ब्रूयात्—य उपादीयमानोऽन्यं निवर्तयतीति परो ब्रूयात्—यद्येवं भूवादयोऽप्युपादीयमाना विशेषान् निवर्तयन्तीति, तर्हि गच्छत्यादयो विशेषा निवर्त्यन्ते न गच्छति न शेते न भुङ्क्ते पचति एवास्ति भवति विद्यत एव केवलमिति, तस्मादुपादीयमाना गमनादीन् विशेषान् 5 निवर्तयन्ति भूवादयस्तिष्ठत्यादिवत्, यथा चोक्तं भाष्यकारेण 'सामान्यमपि यथा विशेषस्तद्वत्' (महाभा० अ० १ पा० २ सूत्रे २४) इति ज्ञापकमिदमिति, गच्छत्यादिविशेषोपादीयमानत्वे विशेषनिवृत्तिहेतुत्वात् तिष्ठत्यादिनिवृत्तिहेतुगच्छत्यादिवत्, ततश्चैषां सिद्धा धातुसंज्ञा—भूवादीनामिति, यथा तत्र प्रवृत्तिसामान्य निवृत्त्यर्थे विशेषग्रहणे परिहार एवमिहापि प्रत्युच्यते—द्रव्यनिवृत्त्यर्थेऽपि विशेषग्रहणे परिहार उच्यते, प्रत्यु- च्येत सत्ता सर्वभावानां प्रवृत्तिसमन्वयादेवमत्र इत्यपि नाप्रवृत्तिकं वस्तु तस्मात्तन्निवृत्त्यर्थं सर्वमेतत् 10 न्याय्यानुगुण्यात्तु नायं विशेष इत्येतदर्थेऽपि विशेषग्रहणे वैयर्थ्यस्य क्रियात्वं स्यात्, भूवादीनां तद्वत्क्रिय त्वात् [धातु]संज्ञा मा भूत्, तत्सम्योपादानसिद्धवादप्रयत्नानर्थक्याद्[वा] विशेषोपादाने कृते स एव प- रिहार उच्यते त्वया, विशेष इति भवतः कः सम्प्रत्यय इत्यादि यावत् सिद्धा धातुसंज्ञा, एवं परिहारद्वयेऽपि समानमित्युत्तरमुच्यते—एवमुच्यमाने अन्यत्समूहस्य एव दृष्ट—नन्वित्यनुज्ञापने—अनुज्ञात त्वयैव यस्य स्वपक्षक्षेत्रस्य वर्धनशीलस्य स्ववचनसलिलसेकेन फलमभिव्यक्तं, तद्दृणोति स्वारयम्—नन्वस्मा- 15 भिरप्यभिहितं प्रवृत्तिरेव प्रवृत्तिविशेष इति—यदुच्यते भूवादिसामान्यमुपादीयमानं गमनादिविशेषं निवर्तयतीति तदयुक्तं यदि भूवादिसामान्यव्यतिरेकेण गमनादिविशेषः स्यात्, स तु सामान्यमेवेत्युक्तम् तस्मात् सामान्यविशेषाभावात् उपादीयमानं विशेषान्निवर्तयितुमर्हति, यदुष्णादिविशेषाणि च ध्ववृत्ति

क्रियात्वे स्थानीनां धातुत्वं न स्यात् तेषां प्रवृत्तिविशेषाभावत्वादिति यदुक्तं भवतो विशेषपदेन किमभिप्रेतमिति दोषवादिनैव परिहारमभिधापयितुमनसे भाष्यकारो वार्तिकं पृष्टवानिदम्—सामान्यमसिति अर्थ हि भाष्यकृता का पुनः क्रिया नाम भवान्— 20 नामयतीति वक्तोऽन्यत् धातुसंज्ञा न प्राप्नोतीति । परोक्तिं प्रदर्शयति—य उपदीयमान इति उक्तं हि भाष्यकृता परोक्तिः 'न ब्रूमः पचामि क्रियेति किं तर्हि ? पचत्यर्थं प्रवृत्तिविशेष क्रिया अन्यथा हि पचामि भुञ्जीत्वे प्रवर्तते अन्यथा च मांसीदने' इति । तामेव युक्तिं भाष्यकार० स्वयं दर्शयति—यद्येवं भूवादय इति अर्थ च भाष्यकृता 'यद्येवं तिष्ठत्यादीनां धातुसंज्ञा अन्यथा हि पचत्यादयो भवन्त्येऽन्यथा हि तिष्ठती' इति । तिष्ठत्यादिष्वपीति उक्तं हि भाष्ये 'एवं तर्हि क्रियावान् क्रिया निर्वर्तिका भवति इत्थं इत्थंक निवर्तकम्, एवं हि कश्चित् कश्चित् पृच्छति किमयमस्तौ देवदत्तः व्यापिरिति 25 स आह—भवत इति अपर आह—अवतीत इति अपर आह स्थित इति स्थित इत्युक्ते सर्वं तेषामपि भीमतेव निवृत्तिर्भवति' इति एवं च क्रिया क्रियान्तरापादकस्य प्रवृत्तिविशेष उच्यते तत्र निवर्त्त धातुत्वम्, तथा च क्रियावत्या क्रिया क्रियान्तरनिवर्तकत्वान् तिष्ठत्यादिनिवर्तकत्वप्रसिद्धवत् गैरस्तैव इत्थंवत्, इत्थं हि इत्थंक निवर्तकं न तु स्थितान्तरस्य वर्भितत्वकथानुगुण्यादिति भावः । एतच सामान्यस्य विशेषत्वमपि द्वितीयम्यान्यायां देवदत्तादेर्भवस्यापि प्रवृत्तिविशेषत्वाद्धातुत्वं भवत्वत इत्याह—एवमि हापीति । एवमपि प्रवृत्तिमात्रत्वात् सामान्यमात्रतिरिक्तविशेषाभावात् विशेषसम्भावनामात्रेण धातुत्वं भवतीति प्रत्युच्यत्वमि- 30 त्यरेव तत्रापि प्रत्यवस्थानमिति इत्येतदपि व्याख्येयोपेक्षायां प्रत्यवस्थानमुद्भावयति—एवमुच्यमान इति । यत्त्वदुक्ती—तस्मादिति

---

१ सि क, भवतः । २ सि क. 'हात्मेवेहापि' । सि क मुत्तरमिदम् । ३ सि चास्मात् ।

विशेषत्वाभावादुभयत्र परिहारे विशेषग्रहणा[न]र्थक्यमेवदत्तक्रियात्ववृत्तावक्रियात्वदोषापादनवत्ता एवेति, तदुपसंहरन्नेवाह कृत्वा प्रवृत्तिमात्रत्वेऽत्यादि गतार्थं यावदनर्थकमुभयोरपि व्याख्यानाविरुद्धयोरिति, एवं तावद्विशेषग्रहणमनर्थकम् ।

न केवलमनर्थकमेव किं तर्हि ? अनर्थोऽर्थमपीत्यत आह—

5 न चाफलमेव, अनिष्टकृदपि, एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिर्वर्तनप्रवृत्तिविशेषत्वात्, पचादिवृत्तावितिवदिति, येऽप्यमी भूवादयस्तेऽपि अक्रियात्वात्तदन्यधातुसंज्ञा च स्यात्, सर्वमेवसम्बन्धानुगुणविशेषत्वादेवदत्तवदेव ।

न चाफलमेवानिष्टकृदपीति, तदनिष्टकृत्त्वं साधनेनैव भाव्यते—एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिर्वर्तनप्रवृत्तिविशेषत्वात् पचादिवृत्तावितिवदिति प्रवृत्तिविशेषत्वमन्यत्वं तन्निर्वर्तनत्वेऽपि इत्य-
10 न्यस्य प्रवृत्तिसामान्यव्यतिरिक्तस्यार्थस्याभावादेवानुक्तमप्युपगम्यापि दोषः—देवदत्तः क्रिया स्यात्, अन्यनिर्वर्तनत्वे सति विशेषप्रवृत्तित्वात्, स हि गच्छत्यादिविशेषनिर्वर्तनो धावनादिविशेषनिर्वर्तनश्च सामान्यत्वात्, पच्यमानत्वे सत्यन्यनिर्वर्तनत्वात् प्रवृत्तिविशेषश्च, ततश्च पचनादिर्निर्वर्त्यत्वादिवत् क्रिया, क्रियात्वाच्चाप्राप्तिः अस्य च धातुसंज्ञा पूर्वमक्रियात्वस्याभ्युपगमेन, पचत्यादिवद्भूवादयः तद्वदेव देवदत्तश्च इति एवं क्रियैवेत्यापन्नं अनिष्टमेव तदापद्येतेति, येऽप्यमी भूवादयस्तेऽप्यक्रियाः, तदन्यधातुसंज्ञेत्यादि,
15 सर्वमेवसम्बन्धानुगुणविशेषत्वादेवदत्तवदेव, पचादीनाञ्च गमनादिसर्वधात्वर्थव्याप्तिरस्य प्रागुपपादितत्वात् सिद्धोद्भूतत्वात् साधीयः साधनमिदमपि प्रत्यक्षसिद्धत्वादन्यतरोक्तावद्विविधक्रियाव्यतिक्रमकृतत्वाच सर्वनामसम्भूता च स्यात् ।

सामान्यव्यतिरेकेण विशेषाभावादुपादानमस्यार्थे विशेषणं न किमपि व्यावर्तयतीति सर्वेषां प्रवृत्तिसामान्यसमत्वात्, बहुत्वादि विशेषणं बहुत्वादिसमभिव्याप्त्या वा प्रवृत्तिविशेषत्वमप्यतीति भाव । विशेषणस्य वैयर्थ्यमेव केवलमत्र न दोषोऽपि तु
20 अनिष्टकृत्त्वमपीत्याह—न चाफलमेवेति । यद्यपि इत्यादिना प्रवृत्तिसामान्यव्यतिरिक्तमपि विशेषमिव दर्शितं तथापि ते अनुपपन्नापि दोष एवेत आह—प्रवृत्तिविशेषत्वमिति । सामान्यं हि विशेषात्मकं अत एव देवदत्तोऽपि पचनादिक्रियाविशेषान् गमनादिविशेषांश्च निर्वर्तयति, तथा पचमानं तदन्यानि निर्वर्तयतीति प्रवृत्तिविशेषोऽपि अतश्च पचनादिवद् अन्यनिर्वर्तनत्वे सति विशेषप्रवृत्तित्वात् पचनादिवत्पच्यमानत्वे अन्यनिर्वर्तनत्वाच देवदत्तादि इत्थं क्रिया स्यादित्याह—देवदत्त इति । इत्थं ... निर्वर्तकत्वं तस्य ... सामान्यत्वादिति सामान्यं हि विशेषमात्र निर्वर्त-
25 यतीति भाव । किञ्च भूवादीनामपि सर्वसम्बन्धानुगुणत्वेऽपि विशेषत्वे देवदत्तादिवत्क्रियात्वेन धातुत्वं न स्यादित्याह—येऽप्यमीति । ननु भूवादेः सर्वसम्बन्धानुगुणत्वमसिद्धमिति चेत्तत्राह पचादीनाञ्चेति । प्रागुपपादितत्वादिति अन्यत्र ... पूर्वोक्तप्रकारेण ... सिद्धिरिति भाव । सर्वनामसम्भूता चेति इह प्रवृत्ति विशेषस्य ... सर्वे तथापि प्रतिपत्ति ... एवञ्च प्रवृत्तिसामान्य-
मात्र ... प्रवृत्तिविशेष ... प्रवृत्तिसामान्यमात्रावगाहनी तत्र च सर्वविशेषान्वयित्वात् सर्वनामैव सर्वनाम
30 प्रवर्तते ... हि ... सर्वनामत्वप्राप्तिः न तथा पचादीनामपि सर्वविशेषान्वयित्वेन ...

---

१ सि क. ॰भावादेवेत्युक्तम् । २ सि. क. पचनादिविशेषत्वात् सत्यन्यनिर्वर्तन । ३ सि क. ॰निर्वर्तनत्वे ।
४ सि. क. ।

यत्तु पुनः पचादिविशेषनिवर्तकत्वाद्भूतादयो धातुसंज्ञा भवन्तीत्युक्ते नैव निवर्तयन्ति पचादीन् भूतादयो विरोधाभावाद्भूताद्यन्तर्भावात् पचादीनामतो न धातुसंज्ञा भूतादयः स्युरित्याशंक्य तत्प्रतिसमाधानं पुनरुच्यते निवृत्तिरत्रास्माभिर्नार्थधर्मप्रकल्पिता विवक्षिता, किं तर्हि? पचतीत्यादिशब्दधर्मप्रकल्पिता सा विज्ञानप्रवृत्तिनिवृत्तिमात्रकृता, यथा देवदत्ते सर्वधर्मसम्बन्धिन्यपि पचति देवदत्त इत्युक्ते गच्छति तिष्ठत्यस्ति शेत इत्यादिक्रियाकलापं निवर्त्य देवदत्तं पचतिशब्दो पचनक्रिययैव सम्बन्धयति, तद्विषयैकविज्ञानाधानहेतुत्वात्, अयमत्र धर्मो भूतादीनामप्यविशिष्ट इति ।

यत्तु पुनरित्यादि यावदयमत्र धर्मो भूतादीनामप्यविशिष्ट इति, पचादिविशेषनिवर्तकत्वाद्भूतादयो धातुसंज्ञा भवन्तीत्युक्ते परस्याशङ्का स्यात्—नैव निवर्तयन्ति पचादीन् भूतादयो विरोधाभावेन भूताद्यन्तर्भावात् पचादीनामतो विशेषनिवर्तकत्वाभावात् न धातुसंज्ञा भूतादयः स्युरित्याशंक्य तत्प्रतिसमाधानं पुनरुच्यते न वयं वस्तुन्यसद्भावगतनिवृत्तिं ब्रूमः—निवृत्तिरत्रास्माभिर्नार्थधर्मप्रकल्पिता विवक्षिता, किं तर्हि? शब्दधर्मप्रकल्पिता विवक्षिता, अर्थगता हि निवृत्तिरसद्भावजनिता घटपटादिवदेकत्वासम्भवात्, शब्दगता तु विज्ञानप्रवृत्तिनिवृत्तिमात्रकृता सा देवदत्ते सन्निहितसद्भावगतिस्थितिशयनभुक्त्यादिसर्वधर्मसम्बन्धिन्यपि—गच्छति देवदत्त इत्युक्ते तिष्ठत्यास्ते शेते इत्यादिक्रियाकलापं निवर्त्य देवदत्तं गच्छतिशब्दो गमनेनैव सम्बन्धयति, तद्विषयैकविज्ञानाधानहेतुत्वात्, न तथा वस्तुनिवृत्तिः सम्भवति सदवसन्निहितसर्वधर्मात्मकत्वाद्देवदत्तस्य, तदुदाहरति—किं तर्हि? पचतीत्यादि गतार्थमुदाहृतार्थसम्भवादि यावदभिधेयोऽर्थः, अयमत्र धर्मो भूतादीनामप्यविशिष्टो वर्तत इत्येतस्य इत्यादयोऽपि शब्दाः क्रियान्तरनिवृत्तिविज्ञानावसानधर्माणो न वस्तुगतान् धर्मान्निवर्तयितुमलम्, शब्दानां बुद्धिप्रवृत्तिनिवृत्तिक्रियायां प्रभुत्वात्, वस्तुप्रवृत्तिनिवृत्त्युपरमकृतत्वादिति ।

अथ ब्रूमः वस्तुनः प्रवृत्तेः सर्वप्रवृत्तिविशेषसहितायाः पदान्यनुज्ञातत्वान्नावितत्वाच्च

मात्रप्रसञ्जनदर्शनत्वात् सर्वासामितरप्रवृत्तित्वाच्च सर्वासाम् स्यादिति प्रतिभाति । प्रकारान्तरेण इदानीमा समर्थितं धातुत्वं भूतादीनां समर्थनप्रकारमेव दर्शयति—यत्तु पुनरिति एतावता पचादिविशेषान् निवर्तयन्ति सर्वमेकपदं [illegible] निवर्तते, अन्यथा प्रवृत्तिविशेषाणामपि [illegible] विरोधाभावात् [illegible] । तत्र नैयायिकप्रमाणं समाधानं प्रकटयति—तत्प्रतिसमाधानमिति । वस्तुन्येव निवृत्तिविधानादेव सर्वेषामितरेतर [illegible] परस्परं निवर्तयन्ति [illegible] निवृत्तिरत्रेति । वस्तुन्येकधर्मसम्बन्धिन्यपि शब्दानां [illegible] तत्र प्रवर्तनम्, यथा देवदत्ते [illegible] इत्युक्ते [illegible] निवर्तते न [illegible] दर्शयति—देवदत्त इति । एवं वस्तुनः [illegible] विशेषसहितस्यैव सामान्यस्य समर्थितत्वाद्भूतादीनां पचादीनां धातुसंज्ञा प्राप्नोति न वा [illegible] तथैव [illegible] अथ ब्रूम इति । कथं नास्ति इत्यत्राह—सम्भावितैव हीति निवृत्तिरत्रास्माभिर्नार्थधर्मप्रकल्पिता किं तर्हि? पचतीत्यादि-

---

१ सि. क. यत्तु पुनः । २ सि. क. °त्वाच्च । ३ सि. क. भूतार्थं च वस्तात् ।

क्रियासामान्यं भूतादीनां पचादीनां वा धातुसंज्ञा प्राप्नोति न प्राप्नोतीति, वैधर्म्येण सर्वेषां धातूनामसत्त्वमिति सम्प्रवृत्तिसामान्यक्रियाभिधायकत्वानतिवृत्तः ।

अत्र ब्रूमो वस्तुनः प्रवृत्तेरित्यादि, यावद्वैधर्म्येणेति, अपरिसमाप्तमिदं वचः तस्यैव वस्तुप्रवृत्तेः सर्वप्रवृत्तिविशेषपरिहारेण यथाभ्युपगतत्वादपरिमितत्वात्—सम्भावितैवं हि वस्तुप्रवृत्तिः 5 सर्वप्रवृत्तिविशेषास्मिन्नेष्वतीतविचारेषु विस्तरेण चर्चितार्थत्वात् कथं? विशेषवाक्यव्यवहारो विशेषाभ्युपगमविवृत्तिविषयो न वस्तुन्यसम्भवनिर्भेदात्मके प्रवर्ततीति भावयता भवतैव सुभावितत्वात्, क्रियासामान्यं भूतादीनां पचादीनां वा धातुसंज्ञा प्राप्नोति न प्राप्नोतीति, सर्वेषां धातूनामसत्त्वमिति सम्प्रवृत्तिसामान्यक्रियाभिधायकत्वानतिवृत्तेर्वस्तुव्यवहारे द्रव्यव्यवहारे यदि न किञ्चित् प्रसिद्ध्यति, तथा तु पुनरसद्द्रव्यविषयत्वाद्वाग्विज्ञानं समस्तार्थविषयं व्यवस्थापितं वस्त्वसंस्पर्शित्वप्रसङ्गेन ।

10 प्रकृतमुच्यते—

योऽसौ मयाऽऽद्युद्दिष्टो विधिनियमात्मोभयनयः स एव निर्दिष्टः, नैगमदेशत्वात् द्रव्यार्थोऽयम् द्रव्यमपि भावसाधनम्, सैष द्रव्यता, तत्त्वमत्, पदार्थौ द्रव्यक्रिये, वाक्यमस्याद्वाक्यः, तदर्थं उभयोभयभाक्, नयविनिर्गमसूत्रं 'अत्थित्तं अत्थित्ते परिणमति' इति ।

योऽसौ मयाऽऽद्युद्दिष्टो विधिनियमात्मोभयनय इति, विधिश्च नियमश्च सर्वत्र 15 द्रव्यं क्रिया चेति विधिनियमं द्रव्यैकत्वाभावात् स एव निर्दिष्टः—प्रत्यवधीर्यते, केयं पुनरयमार्योऽभिहितानां नयानां भेद इत्यत्रोच्यते नैगमदेशत्वाद्द्रव्यार्थोऽयं न पर्यायार्थः, द्रव्यपर्यायसंगृहीतानन्तभेदार्थे द्रव्यार्थभेदेषु नैगमसङ्ग्रहव्यवहारेषु यो नैगमो नैकभेदस्तस्यैकदेशोऽयं यदेव द्रव्यं, 'एक्केक्को य सयविहो सत्तनयसया हवंति एमेव' (आ नि २२६४) इति वचनात्, द्रव्यकर्मा वि-

---

[illegible] भाव । एतदेव प्रत्याह—विशेषेति [illegible] 20 [illegible] न भवति पठतीति विशेषवाक्यव्यवहार एव [illegible] निर्भेदम् [illegible] वस्तुप्रवृत्तेर्भेदस्य [illegible] धातुसंज्ञां प्राप्नोति वा न वेति भावः । भूतादीनामिति तेषां [illegible] पचादीनामपि [illegible] धातुत्वं न स्यात् [illegible] धातुत्वं स्यात् किन्तु [illegible] धातुत्वं [illegible] । सर्वे धातवो [illegible] सामान्यवचना इति [illegible] भावयतो [illegible] वस्त्वसंस्पर्शित्व [illegible] 25 [illegible] तथा [illegible] इत्याह—तथा तु पुनरिति [illegible] इति तस्मात् [illegible] एव न [illegible] भावः । तदेव द्रव्यं क्रिया चोभयं भाव इति [illegible] तदेव ते निर्दिशन्नाह—योऽसाविति । [illegible] इत्याह—नैगमदेशत्वादिति [illegible] नैगमस्यापि [illegible] नैगम- [illegible] द्रव्यपर्यायात्मा [illegible] नैगमसङ्ग्रहव्यवहारा द्रव्यार्थभेदाः, 30 तेषु प्रथमो [illegible] नैगमस्यैकदेशो [illegible] इति भावः । [illegible] नैगमादीनाम् [illegible] आह—एक्केक्को य

---

१ सि क. प्रवृत्तिरित्यादि । २ सि यथास्वेव हि वस्तुप्रवृत्तिविशेषाभिक० । क यथास्वैव हि च वस्तुप्रवृत्ति सर्वप्रवृत्तिविशेषाभिके । ३ सि क. कथ ।

साधनोऽत्राभिप्रेत इति चेदुच्यते—द्रव्यमपि भावसाधनं यत्तद्भूयते केनापि यो द्रवति गच्छति सततं प्रवर्तते तस्य यद्द्रवणं गमनं सततप्रवृत्तिः स भावः तद्भवनं, तत्साधनो द्रव्यशब्दः कर्तृसाधनाविनाभाविभावसाधनव्याख्यानस्य सोपपत्तिकस्य विस्तरेण कृतत्वात्, सैव द्रव्यता, तस्मात्— द्रव्यक्रियात्मद्रव्यता परस्पराविनाभाविनी, करणादीनां तदव्यतिरिक्तस्वरूपत्वात् सर्वत्र घटपटादिबीजाङ्कुरादिषु च सर्वकालमस्यस्य भावितत्वादिति, पदार्थो द्रव्यक्रिये, उक्तवदिति वर्तते, वाक्यमाख्यातशब्द इति, 5 आख्यातं साव्ययकारकं वाक्यमेकतिङिति च वाक्यम्, तदर्थं वक्ष्यो[ऽयमाह]—वाक्यार्थं वक्ष्योऽयमाह द्रव्यक्रियाद्वयात्मकं वस्तु भवति वाक्यार्थ इति विस्तरेणोक्तोऽनेन विधिनियमभङ्गेन नैगमैकदेशेन द्रव्यार्थेन, नयविनिर्गमसूत्र—'अस्थिरं अस्थिरे परिणमति' (भ श १ उ० १ सू० ११) इति, अस्थिरो भावो भावेऽस्थिरे परिणमति, भावो भाव एव सततं वर्तते, परितः समन्तान्नमति परिणमति एवं च भावमापद्यते तदा कर्तृसहितं चेति । 10

उभयनयः पञ्चमोऽरः परिसमाप्तः ॥

इति । एतच्चानुसारेण द्रव्यशब्दं साधयति द्रव्यमपीति । भावसाधनमिति मूलकारोक्तमाख्यपदार्थमाह—यत्तद्भूयत इति, अनेन भावस्य भावे व्युत्पत्तिरुपदर्शिता अथ कर्तरिव्युत्पत्तिं दर्शयति—यो द्रवतीति । पूर्वमपि व्युत्पत्तिरुपदर्शिता सम्बन्धिता चेत्याह—कर्तृसाधनेति । द्रव्यं भवतीति विशेषणविशेष्यभावोपगमात् द्रवतीति द्रव्यमिति प्रकृतिप्रत्ययार्थभेदोपगमाच्च द्रव्यक्रियोभयात्मकतायाः पूर्वं वर्णितत्वं सूचयति—सैवेति । पदस्यार्थमाह—पदार्थ इति । वाक्यं दर्शयति—वाक्यमिति 15 'आख्यातशब्दो नियतं साधनं यत्र गम्यते । तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते ॥' इति वाक्यपदीये यथा वर्तीत्याख्यातमात्रे प्रोक्ते देवो वर्षतीति कर्तृकर्माक्षेपात् परिपूर्णार्थत्वे यथा वर्षति देवो वर्षतीति वाक्यं तथा तदप्येकं पदं परिपूर्णं वाक्यमेवाभिधीयत इति तदर्थः । व्याचष्टे—आख्यातमिति आख्यातमिति पदस्य साव्ययकारकमिति विशेषणविशिष्टस्य वाक्यत्वापत्तेर्मूलानुगुणं न प्रतिभाति आख्यातं साव्ययकारकविशेषणमेकतिङिति च वाक्यमिति कारिकान्तरीयं वाक्यान्तरेण वाक्यपदीयप्रसिद्धव्याख्यानस्य बाहितत्वात् । योऽत्र मते वाक्यार्थं इत्याह—तदर्थं इति द्रव्यक्रियात्मको 20 वाक्यार्थः एव इति च तिष्ठतीति वा देवदत्त नामपदाद्व्याख्यातपदाद्वा द्रव्यक्रियोभयात्मकविशिष्टार्थप्रतीतेः प्रागुपपादितत्वात्, न केवलमेव एव इति नामपदस्य तिष्ठतीत्याख्यातपदस्य वा प्रयत्ने द्रव्यक्रियोभयबोधस्याननुभवात्मकमिति वाच्यम्, विशिष्टार्थप्रतीतस्य केवलस्य एव इति पदस्य तिष्ठतीति पदस्य चान्यत्वात्, केवलं वाक्यत्वेन तिष्ठतीति वाक्येऽन्वेतव्यमभिमन्यते एवं च द्रव्यमानमभ्योगादपि विशिष्टार्थप्रतीतेर्द्रव्यक्रियोभयात्मकत्वेन योऽयं प्रयोगो वाक्यान्तरस्य प्रविष्टस्य इति प्रतीत तिष्ठतीति च प्रयुज्यते द्रव्यमानमभ्योगाच्च तिष्ठतीति प्रतीतिविषयार्थप्रतीतिरर्थप्रकरणादितो 25 भवतीति नानियतार्थत्वेन द्रव्योर्विस्तरेण पूर्वमुपपादितमिति सूचयति—विस्तरेणेति । एतच्चन्द्रकमूलमाषयं प्रदर्शयति—नय विनिर्गमसूत्रमिति । भावभूतत्वमभिप्रेत्याह—भावो भाव एवेति । कर्तृव्युत्पत्तिप्रदर्शितार्थमाह—परित इति ॥

इति विजयलब्धिसूरिविरचिते विषमपदविवेचने नयचक्रस्य पञ्चमोऽर उभयनयः समाप्तः ॥

---

१ सि क. °मारकवाक्यमेकमिति ।

षष्ठो विधिनियमविधि

एवं विधिनियमभङ्गारे द्रव्यक्रियासमभावे संहृते षष्ठनय आह—

नन्वेवमुभयमप्यवस्तु, अनुपपन्नस्वावस्थत्वात् खपुष्पवत्, स्वा अवस्थाः स्थित्युत्पत्तिविनाशा द्रव्यस्य वा स्युः क्रियाया वा, ता यदि भावस्य ततो द्रव्यमनवस्थमिति द्रव्यप्रभेदा-
5 सम्भवः खपुष्पस्येव, ततश्च सर्वप्रभेदनिर्भेदं बीजमिति द्रव्यलक्षणहानिः।

नन्वेवमित्यादि, विधाद्यभयं दोषापादनसाधनम्, उभयमपि—द्रव्यं क्रिया चेति, अवस्तु, अनुपपन्नस्वावस्थत्वात्—अनुपपन्ना स्वा अवस्था अस्य तद्भावात्, अनुपपन्नस्वावस्थत्वात्, खपुष्पवदिति, कास्ता अवस्थाः? उच्यते स्वा अवस्थाः स्थित्युत्पत्तिविनाशाः, ताश्च द्रव्यस्य वा स्युः क्रियाया वा, किञ्चातः? ता यदि भावस्य—ताः स्थित्यादयः प्रागुक्तवत्[भवनादिमा]त्रत्वसिद्धिवत्स्युस्तन्मयक्रियाया
10 धाराः क्रियायाः द्रव्यस्येऽवस्था इति, ततो द्रव्यमनवस्थं प्राप्तम्, भवनात्मकत्वादुभयोरप्यनवस्थत्वे [illegible] पर्यायावस्थाव्यतिरिक्तद्रव्याभावात्, भवतु द्रव्यमनवस्थं को दोष इति चेदुच्यते द्रव्यमनवस्थमिति द्रव्यप्रभेदासम्भवः प्राप्तः, इतिशब्दस्य हेत्वर्थत्वादनवस्थत्वादित्यर्थः, द्रव्यप्रभेदा रूपादिगत्यादिविवर्त्ताः ते न सम्भवन्त्यनवस्थत्वात् असत्त्वात्, खपुष्पस्येव, ततश्च यदुक्तं द्रव्यस्य लक्षणं [तस्य] हानिः, कतमत्तदिति चेदुच्यते—सर्वप्रभेदनिर्भेदं बीजमित्यस्य, तस्याभावादि द्रव्यमनवस्थत्वात् खपुष्पवत्।

15 [illegible] परस्परनिरपेक्षत्वात्तयोर्द्रव्यक्रिययोरुत्पत्तिस्थितिविनाशावस्थयोरभावं अनुमानतः परतः [illegible] गुणप्रधानभावेन द्रव्यादि तत् परत [illegible] एकतरपि भवतीति विधिनियमे [illegible] विधिनियमविधिरर्थमनुवदति—एवं विधिनियमभङ्गारे इति। एतस्मिन् [illegible] नन्वेवमिति द्रव्यक्रिययोः परस्परनिरपेक्षत्वभेदमनुक्तं प्रपञ्चय [illegible]। [illegible] अनुपपन्ना इति [illegible] विनाशाः। [illegible] सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिति द्रव्यलक्षणम् [illegible]
20 [illegible] न [illegible], तत्र स्थित्युत्पत्तिविनाशात्मका अवस्थाः [illegible] किं क्रियायाः [illegible] [illegible] प्रतिपत्तव्यं [illegible]—किञ्चात इति, ता द्रव्यस्य क्रियाया वा भवन्तु [illegible] किं वा [illegible] । [illegible]—ता यदीति। तथाभूतेति [illegible] [illegible] । [illegible] द्रव्यस्य [illegible] [illegible] । द्रव्यलक्षण-
25 [illegible] इति । [illegible] इति [illegible] द्रव्यमनवस्थमितीति। रूपादिगत्यादिविवर्त्ता इति [illegible] [illegible] [illegible] । द्रव्यस्य [illegible]—तस्येति । [illegible] [illegible]

1 [illegible]।

ततः किं प्राप्तम् ?—

भाव एव तु स तथाभूत आपद्यते, तद्भेदस्य तदात्मकत्वात्, मृद्वत् ।

भाव एवेति, भाव एव तु स तथाभूत आपद्यते—द्रव्य क्रियैवापद्यते, कस्मात् ? तद्भेदस्य तदात्मकत्वात्, स्थित्युत्पत्तिविनाशा हि द्रव्यमेवाभिमता द्रव्यस्यैव[।]भेदात्मनो भवन्ति तत एवत् योगापन्न क्रियाया आत्मेति, क्रियैव च द्रव्य संज्ञामात्रभेदात्, मृद्वदिति दृष्टान्तः, यथा मृद्भेदाः पिण्डशिवकादयो मृदात्मकाः सन्तो मृद्रूपा एव, तथा स्थित्यादयो द्रव्यभूतमात्रभेदा एवेति द्रव्याभावेऽपीष्टत्वा स्थित्यादयः क्रियाभेदा इत्यापन्नाः ।

यदपि च कल्पितं प्रवृत्तिसामान्यव्यतिरेकेण कारकवत्ता ओदनादिफलोद्देशिन्याः परिग्रहार्थं विशेषग्रहण तदपि न क्षमम्, कस्मात् ?—

प्रवृत्तिमात्रवचनात्तु मत्पक्षे प्रवृत्तावेव व्यतिरेकसम्भवः, तस्मात्तत्रादेव सर्वस्य प्रकृत स्याद्द्रव्यं भाव इत्येतस्यागाद्द्व्यविभागवचनं व्यर्थम्, ततश्च विभागेन लक्षणाभावात्तयोरभावः खपुष्पवत् तदभावात् क्रिया कुतः ? तथाभवनक्रियासन्निधिलक्षण द्रव्य प्रवृत्तिसामान्यञ्च कुतः ? तथाभवनविनाभूतत्वात् खपुष्पवदेवेति सर्वनिर्मूलता चैवम्, अभ्यक्तिरप्यसन्निहित स्यात् खपुष्पवत् ।

(प्रवृत्तिमात्रेति) प्रवृत्तिमात्रवचनात्तु मत्पक्षे प्रवृत्तावेव व्यतिरेकसम्भवः—प्रवृत्तिसामान्यमेव भाव इत्युक्तत्वात् विशेषास्तत्रैव सम्भवन्ति ततोऽस्य व्यतिरेकसम्भवात्, यदप्योदनादिफल तद[पि] प्रवृत्तिसामान्यमेव, तस्मात्तन्मात्रादेव—क्रियाया एव सर्वस्य प्रकृतत्वात् द्रव्य भाव इत्येतस्यत्कम्, तस्यागाद्द्व्यविभागवचनं व्यर्थ—द्रव्य क्रिया च वस्तिवस्तुमयाभ्युपगमो मूलत एव विघटते, ततश्च तथा भवनेन प्रवृत्तिलक्षणेन विना भूतस्य अभिधानमपि निर्मूलम्, ततश्च द्वे अपि द्रव्यक्रिये विभक्ते न

सर्वमेवाभावात्मभूतत्वात् पिण्डशिवकादीनां भेदाना मृदात्मकत्वं आत्मभूतस्य माहात्म्यात्—भाव एव रिवति च इति तथाप्येव द्रव्यं परामृश्यते विशेषाभावात् तुल्यत्वात् । हेतुमाह—तद्भेदस्येति हितीयतत्पुरुषेण क्रियाया ग्रहणम्, द्रव्यादीनां पीठादयः पचिपच्यादयो भेदाभिमताः स्थित्युत्पत्तिविनाशलक्षणा आत्मेत्यतो द्रव्यमेवाभिमताः तस्मात्तेषामात्मा द्रव्यं, द्रव्याभावे ते च क्रियाया एव भवेयुः केवलं संज्ञाभेदाभावेनैव द्रव्यमित्युच्यते भवक्रियेव लक्षिताः कथितेति भावः । दृष्टान्तमाह—यथेति अथवा द्रव्यभेदत्वेनाभिमता द्रव्यादयः पच्यादयश्च क्रियात्मका एवा इति तदात्मभूतत्वादपि क्रियात्वं तुल्यमिति भावः । ननु भवतेव भवति भवत्सामान्येन हि एवादि केनचिद्धर्मेण क्रियाविशेषणेनाविशेषाभावे भवति भावात्मकमिति भवनं प्रवृत्ति निर्दिष्टं कर्मत्वात् भवत्यवयवस्य पदार्थत्वाभावात् तस्मात्तेन तेन प्रकारेण परिणममानं वर्तमानं वस्तु भवतीत्युच्यत इत्युक्तत्वात् भवतेव विशेषसम्भवो न तु तदेवमेवमिनिर्णयादीन्यप्रमात्मप्रत्यक्षणाभिप्रायेणाह—प्रवृत्तिमात्रवचनात्त्विति भवतेव भावत्वाभेदितं । तदेव व्याचष्टे—प्रवृत्तिसामान्यमेवेति । भवतेव भेदाभ्युपगमे द्रव्यभावयोरभ्युपगमस्तावत्स्य एव तथा च यदि द्रव्यं क्रिया चेत्युभयं कथ्यत विभागो भावक्रिया यो—तस्मात्तन्मात्रादेवेति । एवञ्च तत्र द्रव्यं तथाभवनाविनाभूतसन्निधिर्मिरस्तु न भवति पचिपच्यादिरूपेण वस्तुत्वं प्रवृत्ति तेन विनाभूतत्वात् द्रव्यस्य च तथाभवनाविनाभूतत्वविविक्तत्वाभावेन तथाविधसन्निधिस्वरूपलक्षणत्वं क्रियापि

१ सि क भेदात्मानो । २ क सर्वमेवद्भूतत्वात् ।

तः तदवयोर्भेदमनुपपन्नं तदत्र विभागेन लक्षणाभावात्तयोरभावः खपुष्पवत्, तदभावात् क्रिया कुतः ? यथाभवनक्रियाऽभिविच्छिन्नं द्रव्यं प्रवृत्तिसामान्यञ्च कुतः ? यथाभवनविभागाभूतत्वात् खपुष्पवदेवेति, सर्वनिर्मूलता चैवमिति सन्निविनिर्मूलत्वात्, क्रियाया व्यक्तिर्भेदानामव्यक्तिश्च [कुतः] एव विनेत्यत आह—अव्यक्तिरव्यक्तसन्निहितत्वात् खपुष्पवत्।

5 अथोच्येत भावस्य स्थित्युत्पत्तिलयाः कल्पनामात्राः सन्निहिततथाभूतवस्तुतत्त्वव्यक्ति द्रव्यमेवोक्तवत्, ताश्च क्रिययाऽभिव्यक्तिं नीयन्त इत्यत्रोच्यते, एवं तर्हि सर्वप्रभेदनिर्भेदत्वमसत्त्वं द्रव्यस्य, क्रियायाश्चाक्रियात्वम्, सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिकरत्वाभावात्, तदभावोपपत्त्यसिद्धत्वमनुपपन्नत्वावस्थत्वात्।

अथोच्येतेत्यादि, साम्प्रतं भावस्य प्रागुक्तवत् स्थित्युत्पत्तिलयाः कल्पनामात्राः समनन्तरोक्तोपपत्तेर्भावात् सन्निहिततथाभूतवस्तुतत्त्वव्यक्ति द्रव्यमेवोक्तवत् सम्मूर्छितसर्वप्रभेदस्थित्यादिकास्तेषु, ताश्च स्थित्यादयः क्रियया अभिव्यक्तिं नीयन्त इत्यत्रोच्यते, एवं तर्हि सर्वप्रभेदनिर्भेदत्वमसत्त्वं द्रव्यस्य—ये स्थित्यादिभेदा द्रव्यस्यैव संवृता इति निर्भेदत्वोक्तिरभ्युपगम्यते, क्रियाभ्यत् क्रियाया अक्रियात्वम्, सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिः क्रियेष्यते, ते हि भेदाः क्रिययाऽभिव्यक्त्वे भवेयुः नान्यथा क्रियाभिव्यक्तेः सन्ति, तथाभूतत्वात् क्रियाया व्यक्तिकरत्वाभावस्याभाव्यत्वात् क्रिया द्रव्यवत् परविपाकवत्ता न क्रियेति, तदभावे द्रव्यस्याद्रव्यत्वात् क्रियायाश्चाक्रियात्वात् तदुपपत्त्यसिद्धत्वमनुपपन्नत्वावस्थत्वात् द्रव्यस्य क्रियायाश्च खपुष्पवदभाव इति।

भाष्यैकदेशमवतारयति—तदत्र विभागेनेति। तथाहि द्रव्ये भेदानामव्यक्तिः पूर्वं तदत्र व्यक्तिः क्रियत इति वर्ण्यते तदपि न [illegible] क्रियाया अभावादित्याह—क्रियाया व्यक्तिरिति। ननु [illegible] क्रिया [illegible] स्थित्युत्पत्ति[illegible] भिन्न[illegible] भवेयुः किन्तु [illegible] [illegible] न तु सर्वविशेष[illegible] विशेष[illegible] वस्तुभूता क्रियासामान्यात्मा विद्यते [illegible] न एव विशेषात एव सामान्यमनुमन्ये अत एव किं करोतीति प्रश्ने भवति [illegible] प्रतिवचनं [illegible] सामान्यप्रश्ने विशेषेण प्रतिवचनमयुक्तं स्यात्, अत एव विशेषवचना अपि [illegible] प्रयुज्यन्ते तस्मात् स्थित्युत्पत्तिलयाः क्रियासामान्यस्य [illegible] एव तस्य [illegible] अपि तु द्रव्यस्यैव ते इति [illegible]—अथोच्येतेति। पूर्वपक्षेण [illegible]—साम्प्रतमिति द्रव्य एव [illegible] क्रियाऽभिव्यक्त्यैव द्रव्यस्य स्थित्युत्पत्तिलयाः [illegible] न तु [illegible] क्रियासामान्यस्यैव भावाः। [illegible]—सम्मूर्छितेति सम्मूर्छिता [illegible] भेदाः स्थित्यादि[illegible]। द्रव्यस्यैव सन्निहिततथाभूतवस्तुतत्त्वव्यक्तिरूपत्वे [illegible] निर्भेदत्वं न [illegible] सर्वप्रभेदनिर्भेदत्वोक्ति[illegible]—एवं तर्हीति। [illegible] क्रियात्वं न [illegible]—क्रियाभ्यदिति। [illegible]—सन्निहितेति ते स्थित्यादयो भेदाः पूर्वं वस्तुनि सन्निहिताः क्रियया तेऽभिव्यज्यन्त इति अभ्युपगम्यते तर्हि क्रियायाः नाभिव्यञ्जकत्वं सन्निहितत्वादेव [illegible] क्रिया न क्रिय[illegible] क्रियाऽक्रिया [illegible]—ते हि भेदा इति। [illegible]

१ ऋ. XX। २ सि. क्ष. [illegible]।

अथैतद्वेदुभयं नेच्छसि भयात् ततोऽविभागावस्थत्वात् द्रव्यमसदापन्नम्, मा भूद्द्रव्यस्याद्रव्यत्वं क्रियायाश्चाक्रियात्वमिति द्रव्यमविभागावस्थं तद्व्यञ्जिका क्रियेतीष्यते ततो यदैवोत्पद्यते तदैव विनश्यति युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्यावस्थत्वात् ।

(अथेति) अथैतद्वेदुभयं—द्रव्यनिर्भेदासत्त्वाद्द्रव्य[त्वं] सन्निहितवयाभूतवस्तुतत्त्वस्य भावादक्रियात्वञ्च नेच्छसि, भयात् सर्ववस्तुत्वागमभयात् ततोऽविभागेत्यादि, अविभागावस्थत्वात्—विभागाः भेदाः विभागावस्थाः तदभावाद्द्रव्यमविभागमित्यसदापन्नम्, मा भूद्द्रव्यस्य—भेदासत्त्वाद्द्रव्यस्य अद्रव्यत्वमिति क्रियायाश्चाक्रियात्वमव्यञ्जकत्वात्, प्रागेव तथाभूतव्यक्तेरनर्थकत्वात्मा भूदिति, किमापन्नं ? द्रव्यमविभागावस्थं तद्व्यञ्जिका क्रियेति—क्रिया चाविभागावस्थद्रव्यविषया यथासन्निधिव्यक्तिक्रियात्वादविभागस्यैव सन्निहितस्य व्यञ्जिका हि क्रिया, ततः किमिति चेत् ? ततो यदैवोत्पद्यते तदैव विनश्यति उत्पत्तिविनाशयोरभावः सत्त्वोपलब्धिः, विविधभवदर्शनं विभागोऽनुपलब्धिरभावः, एकरूपत्वाच्च वस्तुनः अविभागव्यञ्जनाच्च क्रियाया उत्पत्तिविनाशयोरप्यभेदाद्यदैवोत्पद्यते तदैव विनश्यति, किं कारणं ? युगपदयुगपद्भाविपृथिव्यादिभेदाविभागद्रव्यस्यावस्थत्वात्—यदा चाविभागावस्थं द्रव्यं क्रिया च तद्व्यञ्जिका तदानीं युगपद्भाविनः पृथिव्यप्तेजोवाय्वाकाशकालादिभेदाः रूपरसगन्धस्पर्शसंख्यासंस्थानादिभेदाश्च ये चायुगपद्भाविनो मृत्पिण्डशिवकादिभेदाः ते सर्वेऽप्यविभागावस्थामात्रमित्यापन्नाः, तस्मात् सर्वभेदानामविभागावस्थामात्रत्वादुत्पत्तिर्विनाशश्च युगपदयुगपद्भाविनो भेदौ, तयोश्चाविभागावस्थं द्रव्यं तत्त्वमैक्यम्, एकत्वाच्च यदैवोत्पद्यते तदैव विनश्यतीति साधूक्तम् ।

देशकालादिभेदाभावादस्त्विति चेद्भ्रमः, यदि यदैवोत्पद्यते तदैव विनश्यति ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्वप्रसङ्गः, बीजोच्छूनमूलादिपूर्वभेदाना पत्रनालादिपुष्परभेदानाञ्च विनाशावस्थात्वादङ्कुर एवैक इत्यङ्कुरोत्पत्त्याऽप्यमङ्कुर एव विनश्यति तस्य दृष्टेष्टविरुद्धा

विभागावस्थाभावाद्द्रव्यस्य विभागाभावेन क्रियाया अव्यञ्जकत्वेन च व्यापारभाव एव स्यादित्याह—अथैतदिति । एतदेव 20 एतद्व्यक्ती द्रव्येति द्रव्यस्य निर्भेदत्वादसम्भवितव्यत्वमिति भावः । अव्यञ्जकत्वमाह—प्रागेवेति क्रियायाः प्रागेव द्रव्ये भेदा व्यक्तत्वात् क्रिया न व्यञ्जिकेति तस्या व्यर्थत्वमिति भावः । द्रव्यस्याविभागावस्थं क्रियायाश्च तद्व्यञ्जकत्वं यदीष्यते तदा दोषं दर्शयितुमाह—द्रव्यमविभागावस्थमिति । क्रिया चेति क्रिया चाविभागावस्थं द्रव्यं व्यञ्जयति सन्निहितव्यक्तित्वात्, द्रव्ये सन्निहितस्य व्यक्तिस्वभावेऽर्थक्रमत्वे द्रव्यमेव तेन तेन प्रकारेण भवनात् तस्य निर्भेदत्वानुपपत्तिरिति भावः । अविभागावस्थद्रव्यव्यक्तौ दोषमाह— ततो यदैवेति । उत्पत्तिविनाशयोरैक्यं व्यञ्जयन् यथोत्पत्तिः स एव विनाश इति तयोरविभागा- 25 वस्थामात्रत्वादैक्यमेवेति भावः । एकत्वे कारणमाह—युगपदिति । कारणार्थं स्फुटीकरोति—यदा चेति द्रव्यं हि अविभागावस्थामात्रम्, तच्च युगपद्भाविनोऽयुगपद्भाविनश्च भेदा अविभागावस्थामात्रम्, स एव हि यतोऽविभागेन वर्तन्ते तदा द्रव्यमित्युच्यन्ते सत्त्वरजस्तमसां साम्यावस्थायाः प्रकृतित्ववत् तयोरुत्पत्तिविनाशयोरप्यविभागावस्था द्रव्यमुच्यते तथा चावस्थावस्थावतोरैक्यात् यैवोत्पत्तिः स एव विनाशः स्यादिति भावः । अस्यविभागावस्थायां वैषम्यप्रयोजकनियतदेशकालादिभेदाभावात् यदा द्रव्यस्य सर्वात्मकत्वात् यैवोत्पत्तिः स एव विनाशः स्यात् यो देश यदा तु देशकालादिभेदोऽपि तदा यदा यत्रोत्पद्यते 30 तदा तदैव विनश्यतीति न भवति तयोर्भिन्नत्वादिति शङ्कते—देशकालादीति । पूर्वार्धं व्याचष्टे—स्यान्मतमिति एकत्वात्

---

१ सि. भावात् । २ सि. क. व्यक्तिर्भेदे । ३ सि. क. क्रियायाश्च ।

ग्रनुत्पन्नस्याविनाशदोषौ स्याताम्, अङ्कुरोत्पत्तौ तस्यैव विनाशित्वात्, न बीजं विनष्टं नाङ्कुर उत्पन्नः, विनष्टोत्पन्नयोरभेदात्।

(देशेति) देशकालादि[भेदा]भावादस्त्विति चेत्—स्यान्मत यदुत्पादोत्पस्याभिभेदैव्यापदेशो- त्पद्यते तदेव विनश्यतीत्यस्तु तर्हि को दोष इत्यत्र दोषमुद्भावयन्नाह, यदि बीजाङ्कुरयोर्युगपदुत्पत्तिविनाशयोरपि
5 पृथिव्यादियुगपदुत्पत्तिभिदेशमूलत्वाद्यदैवोत्पद्यते तदेव विनश्यति ततोऽङ्कुरोत्पत्तौ तस्यैव विनाशित्वमिति दोषः, उदाहरणेन स्फुटीक्रियते—यथा बीजोऽप्यङ्कुरमूलादिपूर्वभेदानां पत्रनालाद्युत्तरभेदानां च विनाशावस्- त्वादङ्कुर एवैक इति तदयम् ततोऽङ्कुरोत्पत्त्यादयमङ्कुर एव विनश्यति ततश्च दृष्टेष्टविरुद्धाद्यनुत्पन्नाविना- शदोषौ स्याताम्, अङ्कुरोत्पत्तौ तस्यैवाङ्कुरस्यैव विनाशित्वात् बीजं विनष्टं नाङ्कुर उत्पन्नः, विनष्टोत्प- न्नयोरभेदात्, भेदे तु सति युज्येत बीजं विनष्टमङ्कुर उत्पन्न इति, स योऽसावभेदे विनष्टो विनष्टभेदो-
10 त्पन्न इति उभयान्यत्वाभावान्नोत्पन्नो न विनष्ट इति।

अस्तु नामानुत्पन्नोऽविनष्टश्च को दोष इति चेदुच्यते नैक एव, किं तर्हि? सर्व एव वचनादिविरोधाः, अङ्कुरप्रत्यादिनिराकरणादपि च लोकादिविरोधाः।

(अस्त्विति) अस्तु नामानुत्पन्नोऽविनष्टश्च किं नामको ममायं दोषो न्यायसम्पन्नोक्त इति चेदुच्यते नैक एव, किं तर्हि? सर्व एवाति वचनादिविरोधाः, उत्पद्यते येन विनश्यति विनश्यति येनो-
15 त्पद्यते, तथा चोच्यते यदैवोत्पद्यते तदैव विनश्यतीति देशकालादिभेदाभावे कथमुत्पत्तिविनाशार्थ- भेदेन तदे[वे]ति चाभेदेन निर्देशोऽविरुद्धार्थोऽतः स्ववचनविरोधः, उत्पत्तिविनाशयोर्वा स्वभेदाते

देशकालादिभेदाभावेन द्रव्यस्याविनाशस्यानुत्पत्तिरिति। अत्र पक्षे दोषमुद्भावयति—यदीति अङ्कुरे दोषप्रदर्शने कारणमाह— बीजाङ्कुरयोरिति बीजाङ्कुरयोर्युगपदुत्पत्तिविनाशौ भावाः ते च युगपदुत्पत्तिपृथिव्यादिभावान्तरेण न भवन्तीति भावः एतेन देशकालादिभेदत्वमावेदितम्। कथमङ्कुरोत्पत्तौ तस्यैव विनाशित्वमत इति चेदुदाहरणेन स्फुटयति—यथाबीजेति
20 बीजमङ्कुरमूलमनुस्यूतमित्यर्थो विनष्ट इति विनाशपदस्यार्थकथनात् अङ्कुरस्य बीजोऽप्यङ्कुरमूलादिपूर्वभेदानां पत्रनालाद्युत्तरभे- दानामेकत्वेन विनाशावस्थत्वात् अङ्कुरस्यैव तस्योत्पत्तौ तस्यैव विनाशित्वं स्यादिति भावः। अनुत्पन्नाविनाशदोषावेवाह- यदि—अङ्कुरोत्पत्ताविति यस्यैवोत्पत्तिस्तस्यैव विनाशाद्बीजं विनष्टमङ्कुर उत्पन्न इति व्यपदेशस्य कारणाभावादुत्पत्तिविनाशाभावेन यदि बीजमङ्कुरश्च न तर्हि तदीयं यदि विनष्टं न तदुत्पन्नमित्युत्पादविनाशयोरैक्येन व्यवहाराभावात् तस्मादनुत्पन्नोऽविनष्टश्चैक- स्यापरस्य नोत्पन्नोऽङ्कुरो न वा विनष्ट इति अनुत्पन्नाविनाशदोषौ स्यातामिति भावः। अनयोरापत्तौ दोषमाह—अस्तु
25 नामेति। यदैवोत्पद्यते तदैव विनश्यतीति अनुत्पादविनाशयोरापत्तौ दोषमादर्शयति—नैक एवेति अत्र एकोऽपि दोष किन्तु सर्व एव स्ववचनादिविरोधाः भवन्तीति भावः। वचनविरोधं दर्शयति—उत्पद्यत इति उत्पत्तिविनाशयोर्भेदाभेदयोरभावे न विनाशः विनाशप्रसङ्गे वा उत्पाद इति वस्तुस्थितेः यदैवोत्पद्यते तदैव विनश्यतीति तदभिधानं विरुद्धं भवेत् देशकालादिभेदाभावेनोत्पादविनाशयोर्भिन्नत्वाभावाद् कथमुत्पत्तिविनाशार्थभेदाद् विनाशमनुत्पन्नं तदैव तदैवाभेदेन निर्देशो विरुद्धार्थ इति, तस्माद्देशकालादिभेदाभावादस्त्विति वचनं यदैवोत्पद्यते
30 तदैव विनश्यतीति वचनं विरुध्यत इति स्ववचनविरोध इति भावः। अर्थान्तरभावाभावे—उत्पत्तीति उत्पत्तिविनाशयोर्भेदे

१ सि क्ष. °विनाशर्थ। २ सि क्ष °निर्देशोऽवि°।

कापिकरणविरोधात् [स्वविविरोधः] लोके प्रतीतत्वाल्लोकविरोधः, प्रत्यक्ष[तः]घटोत्पादविनाशभेददर्शनात् प्रत्यक्षविरोधः, उत्पद्यमानत्वाच्च विनश्यति विनश्यत्त्वाच्च नोत्पद्यते भिन्नघटपटवदित्यनुमानविरोधः, तथा चाङ्कुरपत्रादिनिराकरणादपि च लोकादिविरोधा इति व्याख्यानमनन्तरोक्तस्यार्थस्य लोकप्रतीतिद्वारेण सुखप्रतिपाद्यत्वादिति गतार्थम्। वचनद्वारेण तु योज्यमुत्पत्त्यानन्त्यादोषाणामिति, एवं तावदनुत्पाद-विनाशादिदोषभावः। 5

न केवलमेव एष दोषः किं तर्हि?—

अनित्यतादोषश्च स च क्षणिकवाद व्यतिलङ्घ्य वर्तते, अतोऽभ्युपगमात्, तत्र न हि यदेवोत्पद्यते तदेव विनश्यति, किं तर्हि? क्षणोऽस्यास्तीति क्षणिक इत्युत्पादादन्यो विनाश क्षणः, उत्पन्नश्च विनष्टश्चेत्यभ्युपगम्यते जातस्य विनाशात्, इह तु उत्पाद एव विनाशः क्रियार्थकालरहितद्रव्योत्पादादित्वात्। 10

(अनित्यतादोषश्चेति) [अ]नित्यतादोषश्च स च क्षणिकवादं व्यतिलङ्घ्यानित्यत्वदोषाति-क्रमेण वर्तते इति, अर्थः—इत्यस्मादेव हेतोः कस्मात्? यदेवोत्पद्यते तदेव विनश्यतीत्यभ्युपगमात्, स चैवमनित्यत्वादिकृतदोषः प्रदर्श्यते तद्यथा—तत्र [न] हीत्यादि[×], तत्र [न] हि—क्षणिकवादे न हि यदेवोत्पद्यते तदेव विनश्यति, किं तर्हि? क्षणोऽस्यास्तीति क्षणिक इत्युत्पादादन्यो विनाशक्षणः, उत्पन्नश्च विनष्ट-श्चेत्यभ्युपगम्यते भिन्नस्य कालस्य क्षणात्मकत्वात् तस्मिंश्च काले जातस्य विनाशात् न जायमानस्य, स 15 हि क्षणिकवादी नैकमेवोत्पादक्षणं विनाशक्षणञ्चेच्छति, एकस्योत्पत्तिभङ्गापत्तिभयात्, यथोक्तं 'यदेक-स्मिन् क्षणे जातः' ( ) इत्यादि, क्षणानां क्षणवर्तिनाञ्च भेदाज्ज्ञापयेति च भावानुक्षणानाञ्च भेदं सूचयति, इह तु—यदेवोत्पद्यते तदेव विनश्यतीति वादे उत्पाद एव विनाशः प्रसक्तः, क्रियार्थक-

यो विनाशोऽभ्यधायि इति तयोरेकत्र प्रत्यक्षप्रमाणविरोध इति भावः। लोकविरोधमाह—लोक इति लोके तयोर्भेदेन प्रतीते-रिति भावः। प्रत्यक्षविरोधमाह—प्रत्यक्षत इति। अङ्कुरो न विनश्यति उत्पद्यमानत्वात् उत्पद्यमानघटवत् नोत्पद्यते 20 चाङ्कुरः विनश्यत्त्वात् विनश्यद्वदिति भेदानुमानादनुमानविरोध इत्याह—उत्पद्यमानत्वादिति। अङ्कुरस्य पूर्वोत्तरभेदाना-मीदृशेऽप्यनित्यत्वाभ्युपगमदर्शनेन निराकरणात् पुनरपि लोकादिविरोधा इत्याह—तथा चाङ्कुरेति। अपरमपि दोषमाह—अनित्यतेति तव इत्थम्भूतस्य नित्यत्वाभ्युपगमादनित्यत्वं प्रसज्यते यदेवोत्पद्यते तदेव विनश्यतीत्युत्पाद-विनाशाभ्युपगमादिति भावः। तदनित्यत्वं विस्पष्टयन्नेवेत्याह—स चेति। अनित्यत्वे दोषान्तरे च हेतुमाह—अत इति, यदेवोत्पद्यते तदेव विनश्यतीत्यस्य वादाभ्युपगमादेवोत्पत्तिविनाशाभ्युपगमादनित्यत्वमिति भावः। लोक-25 प्रसिद्धानित्यत्वादिदोषस्य दर्शयति—तत्र न हीति। क्षणिकवादे हि क्षणे एकस्मिन्नेव नोत्पादविनाशौ भवतः किन्तु प्रथम-क्षणे उत्पादो द्वितीयक्षणे च विनाशः आत्मलाभानन्तरविनाशी धर्मः स यस्यास्ति स क्षणिक इति व्युत्पत्तेरुत्पादानन्तरविना-शस्वभावो भावः एवञ्च जातस्य विनाशो न जायमानस्य तव तु यदेवोत्पद्यते तदेव विनश्यतीत्यभ्युपगमात्सैव विनाशित्वा-भ्युपगमात् क्षणिकवादिनामनित्यत्वं स्यादिति दर्शयति—क्षणोऽस्यास्तीति। एवं चात्र इत्युक्त्वा एतत्प्रवृत्तिभेदेन उच्यते जातस्य विनाशाभ्युपगमात् भावस्वरूपभेदेन उच्यत इत्यत आह्वानामिति। तथा क्षणिकवादिनामित्यत्र 30 दर्शयति तद्विपर्ययोऽत्र प्रदर्श्यते—इह त्विति। हेतुमाह क्रियार्थेति। इत्यभिप्रेतमपरस्वभावेऽतिरिक्तकालाभावात् विनाश-

१ सि. चाप्यंचात्यय्यु। २ सि क. °तावदुत्पादविनाशादि। ३ क. ××। ४ सि क उत्पत्तिरनुविनष्टो०।

कश्चिद्द्रव्योत्पादादिस्यात्—क्रियासम्बन्धाभ्योऽर्थः क्रियैव कालः क्रियाप्रयोजनो वा कालः क्रियार्थकालः स एव ते वैयाकरणस्येष्टः यद्यप्यन्येषामन्यथा, यथोक्तं 'परिमाणवती क्रियैव कालः' ( ) इत्यादि, तादृग्विधक्षणभङ्गरहितं द्रव्यं क्रियात्मककालविनाभूतं तदैवोत्पादो विनाशोऽनन्तरमेवेतीत्यात् क्षणिकवादाविशिष्टस्यैव क्षणिकवादस्तवेति इति साम्प्रतम्।

नास्तिवादेऽपि सिद्धमनवस्थत्वादुत्पादादीनाम्, किं तर्हि—

शून्यवादता वा, अविनष्टानुत्पन्नास्थितत्वात् खपुष्पवत्।

(शून्येति) शून्यवादता वा, यथा प्रागुक्तं सर्वस्मादङ्कुरादनुत्पादाविनाशवदवस्थानमपीति शून्यतासाधनं तदर्थं यावत् खपुष्पवत्।

ननु पृथिवीद्रव्यस्याभेदात्तदंशबीजाङ्कुरभेदात् तत्कृतौ चोत्पादविनाशौ स इति न भेदस्याभेदस्य वा व्यापारः, तस्मात्तदेवोत्पद्यते तदेव विनश्यतीत्यत्रोच्यते, एवं तर्हि इदानीं भेद एवापतितस्तथापि, अश्मसिकतामृल्लोष्टजातिभेदे सति पृथिवी नाम न काचिदन्याऽस्ति, किन्तु पृथिवीत्वजातिमात्रमभिन्नं तद्भेदस्यापि तथा द्रव्यमेकमित्यस्य स्वपक्षस्य विघातकम्, बीजस्याङ्कुरस्य च नानात्वं बीजाद्विनश्यतोऽन्याङ्कुरस्योत्पद्यमानत्वात्, भिन्नाङ्कुरान्य इव देवदत्तात् यज्ञदत्त उत्पद्यमानः, तस्माच्च तदेवोत्पद्यते तदेव विनश्यति, ततश्च यथा बीजं ब्रीहित्व सामान्याभेदे सत्यङ्कुरात् पृथगेवेष्यते तथा पार्थिवत्वमपीति भेदनिर्भेदद्रव्यनिर्मूलनम्।

---

१ [illegible] इति अत्र पक्षे [illegible] । [illegible] क्रियैव चेति [illegible] । [illegible] इति अत्र पक्षे [illegible] अत्र क्रियाया [illegible] काल इति [illegible] ... [illegible] 'परिमाणवती क्रियैव काल' इति । यद्यप्यन्येषामिति [illegible] ... [illegible] —शून्यवादता चेति । [illegible] ... [illegible]

१ सि. क. [illegible] । २ सि. क. [illegible]

ननु पृथिवीत्यादि यावद्भेदस्य वा व्यापाद इति स्यान्मतं पृथिवीद्रव्यस्य शिवकादिभ्यामिव तस्मिन्नाभिन्न यदुत्पादविनाशयोरभेदे सत्यं पृथिवीद्रव्यस्यैवानुत्पादाविनष्टत्वे सत्य एक एव तत्रो-त्पादविनाशौ तत्कालौ च, तस्यैव पृथिवीद्रव्यत्वस्य चोपाभ्यां बीजाङ्कुराभ्यां भेद इत्यस्ति भेदः, कारकसद्भावादिरुत्पत्तिरस्ति तथा विनाशस्तत्कालौ च, इतिशब्दस्य हेत्वर्थत्वात्, एवं भेदस्याभेदस्य च व्यापादो नास्ति तस्मात्तदैवोत्पद्यते तदैव विनश्यति पृथिवीद्रव्यत्वामेवात् यद्यपि बीजाङ्कुरभेदात्तत्कालौ 5 च स्त इति नाभिमन्यते दोषाविति, अत्रोच्यते—एवं तर्हीत्यादि यावत् तदैवोत्पद्यते तदैव विनश्य-तीति, अयमिदानीमस्मत्परिकल्पितो भेद एवापतितस्तथापि, अत्रमसिद्धत्वात्पृथ्वीत्वजात्यादिभेदे सति पृथिवी नाम न काचिद्व्याऽस्ति तद्व्यतिरेकेण, किन्तु पृथिवीत्वजातिमात्रमेवमिव तद्द्रव्यापि, तत्र द्रव्य-मेकमित्यस्य त्वत्पक्षस्य विघातक जातिमात्रमभिन्न दोष सर्वं भिन्नमिति सिद्धत्वात्, बीजस्याङ्कुरस्य च नानात्वं बीजादिविनश्यतोऽन्योऽङ्कुरस्योत्पद्यमानत्वात्, विनष्टः—मृतादन्य इव देवदत्तोपलक्ष्य उत्पद्यमानं 10 इति, तस्मान्न तदैवोत्पद्यते तदैव विनश्यति, अन्यनिवृत्त्यर्थोपधारणस्य भेदसत्त्वे सत्यानर्थक्यात्, तच्च यथा बीजमित्यादि दृष्टान्तः—यथाङ्कुरादिकालेषु भिन्नेष्वपि व्रीहित्वसामान्याभेदे सति पृथगेव बीजमङ्कुरादिरन्यथे मा भूत् पूर्वोक्तोऽनुत्पादाविनाश इति त्वया, तथा पांश्वादित्वमपि—पांशुमृत्पिण्डादि त्वमपि पृथिवीत्वाविभक्तमेवपितव्यम्, ततः किमिति चेद् ब्रूमः—इति भेदनिर्भेदद्रव्यनिर्मूलनमिति—अस्मात् पांश्वादिसभेदाभ्युपगमात् सर्वप्रभेदनिर्भेद न भवति, ततश्च लक्षणाभावाद्द्रव्यमेव निर्मूलितं त्वयेति। 15

एतत्पृच्छते—ननु पृथिवीद्रव्यत्वेति। एतत्र व्याचष्टे—स्यान्मतमिति अनेनावयवावयविनोरभेदो दर्शितः। तस्मिन्नाभि-न्न इति, अनेन येषोत्पत्तिः स एव विनाश इत्युत्पादविनाशयोरभेदः प्रदर्शितः। पृथिवीद्रव्यत्वस्येति अनेन द्रव्यस्यैव दर्शितं। विनाशानुत्पादाविनाशित्वं प्रतीयताम् तस्यैवेति अनेन तदवस्थायास्तैव बीजाङ्कुरादिना तद्भेदस्यापि तस्यता दर्शिता। कारकसद्भावादिति अनेन यदा तथाविधकारकसमवधानं तदोत्पद्यते यदा तु तथाविधकारकासमवधानं तदा विनश्यतीति उत्पत्तिविनाशयोर्भिन्नौ प्रतीयतो। तदेवं पूर्वोक्तदोषाभावं प्रदर्शयति—एवं भेदस्येति एवमवस्थाभेदात्मना भेदाभेदौ 20 न विरुध्यत इति भावः। एवमभ्युपगमे द्रव्यमेव निराकृतं भवतीति समाधत्ते—अत्रोच्यत इति। अवयवव्यतिरिक्तोपलब्धि-लक्षणप्राप्तस्यानुपलम्भेऽपारमार्थिकत्वात्पार्थिवत्वाभेदेऽन्यो व्यतिरिक्ता पृथिवी नाम न काचिदस्तीति दर्शयति अयमिदानीमिति। अवस्था पृथिवी भिन्ना पृथिवी एव पृथिवीति प्रत्ययतो यत् स्थितिकं द्रव्यं भेदस्यापि भवति सा केवलमभिन्ना पार्थिवैव न तु द्रव्यम्, अवयवादिव्यतिरिक्तस्य प्रमाणतो द्रव्यस्यानुपलम्भात् तस्मात् सर्वभेदस्यापि प्रमाणाभावात् द्रव्यं नाम न किञ्चित् तत्पक्षे भिन्नतायैव तदेव पृथिवीद्रव्याभेदाश्रितस्यापि तस्मात् द्रव्यं भिन्नं भिन्नमेवाश्रितं विनश्यतो बीजस्यान्यस्यैवाङ्कु- 25 रस्योत्पादात्, अत एव तदैवोत्पद्यते न तदैव विनश्यतीति प्रतिपादयति—अक्रमसिद्धत्वेति। तद्व्यतिरेकेण—अक्रमसिद्धत्वादि विवक्षितेनार्थः। अनेकस्य द्रव्यस्यापेक्षया उत्पद्यतो न स्यादित्याह—द्रव्यमित्यादिना। न च बीजाङ्कुरादीनामेव द्रव्यता वैषां प्रभेदेन नानात्वदर्शनादित्यवधेयम्—बीजस्येति। निदर्शनमन्यत्र दर्शयति—विनष्टादिति। एवमुत्पद्यमानोऽन्यो विनाशी चान्य इति यदैव तदैवेत्यवधारणाद्विरोधो नोपपन्नः अत्र विवक्षितोऽन्यनिरासार्थः यत्र चान्यसमुत्पत्तावन्यविनाशोऽवधारितं तत्र तदितरव्यवच्छेदार्थ—तस्माच्चेति। यदैव तदैवेति यत्सैवोत्पादस्तस्यैव विनाश इति वर्णयन्, यत्तत्स्वभावैकत्वविपर्ययान्य- 30 निर्वर्तनं रूपमपि विनाशम्, अन्यानन्यापयोरविवक्षितमेवास्य त्वन्मात्, ततश्च पांश्वादिभिः समानैरुत्पत्तिविनाशविवक्षणात्

1 सि क. सत्येन। 2 सि क. तदादि°। 3 सि. क. °मात्रमिदं। 4 सि क °व्याङ्कुरत्वा। 5 सि. क. °दभेदत°। 6 सि क. °मानमिति। 7 सि क. °दाभिदा।

अपि च त्वयैव द्रव्यांशाभ्यां बीजाङ्कुराभ्यां भेद इत्यनेन वचनेनापादितं भेदानां बहुत्वं द्रव्यैकत्वविघाति, किञ्चैतदनिष्टपरिहारार्थमुत्थितेन ननु पृथिवीद्रव्यत्वाभेदादित्यादिवचनेन पार्थिवत्वमपि नानैवोत्थापितम्, बीजादि भेदकमभेदकादन्यत्, भेदकत्वात्, अभेदकमितरच्च, अभेदकत्वात्, यथा द्रव्यक्रिये इति ।

5 अपि चेत्यादि, त्वयैवाऽऽपादितं भेदानां बहुत्वं द्रव्यैकत्वविघाति, कतमेन वचनेनेति चेत् पार्थिवद्रव्यत्वाद्बहुत्वपूर्विकं द्रव्याभेदो नेष्टः द्रव्यांशाभ्यां बीजाङ्कुराभ्याम्, ताभ्यामाभेदकत्वमित्यनेन वचनेनापादितम्, किञ्चान्यत्—इदमप्यन्यदनिष्टं तत्परिहारार्थमुत्थितेन त्वयाऽऽपादितम्, कथं? यथोदितोऽपि बीजाङ्कुरनानात्वं अनिष्ट[वार]यितव्यः द्रव्यवादता च भवतु इति तत्परिहारार्थमुत्थिते[न] ननु पृथिवीद्रव्यत्वाभेदादित्यादिना वचनेन पार्थिवत्वमपि नानैवोत्थापितम्, कथमिति? उच्यते—भेदकं 10 पार्थिवत्वं, बीजादि भेदकं, बीजादिभेदकमभेदकादन्यत्, अभेदकं च भेदकात्, भेदकत्वादिति समानधर्मं हेतुत्वेनाह, इतरच्च—अभावमानभेदकत्वादिति, उभयोर्दृष्टान्तो—द्रव्यक्रिये यथा द्रव्यात् सर्वमि धर्मिभेदास्यन्ता यथाभूतवस्तुतत्त्वमविच्छिन्नमया क्रिया क्रियात्वेन द्रव्यं तथा च पार्थिवत्वमभेदकत्वाद्बीजादिभेदकान्निर्गतमथ तद्भेदकत्वाभावात् स्यात् क्रियाया इव द्रव्यमिति ।

आह—

15 ननु घट उत्पद्यमान एव शिवकत्वेनोत्पद्यमानः पिण्डत्वेन विनश्यति पूर्वोत्तरकालयोरपि मृद्द्रव्यपृथिवीमूर्त्याभेदादवस्थाभेदादवस्थ एवेति स यथोत्पद्यते स एव विनश्यति, तस्मात् पिण्डत्वेनोत्पद्यमानः शिवकत्वेन नश्यति, तथा पुनर्घटत्वेन विनश्यन् पटत्वेनोत्पद्यते, शिवकत्वेनैव विनश्यंश्छत्रकत्वेनेति ।

पररूपं भेदयाप्यांत वहितयामाः पृथिव्या अमाभेनापेक्षमभ्यारक्तं पृथिवीत्वं सामान्यमेवाभिन्नं सर्वभेदानुगतं वस्तु, न तु 20 द्रव्यम्, अतश्च तत्त्वतस्तु भेदभिर्भेदं द्रव्यमिदस्य विघात इति भावः । ननु त्वयैवोत्पत्तुरङ्कुरत्वं बीजादि भिन्नाः पार्थिवद्रव्यत्वेनाभेदे अपि बीजादित्वेन भेदे सत्या भेदानां द्रव्यैकत्वविघातकं बहुत्वमापादितं न तु मयैवेत्याह—अपि चेति । तदेव वचनं दर्शयति—पार्थिवद्रव्यत्वादिति । तच्च पार्थिवत्वमपि नानैवोत्थापितमिति दर्शयति—किञ्चान्यदिति बीजाङ्कुरादित्यन्यत्वस्यानुनेयोऽन्यत्वात् यथैवोत्पद्यते तथैव विनश्यतीत्युक्ते अनिष्टमापादितम् [illegible] योज्या । पृथिवीत्वस्य नानात्वं मानेन दर्शयति—अभेदकमिति पार्थिवत्वमभेदकम् बीजादिभेदकत्वादन्यत्वम् भेदकाद 25 बीजादेः पार्थिवत्वमभेदकमन्यत् बीजादि भेदकमभेदकादन्यत् अत्र मातुः बीजादिभेदकत्वं समानं एकमभेदकमन्यत्वमन्यदन्यो हेतुः अभेदकं पार्थिवत्वं भेदकादन्यत् अत्राप्यभेदकत्वं समान एव भेदकादन्यत्वे हेतुः । यथा द्रव्यादन्या क्रिया तथाभूतवस्तु-तत्त्वमविच्छिन्नत्वात् क्रियात्वं द्रव्यमन्यत् धर्मभेदभिर्भेदत्वात् तथाऽऽपादितं दर्शितं दृष्टान्तमाह—उभयोरिति भेदकाभे-दकात्मकत्वान्योऽभेदकस्य च भेदकादन्यत्वसाधने दृष्टान्तः । दार्ष्टान्तिकं दर्शयति—यथेति । क्रियाया भिन्नत्वमापन्नं द्रव्यस्य यथा नानात्वं अस्याभिन्नधर्मैर्भिन्नधर्मभावात् तथा पार्थिवत्वमभेदकत्वेऽपि नानैवेति बीजादि पुनरपि अभेदं नानाविधं नानीं दर्शय-30 न्नमिति यथा घटस्य पूर्वोत्तरकालयोः मृद्भिन्नदर्शनकालत्वात् घट एव तथामनन्यामनुत्पत्तिविनाशाभ्यां घट एवोत्पद्यते विनश्यति च तथा घटावस्थायामपि घट एव मृद्भिन्नाभिन्नत्वात् पिण्डशिवकादुत्पत्तिविनाशाभ्याम् नानुत्तरत्वमिति [illegible]

---

१ सि. क. पार्थिवत्वादिव बहुत्वपूर्विकं द्रव्याभ्यांशाभ्यां । २ सि. क. भेदानामपि । ३ सि. क. अभेदकत्वं ।

ननु घट उत्पद्यमान इत्यादि यावत् पटत्वेनोत्पद्यत इति, यस्त्वयोक्तं यदैवोत्पद्यते तदैव विनश्यति तथानुत्पन्नविनाशसम्बन्धविरोधादिविकल्पाभावादिप्रसङ्गदोषा न सम्भवन्ति, प्रत्यक्ष-प्रत्यक्षादीनां तथात्वात्, यस्माद् घट उत्पद्यमान एव शिवकत्वेनोत्पद्यमानः पिण्डत्वेन विनश्यति, पूर्वोत्तर कालयोरपि सद्द्रव्यपृथिवीमृत्त्वाभेदाद् घटाभेदात् पिण्डावस्थायां शिवकाद्यवस्थायां मृदादियावत्परमा-ण्ववस्थायां कपालादियावत्परमाण्ववस्थायाञ्च घट एवेति स एवोत्पद्यते स एव विनश्यति, इति 5
द्रव्यस्य हेत्वर्थत्वात् तस्माद् घट एव पिण्डत्वेनोत्पद्यमानः शिवकत्वेन नश्यति तस्मादनुत्पन्नस्यादिदोषाः, यथा पिण्डत्वेनोत्पद्यमानः शिवकत्वेन घट एव विनङ्क्ष्यति तथा पुनर्घटत्वेन विनश्यन् पटत्वेनोत्पद्यते किमिव? शिवकत्वेनैव विनश्यच्छत्रकत्वेन—यथा शिवकत्वानन्तरं छत्रकत्व जायमान तदुत्पन्नं विन ष्टं च तथा देशान्तरभावान्तरान्तरितपटविनाशपटसम्भवयोरप्यभेदो वस्तुत्वाविशेषः, पिण्डशिवकत्व वदिति । 10

अत्रोच्यते, अयमपरिहारः, उक्तोत्तरत्वात्, अर्थतो हि यदैव शिवकोत्पत्तौ शिवकेनैव विनाश इति तदेवाङ्कुरोत्पत्तावङ्कुरेणैव विनाश इत्युक्तं ततोऽयं दोषो बलादापद्यते शिवके नैवोत्पत्तौ शिवकेनैव विनष्टम्यमिति, ततोऽभिन्नत्वात्, यथा स्वयुक्तानन्तरघटोत्पादः, एवं त्वनुत्पत्तौ तस्यैवावस्थितस्य नैवोत्पत्तिः, अत्यन्तभावादन्यत्वात् खपुष्पवत्, अनुत्पन्नस्य च विनाशाभावः खपुष्पवदेव विनाशस्याप्यभावादृष्टादिभवनाभाव[1], भवनसम्बन्धस्य तत्प्रतिक्रमस्य चाभावात् सर्वममूर्तं नास्तीत्येवमाद्यापद्यते । 15

(अत्रोच्यत इति) अत्रोच्यते अयमपरिहारः, उक्तोत्तरत्वात्—नन्वत्रोच्यमेव प्रागङ्कुरत्वेन विनाशित्वादिदोषजातम्, तत्र पिण्डशिवकत्वसंज्ञामात्रपर्यायोक्तिमात्रभेदान्न परिहारो भवति, यतोऽर्थतो यदैव शिवकोत्पत्तौ शिवकेनैव विनाश इति तदेवाङ्कुरोत्पत्तावङ्कुरेणैव विनाश इत्युक्तं ततोऽयं

इति भावः । तमेव व्याचष्टे—यस्त्वयोक्तमिति अनुत्पन्नविनाशाभेदेऽनुत्पन्नविनाशदोषः उत्पादविनाशयोर्भेदे एव सम्भवत् 20 बीजे विनष्टेऽङ्कुर उत्पन्न इति अनुत्पन्नविनाशयोरनुगमे सम्बन्धविरोधादयो दोषाः यदैव तदैवेत्यभेदेनोत्पत्तिविनाशभेदेन न निर्देशात् तथा वक्तिव्यादि उत्पादारम्भकत्वादिविनाशस्य तथा यदैव तदैवेत्यत्र देशकालादिभेदाभावात्, अविकल्पादि-स्वरूपेण अविनष्टानुत्पन्नमित्यत्राद्यसम्भवादिविरोधादयो दोषा न सम्भवन्ति शिवकत्वेनोत्पादस्य पिण्डत्वेन विनाशसामानाधिकरण्यात् तमर्थमेव व्यवस्थापयत्युपपत्त्या यदैवोत्पद्यते तदैव विनश्यतीत्युक्तवदविनाशसिद्धिरप्यसम्भवात् कोऽपि दोष इत्याह-तदनुत्पन्नेति । तमर्थमेवाऽऽह अन्यदेव दर्शयति—यस्माद्घट इति । विनाशेऽप्यत्रापि अत्यन्तमनुत्पन्नत्वाद्धि—यथा 25 पिण्डत्वेनेति पिण्डशिवकत्वयथाक्रमत्वात्सो यथा … तथैव वस्तुत्वाविशेषं व्यवस्थापयत्यन्तरत्वयोरपि तद-वैव … इति भावः । देशान्तरेति पिण्डत्वशिवकत्वादीनि देशान्तराणि … भावान्तराणि । एवमङ्कुरोत्पत्तौ तदैव विनाशित्वप्रसङ्गः बीजोऽङ्कुरमूलत्वेऽपि पूर्वभेदाभावात् … विनाशासम्भवादङ्कुर एवैक स्वाङ्कुरोत्पत्त्याऽनङ्कुर एव विनश्यतीति प्रतिपादितस्य दोषस्यापि समानत्वात्तदर्थं परिहारोऽपरिहार एवेत्याह—अत्रोच्यत इति । एतदेव सूचयति—नन्वत्रेति बीजाङ्कुरादित्वात् … पिण्डशिवकत्वादि … प्रतिपन्नोऽर्थे, न तु विशेषः कश्चित् प्रति- 30 पादित इति भावः । तदर्थमेवोत्तरमत्रापि भवति—यस्मादिति । पिण्डशिवकयोर्भा अत्यभिन्नत्वात् पूर्वोत्तरावस्थयोः विनाशा-पन्नत्वात् शिवकत्वेनैव उत्पत्त्या शिवकेनैवोत्पत्तौ शिवकेनैव विनष्टम् ततोऽभिन्नत्वात् शिवके हि शिवकत्वाभिन्नः तस्मात्

१ सि. क. वदते । २ क × × । ३ सि. क. एकत्वम् अस्ति । ४ सि. क. तस्मादुपैव ।

दोषो यस्मादनपत्ते शिवकेनोत्पत्तौ शिवकेनैव विनंष्टव्यमिति, किं कारणं ? तयोरभिन्नत्वात्, ययो यदभिन्न तदुत्पत्तौ तेनैव विनष्टव्यं यथा स्वतुल्यतन्त्वात्मपटोत्पाद इति, एवं स्वतुल्यपातितादि–स्तम्भेद् त्पत्तिर्नेष्यते तथैवापरस्मिनस्य पटस्य नैवोत्पत्तिरस्ति, अभवत्वं घटाद्यभावात्मकत्वात् खपुष्पवत्, अनुत्पन्नस्य च विनाशाभावः खपुष्पवदेव, विनाशसाम्याभावात् घटादिभवनाभावः, अभिन्नत्वात् तु तेरप्यभावाद्घटादीनामुत्पत्तिविनाशशून्यत्वात्भवनाभावः–भक्तिस्वाभावः, उत्पत्तिविनाशौ हि [भवन-सम्बन्धवत्प्रतिक्रमौ,] भवनसम्बन्ध[स्य]व्यतिक्रमस्य चाभावात् सर्वममूर्त माध्यमिकमायापत्त्ये, आदिमदन्तवत्स्तुसत् अभावो निरुपाख्यमित्यादि ।

अत्र पुनः परिहारः–

मयोऽप्येतैक्य एव भिन्नयोरप्यभेदः, यथा मृत्कुम्भावस्था, रूपादिशिवकादियुगपद युगपद्भाविनिमित्तभवनानि मृद्द्रव्यभवनस्यैव भवनभागा अभिव्यज्यन्ते तांश्च भवनभागान् क्रियापि व्यनक्ति नान्यथेति यथाभिन्नस्यैवावस्थाः स्युः को दोष इति ।

अयोऽप्येतैक्य एवेत्यादि, यथा तत्त्वैक्ये मृत्कुम्भावस्थयोः सर्वसर्वात्मकत्वाद्भिन्नयोरप्यभेदः यथा बीजाङ्कुरादिभेद इत्यभिप्रायः, यथा मृदः कुम्भावस्था, युगपद्भाविनो रूपरसादीनामयुगपद्भाविनाञ्च शिवकादीनां निमित्तानि भवनानि मृद्द्रव्यस्यैव कर्तृभवनस्य रूपादिशिवकादित्वेन तेन प्रकारेण निवृत्ता एव भवनमार्गैः मायाकारकव्यवहारिकाभावमात्रविशेषाभिव्यक्त्योऽभिव्यज्यन्ते प्रथमभवनस्य कर्तृभव नापेक्षत्वात्, तांश्च भवनभागान् क्रियाऽपि व्यनक्ति नान्यथा भावकस्य द्वितीयस्य क्रियाभावित्वात् । यथाभिन्नस्य मृत्कुम्भाद्ययुगपदवस्थाः रूपादियुगपद्भाविद्युग[पद्]उत्पत्तिस्थिति[विनाशाः] अभिन्नस्यैवाव स्थाः स्युः को दोष इति ।

तदुत्पत्तौ तैनैव विनंष्टव्यम्, कथमेतदपपद्यत इत्यत्रोक्तं भिन्नस्यानन्ये च इत्याह शिवकेनेति । तत्स्वरूपमाह हेतुमाह–तयोऽ भिन्नत्वादिति तत्त्वतत्स्वभावत्वात् भिन्नस्वभावस्य तदभिन्नत्वादित्यर्थः । दृष्टान्तमाह–यथेति यथा स्वतन्तुतत्त्वात् भिन्नस्यानन्यत्वेनैकेनोत्पद्यते तथैवेति भावः । शिवकादिपारोपेऽप्येवं पदार्थस्य तत्त्वेनानुत्पत्तौ विनाश स्याभावप्रसङ्ग भवनं न स्यादित्याह–एवमिति । घटाद्यभावादिति किं भिन्नाभावतत्त्वाद्भावेऽतोऽभावे विनाश वैरस्याभावे तदभावप्रसङ्गेन यस्य उत्पत्तिर्न स्यादिति भावः । एवं तत्त्वस्वभावे कथं स्वरूपेण विवक्षा कल्पितं तस्य तद्भवस्वस्वभावत्वात्स्वरूपस्य भवनानुभूतस्य अभिलापं स्यादित्याह–अनुत्पन्नस्य चेति । तत्स्वभावे सर्वं भवनाभाव इत्याह–उत्पत्तीति भवनसम्बन्धोऽतोऽनन्तिभावात्स्वरूपस्य च विनाशत्वादित्यर्थः । भावाभावमाह आदि मदन्तादिति । पुनरयुगपद्भाविनो भेद अभेदरूपेण एव अभिन्नयैव भेदः इत्याह न हि धर्मिस्वरूपव्यतिरेकेण भेदधर्म अभिन्नत्वमपि तत्त्वदेशेन एव भेदाभावात् तेषां च भेदानां धर्मिरूपादेशाभावाभेदत्व विवक्षयाह यत एव वर्ण व्यवहाराणि अभेदवन्ति इमे एव यथार्थं युगपदयुगपद्भाविभावमेव विभिन्नत्वात् मायाकारकवद्वादिभ्रान्त्यर्थेन क्रिया एव वर्णा विवक्षितभावकत्व इति नामूर्त भावादिस्वरूपाभावात् इत्याह–अयोऽप्येतैति । तदेव व्याचष्टे– यथा तत्त्ववतीति, मिश्रणभवनोत्पत्त्यवस्थातत्त्वं यथा भेदोऽभेदश्च भवत्येव तत्तत्स्वरूपैः विशेषीकरणात् विशेषतत्र यथास्व भवति भावः । तदेव वर्णयन्नपरेण भिन्नत्वमतत्त्वं भिन्नाऽऽभिन्नात् इत्याह–यथा मृद इति । ननु भेद-

१ सि. क. तत्रां क. । २ × × सि. । ३ सि. क. वदि भिन्न ।

अत्रोच्यते नन्वस्माभिरपि नोपपद्येते इत्युक्तमनन्यत्वात् सर्वस्य सर्वात्मकत्वाच्च, त्वयाऽभ्युपगतानां स्थित्यादीनां द्रव्यस्यावस्थत्वात् तस्मादविरोधादनन्यत्वमासाम्, अनन्यत्वाच्च पूर्वोत्तराभावात् कः केनाभिभूतो येनैक्यमापद्येरन्, यत इयमनया क्रिययाऽभिव्यज्यते, नेयमिति च, अविद्यमानपार्थक्यात्, पृथक् सिद्धाना मैक्यापत्तिः तन्तुपटवत्, ततः कस्य चिदसत्त्वव्यक्ती नोपपद्येते इति कुत उत्पादादिभेदः? । 5

(अत्रोच्यत इति) अत्रोच्यते—नन्वस्माभिरपीत्यादि यावत् कुत उत्पादादीति, नन्वस्माभिरपि एव नोपपद्येते इत्युक्तं, अभ्युपगम्यव्यक्तीत्यभिसम्बध्यते, तथानियतमवचनमागृह्याप्यस्माभिः व्यञ्जनम् व्यञ्जनत्वेति, कस्मात्? अनन्यत्वात् सर्वस्य सर्वात्मकत्वाच्च, तथानन्यद्रव्यमेव, तस्य च स्थित्युत्पत्ति-विनाशा अनन्ये, किं कारणं? त्वयाऽभ्युपगतानां स्थित्यादीनां द्रव्यस्यावस्थत्वात्—द्रव्यस्यैव ह्यवस्थाः स्थित्यादयः परस्परतोऽनन्य इति हि समाश्रितः त्वयाऽयं पक्षः, परस्परभिन्नस्थित्यादीनां द्रव्यस्यावस्थत्वे 10 सर्वपदार्थव्यवस्थितत्वभयात्, तस्माद्द्रव्यस्यावस्थत्वादविरोधः स्थित्यादीनाम्, न यथा छायातपयोर्विरोधः, तस्माद्द्रव्यस्यावस्थत्वादविरोधः, अविरोधाच्चानन्यत्वमासाम्, अनन्यत्वाच्च पूर्वमिदमुत्तरमिदमिति क्रमाभावात्तः पूर्वोत्तराभावात् कः केनाभिभूतः येनैक्यमापद्येरन् स्थित्यादयः, यतः—एतस्मादियमनया क्रिययाऽभिव्यज्यतेऽवस्था नेयमिति च, कस्मात्? अविद्यमानपार्थक्यात्, पृथक् सिद्धानां ह्यैक्यापत्तिः स्यात् तत्सविरोधे, तन्तुपटवत्, तस्मादभिन्नत्वैक्यानापत्तेः पूर्वोत्तराभावाद्द्रव्यस्यावस्थत्वे सत्यविरोधात् 15 अनन्यत्वात् कस्यचिदसत्त्वव्यक्ती नोपपद्येते, इत्यतदनुपपत्तेस्त्वयानियतमवचनमागम्यव्यक्त्यभिव्यक्तिभावाभ्या-मुत्पादादिभेद इति तदवस्थो दोषः ।

किञ्चान्यत्—

अपि च लोकप्रतीतव्यक्तिधर्मविपरीतत्वादुत्पादाद्यभाव इति ब्रूमः, लोके हि पूर्वव्य-

---

भावेनान्येनाभेदो भवतामिष्टः तथा चोत्पत्तिस्थितिविनाशाः द्रव्यस्यैवान्येनाभिव्यक्तस्य तस्य एव तस्मात् भेदोपपत्तिः स एव 20 विनाशः स्थितिरुत्पादस्य च व्यक्तत्वस्य एवेत्युत्तरयति—अत्रोच्यत इति । यतो भवन्तिर्व तदुक्तो तेनैव भिन्नस्व तत्तोऽ-भिव्यक्तम्, एवं तदुक्तौ विनाशमात्रेण भवतामाशाद् द्रव्यस्थित्यादीनां व्यक्तव्यक्ती न त्वाभिमुख्यं तद्यतीति—नन्वस्मा-भिरिति । स्वरूपाभावस्थयोरैक्यानन्यत्वात् सर्वेषां सर्वात्मकत्वाच्चेमनुपपत्ते हेतु दर्शयति—अनन्यत्वादिति स्थित्यु-त्पत्तिविनाशानां द्रव्यानन्यत्वात्, स्थित्यादीनामपि परस्परतोऽनन्यत्वेन सर्वात्मकत्वाच्चेति भावः। अन्यथा सर्वसर्वात्म-कत्वपक्षमत आह—परस्परेति अवस्थानां परस्परं भेदमभ्युपेत्य तासामवस्थात्वमनन्यत्वे इत्यर्थः । ननु स्थित्युत्पत्तिविना- 25 शानां भिन्नकालेन विरोधात् कथं परस्परमभेद इत्यत आह—तस्मादिति द्रव्यस्यावस्थत्वादित्यर्थः । अवस्थात्वमेव स्थित्यादिना-विरोधादनन्यत्वेनाप्यपूर्वोत्तरभावता नास्ति स्थित्यादीनां विरोधाद्धि घटे हि छायातपयोरिव पूर्वोत्तरभावता भवेत् तत्तश्च अतएव क्रमो नास्ति स हि भेदं न सहते । ततोऽपि व्याख्यातं अवयवेनाभिधीयते च' इति, एतत् द्रव्यमात्रमैक्य-भेन त्वस्थावस्थाभेदेनाभिव्यक्तिमभिभूतोऽभावसमिति नाभिनिर्भूत इत्यनन्यत्वेनोत्पादाद्यभावात्मुतं नाभिमुख्योपादानस्य एवेत्याह—अनन्यत्वाच्चेति । अथानन्यद्रव्यस्य सर्वात्मकत्वमभ्युपेत्य व्यक्त्यव्यक्त्योः सम्भावनमपि व्यक्तस्याभावे न स्यात् 30 घोऽहे हि यत्र यत्र व्यक्तिस्तो व्यक्तिरिक्तसेव व्यक्तव्यं इत्यते तदभाव नाभिमुख—अपि चेति । अभ्युपगम्येति

---

१ सि. क. °भीदृभिन्ना । २ सि. क. °व्योत्यमितिः । ३ सि. क. °तन्तुपटत्ववत् ।

नितिष्ठतीति, अत्रापि हि द्वयी गतिः—तेनाप्युत्पत्तिप्रकारेणावतिष्ठमान यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथावतिष्ठमान तदेवोत्पद्यते तदेव निस्तिष्ठति चेति, यदि तथोत्पादेनैवावतिष्ठमानमुत्पद्यते नितिष्ठतीत्युच्यते तत उत्पादेनैवावस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्विधाऽपि कुतः? उत्पद्यमाने चावस्थानम्? यदुत्पद्यते कथमवतिष्ठते? यदवतिष्ठते कथमुत्पद्यते? इति
5 स्ववचनादिविरोधाः पूर्ववत्।

अयोरुत्पादविनाशसामानाधिकरण्य इत्यादि, उत्पादविनाशैकाधिकरण्ये दोषदर्शनात् निर्दोषोऽयमिति विकल्पान्तरमाश्रीयते तदेवोत्पद्यते तदेव निस्तिष्ठतीति, अत्रापि न निर्दोषत्वमेवेति ब्रूमः, अत्रापि हि द्वयी गतिः तेनाप्युत्पत्तिप्रकारेणा[व]तिष्ठमानं—यद्वोत्पादेनैवावतिष्ठमानमुत्पद्यते निस्तिष्ठतीत्युच्यते यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथाऽवतिष्ठमानं तदेवोत्पद्यते तदेव निस्तिष्ठति चेत्युच्यते
10 यदि तथोत्पादेनैवावतिष्ठमानमुत्पद्यते निस्तिष्ठतीत्युच्यते तत उत्पादेनैवावस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्विधापि कुतः? इति, असंभव इत्यर्थः नास्ति चोत्पत्तिः, उत्पद्यमाने चावस्थानं? कुत इति वर्तते, यदुत्पद्यते कथमवतिष्ठते? यदवतिष्ठते कथमुत्पद्यते? इति स्ववचन[ादि]विरोध[ा]ः पूर्ववदिति—यथाद्युत्पत्तिविनाशैकाधिकरण्योपवर्णने स्ववचनादिविरोधास्तथात्राप्युत्पत्तिस्थितिसामानाधिकरण्ये योज्या इति।

व्यापित्वतत्त्वानुमतांशुतन्तुपटवद् बीजाङ्कुरस्य पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था
15 व्यापित्वतत्त्वानुमतबीजाङ्कुरत्वादय इत्यस्मिन् प्रकल्पे उत्पत्तिस्थितिसामानाधिकरण्ये न स्ववचनादिविरोधा इत्यत्रोच्यते, एतस्मिन्नपि प्रकल्पे बीजत्वांशूनां चाऽनुत्पादित्वादविनाशित्वाच्च नित्यत्वात् स्थितिरेवेति कुतोऽङ्कुरो बीजात्, कुतोऽशुभ्यस्तन्तुः? इति त एव विरोधाः, पूर्वसम्यग्नित्यत्वाद्वा बीजानुत्पत्तेः।

व्यापीत्यादि यावत् प्रकल्प इति, व्याख्यातं व्यापित्वतत्त्वानुमतांशुतन्तुपटवत्—व्याप्नोतीति व्याप्ति

10 अत्रापि सोऽनुत्पद्यमानत्वादवस्थानवचनविरोधादिदोषप्रसिद्धिर्दर्शनेन विकल्पमारचयति—अत्रापीति उत्पादस्थितिभेदोऽभिमतं। तैरनुत्पत्तिप्रकारैर्नावतिष्ठमानस्य वस्तुनः निरुत्पादस्थिती दर्श्येते अथवा उत्पादस्थितिविनाशावस्थस्य वस्तुनो व्यापिन इति द्वैविध्यं दोषाभिधित्सया प्रदर्शयति—तेनापीति। प्रथमप्रकारे दोषमाह—यदीति। तदनुपादकियायामेव तत्त्वे विनाशकाले उत्पत्तौ पूर्वथावा अवस्थानेन कथमुत्पद्यते निरुद्धत्वादिति भावः। उत्पत्तिर्द्विधापीति, सर्वप्रकारासंभवात्मत्वा द्वितीयोत्पत्तिरपि भावः। प्रकारद्वितीयत्वासंभवादेव च स्थितत्वादप्यत्र इत्याह—उत्पद्यमान इति। उत्पादस्थितौ
25 तदवस्थितत्वेन तदनुत्पादविनाशके स्थितिक्रिया स्थितिक्रियायां चोत्पादक्रिया उच्यते च यथा तदेवोत्पद्यते तदेव स्थिति इत्यादि स्ववचनविरोधः देशभेदेन कालभेदेन वा ते हि स्याताम् देशकालभेदस्तु नास्त्येव यतेन तदैकदेशेन निर्दिष्टमिति पूर्वोक्तमेव स्मारयति—पूर्ववदिति। द्वितीयप्रकारे दोषो नास्तीति मन्वानः शङ्कते—व्यापीति उत्पत्तिसर्वथा व्याप्नोति तन्तुत्वादिधर्मव्यापित्वात् अत एवासौ तत्त्वपरिणामात्मभूतः उत्पत्त्यादिधर्मव्यापकत्वेन च तत् अतीत इत्यनुमन्यते व्यापित्वात् अतीतस्यानन्त्येन स्थितिरूपेणापि तन्तुत्वात् सर्वथात्पूर्वविनाशत्वादवतत्त्वं सार्वत्रिकत्वव्यापित्वमेवात्
30 स्थित्युत्पत्तिविनाशरूपत्वात् स्थित्युत्पत्तिविनाशप्रकारैः सर्वथावतिष्ठमानं तदेवोत्पद्यते तदेव निस्तिष्ठतीत्युच्यते इति चेत्तत् स्थित्युत्पत्तिसामानाधिकरण्येऽपि विरोधा इति परिहरति ... । एतदेव व्याचष्टे—व्याप्तमतमिति व्यापकं सर्वं व्याप्नोति

१ सि क. तत्र विनाशसामानाधिकरण्येनामी। २ सि क. भावे। ३, ४ ५, सि क निस्तपति। ६ सि क. तथा तत्त्वानुमतां शुं तु तन्तु।

अविशेषितत्वात् सर्वस्य व्याप्यस्य कार्यस्य व्यापकं कारणमुच्यते व्यापीति, व्यापिनः सतत्त्वमेवेत्यनु-
मतोऽस्तु। तथापि द्रव्यार्थवादाभिमतिना, व्यापि सतत्त्वमस्येति वा विग्रहः, स च व्यापिसतत्त्वस्यानुमतो
ऽङ्कुरेव तन्तुर्व्याप्यः, कारणमयत्वात् कार्यस्य, किमुक्तं भवति ? यथांशुमयस्तन्तुः अतोंऽशुरेव तन्तुरिति
दृष्टान्तः, अंशुरपि तन्तुः तन्तुरप्यंशुरिति वा, तथा बीजमयोऽङ्कुरः, बीजमेवाङ्कुरः, अङ्कुरोऽपि बीजं
बीजमप्यङ्कुर इति वा दार्ष्टान्तिकः, तद्दर्शयति–प्रदीपद्रव्येत्यादि–प्रकृष्टदीपस्य द्रागीयसो द्रव्यस्य 5
मेघादेरिव पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था व्यापिसतत्त्वस्यानुमतबीजाङ्कुरत्वादय इत्यस्मिन् प्रकल्पे
तदेवोत्पद्यते तदेवावतिष्ठत इत्युत्पत्तिस्थितिसामानाधिकरण्ये साधनादिविरोधा न सन्ति, तस्य वस्तु
नोऽवस्थामात्रभिन्नस्यानुत्पादाविनाशिनः स्थितिरेव स्थानित्वोच्यते, एतस्मिन्नपि प्रकल्पे बीजस्य दार्ष्टा-
न्तिकस्यांशूनां वा दृष्टान्तभूतानां वाङ्मात्रस्य वा कस्यचिद्वस्तुनः प्रदीपस्यानुत्पादिनोऽविनाशित्वाच्च
स्थितत्व नित्यत्वात् स्थितिरेव, नोत्पादविनाशाविति कुतोऽङ्कुरो बीजात् ? कुतोंऽशुभ्यस्तन्तुः ? अतोऽङ्कु- 10
रस्तन्तुर्नोत्पत्तिरेवेति, ततः किमिति चेत् ? इति त एव विरोधाः, उत्पत्त्यभावात् पूर्ववत् साधनादि-
विरोधास्तदवस्था एवेति, पूर्वस्यान्यनिवृत्तत्वाच्च बीजानुत्पत्तेः, त एव विरोधा इति वर्तते, ननु त्वदुक्तेनैव
न्यायेन व्यापिसतत्त्वानुमतपूर्वस्यान्यबीजत्व प्रदीपद्रव्यस्थितत्व चेति पूर्वस्यान्य[स]नुत्पादाविनाशि

धर्मान्तरविशेषेण गतो व्याप्नोति, अत एव तत् व्यापीत्युच्यते विचित्रविकल्पात्मकाविसम्बन्धेषु सतोऽनुवर्तमानः प्रदीपेऽन्यत्र
तद्, अत एव तस्याः पूर्वापरोत्तरकालाः विकारयोऽवस्था स्थित्यादिरूपाः विकारात्मत्वावस्था तथांशुतन्त्वोः कार्यं 15
तन्तुरपि यस्य तत्र व्यापि. कारणस्य तन्त्वोरात्मत्वादनुमतोऽस्तु द्रव्यार्थवादाभावात् अतश्च व्यापिसतत्त्वस्यानुमतो-
ऽस्त्वनुमतेति प्रमाणाभावाद्ऽर्थं तत्र तन्तुपटयोरात्मैकत्वविवक्षणात् अंशुमयस्तन्तुरिति अंशुरेव तन्तुः एवमङ्कुरेऽप्यनया
कल्पनया बीजस्य व्यापित्वा प्रदीपस्यास्य विकारत्वाद्बीजमयस्ततो बीज एवाङ्कुर इति अङ्कुराद्युत्पत्तयो बीजस्यैवावस्था
इति भावः। पुनरप्यन्तरमाशङ्कते–व्यापि सतत्त्वमिति। अस्यार्थः सतत्त्वं सतत्त्वं व्यापि सर्वोऽपि धर्मोऽपि व्याप्नो-
तीत्यनुमतोऽङ्कुरेव तन्तुस्तन्तुरेवांशुः पूर्वव्याख्यानाय धर्मपरिणामोऽवस्थावस्थापरिणाम इति प्रतिभाति यथा मृत्पिण्ड 20
शिवकघटकपालादयः यथा वा यस्य यत्पूर्वकत्वात् व्याख्यानत्वेऽपि द्रव्यार्थमभावात् व्यापिनो द्रव्यस्योत्पादादयोऽ-
वस्था इति स्थित्युत्पत्तिविनाशप्रकारैरवस्थितं तदेवोत्पद्यते तदेव तिष्ठतीत्युच्यत इति नोपक्षेप इति तात्पर्यः।
विग्रहेण योऽर्थः पर्यवसित इत्याह किमुक्तमिति आदावुत्पत्त्युदाहरणमाह–यथांशुमय इति अंशोर्व्यापिनस्तन्त्वा-
त्मतयाऽनुमतत्वात् धर्मिधर्मसामानाधिकरण्येनाभेदात् अंशुरेव तन्तुरिति भावः अपरमुदाहरणमुदाहरणमाह–अङ्कुरपीति अत्र
पूर्वपरकालावस्थासमुदायविनाशवत् प्रदीपद्रव्यस्य व्यापिनोऽनुपपत्तेऽवस्थाभिन्नेऽपि तस्य तद्भावात् बीजस्यैव तस्य 25
स्थितिर्निवृत्तित्वात्, अवस्थाभेदेऽपि स्वविशेषाद् तथा व्यापिनोऽयुपादानस्याङ्कुराद्यनुत्पत्तिरेव बीजं विकाङ्-
कुर उत्पन्न इति हि दृश्यते बीजस्य निवृत्ते न कथमेतद्वीजात्मकेन समापन्ने तस्य वस्तुन इति, अत एवं तस्य वस्तुनोऽ-
वस्थामात्रविभक्तस्यानुत्पादाविनाशिनः स्थितिरेव स्थानित्वुच्यते इति योजना विधेया। तदेव दर्शयति–एतस्मिन्नपीति एतद
स्थितिप्रकारेण यदि तदवस्थिते तर्हि कथमुत्पद्यते येन तदेवोत्पद्यते तदेव तिष्ठतीति स्यात् अन्यथा तदेवावतिष्ठमानं
तदेवोत्पद्यत इति विरुद्धं साधनादिविरोधा भवन्तीति दर्शयति–इति त एवेति अपरिस्पन्दत्वेनाविभक्तस्य बीजादेरनुत्पत्ति- 30
रेव पूर्वस्यान्यस्य निवृत्त्यविरोधात्–पूर्वस्यान्येति 'सत्त्वो गुणस्तत्त्वावित्वं' इत्यादि अस्य पूर्वस्यान्यस्य सतत्त्वं सतत्त्वं
व्यापि सर्वधर्मेष्वागमात्, यथाऽस्य व्यापि–सत्त्वं पूर्वस्यान्यः सतत्त्वं तत्स्वभूतमिति व्यापिसतत्त्वानुमतपूर्वस्यान्यबीजं तत्र
प्रदीपद्रव्यं कारणस्य व्यापि तत्त्वैकत्वात्मत्वयोरभिव्यक्तत्वात् एवं तस्य पूर्वोत्तरकालावस्थितावस्थासामान्यविशेषाद्यवस्था-

---

1 मि. क. तन्त्वनुत्पत्ति ।

क्तिव्यतिरिक्तो व्यञ्जकः प्रसिद्धो न तु तद्द्रव्याव्यतिरिक्तः, यदेवोत्पद्यते तदेव विनश्यतीति द्रव्यस्यावस्थाविभागं ब्रुवता त्वया न ततोऽन्यः संयोगः संयोगी वाऽभ्युपगम्यते, क्रियात्मावस्थाद्रव्यमेवमभिधेयात्, तदभ्युपगम्य व्यक्तिधर्मस्त्यक्तः, तत्त्यागाच्च व्यक्तिरनुपपन्नैव, व्यक्तिकारणाभावात् ।

5　अपि चेत्यादि, अभ्युपगम्याभिन्नार्थैक्यापत्तिविषये व्यक्त्यव्यक्ती लोकप्रतीतव्यक्तिधर्मविपरीतत्वात् तत्त्यागाद्वाभाव इति ब्रूमः, लोके हि पूर्वं व्यक्तिव्यतिरिक्तो व्यञ्जनः प्रसिद्धोऽन्यः, उदकाञ्जनदीपादियोगो मृगव्यधचक्षुरिन्द्रियचन्द्रस्पर्शाभिव्यक्तिघटादिदर्शनहेतुः यथासंख्यम्, मुक्तिक्रियासाधनैर्भूयोगिमुक्तादिद्रव्यव्यावृत्तमुपलभ्यते यथा न तथा तद्द्रव्य[ा]व्यतिरिक्तम्, यदेवोत्पद्यते तदेव विनश्यतीति द्रव्यस्यैवावस्थाविभागं ब्रुवता त्वया न ततोऽन्यः संयोगः संयोगी वाऽभ्युपगम्यते द्रव्यक्रियाद्यनन्यत्वात्,
10 द्रव्यावस्थामात्रत्वादुत्पादादीनाम्, किं कारणं? क्रियात्मावस्थाद्रव्यमेवमभिधेयात्–उत्पादादयः क्रियायाः स्वावस्था इत्येव यथा द्रव्यस्यापि परस्परमिमाः सर्वोऽवस्था इत्येतच्च यथा यस्मादभिधीयमानो यत्नम्, द्रव्यनिर्मुक्त्याविरोधात् तस्मादभ्युपगतं त्वया न किञ्चिद्द्रव्य[व्यति]रिक्तमस्तीति, ततश्च तदभ्युपगम्य व्यक्तिधर्मस्त्यक्तः, तद्विपर्ययधर्मणो द्रव्यमात्रस्याभ्युपगमात्, तत्त्यागाच्च व्यक्तिरनुपपन्नैव, व्यक्तिकारणाभावात् ।

15　स्यात् मत निर्दिष्टा व्यक्तिरव्यक्तिश्च द्रव्यधर्मः समानौ, यथोक्तं 'सुदूरमपि संधाय संक्षीणोऽपि ययपरित्यु । न समागमावन्ये कश्चित् प्रतिपद्यते (　　) इति, एतच्चायुक्तम्–

व्यक्त्यव्यक्ती अभिन्नार्थैक्यापत्तिविषयेऽभ्युपगमेऽसत्वं । लोकप्रतीत–उदकेति परलोके मृगव्यधाख्ये नक्षत्रे चक्षुरिन्द्रियस्पर्शाभिव्यक्तौ दीपादियोगो घटादिदर्शने हेतुरित्यर्थः । मुक्तिक्रियायाः साधनं [illegible] मुक्तिक्रियाव्यतिरिक्तमेव लोके [illegible] मुक्तिक्रियेति, [illegible]
20 [illegible] [illegible] भाव । [illegible] [illegible] इति भावः । [illegible] [illegible] [illegible]
25 [illegible] [illegible] [illegible] [illegible] [illegible]
30 [illegible] [illegible] ।

---

१ सि. क. एवेति । २ सि. क. [illegible] । ३ क. ××। ४ सि. क. [illegible] । ५ सि. [illegible] ।

अहेतुतो व्यक्तेरिव चाऽव्यक्तेरपि तद्वत्त्वे नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्, परिणामान्नैवमिति चेन्न, उक्तदोषतुल्यत्वात्, एष तावदुत्पादविनाशयोः संयोगेनाद्य विकल्पः समप्रसंगपरिहारप्रपञ्चोऽभिहितः, तथा वक्ष्यमाणेषु समानः प्रपञ्चो द्रष्टव्यः ।

(अहेतुत इति) अहेतुतो वा व्यक्ते[रि]वाव्यक्तेरपि तद्वत्त्वे तेन तुल्य तद्वत्, तस्य भावस्तत्त्वं व्यक्तिवद्भाव इत्यर्थः, कथं ? यथा व्यक्तिर्निर्हेतुका तथैवाव्यक्तिरपि निर्हेतुका, ततः किमिति चेदुच्यते— नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्, निर्हेतुकत्वात्, मृदवस्थायां घटाव्यक्तिवद्घटावस्थायामव्यक्ति-र्घटस्य स्यात्, घटावस्थायां घटव्यक्तिवत् मृदवस्थायां व्यक्तिः स्यात्, मृत्पिण्डे घटव्यक्तिवत् गगनेऽपि स्यात्, नियतव्यक्तिवन्नियतव्यक्तिर्वा स्यादित्यादि, परिणामान्नैवमिति चेत्—स्यान्मतं यथा त्वयोक्तं न तथा भवितुमर्हति परिणामाभ्युपगमात्, अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरापत्तिः परिणामः, तस्मान्मृत्पिण्डशिवकादिपरिणामैः स्थित्युत्पत्तिविनाशा भविष्यन्ति, न निर्हेतुकाः, तस्मादेव परिणामात् व्यक्त्यव्यक्ती च स्त इति, एतदपि न, उक्तदोषतुल्यत्वात्, ये एतेऽस्माभिर्भावस्वभावस्वपक्षे च भिन्नाभिन्नात्मकत्वेन दोषा उक्तास्ते तुल्या एव परिणामपक्षेऽपि द्रष्टव्याः, परिणामावस्थयोः श्रुतिमात्रभेदात्, तैस्तैः प्रादुर्भावत्वात्, विनाश[स्य] निवृत्तित्वात् अवस्थितत्वेति च [स]द्भावेनैव स्थितिवचनात्, परिणामोच्चारणेन च नन्वेवमुभयमप्यवस्थितत्वादिरविशिष्टो भव्यो योज्यो पावदसमेवावधिरिति, तस्मा-दपरिहारः परिणामः, एष तावदुत्पादविनाशयोः संयोगेनाद्य विकल्पः समप्रसङ्गपरिहारप्रपञ्चोऽभिहितः, तथा वक्ष्यमाणेषु—उत्पादस्थितिसंयोग स्थित्युत्पादसंयोगे स्थितिविनाशसंयोगे विनाशोत्पादसंयोगे विनाशस्थितिसंयोगे त्रिकादिसंयोगेषु च समानः प्रपञ्चो द्रष्टव्यः, यदेवोत्पद्यते तदेव विनश्यतः प्रभृति यावदसमवधिरिति ग्रन्थयोजनया योजयिष्यते ।

अथोत्पादविनाशसामानाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमानीयते तदेवोत्पद्यते तदेव

धर्मिणमनभियुक्तोऽपि भवति—यथोक्तमिति स्पष्टोऽर्थः। दर्शयति—अहेतुत इति कारणकलापनिरपेक्षा व्यक्तिरिति भावः । यथा व्यक्तेरपि तद्वत्त्वे—व्यक्तितुल्यत्वे इति एवं व्याचष्टे—अव्यक्तेरपीति । तदेव व्यक्तितुल्यत्वं दर्शयति—यथेति । अहेतुके भावे नित्यं भावस्य सत्त्वमसत्त्वं वा भवेत तु भावानित्यत्वं तथा सर्वं सर्वत्र स्यात् तदेतत्प्रदर्शयति—नित्यमेवेति । अथ नियतात्मनो नाहेतुको भवन्ति अपि तु परिणामात् स्युरिति शङ्कते—परिणामादिति । परिणामस्वरूपं दर्शयति—अव-स्थितस्येति तत्र निवृत्त्यापत्ती विनाशोत्पादौ अवस्थानं स्थितिः तदेतत्रयं वस्तुनः परिणामित्वमुपपद्यत इति नोक्तदोषा इति भावः । अत्रापि पक्षे दोषमादर्शयति—उक्तदोषेति, किमिदं उपादानरूपः परिणममूलस्य पिण्डशिवकादेर्भावस्य यत परिणामिनो भावस्याभ्यस्तेति विकल्पतः परिणामस्य परिणामिनश्च भेदाभेदाभ्यां च दोषस्तैरेवावासवारत्वादिति प्रदर्शितत्वा-दयमपि पक्षो निर्दोष परिणामावस्थयोः पर्यायत्वात् यद्यपि धर्मैकत्वमवस्थाभेदः परिणामस्य द्वैविध्यं यथा मृदः पिण्ड शिवकादिः धर्मपरिणामः इयत्वी मृत् भवत्यवी भवती वैति अवस्थापरिणामः नवपुराणादिरवस्थापरिणाम इति तथापि धर्मैकत्वयोरवस्थावस्थितेरवस्थापरिणामयोः श्रुतिमात्रभेद एव इति ध्येयम् । दोषमदर्शनमभ्यमर्थविशेषी—नन्वेवमिति । तदेवं यदेवोत्पद्यते तदेव विनश्यतीति उत्पादविनाशसंयोगेन विकल्पे दोषा आदर्शिताः एवमेवापरेणानुत्पादस्थित्यादिसंयोगेषु विभाव्या इति दर्शयति—एवं तावदिति । प्रकृतं दर्शयति—उत्पादेति । अथोत्पादस्थितिभावमवेत्य विकल्पितुमाह—अथेति ।

1 सि० व्यक्तिर्वा हेतुकतः । 2 सि० क० इति मिकत्मेव । 3 सि० क० तमवधिमानु ।

नितिष्ठतीति, अत्रापि हि द्वयी गतिः—तेनाप्युत्पत्तिप्रकारेणानवतिष्ठमानं यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथाऽवतिष्ठमानं तदेवोत्पद्यते तदेव नितिष्ठति चेति, यदि तयोत्पादेनैवानवतिष्ठमानमुत्पद्यते नितिष्ठतीत्युच्यते तत उत्पादेनैवानवस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्विधाऽपि कुतः? उत्पद्यमाने चावस्थानम्? यदुत्पद्यते कथमवतिष्ठते? यद्यवतिष्ठते कथमुत्पद्यते? इति
5 स्ववचनादिविरोधाः पूर्ववत्।

अथोत्पादविनाशसामानाधिकरण्य इत्यादि, उत्पादविनाशैकाधिकरण्ये दोषदर्शनात् निर्दोषोऽयमिति विकल्प्यान्तरमाश्रीयते यदेवोत्पद्यते तदेव नितिष्ठतीति अत्रापि न निर्दोषमेवमिति ब्रूमः, अत्रापि हि द्वयी गतिः तेनाप्युत्पत्तिप्रकारेणा[न]वतिष्ठमानं—यदुत्पादेनैवानवतिष्ठमानमुत्पद्यते 'नितिष्ठतीत्युच्यते यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथाऽवतिष्ठमानं यदेवोत्पद्यते तदेव 'नितिष्ठति चेत्युच्यते
10 यदि तयोत्पादेनैवानवतिष्ठमानमुत्पद्यते 'नितिष्ठतीत्युच्यते तत उत्पादेनैवानवस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्विधाऽपि कुतः? इति, असंभव इत्यर्थः अस्ति चोत्पत्तिः, उत्पद्यमाने चावस्थानं? कुत इति वर्तते, यदुत्पद्यते कथमवतिष्ठते? यद्यवतिष्ठते कथमुत्पद्यते? इति स्ववचन[ादि]विरोध[ा]ः पूर्ववदिति—यथाङ्कुरोत्पत्तिविनाशैकाधिकरण्योदाहरणे स्ववचनादिविरोधास्तथात्राप्युत्पत्तिस्थितिसामानाधिकरण्ये योज्या इति।

व्यापित्वतत्त्वानुमतांशुवत्तुयत्तु मदीयग्रन्थस्य पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था
15 व्यापित्वतत्त्वानुमतबीजाङ्कुरत्वादय इत्यस्मिन् प्रकल्पे उत्पत्तिस्थितिसामानाधिकरण्ये न स्ववचनादिविरोधा इत्यत्रोच्यते, एतस्मिन्नपि प्रकल्पे बीजस्यांशूनां चाऽनुत्पादित्वादविनाशित्वाच्च नित्यत्वात् स्थितिरेवेति कुतोऽङ्कुरो बीजात्, कुतोंऽशुभ्यस्तन्तुः? इति त एव विरोधाः, पूर्वस्मिन्नित्यत्वाद्वा बीजानुत्पत्तेः।

व्यापीत्यादि यावत् प्रकल्प इति, स्यान्मतं व्यापित्वतत्त्वानुमतांशुवत्तुयत्तु—व्याप्नोतीति व्यापी

20 अत्रापि कोऽप्युत्पन्नस्यावस्थानवचनविरोधादिदोषपरिहारविकल्पं विकल्पमारचयति—अत्रापीति उत्पादस्थितिभेदोऽभिमतः। [illegible] वस्तुनः स्थित्युत्पत्तिरेव [illegible] अथवा उत्पादस्थितिविनाशावस्थस्य वस्तुनो व्याप्ति इति द्वैविध्यं दोषाभिधित्सया दर्शयति—तेनापीति। प्रथमप्रकारे दोषमाह—यदीति। [illegible] उत्पन्नमवतिष्ठते पूर्वथा [illegible] कथमुत्पद्यते [illegible] भावः। उत्पत्तिर्द्विधापीति, [illegible] सा द्विविधोत्पत्तिरिति भावः। [illegible] इत्याह—उत्पद्यमान इति। उत्पादस्थित्योर्हि
25 [illegible] कथमुत्पादक्रियाक्षणे स्थितिक्रिया स्थितिक्रियाक्षणे चोत्पादक्रिया उच्यते च भवता यदेवोत्पद्यते तदेव नितिष्ठतीति स्ववचनविरोध इत्यर्थः [illegible] वा ते हि स्याताम्, [illegible] यदेव तदेवेत्यभेदेन निर्देशात् पूर्वोक्तेन [illegible]—पूर्ववदिति। द्वितीयप्रकारे दोषो नास्तीति मन्वान आह—व्यापीति [illegible] व्याप्त्यर्थमवस्थानात् अत एवासौ [illegible] च तत् मदीयं इत्युच्यते व्यापित्वात् मदीयग्रन्थस्य स्थितिमान् [illegible] कार्यत्वाद्युत्पादित्वमभ्युपगमात्, कारणस्य कार्योत्पत्तावव्यापित्वमेवेत्यत
30 स्थित्युत्पत्तिविनाशधर्मत्वात् स्थित्युत्पत्तिविनाशप्रकारैः सर्वथाऽवतिष्ठमानं यदेवोत्पद्यते तदेव नितिष्ठतीत्युच्यत इति नैतत् स्थित्युत्पत्तिस्ववचनविरोधादिदोषा इति परिहारमिच्छन्। एतदेव व्याचष्टे—व्याप्यत्वमिति, व्यापकं कारणं व्याप्नोति

1 सि क. अत्र विनाशसामानाधिकरण्योदाहरणे। 2 सि क. मानी। 3, 4, 5, सि क नितिष्ठति। 6 सि क. यथा तत्त्वानुमतां शुचं तु वस्तु।

अविशेषितत्वात् सर्वस्य व्याप्यस्य कार्यस्य व्यापकं कारणमुच्यते व्यापीति, व्यापिनः तत्त्वमेवेत्यनुमतोऽङ्कुः तथापि द्रव्यार्थतयाऽभिधा, व्यापि तत्त्वमस्येति वा विग्रहः, स च व्यापितत्त्वस्यानुमतोऽङ्कुरेण तन्तुर्व्याप्यः, कारणमयत्वात् कार्यस्य, किमुक्तं भवति ? पर्यायमयस्तन्तुः मतोऽङ्कुरेण तन्तुरिति दृष्टान्तः, अंशुरपि तन्तुः तन्तुरप्यंशुरिति वा, तथा बीजमयोऽङ्कुरः, बीजमेवाङ्कुरः, अङ्कुरोऽपि बीजं बीजमप्यङ्कुर इति वा दार्ष्टान्तिकः, तद्दर्शयति—प्रदीपद्रव्येणापि—प्रकृतदीपस्य प्राचीनस्य द्रव्यस्य मेर्वादेरिव पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था व्यापितत्त्वस्यानुमतबीजाङ्कुरत्वादय इष्यन्ते, प्रकृते तदेवोत्पद्यते तदेवावतिष्ठते इत्युत्पत्तिस्थितिसामानाधिकरण्ये स्ववचनादिविरोधा न सन्ति, तस्य वस्तुनोऽवस्थामात्रभिन्नस्यानुत्पन्नाविनाशिनः स्थितिरेव व्यापित्वमुच्यते, एतस्मिन्नपि प्रकृते बीजस्य दार्ष्टान्तिकस्यांशूनां वा दृष्टान्तभूतानां व्याप्यव्यापकस्य वा कस्यचिद्वस्तुनः प्रदीपेनानुत्पादितत्वादविनाशित्वाच नित्यत्वं नित्यत्वात् स्थितिरेव, नात्यन्तविनाशादिति कुतोऽङ्कुरो बीजात् ? कुतोंऽशुभ्यस्तन्तुः ? अतोऽङ्कुरस्यानुत्पत्तिरेवेति, ततः किमिति चेत् ? इति त एव विरोधाः, उत्पत्त्यभावात् पूर्ववत् स्ववचनादिविरोधास्तदवस्था एवेति, पूर्वकालानित्यत्वाच्च बीजानुत्पत्तेः, स एव विरोधा इति वर्तते, अस्तु तदुक्तेनैव न्यायेन व्यापितत्त्वस्यानुमतपूर्वकालबीजस्य प्रदीपद्रव्यस्थितस्य चेति पूर्वकाल[स्य]नुत्पादाविनाशि-

कार्यान्तर्विशेषेण मतो व्याप्नोति अत एव तत् व्यापीत्युच्यते भिन्नभिन्नकालासन्नपरम्परपर्यायेषु मतोऽङ्कुरत्वेनात्, प्रदीपद्रव्यस्य तत्, अत एव तस्याः पूर्वापरोत्तरकालाः स्थित्यादयोऽवस्थाः भिन्नाभिन्नाः भिन्नाकारमत्वावस्थाः तथाऽङ्कुरस्तन्तोः कार्ये तन्तुरपि पटस्य तत्र व्यापिनः कारणस्य तन्त्वंशत्वतत्त्वानुमतोऽङ्कु द्रव्यार्थतयाऽभावात् अतश्च व्यापितत्त्वानुमतोऽङ्कुरेण तन्तुर्भवतीति [illegible] अत तन्तुरप्यंशुमयस्तन्तुरिति अंशुरेव तन्तुः एवमङ्कुरस्याप्यङ्कुर कार्यान्तराणां बीजस्य व्यापिनः प्रदीपद्रव्यस्य विकारत्वाद्बीजमयत्वमतो बीज एवाङ्कुर इति अङ्कुराद्युत्पादकत्वो बीजस्यैवावस्था इति भावः । [1] अङ्कुरतन्त्वन्तरपातस्तेनाह—व्यापि तत्त्वमिति । अस्यार्थः तत्त्वं तत्त्वं व्यापि सर्वोऽपि कार्योऽपि व्याप्ये पर्यायमनुमतोऽङ्कुरेण तन्तुस्तन्तुरेवांशु पूर्वव्यापकत्वात् कार्येणानेकस्योऽव्यापकत्वस्यापरिणाम इति प्रतिभाति यथा मृदः पिण्डभिन्नघटकपालादयः यथा वा पटस्य तन्तुरान्वारम्भ व्याप्त्वाद्यपेक्षयाऽपि द्रव्यार्थाभावात् व्यापिनो द्रव्यस्यैवाऽवस्थाऽवस्था इति स्थित्युत्पत्तिविनाशप्रभेदैरवस्थितं तदेवोत्पद्यते तदेव विनिश्चीयत इति भेदाभेद इति तद्वार्थः । भिन्नतयैव योऽङ्कः पर्यवसितः इत्याह—किमुक्तमिति आदावनुत्पत्तत्वधारेणाह—पर्यायमय इति अंशोर्मूर्तिपरिणत्याऽ-वस्थानुमतत्वात् अविभक्तसामानिभावेनाभेदात् अंशुरेव तन्तुरिति भावः अपरमुत्पत्त्यन्तधारेणाह—अंशुरपीति अत्र पूर्वापरकालावस्थानुत्पादविनाशयोः प्रदीपद्रव्यस्य व्यापिनोऽम्बुत्पत्त्येऽवस्थाभिन्नेऽपि तस्य अङ्कुरात् बीजस्यैव तत्र प्राणिनिर्विकारनित्यत्वात्, अवस्थान्तरोत्पादविनाशित्वात्, तथा चान्यस्मिन्नोऽप्यबीजादेरङ्कुरादीनामनुत्पत्तिरेव, बीजं भिन्नमङ्कुर अतश्च इति हि दृश्यते बीजस्य निवृत्तौ च कस्यचिद्भिन्नमात्रेण स्थापयते तस्य वस्तुन इति अत पक्षे तत्र वस्तुनोऽवस्थामात्रभिन्नस्यानुत्पन्नाविनाशिनः स्थितिरेव व्यापित्वमुच्यते इति योजना भिन्ना । तदेव दर्शयति—एतस्मिन्नपीति एवं स्थितिप्रकारेणैव यदि तदवतिष्ठते तर्हि कथमुत्पद्यते येन तदेवोत्पद्यते तदेव विनश्यतीति स्यात् अन्यथा तदेवोत्पत्तिकमार्थं तदेवोत्पन्न इति नित्यं स्वाभिमतविरोधा भवन्तीति दर्शयति—इति त एवेति अप्रसिद्धतत्त्वाभिमतस्य बीजादेरप्यनुत्पत्ति-रेव पूर्वकालस्य नित्यत्वादित्याह—पूर्वकालस्येति 'काल्यो ग्रन्थकरणाविशेः' इत्यमरः अतस्य पूर्वकालस्य तत्त्वं तत्त्वं व्यापि सर्वकार्यव्यापनात्, यद्वाऽस्य व्यापि—आद्यं पूर्वकालः तत्त्वं कारणभूतमिति व्यापितत्त्वस्यानुमतपूर्वकालबीजं तत्र प्रदीपस्य कारणस्य व्यापिप्रदीपद्रव्यत्वयोरभिमततया, एवं तस्य पूर्वापरकालनित्यत्वस्यापि सैवानुत्पत्ता-

१ सि क तन्त्वनुत्पत्ति ।

स्वाभिमतत्वं नित्यत्वाद्बीजानुत्पत्तिरतोऽपि यदेवोत्पद्यते तदेवावतिष्ठत इति स्तम्भमात्रविरोधा इति कूपखन्यायस्य व्यापितां दर्शयति ।

अथ मा भूदेते दोषा इति स्तम्भादुत्तरकालं बीजोत्पत्तिरिष्यते ततः—

स्तम्भोत्तरबीजोत्पत्तेस्तु हेतोरङ्कुरवत् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च, एव पूर्वापरभाव एव च, अभेदत्वात् ।

स्तम्भोत्तरबीजोत्पत्तेस्तु हेतोरङ्कुरवदित्यादि—यथाङ्कुरो बीजात्स्थितादुत्पद्यमानः स्थिताद्भिन्न उत्पद्यते, पूर्वदोषभयात्, पूर्वस्तम्भाच्च बीजं तथा सर्वोऽपि स्थितिभिन्नोत्पत्तिः, तस्मात् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च, यथाङ्कुरो बीजात् स्थितादुत्पन्नोऽनित्योऽव्यापी च तथा त्वदभ्युपगतप्रदीपद्रव्यात्मनोऽप्यनित्यत्वमव्यापित्वं च स्यात्तथैव क्रियात्मत्वात् एवं—पूर्वापरभाव एव च, अभेदत्वात्—पूर्वमिदं बीजादि उत्तरमिदमङ्कुरादीत्येतस्य चाभावः, कस्मात् ? अभेदत्वात्, अभिन्नं हि वस्तु द्रव्यमेकमिदम् व्यापित्वात्तस्य बीजाङ्कुरादिप्रादुर्भावस्य क्रियाविषयत्वात्तस्य प्रदीपवत् कल्पना भ्रान्तित्वात् किं पूर्वं ? किमुत्तरमिति पूर्वोत्तरविभागोत्पत्ति[प्र]कल्पनानुपपत्तिः ।

अथोच्येत यदेवोत्पद्यते तदेवावतिष्ठत इत्यनेन वचनेन त्वयमर्थ एव कथितो भवति उत्पत्तिरेवावस्थानमिति, यदि नोत्पद्यते नावतिष्ठेतानुत्पत्तिरूपत्वात्, तस्मात् खपुष्पवैलक्षण्येनैवोच्यते यदेवोत्पद्यते तदेवावतिष्ठते नानुत्पत्तिकमवतिष्ठत इति; एवं सति यदेवोत्पद्यते तदेवावतिष्ठत इत्यस्येदं व्याख्यानं संवृत्तं यत्र यदोत्पद्यते तत्र तदावतिष्ठत इति, प्रागुक्तोत्पत्त्यानैक्यवत् उत्पत्तिस्थित्यैक्ये उत्पत्तिरेवावस्थानमित्यापन्नमुक्तस्थितित्यागात्, न स्थितिरन्या काचिदुत्पत्तेरतश्च क्षणिकत्वापत्तिः, उभयासागामिमतौ चानेकान्तापत्तिरभ्युपगमविरोधिनी प्रक्रिया स्यादिति ।

अथोच्येतेत्यादि, यावत् खपुष्पवैलक्षण्येनैवोच्यत इति, स्यात् परिहारार्थमियमाशङ्का यदेवोत्पद्यते तदेवावतिष्ठत इत्यनेन वचनेनेति स पुनरयमर्थ एवं कथितो भवति—उत्पत्तिरेवावस्थानमिति

नित्यत्वात् बीजस्यानित्यत्वेन यदेवोत्पद्यते तदेव स्थितिमदिति विरुध्यत इति भावः । कूपखन्यायस्येति विशेषेषु सर्वे- —षस्य न्यायस्य प्रवर्तनमिति भावः । ननु स्तम्भादुत्तरकालेऽपि ततो बीजोत्पत्तेरभ्युपगमे दूषणं स्थितिसमानाधिकरण्यं न सम्भवतीत्यत आह—स्तम्भोत्तरेति । पूर्वदोषेति पूर्वस्तम्भनित्यत्वव्यापित्वेन बीजाद्युत्पत्तिदोषप्रसक्तिभयात् एवञ्च स्थितौ- त्पत्तिभिन्नत्वमपि बीजादेः स्तम्भादिवदनित्यत्वमव्यापित्वं तथा [illegible] द्रव्यात्मनोऽनित्यत्वमव्यापित्वं च [illegible] स्यात् इति भाव । एतदेवासर्वगति—यथाऽङ्कुर इति, एवं पूर्वोत्तरभेदानां भिन्नाद्युत्पत्त्यसम्भवात् [illegible] एतस्य [illegible] पूर्वोत्तरभावप्रकल्पना न युक्ता [illegible]—एकमिति अभिन्नं हीति [illegible] [illegible] पदोऽभिप्रेत एव [illegible] न क्रियाविषयभूतस्याङ्कुरादिप्रादुर्भावस्य प्रकल्पना [illegible] पूर्वोत्तरभाव कल्पना न भ्रान्तिरेव [illegible] क्रियाविषयाभिमानात् तस्माच्च पूर्वोत्तरभाव [illegible] इति भावः । अथ यदेवोत्पद्यते तदेवावतिष्ठते इति वाक्यं प्रकारान्तरेण व्याकरोति—अथोच्येतेति अथ दर्शयति—उत्पत्तिरेवेति यदेवो- त्पद्य [illegible] तदेवावतिष्ठत इति [illegible] इति [illegible] प्रतिपादिता भवति तथा च

१ सि क. स्थितात्स्त्वनुत्पद्यते । २ सि क. °भक्रिया । ३ क. ×× सुदूरम् ।

कथितो भवति, यदि नोत्पद्यतेऽवस्थितमभिमतं नावतिष्ठेतानुत्पत्तिरूपत्वात्, खपुष्पवदनुत्पन्नमवस्थितं खपुष्पादि, तदेकक्षण्येन यदैवोत्पद्यते तदैवावतिष्ठते, नानुत्पत्तिकमवतिष्ठते, तस्मादुत्पत्त्यनुमितमेवावस्थानं न व्य[स्त]मेति, अत्रोच्यते—एवं सति यदैवेत्यादि यावत् क्षणिकत्वापत्तिरिति—इत्थं यदीदं व्याख्यानं संवृत्त, यदैवेति—यस्मादित्यर्थः, अन्यथाव्यवस्थापकस्य यत यदोत्पद्यते तत तदावतिष्ठत इति प्रागुक्तो-त्पत्तिमात्रेऽप्यनुत्पत्तिस्थित्यैक्ये[1] उत्पत्तिरेवावस्थानमभिप्रायम्, किं कारणं ? तदवस्थितित्यागात्—उत्प- 5 त्तिरेव स्थितिरित्यनुमानेन स्थितिरुत्पत्तिरेव कृतेति योऽयं व्याप्तिग्रहणत्वानुमतोऽभ्युपगतस्तु मदीयपक्षस्यपू-र्वोपरपक्षा स्थितिरिति सा त्यक्ता स्यात्, तत्त्यागादुत्पत्तिरेवावस्थानं न स्थितिरन्या काचिदुत्पत्तेरतश्च क्षणिकत्वापत्तिः, उत्पद्यत उत्पद्यत एव नावतिष्ठते किञ्चिदिति सर्वं क्षणिकमित्युक्तं भवति, स्यान्मत क्षणिकत्वदोषो मा भूदिति केनचित् प्रकारेण स्थितमुत्पद्यते केनचिदितीष्यते तदुभोभयात्यागाभिमतौ चानेकान्तापत्तिः—यदि स्थित्युत्पत्ती न त्यक्ते त्वया ततोऽभ्युपगमविरोधिनी स्यात् प्रक्रिया अनेकान्त 10 वस्तुतत्त्वमापद्यत इति ।

अथोच्येतोत्पादपूर्वस्वदोषानपरिहार्यान् प्रत्युच्चार्यानुमतस्य योमौ विकल्पौ त्यक्त्वा विनाशप्रधाने विकल्पान्तरे निर्दोषे इत्याश्रयेतेति तथाप्यस्तावद्यदेव विनश्यति तदेवोत्प-द्यत इति, अस्मिन्नपि विकल्पे दोष उच्यते—लोके तावत् प्रत्यक्षादिप्रसिद्धमङ्कुरोत्पत्तौ बीजं विनश्यति, तव पुनर्यदेव विनश्यति बीजं तदेवोत्पद्यते नाङ्कुर इति पूर्ववत् स्ववचना 15 दिविरोधाः, तत्पूर्वपक्षाद्यपोहाय लोकादिविरोधाः, तदेव विनश्यति तदेवोत्पद्यत इति वचने-नानन्यभूतस्यैकस्मिन्नेव काले विनाश उत्पादश्चेति क्षणिकवादातिशयादि स्यात् ।

यस्सेत्पत्तिर्योग्यता यस्यैवावस्थानयोग्यता नानुत्पन्नः स्थितिरूपः एवम्भावधर्मकं तु खपुष्पादीनामनुत्पत्त्यर्थं स्थितिव्याघात-गम्, यथा निमग्नमवतिष्ठते उत्पत्तिमत्त्वात्, यदि नोत्पद्यते नावतिष्ठेत यथा खपुष्पादि, उत्पद्यते चेत् तस्मादवतिष्ठत इति क्षणिकैक-व्यवस्थानमित्यभिमिति भावः । एवं यदि यावदुत्पद्यते तावदवतिष्ठत इत्युत्पत्त्युत्पन्नयोरैक्यं परिभाव्य भवादेवोरेवोत्पद्यत इत्यु- 20 च्यते तदैवावतिष्ठते इत्युक्तं इति पर्यवसितस्थित्योरुत्पत्तेरेव हेतोः स्पष्टत्व इत्यभिधानात् यदावतिष्ठत इत्यभिधाने उत्पत्तिरेव स्थितिरित्युक्तं स्यात्, उत्पत्तिव्यतिरिक्तस्थितिपरित्यागात् अत एव तत एवैकमेवेत्याभिधानात् तथा च स्थितमात्रात् क्षणि-कत्व स्यात् धर्म इत्युपदर्शित एवं सतीति उत्पत्तिरेवावस्थानमित्यर्थः कथितो भवतीत्युपक्रम्य तदीयसर्कः । एतदर्थसंवादि-नित्यप्रव्यक्त्यावचनस्य दर्शयति यस्मादित्यर्थं इति यदाव्यवक्तो हेतावेति बोधयति भावः । प्रागिति यदयो तदेनाम त्वमभ्युपेत्य पूर्वं व्याख्यातार्थमिति भावः । व्याप्तिग्रहणानुमतेनाभिमतेन स्थितिरेवा सा उत्पत्तिरेवावस्थानमित्यनेकेन 25 परिहरेदाह—उत्पत्तिरेवेति यत एवैकं स्थितिरेवोत्पत्तिरित्यवं तत इति पर्यायेण परामर्शात् एवावतिष्ठत इत्यभिधाने उत्पत्तिरेव विनाश इति यदावतिष्ठते भवतीत्यत्र । तत्र दोषमाविर्भवति—अतश्चेति उत्पत्तिपरम्परामात्रत्वात् कथमवस्थानं कथ-मिति क्षणिकत्वात् स्थितत्वे हि द्वितीयादिक्षणस्थित्या क्षणिकत्वं न स्यादिति भावः । क्षणिकत्वापत्तिपरिहाराय यदि केनचित्प्रकारेण स्थितमेव वस्तु केनचित्प्रकारेणोत्पद्यत इति स्वीक्रियते तर्हि तयोस्तयोः स्वीकारेणोभयाप्त एव स्थितिरिति तथाभ्युपगमविरोध्यपि भवत्यतः प्रसज्यत इत्याशयेनाह—स्यान्मतमिति । तदेवं यदैवोत्पद्यते तदैव विनश्यति यदैवोत्पद्यते तदेवावतिष्ठत 30 इत्युत्पत्तिप्रधानविकल्पद्वये प्रोक्तम् दोषानभ्युपेत्य विनाशैतौ विकल्पौ यदेव विनश्यति तदेवोत्पद्यते यदेव विनश्यति तदेवावतिष्ठत इति विनाशप्रधानौ विकल्पौ भवत इत्याह—अथोच्येतेति । यदेव विनश्यति तदेवोत्पद्यत इति विनाशोत्पादयोरविरुद्धं

---

१ सि° °स्थितिस्त्वोत्पत्तिरनुत्पत्तिरेवा । २ सि. स्थितिर्मा काचिदनुत्पत्तिश्च । ३ सि °भवप्राप्ता ।

अथोच्यतेतोत्पादपूर्वत्वदोषानित्यादि, यदैवोत्पद्यते तदैव विनश्यति, यदैवोत्पद्यते तदेवावतिष्ठत इत्युभयोरुत्पादप्रधानयोर्विकल्पयोर्ये दोषास्तत्परिहारार्थं प्रस्तुतार्थं अनुमत्य चोभौ विकल्पौ भेदेत्वा विकल्पान्तरे निर्दोषे मन्यमान धीमान्येव विनाशप्रधाने, तत्रावस्थायीविकल्पः—तदैव विनश्यति यदैवोत्पद्यत इति, अस्मिन्नपि विकल्पे दोष उच्यते—लोके तावत् प्रत्यक्षादिप्रसिद्धमङ्कुरोत्पत्तौ बीजं
5 विनश्यति, यत्र पुनर्यदैव विनश्यति बीजं तदैवोत्पद्यते नाङ्कुर इति अङ्कुरप्रादुर्भाव एव प्राप्तः, इति क्रमस्य हेत्वर्थत्वात् तत्रापि पूर्ववत् स्ववचनादिविरोधाः, तत्पूर्वपक्षाभ्युपगमाच्च लोकादिविरोधाः—अङ्कुरभावेऽङ्कुरपूर्वायां पत्रकाण्डनालपुष्पफलप्रसूत्यादीनामुत्तरेषां लोके प्रत्यक्षादिप्रमाणप्रसिद्धानामङ्कुरपत्रकाण्डपत्रपालोकादिविरोधाः, पूर्ववद्वचनलोकाद्याभ्यां दोषाभिधानमिति, यदैवेत्यादि, तदैव विनश्यति तदैवोत्पद्यत इति वचनेनानन्यभूतत्वेऽपि एकस्मिन्नेव क्षणे विनाश उत्पादश्चेति क्षणिकवादाविशेषः,
10 पूर्वक्रमप्रक्रमे विनाशोत्पादौ हि क्षणिकवादः, स चानेनाक्षिप्यते, आविर्भावतिरोभावविनश्यत्स्वनाशित्वं स्यात् अपुष्पवद्बीजाङ्कुरप्रसूत्यता स्यादिति ।

अथ विनाशोत्पादैकाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमाश्रीयतेऽथाप्युक्तवदेव दोषाः स्थानाभिधानेन तु योज्याः, यथा वा सर्वथा वा विनश्यदपतिष्ठमाने कुतो विनाशः, विनाशे वा कुतोऽस्य स्थानमिति स एवाधिकृतास्ते वचनादिविरोधाः क्षणिकवादातिशयनादि च पूर्व
15 वत् । तस्मादविनाशपूर्वत्वदोषानपरिहार्यान् प्रस्तुतार्थानुमत्य च चतुरोऽपि विकल्पान् त्यक्त्वेमौ निर्दोषौ विकल्पावित्याश्रयेत तत्राद्ये तावत्तदवतिष्ठते तदैवोत्पद्यत इति विकल्पे पूर्वपक्षव्याख्या यावत् क्षणिकवादातिशयनादि, अथ तदेवावतिष्ठते तदैव विनश्यतीति स्थिति पूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्यम् ।

अथ विनाशोत्पादैकाधिकरण्य इत्यादि द्वितीयविकल्पे विनाशप्रधानस्थितिपक्षेऽप्युक्तो-
20 द्दिष्टेऽप्युक्तवदेव दोषाः स्थानाभिधानेन तु योज्याः, योजनाविप्रदर्शनमुच्यते यथा वा सर्वथा वेति

तिरन्वं प्रतिकुमार-तत्रापरकल्पादिति । लोके प्रत्यक्षप्रसिद्धं अभ्युत्पद्यत इति तस्मिन्वे स्वमतेन तु यदैव विनश्यति तदैवोत्पद्यत इति प्राप् तथा च बीजस्य विनाशदर्शनात्मोक्षाद्यर- स्याङ्कुरोत्पत्तिरङ्कुरपत्रकादिक्रम इत्याह-लोके तावदिति । पूर्वपक्षपि विकल्पे स्ववचनादिविरोधाः प्रत्यक्षानुमानलोकविरोधाः इत्याह-तत्रापीति । यदैव विनश्यति तदैवोत्पद्यत इति बीजस्यैव विनाशानुत्पत्त्यानुपपत्तेस्तत्कालेन इत्यादयः, तत्पूर्वपक्षे वचनकाण्डत्वमप्रमाणत्वात् लोकविरोध
25 लोके हेतो दर्शनविषयः अङ्कुरभाव इति अङ्कुर पूर्वो चैतत्पूर्वाङ्कुरप्रसूतापत्यामिति विग्रहः अङ्कुरान्तरपत्राद्युत्पत्तिः । पूर्वं यदैवोत्पद्यते तदैव विनश्यतीत्यत्र यथा वचनलोकाद्यविरोधास्तेऽपि विरोधा वचनलोकादयो विरोधा इत्याह पूर्ववदिति । वचनार्थस्यास्तित्वादिनाशयोः कार्यकारणभावोपपत्त्यनुपपत्त्या विनाशकाले वर्तमानत्वेनानुपपत्तिः तदैव यतोऽनिर्वर्त्य इत्याह-तदेव विनश्यतीति । अङ्कुरभावो बीजादिपूर्वपरकालतत्त्वसिद्धान्तप्रसिद्धत्वात् चतुष्टयमिति यथापूर्वमेवेत्याह-आविर्भावादिति परिणामानित्यत्वमतपरिच्छेदः । एवं यदैव विनश्यति तदैवोत्पद्यत इति
30 विनाशस्यानतिरिक्तकालत्वात्तत्क्षणिकसिद्धिरिति भवति । उक्तदोषयोजनाप्रकारं दर्शयति-योजनादिरिति यथा वा-

1 भि. °वाप इत्यादि । 2 भि अन्यो । 3 भि °भाव: यदैव । 4 भि. अवतारैकाधिकरण्ये इत्यादि ।
5 भि च विनाश ।

विनाशप्रकारेण विनाशे उत्पत्तिस्थितिविनाशप्रकारेण वा विनाश इति विकल्प्यते, उत्पत्तिप्रधानविकल्पाभिहितदोषप्रसङ्गोऽपि विनाशप्राधान्येन स्थित्या सह योजितं तथा वा सर्वथा वा विनश्यदवतिष्ठमान कुतो विनाशः, विनाशे वा कुतोऽवस्थानमिति व एवाभिहतास्ते वचनादिविरोधाः क्षणिकवादाविश्रमादि च पूर्ववत्, एवं तावदुत्पादपूर्वयोर्विनाशपूर्वयोश्चोत्पादस्थितिविकल्पयोर्दोषा उक्ताः, अथोच्यते उत्पादविनाशपूर्वतायामित्यादि पूर्ववदुक्ताय दोषाननुमत्य च लक्ष्या चतुरोऽपि विकल्पान् इमौ 5 निर्दोषौ विकल्पाविष्यामत्येव यत्रावतिष्ठमानस्तदेवावतिष्ठते तदेवोत्पद्यत इत्यादि यावत् क्षणिकवादाविशयवादीति, पूर्वपक्षेऽपि व्याख्या कार्या, अवतिष्ठमान इत्युपारम्भेन तु योज्येति, अथ यदेवावतिष्ठते तदेव विनश्यतीति स्थितिपूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्य यावत् क्षणिकवादाविशयवादीति गतार्थं शून्यता वेति ।

अस्मिन् विकल्पेऽन्यथापि दोषाभिधित्सयाऽऽह— 10

अवतिष्ठते याऽनन्वयगोचरो व्यतिरेक एव सन्मात्रोपलब्धेश्च सर्वत्रैव तदेवावतिष्ठते तदेव विनश्यतीति व्यपदेशो न सम्भवतीति पूर्ववच्च एव स्ववचनादिविरोधा इति ।

अवतिष्ठते योऽनन्वयेत्यादि यावत् स्ववचन[ादि]विरोधा इति, अनन्वयगोचर इत्यादि, अनवस्थानम[न]न्वयः, व्यतिरेको विनाशः, अन्वयशून्यो व्यतिरेक एवानन्वयः स एव गोचरो व्यतिरेकः—अन्वयशून्यो विनाश एवेत्यर्थः, सन्मात्रोपलब्धेश्च सर्वत्रैव—बीजाङ्कुरप्रवाहे तदेवावतिष्ठते 15 तदेव विनश्यतीति—इत्थमपि व्यपदेशो न सम्भवतीति पूर्ववच्च एव विरोधाः ।

विनाशप्रकारेणावतिष्ठमानं तदेव विनश्यति तदेवावतिष्ठत इत्यर्थः सर्वथा वा—उत्पत्तिस्थितिविनाशप्रकारैरवतिष्ठमानं तदेव विनश्यति तदेवावतिष्ठत इत्यर्थं । उत्पत्तिप्रधानेति उत्पत्तिप्रकारेणावतिष्ठमानं उत्पत्तिस्थितिविनाशप्रकारैर्वाऽवतिष्ठमानं तदेवोत्पद्यते तदेव तिष्ठतीति विकल्पेऽभिहिता दोषा अत्रापि भवन्तीत्यर्थः । दोषं दर्शयति—विनश्यदिति विनाशक्रियाव्याप्तम् पूर्वथा विनाशात्मकेन कुतो [illegible] इति भावः । विनाशस्थितेर्भिन्नकालीनत्वेन 20 यदि विनाशकालेऽवस्थानं कुत इत्याह—विनाशे वेति । उच्यते च भवता तदेव विनश्यति तदेवावतिष्ठत इति [illegible] वचनादिविरोधा इत्याह—त एवेति । अत्रापि [illegible] स्ववचनादिविरोधाः क्षणिकवादाविश्रमादिदोषा वक्तव्या इत्याह—पूर्ववदिति । एवं यदेवोत्पद्यते तदेव विनश्यति यदेवोत्पद्यते तदेव तिष्ठति यदेव विनश्यति तदेवोत्पद्यते यदेव विनश्यति तदेवावतिष्ठत इति चतुर्षु विकल्पेषु दोषा उक्ता इत्युपसंहरति—एवं तावदिति । [illegible] दोषाननुमत्य विकल्पभेदान् सत्त्वा यदेवावतिष्ठते तदेवोत्पद्यते यदेवावतिष्ठते तदेव विनश्यतीति विकल्पद्वयमप्यपि 25 पूर्ववत् दोषा वाच्या इत्याह—अथोच्यत इति । अत्र प्रथमविकल्पे दोषं योजयति—तत्राय इति [illegible] इत्यर्थः [illegible] बीजाङ्कुरादौ बीजावस्थायां तदेवोत्पद्यते नाङ्कुर इत्यङ्कुर [illegible] अवतिष्ठते [illegible] उच्यते च भवता यदेवावतिष्ठते तदेवोत्पद्यत इति स्ववचनादिविरोधाः । क्षणिक एव [illegible] क्षणिकवादाविश्रमः [illegible] [illegible] इति भावः । द्वितीये स्थितिपूर्वद्वितीयविकल्पेऽपि दोषाभिधित्सयाह— 30 अथेति । अत्र कल्पे स्थितिव्यतिरेकेण विनाश एवावतिष्ठत इति यदेवावतिष्ठते तदेव विनश्यतीति व्यपदेशोऽपि न सम्भवति [illegible] [illegible] अवतिष्ठते न तर्हि विनश्यति यदि विनश्यति न तदवतिष्ठते [illegible] इत्याह—अवतिष्ठत इति । तत्रायमर्थः—अनवस्थानमिति स्थितेरन्य इत्यर्थं । [illegible] अन्वयशून्य इति

1 सि. क. वा अन्वय इत्यादि । 2 सि. क. अनन्वयगोचरेत्यादि । 3 सि. विरोधाः ।

अनेनापि प्रकारेण भवताऽऽक्षेपसाधनावयवाः ध्वंसन्ते व्याप्यव्यवस्थानविनाशात्, व्याप्यव्यवस्थानाविनाश एव हि सपक्षमपि तस्मात् न विनाशो, अग्निरत्र धूमादिति यथा, यथा हि धूमो धूमरूपेण व्यवस्थितो व्यवस्थित एवाग्न्यात्मतया तद्वृत्तया च प्रदेशे, त्वन्मतेन तु विधिवाऽदर्शने विनाशो त्वयेष्टयाऽवस्थयाऽवस्य विनष्टम्यमित्यवस्थानविपरीतवृत्तित्वादस्य
5 पक्षधर्मत्वमसिद्धमतः प्रदेशस्याप्यन्यथावृत्त्यादभूतत्वाद्वाऽऽश्रयासिद्धिः विपरीतवृत्तेर्विरुद्धतापि ।

[illegible] भावेऽप्युभयत्वेति [illegible]

[illegible] सोऽस्तूच्यत इति । [illegible] द्विविधा इति ।

[illegible] 25

[illegible] न तु भाव इति [illegible]

[illegible] 30

१ सि क. [illegible]। २ सि क. [illegible]। ३ सि क [illegible]। ४ सि क [illegible]।

हि द्रव्यादयः सत्तान्तरसमवायात् सद्द्रव्यघटादिव्यपदेशार्हा भवन्तीत्येषोऽपि विशेषः । किमर्थं सत्तान्तरसमवायाद्द्रव्यादि सद्भवति न पुनर्द्रव्यादिसमवायात् सत्तादिकमपि द्रव्यादीनि न भवन्तीति चेत् उच्यते स्वरूपसत्तायाः सर्वासामपि सामान्यविशेषसमवायानां समत्वात् स्वसत्तयैव सतां सम्बन्धसम्भवद्रव्यादीनां सत्तादीनामितरेभ्यो विशेषः ।

5 स तु सम्बन्धद्रव्यादीनामस्तीति दर्शयति–

दण्डवस्त्वर्थान्तरभूतसत्तादिसमवायादेव स्वानुरूपा विशेष्ये बुद्धिरनुप्रवर्तते न त्वगृहीते विशेषणे, विशेषप्रत्ययस्य गगनादिष्वतत्सम्बन्धिष्वभाववत् ।

दण्डवस्त्वर्थान्तरेत्यादि गतार्थं यावद्विशेष्ये बुद्धिरनुप्रवर्तत इति, विशेषणस्वरूपप्रत्ययनिमित्तत्वाद्विशेषणानाम्, सत्तादिसम्बन्धानुरूपप्रत्ययहेतुत्वं सामान्यादीनाम् स्वात्मन्येव दण्डनिमित्तप्रत्य-
10 यवत् द्रव्यगुणकर्मणाम् न त्वगृहीते विशेषणे, सत्तादिविशेषणप्रत्ययस्य गगनादिष्वतत्सम्बन्धिष्वभाववदिति ।

एवमेव द्वयस्यैकोभयप्राधान्यस्यापि विधिः, अत्यन्तविशेषरूपत्वात् पदार्थषड्भेदानाम् न तु पूर्वनयेष्ट[1], अस्मात्पक्षे कर्तृत्वाभावात्, अस्माभिस्त्वदनुकम्पयाऽभ्युपगतेऽपि कर्तृत्वे द्रव्यस्यैव च प्राधान्यमिति विधानात् क्रियायाः प्राधान्याविधानात्तथा न भवितुमर्हति ।

15 (एवमेवेति) एवमेव द्वयस्यैकोभयप्राधान्यस्यापि [2]विधिर्भवाऽस्माभिरुक्तवदेव सामान्यस्य विशेषस्य च विधिः सम्भवति, अत्यन्तविशेषरूपत्वात् पदार्थषड्भेदानाम्–तथा सामान्यविशेषद्वयविधिरपि भवितुमर्हति, न तु पूर्वनययो द्रव्यक्रिययोरुभयप्राधान्याभावात्, अस्मत्पक्षे कर्तृत्वाभावात् तत्प्राधान्यात्तत्र इति कुत इत्याशङ्क्यते–किमर्थमिति । सत्तादयो हि स्वात्मसमवायाद्भवत्यादिसमवायाद् द्रव्यादयो भवन्ति यत् द्रव्यं गुणः कर्म इत्येवं व्यभिचारि, तत्र यदि स्वात्मकत्वादयः सत्तादयो भवेयुस्तर्हि तत्समवाये द्रव्यता-
20 दिसमवायश्च स्यात् न चैव स्यात् सामान्यविशेषसमवायानां स्वरूपसत्त्वैक्यसिद्धिमत्त्वात्, तथा द्रव्यादेरपि स्वरूपसत्तायोगेन दर्शयति–स्वरूपसत्ताया इति । सोऽयं विशेषः सत्तादीनामस्तीति दर्शयति–दण्डवदित्यादि । दण्डवस्त्वर्थान्तरभूतस्य दण्डस्य सम्बन्धात् पुरुषे यथा स्वानुरूपा दण्डीति विशिष्टबुद्धिरुत्पद्यते तथा द्रव्याद्यर्थान्तरभूतसत्तादिसमवायात् द्रव्यादौ विशेष्ये स्वानुरूपा सत् द्रव्यमित्यादिप्रतीतिरुपजायते इत्याह न त्वगृहीते–विशेषणे इति । न हि केवलसत्तादिसमवायेन विशिष्टबुद्धिर्भवितुमर्हति किन्तु ज्ञातं सत् सत् स्वाकारानुरूपया बुद्ध्या विशेष्यं रञ्जयति तदीयरूपं गमयति यदा च विशेषणं न गृहीतं तदा
25 तथ विशेष्ये स्वानुरूपा बुद्धिं जनयेद् सर्वत्राविशेषत्वात्, यथा गन्धादौ घ्राणाद्ये विषये वा सत्तादिप्रत्यये स्वाकाराविशेषप्रत्ययाभावात् इत्याशयेनाह–न त्वगृहीत इति । एवं द्रव्यादीनां विधिः सत्तादिविशेषणसामान्यविशेषसमवायानामेव तथा सामान्यविशेषयोर्विधिर्भवितुमर्हति न तु पूर्वनययोर्द्रव्यक्रियास्वभावविधिरत्यन्ताविशेषत्वात् यद्यन्येषामिति दर्शयति–एवमेव द्वीति न चाऽस्माभिरुक्तवदेवैकतरं । यथाऽस्मत्पक्षे द्वयोरुभयविधिर्युक्तस्तथैवान्येषामेकस्य प्राधान्येन विधानमपि सम्भवति स्वार्थानामसम्बन्धित्वेन तयोश्च प्राधान्येन भवतोर्द्वयोरप्येवं–उभयप्राधान्यस्यापीति नचेत्र पौरुषत्वमिति चोभयम् । सामान्यविशेषोभयविधिः षडर्थपदार्थानामत्यन्तभेदस्याभ्युपगमेन सम्भवति न तु द्रव्यक्रियात्मके तयोरेकस्यैव विधिः
30 सिद्धिर्बोध्या । सामान्यविशेषोभयविधिः षट्पदार्थानामत्यन्तभेदस्य...
स्यात्वेकस्येत्याह–अस्मत्पक्षेति । कर्म पूर्वनये च सम्भवतीत्याह–अस्मत्पक्षे इति तत्रैव हि कर्ता, क्रिया तु पुरुषस्य सर्वभूता द्रव्यस्यैव च तदानुपूर्व्येणाभ्युपगमादिति भावः । कर्तृत्वाभ्युपगमेऽपि द्रव्यक्रियायोरुभयोः प्राधान्यं न सम्भवेत्

1 सि क. °स्तदभाव । 2 सि क. एवमेवाद्भुतमपसीचे । 3 सि क. भिन्ने ।

वादिति, अस्माभिस्त्वदनुकम्पयाऽभ्युपगतेऽपि कर्तृत्वे—स्वतन्त्रभवनात्मके द्रव्यस्यैव च प्राधान्यमिति विधानात् क्रियायाः प्राधान्याविधानात्, भावः—द्रव्यं कर्तृ स्वातन्त्र्यात्, न क्रिया प्राधान्याभावाविशेषं युक्त्या प्राप्तस्येऽपि त्वदनुकम्पया तयोः कर्तृत्वे वाऽभ्युपगतेऽपि न भवितुमर्हति, उभयप्राधान्याभावाविशेषः ।

किं कारणमुभयप्राधान्यं नास्तीति चेदुच्यते—

तथाभूतार्थविषयत्वात् सन्निधानस्य तथातथाभवनभावाभिमुखसन्निहितपटादिभवन गेहवत् क्रियया न किञ्चित् प्रयोजनम्, सम्भाव्यमानमपि प्रयोजनमभिव्यक्तिमात्रं स्यात्, तस्या अपि तद्भवनतन्त्रत्वाद्द्रव्यभवनस्यैव प्राधान्यस्योपकारमात्रार्थत्वाद्व्यक्तेरप्राधान्यम् ।

(तथाभूतार्थेति) तथाभूतार्थविषयत्वात् सन्निधानस्य—द्रव्यं हि सन्निहितभवनमिष्यते तथा-तथाभवनभावाभिमुखसन्निहितपटादिभवनगेहवत्—गेहसन्निहितपटवत् सर्वथा तेषां क्रियाव्यञ्जनाभिम तानां द्रव्ये सन्निधानाभ्युपगमात् प्रदीपेनेव गेहे सन्निहितानां घटादीनां क्रियया न किञ्चित् प्रयोजनम्, सम्भाव्यमानमपि प्रयोजनमभिव्यक्तिमात्रं स्यात् तस्या व्यक्तेरपि तद्भवनतन्त्रत्वात् द्रव्यभवनस्यैव प्राधान्यस्योपकारमात्रार्थत्वात् व्यक्तेरप्राधान्यमिति ।

अयन्तूभयप्रधानविधिः, आरब्धानारब्धद्रव्याणां पार्थिवपरमाणुद्व्यणुकादीनां भावस-म्बन्धाभिव्यञ्जनाभेदेऽपि सति स्वभावाविभेदात्मानात्म्यम्, भावसत्त्वस्यास्यन्तव्यञ्जनस्वातन्त्र्यात्, अन्यथा भूते, यद्येवं न स्यात्सैव स्यात् सत्तासम्बन्धरहितत्वात् खपुष्पवत्, पृथिव्युदकज्वलन पवनगगनकालदिगात्ममनसां द्रव्याणामपीतरेतराभावात्मनाऽसतामेव सत्तातो द्रव्यत्वाद् व्योऽन्यतश्च तेन तेन प्रकारेणान्यता, अन्यस्य एवेतरेतरासतां भावादिसम्बन्धः, गुणकर्मणो-रप्येवमेव, न चास्य भावस्यान्यस्याभावता, स्वपरप्रकाशहेतुत्वात् प्रदीपवत्, तस्मात् स्वभाव सद्भावेन सत एवास्य सम्बन्धसद्भावाभावात्, नेतरेतरासत्त्वात्, यथा गुणोऽगुण इति, एव

[illegible]। प्राधान्यानभ्युपगमेऽपि [illegible]—अभ्युपगतेऽपीति । उभयोरपि [illegible] प्राधान्यस्याभावे कारणमाह—तथाभूतेति । [illegible] द्रव्ये भवति तद्भवनाभिमुखा हि भावा द्रव्ये सन्निहिताः [illegible] तथा च तत्र द्रव्ये तेन तेन प्रकारेण भवति तत्र किं क्रियया न हि घटे विद्यमानस्य [illegible] प्रदीपः किमपि करोति तद्वत् क्रियायाः [illegible] नास्त्येवेति दर्शयति द्रव्यं हीति । यथा घटे [illegible] तथा द्रव्येऽपि सर्वं वस्तु सन्निहितमपि [illegible]—गेहेति । यथा प्रदीपो विद्यमानस्यैव घटादेरभिव्यञ्जकस्तथा क्रियापि द्रव्ये विद्यमानस्य भावस्य व्यञ्जिका [illegible]—सम्भाव्यमानमपीति । तथापि तस्या अप्राधान्यमेवेत्याह—तस्या इति तस्या अभिव्यक्तेरपि द्रव्यं यदा तेन तेन प्रकारेण भवति तदैवाभिव्यक्तिभवनात् द्रव्यभवनमेव प्रधानं क्रियाकृताभिव्यक्ति-स्त्वप्रधानम्, न हि घटे [illegible] प्रदीपोऽभिव्यनक्ति, [illegible] तथाभवनं भावस्य [illegible] अप्राधान्यमिति भावः । इदानीं उभयोरपि प्राधान्य-विधाने [illegible] इति दर्शयति—अयन्त्विति पार्थिवपरमाण्वारब्धानि अनारब्धानि नित्यद्रव्याणि द्व्यणुकादिद्रव्याणि आरब्धद्रव्याणीति योजना । अस्मिन् हि मते [illegible] तदभिप्रायानुसारेणैव प्राधान्येन

---

१ सि. क. °कृत्यानुर । २ सि. क. °व्यञ्जनात् क्रिया । ३ सि. क. °प्राप्तोऽपि ।

सामान्यं सामान्यमेव, योऽप्यसौ स्वभावसद्भावः कार्यद्रव्यादीनां यतो भावसम्बन्धादाकेव स्वसादेवासदिति न, किन्तर्हि ? तत्र भवतीति भवत्येव अभूत्वा भावात् भूत्वा च भावात् स्वसद्भावद्वैरूप्यम् किञ्चित्तु परमाण्वाकाशकालदिगात्ममनोद्रव्यादि भवदेव भवति स्वसद्भावेन, सामान्यविशेषेऽप्युभयता कर्मणि च, स्वभावसम्बन्धसद्भावाभ्यां भेदाभेदौ, एवं
5 साधर्म्यवैधर्म्याभ्यां षट्पदार्थेषु वैशेषिकमिति ।

(भवन्त्विति) भवन्तूभयप्रधानविधिरिति निगमनम्, तुशब्दो विशेषणार्थः, एव तयो विशिष्टार्थापितावयपरित्यागेनैव सामान्यविशेषयोर्विधिरिति, कीदृश इति चेत् तमित्युच्यते–आरभ्या आरभ्येत्यादि समभेदषट्पदार्थपरस्परान्यत्वप्रदर्शनार्थो ग्रन्थो यावत् कर्मणि तु स्वभावसम्बन्धसद्भावाभ्यामिति, प्रायो गतार्थः, तथापि किञ्चिदुच्यते–पार्थिवादिपरमाणुद्व्यणुकाद्यारम्भानामपि स्वभावभेदा
10 देशकालभेदेऽपि नानात्वम्, परमाण्वाकाशादीनामनारम्भानाञ्च तत एव, भावसम्बन्धाभिन्नत्वाभेदे ऽपि सति, आरम्भाभावाच्च कादाचित्कत्वानित्यत्वेतरेषां भिन्नत्वाद्विशेषः, भावसत्त्वस्य–सत्तासत्त्व समानसद्भावेऽपि [वि]शेषः, कस्मात् ? असम्बन्धत्वानर्थत्वान्–इतरे भवन्ये स तु भवतन्येवेति, अन्यथा भूतेः–भवसम्बन्धेन प्रकारेण भवनात् सर्वत्र सन्निहितत्वमेव भवतीत्यभावान्यथाऽभूतेरिति, यथेव भावन्यस्तत्तावत्त्वं न स्यात्–नैव स्यात् सत्तासम्बन्धरहितत्वात् खपुष्पवत्–भावो हि सद्भावसत्त्व
15 सम्बन्धाभावात् खपुष्पवत् स्यादिति, पृथिव्युदकेत्यादि, एतान्यपि द्रव्याणि इतरेतराभावसमा न सन्ति, असत्त्वमेव सत्तासम्बन्धात् सत्त्वं भवति द्रव्यसत्त्वसम्बन्धाद्द्रव्यत्वं भवति, ततश्च सत्तातो द्रव्यत्वाद्वान्योऽन्यत्वञ्च तेन तेन प्रकारेणान्यता, अन्यत्व एवेतरेतरासतो भावादिसम्बन्धा–मन्यत्व एवासति सत्त्वमिति, गुणकर्मणोरप्येवमेवेति, भावगुणत्वकर्मत्वादिभिः सम्बन्धात् इतरेतरासतामेव सद्गुणकर्मत्वान्यत्वानि एव भावोऽसतो सम्बन्धात् सत्त्वं जनयति द्रव्यादीनामित्युक्तम्, तथा
20 किं भावस्य सम्बन्धोऽन्येन जन्यते, नेत्युच्यते–न चासेत्यादि, स हि स्वयं सम्बन्धादन्येषां सदभिधा-

सामान्यविशेषयोर्विधानं प्रदर्शयन् इति द्रव्याभिधानप्रवृत्तिनिमित्तविधिरिति व्याचष्टे–तुशब्द इति । अर्थस्वभावस्वकार्यकारणाद्य समानैकत्वेऽपि पृथिव्यादिसमभेदात्मैव तथा भिन्नाभिन्नत्वाभ्यां च भेद इति दर्शयति–पार्थिवेति तत एव स्वभावभेदादेकैकस्य । सत्तासम्बन्धस्य तदैकाभिन्नत्वेऽपि तेनाभेदेऽभिव्यक्ते स्वरूपीकरणेनाह–भावेति । कथमित्यत आह–अभिन्नत्वादित्यर्थः । तदेव स्पष्टयत स्वतोऽपि सत्तासम्बन्धेनैव सत्त्वं तस्य अभिव्यक्तीकरणे भवन्तं तादात्म्यादि–
25 त्याह–भावसत्त्वस्येति । तादात्म्ये हेतुमाह–अन्यथेति आरम्भेऽसत एव कार्यस्य भवनात् नीतिरिति भाव सन्निहितत्वेन–भवने सन्निहितत्वेन धर्मेणेत्यर्थः । ननु वस्तुन स्वरूपतया भवने तथाऽऽप्य सत्त्वं न स्यात्तर्हि वस्तु यदेव न स्यात् सत्सम्बन्धाभावादित्याह–यथेवमिति । अस्तौ पृथिवी सत्तात्मना जलादित्वेन द्रव्यात्मना इतरेतरात्मतयेव पृथिव्यादीन सत्तासम्बन्धात् स्वरूपता द्रव्यत्वादिसम्बन्धाद्द्रव्यादिरूपता सत्ताद्रव्यत्वादयोऽपि परस्परं भेदः पूर्ववदाह भावसत्तादिसम्बन्धादित्याह–एतान्यपीति । एवं गुणादीनामितरेतरासतामसतो सत्ताद्यनन्तरादिसम्बन्धात् सद्गुणादिरूपते–
30 त्याह–गुणकर्मणोरिति । भाव सत्ता या कर्म सती अपरसत्तासम्बन्धात् सत्त्वेऽनवस्थाप्रसङ्गादित्याह–किं भावस्येति स्वयमेव एव अथवा स्वरूपा स्वतःस्वरूपाभावेऽपरत्र सत्त्वप्रतिपादनहेतुत्वासम्भवात् तस्मात् स्वयमेव सत्त्विन् भवन्

१ सि. क. स्वजयवावान्ये वत । २ सि. क. भावादिसम्बन्धाभ्यां युता । ३ सि. क. सत्तासम्बन्धात् एवेति ।

प्रत्ययहेतुनान्यस्मात् सदभिधानप्रत्ययौ लभते, स्वपरप्रकाशहेतुत्वात् प्रदीपवत्—न हि प्रदीपो घटादि प्रकाशनसमर्थः स्वप्रकाशने घटादीनपेक्षते तथा सत्तापि, तस्मात्तस्य स्वभावसद्भावेन सैव एषा सर्वं सम्बन्धसद्भावाभावात्, नेतरेतरासत्त्वात्, यथा गुणोऽगुण इति नास्य गुणोऽस्तीत्यगुण उच्यते, न तु गुणो न भवतीति, कस्मात् ? गुणान्तरसम्बन्धाभावात्, न स्वयमगुणत्वादिति, एवं सामान्य सामान्यमेवेति गतार्थम्, एष तावत्सत एव भावः सत्त्वान्तरानपेक्षः सन्, योऽप्यसौ स्वभावसद्भावः का- 5 र्यद्रव्यादीनां परतो भावसम्बन्धादीदृशः तस्मादेवासदिति न, किं तर्हि ? तन्न भवतीति भवत्यव, अभूत्वा भावात् भूत्वा च भावात् कार्यस्य, स्वसद्भावेनैवासत्त्वम्भवति, सदप्यसद्भवतीति तस्य स्वसद्भावस्य कार्यस्य सदसद्भावद्वैरूप्यम्, तद्वदसमर्थविकल्पत्वादेकपुरुषपितृपुत्रत्वादिवदिति भावितमेव, तस्मात् सर्वमन्यथाऽप्यर्थेन सामान्यविशेषात्मकं भवति, किञ्चिन्नित्यादि—इद पुनर्नैवमेव भवति स्वसद्भावादेव, नाभूत्वा, न सत्त्वसम्बन्धात् परमाण्वाकाशकालदिगात्ममनोद्रव्यादि, आदिग्रहणात् 10 समवायविभुपरिमण्डलपरमाणुगुणादि, सर्वत्र नेतरासत्त्वा[द]न्यथात्वमिति विशेषः, स्वपरभावसत्त्व सामान्यम्, विशेषेऽप्युभयत्वेति, सामान्यविशेषा द्रव्य[त्व]गुणत्वकर्मत्वादयः, अन्त्यविशेषा योगिना-मेवाकाशदेशसीमासमन्यत्वकराः, कर्मणि च स्वभावसद्भावेन कर्मत्वसम्बन्धसद्भावेन स्वेतरेभ्यो भेदाभेदौ एवं द्रव्यगुणयोर्द्रव्यत्वगुणत्वसम्बन्धसद्भावात् स्वभावसद्भावादित्येवमादिसाधर्म्यवैधर्म्याभ्यां षट्पदार्थेषु

च व्यक्तसम्व्यवहारो व्यक्तः तत एव सत्ता पृथिव्यादिभ्य इतरेतरासत्ताऽसती सती भवति अपि तु तत्र स्वरूपेणैवासत्त्वेनाह— 15 यदि स्वयमिति । सत्ता इतरेतरासद्भावाभावे कारणमाह—यथा गुण इति गुणे गुणान्तराभावात् गुणोऽगुण उच्यते न त्वसौ गुणो न भवतीति स्वतस्तस्य गुणत्वात् एवं सत्तादिसामान्यमपि तत्र सामान्यान्तराभावादेव निःसामान्यमुच्यते न तु स्वयं सामान्यं न भवतीति स्वतस्तस्य सामान्यत्वादिति भावः । कार्यद्रव्यादीनां स्वसद्भावरूपं दर्शयति—योऽप्यसाविति कार्यद्रव्यादीनि स्वरूपसन्त्यपि परतः सत्तासम्बन्धात् सन्ति भवन्तीति स्वरूपसत्त्वं तेनाभवतीति व्यवस्थापनीयेनेति सद्विधुरमिव इति भाति । समाधत्ते—तन्नेति अभूत्वैव स्वस्य भवतीति न किन्तु भूत्वाऽपि भवति आद्य सत्तासम्बन्धाभावात् पश्चात्सत्सम्बन्धात् 20 भूत्वा भवनं पूर्वं स्वरूपसत्त्वात् तत सत्तासम्बन्धात् सत्तानुभूत्वा भवनं तस्मिन्नाशङ्कितेऽपि विकल्पे समर्थत्वात् कारणत्वात् कारणत्वात् कारणान् कार्यमिति तथा भवत्व कार्यं सदसत्त्व सदसत्त्वादिति पक्षे तन्नोऽविकल्पोऽसौ इति पूर्वमुक्तत्वादिति भावः । तस्मात् सर्वं सर्वं सामान्यविशेषसम्बन्धात् सामान्यविशेषात्मकं भवतीति दर्शयति—तस्मादिति । नित्यतत्त्वेनाऽऽह—इदं पुनरिति परमाण्वाकाशकालदिगात्ममनोद्रव्यादीन्येवं परमाण्वादिद्रव्यादीनामादिवत्सम्बन्धादसत्त्वमपीत्याह—सर्वत्र भवति । सामान्यविशेषेऽप्युभयत्वेति भूयः व्याचष्टे—स्वपरेति सामान्यपदेन महासामान्यमित्यर्थे तस्य स्वरूपसत्त्वे सति 25 परभावस्य सत्तापादकत्वात् स्वपरभावसत्त्वमितरेतरात्मना भावत्वमेवं विशेषस्यापि स्वरूपसत्त्वादितरेतरात्मना भावत्व-मुभयरूपतया प्रतिभाति । सामान्यपदेन सामान्यविशेषस्य विवक्षणे त्वाह—सामान्येति अपरजात्युपादिभ्यः त्वादिति भावः । विशेषपदार्थमाह अन्त्येति अन्त्येषु भवा अन्त्या स्वाश्रयव्यावर्तकत्वाद्विशेषाः तुल्याकृतिगुणक्रियेषु नित्यद्रव्येषु योगिनां येभ्यो निमित्तेभ्यो विलक्षणोऽयं विलक्षणोऽयमिति प्रतिपत्तिः तेऽन्त्या विशेषाः स्वस्वरूपतोऽन्यव्यावर्तकाः । एवं षट्पदार्थानां सामान्यविशेषता तत्स्वरूपतोऽन्यापरपदेनापि साधर्म्यवैधर्म्ये प्रदर्शिते इत्यत्र च विधिनियमयोर्नियतं व्याख्यातम् 30 एतदुपसंहरति—इत्येवमादीति यथोपलब्धव्यवहारेण वैशेषिकव्याख्यानोऽयं मन्ये न तु वैशेषिकपक्षेणेति विवेचनम् । अत्र

१ सि. क. स्वलेपसत्त्वम् । २ सि क. प्र बाल्यतामपेक्षा । ३ सि क. °तावेव । ४ सि क. सत्तान । ५ क. °गुण व्यावर्त्य व्यावर्त्य, सि गुण व्यावर्त्य । ६ सि क. °ख्यानमन्यदन ।

विशेषा एव वैशेषिकं विशेषप्रयोजनं वा वैशेषिकमिति विधिनियमयोर्विधिरुपपद्यते, न त्वनियमैकवस्तुनि विधिनियमविधिरिति ।

अत्राह किमयं द्रव्यास्तिकभेदः? पर्यायास्तिकभेदो वा? इत्यत्रोच्यते–

नैगमैकदेशत्वाद् द्रव्यास्तिकोऽयम्, द्रव्यमपि द्रव्यत्वसामान्यविशेषसम्बन्धात्, जातिः 5 शब्दार्थः, अन्त्यमेव पदं वाक्यार्थः, स च पूर्वपदज्ञानाहितसंस्कारापेक्षोऽन्त्यपदप्रत्ययः ।

(नैगमैकदेशत्वादिति) नैगमैकदेशत्वाद् द्रव्यास्तिक [अयम्] द्रव्यमप्यस्तीत्यस्य मतिः, न पूर्ववद् द्रव्यमेवास्ति कार्यान्तरवत् सदसमासस्यैव द्रव्यमिति निगमस्य मे निरुक्तार्थभेदः, तेषु द्रव्यमपीत्यादि–द्रव्यत्वसामान्यविशेषसम्बन्धाद् द्रव्यं न भव्यद्रव्यगुणसमुदायसमुदायात्मकम्, जातिः शब्दार्थ इति–सर्वशब्दानां जातिवाचित्वमेव, आकाशादीनामपि जातिवज्जातिरित्युपचारात्, अन्त्यमेव पद 10 वाक्यार्थ।–यथा देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यस्यान्त्येन पचतिपदव्यक्तेन सह परस्परसंसर्गान्वयव्यतिरेकवतोऽर्थस्य परिपूर्णत्वात्, स च वाक्यार्थः पूर्वपदज्ञानाहितसंस्कारापेक्षोऽन्त्यपदप्रत्ययः, प्रत्येकं पदैर्हि स्वार्थविषयैरुत्पादितानि विज्ञानानि संस्कारमादधति, ततोऽन्त्यपदार्थं पूर्वपदज्ञानसंस्कारपरिपाकवशात् सम्बन्धान्तरव्यवच्छेदेन परस्परसंसर्गविषयमुपजनयत इति सर्वेषामन्वयव्यतिरेकाभ्यामन्त्यपदार्थस्यैव वाक्यार्थ इति, यथाह–'नादैराहितबीजायामन्त्येन ध्वनिना सह[1]

---

15 प्रधानभूते भवाद्ये कश्चिदन्तर्भावोऽस्य नयस्य तत्र यदि द्रव्यास्तिकत्वे तर्हि तत्रापि [illegible] एवमेव इत्याह– नैगमेति । अस्याभिमतं द्रव्यास्तिकत्वप्रयोजकं दर्शयति–द्रव्यमप्यस्तीति [illegible] ... [illegible] जातिः शब्दार्थ इति [illegible] ... 20 [illegible] ... 25 [illegible] ... नादैरिति [illegible] ... 30 [illegible]

1 सि. क. [illegible] । २ सि. °सामान्यविशेष[illegible] । ३ सि. क. [illegible] ।

मातृत्वपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥' (वाक्य० का० १ श्लो० ८५) इति, स च कृतसं-ज्ञप्तेरेव पदादिसम्बन्धार्थग्रहस्य पुरुष[स]मन्वयहेतुर्वाक्यार्थः शब्दो वा, मातृत्वसंस्कृतेः, म्लेच्छप्रयुक्तस्य स्वार्थपरिज्ञानवत् ।

नैताः समनीषिका उच्यन्ते किं तर्हि ? अस्य नयस्य यतो निर्गमः—

तन्निर्गमसूत्रं 'इमाणं भंते' इत्यादि यावत् 'संठाणपज्जवेहिं' (जीवा० ३-१-७८) 5
इति भेदवचनात्, वर्णादिपर्ययादिषु सङ्गृहीतसमासद्वयत्वात् वर्णः पर्ययः समन्तान्नविवेक-वाच्यभावात् वर्णस्यैव परितो भावात्मनाच, वर्णोऽन्य एव गुणान्तरं चित्रवर्णः पाकजो वा तदारम्भनियमादेव पृथिव्यादिषु भवति समन्ताद्रव्यति वा घटादीनि वा द्रव्याण्यारब्धानि तैरप्यनारब्धद्रव्याणि प्रागभावप्रध्वंसात्मकानि वर्णाद्यात्मकान्येव च गृह्यन्ते, तस्मात्तैर्यदाया-त्मभूतैर्वर्णादिपर्ययैरशाश्वती रत्नप्रभा, वर्ण एव च पर्ययो यथासम्भवं श्यामादय आरब्धा 10
नारब्धद्रव्यगताः कारणगुणपूर्वकाश्चतुर्विधे पार्थिवेष्वेव पाकजास्ते, एवं गन्धादिभिरपि ।

(तदिति) तन्निर्गमसूत्रं 'इमाणं भंते' इत्यादि यावत् 'संठाणपज्जवेहिं' इति, एतस्मैवागमं भेदवचनादिति हेतुत्वेनाह नयचक्रकारः, व्याचष्टे च—वर्णादिपर्ययादिष्वित्यादि, पर्यायशब्दस्य परिग मनार्थस्य पर्ययशब्दस्य भावसाधिनो ग्रहणात्, वर्णादीनि पर्ययाणि यस्मिन् समन्ततो भावः, कक्ते-र्वाचोमौवार्थस्य रत्नमाल्यादिगणके पाठात्, वर्णादय एव पर्यायाः पर्यया इति कर्मधारयो वा तस्मैक- 15
शेषत्वात्—सङ्गृहीतसमासद्वयत्वात् समन्ताद्गमनत्वात् समन्ताद्भावत्वात् पर्यायाणां पर्ययाणाञ्च, अत्र केनाप्यर्थेन पर्यायपर्ययार्थयोरेकस्योक्तौ द्वितीयस्यापि सैव निरुक्तिरिति मन्यमान आह—वर्णः पर्ययः सम न्तान्नविवेकवाच्यभावात् द्रव्यगुणकर्मणां सप्रभेदानां सत्तासमवायसम्बन्धप्रधानानां संसृष्टरूपाणामेक-वाच्यभावादिति बहुव्रीहिं दर्शयति—वर्णस्यैव परितो भावात्मनाचेति, कथं पुनस्तत्परिगमनं पर्ययनञ्चेति ?

भाव—स चेति । एतद्वचनमुक्तमर्थानुसारेण दर्शयति—तन्निर्गमसूत्रमिति । इमिव्याख्ये [illegible] 20
[illegible] वचनं वर्णादिपर्ययैर[illegible]वचनदिति, अत्रार्थे सूत्रं पठतीति मत्वाऽऽह—एतमेवेति । कर्मधारयादि-समासद्वयं बहुव्रीहिं[illegible]—वर्णादीति । कर्मधारयसमासे पर्ययपदेन पर्यायपर्यययोरभेदोऽभिहितः, परितो गमनं पर्यायः समन्ताद्गमनं पर्यय इति दर्शयति—पर्यायपर्ययशब्देति । बहुव्रीहिसमासं दर्शयति—वर्णादीनीति । [illegible] [illegible] दर्शयति—[illegible]रिति [illegible] [illegible] [illegible] भावः समन्ततो भावः पर्ययनमस्येति भावः । कर्मधारयसमासं दर्शयति—वर्णादय 25
एवेति, पर्यायाश्च पर्ययाश्च पर्ययाः [illegible] [illegible] वर्णादय एव पर्ययाः वर्णादिपर्ययाः [illegible]
[illegible] बहुव्रीहिसमासविग्रह [illegible] कर्मधारयविग्रहः [illegible] । तथा
च [illegible] समासद्वयं सङ्गृहीतं भवतीति दर्शयति—सङ्गृहीतेति । एकेन [illegible] [illegible] व्याचष्टे—[illegible]ति,
[illegible] द्रव्यगुणकर्माणि [illegible] [illegible]
[illegible] । वर्ण एव पर्ययो यस्मिन्निति बहुव्रीहौ वर्णानां वर्ण एव पर्यय इत्यर्थकामात्, कथं तत्परि- 30
गमनं पर्ययनञ्चेति बहुते—कथमिति वर्णगुणानां कारणगुणपूर्वकत्वात् पृथिव्यां पाकजत्वाच्च [illegible] [illegible]

१—२ सि० क० [illegible] । ३ सि० क० [illegible] । ४ सि० क० [illegible] ।

तद्यथापि तु सोपपत्तिकं सनिदर्शनमाह–वर्णेभ्य एवेत्यादि यावद् द्रव्यस्य इति, वर्णेभ्य एव रूपादिभ्यो गुणान्तरं विवर्णो रक्तश्यामपाण्ड्वादिः पाकजो वा तदारम्भनियमादेवेति यथोक्तम्–'तेषामविकृतमारम्भसामर्थ्यम् (   ) इति, पृथिव्यादिषु वर्णान्तरं भवति समन्तात् प्रच्छादयति वा यानि वर्णादिपर्यायाः पर्याया वा, घटादीनि वा द्रव्याण्यारम्भाणि तैरप्यनारम्भद्रव्याणि प्रागभावप्रध्वंसात्मकानि वर्णाद्या-
5 त्मकान्येव मृत्पिण्डघनस्थानानि घटादीनि कपालादीनि च गृह्यन्ते, तस्मात्तैः प्रागभावप्रध्वंसात्मकैर्वर्णादिसमूर्तैर्वर्णादिपर्यायैरव्याप्नवती, कार्यकारणमूर्तैरित्यर्थः, कर्मधारये वा वर्ण एव च पर्यायो गुणो यथासम्भवमभिव्यक्तारि, गुणा इमे, तैरव्याप्नवतीति च वर्तते, वर्णादिपर्यायैरिति सम्बन्धः, यथासम्भवमारम्भानारम्भद्रव्यगताः केचित् रूपादयोऽनारम्भचतुर्विधाणुगतास्तदारम्भद्रव्यान्तरे कारणगुणपूर्वकास्तुर्विधे पार्थिवेष्वेव रूपादयः पाकजाः संयोगविभागौ [स]क्रियेषु पृथक्त्वं सर्वद्रव्येषु परत्वापरत्वे
10 दिग्देशकालापेक्षे तथैव, व्यापित्वात् गन्धस्पर्शज्ञानादयोऽसाधारणगुणाः पृथिव्याकाशात्मादीनां, एकत्वादिसंख्याः सर्वद्रव्यसाधारणाः, एवं गन्धादिभिरिति तृतीयानिर्देशादेभिर्व्याप्नवती, भिन्ना [च] रूपादिमूर्तिः स्वात्मसामान्यधर्मैर्द्रव्यार्थतो रसभेदत्यर्थः ।

इति विधिनियमविध्यरः षष्ठो नयो नैगमभेदो द्रव्यास्तिकान्तःपाती परिसमाप्तः, अयं चैष च सविभागविन्यस्तद्वादशार इमार इति सम्भिन्नचैकस्य त्रिशतभेदस्य संक्षेपेण षड्भेदाः,
15 एषु च पर्यायशब्दो भाववचनः समन्ताद्भवनात् पर्यायशब्दः समन्तात्प्रतिवचनः द्रव्यस्य पर्यायात्मना परितो गमनादिति ।

(इतीति) इति [विधिनियमविध्यरः] षष्ठो नयो नैगमभेदो द्रव्यास्तिकान्तःपाती परिसमाप्तः, इतिशब्दस्य समाप्त्यर्थत्वात्, विधिनियमविध्यर इति नामनिर्देशः अयमेष च सविभागविन्यस्तद्वादशार इमार इति, भेदप्रभेदसहिता एव च षड्राः, सम्भिन्नचैकस्य त्रिशतभेदस्य संक्षेपेण षड् भेदाः, तत्र विधिः

20 यथो–वर्णेभ्य एवेति । पृथिव्यादेः वर्णयुक्ता व्यवहारेऽपि वर्णस्वभावः तेभ्यो वर्णपर्यायस्य व्यापितावबोधात्–पृथिव्यादिष्विति पृथिव्यादिस्वस्थानभूतवर्णस्य व्याप्तत्वप्रमाणत्वस्यापि वर्णत्वात् पृथिव्यादेः वर्णादि द्रव्यगुणकर्माणि वर्णपर्याय एव, तैः स्वप्रव्याप्नवतीति भावः । कर्मधारयसमासापेक्षया तदर्थमाह–कर्मधारये वेति । अत्र पक्षे वर्णपर्यायस्यैव गुणत्वमेव व्याप्तमिति दर्शयति–गुणा इम इति । शेषं पूर्ववत्–अव्याप्नवतीति । व्याख्यातार्थमाह–यथा सम्भवमिति पृथिव्यादिचतुर्विधपरमाणुगताः रूपादयो गुणा नित्याः [illegible] तदारम्भद्रव्यगतास्तु कारणगुणपूर्वकाः रूपादयः पृथि-
25 व्यादयः पाकजाः अपि सर्वद्रव्येषु संयोगविभागौ पृथिव्यादिष्वपि सक्रियेषु पृथक्त्वं गुणः परत्वापरत्वे दिक्कृते कालकृते च साधारणः स्वस्थानाभिव्यक्तत्वात् गन्धस्पर्शज्ञानादीनां [illegible] यत्र गन्धः पृथिव्यां [illegible] आकाशे [illegible] आत्मनि, एकत्वादिसंख्यास्तु सर्वद्रव्यगता [illegible] एभिर्मूर्तैः पर्यायैर्युक्त स्वप्रव्याप्नवतीति भावः । [illegible] मूर्ता [illegible] द्रव्यत्वसामान्यधर्मेण चेति दर्शयति–भिन्नेति । एतदभिप्रायं स्पष्टयति–इतीति । इति [illegible] दर्शयति–इतिशब्दमिति । [illegible]
30 [illegible] दर्शयति–अयमेषेति । [illegible] दर्शयति–भेदप्रभेदसहिता इति । सम्भि

१ सि क. वर्णावभास । २ सि क. सम्भव इत्या । ३ सि क. स्वार्थे । ४ सि क. °निर्देशोऽर्थे [illegible] भिन्ना । ५ सि क. अयं चैकशतीचक्रं चैवं च षड् ।

विधिविधिः, विधेर्विधिनियमः, विधेर्नियमः विधिनियम पञ्चमाय विधिनियमनियमविधिरिति षड्भेदो द्रव्यार्थिक उपवर्णितः, षडप्येते भेदा द्रव्यार्थिकस्यैवेत्यर्थः, एषु च षट्सु नयेषु पर्ययशब्दो भाववचनः, समन्तादूयनात् पर्यय, सर्वात्मना अयनात्, पर्यायशब्दः समन्तात्परिवचनः, समन्ताद्गमनपर्यायद्रव्यस्य पर्यायात्मना पर्यायः, द्रव्यस्य सर्वात्मना परितो गमनात् नयस्य विग्रहार्थः, षण्णामपि सामान्येनेष्ट द्रव्यं विशेषेण तु यथा दर्शनमेव विध्यादिषु प्रत्येक व्याख्यातस्वरूपभेदमनुगन्तव्यं सर्वगतिसामान्य 5 मतमस्मिन्, सर्वस्य सर्वात्मकत्वात्, एकस्य सर्वात्मकत्वात्, एकैकस्य सर्वात्मकत्वात् सर्वस्य चैकैकात्मकत्वात् सर्वगतिमेव यथादर्शनमाह द्रव्यस्तवनायसूत्रम्, तत्र व्याख्यातमेव यथादर्शनं द्रव्यप्राधान्यात्, पर्यायोपसर्जनादिहाप्ते पर्यायशब्दो व्याख्यात इति ।

द्रव्यार्थनयविकल्पाः समाप्ताः ॥

षडप्येतेति, नैगमसङ्ग्रहव्यवहारस्य द्रव्यार्थिकनयस्य विविधा विवक्षाभेदात् तत्तदेवैते संक्षेपेण षड्भेदा इत्यर्थः । सामान्यात् 10 षड्भेदानाचष्टे–तथाहि । द्रव्यप्राधान्येनैषु नयेषु पर्ययपर्यायशब्दयोरर्थमाह–एषु चेति पर्ययपर्यायशब्दयोरर्थमभिधाय सर्वार्थमाचष्टे–षण्णामपीति सर्वगतस्य सर्वप्रकारविरोधितद्व्यवहारस्य ... सामान्यविधौ यद्यपि विरोधो नास्त्येवेति विधिविधि व्यवहारैकदेशविषयत्वाद्विधेस्तन्निर्धारद्रव्यविषयत्वाद्व्याख्येया द्वितीयस्य मनुष्यत्वतया विधिः सर्वा-त्मकत्वेन विद्यमानोऽपि घटे पट तथाऽन्यथा च भवति एव विधिर्विधिनियम ... तद्भेद इति सर्वस्यैव सर्वात्मकत्वात् सर्वगतत्वद्रव्यविषयत्वाद्व्याख्येया तृतीयस्य पूर्वोक्तस्य ... निर्धारणो विधानात्मा विधिर्विधीयते नियम्यते 15 च न सर्वं एवात्मकं किन्तु सर्वं तदात्मकमिति गुणत्वाद्व्याख्येया चतुर्थस्य एकस्य प्रकृतिपुरुषस्य सर्वस्य द्रव्यात्मक-त्वाभावेऽपि सर्वं सर्वात्मकमिति विधिनियमस्तद्विषयस्य सर्वसर्वात्मकत्वात् ... पञ्चमस्य सर्वभेदेषु व्यापकत्वाद्व्याख्येया पञ्चमस्य ... सामान्याद्वा विधिनियमादिभि ... सर्वात्मैकत्वभावनाद्व्याख्येया षष्ठस्य द्रव्यादिषड्भावानां ... ततः तत्त्वमात्रे नयस्य नयत्व तथात्मा विधानात् विधिनियमविधिविषयत्वाद्व्याख्येया द्रव्यार्थमेति भावः । तत्र 20 सत्स्वन्यमतेषु द्रव्यप्राधान्यार्थत्वं तत्तद्विभागानुरूपं व्याख्यातमेव द्रव्यप्राधान्यात्, न तु पर्यायप्राधान्ये तथा उपसर्जनत्वात्, न तत्सम्मतत्वात् सम्मतत्वानुपलम्भत्वादेव भेद एव नयो व्याख्यात इत्याह–यथादर्शनमाहेति ।

इति विजयलब्धिसूरिविरचिते विषमपदविवेचने नयचक्रशास्त्रस्य
षष्ठो विधिनियमविधिनियमः समाप्तः ।
समाप्तश्च द्रव्यप्राधान्यमङ्गः ।

श्रीलब्धिसूरीश्वरजैनग्रन्थमाला

प्रकाशितग्रन्थसूची

★

प्रकाश्यमानग्रन्थसूची

*

अथवा तिष्ठतु तावत् स्वलक्षणमात्रविषयप्रत्यक्षत्वस्य प्रत्यक्षविधिविधानाभ्युपगमेन विरोध इति, इह तु चक्षुर्विज्ञानसमङ्गीत्येतदेव तु न घटते।

(अथवेति) अथवा तिष्ठतु तावत् प्रत्यक्षविषयत्वाभ्युपगमविरोध इति स्थितम्, यावदस्तु विदूरत्वेनागमेनाभ्युपगतेन प्रत्यक्षविषयत्वस्य विरोध इत्येवत्—इदमेवास्मिन् प्रकरणे चतुरार्थं
5 तच्चक्षुर्विज्ञानसमङ्गीत्यादि तदेव न घटत इति वाक्यार्थः। प्रत्यक्षस्य विधिः—प्रत्यक्षस्य लक्षणं, तस्य विधानं—व्याख्यानं सञ्चिताालम्बनाः पञ्चविज्ञानकाया इति, स एवाभ्युपगमः, प्रत्यक्षविधिविधानाभ्युपगमः, स्वलक्षणमात्रविषयप्रत्यक्षत्वमेव—स्वलक्षणमात्रं विषयो यस्य तत्स्वलक्षणमात्रविषयं, किं तत्? प्रत्यक्षं तस्य भावः स्वलक्षणमात्रविषयप्रत्यक्षत्वं तस्य प्रत्यक्षविधिविधानाभ्युपगमेन विरोधः समनन्तरमभ्योपपादितः स स्थित एव। चक्षुर्विज्ञानमित्येतदेव तु न घटते, तुशब्दो विशेषणे, किं विशि-
10 नष्टि? पूर्वस्मात् प्रत्यक्षवाक्याद् आगमवाक्यात् उत्तरत्वं विशिनष्टि, चक्षुषः चक्षुषि चक्षुषा वा विशिष्टं ज्ञानं विज्ञानमसाधारणविषयं तत्समङ्गि समन्वेतीति चक्षुर्विज्ञानसमङ्गी कः? सन्तानः, विज्ञानस्य तद्रूपं स्वगमनात् तद्द्वारेण तत्सन्तानोऽपि समङ्गीत्युच्यते तत्समङ्गिनो नीलविज्ञानं तदेव प्रत्यक्षं तस्य भावो नमिति इयं स्वलक्षणविषयमित्यादिवचनं तेन अभिमतोदाहरणमिदं तदिति प्रत्यक्षीकरणं प्रदर्शनम् यथा 'वृद्धिरादैजि' (पाणि० अ० १ पा० १ सू० १) सुपलक्षितस्यैव ज्ञापन इत्युदाहरणम्।

15 कथं पुनस्तन्न घटते? तत्र आह—

एवं ते सञ्चयस्य तद्ग्रहणे तदन्यस्यास्याद्रूपमात्रत्वात् सञ्चिताालम्बनकल्पनावैयर्थ्यम्।

एवं ते सञ्चयस्येत्यादि यावत्सञ्चिताालम्बनकल्पनावैयर्थ्यमिति, एवं ते त्वदुदाहरणस्येन्द्रियैर्गृह्यमाणो सञ्चयस्य रूपमात्रत्वात्, किं भवति? सञ्चिताालम्बनकल्पनावैयर्थ्यं स्यादित्यभिसम्बध्यते, रूपमात्रत्वं सञ्चयस्य कुतः? तद्ग्रहणे तदन्यस्यास्यात्, चक्षुर्हि यस्य प्रत्ययत्वं तदाकारमात्रमेव इदं यथा
20 शब्दग्रहे शब्दप्रत्यये शब्दमात्रमेव नातोऽन्योऽर्थ इष्टः, एवं सञ्चयग्रहे नीलरूपमात्रमेव ततः किं? सञ्चिताालम्बनकल्पनावैयर्थ्यम् सञ्चयाभावात् सञ्चयाभावो रूपमात्रत्वात् सञ्चिताालम्बनकल्पनावैयर्थ्यमेवोदाहरणमेव तु न घटते चक्षुर्विज्ञानसमङ्गीत्यादि।

अतस्मात्तत्वे संवृतिसत्त्वात्सञ्चयस्याऽरूपत्वं तत्रविषाणवदित्यचक्षुर्विषयो रूपम्, ततो

यस्य विज्ञप्तेर्न्यायतत्त्वज्ञानस्यत्वा चक्षुर्मात्रं प्रत्यक्षमिति एवं प्रमेयत्वमात्रस्वलक्षणवैषम्यमितरेतराभावस्यापि सम्यगिव
25 त्वद्वचनं न प्रत्यक्षमिति प्रमेयत्वं यावदर्थसन्निधेः मध्यस्थमधिकरणमेवाभिमतमिति विशेषम्। अथवा तिष्ठत्विति अभिधर्मोऽभ्युपगमेन यथाक्रमं कथमिदं इत्यत्र विरुद्धे स्वलक्षणविषयत्वे प्रत्यक्षस्यानुपलम्भमात्रे सञ्चिताालम्बनत्वाभ्युपगमनात् तथाप्येव विरोधो न व्याहित। स तिष्ठतु अस्माकं पौरुषेयत्वप्रसिद्धिवचनम् प्रत्यक्षत्वे चक्षुर्विज्ञानसमङ्गी नीलं विजानाति इत्युदाहरणमात्रं तु न घटत इतीति भावः। पूर्वस्मादिति प्रत्यक्षं प्रत्यक्षप्रमेयत्वमिदं लक्षणविषयमिति पूर्वोक्तवा-वयनादिकम्। अस्यायमर्थः—चक्षुर्विज्ञानस्यासाधारणत्वम्। विज्ञानमिति विज्ञानस्यासाधारणं लक्षणमेव समन्वेतीति
30 सन्तानद्वारेण सन्तानमपि समन्वेतीति सन्तानश्चक्षुर्विज्ञानसमङ्गी भवति। इदं तदिति इदं नीलविज्ञानं तत् चक्षुर्विज्ञानसमङ्गीति प्रत्यक्षमुदाहरणमिति भावः। अतस्मात्तत्त्वे स्वलक्षणमात्रत्वमनुपपन्नं स्वलक्षणमेव प्रत्यक्षस्य न संवृतिसत्त्वेन प्रत्य-क्षत्वमस्यास्त्वनभ्युपगमवत्त्वात् चक्षुर्विज्ञाने चक्षुः प्रत्युदाहरणात् तस्यापि संवृतिसत्त्वं चक्षुषा प्रत्यक्षं न स्यादिति भावः।

रूपसामान्यत्वादचक्षुरचक्षुः श्रोत्रवत्, यथासन्निवेशमेव परमाणुनीलरूपमिदं तथाप्यतीन्द्रियत्वाच्चक्षुर्विषयो रूपमित्युभयथापि रूपाग्राहित्वाद्दृष्टाविव चक्षुर्नैव चक्षुः स्यात् ।

अतन्मात्रत्वे संवृतिसत्त्वादित्यादि यावदुभयथापि रूपाग्राहित्वाद्दृष्टाविवत्, अथ मा भूदेष दोष इति न रूपमात्र समुदायः स एव च गुणवद् इतीष्यते ततः समुदायस्य संवृतिसत्त्वादरूपत्वं खरविषाणवत्, संवृतिसत्त्वञ्च प्रागुपपादितम्, अरूपत्वाच्च न चक्षुर्ग्राह्यः स्यात् समुदायो रूपादन्यत्वात् 5 शब्दवत् खपुष्पवच्च, ततः को दोष इति चेदुच्यते चक्षुर्नैव चक्षुः स्यात्, रूपसामान्यत्वात् घटवत् जिह्वात्वग्वदित्यादि, कथं रूपसामान्यकं चक्षुरिति दृष्टप्रसिद्धिविरुद्धमुच्यत इति चेत् तथैव दृष्टप्रसिद्धिविरोधावापादितौ मया, किं कारणं? उभयथा रूपाग्राहित्वात्तस्य, यदि समुदायत्वादप्यसमस्तरूप एवेत्युक्तत्वाच्चक्षुर्विषयो रूप ततो रूपसामान्यत्वादचक्षुरचक्षुः श्रोत्रवत्, यथासन्निवेशमेव परमाणुनीलरूपमिदं तथाप्यतीन्द्रियत्वादचक्षुर्विषयो रूपमतो रूपसामान्यत्वाच्च चक्षुर्न चक्षुः स्यादित्युक्तमिति सूक्त 10 मुभयथापि रूपसामान्यकं चक्षुरिति । एवं तावच्चक्षुर्विज्ञानसमवृत्तिरत्र चक्षुषोऽचक्षुष्ट्वाच्चक्षुर्ग्रहणमनर्थकम् ।

विज्ञानमप्यनर्थकमित्यत आह—

विज्ञानमपि न विज्ञानं स्यात्, अन्यथाऽर्थप्रतिपत्तेरलातचक्रादिविज्ञानवत्, न च चक्षुर्विज्ञानं समवृत्ति चक्षुर्विज्ञानस्य रूपादन्यत्रासम्भवात्, न वा तत्सन्तानोऽन्यत्र सम्भवति, समुदायापेक्षो व्यभिचारोऽस्त्यतो विशेष्यत इति चेन्न, न हि समुदायो रूपमरूपत्वाच्चक्षुर्विज्ञान 15 समवृत्त्यभावः । यदपि च तद्रूपं रूप्यत इति तद्विषये तदेकागमनं चक्षुर्विज्ञानस्येति, तदपि नास्ति, अविषयत्वादन्येन्द्रियविषयवत्, समुदायविषयमपि चक्षुर्विज्ञानस्य समञ्जनं न, संवृतिसत्त्वात् खपुष्पवत् ।

विज्ञानमपि न विज्ञानं स्यादित्यादि यावत् खपुष्पवदिति, विशेषेण ज्ञानं विज्ञानं तावद्भवदभिमतं यथार्थं युक्तं विज्ञानं न स्यात्, इतरथा कथमाचार्यभीमक्षवादी विज्ञानं न स्यादिति स्ववचनविरोधं 20 नापेक्षतिमानिव ब्रूयात् । किं कारणं पुनर्विज्ञानं तन्न स्यात्? अन्यथाऽर्थप्रतिपत्तेः, अरूपस्य समुदायस्य रूपत्वेन प्रतिपत्तेः, समुदायत्वेन वा रूपमात्रस्य प्रतिपत्तेः, को दृष्टान्तः? अलातचक्रविज्ञानवत्, यथोल्मुकाग्निरूपमात्रमेवं चक्रमिति प्रतिपद्यमानं न विज्ञानमेवं तदपि, भाविग्रहणात् स्थाणुपुरुषज्ञानवदि-

---

न च दूरस्य घटवतस्तलघटे चातीन्द्रियत्वेनापि चक्षुर्ग्राह्यत्वाऽनुपपत्तिरित्याह—यथासन्निवेशमेवेति । तथा च चक्षुर्नैव चक्षुः रूपसामान्यत्वात्, घटादिवत्, अतीन्द्रियत्वाच्च रूपं न चक्षुर्ग्राह्यमतीन्द्रियत्वात् अतीन्द्रियत्वं तत्त्वानामसमस्तत्वात्, तथा च 25 रूपं संवृतिसत्त्वात् खरविषाणवदित्याद्युपपादयामि । दृष्टप्रसिद्धीति, चक्षुषा हि रूपं दृश्यते तत्प्रकारे दृष्टविरोधः रूपग्राहकं चक्षुरिति प्रसिद्धं लोके तत्प्रकारे प्रसिद्धिविरोध इति रूपसामान्यकं चक्षुरिति न युक्तं वक्तुमिति भावः । भवदभिमतमिति अनेन विशेषणमुखेन विज्ञानं विज्ञानं न स्यादिति स्ववचनविरोधमसत्यो दूरीकृतोऽन्यथा यदि तद्विज्ञानं कथं तर्हि विज्ञानं न स्यात्, विज्ञानादित्वात्, यदि तत् विज्ञानं कथं तर्हि विज्ञानं न विज्ञानमित्युच्यते अनभिमतोपगमस्येति विरोधः स्यादिति भावः । भावेन—[illegible] वा [illegible] । युक्तमिति प्रमाणयुक्तमित्यर्थः । तेन तव प्रमाणव- 30 त्वात् विज्ञानं न भिन्नं [illegible] न विरोधः । तत्र विज्ञानत्वाभावे हेतुमाह—अन्यथाऽर्थप्रतिपत्तेरिति, अर्थस्य वस्तुतोऽरूपस्य समुदायस्य, अन्यथात्वेन प्रतिपत्तेर्ज्ञानात् यथा वस्तुतोऽचक्रस्य [illegible] रूपस्य चक्रत्वेन प्रतिपत्तेरिति भावः । यथेति यथा वस्तुतोऽग्निरूपमेवार्थं भ्रमन्तं [illegible] चक्रमिति प्रतिपद्यमानं न [illegible] ।

मादि । एवं तावच्चक्षुरिति विज्ञानमिति च द्वयं दूषितं, चक्षुर्विज्ञानसमङ्गीत्यत्र समङ्गित्वमपि दूषयि-तुकाम आह—न च चक्षुर्विज्ञानं समङ्गतीति, वद्वारेण पुरुषाख्यसन्तानैकगमनं समङ्गनं तदभिप्रेयं, कस्मात् समङ्गति ? चक्षुर्विज्ञानस्य रूपासम्बद्धासम्भवात्, न वा तत्सन्तानोऽन्यत्र सम्भवति, उक्तं हि "सति सम्भवे व्यभिचारे च विशेषणविशेष्यभाव" इति, तत्राचापेक्षो व्यभिचारोऽसम्भवो विशेष्यस्य इति चेत्तत्र, यस्मान्न सम्भवो रूपम्, अरूपत्वाच्चक्षुर्विज्ञानसङ्गत्वभावः । तस्मादेवं नीलरूपाव्यभिचारेण तदेकगमनात् समङ्गीत्युच्यते चक्षुर्विज्ञानमित्येतदयुक्तम्, तथाप्यतीन्द्रियत्वाच्चक्षुर्विज्ञानाविषय-त्वादरूपत्वम् । अभ्युपेत्यापि स्वमतेन यद्यपि च तद् रूपं रूप्यत इति रूपं चक्षुर्विज्ञानेन किन्तु रूप्यत इति, यद्यपि स विषयो यस्य तदद्वयम्, किं ? तदेकगमनं कस्य ? चक्षुर्विज्ञानस्य, तदपि नास्ति, कस्मात् ? अविषयत्वात्, अविषयत्वमतीन्द्रियत्वात् प्रस्तुतप्रसङ्गस्य, अन्येन्द्रियविषयवत्, यथा शब्दोऽन्येन्द्रियविषयश्चक्षुर्विज्ञानेन न समङ्ग्यते तथा तदपि रूपमिति । तस्मात्र समवायचक्षुर्विज्ञानसङ्ग-विशेषः क्वापीत्यत्र ब्रूमः, समवायविषयमपि चक्षुर्विज्ञानस्य समङ्गनं न, अस्तीति वर्तते, कस्मात्तत्त्वं ? संवृतिसत्त्वात्, खपुष्पवदिति, सङ्गमनाभावसाधर्म्येण दृष्टान्तः, एवं तावद्द्वयं चक्षुर्विज्ञानं समङ्गी-त्येतानि दूषितानि ।

इदानीं नीलं विजानातीति च दूष्यम्, तत्र नीलं पदार्थतो दूषितमेव विजानातीति च दूषित-मेव पदार्थतः रूपचक्षुर्विज्ञानानां संगतेन दूषितत्वात्, मा भूदक्षरज्ञानं दूषणशून्यमिति कृत्वा वाक्यार्थतोऽपि दूष्यते—

नीलविज्ञानसम्बन्धी न भवति तत्सन्तानः, तदाकारज्ञानोत्पत्तिहेत्वभावात्, अन्य-स्य शाक्यज्ञानवत् ।

(नीलेति) स आकारोऽस्तीति तदाकारं ज्ञानं नीलाकारं तज्ज्ञोत्पत्तितदाकारज्ञानोत्पत्तिः तस्या हेतुः सम्भवो नीलरूपं वा स्यात् अन्यदपि तत्र भवत्युक्तविधिनैव, तस्मात्तदाकारज्ञानोत्पत्ति-हेत्वभावात्, को दृष्टान्तः ? अन्यस्य शाक्यज्ञानवत्, यथाऽन्यस्य शाक्यानुभवज्ञानं तदाकारज्ञानो-त्पत्तिहेत्वभावान्नास्ति तथा नीलज्ञानसम्बन्धी न भवति तत्सन्तान इति । एवं नीलरूपतत्सम्बन्धो-रन्यतरविपक्षेऽप्ययं दोषो वाच्यः ।

न च चक्षुर्विज्ञानमिति चक्षुर्विज्ञाने लक्षणं समङ्गीति विज्ञानस्य सम्बन्धमात्रे पर्यायात्, तद्द्वारेण च समङ्गनमपि समङ्गतीति वक्तुं तद्युक्त इव इति चेत् समङ्गित्वस्य मार्गीयत्वं न हि चक्षुर्विज्ञानं एवं समङ्गनं पुरुषाख्यस्य नापि वैभाषि-कविज्ञानस्य चक्षुर्विज्ञानसमङ्गित्वमेवैतद्विशेषणविशेष्यभावोऽपीति चेत् न च सन्तोऽपि चक्षुर्विज्ञानमस्तीति तदात्मान समङ्गित्व-मिति वाच्यम्, तदात्मत्वादिति भावः । अव्यभिचारेण नीलरूपेण तद् चक्षुर्विज्ञानस्यैकगमनाच्चक्षुर्विज्ञानसमङ्गीत्युच्यते न व्यभिचारविचारे समङ्गित्वमित्याह—तस्मादेवमिति नीलरूपमपि न अरूपत्वादतीन्द्रियत्वेन चक्षुर्विज्ञानाविषयत्वादिति व्याप-यते—तथाप्यतीति । एवं स्वमतमभ्युपेत्याह—अभ्युपेत्यापीति । यथा वस्तुनि चक्षुर्विज्ञानस्य समङ्गनं भवेत् तथ तत्र-तेऽपि नास्तीति अन्यसमानाभावसाधर्म्येण खपुष्पदृष्टान्त उक्त इति न तु संवृतिसत्त्वसाधर्म्यात् खपुष्पे संवृतिसत्त्वस्याभाव-दृष्टान्तोऽस्ति—सङ्गमनाभावेति । पदार्थे चक्षुर्विज्ञानस्य खपुष्पवत्त्वम्, तथा तस्येन्द्रियैरन्योन्यं सन्निकर्षो नीलविज्ञानादि-पदार्थो विज्ञानस्योऽपि वाक्यार्थविषयत्वे दूषणं दूषणशून्यमिति नैवेदमित्यर्थेनेति तदपि दूषयितुमाह मा भूदिति । नीलसन्ताने न नीलविज्ञानसम्बन्धी नीलाकारज्ञानोत्पत्तिहेत्वभावात्, अन्यस्य शाक्यज्ञानवदिति प्रयोगः नीलसन्तान नीलरूपेण स्वरूपेण च तदाकारज्ञानोत्पत्तौ निमित्तभावस्य पूर्वमेवोक्तत्वादित्याशयेनाह—तदाकारज्ञानेति । एव

इदानीं प्रत्येकं त एव समुदिता इत्युभयैकविषयत्वे दोषं बहुक्रमः पक्षान्तरं ग्राहयति—

नीलस्य सञ्चयस्य प्रत्येकसमुदितकारणत्वाद्विज्ञानस्यैतीति चेन्न युगपज्ज्ञानासम्भवात्।

(नीलस्येति) साम्प्रतं त एव हि नीलपरमाणवः प्रत्येकं शिबिकोद्वाहन्यायेन समुदिताश्च कारणं न चैकैकः, न च समुदायस्तद्व्यतिरिक्तोऽस्तीत्युभयकारणत्वं ज्ञानस्य, तस्माज्ज्ञानोत्पत्तिहेतु-भावप्रसिद्धिरित्येतन्न, युगपज्ज्ञानासंभवात्, द्वयोरर्थयोर्युगपदेव ज्ञानाभावादेकैकस्मिन्नर्थे युगपज्ज्ञान-द्वयोरभावात्, अथवा यथोक्तम् "विजानाति न विज्ञानमेकमर्थद्वयं यथा। एकमर्थं विजानाति न विज्ञान-द्वयं तथा॥" इति। साम्प्रतं इत्येनानेकप्रवराभकार्यग्रहणवत् स्यादित्येतदयुक्तम्, ज्ञानस्य क्रिया-भेदभ्यात्, ज्ञानं च प्रत्यक्षमुच्यते कल्पनाया ज्ञानव्यभिचारात्, प्रत्यक्षं कल्पनापोढं यद् ज्ञानमर्थे रूपादाविति वचनादेव रूपरूपसमुदाययोर्नानात्वे दोषः।

यद्यपि स्यात्तयोरेकज्ञानत्वादेकज्ञेयत्वं दाहानुभववत्, तस्मिन्नितरेतरत्वे सर्वसर्वात्म-भावित्वा, समुदायानर्थान्तरत्वाद्रूपं समुदाय एव, समुदायस्वरूपवत्, समुदायो वा रूपमेव, रूपानर्थान्तरत्वात् रूपस्वरूपवत्, तस्मादैक्ये सति समवायग्रहणे हि प्रत्येकनीलग्रहणं स्यात्, एकनीलग्रहणेऽपि च सर्वनीलकेशपाशाग्रहणम्, एकनीलात्मकत्वात् समुदायस्य।

(यद्यपीति) यद्यपि स्यात्तयोरेकज्ञानत्वादेकज्ञेयत्वम्—एकं ज्ञानमनयोरित्येकज्ञाने, तयोरेकज्ञान-त्वादेक एव ज्ञेयस्तयोरिति एकज्ञेयत्वं, दाहानुभववत्, तस्मिन्नेकज्ञेयत्वे इतरेतरत्वे अन्योऽन्यात्मतापत्तौ सति सर्वसर्वात्मभावित्वा, कथं? समुदायानर्थान्तरत्वात्—रूपं समुदाय एव समुदायस्वरूपवत्, समु-दायो वा रूपमेव रूपानर्थान्तरत्वात्, रूपस्वरूपवत्, एवं रसादिघटादिरूपादिसमुदायान्तराभिमता-र्थानामनर्थान्तरत्वात् सर्वसर्वात्मकत्वभावित्वा, तस्मात्—सर्वपरमाणुनीलानां समुदायानर्थान्तरत्वादैक्ये सति समवायग्रहणे—युवतिकेशपाशसमुदाये गृह्यमाणे, भिन्नो यथार्थे, यस्मात्सर्वनीलैक्यं तस्मा-देकमेव नीलं रूपमेकदेशगतं गृह्येत, एकमेकं प्रति प्रत्येकं प्रत्येकैकनीलग्रहणं स्यात्, एकनीलग्रहण-मेऽपि च सर्वनीलकेशपाशग्रहणमेकनीलात्मकत्वात् समुदायस्य।

ततश्च यथात्र सम्प्रायात्सर्वनीलैकता तथा रूपादिपञ्चकस्यापि सम्प्रायादेकता गुण-

---

प्रत्येकं नीलाणव एव समुदिताः कारणं भवन्तीति तदाकारज्ञानोत्पत्तिर्यथावस्थाये हेतुरस्ति इत्याशङ्कते—साम्प्रतमिति। द्वयोरर्थयोरर्थैकेन ज्ञानेन ग्रहणासम्भवात्, एकैकस्मिन्नर्थे एकदा प्रत्येकसमुदायविषयविज्ञानद्वयस्य [illegible] च सम्भवतो नीलस्वार्थेनियतत्वात्, उभयत्र [illegible]—युगपदिति। एतदर्थविषयकथनायाह—विजानातीति [illegible] नेयम्। ज्ञानस्येति [illegible] अत्र नीलसमुदायतयोर्नानात्वे दोषमभिधाय तयोरेकज्ञानविषयत्वे [illegible] दोषं वक्तुमाह—यद्यपीति। तयोः—नीलतदवयवयोः। इतरे-तरत्वे [illegible] भावः। तथान्येऽपि दोषमाह—तस्मादैक्ये सतीति। [illegible] एकं ज्ञानमिति [illegible]। [illegible]—तस्मिन्निति। [illegible] एकैकमपि [illegible] नीलानि पृथक् पृथक् [illegible] इति। [illegible]—स्तम्येति। [illegible] नीलमेव [illegible]

त्वात् नीलैकस्वपत्, ततश्च गुणसन्द्रावद्रव्यत्वात् सर्वथा पृथिव्यादीनाम्, तेषामपि रूपादि परमार्थत्वादिति सर्वसर्वात्मकत्वं विशेषैकान्तवादिनोऽप्यविशेषैकान्तवादिन इव ।

(ततश्चेति) ततश्च यथाऽत्र सन्द्रावात्सर्वनीलत्वा—गुणसन्द्रावो द्रव्यं नार्थोन्तरं, तद्वत्र सर्वनीलगुणा एकतामापन्नास्तथा रूपादिपञ्चकस्यापि—रूपरसगन्धस्पर्शशब्दपञ्चकस्यापि सन्द्रावे

5 कथा, त्वामिति वर्तते, कस्मादेतो ? गुणत्वात् धर्मत्वादित्यर्थः, न हि वैशेषिकवद्रव्यगुणभेदोऽस्तीति कृत्वा दृष्टान्तो नीलैकस्वपत् यथा सर्वनीलानां गुणत्वाद्धर्मत्वादेकत्वं तथा रूपरसाद्येकत्वम्, ततश्च सन्द्रावस्थितौ गुणानां रूपाद्येकत्वे सति को दोषः ? उच्यते गुणसन्द्रावद्रव्यत्वात्—गुणानां संहतिमात्र मेव यस्माद्रव्यं तस्मात् सर्वथा पृथिव्यादीनां पृथिव्यप्तेजोवाय्वादीनाम्, एकत्वमिति वर्तते, किं कारणं ? तदेव रूपाद्येकत्वं कारणम्, तत आह—तेषामपि रूपादिपरमार्थत्वादिति, रूपादय एव पर

10 मार्थो गुणसन्द्रावद्रव्यत्वात्तेषामेवैकत्वमतः पृथिव्यप्तेजोवायुघटपटसरित्समुद्रादयोऽपि ततः सर्वस्य चैकत्व तदात्मकत्वादेकत्वं प्राप्तमिति, तदुपसंहरन्नाह—सर्वसर्वात्मकत्वमित्यतः साधूच्यते सर्वसर्वात्मकत्वादेव विशेषैकान्तवादिनोऽप्यविशेषैकान्तवादिन इवेति ।

अविशेषैकान्तवादिनमतिदेवे च विशेषैकान्तवादीति तद्याविख्यापनुराह—

गुणसन्द्रावात्मकद्रव्यत्वापादनाय तु सवयस्य सन्द्रावाविशेषो मायोपमः, सञ्चिता

15 नामसञ्चितानाञ्च प्रागनभ्युपगमात्, अपरस्पर्शत्वेनाभ्युपगतम्, आगम एवोक्तं हि वा 'सङ्घाता एव सङ्घातान् स्पृशन्ति सावयवत्वादि'ति, तत्र परस्पर्शनिरूपणे सर्वात्मस्पर्शना स्पर्शनयोर्दोषापादनेन निर्धारितं सङ्घाताः सङ्घातान् देशेन स्पृशन्ति तेषामेवेति, सोऽपि स्पर्शो न सवयवापाद्यते सम्भवति ।

गुणसन्द्रावात्मकद्रव्यत्वापादनाय स्थितत्वादि यावत् सवयवापाद्यते संभवतीति, तु-

20 कष्टो विशेषणार्थः किं विशिनष्टि ? रूपादीनामेकत्वापत्तेः माह पृथक्त्वरूपैर्वा सम्बादिनिरपेक्षापि वैराग्यशायारम्भाभ्युपगमवादिनामविशेषैकान्तवादिनां क्वाचित्सञ्चिताः सन्त्यपि रूपादय इति प्रक्रिया, विशेषैकान्तवादिनां तु सञ्चितत्वैक्यापत्तिरेव, पृथगसञ्चितरूपाद्यनभ्युपगमात् सर्वसर्वात्मकत्वापादितम् इति विशिनष्टि । व्याख्यातार्थसन्द्रावाविशेषो मायोपमः, सञ्चितत्वानभ्युपगमात् रूपादिपरमाणूनामिति मन्यावस्थानकत्वम्, कारणत्वमदर्शनार्थमाह—सञ्चितानामसञ्चितानां प्रागनभ्यु-

---

10 तत्पापेक्षा स्थितिमाह—यथाऽत्रेति । गुणसमुदायमात्रमेव द्रव्यं न तद्व्यतिरिक्तं धर्मिमूर्तं द्रव्यमस्ति तेन गुणत्वमित्यत्रे नीलत्व ध्यान—च दीप्ति । एवमेव पृथिव्यादीनामपि परस्परं [illegible] रूपादिसमुदायमात्रत्वात्सर्वसर्वात्मकत्वमिति विशेषवादिनोऽपीत्याह—गुणसन्द्रावेति । अविशेषवादिन विशेषवादिनोऽविशेषमाह—गुणसन्द्रावेति । अविशेषवादि- [illegible]—रूपादीनामिति । उच्यते हि [illegible] [illegible] पृथिव्यादिरूपाणि भवन्ति, तानि च भूतानि गुणसमुदायमात्रमेव तथा च कारणमुक्तम् [illegible]

20 मूलकीर्तं [illegible] विशेषैकान्तपक्षे [illegible] [illegible] भावः । व्याख्यातः [illegible] वस्तुतो [illegible] परमाणुरूपत्वं [illegible], [illegible]—व्याख्या तार्थेति । मायोपमत्वे हेतुमाह—सञ्चितानामिति । परस्परं परमाणूनां स्पर्शो न सम्भवति न हि च देशेन परमाणो निरवयवत्वात्, यदि सर्वात्मना एकपरमाणुरूपत्वात् [illegible] प्राप्तव्यः [illegible] [illegible] इति यदि च

पगमात्–प्रागसञ्चिताः परमाणूत्पादाः पश्चात् सञ्चितावस्थीभूता इति नाभ्युपगम्यते यस्मान्मामा-
सुमतीयैः, अचयसञ्चयरूपं भवद्भिरभ्युपगतमेवेति तदर्थोपदर्शनार्थमाह–आगम एवोक्तं हि वा, हि
शब्दो यस्मादर्थे, यस्मादुक्तं वः सिद्धान्ते, किमुक्तं ? संघाता एव संघातान् स्पृशन्ति सावयवत्वादित्युक्तम्,
किं परमाणवः परस्परं स्पृशन्ति ? स्पृशन्तोऽपि किं देशेन देशं स्पृशन्ति सर्वं वा संघाता वा संघा-
तान् स्पृशन्तो देशेन वा देशं सर्वं वा स्पृशन्तीति परप्रश्नोपक्रमः, तत्र परस्परानिरूपणे इत्यादि, सर्वा- 5
त्मस्पर्शनास्पर्शनयोर्दोषापादनेन निर्धारितं संघाताः संघातान् देशेन स्पृशन्ति देशमेवेति । यदि पर
माणुं स्पृशेद्देशाभावात् सर्वात्मना स्पृशेत् ततश्च तस्यैकदेशेन पिण्डोऽणुमात्रकः स्यात् प्रतिघातत्वहान-
श्चास्य स्यात्, तथा संघातोऽपीति सर्वात्मना स्पर्शाभावः, अस्पर्शनेऽपि च सप्रतिघत्वाभावः पर-
माणुषु ताऽविद्यमानः प्रतिघातः सिकतास्तिलवत्तैलं तत्संघातेऽपि न स्यात्, स च दृष्टः संघाते,
तस्मात्तत्स्पर्शनं परमाणूनां तत्संघाताभावश्च, तस्मात्संघाता एव संघातान् देशेन स्पृशन्ति, आदिमद 10
व्याहतिप्रतिबन्धाभावदोषश्चैषां स्यात्, तत एव संघाताभावादवस्थाभावः स्यादित्यादिदोषापत्तेरेव
सर्वं यथोपात्तः । सोऽपि च स्पर्शो न सञ्चयादृते सम्भवति कथञ्चिदिति साधूच्यते सञ्चयादिधर्मो
मायोपम इति ।

एष च नीलं विजानातीति वाक्यं संवदत्यर्थतः केनार्थेन कतमत् ? यदुक्तं नो तु
नीलमित्येतदेवैकं संवदति नान्यत् किञ्चित्, कदाचिदपि नीलपरमाण्वाकारनियतज्ञानो 15
त्पत्तिहेतुत्वाभावात्, समुदायस्य चानीलत्वात् ।

(एष चेति) एवं च नीलं विजानातीति वाक्यार्थोऽपि न घटत इत्युक्तम्, एतत्तु तस्मिन्नभि-
धर्मे प्रत्यक्षलक्षणोदाहरणवाक्यं संवदत्यर्थतः केनार्थेन कतमत् ? यदुक्तं नो तु नीलं विजानातीति तु
वर्तते, अनानीनाः प्रतिषेधे, नीलं न विजानातीति, एतदेवैकं संवदति नान्यत् किञ्चित्, किं कारणं ?
कदाचिदपि नीलपरमाण्वाकारनियतज्ञानोत्पत्तिहेतुत्वाभावात्, ये तावत् परमाणवो नीला उच्यन्ते 20
तेषां कदाचिदपि नीलाकारनियतस्य ज्ञानस्योत्पत्तौ हेतुत्वं न भूतं न भवति न भविष्यति चातीन्द्रिय
त्वात्तथोऽसौ त्वदभिमतचक्षुर्विज्ञानधर्मी न कदाचिन्नीलं विजानातीति युक्तिविरोधापत्तिकं वचः ।

यस्मात्ते अत एव च सञ्चयस्याभावात् परमाणुसञ्चयाद्युपगम्यमानोऽप्यर्थो बौद्धानां मायोपम इत्याशयेनाह–प्रागसञ्चिता
इति । सम्मत्यादिः सञ्चयो नाभ्युपगम्यते येन मायोपमत्वं प्रतिषिध्यमपदार्थमाह–आगम एवोक्तमिति । सहाना एवं-
विधमेव परमाणवो नियताः । यदि परमाणुमिति, दिग्भागभिन्नत्वमपरमाणोर्यदि परमाणुं सर्वात्मना स्पृशेत् तत्र 15
सहानवस्थापरिहतत्वादणुमात्र एव पिण्डः स्यात् तथा पिण्डस्य प्रतिघातत्वं न स्यात् परमाणोरप्रतिघत्वादिति भावः ।
अथ परमाणुं संघाते न स्पृशतीति यदि वस्तु परमम् प्रतिघाताभावप्रसङ्गेन यदि प्रत्येकं परमाणुष्वसतः प्रतिघातस्य
संघाते सम्भवः सिकतासु तैलमिवेत्याह–अस्पर्शनेऽपि चेति । तथा संघाताः संघातं न सर्वात्मना स्पृशन्ति संघातस्यैव
स्पर्शप्रतिघातानुसरणे एवं प्रतिबन्धाभावत्वेन तथा च इत्युभयैरपि दूषणानुपपत्तिरपेक्षिता स्पर्शसंघातस्यानवस्था
प्रसङ्गादिसम्पन्नताऽनुपपत्तिः स्यादतः संघाता एव संघातान् देशेन स्पृशन्तीति भावः । एवमस्य मायोपमत्वे नीलं 20
विज्ञानातीत्युदाहरणवाक्यं केनापि रूपेण समन्वयं न संवदतीत्याह–एष चेति एवमस्य मायोपमत्वे चेतर्थे । चक्षुर्विज्ञान-
समङ्गी नीलं न विजानाति इत्येतदेवैकं वक्तव्यं स्यादर्थतस्त्वयाह–यदुक्तमिति । अविरामे हेतुमाह–कदाचिदपीति
नीलपरमाण्वाकारनियतस्य ज्ञानस्योत्पत्तौ नीलपरमाणूनां चाक्षुषेऽपि हेतुत्वं न सम्भवत इति भावः । एवमस्य हेतुत्वं नैव

साम्प्रतं सञ्चयस्येन्द्रियविषयत्वात् नीलस्य [illegible] तस्य नीलं विज्ञानाति इत्येवमायुक्तं समुदायस्य प्रत्ये-
कस्मात्, यदि समुदाये संवृतिसति नीलत्वं स्यात् स्यादेवम्, न पुनरभावस्य नीलत्वाऽस्तीति न
विज्ञानाति नीलमित्येतदेवात्र सुभाषितमिति ।

साम्प्रतं न विज्ञानीयाभीलं यत्रैक परमाणुमतीन्द्रियं पश्यतीति ब्रूयात्, तत्समुदायं वा
5 खपुष्पस्थानीयमिति, किं तर्हि ? तानेव परमाणून् प्रत्येकं भिन्नान् संहतान् सर्वप्रत्ययवेद्यत्वात्
पश्यतीत्येवमायुक्तम्—

भेदवत्स्वाभिमतप्रत्यक्षसमुदायपरिग्रहेऽपि न नीलं विज्ञानाति, तेषामितरेतरनीलत्वे-
नानीलत्वात्, आत्माकाराद्विना अतद्रूपत्वात् परमार्थसन्नीलपरमाणुरेव ।

भेदवत्स्वाभिमतेत्यादि, भेदा एव यस्य भेदवत्त्वं, तद्भावस्तत्त्वं, भेदवत्त्वमित्यभिमता,
10 प्रत्येकं त एव समुदायः, न समुदायमात्रमन्यम्, किं तर्हि ? भेदप्रधान एव समुदाय:–प्रत्येकसमु
दायः सन्, तत्परिग्रहेऽपि–भेदस्वरूपपरस्परविशिष्टसमुदायपरिग्रहेऽपि शिबिकोद्वाहकन्यायेन प्रत्येक-
मसामर्थ्येऽपि तत्प्रधानसमुदाये नीलज्ञानोत्पत्तिहेतुसामर्थ्यमस्तीत्येतस्मिन्नपि च पक्षे परिगृह्यमाणे
नीलाभावान्न नीलं विज्ञानाति, कस्मात् ? तेषामितरेतरनीलत्वेनानीलत्वात्, यानि नीलत्वानि हि प्रतिपर
माणु भिन्नानि स्वात्मपरमाणुवोऽन्यत्र न वर्तन्ते, स्वरसोत्पत्तिभङ्गत्वस्वात्मसम्बन्धात् मानान्यम्,
15 तस्मादितरस्य नीलत्वमितरत्र नास्ति, किं कारणं ? अतद्रूपत्वात्, यदेव रूपं तद्रूपं न तद्रूपमतद्रूपं
तद्भावोऽतद्रूपत्वं तस्मादतद्रूपत्वात्, न हि तन्नीलमितरस्य नीलरूपं भवति, यदि भवेत्तदेव तस्मात् तद्रूप
त्वात् तद्वत्, न तु भवति । अथवा तत् रूपमस्य तद्रूपं, न तद्रूपम् अतत्स्वरूपमित्यतद्रूपम् । केन रूपेण ?
आत्माकाराद्विना, न हि तन्नीलमितरनीलरूपं आत्म नीलत्वलक्षणया सामान्यभूतया, आकारेण वा
संस्थानविशेषेण वृत्तपरिमण्डलाद्विना । जातिरूपेणाकाररूपेण वा तस्मादन्याकारयोर्नीलयोः पर-
20 माण्वोः तत्र तन्मतेन कथञ्चिदनुपपत्तेरतद्रूपत्वमन्येन नीलं नीलान्तररूपेण नास्ति तन्नीलमन्यदपि
तद्रूपेण नास्ति, जातिमत्त्वात् प्रथमस्य घटस्य द्वितीयघटस्य घटत्वं न भवति तद्वीतररूपं न भवतीति,
देशतोऽपि देशान्तरस्य देशान्तरस्य तत्त्वं न भवत्यतोऽनन्यत्वकरणानुपपत्तेरतद्रूपत्वम्, अनन्यकरण
नानुपपत्तिरनन्यत्वाद्रूपत्वात्स्वमिति परमार्थसन्नीलपरमाणुरेव ।

ते च परमाणवोऽन्यत्वमितरेतरव्यावृत्तासाधारणरूपाः कस्मात् ? द्रव्यसद्रूपत्वात्,

25 करोति–सञ्चयस्येति । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
30 [illegible]
[illegible]
[illegible]
[illegible]
[illegible] । द्रव्यसद्रूपत्वादिति

द्रव्यसतो ह्येतद्रूपं यदन्यनिरपेक्षविविक्तस्वरूपत्वम्, तत्र यथा तद्रसरूपेण गन्धरूपेण वा नास्ति द्रव्यसद्रूपत्वात्तथा नीलस्वरूपेणापि नास्ति तदपि च द्रव्यसद्रूपमाप्याद्यभावे रूपा-भावचन्नीलान्तररूपाभाववद्वा तदभावेऽपि न भवत्येव । नीलस्वशून्यत्वाद्वा नीलान्तरनील-वत्तदपि परनीलं तद्वदनीलमतः कतरत्तन्नीलं स्याद्यद्विज्ञायेत चक्षुषा चक्षुर्विज्ञानसमङ्गि-नेति न नीलं विजानाति चक्षुर्विज्ञानसमङ्गी । 5

(ते चेति) अनन्यत्वकरस्य आत्मादेरभावादेव वा रूपमिति वा रस इति वाऽभ्यन्तविभाना परमाणूनामनेकेन द्रव्यसतो महणाभावान्न नीलं विजानाति । इतरेतराभावपरमार्थत्वाद्योऽन्यापेक्षैव न नीलं नीलान्तरमादि, रूपरसादिवदन्यरूपमिति न नीलं विजानातीत्येतदेव संपद्यतीति सूक्तमिति ।

अत एव चक्षुर्विज्ञानसमङ्गी सञ्चिताऽलम्बन इत्यादिप्रत्ययविधेर्वाक्यस्यार्थोऽयमापद्यते नो तु नीलमिति, तस्य सञ्चयस्यासतश्चक्षुषा ग्रहणात् नो तु नीलमेवं भवति परमार्थसत्प- 10 रमाणुनीलत्वात्,

अत एवेत्यादि, अथ इमनन्तरनिर्दिष्टनीलार्थचक्षुर्विज्ञानसमङ्गनाभावात्, एवेत्यवधारणे वक्ष्यमाणवाक्यार्थोपपत्तिः, प्रत्ययविधेः—प्रमाणजन्मनो विधायकस्य वाक्यस्यार्थोऽयमापद्यते नो तु नीलमितीति, अत्रेतिशब्दस्य प्रकारार्थवाचित्वादेव प्रकारो वाक्यार्थ आपद्यत इति, कतमस्य वाक्य स्येति स्फुटीकरणार्थं प्रस्तुतमेव प्रत्ययजन्मप्रयोगोदाहरणवाक्यं प्रस्तुतार्थं प्रदर्शयति चक्षुर्विज्ञानमेत्यादि, 15 तदेवं चक्षुर्विज्ञानसमङ्गी सञ्चितालम्बनः पूर्वोक्तः सन्तानः, चक्षुर्विज्ञानसमङ्गी सञ्चितमालम्बनम स्येति सञ्चितालम्बनः, स तावत् संवृतिसत्त्वं नीलं रूपं विज्ञानमसद्वस्तु नीलमिमिव जानाति न सत् किञ्चिद्विषयमर्थो जायते, किं कारणं ? तस्य नीलस्य सञ्चयस्यासतश्चक्षुषा चक्षुरिन्द्रियेण ग्रहणात्, नो तु नीलमेव भवति—एवंप्रकारमतद्रूप नीलं न भवति, तदेव हि तन्नीलं न जानाति परमार्थ सत् । किं कारणं तन्नीलं न भवतीति चेत् ? परमार्थसत्परमाणुनीलत्वात्—परमार्थसन्तो हि परमाणव 20 एव नीलाः, न सञ्चयस्तस्मान्न नीलं विजानाति चक्षुर्विज्ञानसमङ्गीति ।

भावना त्वस्यानर्थेऽर्थसंज्ञी न च कदाचित्कश्चिदप्यर्थे धर्मसंज्ञीति, अनर्थे—संवृति सति समुदाये द्रव्यसन्नीलसंज्ञी, न त्वर्थेऽर्थसंज्ञी, न त्वर्थ एव—द्रव्यसति परमाणुनील पदार्थसंज्ञी भवति तस्यातीन्द्रियत्वात् । यद्येवमर्थे धर्मसंज्ञी भवतु, नेत्युच्यते न च कदाचित् कश्चिदप्यर्थे धर्मसंज्ञी, अतीन्द्रियत्वादस्यन्तं सर्वकालं परमाणुनीलादेरग्राह्यत्वात्, ततोऽर्था 25 देतदप्यात्मममर्थ एव धर्मसंज्ञीति, अनर्थ एव—असति नामादिधर्मसंज्ञापि, सञ्चयस्य नामा-

---

इत्येव—परमार्थेनाप्रतिसेधमारोपितेनास्तीति इत्यत्र न पुनर्वं चक्षुराद्यपि विनाशाभ्यां स्कन्धस्कन्ध प्रतिमार्य करोति स एव अनववियोऽन्यनिरपेक्षविविक्तस्य निरूपविज्ञानेनास्तीत्यनोऽर्थः तद्विनाशविनाशाभ्यां स्कन्धैकस्कन्धेन इत्यनतिमार्यं न भिद्यते, अपरोपमादरूपत्वात् तदि तत्तनीलप्रकारमतयमामान्यत्वं कालकालान्तराकारमिति नीलत्वम् । वस्तुतिस्तत्साधनं रूपमिति वा रस इति वा नीलमिति च प्रत्यं न लभ्यते अनन्यत्वकरादेरभावाद्भ्यन्त- 30 भावाद्यात्मपरमार्थत्वाद्वा नीलं न विज्ञायतीत्येव अन्यनिमित्त—अनन्यत्वकरत्येवमादिना । परस्परान्येनैवेति तत्र यथा तद् रसस्येवमादिरूपेणान्यथेवेत्यर्थः । अवान्तरेति, पूर्वप्रवर्तितानुसारेण नीलार्थस्य चक्षुषो विज्ञानस

दीनाञ्च कल्पनात्मकत्वादनर्थे—घटादिकल्पनात्मके समुदायेऽनर्थकल्पनात्मकत्वादिधर्मसंज्ञी, कल्पनापोढासम्भवात्, तस्मादयुक्तैषा भावना पठते।

भावना त्वस्येत्यादि, तत्त्वोपपत्तिक्रमेण त्वयुक्ता भावना न धर्मेऽर्थसंज्ञी न त्वर्थे धर्मसंज्ञीति, कथं तर्हि पठत इत्याह—भावना त्वनात्मर्थेऽर्थसंज्ञी न च कदाचित् कश्चिदर्थे धर्मसंज्ञीति, तत्रा-
5 चष्टे—अनर्थे—संवृतिसति समुदाये, अनर्थो हि संवृतिसत्त्वात्समुदायः, तदभावे तु तद्बुद्ध्यभावात्। यथो-क्तम्—'भेदे यस्य न तद्बुद्धि'रिति श्लोकः। पञ्चवादित्विति तन्मतेनैव तस्मिन्नालम्बने समुदाये द्रव्य सत्त्वोऽर्थसंज्ञी—परमार्थसत्परमाणुमात्रसंज्ञी, तेषामेवार्थत्वात्। अनर्थेऽर्थसंज्ञीत्येवमसम्भावनापाठ्यकर्मा-सितमेवत्वम्भवे न त्वर्थेऽर्थसंज्ञीति, तत्राचष्टे—न त्वर्थे एव द्रव्यसति परमाणुमात्र एवार्थे संज्ञी भवति, कस्मात्? तस्यार्थस्यातीन्द्रियत्वादित्येवत्कारणं पुष्कलमपञ्चभिन्नकल्पितभावनाविषय इति दर्शयति।
10 यथोक्तमर्थे धर्मसंज्ञी भवतु, नैतदुच्यते, न च कदाचित् कश्चिदर्थे धर्मसंज्ञी कदाचिदिति समुदायसंके-तेन्द्रियविषयत्वात्प्रत्यक्षकाले वा इतरकाले वा न धर्मसंज्ञाऽर्थे भवितुमर्हति, अथवा प्रत्यक्षकालेऽनु-मानकाले वा किं कारणम्? अतीन्द्रियत्वात्, असम्बन्धे सर्वकाले कदाचिदिति व्याख्यातम्। अथा-पत्त्यात् कस्य? परमाणुमात्रस्य, ततोऽर्थैरित्यव्यापकमनर्थ एव धर्मसंज्ञीति। तत्राचष्टे—अनर्थे यथा सति नामादिधर्मसंज्ञापि, किं कारणं? तत्रासत्त्व नामादीनाञ्च कल्पनात्मकत्वादनर्थे नामकल्पनात्मके
15 समुदायेऽनर्थकल्पनात्मकत्वादिधर्मसंज्ञी, कस्मात्? कल्पनापोढासम्भवात्, समुदाये समुदायाख्य-नामादिषु वा नामजात्यादियोजना च कल्पना तदपोढस्य ज्ञानस्य कल्पितसमुदायजात्यादिविषयस्य न सम्भवत्येव, तस्मादयुक्तैषा भावना पठते।

✓अथवा त्वदीयैरेवाक्षरैरेषोऽर्थो भाव्यते अर्थेऽर्थसंज्ञी न, अर्थे—नीलादौ परमार्थसत्यर्थ-संज्ञी न भवत्यतीन्द्रियत्वात्तस्य, तुशब्दो विशेषणे, अर्थे धर्मसंज्ञी नेति वर्तते यथापूर्वं
20 यथार्थसंज्ञी न भवतीति स कुतोऽर्थे धर्मसंज्ञी भवतीति विशेषस्तुशब्दात्, अर्थापत्त्या पूर्व

[illegible] । तत्रार्थे संवृतिसन्तमिति । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] न त्वर्थे [illegible] [illegible] न हि—न हि [illegible] इत्याह—तत्त्वोपपत्तिक्रमेणैवेति । अनर्थे संवृतिसतीति परमाणु[illegible] [illegible] एव परमार्थ[illegible] भवति न तु [illegible] परमार्थमिति भावः । पञ्चवादित्विति [illegible]
25 [illegible] [illegible] परमार्थं [illegible] [illegible], [illegible] [illegible] [illegible] इति [illegible] [illegible] भावः । न च कदाचिदिति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] न त्वर्थे
30 [illegible] न च कदाचिदर्थे धर्मसंज्ञीति भावना [illegible] [illegible] [illegible] न त्वर्थे [illegible] [illegible] इत्याह—अथ चेति । [illegible] [illegible] [illegible] इत्याह—अर्थापत्त्येति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

यदर्थेऽर्थसंज्ञी तस्मिन्नेव च धर्मसंज्ञीति, ततः किं जातं ? शून्यशून्यमप्युपादानपदसन्निधिप्रयुक्तं दोषजातया अपि तस्याः कल्पनायाः, ततश्च निर्मूलकल्पनामात्रसत्यत्वाल्लौकिककटकसलिला-दिवीजमृगतृष्णिकादिकल्पनाभ्योऽपि पापीयसी प्रत्यक्षानुमानकल्पने युष्मदीये ।

(अन्यथेति) यथा शून्यस्य शून्येन गुणितं जातं शून्यमेवेति, यथा गणकानां कश्चित्कल्पनमस द्विपस शिष्यमतिपरिकर्मार्थं तदेतन्मतद्विपयम्, तदाभासोद्विपयत्वाभिमूलकल्पनामात्रसमता—निर्बीजा 5 चतुरापकल्पना तद्धर्मकल्पना च, निर्मूले द्वे अपि कल्पने, ते प्रमाणमस्य तस्मात्, तस्मात्त्रमेव सर्वं नान्यत्किञ्चित् सर्वं मनःकल्पितं मन्महे, तस्मान्निर्मूलकल्पनामात्रसत्यत्वाल्लौकिककटकसलिलादिवीजमृग-तृष्णिकादिकल्पनाभ्योऽपि पापीयसी प्रत्यक्षानुमानकल्पने युष्मदीये ।

यथाप्यभिहितमभिधर्मकोशे यत्रानेकप्रकारभिन्न इत्यादि यावदनेकवर्णसंस्थानं पश्यत इति बुद्धवचनं प्रत्यक्षलक्षणानुपपत्तिगतं चक्षुर्विज्ञानसमङ्गिनीलविज्ञानोदाहरणसंभाव 10 नवात्स्ययथोपपद्यत एवेत्युपपादयिष्यन् न पश्यतीव पुनर्बुद्धवचनं न प्रमाणमिति ।

(यथेति) अभिधर्मकोशे निदर्शितं तद्विचार्यम्, तत्रानेकः प्रकारः प्रकृष्टः कारः, कोऽसौ ? अन्योऽन्यानुत्पत्तम्, केन प्रकारेण भिन्नं रूपायतनं ? नीलपीतादिप्रकारभिन्नं तत्र तस्मिन् रूपायतने नैकप्रकारभिन्ने कदाचिदेकेन द्रव्येण चक्षुर्विज्ञानमुत्पाद्यते, कदा पुनरेकेन द्रव्येणोत्पाद्यते ? यदा नील-पीतप्रकारव्यवच्छेदो भवति, नीलमेवेदं न पीतादि, पीतमेवेदं न नीलादीत्येकप्रकारव्यवच्छेदो यदा 15 भवति तदा चक्षुर्विज्ञानमेकेन द्रव्येणोत्पाद्यते । कदाचिदनेकेन, कदा पुनरनेकेन ? यदा तत्प्रकारव्यव-च्छेदो न भवति, नीलादिप्रकारव्यवच्छेदो यदा न भवति तदा चक्षुर्विज्ञानमनेकेन द्रव्येणोत्पाद्यते । अभिधर्मे उदाहरणमप्याह—दूरान्मणिसमूहमित्यादि, विप्रकृष्टदेशस्थितं मणीनां समूहमनेकवर्णसंस्थानं अनेकेन वर्णेन संस्थानं—व्यवस्थानमस्य तमनेकवर्णसंस्थानं पश्यतः अनेकवर्णमनेकसंस्थानञ्च पश्यत इति वा यो नीलपीताद्यनेकवर्णो वृत्तव्यस्राद्यनेकसंस्थानो मर्कतेन्द्रनीलमरकतसस्यकपुष्परागपद्मराग- 20 स्फटिकादिमणिसमूहोऽनेकप्रकारभिन्नः तं पश्यतः पुरुषस्य दूरान्न व्यवच्छेदो भवति, आरात्तु व्यव-च्छेदो भवति यदयमिन्द्रनीलो वज्रादीनामन्यतमो वेति ।

तत्र कल्पनापोढस्वलक्षणविषयप्रत्यक्षलक्षणचोद्योपक्रमप्रसङ्गेन यदाहेदं सन्निताक-

---

वचनं इत्याह—तत। किं जातमिति । यत्कृष्णिकाविकल्पात् किञ्चिन्मूलमपि साधारणधर्मसंभावन· अत्र तु न किञ्चिदिति तेभ्योऽपि पापीयस्त्वमिति भावः । अनेकप्रकारभिन्न इति, अनेकप्रकारभिन्ने रूपायतने तत्र कदाचिदेकेन 25 द्रव्येण चक्षुर्विज्ञानमुत्पद्यते कदाचिदनेकेन यथा दूरान्मणिसमूहमनेकवर्णसंस्थानं पश्यतो न व्यवच्छेदो भवत्यारात्तु भवति इत्यभिधर्मकोशे निदर्शितमिति ज्ञायते वचनमिदं प्रत्यक्षलक्षणानुपयोग्यत एतदपि न प्रमाणम्, अनेकप्रकारभिन्नरूपायतनं पश्यतो चक्षुर्विज्ञानं भवति तस्मात्स्वलक्षणं न युक्तम् एवेति तर्कं कल्पनापोढत्वं तस्य कथं नैकद्रव्येण चक्षुर्विज्ञानं तस्मादेकमित्यवधिरिति चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमिति तद्बुद्धवचनं प्रमाणं स्यादिति भावः । अन्योऽन्यानुत्पत्तमिति । नीलादिपरमाणूनां परस्परमनुत्पत्त्या, तस्मात्के कस्यापि परमाणोः केनापि तुल्यत्वं नास्ति 30 तदपेक्षमिदमावेदयति । नीलादिप्रकारव्यवच्छेदः—नीलादिरूपेण [illegible] वस्तुनो निर्णय इत्यर्थः । अनेकेन वर्णेन संस्थानं व्यवस्थानमस्येति मुद्रणे नीलपीतादिरूपवस्तुनीयत्र [illegible] इति पुस्तकान्तरमाह—अनेकवर्णमिति । अन्यदीयं कल्पनापोढं प्रमाणमिति प्रत्यक्षलक्षणमाक्षेप्तुं कामयते यदाहेति

म्बनाः पञ्च विज्ञानकाया इति तत्कथम्? यदि तदेकतो न विकल्पयति, यथोक्तमनेकप्रकार भिन्नेष्वनेकद्रव्योत्पाद्यज्ञानेष्वेव कल्पनारहितत्वप्रसङ्गोऽस्वलक्षणविषयत्वमसङ्गतेति चोदिते तत्परिहारार्थमायतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणमिति कथं तत्कल्पना पेतमित्यन्यत्र विचारः करिष्यते। इदमेव तावद्विचारयामो युक्तवचनं कदाचिदेकेन द्रव्येण
5 ज्ञानमुत्पाद्यते कदाचिदनेकेनेति। अत्रापि कथमनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायां तद्रूपायतनं पश्यतस्तदालम्बनत्वात्तस्य स्वलक्षणविषयं तद्युज्यते? तथा रूपविज्ञानकाय इति कथं? कथञ्च इति पश्यतः तस्यानेकप्रकारावच्छेदः? अविभागसमवस्थसमूहात्मकत्वात्, मणिसमूहप्रभानुविद्धवर्णसंस्थानवत्।

(तत्रेति) अत्रापि कथमनेकप्रकारभिन्नसामान्यवृत्तिरूपायतनतायां चायतत्वार्थंत इति वक्त-
10 व्यम्, कथं वक्तव्यमिति सम्बन्धः, अनेकप्रकारे भिन्ने सामान्ये वृत्तिरस्य रूपायतनस्य तदनेकप्रकार भिन्नसामान्यवृत्तिरूपायतनं तद्भावस्तद्रूपायतनता तस्यां सत्यामनेकप्रकारभिन्नसामान्यवृत्तिरूपा-यतनतायां तद्रूपायतनं पश्यतः, समूहात्मकं तदालम्बनत्वात्तस्य, चक्षुर्विज्ञानस्य तद्विषयत्वात्, सामा-न्यायतनसमूहरूपायतनविषयत्वात्, कथं स्वलक्षणविषयं तद्युज्यते? तथा सर्वरूपाविपञ्चविज्ञानकायाः, रूपायतनतद्विज्ञानयोरुदाहरणमात्रत्वात्, कथं स्वलक्षणविषयाः पञ्चविज्ञानकायाः पञ्चस्त इति वक्त-
15 व्योऽत्र समाप्तिः। आयतनस्य सामान्यरूपत्वान्न स्वलक्षणत्वेनार्थः, कथञ्चेत्यादि, तस्यानेकप्रकाराव-च्छेद इति, कथमिति हेतुपरिप्रश्ने, चशब्दो दोषसमुच्चये। केन हेतुना तस्यानेकप्रकारसामान्यवृत्ति-रूपायतनतायाम्, इतिशब्दः प्रकारवाची इत्थं नानारूपविरूपायतनं पश्यतः सविकल्पकतायामवि-भागसमवस्थसमूहात्मकत्वात्—अविभागेन—ऐक्यरूपतया समवस्था यस्य समूहस्य सोऽयमविभागसम-वस्थसमूहस्तदात्मकत्वाद्रूपायतनस्य कथमनेकप्रकारावच्छेदः न भवितुमर्हतीत्यर्थः। किमिव? मणि-
20 समूहप्रभानुविद्धवर्णसंस्थानवत्, यथा नानावर्णानां मणीनां समूहे तत्प्रभयानुविद्धे वर्णसंस्थाने ना-नेकप्रकारावच्छेदः तथैकद्रव्यावच्छेदाभाव इति।

एकद्रव्येणेति एकस्मिन् द्रव्ये न चक्षुर्विज्ञानस्यानेकत्वमित्यतः, अनेकप्रकाराल्पवती न [illegible] तस्य [illegible] पञ्चात्मकस्य विज्ञानस्य [illegible] न स्यादिति द्वौ द्वौ स्तोऽपि भावः। [illegible] स्वलक्षणस्पर्शं [illegible] द्रव्यलक्षणमित्युक्ते कल्पनारहितं कथं स्वविषयं विज्ञानं स्यादिति येन [illegible]—तत्परिहारार्थमिति। [illegible]
25 [illegible] भावः। अनेकप्रकारेति [illegible] [illegible] भिन्ने सामान्ये [illegible] वृत्तिरस्य [illegible] रूपायतनं [illegible] चक्षुर्विज्ञानं कथं [illegible] स्यादिति भावः। [illegible] [illegible] न [illegible]—सर्वरूपाणीति। [illegible] [illegible] [illegible] [illegible] [illegible]—कथञ्चेति, [illegible]—[illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]—रूपायत-
30 नेति। अत एव रूपविज्ञानकाय [illegible] [illegible] इति [illegible]। आयतनस्येति [illegible] [illegible] न [illegible] एकत्र [illegible] इति भावः। [illegible] [illegible] [illegible] [illegible] एव [illegible] [illegible]—इत्थं नानारूपीति। [illegible]

किञ्चान्यत्—

एकस्य च द्रव्यस्य कदाचिदग्रहणादेकेन द्रव्येण कथं चक्षुर्विज्ञानमुत्पाद्यते ? तस्मात् किमेतद्गुरुवचनं गुरुवचनमिति चिन्त्यताम् । रसनानास्वादितरसाज्ञानवच्चक्षुषाऽगृहीतेषु चक्षुर्विज्ञानं नास्ति ।

(एकस्येति) एकस्य च द्रव्यस्य परमाणोः सर्वदाऽप्यतीन्द्रियस्य ग्रहणाभावादेकेन द्रव्येण कथं चक्षुर्विज्ञानमुत्पाद्यते ? न कदाचित् कथञ्चिदुत्पाद्यत इत्यर्थः । तस्मात् कदाचिदेकेन द्रव्येण ज्ञानमुत्पाद्यते यथा नीलादिप्रकारव्यवच्छेदो भवतीति किमेतद्गुरुवचनं गुरुवचनमिति चिन्त्यताम् । किमिति पुनरेकस्य द्रव्यस्य कदाचिदग्रहणाच्चक्षुर्विज्ञानं नोत्पाद्यत इति चेत्, उच्यते रसनानास्वादित-रसाज्ञानवत्—रसनेन्द्रियेणानास्वादिते यथा रसज्ञानं नोत्पद्यते एवं चक्षुषाऽगृहीतेषु चक्षुर्विज्ञानं नास्ति ।

यदि चास्य गुरुवचनस्य गुरुवचनत्वसिद्ध्यर्थमेकेन द्रव्येण ज्ञानमुत्पाद्यत इत्यभ्युपगम्यते ततः— 10

एकद्रव्यज्ञानोत्पादे तु सञ्चितालम्बनकल्पना निरर्थिकेति तदभ्युपगमविरोधः ।

(एकेति) यदा चैवं प्रत्येकं चक्षुर्विषयता अणूनामिष्यते तदेदमपरं गुरुवचनमगुरुवचनं निरर्थकञ्च जायते, कस्मात् ? सञ्चितालम्बनाः पञ्चविज्ञानकाया इति, एतस्य च सत्यत्वे तदसत्यता सिद्धेति परस्परतो वचनद्वयविषयोऽभ्युपगमविरोध इत्यत आह—तदभ्युपगमविरोधः ।

किञ्चान्यत्— 15

तत्प्रकारावच्छेदानवच्छेदानेकप्रकारभिन्नत्वमित्येतान्यपि ज्ञानानि न भवितुमर्हन्ति, रूपायतनस्य सञ्चितगतेरेव, नरसिंहवत् ।

तत्प्रकारावच्छेदेत्यादि यावत्सञ्चितगतेरेव, तत्प्रकारः, अवच्छेदः, अनवच्छेदः, अनेक-प्रकारभिन्नत्वमित्येतान्यपि ज्ञानानि न भवितुमर्हन्ति, कस्मात् ? रूपायतनस्य सञ्चितगतेरेव, सञ्चितमेव हि रूपायतनं, गम्यते वा सञ्चितमतो न प्रकार इति ज्ञानं घटते, प्रकृष्टः कारः प्रकारः, नीलं 20 पीत इत्यपसर्पाद्विविध इति परस्परतोऽत्यन्तभेदाभावे प्रकाराभावादभेदगतिः, सामान्येन तु प्रकार ज्ञानं घटते । तथाऽवच्छेदोऽप्यवयवारम्भस्य भेदाभेदविकल्पनात्, तथाऽनवच्छेदः । अनेकेनानेकेन च प्रकारेण भिन्न इति भिन्नानामभेदगतिः, सञ्चितगतेरभेदगतेश्च न प्रकारविज्ञानान्यकल्पनात्मकानि

येन चैकेन द्रव्येण चक्षुर्विज्ञानमुत्पाद्य इत्यत आह—एकस्य चेति । किमेतदिति एतद्गुरुवचनं किं गुरुत्व तत्त्वेनाभ्युपगन्तुमर्हति नैवेति भावः । एकद्रव्येति, [illegible] चक्षुर्विज्ञानमुत्पद्यत इत्यभ्युपगम्यते पृथगण्वा- 25 लम्बनत्वे तर्हि सञ्चितालम्बनकल्पना निरर्था यदि च चक्षुर्विज्ञानस्य सञ्चितमेवालम्बनं यथार्थं तर्हि कदाचिदेकेन द्रव्येण चक्षु-र्विज्ञानमुत्पद्यत इत्ययथार्थम्, अथ वा यथार्थत्वे सञ्चितालम्बनाः पञ्च विज्ञानकाया इत्ययथार्थमिति वचनद्वयस्याभ्युपगमो विरुद्ध इति भावः । तत्प्रकारेति [illegible] प्रकारविज्ञानानि च [illegible] भवन्ति, नील-पीतादिविशेषपरमाण्वग्रहे कथं तत्प्रकारविज्ञानानि स्युः सञ्चितस्यैव भेदेन ग्रहणात्, अनेकप्रकारभिन्न[illegible] न [illegible] ग्रहणाभावात्, तथावच्छेदः [illegible] न पीतादिभेदं [illegible] एवं [illegible] न घटत 30 इति । [illegible] सञ्चितगतेरिति । तयोरिति, [illegible] नरसिंह इति च [illegible]

कल्पनाविषयाणि च भवितुमर्हन्ति, किमिव ? नरसिंहवत्, यथा नराकारोऽधोभागः, सिंहाका-
रः शिरोभागः, तदुभयाभेदग्रहेण नरसिंह इत्युच्यते, एवं भ्रमराविज्ञानान्यपि भिन्नेष्वभेदकल्पनयैव
स्युर्नान्यथेति । नरे सिंहे च नरसिंहमिति भिन्नयोरभेदग्रहणमात्रादुदाहरणत्वेति चेत्, समानयोरेवा-
भेदरूपत्वात् ।

५ नरसिंहानेकप्रकारगतिरपि हि नरत्वसिंहत्वसमाश्रययोः पूर्वं भेदेन दर्शनादभेदकल्पना-
सिद्धाऽभेदगतिरिति युक्ता, न तथा भ्रमरेषु सूक्ष्मेष्वणुषु, असञ्चितस्यादर्शनात् कुत
एव तत्सम्बन्धेऽपि सम्भाव्येत, एवं तावदेकेन ग्रन्थेनेत्ययुक्तम् ।

नरसिंहानेकप्रकारगतिरपि हीत्यादि, तयोर्हि नरोऽयं नरसिंह इति च भिन्नयोरपि
प्रकारगतिः, यस्मात् नरत्वसिंहत्वसमाश्रययोः पूर्व भेदेन दर्शनादभेदकल्पनासिद्धाऽभेदगतिरिति युक्त,
१० न तथा अभ्युपेतापि नरसिंहप्रकारगतिरेव च, असञ्चयेषु सूक्ष्मेष्वणुष्वितरापि, सञ्चिताश्रयाः
पञ्चविज्ञानकाया इति यदुक्तं त्वया तत्रिसमुदेयमुक्तं यतोऽनेकप्रकारभिन्नं रूपायतनं तत्र कदाचिदेकेन
ग्रन्थेन ज्ञानमुत्पादयत इति । चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु नीलमितिवदपि विस्तरेणमुक्तं
कदाचिदनेकेन यदा तत्सम्बन्धेऽपि न भवति तदा—अनेकसमुदयमेकवर्णसंस्थानं पश्यत इति नीलपी-
तादिभेदस्य युगपदुपलम्भाभ्युपगमे नीलैकरूपविज्ञानविरोधादित्यर्थं प्रसङ्गेन । प्रकृतमुच्यते—ग्रन्थस्य
१५ तेष्वणुषु नीलपीतादिप्रकारमात्रमेव नास्ति तत्संभवे, किं कारणं ? असञ्चितस्यादर्शनात्, असञ्चि-
तानामदर्शनमतीन्द्रियत्वादित्युक्तम् कुत एव तत्सम्बन्धेऽपि ? सति हि दर्शने तत्सम्बन्धेनाम
सम्बन्धेऽनेकप्रकारभिन्नस्वभावानि सम्भाव्येरन्, असति दर्शने दूरत एव तानि न स्युः । एवं तावदेकेन
ग्रन्थेनेत्ययुक्तम् ।

यदपि चोक्तमनेकेन ग्रन्थेन कदाचिज्ज्ञानमुत्पादयत इत्यस्मादनेकेनेति वचनात् तत्सा-
२० मेकग्रन्थवर्तित्वात् सामान्यता, सामान्यत्वादसत्कल्पनं तत्, तद्विषयाः पञ्चविज्ञानकाया
असत्कल्पनविषयत्वादनुमानवदाभासज्ञानवदप्रत्यक्षमप्रमाणं वा, दूरात्मपि समूहदर्शनवद्वा
न स्वलक्षणविषयाः प्रसक्ताः ।

(यदपीति) न च केवलमलक्षणविषयत्वेन दोषः, किं तर्हि ? एकविज्ञानमनेकविषयताऽपि
दूरदर्शनवदेवेति युक्तवचनासमञ्जसत्वप्रतिपादनप्रसङ्गेनैवमभ्युपगन्तव्यम् ।

२५ यदपि च युक्तेनोक्तं द्वयं प्रतीत्य चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानं मनः
प्रतीत्य धर्मांश्चोत्पद्यते मनोविज्ञानमिति तन्निरुच्यते,

नराकारसिंहाकारस्वभावयोर्भेदेन दर्शनम्, अनुगामस्वभावानां भेदेन कदाप्यदर्शनात् कथं तत्प्रकाराभिव्यक्तिरेव इति भावः । कदाचिदेकेनेति अनेन कवचिदप्यनुकल्पं परीक्षणम्, कदाचिदनेकेनेति अनेन नीलादिविज्ञानाभिप्रायाभिधायित्वेऽपि स्वभावनीलप्रकारत्वात् अनेकेषां नीलपीतादीनां युगपदुपलम्भे नीलेऽपि नीलैकरूपस्य विरोधात् इत्याशयः इति
३० भावः । पञ्चविज्ञानकाया इति असत्कल्पनाविषयसामान्यविषयत्वादनुमानं यथा न प्रत्यक्षं तथैवेदमपि अनुमानाभा-
सत्वादविषयत्वात्प्रमाणानि स्युः अन्यथा समूहदर्शनवत् स्वलक्षणविषया न भवेयुः । एकविज्ञानमिति एकस्मि-

यदपि च बुद्धेनोक्तं द्वयं प्रतीत्योत्पद्यते चाक्षुषं विज्ञानमिति, यदनेकेन द्रव्येण ज्ञानमुत्पाद्यते साक्षाद्बुद्धेनोक्तं यदपि च द्वयं प्रतीत्योत्पद्यते विज्ञानं इत्यभिसम्बन्धः, आध्यात्मिक-मायतनं बाह्यञ्च द्वयं प्रतीत्य विज्ञानस्योत्पत्तिर्भवति इत्युक्त्वा स्वयमेव पुनः प्रतिपृच्छ्य व्याकरोति, कतमद्द्वयं प्रतीत्य ? चक्षुः प्रतीत्य रूपाणि च प्रतीत्योत्पद्यते विज्ञानं चाक्षुषं गतार्थमेव तत् । द्वयपदात् विज्ञानमनुत्पद्यत इति पूर्वपक्षः, यथा चाह 'विज्ञानानि न विज्ञानमेकमर्थद्वयं यथा । पृथगर्थं 5 विज्ञानानि न विज्ञानद्वयं यथा' इति, अत्रोत्तरमाह—अत्रापि चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञा-नस्योत्पत्तिर्भवतीति द्वयी गतिः । बहुवचननिर्देशः समुदायापेक्षयाऽतीन्द्रियाणामपि रूपाणां व्यक्ति-पदार्थाश्रयः स्यात्, 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' (पा अ० १ पा २ सू० ५९) इति जातिपदार्थाश्रयो वा । तत्र यदि व्यक्त्यपेक्षो निर्देशः समुदायात्मतया ततोऽप्ययमेव संचितसामा-न्यालम्बनविषयाः पञ्चविज्ञानकाया न स्वलक्षणविषया इति दोषः, अथ द्रव्योक्तमेव जातीयाः 10 परमाणव एकरूपनिर्देशेन सर्वे निर्देष्टव्या इत्येकस्मिन् बहुवचनं तत इष्टाभ्युपगमविरोधः, अभ्युप गतं त्वयाऽतीन्द्रियाः परमाणव इति तेन विरोधः ।

अस्मिन्नभ्युपगमेऽप्यवश्यमनिष्टापादनमुच्यते—

गुरुत्वादेरपि चैन्द्रियकत्वमतीन्द्रियत्वाद्रूपवत्, रूपं वा न चक्षुर्ग्राह्यं स्यादतीन्द्रिय त्वाद्गुरुत्वादिवत्, नन्वतीन्द्रियत्वं चक्षुर्ग्राह्यत्वञ्च परस्परतो विरुध्येतेति तन्मा मंस्थाः, अय 15 प्रयोऽनिष्टापादनपरत्वात्, भवद्बुद्धिनिवर्तनफलत्वाच्चास्य प्रयोगस्येति । तथापि यद्यत्र विरोधः सम्भाव्येत स तुल्यः परमाण्वैन्द्रियकत्वेन ।

गुरुत्वादेरपि चैन्द्रियकत्वमतीन्द्रियत्वाद्रूपवदिति, गुरुत्वसुखदुःखेच्छाद्वेषप्रयत्नादयो धर्माधर्मा गुणाः सुगतपरिकल्पिताः, अतीन्द्रियत्वाद्रूपवत्, परमोऽणुः परमाणुः अणुशब्दः सूक्ष्मपर्यायः, परमसूक्ष्मरूपविषयवाची, स चातीन्द्रियत्वे पठते तस्यातीन्द्रियस्यैन्द्रियकत्व—चाक्षुषत्व यथाभिप्र-20 त्येऽपि गुरुत्वादेरैन्द्रियकत्वं तुल्यमिति समानदोषतया विरोधोद्भावनमस्तु को दोषः ।

किञ्चान्यत्—

चक्षुः प्रतीत्य रूपाणि च प्रतीत्य चक्षुर्विज्ञानमुत्पद्यत इति चातीन्द्रियत्वादनुमान विरोधः, तत्कंभावनापरस्वचनविरोधोऽपि ।

नन्वनेकविषयत्वं दोषः विज्ञानानि न विज्ञानमेकमर्थद्वयं यथेति भावः । द्वयपदादिति ... 25 ... इत्यर्थः । द्वयी गतिरिति रूपाणीति बहुवचन-निर्देशो द्विधा ... जात्यपेक्षया वेति भावः । तत्र व्यक्त्यपेक्षनिर्देशाङ्गीकारे विज्ञानानां संचितालम्बनत्वात् ... स्यात् । जात्यपेक्षनिर्देशाङ्गी-कारे ... परमाणोरतीन्द्रियत्वाभ्युपगमविरोध इत्याह—तत्र यदीति । अतीन्द्रियस्यापीन्द्रियकत्वे दोषमाह—गुरुत्वादेरपीति अतीन्द्रियत्वं चक्षुर्ग्राह्यत्वं विरुद्धम् । अतीन्द्रियत्वचक्षुर्ग्राह्यत्वयोर्विरुद्धत्वादेव भवतोऽनिष्टमा-30 पाद्यते मया ... इत्याह—भवत इति । ... परमाणौ ... इत्याह—भवद्बुद्धीति । तथापीति गुरुत्वादी-न्द्रियकत्वे यो विरोध उद्भाव्यते भवता स एव विरोधः परमाण्वैन्द्रियकत्वेन तुल्यो न ... कर्तुं शक्यत इति भावः ।

(चक्षुरिति) स्थूलानां सूक्ष्मपूर्वकत्वात् कार्यानुमानसिद्धाः परमाणवः, तस्माभिन्नाणुभेदत्वा तेषां चक्षुर्विषयत्वाभ्युपगमेन च तयोरनुमानविरोधिता । किञ्चान्यत्–एकभावग्रस्तत्ववचनविरोधोऽपि, एकस्य भावना तद्गुणकभावनात्, एवमेव च परमाणुरतीन्द्रियस्तथाऽभ्युपगमेऽनुमानविरोधभावमभ्युपेत्या तुल्यत्वादतीन्द्रियत्वाभिमतः परमाणुश्चक्षुर्विषयतामापादीति तुल्यः स्ववचनविरोधोऽपि ।

5 वादपरमेश्वरसंभवश्चैवम्,

(वादेति) एवञ्च सति एकान्तवादिनस्त्यागेऽप्यनेकान्तवादसमयः । वादाः सर्व एव लोके व्यवहर्तुं समर्थत्वाल्लोकेऽस्मिन्नेकान्ता अपि, तेषां तु सर्वेषामनेकान्तवादः परमेश्वरत्वादासर्वविद्मीष्टे, तेषां सार्वभौमनृपसमर्थानामपि परस्परविरोधदोषवदाश्रुदासीनमप्यनुपविक्तसंध्यादिषड्गुणन्यायमगुणाश्रयिणां विजिगीषूणां परार्थपक्षपक्षसंश्रयगुणाधारः परमेश्वरः साम्राट्, तत्संश्रयेणैव
10 अनुविद्धमात्रसंभवे परस्परकार्यविलोपात् सर्वं विनाशाय तेषाम् ।

लौकिको व्यवहारनय आह—

न च नयेन विरोधः, तस्य लोकनाथत्वात्, स हीनो विलुप्यमानस्य लोकतत्त्वस्य त्राता, सर्ववादभेदयथार्थानां लोकसंवादेनोपग्राहयित्वा पालनात् ।

(न चेति) लोको हि व्यवहारनयस्तथादर्शित्वेन तन्मतविलोकनाल्लोकस्य नाथ इति लोक-
15 नाथः साम्राट् कस्मात् ? स हि हीनः, यतो विलुप्यमानस्यैकान्तवादिभिर्लोकतत्त्वस्य—लोकसारस्य सम्यग्दर्शनरत्नस्य त्राता—त्रायतीत्यात्मधर्मो साधुत्रायकारी चेति, कथं त्रातेति चेत् ? सर्ववादभेदेनापि, लोकभूतानां सर्ववादानां भेदाः सर्ववादभेदाः भिन्नाभिन्नापेक्षभ्याः, तेषां यथार्थाः—यथार्थभावाः—स्वविषयसमर्थनभाविताः, तेषां लोकसंवादेनोपग्राहयित्वा परस्परसाम्यालापनेन पालनात् त्रातेत्युच्यते ।

20 इतर आह—

कथं संभव इति चेत् ? अनेकात्मककल्पायतनाभ्युपगमात् ।

(कथमिति) अस्तु वादपरमेश्वरत्वं लोकनाथत्वात् साम्राटस्य, लोकनाथत्वं परस्पराविरोधोपपादनेनैकीकरणाच्च तेषाम् । वादपरमेश्वरसमाश्रयः कथमेकान्तवादानामिष्टत्वोच्यते, अनेकात्मकरूपायतनाभ्युपगमात्, अनेक आत्मा यस्य तदिदमनेकात्मकं रूपायतनं यतोऽपेक्ष्य ग्रन्थेन कदाचि-

---

25 चक्षुः प्रतीत्येति परमाणुरस्य [illegible] चक्षुर्विषयत्वेन [illegible] परमाणूनां कार्यलिङ्गेन [illegible] इति भावः । एकभावग्रस्तत्वेति [illegible] परमाणोरतीन्द्रिय[illegible] अनुमानविरोध[illegible] परमाणुश्चक्षुर्विषय[illegible] स्ववचनविरोधोऽपि [illegible] भाव । तयोः—परमाणुचक्षुषोः । वादपरमेश्वरेति [illegible] ईश्वरः [illegible] परमेश्वर [illegible] ते हि वादा यद्यपि [illegible] समर्थास्तथापि परस्परं विरुद्धाः [illegible]
30 [illegible] विरोधेन [illegible] इति [illegible] भाव । तेन—[illegible] । अनेकात्मकेति [illegible]

स्वागमानुसारयति कदाचिदनेकेनेति तदुपपत्त्येकात्म्यवत्त्वेऽनात्म्यामिति तदभ्युपगमात् साधारणसमाश्रयः, साधारणैकदेशाश्च मया एकान्तवादाः, यथोक्तं—'भद्दं मिच्छादंसणसमूहमइयस्स अमयसारस्स। जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स' (संमतिः गा ५९) इति, नैताः स्वमनीषिकाः, एवम् अयमपि तथैव नयानां, उक्तं हि 'द्रव्यस्यानेकात्मकत्वेऽप्यतदात्मकैकान्तपरिग्रहो नयः', तदाश्रयाभ्युपगमार्थं नयनामपयः, स च मिथ्यादृष्टिरनेकाकारार्थस्य विपरीतप्रतिपत्तित्वात्, अनेकात्मकवस्तुप्रतिपत्ति 5 स्यात् साधारणस्य याथार्थ्यम्। कथं पुनर्लोकमूलेन व्यवहारनयेनैकान्तवादिनो निगृह्यन्त इति चेल्लोकमात्रसमाश्रितत्वात्तेषाम्, लोकमात्रसमाश्रय एव प्रतिपादितस्तदभ्युपगमः, स भिन्नत्वाननेकान्तवादिनामभ्युपगमसमकालमेवावसितो वाद इति।

अथ चैकरूपायतनाधारतया त्वयाप्यनेकान्तवादोऽभ्युपगत एव, तदाधारतया हि तत्रेत्यधिकरणवाचिप्रत्ययान्तेन तत्रशब्देनाव्यतिरेकं रूपायतनमेवोक्तं तस्यैवारूपरूपता पुन 10 र्दर्शिता, कदाचिदेकेन द्रव्येण कदाचिदनेकेन ज्ञानमुत्पाद्यते इति ब्रुवता। एवञ्च तस्यैकस्यैव कदाऽनेकता च त्वयैवोक्ता तथाऽविभक्तत्वेन ज्ञानोत्पत्तेः। दृश्यते हि तदेव रूपायतनं यस्य एकमनेकञ्च परमाणवस्तत्समूहश्चेति स्वलक्षणसामान्यविषयज्ञानोत्पत्तिः, एकहेतुत्वेऽपि भेदाभेदात्मकम्।

(अत्रेति) त्वयापि साधारणाभ्युपगतानेकात्मकस्यैकमनेकत्वानेकान्तवादोऽभ्युपगत एव, 15 यस्मादनेकप्रकारमिदं इत्यादि यावदनेकवर्णसंस्थान यस्येत इति, अत्र च वाक्ये एकमेव रूपायतनं ज्ञानाधारमभीष्टं यस्मात्तदाधारतया पुनस्तत्रेत्यधिकरणवाचिप्रत्ययान्तेन तत्रशब्देनानन्य दर्शितमेव रूपायतनमव्यतिरेकमभेदं तस्य वस्तुन आगूर्णोक्तम्, तस्यैवारूपरूपता पुनर्दर्शिता कदाचिदेकेन द्रव्येण कदाचिदनेकेन ज्ञानमुत्पद्यत इति ब्रुवता, रूपायतनस्यैवैकानेकत्वसंस्थानैर्व्यवस्थानमभ्युपगच्छता कथं तत्रतत्सामानाधिकरण्यमभावयितुं शक्यते यदि तदेकमनेकञ्च न 20 स्यात्, इतरथा तत्र च रूपायतनेऽन्यत्र चेति स्यान्न तु भवति, तथादेशाद्यात्, एवञ्चोक्तविधिना तस्य—त्वयैवोक्तस्य रूपायतनस्यैकस्यैव एकताऽनेकता चावश्यं वैयोव्य, कस्मात्? तथाऽ-

---

तथा तत्प्रत्ययेन दृश्यमुपगमात्। एवमनन्तवस्तुना मतेन सर्वे नयाः साधारणैकदेशा एवेत्याह—साधारणैकेति —अनार्थे पूर्वापर्यमनाश्रयाद्—भद्दं इति, मिथ्यादर्शनसमूहमयस्य तथाप्यमृतसारस्य संसारभयोद्विग्नैर्बोधिमिच्छुभिर्मिलत्वरे विमलत्वमाश्रमिः सुखेनावगम्यमानस्य भगवतोऽर्हतो वचनस्य कल्याणं भवत्विति यावत्। तथा अवसरसम्यक्त्वार्थे प्रमाण- 25 मेवाह—द्रव्यस्येति। यदि तथापि साधारणैकदेशत्वं कथं तद्वादिनो निगृह्यन्त इति चेत्साधारणमाश्रयन्तीत्याह—कथं पुनरिति। साधारणमेव तेषां प्रतिपादितवादाभ्युपगमं तदाश्रयस्य भिन्नत्वात्तदभ्युपगमे तु निगृहीत एवेति भावः। एकमेव रूपायतनमिति, बौद्धमते एकस्यैव रूपायतनस्य ज्ञानाधारतया तत्रेत्यधिकरणवाचिप्रत्ययान्तेन तत्र शब्देन स्वयमभेदाभिधान मन्यते, तथैकस्यानेकत्वेऽप्यनन्यत्वं रूपायतनस्य प्रदर्शनात् एवं तत्रशब्दप्रयोगमाश्रित्यैव अन्यतया दर्शितस्य रूपायतनस्य तदपि स्वायतनमेकानेकत्वसंस्थानैरेव स्यात् अन्यथा तत्रशब्देन सामानाधिकरण्यं न 30 स्यात् किन्तु तथैव स्वायतने बौद्धमतप्रसक्तेऽन्यत्वाद्वैयर्थ्य इति स्यात्र तु तथा भवतीति भावः। त्वयैव रूप तत्त्वस्यैकानेकत्वेऽपि दर्शयति—एवञ्चेति, तथा च चक्षुर्विज्ञानाधारं रूपायतनमेकानेकात्मकम् तथाऽविभक्तत्वेन ज्ञानोत्पत्तेः प्रत्यक्षविषयानेकसमुदायाख्यसमुदायज्ञानमिति प्रयोगः स्वलक्षणैकत्वं परमाणुतत्त्वमनेकत्वं रूपायतनस्य भेदेन,

विभज्यमानि, तेन प्रकारेण तथा, अविभक्तं तत्त्वं यस्य तदिदमविभक्ततत्त्वस्य तद्भावस्तत्त्वम्, एकानेक-
त्वाद्यविभक्तवस्तुतत्त्वं तेन तथाऽविभक्तत्वेन ज्ञानोत्पत्तेरिति हेतुः, कस्मिन् साध्ये ? तस्यैवैक-
मेकत्वाद्याम् । दृश्यते हि यदेव रूपाद्यवर्तं यदेव चैकमनेकञ्च परमाणुव्रातसमूहमेवेति ज्ञानोत्पत्तिः,
द्रव्याणामिसमूहमनेकवर्णसंस्थाने पश्यत द्रव्यस्वरूपमप्येकमेवैकमनेकरूपद्रव्यस्वरूपावगमस्ते साध्ये चक्षु-
5 र्विज्ञानाधारस्य वस्तुनः साधर्म्यदृष्टान्तत्वं भवते नैकान्तैकानेकरूपत्वे, तत्प्रमाणवचनेऽपोऽयं व्यापक्ते
स्यादेकं रूपाद्यवर्तं स्यादनेकं रूपाद्यवर्तमिति, कस्मात् ? भिन्नलक्षणत्वाभ्यां चैक्यपरिणामापेक्षस्य
सूक्ष्मत्वादेकम्, द्रव्यपर्यायत्वाज्ञानात् परमाणूनां स्वरूपभिन्नानां भेदादनेकम् । अत एव द्रव्यम्,
रूपादिगुणपर्यायपरिणामापेक्षं द्रव्यम्, प्रतिक्षणसाधारणरूपादिपरिणामापेक्षया स्वलक्षणविषयम्,
साधारणीभूतभेदसमूहापेक्ष चाक्षुषत्वादिपरिणामापेक्षः सामान्यविषयम्, यथोक्तं 'भेदसंघाताभ्यां
10 चाक्षुषाः' (तत्त्वार्थ० अ० ५ सू० २८) इति । तस्माद्युक्तमिति, तथाऽविभक्तत्वज्ञानोत्पत्तेर्भे-
दाभेदात्मकज्ञानोत्पत्तिदर्शनादपि वस्तु भेदाभेदात्मकमिति ।

इतर आह—

ननु कदाचिदन्यत्कालान्तरवचनाः, तस्मिन्नेव हि वस्तुनि कदाचित्कालान्तरे ज्ञान
मेकाकारमुत्पद्यते कदाचिदनेकाकारं ज्ञानस्यैवाकारवत्त्वात्तस्य, एककाल एवोभयरूपत्वात्,
15 स्यादेतत् तत्, परमाणुद्रव्यसमूहाभेदात्, स्यान्न तत् तत्, रूपादिपरिणामभेदात्, प्रत्यक्ष-
वेद्यविशिष्टार्थस्यादेकानेकात्मकं तद्वस्तु, अनेकवर्णमणिरूपवत्, एकपुरुषपितृपुत्रादिवद्वा ।

(मन्विस्यादि) नित्याकारणादवस्तुपक्षे । अत्रोच्यते तस्यैककाल एवोभयरूपत्वात्, एकस्मि
मेव हि काले नीलपरमाणुसमूहाकारज्ञानस्य भेदाभेदात्मकस्य दर्शनतो न सम्यगुक्तं कदाचित्का-
कालान्तरवचनमवस्थायैकाकारं कदाचित् कदाचिदनेकाकारं ज्ञानमुत्पद्यते तस्मिन्नेव वस्तुनीति, तस्यै-
20 ककाल एवोभयरूपत्वात्, स्यादेतत्,—तदेव तद्वस्तु, परमाणुद्रव्यसमूहाभेदात्, स्यान्न तदेव, रूपादि

अवस्थायाः रूपादवस्थाविशेषोत्पत्त्यर्थं नीलादिवस्तुनं सर्वं यथा परमाणुः समुदायो वा चाक्षुषेण ग्रहणेनोच्यते भिन्नाभि-
न्नवस्तुतत्त्वेन अत एव तज्ज्ञानं सम्यग्ज्ञानं तादात्म्यविषयमपि अत एव च भेदाभेदात्मकमनेकान्तविशेषादेकमेव एका-
नेकमपि वस्तु भेदाभेदात्मकं द्रव्यपर्यायात्मकमेकमनेकञ्च तथाऽविभक्तत्वेन ज्ञानोत्पत्तेरिति । तदेव रूपाद्यवर्तमिति
अविभक्तत्वस्य ज्ञानेन प्रत्यक्षिता । रूपादयस्तैक्यं कथमित्याह—भिन्नेति परमाणूनां परस्परं भिन्नलक्षणत्वेऽप्येक-
25 परिणामो चाक्षुष इति तदपेक्षया स्कन्धस्यैव प्रत्यक्षता तदपेक्षया चैकत्वं रूपस्यावयवसमुदायस्येति भावः । अनेकत्वे कथ-
मित्याह—द्रव्यार्थेति ऐक्यपरिणामरूपद्रव्यार्थं प्रति सर्वथा परमाणूनां द्रव्यार्थत्वेनाऽभेदेऽपि प्रतिपरमाणु स्वरूपभेदात्
पेक्षयाऽनेकत्वमिति भावः । अत एवेति रूपादिगुणपर्यायं प्रति परमाणूनां द्रव्यार्थत्वेनाभेदात्मकत्वेनैकत्वं । तेषामेव परमा-
णूनां रूपादिगुणात्मकत्वा पर्यायात्मकत्वमित्याह—रूपादीति परमाणूनां चाक्षुषत्वाभिमानस्य न स्वलक्षणविषयत्वे परस्पर-
प्रतिक्षणमिति प्रतिपरमाणु रूपादिपर्यायस्याऽसाधारणत्वात्तदपेक्षया द्रव्योरपि स्वलक्षणविषयत्वमिति भावः । द्रव्यं तथा
30 सामान्ये हेतुमाह—साधारणीभूतेति नीलपीतादिभेदानां समासाधारणचाक्षुषत्वपरिणामो परमाणूनां भेदेऽपि तत्त्वम्
भवति तदपेक्षया द्रव्यो सामान्यविषयत्वमिति भावः । तथाविभक्तत्वेन ज्ञानोत्पत्तेरिति हेतुरसिद्धो वैक ज्ञानस्यैकाकारत्वे
सत्यपि तथा स्यात्, किन्तु ज्ञानमेकरूपमाकारमन्यदा चानेकाकारमुत्पद्यते न तयोरुभयाकारमिश्रत्वं—मन्विति । एव-
मर्थं ज्ञानमुत्पद्यैकाकारं ज्ञानमुत्पद्य तदुभयं ज्ञानमेव नीलाद्याकारे यदा न सर्वत्र प्रतिपत्तारो तथाकालान्तरे
चाऽपि कदाचिदुत्पद्यते नतु विज्ञानाभेदे कालान्तरेऽपि इति सामान्यविशेषाभिधानेनोक्तं—कालान्तरेणाऽऽकारवता-
35 दिति तत्परोक्षपक्षस्य चाक्षुषं प्रतिषिद्धम् । अत्रैव परमाणुनीलसमूहावभासज्ञानस्य तदेकस्मिन् काले उभयरूपत्वं विरोधे
तुल्यत्वे—तदेवेति, स्यादेतदिति, द्रव्यस्य स्वरूपत्वात् प्रतिपादयति स्यान्न तदेवेति स्यात् स्वरूपत्वं प्रतिपा-

परिणामभेदात् । हेत्वन्तरमप्युच्यते—ग्रहणापदेशविशिष्टार्थत्वात्, ग्रहणं—ज्ञानं ज्ञानमेवापदेशो हेतुः, तेन हेतुना विशिष्टो ग्रहणापदेशविशिष्टः स चासावर्थश्च तद्भावो ग्रहणापदेशविशिष्टार्थत्वम्, यस्माच्चक्षुर्विज्ञानाख्येनोपलब्धिविशिष्टोऽपि रूप समुदायात्मकं गृह्यते तस्मादेकानेकात्मकं तद्वस्तु, को दृष्टान्तः ? अनेकवर्णमणिरूपवत्, एक एव वा मणिर्मेचकः स्फटिकाद्यन्यतमरूपवत्, नानावर्णानां वा मणीनां समूहस्य रूपवत्, यथा तद्ग्रहणापदेशविशिष्टज्ञानपरिच्छिन्नमविभिन्नरूपं तथा चक्षुर्विषयाभिमतं वस्तु । एकपुरुषपितृपुत्रवद्वेति ग्रहणापदेशविशिष्टस्य साधर्म्यदृष्टान्तान्तरम्, यथैकः पुरुषोऽनेकसम्बन्धिवचनापेक्षया पिता पुत्रो भागिनेयो मातुल इत्येवमादिव्यपदेश्यत्वं भजते न चास्य विरोधसङ्करव्यतिकरासमञ्जसदोषा ग्रहणापदेशविशिष्टार्थत्वादेवं चक्षुर्विज्ञानविज्ञेयं वस्तु प्रतिपत्तव्यम् ।

अतोऽनपेक्षितस्वाभ्युपगममनेकान्तदूषणमापद्यते, अविभावितैवमर्थ्यपूर्वाभ्युपगमत्वादभ्युग्रभ्रान्तोन्मत्तादिवत्, अनपेक्षितस्वाभ्युपगमानेकान्तदूषणत्वात् कस्य वयं विशेष्यायमेषोऽभ्युग्रो भ्रान्त उन्मत्तो वेति दोषं ब्रूमः ? न विशेषदोषः कस्यचिदपि ।

अतोऽनपेक्षितेत्यादि, अत एव कारणाद्येऽत्र चोदयन्ति परस्परविरुद्धानां कथमेकत्र सम्भव इति तेषां स्वमपेक्षितस्वाभ्युपगममनेकान्तदूषणमापद्यते, स्वाभ्युपगमः स नापेक्ष्यते यस्मिन् दूषणे तदनपेक्षितस्वाभ्युपगममनेकान्तदूषणम्, तद्यथा—सर्वं सर्वात्मकमविशिष्टं प्रतिज्ञाय परिणामभेदव्याप्त्यागमानपेक्ष्यानेकान्तदूषणम् । देशकालकृतावस्थाविशिष्टस्य प्रतिज्ञाय संतानविशेषव्याख्यानमनपेक्ष्यानेकान्तदूषणम् । असत्कार्योत्सर्गं प्रतिज्ञाय तुल्यजातीयद्रव्यगुणान्तरारम्भनियमव्याख्यानानपेक्ष्यानेकान्तदूषणम् । कस्माद्धेतोः ? अविभावितैवमर्थ्यपूर्वाभ्युपगमत्वात्, एकान्तवादिनामनेकान्तरूपोऽयं एवमर्थः, तद्भाव ऐवमर्थ्यमविभावितमैवमर्थ्यं पूर्वाभ्युपगमस्य यैस्त इमेऽविभावितैवमर्थ्यपूर्वाभ्युपगमा एकान्तवादिनस्तद्भावादविभावितैवमर्थ्यपूर्वाभ्युपगमत्वादभ्युग्रभ्रान्तोन्मत्तादिवदनपेक्षितस्वाभ्युपगमानेकान्तदूषणत्वात् कस्य वयं विशेष्यायमेषोऽभ्युग्रो भ्रान्त उन्मत्तो वेति दोषं ब्रूमः ? सर्व एव दूषणैव दोषप्रकारः किं तपस्विना विशेषैकान्तवादिनैव वादिपरमेश्वरपरिरक्षणयैकपक्षस्य विशेषणेनोपक्षिप्तेनेति, अत आह—न विशेषदोषः कस्यचिदपीति ।

प्रागभिहितसम्बन्धागतकल्पनात्मकत्वापादनचोद्यदूषणमनुक्त्वा तदभ्युपगमेन परिहारोक्तिरयतनस्वलक्षणं प्रत्येते स्वलक्षणविषया न द्रव्यस्वलक्षणं प्रतीतिदोषं च छपित्वा प्रतिष्ठापितवानसि ।

भति । अत एव कारणादिति एवाऽभिमतत्वेन ज्ञानोत्पत्तेरेकत्वाद् एवोभयरूपत्वाद्ग्रहणापदेशविशिष्टार्थत्वाद्वेति मेवा- मर्दं वस्तुमिदं यतोऽत्र एव यदिम्युपा अनेकान्ते वै दोषाः स्वाभ्युपगमोपेक्षामूलका एवेति भावः । संतानविशेषमपि धर्मं अनेकान्तेऽपेक्षितस्वाभ्युपगममनेकान्तदूषणं दर्शयति—तद्यथेति सर्वमन्यथावाभिधाय तस्यैव परिणामभेदव्याख्या- विशेषाम्नायं सर्वं नोपेक्ष्याऽनेकान्तवादे दोषं ददाति स तथा । द्रव्यार्थं वस्तु उक्त्वा समान्यासत्कस्यानन्तीय तासमान्यविशेषाम्नायमिति तदेवोऽभ्यनेकान्त एव । तदनन्तार्थमस्तीत्यपि स्याद्वादे दूषणं नैवाभिन्नम् तदेव- मेव अत्र हेतुमाह—अविभावितेति यदेवोऽयं एवमर्थः यथा चैव पूर्वमभ्युपगमोऽत्र दोषो नास्तीति तैर्विचारमवि- चार्येदोक्तमत इति तं अभ्युपगमविरोधं अनेकान्तदूषणविरोधं समानत्वादत इति सर्वे एते समानत्वात् दूष्या न लोक एव विशेषैकान्तवादी अन्यो वा कः कोऽपीति भावः । कल्पनात्मकत्वापादनमिति । ...

(प्रागभिहितेति) एतत्तु व्याख्याने प्रागुपाय चोदितमेव, दोषश्च अभिहितः प्रतिज्ञाविरोधा-सि–विपरीतत्वमापन्नसीत्यर्थः, यत्तु समस्ताऽऽलम्बनमित्यादि यावदिति तत्प्रतिष्ठापितमेव विरोधत्वमिति ।

एष तु विशेषोऽज्ञानत्वप्रसङ्गस्तद्यथा–स्फुटतरक इत्यादि यावदुक्तः प्रत्यक्षत्वमित्येत-दुपदर्शितम् ।

5 (एष इति) एष तु विशेषः कल्पनात्मकत्वदोषादन्यो दोषः, कतमः ? अज्ञानत्वप्रसङ्गः । गतार्थम् ।

योऽपि चैकाकारेत्यादिचोद्यप्रत्युच्चारणमेतद्यावत्सञ्चिताऽऽलम्बनतायाम् ।

(योऽपि चेति) एतदुक्तं भवति–यदि तदेकत्वं न विकल्पयति कथं सञ्चिताऽऽलम्बनता, कल्प-नामन्तरेण न हि सा, कल्पनामन्तरेण न सम्भवतीति चोदिते यत्प्रोत्तरो वक्ष्यमाणो यः समाधिरभि-
10 धीयते स एव भिन्नसमुदायत्वदोषपरिहारोऽभिमतोऽर्थतयाभिमतत्वाविरोधात्तस्य तावदर्शनात् तदनु वारयति सम्यक्त्वादम्—

अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमित्यनेकद्रव्योत्पाद्यत्वात् स्वायतने सामा-न्यगोचरमुच्यते न तु तद्भिन्नेष्वभेदकल्पनात्, तेषु पृथक्पृथग्ग्रहणाभावादिति ।

(अनेकार्थेति) गतार्थः, पिण्डार्थस्तु यद्यपि परमाणुसमूहजन्यत्वात् ज्ञानस्यैतत् सामान्य-
15 गोचरं तथापि रूपं रसो वा स्वार्थोऽन्याप्रवृत्त्यात्मीयस्वरूपस्य ज्ञानत्वात्प्रदुत्वात्, तत्र विज्ञान-मुत्पादयितुं शक्तिभेदाद्धेतुत्वसंहत्य समग्राः परमाणवो नान्यथेति सामान्यगोचरताऽस्तु को दोषः ? यदि तद्भिन्नेष्वभेदं कल्पयदुत्पद्येत तस्मात् कल्पनात्मकम्, न तु भिन्नेष्वभेदैकाकारपरिकल्पनयोत्प-द्यत इति ।

अस्यार्थस्य दृष्टान्तः—

20 यथाहि शमीशालापलाशेषु ज्ञानमन्यादिभ्यामविवेकेनोत्पद्यते, एवं प्रत्यक्षमपि ।

यथाहि शमीशालापलाशेष्वित्यादि, यथा सर्वथाप्यनन्यं ज्ञानमन्यादिभ्यामविवेकेनो-त्पद्यते एवं प्रत्यक्षमपि ।

स्वायतने यथाविवेकेन ग्रहणेन ज्ञानमुत्पद्यते यथाविवेकेनेतुच्यते तर्हि [illegible] सर्वेषु योगे [illegible] ग्रहणमुत्पत्त्याऽऽकारकल्पनायां [illegible] न [illegible]
25 प्रत्येकं विपरीतत्वमापद्यत । एष तु विशेष इत्यादि, अत्र मूलं न सम्प्रयुक्तम् । [illegible] मूलयथार्थमभिधानात् । अनेकार्थजन्यत्वादिति यथाविवेकेन ग्रहणेन ज्ञानमुत्पद्यत इति [illegible] [illegible] सामान्यगोचरम्, किं वार्थे सामान्यगोचरम्, [illegible] रूपं रसो वा [illegible] हि [illegible] [illegible] ज्ञानमुत्पद्यते [illegible] [illegible] [illegible]
30 [illegible] [illegible] रूपं रसो [illegible] [illegible] यथा शमीषेषु ज्ञानमन्यादिभ्यामविवेकेनोत्पद्यते [illegible] [illegible] विवेकेन [illegible] सामान्यगोचरमित्युच्यते इति भावः । को दोष इति, न [illegible] रूपं वार्थे सामान्यगोचरं [illegible] यदि हि [illegible] भिन्नेष्वभेद

स्यान्मतं तद्व्यतिरेकेण पत्रे समुदाये च यथा ज्ञानं तथा प्रत्यक्षमपि स्यादित्येतदयुक्तम्, न च संघातः कश्चिदेकोऽस्ति, तेषामनारब्धस्कन्धकार्यत्वात्, न हि समुदायो वैशेषिककल्पितकार्यद्रव्यवत् पृथगस्ति, नापि परिणामान्तरमापन्नम्, तेषां क्षणिकत्वादारम्भनिष्ठाकालभेदावस्थानाभावादेवमण्वप्यपि ।

(स्यान्मतमिति) तेषां—कारणभूतानाम् । एवमण्वप्यपीति दार्ष्टान्तिकं निदर्शयति । 5

अत्रोत्तरमुच्यते—

अयमसमाधिरेव, अस्यार्थस्य अरस्कुटीरवदारोहणाक्षमत्वादङ्गीकृतार्थविनाशित्वात्, सम्यक्कृतकत्वाभिव्यक्तिस्थापनार्थमप्रवृत्तवैशेषिकवत्, कृतकत्वसाधर्म्यमिति चेदुच्यते, अविपर्यतां प्रतिज्ञाय तद्वद्विपर्ययतया तदतद्भूतसामान्यगोचरोपसंहारात् ।

(अयमिति) अयमसमाधिरेव—स्वाभ्युपगमितस्य प्राक् चोदितापायस्यार्थं समाधिरप्यसमाधिरेव, अङ्गीकृतार्थविनाशित्वात्, सम्यक्कृतकत्वाभिव्यक्तिस्थापनार्थमप्रवृत्तवैशेषिकवत्, वैशेषिकस्येव वैशेषिकवत्, यथाऽऽद्युपगमस्य 'गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्, सतो लिङ्गाभावात् (वैशे० अ० २ आ० २ सू० २५,२६) कार्यत्वादिभिरनित्यस्य वैशेषिकत्वात् सिद्ध कृतकत्वस्य, तस्याभिव्यक्तिस्थापनार्थं प्रवृत्तस्य वैशेषिकस्येवाङ्गीकृतार्थनाशित्वमेवमनेकार्थवक्तृत्वात् स्वार्थे सामान्यगोचरमिन्द्रियवचनयोर्दोषः, यच्चाथवोक्ते—कृतकत्वसाधर्म्यमिति चेदुच्यते—अविपर्यतां प्रतिज्ञाय तद्वद्विपर्ययतया 15 तदतद्भूतसामान्यगोचरोपसंहारात्, स चायम विपर्ययोऽस्य स तद्वद्विपर्ययः, तद्भावस्तद्वद्विपर्ययता, तदतद्भूतं सामान्यं, यद्गोचरोऽस्य विषय उपसंहारस्य तस्मादुपसंहारात् । स चान्यत्र विषया सामान्यमेवेति तदन्यत्रापि च प्रवर्तते, एकत्वदर्शनात्, त्वन्मतेनैव प्रतिज्ञां निपतत्याभासानां नैकरूपमपि, तत्र च तत्र दृष्टं न चातोऽन्यत्र, तथाभूतत्वात्तत्र भवति, अतथाभूतत्वादतत्र भवति तदतद्भूतं सामान्यं गोचरोऽस्योपसंहारस्य यः स तद्वद्विपर्ययतया स्वयमङ्गीक्रियते । 20

अन्यथानुपपत्त्यैव यथोक्तं ज्ञानमिति तदा स्वलक्षणप्रत्यक्षम्, न तु भिन्नैकमेवैकाकारपरिकल्पनयानुपपत्त इति न [illegible] इति भावः । स्यान्मतेवमर्थं प्रत्युक्ते स्यान्मतमिति यथाऽभिमन्यमानविवेकेन सर्वत्राप्यर्थं ज्ञानमिव प्रत्यक्षमपि पत्रे ज्ञानमुत्पन्नं तस्मात् तथैव परमाणुष्वप्युत्पन्नं ज्ञानमिव प्रत्यक्षं परमाणुष्वपि प्रत्यक्षमुत्पन्नमेवेति भावः । संघातस्य समुदितस्कन्धोऽयमावयुत्पद्यते प्रत्यक्षं तद्गुणेनेति व्याप्यते पूर्वपक्षी—न च संघात इति । आरम्भेति, आरम्भनिष्ठाकालभेदेऽस्य आरम्भनिष्ठाकालभेदस्यापि परमाणोः स्थित्यभावादित्यर्थः । 25 अरस्कुटीरवदिति यथा जीर्णकुटीमारोढुमशक्यं दृष्टे चारोहणे तस्य विनाश एव प्रसज्यते तथाऽयं समाधिरङ्गीकृतार्थविनाशित्वादसमाधिरेवेत्यर्थः । प्राक् चोदितापायस्य—अयमित्युक्तोपायस्य । सम्यक्कृतकत्वेति वैशेषिकस्य सम्यो [illegible] कृतकत्वात्, तत्र चक्षुर्गुणद्रव्यमिन्द्रियग्राह्यसत्ताविषयस्य गुणस्य सतः कर्मसामान्यविशेषवत्कार्यत्वाद् यत्नाभावे प्रत्यक्षाभावो दोषतर्कमेवाभिव्यक्तत्वात् कृतकत्वं सिद्धम्, स एव वैशेषिको यदि सम्यगभिव्यक्तिस्थापनार्थं यतते तर्हि स्वाङ्गीकृतार्थविनाशित्वादसमाधिरेव तस्य स्यादेवमपि दोष इति भावः । एवं त्वमपि वैशेषिकस्येवाङ्गीकृतार्थविनाशी भवसि इत्युच्यते—कृत- 30 कत्वादिति, अविपर्यतामिति परमाणूनामविपर्ययं प्रतिज्ञातवतः परमाणूनामप्यतद्रूपत्वं विपर्ययत्वं नास्तीति तेषामविपर्ययं योग्या तदतद्भूतसामान्यविषयत्वोक्त्या च परमाणूनामपि विपर्ययत्वं प्रतिज्ञातमेवेति वैशेषिकतुल्यतेत्याशयः । ननु तदतद्विपर्ययं सामान्यस्य कथम् तदतद्भूतत्वं कथमित्यत आह—स चान्यत्रैवेति समवायिपरतन्त्रमतेन तत्र वृत्तिः न सम्भवत्येव एकत्वात्, तस्मात् तत्रत्वं तत्र दृष्टं न चातोऽन्यत्रेति मत तथा च सामान्यं तथाभूतत्वात् तथाभूतत्वादपि दृष्टे अतथाभूततत्त्वासाधर्म्यं न भवति तथापि दृष्टो सामान्यमतद्भूतं तत् । यः स इति, गोचरो- 35

(प्रागभिहितेति) एतत्तु व्याख्यानं प्रागुपात्तं चोदितमेव, तोयत्र अपि तत्र प्रतिज्ञातत्वा-त्सि–सिद्धिकृतमानसीमर्थः, यत्तु समस्ताजम्भनमिताधि यावदित्येतदभिप्रायितमेव सिद्धिकृतमिति ।

एष तु विशेषोऽज्ञानस्यप्रसङ्गलक्षणया–स्फुटतरक इत्यादि यावत्कृतः प्रसङ्गत्वमित्येत-दुपदर्शितम् ।

5 (एष इति) एष तु विशेषः कस्मनारमकत्वदोषारम्भो दोषः, कथम् ? अज्ञानत्वप्रसङ्गः । गतार्थम् ।

योऽपि चैकाकारेत्यादिचोद्यमस्तु कारणमेव यावत्सन्निताऽम्भनतायाम् ।

(योऽपि चेति) एतदुक्तं भवति–यदि तदेकतो न विकल्पयति कथं सन्निताम्बनता, कस्य-मानन्यपेक्ष हि सा, कस्यमानमन्तरेण न सम्भवतीति चोदिते तत्रोत्तरो वक्ष्यमाणो यः समाधिरभि-

10 धीयते स एव विकल्पप्रसङ्गदोषपरिहारोऽभिमतोऽर्थद्वयवाचित्वाविरोधात् वाक्यस्येति तदस्तु वारयति सम्याख्यानम्—

अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमित्यनेकद्रव्योत्पाद्यत्वात् स्वायतने साम-न्यगोचरमुच्यते न तु तद्विशेष्यमेवकल्पनात्, तेषु पृथक्पृथग्ग्रहणाभावादिति ।

(अनेकार्थेति) गतार्थः सिद्धार्थस्तु यद्यपि परमाणुसमूहजन्यत्वात् ज्ञानमर्थतः सामान्य-

15 गोचरं तथापि रूपं रसो वा सार्वोऽप्यायतनत्वादयोऽन्तरकल्पने एव ज्ञानस्यापद्युत्वात्, तत्र विज्ञान-प्रत्यायपिंड किंचिकोऽग्रहकल्पसंहत समर्थाः परमाणवो नाम्यमेति सामान्यगोचरताऽस्तु को दोषः ? यदि तद्विशेष्यमेवं कल्पयतुरूपमेव तस्मात् कल्पनात्मकम्, न तु विशेष्यमेवैकाकारपरिकल्पनादु-त्पद्यत इति ।

अत्रार्थेऽस्य दृष्टान्तः—

20 यथाहि शमीशाखापत्रेषु ज्ञानमन्तराविभ्यातिविवेकेनोत्पद्यते, एवं प्रत्यक्षमपि ।

यथाहि शमीशाखापत्रेष्वित्यादि, यथा सर्वपत्राद्यवलम्बनं ज्ञानमन्तरविभ्यातिविवेकेनो-त्पद्यते एवं प्रत्यक्षमपि ।

[illegible]

25 [illegible] । एष तु विशेष इत्यादि, [illegible] ।

[illegible]

30 [illegible]

[illegible]

स्यान्मतं तद्व्यतिरेकेण पत्रे समुदाये च यथा ज्ञानं तथा प्रत्यक्षमपि स्यादित्येतदयुक्तम्, न च संघातः कश्चिदेकोऽस्ति, तेषामनारभ्यलक्षणकार्यत्वात्, न हि समुदायो वैशेषिककल्पितकार्यद्रव्यवत् पृथगस्ति, नापि परिणामान्तरमापन्नम्, तेषां क्षणिकत्वादारम्भनिष्ठाकालभेदावस्थानाभावादेवमण्वप्यपि ।

(स्यान्मतमिति) तेषां—कारणभूतानाम् । एवमण्वप्यपीति दार्ष्टान्तिकं निदर्शयति । 5

अत्रोत्तरमुच्यते—

अयमसमाधिरेव, अस्यार्थस्य जरत्कुटीरवदारोहणाक्षमत्वादङ्गीकृतार्थविनाशित्वात्, शब्दकृतकत्वाभिव्यक्तिस्थापनार्थप्रवृत्तवैशेषिकवत्, कृतकत्वसाधर्म्यमिति चेदुच्यते, अविषयतां प्रतिज्ञाय तद्वद्विषयतया तद्वद्भूतसामान्यगोचरोपसंहारात् ।

(अयमिति) अयमसमाधिरेव—त्वदुक्तस्यायमितस्य प्राक् चोदितापायस्यायं समाधिरप्यसमाधिरेव, अङ्गीकृतार्थविनाशित्वात्, शब्दकृतकत्वाभिव्यक्तिस्थापनार्थप्रवृत्तवैशेषिकवत्, वैशेषिकस्येव वैशेषिकवत्, यथाकुयमनयस्य 'गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्, सतो लिङ्गाभावात्' (वैशे० अ २ आ० २ सू० २५,२६) इत्यस्याभिनिवेशस्य वैशेषिकस्यात् सिद्ध कृतकत्वञ्च, तस्याभिव्यक्तिस्थापनार्थं प्रवृत्तस्य वैशेषिकस्येवाङ्गीकृतार्थनाशित्वमेवमनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमिथ्यावचनयोर्दोषः, तदुच्यते—कृतकत्वसाधर्म्यमिति चेदुच्यते—अविषयतां प्रतिज्ञाय तद्वद्विषयतया 15
तद्वद्भूतसामान्यगोचरोपसंहारात्, न चास्य विषयोऽस्य स तद्वद्विषयः, तद्भावस्तद्वद्विषयता, तद्वद्भूतं सामान्यं, तद्गोचरोऽस्य विषय उपसंहारस्य तस्मादुपसंहारात् । स चान्यस्य विषयः सामान्यस्येति तदन्यतरस्यैव न भवतीति, एकतरासाध्यत्वात्, त्वन्मतेनैव प्रतिज्ञां नियतसामान्याभावां नैकरूप मपि, तत्र च तत्र वृत्तं न चातोऽन्यत्र, तथाभूतत्वात्तत्र भवति, अतत्राभूतत्वात्तत्र भवति तद्वद्- भूतं सामान्यं गोचरोऽस्योपसंहारस्य यः स तद्वद्विषयतया त्वयाङ्गीक्रियते । 20

स्वभावभूतस्यैव यथोऽर्थं यथोऽस्मिति तदा स्यादसमञ्जसम्, न तु [illegible] इति च [illegible] इति भावः । स्यान्मतमिति, यथाऽऽदिमध्यान्तविशेषेण [illegible] ज्ञानमिव प्रत्येकमपि पत्रे समुदायमानं दृश्यते तथैव परमाणुसमुदायमानं ज्ञानमिव प्रत्येकं परमाणुष्वपि [illegible] इत्यर्थः । संघातस्य कस्यचिदेकस्यानारम्भकत्वे प्रत्यक्षं तदणुष्वेवेति स्वमतो पूर्वपक्षी—न च संघात इति । आरम्भेति, आरम्भकभिन्नकार्यद्रव्यस्य [illegible] परमाणोः [illegible] । 25
जरत्कुटीरवदिति यथा जीर्णकुटीरमारोढुमनोरथं कुर्वे आरोहणे तस्य विनाश एव प्रसज्यते तथाऽयं समाधिरङ्गीकृतार्थविनाशित्वादसमाधिरेवेत्यर्थः । प्राक् चोदितापायस्य—आदयमिति [illegible] । शब्दकृतकत्वेति वैशेषिकमते शब्दो अनित्यः कृतकत्वात्, तत्र [illegible] गुणस्य सतः कर्मभिः [illegible] अस्मिन्नर्थे [illegible] कृतकत्वं सिद्धम्, स एव वैशेषिको यदि शब्दस्याभिव्यक्तिस्थापनार्थं यतते तर्हि अङ्गीकृतार्थहानिरेव तस्य [illegible] दोष इति भावः । यथं तथाऽभिमतवैशेषिकमतस्यैवास्य समाधेः—कृत- 30
कत्वमिति अविषयतामिति परमाणूनामविषयत्वं प्रतिज्ञायैवं परमाणूनामप्यतीन्द्रियत्वं [illegible] तद्वद्भूतसामान्यविषयत्वेन च परमाणूनामपि विषयत्वं प्रतिज्ञापितमेवेति वैशेषिकतुल्यताऽऽपाता । ननु तद्वद्विषयत्वं सामान्यस्य कथं तद्वद्भूतत्वं [illegible] इति समाधिरेवास्य तत्र वृत्तिः न तदन्यतरस्यैव एकतरस्येव [illegible], तस्मात् सामान्यं तत्र वृत्तं न चातोऽन्यत्रेति [illegible] सामान्यं [illegible] [illegible] न भवति तथापि [illegible] तस्मात्तद्वद्भूतं तत् । यः स इति [illegible] 35

तस्मात्तद्विषयतया तदद्भूतसामान्यगोचरोपसंहारव्याजीकृतप्रमाणविनाश इत्यत आह—

नन्वत एव न तत्प्रत्यक्षं स्वार्थे सामान्यगोचरत्वादनुमानवत्, अनुमानमपि वा न, स्वार्थे सामान्यगोचरमिति कुमारब्रह्मचारिपितृवचनवदेतत् ।

(नन्विति) स्वार्थ इति—स्वविषये—रूपादौ वस्तुनि सामान्यगोचरत्वात् प्रत्यक्षं यथाऽनुमानमिति, अनुमानमपि वा नेति, नानुमानमपि तस्मात् स्वार्थे सामान्यगोचरत्वात् प्रत्यक्षवत् । स्वार्थे सामान्यगोचरमिति, एतत्स्ववचनविरोधे, किमिव ? कुमारब्रह्मचारिपितृवचनवदेतत्, यथा कश्चिद् ब्रूयात् पिता मे कुमारब्रह्मचारीति, तस्य तद्वचनं स्वत एव विरुध्यते, यदि पिता कथं कुमारब्रह्मचारी ? अथ कुमारब्रह्मचारी कथं पितेति । तथेदमपि यदि तज्ज्ञानं स्वार्थे कथं सामान्यगोचरम्, अथ सामान्यगोचरं कथं तत्स्वार्थे ?

स्वार्थ इति च त्वया प्रमेयमुच्यते, सामान्यतो वस्तुस्वलक्षणं स्वार्थ इति, तथा सामान्यलक्षणमिति छिद्रगर्भं सर्वम्, अस्वार्थविशिष्टे—स्वविषये—एकस्मिन्नेव रूपादिप्रकारे सामान्यगोचरमिति, सामान्यविषयञ्च स्वार्थे ज्ञानमिति च विस्पर्धितमेतत्, अर्थविषयशब्दौ हि लक्षणार्थावेव, तद्विस्मृत्य भ्रान्त्येन नेन्द्रियमात्रस्वार्थसामान्यभेदकल्पनापरिहारो युज्यते वक्तुम्, प्रत्यक्षाभ्यासाभ्यामविषयत्वात् स्वार्थस्वलक्षणस्वविषयसम्बन्धानाम् ।

(स्वार्थ इति) स्वार्थ इति च त्वया न वसुबन्धोऽन्यस्य वैन्द्रियस्य विषय इति विशेषमाश्रित्य लक्षणमभिधीयते किन्तर्हि ? प्रमेयमुच्यते, सामान्यतो वस्तुस्वलक्षणं स्वार्थ इति, तथा सामान्यलक्षणमिति न यूनानुमेयमभिमानम्, किं तर्हि ? छिद्रगर्भं सर्वम्, एतदर्थस्य प्रतिपादनार्थमाह स्वार्थलक्षणमेव निरूपयन्—अस्वार्थविशिष्टे, कोऽर्थः स्वार्थो न स्वार्थोऽस्वार्थः—स्वार्थोऽन्यस्ततो विशिष्टः स्वार्थस्तस्मिन् स्वार्थे तमेवार्थं पर्यायेणाह—स्वविषये किमुक्तं भवति, एकस्मिन् रूपादिप्रकारे प्रकारे रूपे रसेऽन्यस्मिन्नेव सामान्यगोचरमिति, सामान्यविषयञ्च स्वार्थे ज्ञानमिति च विस्पर्धितमेतत् परस्परतो इत्थम् यस्मादर्थविषयशब्दौ लक्षणार्थावेव—लक्षणसम्पर्यायवाचिनौ, तस्मात् स्वार्थः स्वविषयः स्वलक्षणमित्येतदविच्छिन्नं भवतः तद्विस्मृत्य भ्रान्त्येन नेन्द्रियमात्रस्वार्थसामान्यभेदकल्पनापरिहारो युज्यते वक्तुम्, कस्मात् ? प्रत्यक्षाभ्यासाभ्यामविषयत्वात् स्वार्थस्वलक्षणस्वविषयसम्बन्धानाम् ।

[illegible] । स्वविषय इति प्रमाणस्य विषयो द्विविधः [illegible] । तत्र [illegible] ... [illegible] । स्वार्थे सामान्यगोचरमित्यस्य विरुद्धवचनं स्पष्टयति स्वार्थ इति चेति [illegible] न स्वार्थत्वं किन्तु स्वार्थः प्रमेयम्, सामान्यतो वस्तुस्वलक्षणमेव [illegible] सामान्यलक्षणमित्युच्यते तथा च स्वार्थे ज्ञानं सामान्यविषयमिति विस्पर्धितम्, [illegible] अर्थविषयलक्षणशब्दानां पर्यायवाचित्वादिति भावः । अस्वार्थविशिष्टे—[illegible] एवम्भूतः स्वविषयः स्वलक्षण एव स्वार्थः [illegible] भावः । नेन्द्रियमात्रेति स्वार्थसामान्यगोचरप्रत्यक्ष[illegible] विरोधपरिहारो न घटते कर्तुमित्यर्थः । [illegible]

मा मंस्था नैवमेवं भवतीति, उक्तं हि प्रमाणसंख्यानिरूपणे त्वयैव 'प्रत्यक्षमनुमानञ्च प्रमाणे' इत्यादि प्रमाणद्वित्वं नियम्यते प्रमेयद्वित्वात् परिमेयद्वित्वनियतप्रस्थतुलादिपरिमाणद्वित्ववत्, लक्षणद्वयाद्यदन्यत् प्रमेयं स्यात्तदपेक्षया प्रमाणान्तरं स्यात्, नहि स्वसामान्यलक्षणाभ्यामन्यत् प्रमेयमस्ति, प्रत्यक्षानुमानाभ्यामग्रहणात् खरविषाणवत् ।

(मा मंस्था इति) दर्शयति—यस्माल्लक्षणद्वयं प्रमेयं स्यात् ततोऽन्यत्—प्रमेयान्तरं स्वसामान्यद्वित्वरूपलक्षणं तदपेक्षया प्रमाणान्तरं स्यादिति, तन्निवारणार्थमाह—नहि स्वसामान्यलक्षणाभ्यामन्यत् प्रमेयमस्ति प्रत्यक्षानुमानाभ्यामग्रहणात्, खरविषाणवत् । 5

स्यान्मतं तत्रैव विषयद्वये विकल्पसमुच्चयाङ्गाङ्गिभावैः प्रत्यक्षानुमानागमादीनां प्रमाणानां वृत्तिर्भविष्यतीति तन्न भवति यस्मात् स्वलक्षणविषयनियतं प्रत्यक्षं सामान्यलक्षणविषयनियतमनुमानमित्युक्तम्, कथं पुनर्लक्षणशब्दोऽर्थपर्यायः? लक्ष्यते गम्यत इत्यर्थः, तथा लक्ष्यत इति लक्षणं तच्च वस्तुस्वभावः, स्वरूपमर्थः प्रमेयमिति पर्यायाः, तत्पुनर्द्विरूपं द्वाभ्यां प्रमाणाभ्यां परिच्छेद्यत्वात्, प्रमेयाधिगमनिमित्तं हि प्रमाणमिति, न च प्रमाणयोर्विषयसङ्करः । 10

(स्यान्मतमिति), (लक्ष्यत इति लक्षणमिति) कर्मसाधनस्य लक्षणशब्दस्य, तच्च लक्षणं वस्तुस्वभावः, स्वरूपमर्थः प्रमेयमिति पर्यायाः, तत्पुनर्द्विरूपं परिच्छेद्यं द्वाभ्यां प्रमाणाभ्यां परिच्छेद्यत्वात्, प्रमाणपरिच्छेदकं प्रमेयं परिच्छेद्यमित्यर्थः, यस्माल्लोके दृष्टं प्रमेयाधिगमनिमित्तं प्रमाणम्, हि शब्दस्य हेत्वर्थत्वात् । प्रमेयाधिगमनिमित्तं हि प्रमाणमिति, नोचेत् 'अग्निहोत्रं जुहुयात् स्वर्गकामः, दानं दद्याद्धर्मकामः' इत्येवमाद्यागमवचनदृष्टार्थं प्रसक्तं स्यान्न चैवमतो दृष्टार्थमेव, तदुपलम्भकत्वात्, उपलम्भस्य द्विविधस्य दृष्टत्वात्, न च प्रमाणयोर्विषयसङ्कर इति प्रागुक्तयुक्तिको विविक्तविषयतां दर्शयति, इतिशब्दः प्रदर्शने, एतावानत्र संक्षेपेणार्थस्थितिन्तरपरो ग्रन्थ इति सूचयति । 15

इदानीं व्यवस्थितार्थोपसंहारार्थमिदं वाक्यमाह— 20

अधिगम्यस्य द्वित्वाल्लक्षणशब्दोऽर्थपर्यायवाची नेन्द्रियमात्र इति स्थिते प्रत्यक्षानुमानयोः स्वरूपाभावः स्ववचनविरोधश्च दोषाः स्वार्थे सामान्यगोचरमिति ब्रुवत इति स्थितम् ।

इति मा मंस्था इति । प्रमेयद्वित्वादिति यदि प्रमेयद्वैविध्यमन्तरेण प्रमाणद्वैविध्यं सम्भवति प्रमेयभेदाप्रत्ययस्य प्रमाणभेदहेतोरभावात् प्रमाणं द्विविधमेव यदि स्वलक्षणसामान्यलक्षणाभ्यामन्यत् प्रमेयं प्रसिद्धमिति भावः । प्रमाणसंख्यानिरूपणे त्वयाख्यातमिति । [illegible] प्रमाणेन पिण्डं पिण्डं [illegible] तु च 25 [illegible] पुनः [illegible] प्रसङ्गेन [illegible] सामान्यस्यानुमानेन [illegible] इति भावः । [illegible] कथं पुनरिति [illegible] इत्यर्थः [illegible] कर्मसाधनत्वं [illegible] वस्तुस्वभावः प्रत्यक्षेणानु मानेन [illegible] द्विविधः [illegible] प्रमेयमिति [illegible] सामान्यविशेषरूपेणार्थस्य द्वैवि ध्यात् [illegible] प्रमाणमपि द्विविधमेव [illegible] प्रमाणान्तरं [illegible] कथं स्वार्थे सामान्य- 30 गोचरं प्रत्यक्षमनुमानं वा स्यादिति भावः । नोचेदिति [illegible] स्याच्चैवमपि [illegible] प्रसक्तं दृष्टार्थमेवेति भावः । न एवेन्द्रियमात्र च एवार्थो लक्षण इति न [illegible] किन्तु वस्तुस्वभावो [illegible] च द्विविधः प्रमाणद्वैविध्यादित्याशयेनाह—अधिगम्यस्येति । तच्च [illegible]—प्रत्यक्षानुमानयोरिति । [illegible]

एवमवस्थिते सामान्यगोचरस्यानुमानार्थेन भवितव्यम्, ततः स्वार्थे सामान्यगोचरमित्येतदपि युज्यते। न हि तादात्म्यस्वार्थेऽस्य सामान्यस्य सम्बन्धोऽस्ति, नापि सामान्यस्य स्वार्थस्य भाव इति।

(अधिगन्तव्यस्य द्विरूपत्वादिति), अधिगमनिमित्तं द्विरूपमित्येव व्यवस्थापिते प्रत्यक्षस्योऽ- र्थपर्यायवाची नेन्द्रियप्रमाण इति, विशेषार्थः प्राक् कृतः, इत्येतस्मिन्नर्थे स्थिते प्रत्यक्षानुमानयोः स्वरू- पाभावः स्ववचनविरोधश्च दोषाः स्वार्थे सामान्यगोचरमिति ब्रुवतः मोक्षविधिनेति स्थितम्, पुनश्चाक्- दोषः एवमवस्थिते (इत्यादि)।

मा भूदेष दोष इति—

तस्मिन्नेव सामान्ये स्वविषये स्वार्थे प्रत्यक्षं ज्ञानमुत्पद्यत इति चेत्तत एव सामान्यमेव स्वविषयः, स्वलक्षणं नास्त्यतो लक्षणद्वयं नास्ति, एकमेवानुमानं प्रमाणं स्यात्, ततश्च प्रमे- यप्रमाणद्वित्वावधारणकल्पना व्यर्था, प्रमाणयोर्वा विषयसङ्करः प्राप्तः।

(तस्मिन्नेवेति) अतः—पारिभाषिकासाधारणस्वलक्षणविषयाभावादेव वक्ष्यमाणे लक्षणद्वयं नास्ति, एकमेव—सामान्यलक्षणविषयमात्रविषयमेकमेवानुमानं प्रमाणं स्यात्, ततश्च प्रमेयप्रमाणद्वि- त्वावधारणकल्पना व्यर्था। मा भूत्प्रमाणवैयर्थ्यमिति स्वार्थे सामान्ये च प्रत्यक्षं प्राप्तं तथानुमान- मेवेति प्रमाणयोर्वा विषयसङ्करः प्राप्तः, प्रत्यक्षस्यैकस्य ज्ञानस्य व्यर्थता वा।

प्रत्यक्षमपि वा परपरिकल्पितमनुमानमेव एव स्यात् अनेकार्थजनितसामान्यगोचररू- पादिप्रकारपरिग्रहात्, स्वयैवोक्तं हि तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमिति। धूम- कृतकत्वलिङ्गजनितज्ञानवत्, एतस्मादेव हेतोरस्वलक्षणविषयत्वप्रसङ्गोऽप्यत्र।

(प्रत्यक्षमपीति) प्रत्यक्षमपि वा परपरिकल्पितमनुमानमेव एव स्यात्, कस्माद्धेतोः? अने- कार्थजनितसामान्यगोचररूपादिप्रकारपरिग्रहात्। मा भूदसिद्धोऽयं हेतुरिति, स्वयैवोक्तं हि तत्रा- नेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमिति, अनेकेन भिन्नेनार्थेनाभिन्नमेकं सामान्यं रूपं रस इत्यादि प्रकारं परिगृह्णोत्पद्यमानं ज्ञानं तेन जनितं तत्तस्मादनेकार्थजनितसामान्यगोचररूपादिप्रकारपरिग्र- हस्य ज्ञानस्य, को दृष्टान्तः? धूमकृतकत्वलिङ्गजनितज्ञानवत्, धूमादयोऽभिर्व्यक्ताग्न्योऽत्र अग्न्यादि- लिङ्गजनितयोरभिन्नज्ञानयोरपि स्वरूपतोऽनुमानत्वाभेदः, एवं रूपादिपूत्पद्यमानानां प्रत्यक्षाभिमता- नामनुमानत्वाभेदः एतस्मादेव हेतोरस्वलक्षणविषयत्वम् अस्वलक्षणविषयं प्रत्यक्षमनेकार्थजनितसामा-

---

न्ययोः प्रत्यक्षविषयत्वेऽनुमानाभावः अनुमानविषयत्वे प्रत्यक्षाभावः प्राप्त इति तथा [illegible] सामान्यविषयत्व- [illegible] न [illegible] स्वार्थे सामान्यगोचरमिति विरुद्धं वचनमिति भावः। एवमवस्थित इति एवं प्रमाणभेदेन विषयभेदे व्यवस्थिते सति स्वार्थः सामान्यगोचरत्वात्ततोऽनुमेय इत्यर्थः। प्रत्यक्षलक्षणयोः [illegible] प्रत्यक्षज्ञानवत्त्वे दोषमाह—तस्मिन्नेवेति। एकेति—[illegible] प्रत्यक्षमनुमानमेव [illegible]। अनेकार्थजन्यत्वात् स्वयैवोक्तमिति। अनुमानत्वाभेद इति प्रत्यक्षानुमानयोः [illegible] सामान्यगोचर[illegible] प्रत्यक्षमेवाह—एतस्मादेव हेतोरिति।

न्यगोचरत्वादिप्रकारपरिग्रहादनुमानवत्, उभयत्रेत्यनेनानुमानेऽप्यस्वलक्षणविषयत्व तत एव हेतोर नन्तरमाविप्रसञ्जनवत् ।

अथवोभयत्रेति स्वलक्षणे सामान्यलक्षणे चास्वलक्षणविषयत्वम्, अनेकैकीभावात्, समुदायवत्, सामान्यमपि न स्वलक्षणमत एवानन्तरोक्तसमुदायवत् । सामान्यास्वलक्षणत्व सिद्धं साध्यत इति चेन्न, स्वार्थ एव सामान्यगोचरमिति वचनात् स्वार्थत्वेनाभ्युपगतत्वात् । 5

अथवोभयत्रेति स्वलक्षणे सामान्यलक्षणे चास्वलक्षणविषयत्वम्, कथं ? स्वलक्षणामि मतमस्वलक्षणमनेकैकीभावात् समुदायवत्तथा सामान्यमपि न स्वलक्षणमत एवानन्तरोक्तसमुदायवत् । सामान्यास्वलक्षणत्व सिद्धं साध्यत इति चेन्न, स्वार्थ एव सामान्यगोचरमिति वचनात् स्वार्थत्वेना-भ्युपगतत्वादिति ।

अवश्यञ्चैतदेवमभ्युपगन्तव्यं यतश्शमीशाखापत्रसंघातविशेषदर्शनोदाहरणेन च 10 स्फुटमेव दर्शितमप्रत्यक्षत्वमनुमानत्वमप्रमाणत्वमस्वलक्षणविषयत्वं विपर्यसङ्कर इत्येवमादिदो षजातम्, अनेकैकत्वापत्तिसामान्यगोचरस्वलक्षण एवार्थः प्रत्यक्षस्येत्येषा भवत आशंसा चेन्न, आरात्परान्त्यमध्यवर्णप्रमाणसंस्थानविविक्तवृत्त्यवयवपत्रविशेषस्वलक्षणसामान्यात्मकत्वात् ।

(अवश्यमिति) अनेकैकत्वापत्तिसामान्यं गोचरः, स एव स्वलक्षणः—सामान्यगोचर एव स्वलक्षणः, असावेवार्थः प्रत्यक्षस्यैषा भवत आशंसा चेन्न, आरात्परान्त्यमध्येत्यादि यावत्स्वलक्षण 15 विषयसामान्यात्मकत्वात्,—नैवमुपपद्यते पूर्वापरादिपरस्परविविक्तावयवपत्रविषयसामान्यात्मकत्वात्, आरादन्त्याः, परान्त्याः, मध्याः, नीलप्रकर्षादिधर्मैः, ह्रस्वदीर्घत्वमहत्त्वादिप्रमाणं वृत्तादिसंस्थानञ्च तैर्विविक्ता वृत्तयोऽवयवाश्च येषां पत्रविशेषाणां ते विविक्तवृत्त्यवयवपत्रविशेषास्त एव स्वलक्षणाः विषयोऽस्य सामान्यस्य तत् स्वलक्षणविषयसामान्यमात्मा स्वरूपमस्य तद्भावः सामान्यात्मकत्वं तस्मात् सामान्यात्मकत्वात् । एतदुक्तं भवति, देशाकृतिविषयोवर्णप्रमाणसंस्थानादिभिरन्योन्यविशिष्टानां स्वल- 20 क्षणानामेव सामान्यात्मकत्वं नान्यत्सामान्यमस्त्यतोऽनुपपन्नमनेकैकत्वापत्तिसामान्यगोचरस्वलक्षण एवार्थ इति ।

ननूक्तमनेकैकत्वापत्तिसामान्यगोचरमिति तन्न, यस्मान्न च सङ्घातः कश्चिदस्ति, न च परिणामान्तरम्, तेषामनारब्धस्वलक्षणकार्यत्वात्, एवमणुष्वपि तथा, तस्मान्न स्वार्थे सामान्यगोचरं ज्ञानमिति । 25

स्वलक्षणत्वेनाभिमतं स्वलक्षणमपि वस्तुतो न स्वलक्षणमित्याह—अथ वेति । अथोभयमाह—स्वलक्षणाभिमतमिति अनेकैकीभावात्—अनेकेषां परमाणूनामवयवानामेकत्वेन भवनादित्यर्थः सामान्यमपि न स्वलक्षणमित्याह—सामान्यमपीति ननु सामान्यस्यास्वलक्षणत्वं सिद्धमेव साध्यत इत्याशङ्कते सामान्येति । स्वार्थत्वेनेति, सामान्यगोचरत्वेन स्वार्थत्वे-नाभ्युपगतत्वात् स्वलक्षणत्वं सिद्धमिति भावः । अनेकार्थमन्यत्सर्वं सामान्यगोचरमसत्प्रत्यक्षमित्यादिकं त्वयाऽवश्यमभ्यु-पेयमित्याह—अवश्यञ्चैतदिति, यतोऽनेकार्थमन्यत्सर्वं सामान्यगोचरमित्यत्र प्रत्यक्षदोषोदाहरणेन शमीशाखापत्रेषु 30 स्पष्टं प्रदर्शितम् तत्प्रत्यक्षस्यानुमानत्वादिदोषजातं विषयसङ्करश्च प्रत्यक्षानुमानयोर्यथा । आरादिति अवयवविभागमभ्यास्य-न्यादिदेशादिव्यवस्थाः पत्रविशेषा एव स्वलक्षणाः सामान्यात्मत्वञ्च सामान्यविशेषसामान्यमस्ति तत्सामान्यमेवाक्षेपेण, न तु त्वयाभ्युपगम्यमभ्युपगम्य इति सत्यमस्वाभिमिति भावः । ननूक्तमिति अनेकैकत्वाभावादेकत्वात् सम्मतं व्यतिरेके-

(ननूक्तमिति) भवत्सामान्यवादी, न च परिमाणान्तरं वस्त्वतिरिक्तं त्वन्मतेन, कस्मा-द्धेतोः ? तेषां–पत्राणामनारम्भकत्वलक्षणकार्यत्वात्, न हि पत्रविशेषैरारब्धं किञ्चित्कार्यान्तरमस्ति, त एव ह्यनारम्भकलक्षणाः पत्रविशेषाः सन्निधाय कार्यीभूताः, तस्मान्न तेष्वन्यत्सामान्यमस्ति, एवमणु-ष्वपि–परमाणुष्वपि, तथा–न किञ्चित्सामान्यमस्ति, तस्मान्न स्वार्थे सामान्यगोचरं ज्ञानमिति ।

5 यदपि चोक्तमनेकद्रव्योत्पाद्यत्वात्तत्स्वायतने सामान्यगोचरमित्युच्यते, न तु भिन्नेष्व-भेदकल्पनादिति, साऽपि त्वदिष्टा नोपपद्यते, न हि तदनेकद्रव्योत्पाद्यम्, किन्तु समयात्, न च समयः सामान्यम्, ततो न स रूपादिभ्यो भेदेन कश्चिदस्ति, अत एव न प्रत्यय-स्यालम्बनं युज्यते, अभूतत्वाद्वन्ध्यापुत्रवत् ।

(यदपीति) साऽपि–सामान्यगोचरताऽपि च न घटते, यस्मान्न तदनेकद्रव्योत्पाद्यम्, कुतस्त-
10 र्ह्युत्पद्यते ? समयात्, न च समयः सामान्यम्, तस्मान्न च स रूपादिभ्यो भेदेन कश्चिदस्ति रूपादि-समयः, अत एव न प्रत्ययस्यालम्बनं युज्यते, प्रत्ययो ज्ञानम् । किं कारणम् ? अभूतत्वाद्वन्ध्यापुत्रवत् ।

स्यादाशङ्का आभासज्ञानोत्पत्तेरालम्बनं भविष्यति समुदायोऽकारणे सत्यपि, एतत् कुतः ? अकारणत्वादेवालम्बनत्वाभावे का कथाऽऽभासार्थस्येत्यत आह–

अनालम्बनत्वाच्चाभासार्थमपि तन्नास्ति, वन्ध्यापुत्रस्यानाभासवत्, स्वाभासं हि यस्य
15 ज्ञानेन स्वाभावावभासः, असत्त्वादनात्मकत्वात् कुत आभासविज्ञापनम् ?

(अनालम्बनत्वाच्चेति) अनालम्बनत्वाच्चाभासार्थमपि तन्नास्ति, किमिव ? वन्ध्यापुत्र-स्यानाभासवत्, यथा असत्त्वादनालम्बनं वन्ध्यापुत्रः, अनालम्बनत्वाच्चानाभासः, तथा समय इति, स्वाभासं हीत्यादि, विषयो हि नाम यस्य ज्ञानेन स्वभावावभास इति लक्षणोपपत्तिरेवात्र व्यापार्यते, वस्तुनः कुतः ? असत्त्वादनात्मकत्वात्, यस्त्वात्मना स्वभावेनासिद्धः स न विषयः स्वाज्ञानस्येति,
20 का युक्तिः ? असत्त्वात्तत्सामान्यस्यात् परमार्थसत्त्वाभावात् कुत आभासविज्ञापनम्,–परमार्थोपपत्त्या विज्ञापनम्, विज्ञप्तिर्युक्तिरिति पर्यायात्, दूर एवत मात्वीत्यर्थः ।

एवं तर्हि स्वे तु परमाणवः आरभमानस्ते विषमतो यान्तु भेदमुच्यते, ते नाभासमुत्पादयन्ति

[illegible] एव इत्य तत एव ग्रहणं । येन कार्यान्तरमारभ्यते तत्रापि तेषां विशेषाः कार्यान्तरस्य सामान्य-मस्ति, न तथा पत्रविशेषैः कार्यान्तरमारब्धं किन्तु त एव [illegible] कार्यीभूताः अतो नान्यत् सामान्यमस्तीत्येवं परमाणुष्वपि
20 सामान्यमिति भावः । नोपपद्यत इति [illegible] सामान्यगोचरत्वात्प्रसिद्धं तज्ज्ञानं [illegible] न [illegible] ततोऽपि न रूपादिभ्यो भेदेन कश्चिदस्ति न वा समयः सामान्यम्, अत एवाभूतत्वात् [illegible] न [illegible] भवितुमर्हति [illegible] । [illegible] कारणं [illegible] नास्ति विषय [illegible] समुदायात्मकत्वात् [illegible] युज्यत [illegible] इत्याह [illegible] । एतत् कुत इति [illegible]
30 [illegible] । [illegible] नास्ति [illegible] वन्ध्यापुत्रवदिति न [illegible] अनालम्बन-त्वाच्चेति [illegible] ज्ञानं स एव विषय इति तथाभिमतम्, [illegible] नास्ति परमार्थ[illegible] भावात् अत एवं [illegible] इति न [illegible] विषय इत्याह–स्वाभासं हीत्यादीति । परमाणवोऽप्यतीन्द्रियत्वा[illegible] [illegible] एवं तर्हीति परमाणवं

चुमलमतीन्द्रियत्वादतीन्द्रियत्वं निराभासत्वाद्विषयवदिति प्रत्यक्षज्ञानं नोत्पद्यते निरालम्बनत्वात्, खपुष्पवत् ।

(एवं तर्हीति) इतिशब्द उपसंहारे, इतीत्थमनालम्बनत्व सञ्चयत्वाणूनाञ्च सिद्धं प्रत्यक्षता नस्य, तस्मात् प्रत्यक्षज्ञान नोत्पद्यते निरालम्बनत्वात्, खपुष्पवत् ।

अतः प्रत्यक्षस्याभावे स्ववचनाभ्युपेक्षाक्षेपदुस्तरविरोधप्रस्तुतेश्च कल्पनापोढं प्रत्यक्षमि 5
त्येतल्लक्षणमनर्थकं स्यात्, तस्मिन्नभ्युपेतेऽपि तु सञ्चितालम्बनप्रत्ययत्वेनैवास्य प्रत्यक्षता सिध्यति, स्वमतेनैव तदाभासं, कल्पनात्मकत्वात् ।

(अत इति) अतः प्रत्यक्षस्य निरालम्बनस्य खपुष्पवदनुपपत्तेरुक्तोपपत्तिविधिना कल्पनापोढस्य सविषयस्य प्रत्यक्षस्य ज्ञानस्य वाऽभावे प्रतिपादिते स्ववचनाभ्युपेक्षाक्षेपदुस्तरविरोधप्रस्तुतेश्च कल्पनापोढं प्रत्यक्षमित्येतल्लक्षणमनर्थकं स्याल्लक्ष्यस्याभावात् परविपाकस्य कुण्ठतीक्ष्णादिनिर्देशवत्, 10
अभ्युपेतेऽपि तु विषये दोषः, स चाभ्युपगम्यमानोऽपि विषयः सञ्चय एव सम्भाव्येत, न परमाणवोऽतीन्द्रियत्वात् स चालम्बनप्रत्ययो ज्ञानस्य सञ्चयस्तस्मिन्नभ्युपेतेऽपि तु सञ्चितालम्बनप्रत्ययत्वेनैवास्य प्रत्यक्षता सिध्यति, स्वमतेनैव तदाभासत्वात्, तदाभासत्व कल्पनात्मकत्वात् ।

उक्ता च कल्पनात्मकता 'तदुभयमपि भ्रान्तिज्ञानात्मकत्वात्, भ्रान्तिः संज्ञासंख्यासंस्थानवर्णान्यथाकल्पनात्, मृगतृष्णिकाप्रत्ययवद्विचन्द्रप्रत्ययवदलातचक्रप्रत्ययवत् कामलोपहतचक्षुषो नीलकपीतप्रत्ययवदि'ति । 15

(उक्ता चेति) संज्ञा च संख्या च संस्थानञ्च वर्णश्च तेषां तेषामन्यथाकल्पनादन्यथाप्रतिपत्तिरेव ते कल्पनाऽभिमता, संज्ञासंख्यासंस्थानवर्णानामन्यथाप्रतिपत्तेर्मृगतृष्णिकाप्रत्ययवद्विचन्द्रप्रत्ययवदलातचक्रप्रत्ययवत् कामलोपहतचक्षुषो नीलरूपपीतप्रत्ययवदिति यथासंख्य दृष्टान्ताः, यथाक्रमञ्च हेत्वोर्भ्रान्तिज्ञानात्मकत्वे साध्ये, तस्य प्रत्यक्षत्वाभावे साध्ये तत्समर्थनार्थं उत्तरो ग्रन्थः । 20

तदर्थमुपसंहृत्यान्ते साधनम् 'अत इदं नैव प्रत्यक्षम्, अतथाभूतार्थाध्यारोपात्मकत्वात्, भ्रान्तिवत्, अथवा तत एव हेतोः संवृतिसंज्ञानवदप्रत्यक्षम्', तद्व्याख्या यथा–

परमार्थतः सत्त्वात् तमात्मन्यर्पयन् ज्ञानं तदाकारमवभासयतीति परमाणुश्च विषयः स्यादालम्बनत्वं स्यादिति भावः । नालम्बनता तेषामतीन्द्रियत्वादित्याह–तेनाभासत्वमिति । एवञ्च कल्पनापोढं प्रत्यक्षमित्यलक्षणम्, कल्पनात्मकत्वात् प्रत्यक्षस्य निरालम्बनत्वाच्च स्ववचनाभ्युपेक्षाक्षेपदुस्तरविरोधप्रस्तुतेश्च परविपाकस्य कुण्ठतीक्ष्णादिनिर्देशवदिदमनर्थकत्वं सावयुतिरित्याह–अत इत्यादिना 25
तेनैव वचनेन पूर्वापरेण प्रस्तुयमानेन दुस्तरस्य विरोधस्य प्रसञ्जितत्वं । आलम्बनमभ्युपेत्य विषयमभ्युपेत्यापि दोषमभिधत्ते तस्मिन्नभ्युपेतेऽपि स्थिति स च विषयः सञ्चय एव वाच्यो न तु परमाणुरतीन्द्रियत्वात्, एवञ्च तत् प्रत्यक्षं सञ्चितालम्बनत्वं वाच्यम्, स च प्रत्यक्षाभास एव स्वमतेन कल्पनात्मकत्वात्, कल्पनात्मकत्वं च प्रत्यक्षत्वविरुद्धमिति भावः । कथं तस्य कल्पनात्मकत्वमित्यत आह–उक्ता चेति संज्ञासंख्येति मृगतृष्णिकाप्रत्ययः सलिलाद्यन्यथाप्रतिपत्तिरूप उदकादि मृगतृष्णिकायां जलबुद्धेः । द्विचन्द्रप्रत्ययः एकस्यान्यथाप्रतिपत्तिरूपः चन्द्रस्यैकत्वात्, अलातचक्रप्रत्ययः संस्थानेनान्यथाप्रतिपत्तिरूपः अलीक- 30
चक्रस्य चक्राकारत्वाभावात् नीलरूपे पीतप्रत्ययो वर्णेनान्यथाप्रतिपत्तिरूपः चक्षुर्गतपीतत्वात्मा अन्यत्र विभ्रमात्, तदर्थमुप संहृत्येति । अन्ते–पूर्वपक्षिणो बौद्धस्याभिधर्मकोषे प्रत्यक्षविज्ञानमित्येवमञ्जरयान्ते इत्यर्थं । अत्रापि तद्व्याख्यानुपलम्भेन स्वधुमूलस्यासम्भवविवेकः कर्तुमसमर्थाः संदृब्ध इति सुधीभिर्मीमांस्यम् । अतथाभूतेति, अस्याकारं हि अध्यारोपितं वस्तु तत्र तथात्वं समारोप्यते समारोप्यमाणं हि प्रत्यक्षमसाधारणम् तथा चातथाभूतार्थाध्यारोपात्मकत्वात् भ्रान्तिज्ञानमिव

गोपालेत्यादिना दृष्टान्तं समर्थ्य तथा संवृतिसतीत्यादिना दार्ष्टान्तिकसमर्थनम्। संवृतिल क्षणे ज्ञापकमाह 'यस्मिन् भिन्न' इति श्लोकः।

(तद्वदिति), भ्रान्तिवत्—मायास्वप्न मीरजलपयावनरथमारिमकमेघ क्रियाभ्रान्ति मुक्त मोक्षचतुर्विधभ्रान्तिवत्, यथमयत्तु व्यवहारप्रसिद्धस्य परमाणुनीलस्वभावस्य सर्वज्ञात्वभामूतार्थप्र 5 परिसाधर्म्यात्।

यस्मिन् घटे भिन्ने कपालशकलशर्करादिविभागेन घटाभिमताद्वस्तुनोऽन्येष्वपो कपालादिषु न घटबुद्धिरस्ति, तदभावे तद्रूपाभावात्, अङ्कुराभावे मुष्टिबुद्धिवत्, अतोऽ ङ्गुल्यतिरेकेण मुष्ट्यभाववत् कपालादिव्यतिरेकेण घटाभाव इति संवृतिसन् घटः, एवं क्रि सम्भवे क्रियया पोहे। यत्रापि क्रियया पोहो न सम्भवति तत्रापि धियापोहेऽन्येषां रूपादी 10 घटस्य समुदायाच्च तद्बुद्धिरस्ति, रूपादिसमुदायस्य च परमाणुरूपाद्यपोहे न तद्बुद्धिरर्व वर्तते दृष्टान्तोऽम्बुवत्, एकस्मिन्नपि जलबिन्दौ जलबुद्धिदर्शनात्, रूपादिषु पुनर्बुद्ध्याऽ हेषु न तोयबुद्धिरस्तीत्येतत्संवृतिसतो लक्षणम्। अथवा यस्मिन् घटे भिन्नेऽवयवशो तद्बुद्धिर्भवति तद्घटवत्संवृतिसत्, यत्र चाम्बुबुद्ध्याऽन्योन्तरापोहे न तद्बुद्धिरर्थान्तरनिर्भ रूपस्य वस्तुनः स्वरूपाभावादभिलाप्यादिनिवृत्तिमात्रं व्यवहारप्रसिद्धत्वात्तदपि संवृतिसत् 15 परमार्थसदन्यथा, एतद्विपरीतलक्षणम्, तस्य एव विविक्तरूपं पद्यते रूपं रस इत्यादि प रमार्थसत् प्रत्यक्षगोचरमिति'। एतदपि परमार्थसद्वित्यभिमतं संवृतिसल्लक्षणानतिवृत्तेरस यथोक्तविधिना। यथा रज्जौ सर्प इति ज्ञानं, तदर्शी तत्रापि सर्पवत्सत्त्वविभ्रम इ प्रत्यक्षं नीलादिविषयं चक्षुरादिविज्ञानं शाक्यपुत्रीय भ्रान्तिवदिति।

(यस्मिन्निति) (अपरेषेति) यथोक्तविधिना संवृतिसदेव सर्वमपीत्यत्रापि ज्ञापकोदाह 20 वस्तुतायामिहिते रज्जौ सर्प इति ज्ञानम्, तावदेव रज्जौ सर्प इति विपर्ययज्ञानं भवति यावद दाविभिर्विशेषलिङ्गादर्शनम्। विशेषतस्तु तद्व्यापारयदृष्टौ सत्यां यादृक् सर्पदर्शनं यावदेऽनर्थक सापि स्मृतुद्धिन्नयावे दृष्टौ सत्यां यथा सर्प इति ज्ञानमनर्थकं तथाभार्थिका, तद् आह—यथ तत्रापि सर्पवद्बुद्धिभ्रम इति। एवमन्यथा कल्पितया सर्पविण्डज्ञानानां संवृतिसद्विषयत्वेति सम्पूर्ण

लघुर्व प्रत्यक्षमपि नैव प्रमाणं वस्तितामप्रमाणमसत्यतैवेत्यक प्रमाणत्वादिति भावः। यस्मिन् भिन्न इति 'यस्मिन् भिन्ने 25 तद्बुद्धिरन्यापोहे धियाऽपि च। घटाम्बुवत्संवृतिसत् परमार्थसदन्यथा' इति कारिका। तमेवं कारिका व्याख्याति—यस्मिन् भिन्न इति। एवं क्रियासम्भव इति यत्र क्रियया मुद्गराभिघातनिर्देशेन अवयवविभागेन भेदे सति न तद्बुद्धि र्भवत्यत्याख्यानं कृतम्, यत्र क्रियया भेदः कर्तुं न शक्यते तत्राह—यत्रापीति द्वितीयचरणव्याख्येयम्, बुद्ध्या भ दे रूपादिव्यपोहेऽपि तदा तद्बुद्धिर्भिद्यते रूपे च परमाणुर्भागेऽपि रूपबुद्धिः भवत्येव एव अतदन्यपरमार्थसदि व्यावृत्तस्य जलेऽपि जलबिन्दौ जलबुद्धिरस्त्येव सदा यथेति यस्य भेदस्य क्रियया बुद्ध्या वा न कर्तुं श 30 किन्तु सतो विविधं तत्त्वं सत् तदेव परमार्थसदित्यर्थः। यद्रूपस्य परमार्थसत्त्वेनाभिमत तदपि भेदाभिधिना संवृतिस त्वमाह—एतदपीति। अभिलापैव प्रत्यक्षाभिमतस्य बुद्ध्या भेदे परमाणोरेकस्वभावत्वा न रूपोऽपीति इतिरर्थ परमाणुरपि व्यतिरेकेति भावः। तद्व्यापारयदृष्टौ सत्यामिति रज्जुरेव यदा सर्प इत्यनुपलम्भे दृष्टे व्यक्तिर त्वेन रज्जुबुद्धिरुत्पद्यते भवति यस्य विवेकेन रज्जुव्यवस्थितं भवतीत्याह—तत्रापीति तद्व्यवस्थितेति विवेकाद

प्रसक्तं नीलमिति विषयं चक्षुरादिविज्ञान साक्षात्पुत्रीयं भ्रान्तिचमिति । एव तावत्कल्पनापोढप्रत्यक्षलक्षण-सन्निहितालम्बनमपञ्चविज्ञानकायमन्वविरोधोद्भावनचोद्योपक्रमाभावपरिहारार्थमानेकार्थजन्यस्वार्थसामान्य गोचरवाक्यस्य समसङ्गो दोषोऽभिहितः ।

अधुना यदेतदनेकरूपेष्वाविमन्यचोद्यप्रारोऽस्यात्कल्पनात्मकत्वपरिहारार्थं यथोक्तमायतनस्य धण प्रतीति तत्कथमित्येतत्परिहारार्थस्य तस्य वाक्यस्य दोष वक्तुकामः परपक्षमेव तावत् प्रत्युच्चारयन् व्याचष्टे सूरिष्टीकाकारलिखित लिखम्—

यावदेकाकारपरिकल्पनादिति, उत्तरन्त्वत्राप्यनेकार्थविषयैकप्रत्ययत्वात्—तेषु परमाणुषु प्रत्येकमतीन्द्रियेषु समुदितेष्वसमुदितेषु वा प्रत्ययाभावात्तत्समूहोऽनेकार्थविषयः स एवैकः प्रत्ययः, समूहालम्बनतदाभासज्ञानोत्पत्त्यभ्युपगमात्, अर्थमेवविषयज्ञानाभ्युपगमे च 'विजानाति न विज्ञान'मित्यादि विरुध्येत, तस्मादेकप्रत्ययोऽनेकार्थविषय एकार्थकल्पस्तत एव सामान्यकल्पस्तदतद्विषयतया तदतद्भूतसामान्यगोचरः ततश्चास्वलक्षणो विषयः, अतएव संवृतिसत्त्वयतस्मात् कल्पनात्मको निर्देश्यश्चेत्येवमाद्यस्माभिः प्राक् प्रक्रान्तं तत्सुतराम्, शेषं त्वयैव भावितमनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमिति परिहारं ब्रुवता ।

(यावदिति), गतार्थम्, उत्तरं त्वत्रापि, अपिशब्दात् पूर्वस्मिन्नर्थविकल्पे व्याख्याता दोषा-स्तेऽत्रापि सम्भवन्ति, कथमिति चेत् ? अनेकार्थविषयैकप्रत्ययत्वात्, अनेकोऽर्थः परमाणवः, तद्विषय एक इति प्रत्ययः, सोऽनेकार्थविषयैकप्रत्ययः, तद्भावादनेकार्थविषयैकप्रत्ययत्वात् । (अस्वलक्षणो विषयः) त एव हि परमाणवः स्वलक्षणम्, न तत्समूहः सामान्यत्वात्, अत एव संवृतिसत्त्वयः सः, तस्मात्—अस्वलक्षणविषयत्वात् ।

किञ्चान्यत्—

भवदभिमतप्रत्यक्षस्याप्रत्यक्षत्वसाधने च द्वे अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचर त्वादिति क्लेशेनोपनीते त्वयैव ।

(भवदिति) मा भूत् स्वाभ्युपगमदोषव्यवस्थितिरित्युक्ते कुशाग्रमनतर्कगम्ये न स्फुटे, कतमे द्वे ? अनेकार्थजन्यत्वात्, स्वार्थे सामान्यगोचरत्वादिति चैते द्वे ।

इत्यर्थः । तत्रापि— इत्थे । एवं तावदिति कल्पनापोढं ज्ञानं प्रत्यक्षम् सन्निहितालम्बनाः पञ्च विज्ञानकाया इति मन्योरपि विरोधे चोद्यमिति तत्परिहारार्थं अनेकार्थजन्यत्वात्स्वार्थे सामान्यगोचरमिति वाक्यमुपन्यस्तम् तच्च दूषितमिति भावः । यथोक्तमनेकप्रकारमिवैकानेकाभ्यासात्कल्पितस्य [illegible] चोदिते तत्परिहारार्थमाक-[illegible] प्रतीते [illegible] न [illegible] कथं [illegible] विचारः [illegible] इति [illegible] विचार्यते यावदेकाकारेति, समूहालम्बनेति [illegible] भावः । अर्थमेवेति [illegible] इत्यर्थः । अनेकार्थविषय एकार्थकल्प इति [illegible] सामान्यगोचरो-ऽभ्युपेय इत्यर्थः [illegible] । एते द्वे इति [illegible] न च स्फुटे [illegible] इत्यर्थः ।

तत्र तावत्प्रथमं साधनम्—

तदभिमतप्रत्यक्षमप्रत्यक्षम्, अनेकार्थजन्यत्वात्, अनुमानवत्, अनुमानमपि हि पक्षधर्माद्यनेकार्थजन्यम्, ज्ञापकः स हेतुरिति चेन्न, अत्रापि तुल्यत्वात्, कारकत्वस्यानेकत्वदर्शनात् साध्यसाधनधर्माभ्यामैकान्तिकता जायते ।

5 (तदभिमतेति) दृष्टान्तेऽनुमानेऽनेकार्थजन्यत्वमसिद्धमिति मा मंस्थाः, यस्मादनुमानमपि पक्षधर्माद्यनेकार्थजन्यम्, पक्षधर्मः सपक्षानुगमो विपक्षव्यावृत्तिरित्यनेकार्थेन जन्यतेऽनुमितिज्ञानम्, तथैतदपि प्रत्यक्षमनेकपरमाण्वर्थजन्यमिति, ज्ञापकः स हेतुरिति चेत्, अयमर्थः—अनुमाने पक्षधर्मादिरनेकोऽप्यर्थो धूमत्वकृतत्वादिरुत्पत्त्यादिज्ञानस्य न कारकः, किन्तर्हि ? पूर्वसिद्धमेवाग्नि-ज्ञानादिर्न सम्बन्धं स्मारयतीति ज्ञापकः स हेतुः, इतरस्तु प्रत्यक्षज्ञानस्य कारकोऽर्थस्तस्माद्वैधर्म्यात्

10 दृष्टान्तः इत्येवमाशुक्तम्, अत्रापि तुल्यत्वात्, कारकत्वमपीत्यादि, अनुमानमिति यदुच्यते, अनुमानमपि कार्यं कारकानेकत्वादर्थाज्जायते, कस्मात् ? साध्यसाधनधर्माभ्यामैकान्तिकता, पक्षधर्मसपक्षानुगम विपक्षव्यावृत्तिमत एकान्तिकात्, अग्निमान् प्रदेशो धूमवत्त्वात् कृतीमूलकवत्, अनित्यः शब्दः कृतकत्वा-द्घटवत्, न नदीवत्ताकारणमिति कारको हेतुरेवानुमानेऽपि दर्शयेत् ।

इतर आह—

15 असन्निहितानेकार्थजन्यत्वादनुमाने नैतत्साधर्म्यमुपपद्यते, अत्रोच्यते, ननु धूमादिरपि सन्निहित एव गृहीतोऽग्न्यादिकमर्थं इव गमयतीति कारकस्याव्यभिचार उभयत्र ।

(असन्निहितेति), असन्निहितानेकार्थजन्यत्वादनुमाने नैतत्साधर्म्यमुपपद्यते कस्मात् ? अस-न्निहितानेकार्थजन्यत्वादनुमानस्य, सन्निहितानेकार्थजन्यत्वाच्च प्रत्यक्षस्य, तेषामभिन्नसन्निहितासन्निहिता-र्थविषयं अनुमानं तद्विपरीतविषयं प्रत्यक्षमिति । अत्रोच्यते नन्विति प्रसिद्धानुमापने, ननु धूमोऽपि

20 मस्तकविशिष्टप्रदेशधर्मो चक्षुर्भूतसन्निहितोऽन्वयव्यतिरेकसहितोऽग्निमत्त्वविज्ञानं प्रदेशे जनयति, अनुम-मुदायो यथा रूपविज्ञानं गमयति, अग्निर्न ज्ञानं जनयतीति विज्ञानोत्पत्तौ कारकस्याव्यभिचारादुभयत्रेति ।

हेतुभस्मयोऽसौ धूमोऽनुमाने कस्मात्पाया हेतोः, निर्विकल्पं हि ज्ञानमविपरीतमव्यपदेश्यं प्रत्य-क्षमतो वैधर्म्यो दृष्टान्त इति चेदय कथं साधनानविपरीतिर्भूमः ? हेतुभस्मयस्यार्थस्येन्द्रियाविष-

---

पक्षधर्म इति यथा [illegible] [illegible] अन्यते तथा

25 प्रत्यक्षमपि अनेकपरमाणुभिर्जन्यत इति भावः । [illegible] कारकमिति [illegible] [illegible] कारकतीति [illegible] न तु कारकः [illegible] [illegible] कारका [illegible] न तुल्य इत्याह ज्ञापकः स हेतुरिति चेदिति । [illegible] कारकहेतुरित्याह-अत्रापि तुल्यत्वादिति । न [illegible] विपक्षः । [illegible] [illegible] दृष्टान्तधर्मि[illegible]—असन्निहितेति । [illegible] साधर्म्य—[illegible]

30 धूमोऽपि [illegible]—नन्विति । [illegible] [illegible] कारकस्याव्यभिचार उभयत्रेति यथा [illegible] धूमादिरपि [illegible] एव [illegible] कारकस्याव्यभिचरितमिति भाव । उभयत्रेति प्रत्यक्षेऽनुमाने चेत्यर्थः । कस्मात्पाया हेतोरिति [illegible]

पत्त्वादिति चेन्ननु सञ्चयनहेतुप्रत्ययोऽप्यनधिपतिरिन्द्रियाविषयत्वात्, तस्मात् सर्वथा तुल्य-मुभयं कारकत्वेन। तथा स्वार्थे सामान्यगोचरत्वादनुमानवत्प्रत्यक्षमिति।

हेतुप्रत्यय इत्यादि, यावत् हेतुः प्रत्ययो निमित्तमालम्बनमित्यर्थः, असौ धूमोऽनुमाने निमित्तमनधिपतिप्रत्ययः, अन्यत्वात् हेतोः, निर्विकल्पं हि ज्ञानमधिपतिप्रत्ययं प्रत्यक्षं न तथाऽनुमा-नमतो वैधर्म्योऽत्र दृष्टान्त इति चेत्—एतच्चाशङ्क्यमपसे, अत्र परेणैवोत्तरं वाचयितुकाम आह—अत्र कथमि-त्यादि, इदमसिद्धं दृष्टान्तम्, कथं साधनानधिपतिर्धूम इत्यभ्यालम्बनमित्यर्थः। इतर आह—इन्द्रियाविष-यत्वाद्धेतुप्रत्ययस्याप्यनधिपत्यस्य। आचार्य आह—ननु सञ्चयनहेतुप्रत्ययोऽप्यनधिपतिः, इन्द्रियाविष यत्वात्,—परमाणुसञ्चय एव प्रत्यक्षेऽप्यनधिपतिः, तस्यापि हेतोरिन्द्रियाविषयत्वात्, सञ्चयस्य पर माणुव्यतिरिक्तस्यासत्त्वादिति विस्तरेण प्रागभिहितमेतत्। तस्मात् सर्वथा तुल्यमुभयं कारकत्वेनेति। तथा स्वार्थे सामान्यगोचरत्वादनुमानवत्प्रत्यक्षमित्येतच्चिह्नं साधने कारकहेतुत्वप्रतिपादनार्थः प्रपञ्च-एतस्य इत्यतिदिशति।

अनुमानं वा प्रत्यक्षं स्यात्, अनेककार्यजन्यत्वात्, स्वार्थे सामान्यगोचरत्वादिति।

अनुमानं चेत्यादि, वाशब्दो विकल्पार्थः, यदि प्रतिपादितमिव युक्तिबलात् प्रत्यक्षस्य स्वाभिमतस्यानुमानत्वं यथा, तथापि कथमदस्तन्मनसा स्वसमयप्रसिद्धमनुपालिना नेष्यते, प्रत्यक्षत्व मेवेष्यते तत्प्रत्यक्षस्यासाधर्म्यादनुमानं वा प्रत्यक्षं स्यादनेककार्यजन्यत्वात् स्वार्थे सामान्यगोचरत्वादित्ये-ताभ्यामेव हेतुभ्यां प्रत्यक्षवदित्येते अपि द्वे साधने केचनोमीते न स्फुटे इति।

किञ्चान्यदेतदात्मैव हेतुद्वयाद्विपर्ययैक्यापत्तेः प्रमाणैक्यमित्यत आह—

द्वयमप्येतदेकमेव, एकलक्षणत्वादिति प्रत्यक्षमेवैकं प्रमाणं तदुभयं स्यादनेककार्यजन्य सामान्यैकगोचरत्वात्, चक्षुरादिद्वारजन्मप्रत्यक्षभेदप्रत्यक्षवत्, अनुमानमेव वा स्यात्, तत एव कारणात्सूक्ष्मत्वाद्यनुमितान्यनित्यादिज्ञानानुमानवत्।

(द्वयमपीति) स्वसामान्यलक्षणं द्वेकमेव वस्तु विषयोऽस्य प्रमाणस्येत्युक्तविधिना प्रसक्तत्वात्। इदानीं चक्षुरन्यो: स्वगुरोस्ततोऽर्थोऽभिधान प्रत्यक्षमिति ब्रुवतो यथुत्तरमभिहित परगुणमत्सरादिष्ट चेतसा तस्यापीश्वरां परमोदासीनचेतसा तु येन केनचिदभिप्रायेण स्वमत दर्शितमेव भिन्नेन वस्तुत्व-

---

कल्पनानधिपतिप्रत्ययोऽपि तु हेतुप्रत्यय परमाणोरालम्बनात्स्वलक्षणाधिपतिप्रत्ययो निर्विकल्पकप्रत्यक्षज्ञाते तत्रालम्बनार्थो-ऽभावैकम्यमित्यर्थं। इदमसिद्धमिति साधनार्थानधिपतिर्धूम इत्यसिद्धमित्यर्थः। तदभिधानाद्युपलब्धौ चक्षुरादीनां प्रत्या-सत्त्यादिपत्यात्ततो हेतुप्रत्ययस्येन्द्रियाविषयत्वात् साधनमनधिपतिप्रत्यय इति पूर्वपक्षमति—इन्द्रियाविषयत्वादिति। परमाणुव्य-वस्थापि परमाणुव्यतिरिक्तत्वादिनिरूप्य प्रत्यक्षेऽप्यधिपतित्वमिन्द्रियाविषयत्वादित्युत्तरयति—ननु सञ्चयनहेत्विति। द्वितीय साधनमभिदधाद—तथा स्वार्थे इति। इत्थं स्वाभिमतप्रत्यक्षस्यानुमानत्वे स्वपक्षबाधनाभ्यामेवोपपादितेऽपि यदि कार्यैकमद्वे एवानुरक्तचित्तत्वात् तस्मिन् विपर्ययादिपक्षत्वात् स्वानुमानत्वं नेच्छति तत एव हेतुभ्यामनुमानमपि प्रत्यक्षं स्यादित्याह—अनुमानं वेति। प्रमाणैक्यप्रसङ्गमाह—द्वयमपीति। प्रत्यक्षस्यानुमानस्यापि कार्यकारणजन्यत्वसामान्यमेको विषयो यत इत्यर्थः। यथा चक्षुरादिद्वारजन्मनामेकप्रत्यक्षत्वमपोऽन्यथाऽनेकत्वमापद्यत प्रत्यक्षत्वं न स्यात् इत्थं प्रत्यक्षस्यैकप्रा-धान्ये। अनुमानस्यैकत्वाधारे तु यथाऽनुमितिविषयानित्यत्वानुमित्याद्यनेकानुमितिप्रमाणेऽनुमानत्वं यथा तथा प्रत्यक्षस्यापि एकत्वमनुमानत्वं स्यादिति भावः। स्वसामान्यलक्षणमिति। स्वलक्षणसामान्यलक्षणमेव वस्तु विषयः पर

प्रत्यक्षलक्षणं दूषयता, यस्य पुनरर्थो योऽस्तु सोऽस्तु किं नोऽनेन, इदमेव तावदस्तु रूपादिभ्या लम्बनार्थो वक्तव्य इति विकल्प्य विकल्पद्वये दोषजातं तदगुणे प्रत्यक्षं तथापि समानमिति प्रतिपादयिष्यन्नयचक्रकारः सविशेषं तन्मतविरोधहेतुं तद्वचनवनितमाह—

अनेकार्थजन्यत्वात् स्वार्थसामान्यगोचरतायां यथाभासं तेषु ज्ञानमुत्पद्यते, तथा च 5 आलम्बनं रूपादयः, प्रत्येकं परमाणुरूपस्य द्वयाद्यवसन्निवेशात् समुदयकृतं तदाभासत्वा-त्ताऽऽलम्बनम् ।

(अनेकार्थेति) अनेकार्थजन्यत्वात् स्वार्थसामान्यगोचरतायामित्यादि भिन्नार्थयोः तुल्यो-च्चरत्वात्, स्वार्थ इति नीलादिः स एव किल सामान्यमनेकार्थजन्यत्वात्, अनेकार्थाः परमाणवस्तज्जन्यं नीलविषयं प्रत्यक्षमत इन्द्रियस्य स्वार्थ इति, एतस्यामनेकार्थजन्यत्वात् स्वार्थसामान्यगोचरतायां यथाभासं 10 तेषु ज्ञानमुत्पद्यते तथा च आलम्बनं रूपादय इति नीलपीतादिस्तेन यथैवाभासन्ते तथैवालम्बनमपि ज्ञेयमिदम्, किं कारणं न एव नीलादिपरमाणवो आलम्बनमिति नेदुच्यते प्रत्येकं परमाणुरूपस्य द्वयाद्यवसन्निवेशात्, एकैकं प्रत्येकं परमाणूनां यन्नीलादिरूपं तस्यातीन्द्रियत्वाद्द्वयाद्यवसन्निवेशात्, तस्मात् किं प्राप्तं ? समुदयकृतं तदाभासत्वात्ताऽऽलम्बनमित्येतत् प्राप्तं, नीलादिरूपस्य तत्समुदायात्मकत्वात् ।

एवञ्च सति प्रत्यक्षार्थं एवं ज्ञायते, तद्यथा अर्थसन्निकर्षोदयं प्रति यदुत्पद्यते तज्ज्ञानं 15 प्रत्यक्षमिति ज्ञानमर्थेन विशेष्यते ।

(एवञ्चेति) एवञ्च सति—परमाणुसमुदायनीलादिनिर्भासत्वात्ताऽऽलम्बनत्वे सति प्रत्यक्षार्थं एवं ज्ञायते, यथा—अर्थसन्निकर्षोदयं प्रति यदुत्पद्यते तज्ज्ञानं प्रत्यक्षमिति ज्ञानमर्थेन विशेष्यते,—अर्थेनेन्द्रियस्य सन्निकर्षादुत्पन्नमतं ज्ञानमर्थं प्रति इत्येवः प्रत्यक्षमिति ज्ञानेऽर्थस्य विशेषणता, सन्निकर्षाद्योऽर्थं प्रति यो वर्तते इत्यर्थः स प्रत्यक्षः, अर्थेन्द्रियसन्निकर्षोदयं प्रतिवृत्तेः प्रत्यक्षमित्यस्याद्युपचरित-20 वृत्तिरर्थोऽप्येष विशेष्यत इति ।

अत्रोच्यते—

न तदुपपद्यते प्रत्यक्षम्, तस्यार्थस्याभावात्, न च सञ्चयोऽर्थः, संवृतिसत्त्वात् संवृतिसत्त्वमग्न्यत्वात्, धाम्येयवत्, अतो न सावृत्त्यपि प्रत्यय इष्यते इति सोऽर्थो न विशेषणेन विशेष्यः । तस्माज्ज्ञानत्वप्रत्यक्षस्याभ्युपगमहानिः ।

25 (नेति) एवञ्च सतीत्युक्तार्थं सञ्चयः प्रसक्तः इत्यभ्युपगम्य दूषयति—यस्मात् न सञ्चयोऽर्थः,

---

मात्रत्वं तस्य वस्तुनः न गोचरताभिति भावः । अथ तयोऽर्थादिज्ञानं प्रत्यक्षमिति तदुक्तलक्षणं दूषयता विवेन तदुपरि दर्शने प्रत्यक्षमभ्यर्थो वक्तव्य इति विकल्पद्वये विचार्य दर्शितम्, तत्रैव तदैव दूषणं तथापि प्रकृतमत इत्याह—अनेकार्थजन्यत्वात्वेति । अयं नीलादिविषयं नीलादिरेवेन्द्रियस्य स्वार्थं तदुत्तरतः स निर्भासत्वात्ताऽऽलम्बनमनेकार्थजन्यत्वात्, परमाणुरूपस्य अतीन्द्रियत्वेन द्वयाद्यवसन्निवेशाद्यात्मकमिति भाव । परमाणुसञ्चयेति परमाणूनां सञ्चयस्य एकोऽपि तस्येन निर्भास-20 तया प्रत्यक्षस्यालम्बनत्वे सति प्रत्यक्षप्रत्यक्षार्थं एवं ज्ञायत इत्यर्थः । ज्ञानमर्थेन विशेष्यत इति नीलादिनाऽर्थेन ज्ञानं विशेष्यते नीलज्ञानं पीतज्ञानमिति विषयत्वं प्रत्यक्षत्वेऽप्यनुपपन्नमित्याह—सन्निकर्षादिति । अतः प्रत्यक्षं नीलं प्रति अभिधेयमर्थेऽप्येष विशेष्यते । संवृतिसत्त्वेनार्थस्य एव तस्य ज्ञानाभावात्मकत्वं प्रत्यक्षं अतः प्रत्यक्षं निराकरणमिति कि

किं कारणं नायः सम्भय इति चेत् संवृतिसत्त्वात्, संवृतिसत्त्वमप्यसत्त्वात्, वान्ध्येयवत्, अतः-एतस्मात् कारणात् सापूर्वपश्चिमप्रलय इष्यते, यस्यां प्रलय आलम्बनप्रलय इत्यर्थः, सोऽसत्त्वात्मे ष्यते, इति हेत्वर्थे, एतस्मात् कारणात् सोऽर्थो न विशेषणेन विशेष्यः, तस्मात् विशेषण-विशेष्यत्वाभावात्, ज्ञानस्य प्रत्यक्षत्वाभ्युपगमहानि, ज्ञानं प्रत्यक्षमित्येवाभ्युपगतम्, विशेषणस्य विशेष्यस्य चावस्थाभावात् किं विषयं ज्ञानं प्रत्यक्षं स्यादिति दीप्यते । 5

किञ्चान्यत्—

चक्षुरादिषु ज्ञानेष्वतः स्वनिर्भासव्यतिरिक्तप्रमेयाभावः, ततश्च तैमिरिकस्य केशोन्दु-कमशकमक्षिकाद्विचन्द्रादिदर्शनवत् सा स्वसत्त्वप्रतिपत्तिरेव, तस्माचस्य ज्ञानस्याप्रत्यक्षत्वमस्य तत्कृतविज्ञानवत् तेन त्वया प्रतिज्ञातं तत्प्रत्यक्षत्वं निराक्रियते, तन्निराकरणादनुमानविरोधः ।

चक्षुरादिषु ज्ञानेष्वत इत्यादि यावदनुमानविरोधः, चक्षुरादीन्द्रियबुद्धयः स्वविषयनिर्भास 10 स्वरूपमात्रा एव, ज्ञानत्वात्, वस्तुत्वात्, सत्त्वात्, तैमिरिकादिज्ञानवत्, अतश्चक्षुरादिविज्ञानेषु स्वनिर्भासव्यतिरिक्तप्रमेयाभावः, ततश्च तैमिरिकस्य केशोन्दुकमशकमक्षिकाद्विचन्द्रादिदर्शनवत् सा स्व-सत्त्वप्रतिपत्तिरेव, असद्वस्तु सदस्त्विति प्रतिपत्तिः, तस्मात्तयोरसत्प्रतिपत्तेः—विषयप्रतिपत्तेश्चास्य ज्ञानस्याप्रत्यक्षत्वं प्रसिद्धमसत्कृतविज्ञानवत्, तेन—अप्रत्यक्षत्वेन प्रसिद्धेन त्वया प्रतिज्ञातं तत्प्रत्यक्षत्वं निराक्रियते, तन्निराकरणादनुमानविरोधः । 15

ननु प्रत्यक्षनिराकरणात् प्रत्यक्षविरोधोऽयं कथमनुमानविरोध इति, अत्रोच्यते स्वन्म तेन स्वपक्षधर्मस्य विपक्षस्योक्तानुमानेन निराकरणात्सिविकल्पकप्रत्यक्षत्वाभावात् कतमत्तत्प्रत्यक्षं येन निराक्रियेत, यद्वा निराकुर्यात् ? अतोऽनुमानविरोध एवायम् । किञ्चान्यत्, घटसत्यो-पक्षेपणमतापटत्वाद्याकारज्ञानानामपि प्रत्यक्षत्वप्रसङ्गः, कथमिति चेदुच्यते यथा चात्र भवन्म तेन समानासमानानेकार्थजन्येन्द्रियस्यार्थापत्त्युत्पद्यते तदपि च तैमिरिकवदप्रमाणम्, यथा 20 द्विचन्द्रदर्शने तथा समानानेकवर्णमणिसमूहजन्येन्द्रियस्यार्थोत्पद्यमानमपि तैमिरिकवदप्रमाण स्यात्, समानानेकार्थादतथाभूतार्थान्मण्यादिसङ्घातादन्य हि तत्, यदि समानासमानाने

विषयं ज्ञानं प्रत्यक्षं स्यादिति भावः । वान्ध्येयवदिति वन्ध्यापुत्रवदित्यर्थः । स्वनिर्भासेति चक्षुरादीन्द्रियबुद्धिषु विषय-रूप एवो निभासते तन्मात्रा बुद्धय न तद्व्यतिरेकः कश्चन पदार्थोऽस्ति यथा तैमिरिकबुद्धौ निर्भासमानाः केशोन्दुकादयो द्विचन्द्रादयश्च न एतयो प्रतिपत्तिरसत्यविषयत्वादिति यत्नेन निर्भासनात् प्रतिपत्तिरेव विभिन्नमपि ज्ञानमप्रत्यक्षं स्यादिति 25 तत्प्रत्यक्षत्वं भवता निराकृतं इत्यनुमानविरोधः स्यादिति भावः । अनुमानविरोधं चादनाद्—स्वन्मतेनेति । प्रत्य-क्षत्वप्रसङ्ग विपक्षभूतस्य प्रत्यक्षस्यापि ज्ञानस्याविरोधेन निराकरणात्तथाप्यनुमानस्यैव विरोध आपन्न इति भावः । तस्यैव निर्विकल्पप्रत्यक्षमात्रं विषयः सविकल्पप्रत्यक्षम् । निराकरणार्थिनं प्रत्यक्षं प्रत्यक्षम् अतश्चाप्रतिपत्तेरसत्कृतविज्ञान-वदनुमानेन वा निराकरणादिति बोध्यम् अतश्चाप्रतिपत्तिरेव ज्ञानमिव विज्ञानमिति मानसिकमित्यर्थः । घटसत्यमिति, इत्यनुमानप्रत्यक्षविरोधस्य परस्परमसमीक्षितमित्यर्थः । अर्थं चात्र घटादिपटस्य इत्यत्र ज्ञानमुत्पद्यते यदा गौणादिप्रत्यक्षतयेत्र 30 स्यादिति न चेदुत्पत्तेर्नष्टस्य परमाणोरिन्द्रियाभिघातप्रत्यक्षत्वमभ्युपेयम्, तस्मादेकार्थजन्यत्वेऽपि नीलादि मात्रमेव अनेकार्थजन्यत्वात् अत एव न भावो न घटुनश्च किन्तु वैशेषिक त्वदभ्युपगमेऽप्युत्पन्नं ज्ञानं

कार्यात्तथाभूतार्थात् प्रज्ञप्तिसत्त्वःपरमार्थसदाकारो लभ्यत त एव हि परमार्थसन्तः परमाणवो नीलादित्वेनाभासन्त इति तद्विषयं ज्ञानं प्रत्यक्षमिष्टम्, तदा निराकृतेभ्यः सत्यपरत्वेन घटसंस्था-नाकारेभ्यः समानासमानानेकार्थसम्बन्धेन्द्रियसन्निकर्षेभ्यः प्रत्यक्षज्ञानजनकार्थसधर्मभ्यः परमार्थ-सदाकारो लप्स्यते नीलादिसद्भाववदिति घटः संयुक्तो वियुक्तः परोऽपरः स्पन्दत इत्यादिज्ञानं 5 प्रत्यक्षं स च तद्विषयः प्रत्यक्षः स्यात्, संवृतिसदालम्बनत्वान्नीलादिविज्ञानवत्, नीलादिविज्ञान तदर्थश्च न प्रत्यक्षे वा स्याताम् संवृतिसत्त्वाद्घटादिविज्ञानार्थवत्, त एव हि परमाणवो य एव घटादित्वेनाभासन्ते य एव नीलादित्वेनाभासन्त इत्येवमुभयोस्तुल्ये जनकत्वे तत्कृत घटनी-लाद्याभासज्ञानं प्रत्यक्षं न घटाद्याभासमिति ।

नन्विति, यथा चात्रैतावदिदार्थोन्विक्षुक्त्वा दृष्टान्तवत्साधर्म्येण वर्णयति—यथा चात्र भव-10 त्यनेन समानासमानानेकार्थसम्बन्धेन्द्रियसन्निकर्षात्—समानेन नीलादिवर्णेनानेकेन परमाणुसद्भावलक्षणे-नार्थेन चक्षुरिन्द्रियसन्निकर्षो भासाधारणो यस्याभिमतलक्षणसन्निकर्षः कस्मात्? तस्य तथा समानेकार्थ-सम्बन्धात् सार्थसामान्यगोचरं ज्ञानमिति यथाभ्युपगमात्समानार्थत्वेऽपरत्वात् तादृश्यपरोपबृंहणवे ज्ञानमित्यभिसंबध्यते, तदपि च तैमिरिकवदप्रमाणम्, तिमिरे भवं तैमिरिकम्, यथा द्विचन्द्रदर्शनम् तथा समानेनाप्यनेकवर्णमभिसमूहेन चक्षुरिन्द्रियसन्निकर्षो नैवकत्वाज्ज्ञानमुत्पद्यमानं तदपि च तैमिरिक-15 वदप्रमाणम्, कुतः? यस्मात् समानानेकार्थात् तथाभूतार्थान्तरस्यादिसद्भावावलम्बं—उत्पद्यते, अतथाभूतार्थत्वमस्य संवृतिसत्त्वात्, अत आह—समानासमानानेकार्थात्तथाभूतार्थात्—नीलादिसद्भावात् प्रज्ञप्तिसतः—आलम्बनात्संवृतिसतः परमार्थसदाकारो—नीलादिको लभ्यते, यतस्त एव हि परमार्थसन्तः परमाणवो नीलादित्वेनाभासन्त इति तद्विषयं ज्ञानं नीलादिप्रत्यक्षमिष्टम् । तदा निराकृतेभ्यः सत्य-परत्वेन घटसंस्थानाद्याकारेभ्यः—घटसंस्थानोत्क्षेपणसत्त्वापरत्वाद्याकारेभ्यः प्रत्यक्षज्ञानजनकैसधर्मभ्यः, कथमेव 20 साधर्म्येण सधर्मभ्य इति चेदुच्यते समानासमानानेकार्थसम्बन्धेन्द्रियसन्निकर्षेभ्य इत्यतस्सधर्मभ्यः, किमुक्तं भवति समानासमानानेकार्थतथाभूतार्थेभ्यः परमार्थसदाकारो लप्स्यते नीलादिसद्भाववदिति, अत वस्तुपसंहारं चावगमाह घटः संयुक्तो वियुक्तः परोऽपरः स्पन्दत इत्यादिज्ञानं प्रत्यक्षम्, स च तद्विषयः प्रत्यक्षः स्यात्, संवृतिसदालम्बनत्वान्नीलादिविज्ञानवत्, नीलादिविज्ञानं तदर्थश्च न प्रत्यक्षे वा स्याताम्, संवृतिसत्त्वात्, घटादिविज्ञानार्थवत् । चाक्षुषस्य विरुद्धार्थत्वादुभयत्र प्रामोत्पादकार्थो-25 विशेषः । तदुपसंहरति—त एव हि ते हि परमाणवो य एव घटादित्वेनाभासन्ते य एव च नीलादित्वेना-भासन्त इति । एवमुभयोर्नीलादिघटादिविज्ञानयोस्तुल्ये जनकत्वे तत्कृत एव नीलाद्याभासज्ञानं प्रत्यक्षं न घटाद्याभासमिति, तदभिमानारम्भत् कारणं नास्तीत्यर्थः ।

अपि तैमिरिकज्ञानवदप्रमाणम्, तथैवानेकसमानेन्द्रियसन्निकर्षेणोत्पद्यमानमपि समानैकार्थतथाभूतार्थात् प्रज्ञप्तिसत्त्वार्थोत्पन्नत्वात् । यदि तु समानानेकार्थतथाभूतार्थात् संवृतिसतो नीलादिसंभवात्तदर्थोत्पत्तिरुच्यते नीलादिज्ञानस्य परमा-30 र्थसत्त्वमपि नीलादिनाभासतैमिरकल्पनात् प्रत्यक्षमिष्यते तर्हि समानासमानानेकार्थेन्द्रियसन्निकर्षेभ्यस्तथाभूतार्थेभ्यः प्रज्ञप्तिसत्त्वमानमपि सर्वप्रमाणारं ज्ञानमपि परमार्थसत्त्वमूलेन घटसंस्थानाद्याभासत्वेनाप्यवभासनात् प्रत्यक्षं स्यात्, अन्यथाच तद्विशेष एवानेकसरैनासत्त्वे नीलादीनामभ्यपि तत्र प्रत्यक्षत्वं न स्यात्, तस्मात्तदिति अत्र । प्रत्यक्षज्ञानजनकार्थसधर्मभ्य इति, नीलादिप्रत्यक्षस्य जनकीभूतो योऽर्थः नीलादिसंघातरूपः तस्य येन

तुल्याभासासनसामर्थ्याविशेषाच्च अनैकान्तत्वविशेषमेव दर्शयति—

यथैव हि परमाणवो ज्ञानस्याकारसन्निवेशविशिष्टाः सामान्यत आभासन्ते तथा घटादिविज्ञानेष्वप्याकारविशेषेण समुदितास्त एवाभासन्ते, नान्यो घटो नामास्ति यस्तथा भासेत, तथास्थेषु रूपादिष्वेव घट इति बुद्धिः प्रवर्तते प्रज्ञप्तिश्च, एवं तथास्थेष्वेव परमाणुषु नीलादिरूपबुद्धिः प्रवर्तते प्रज्ञप्तिश्चेति । 5

यथैव हीत्यादि यावत्समुदितास्त एवाभासन्त इति, अत्र च घटापरमाण्ववयवसमुदायता च नीलप्रत्यक्षाभासत्वात्, तथास्थेषु—तेन प्रकारेण स्थितेषु । सर्वमुभयत्र तुल्यम् ।

अत्र परेणोभयोर्वैधर्म्यप्रदर्शनार्थम्—

अथोच्येत नीलादिसमुदाये नीलादिद्रव्यसदाकारो विद्यते, तदण्वात्मकत्वात्तेषाम्, अणूनां द्रव्यसत्त्वात्तत्प्रत्यक्षत्वं न्याय्यम्, न तु घटाद्याकारोऽतत्परमाणुत्वात्, तथाऽसत्त्वात् । 10

अथोच्येत नीलादिसमुदाय इत्यादि यावत्तथाऽसत्त्वादिति, नीलादिसमुदाये नीलादि द्रव्यसदाकारः—परमार्थसदाकारः स विद्यते, किं कारणं ? तदण्वात्मकत्वात्तेषाम्, नीलादीनामण्वात्मकत्वात्, अणूनां द्रव्यसत्त्वात्तत्प्रत्यक्षत्वं न्याय्यम्, न्यायादनपेतं न्याय्यं युक्तमित्यर्थः, तद्विषयस्य च ज्ञानस्य प्रत्यक्षत्वं तत्प्रत्यक्षत्वम् । न तु घटाद्याकारः—न त्वस्ति घटसंख्योत्क्षेपणाद्याकारोऽतत्परमाणुत्वात्, तस्याकारस्य परमाणुत्वं तत्परमाणुत्वं न तत्परमाणुत्वमतत्परमाणुत्वमतोऽतत्परमाणु 15 त्वात् । ततः किं ? तथाऽसत्त्वात्—तेन प्रकारेणासत्त्वात्—परमाणुत्वेन तेषां घटाद्याकाराणामसत्त्वात् ।

अत्राचार्य उत्तरमाह—

एतच्च तुल्यमुभयत्राविशेषात्, यथैव तस्मिन् रूपादिसमुदाये घटाद्यनाकारता, तद् अणुत्वात् तथाऽसत्त्वात्, एवं रूपाद्याकारस्यानाकारता, अनन्तरोक्तहेतोः सञ्चितस्यैन्द्रियकत्वात्तस्यैवालम्बनत्वात् तदनणुत्वात् तथाऽसत्त्वात्, अन्यथाऽविषयत्वादनालम्बन 20 त्वाच्च एवाप्रत्यक्षत्वात् ।

(एतच्चेति) एतच्च तुल्यमुभयत्राविशेषात्, परमाणुद्रव्यत्वादेव नीलादिघटाद्याकारप्रत्यक्षयोः । यथैव तस्मिन् रूपादिसमुदाये घटाद्यनाकारता तदनणुत्वात्, तस्य घटाद्याकारस्यानाकारता तस्या-

---

[illegible] सावयवानेकार्थव्यपेक्ष्य [illegible] घटादिर्व्यादिसमुदायेभ्यो घटसंख्यादिरूपस्य [illegible] परमार्थपरमाणुसमुदाये स्यात् नीलादिर्घटादिरूपतयेति भावः । स च—घटादिर्घटादिः तद्विषयः प्रत्यक्षाभिमत- 25 [illegible] । यथैव हीति नीलादिवत् परमाणव एव सामान्येनाकारसन्निवेशविशिष्टा यथाऽवभासन्ते तथैव घटादिष्वपि परमाणव एवाकारसन्निवेशविशेषेणावभासन्ते समुदितपरमाणुभ्योऽव्यतिरिक्तत्वाद्घटादेः । यथा तेन प्रकारेण स्थितेष्वेव रूपादिषु घट इति बुद्धिः तद्विषया प्रज्ञप्तिश्च प्रवर्तते एवमेव तेन प्रकारेण स्थितेषु परमाणुष्वेव नीलरूपबुद्धिः तद्विषया प्रज्ञप्तिश्च प्रवर्तते इत्याभासनसामर्थ्याविशेषादनैकान्तिकत्वविशेषाभावेन नीलघटाभासयोः प्रत्यक्षं न घटाद्याभासमिति विशेषो न युज्यते कर्तुमिति भावः । ननु नीलरूपस्य हि परमाणवोऽणवो नीलादिसमुदाये नीलादिपरमार्थसदाकारे विद्यते न तु घट- 30 संख्याद्याकाराः परमाणवः तस्माद्घटादिज्ञानेषु न घटादिपरमार्थसदाकारत्वात् परमाणूनां मतिमात्र एव नीलादिज्ञानस्य तद्विषयस्य च प्रत्यक्षत्वं युक्तं न तु घटादिज्ञानस्य तद्विषयस्य चेत्याशयेनाह—नीलादिसमुदाय इति । अतत्परमाणुत्वादिति घटसंख्याद्याकाराणां परमाणुत्वाभावादित्यर्थः । अविशेषमाह—परमाणुद्रव्यत्वादेवेति । उभयोरिति घटाद्यपेक्षया—नीलादिघटाद्याकारप्रत्यक्षयोरिति । रूपाद्याकारस्यानाकारतेति न रूपाद्याकारः परमाण्वात्मक

कारस्यानणुत्वात्, तथाऽसत्त्वात् अनणुत्वेन घटाद्याकारेणासत्त्वात्, अणुत्वेनैव सत्त्वात्, एव रूपाद्याकारस्याप्याकारस्य, अनन्तरोक्तहेतोः सञ्चितस्यैन्द्रियकत्वात्–परमाणुसमुदायस्यैन्द्रियकत्वात्, तस्यैवालम्बनत्वात्, असञ्चितस्यातीन्द्रियत्वात्, अत एवानालम्बनत्वात्, तदनणुत्वात्,–एवं सञ्चितस्यैन्द्रियकस्यालम्बनस्यानणुत्वात् तथाऽसत्त्वात्–अनणुत्वेनासत्त्वात्, अन्यथाऽविषयत्वात्–परमाणुत्वेनाविषयत्वात्, अविषयत्वेनानालम्बनत्वात्, अत एवासत्त्वात्।

किञ्चान्यत्—

पक्षान्तरापत्तिरेवं यदाभासं तेषु ज्ञानमुत्पद्यते तथा नाऽऽलम्बनमित्येवं पक्षं परित्यज्य यथा ते विद्यन्ते तथा नाऽऽलम्बनमित्ययं पक्ष आश्रितो भवति, अस्मिन्नपि च पक्षे त्वयैव वस्तुधर्मं प्रत्युक्ता ये दोषास्ते तथापि स्युः, यस्मात्त्वयाऽपि चार्थ पक्षोऽङ्गीकृत एव, यथाच प्रत्यक्षोत्पत्तिर्बीजसञ्जननार्थमुक्त प्रत्येकञ्च ते समुदिताः कारणमिति, तत्रानेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरमित्यस्य व्याख्यायां पुनर्वस्तुधर्मं दूषयितुकामेन विकल्पितः स एवार्थः। किम्? यथा विद्यमाना अन्याभासस्यापि विज्ञानस्य कारणं भवन्ति तथा प्रत्यक्षस्याऽऽलम्बनं रूपादय इति पूर्वपक्षत्वेनैतयोश्च वचनयोरेकार्थत्वात्सावपि पक्षोऽभ्युपगतस्त्वया, एवमपि न च आऽऽलम्बनमतीन्द्रियत्वाद्गगनवत्।

(पक्षान्तरेति) पक्षान्तरगमनञ्च चापाततानायेति। किञ्चान्यत्–(अस्मिन्नपीति) कथमिति चेदर्शयति–(यथा चेति), ततः को दोष इति चेत्? (एवमपीति) अतीन्द्रियत्वात्–इन्द्रियगोचरातीतत्वात्। इन्द्रियज्ञानालम्बनं न भवन्ति परमाणवः।

किञ्चान्य उत्तरदोष उच्यते—

अभ्युपगम्याप्येवंविधाऽऽलम्बनतामन्यथाविद्यमानाः परमाणवः समूहाभासस्यापि ज्ञानस्य कारणं भवन्तीति धूमोऽग्निप्रत्यक्षज्ञानालम्बनं स्यात्, तथाविद्यमानस्येऽन्याभासस्यापि ज्ञानस्य कारणीभवनात्, त्वदुक्तप्रत्यक्षालम्बनवत्, यथा त्वदुक्तस्य प्रत्यक्षस्यालम्बनं परमाणवोऽन्यथाविद्यमानाः समूहाभासज्ञानस्य कारणं भवन्ति तथा धूमोऽपि तत्साधर्म्याच्चाग्निज्ञानालम्बनत्वात् प्रत्यक्षालम्बनतामात्मनः ज्ञापयति, धूमनिमित्ताग्निज्ञानं वा प्रत्यक्षं

इत्यर्थं नीलादिज्ञाने यो नीलाद्याकारः स संवित्रोऽन एवैन्द्रियकोऽत्र एव चालम्बनम् परमाणुस्वभावस्तोऽत्र एवातीन्द्रियोऽन इत्यालम्बनमिति चर्चं नीलाद्याकारः परमाणवाकार इति भावः। अनन्तरोक्तहेतोरिति प्रत्येकं परमाणुत्वस्य दुरात सञ्चितस्येऽन्द्रियत्वं। पक्षान्तरापत्तिरिति यदाभासं तेषु ज्ञानं तथा ते नालम्बनमिति वस्तुधर्मं दूषयितुं तथालम्बन मित्येव पक्ष आश्रयणीय परन्तु तथाऽदोषोऽपीति मन्यता यथा ते विद्यन्ते तथा नालम्बनमित्येवं पक्षः किन्तु इति पक्षान्तरस्य विवरणं प्राप्त इति भावः। एवं यथार्थं पक्षोऽङ्गीकृत इत्यादि–प्रत्येकञ्च त इति अत्रोक्तस्य यथार्थं ज्ञानमुत्पद्यते तथालम्बनमिति यदा तथा परमाणूनामेव समुदितानां द्विविधोपादानत्वेन कारणत्वं अनेकार्थजन्यत्वादित्युक्त्वा च यथा ते विद्यन्ते तथालम्बनत्वेन प्रत्यक्ष कारणमिति पक्ष आश्रितः स एव प्रत्यक्षस्यालम्बनमन्यथा चार धीमत्याऽऽहीति ओमन्ति। नीरस्तरत्वात्–एवमपि न त आलम्बनमिति। उत्तरदोष इति, पूर्वमुक्तेभ्योऽन्यं दोषं उत्तरं इत्यर्थः। तथाविधालम्बनताभ्युपगमेऽप्यङ्गीकृत्येऽपि दोषमभिधानुमाह–अभ्युपगम्यापीति। अन्यथाऽविद्यमाना–परमाणुरूपत्वेन विद्यमाना इत्यर्थः। ननु धूमोऽग्निप्रत्यक्षालम्बनं कथं

स्यात्, अन्यथाविद्यमानत्वेऽन्याभासविज्ञानजनकार्थालम्बनत्वात्, स्वदुष्कमत्यक्षवत्, तस्मा-
देव हेतोश्चक्षुराद्यप्यालम्बनं स्यादयमपमतिप्रसङ्गदोष एववादिनो यदि कारणमालम्बनं विज्ञा
नस्यान्याभासस्यापीष्टम् ।

अभ्युपगम्याप्येवंविधालम्बनतामित्यादि यावत्स्वदुष्कमत्यक्षालम्बनवदिति, अन्यथा
विद्यमानाः परमाणवः—अतीन्द्रियत्वेन विद्यमानाः समूहाभासस्यापि ज्ञानस्य कारणं भवन्तीत्येवं-
विधालम्बनतायां सत्यां धूमोऽग्निप्रत्यक्षज्ञानालम्बनं स्यात्, तथाविद्यमानत्वेऽन्याभासस्यापि ज्ञानस्य
कारणीभवनात्—धूमत्वेन विद्यमानो धूमोऽन्याभासस्य अग्न्याभासज्ञानस्य कारणीभवन्नुपलभ्यत इति
पक्षधर्मत्वमस्यास्य, स्वदुष्कमत्यक्षालम्बनवदिति दृष्टान्ते तस्य सपक्षानुगमनं दर्शयति—यथा स्वदुष्कस्य
प्रत्यक्षस्यालम्बनं परमाणवोऽन्यथा विद्यमानाः—परमाणुत्वेन विद्यमानाः समूहाभासज्ञानस्य कारणं
भवन्ति तथा धूमोऽपि तत्साधर्म्यात्तज्जनितज्ञानालम्बनत्वाप्तेः प्रत्यक्षालम्बनतया व्याप्तत्वात् प्रत्यक्षाल-
म्बनतामात्मनः साधयति । धूमनिमित्ताग्निज्ञानं वा प्रत्यक्षं स्यात्, तथाविद्यमानत्वेऽन्याभासविज्ञान
जनकार्थालम्बनत्वात्, स्वदुष्कमत्यक्षवत्, तत्साधर्म्यादेव स्वदुष्कमत्यक्षं समूहार्थेनाप्रत्यक्षं स्याद्धूम
जनितान्यज्ञानवत् । किञ्चान्यत्—तस्मादेव हेतोश्चक्षुराद्यप्यालम्बनं स्यात्, एवमयमतिप्रसङ्गदोष
एव वादिनः—यदि कारणमालम्बनं विज्ञानस्यान्याभासस्यापीष्टं ततश्चक्षुरादीन्द्रियाणि चक्षुरादि
विज्ञानानामालम्बनानि स्युः, अन्यथा विद्यमानत्वेऽन्याभासस्यापि विज्ञानस्य कारणीभवनाच्चक्षुरि
न्द्रियं चक्षुर्विज्ञानस्यालम्बनं स्यात् रूपादिपरमाणुवत्, तज्ज्ञानं वा चक्षुरिन्द्रियालम्बनं स्यात्तद
न्यत्वे सत्यन्याभासत्वात् परमाणुसम्यग्रूपविज्ञानवत्, एवं श्रोत्रादिविज्ञानानि । परमाण्वालम्बनमभ्यु-
पगम्यायं दोष उक्तः ।

न च ग्राह्यस्य नीलादेर्विषयस्य चक्षुरादिविज्ञानस्य नीलादिपरमाणव आलम्बनम्,
अन्यथा विद्यमानत्वाच्चक्षुरादिवत् । तदसाधारणविषयत्वाद्वा रसज्ञानवत् ।

न च ग्राह्यस्य नीलादेर्विषयस्येत्यादि, चक्षुरादिभिर्ग्राह्यस्य नीलादेः समूहात्मकस्य विषयो
गोचरः सम्भवति चक्षुरादिविज्ञानं तस्य नीलादिपरमाणवो नालम्बनम्, अन्यथा—परमार्थतो विद्यमान
त्वात्, चक्षुरादिवत्, नीलादिमात्रविषयज्ञानालम्बना न भवन्ति परमाणवः, यथा चक्षुरादीन्द्रियाण्यन्यथा
परमार्थतोऽनीलादिपरमाण्वात्मकानि सन्ति अन्यथा नीलादिज्ञानोत्पत्तौ हेतुभावं बिभ्रति नालम्बनानि
तथा परमाणव इति । इतश्च परमाण्वालम्बनं न भवति चक्षुर्विज्ञानम्, तदसाधारणविषयत्वाद्वा, तस्मा-

अन्यथाविद्यमानत्वे अन्याभासज्ञानस्य हेतुत्वात् स्वदुष्कमत्यक्षालम्बनवदित्यनुमानम्, अत्र हेतोः पक्षधर्मत्वं दर्शयति—धूम
त्वेन विद्यमान इत्यादिना । दृष्टान्ते साध्ये हेतोरनुगमं दर्शयति—यथा स्वदुष्कस्येति । उपनयनिगमने दर्शयति—
तथा धूमोऽपीति । व्यापकं परमाणुजनितसमूहाभासज्ञानस्य प्रत्यक्षत्वं धूमजनिताग्निज्ञानस्यापि प्रत्यक्षत्वं स्यादित्याह—धूम-
निमित्ताग्निज्ञानं वेति । स्वदुष्कमत्यक्षस्याप्रत्यक्षत्वं वा स्यादित्याह—तत्साधर्म्यादेवेति । परमाणुवच्चक्षुरादी-
नामप्यालम्बनत्वमित्याह किञ्चान्यदिति । चक्षुरिन्द्रियस्य चक्षुर्विज्ञानालम्बनत्वं चक्षुरिन्द्रियालम्बनत्वं वा ज्ञाना-
न्तरे—चक्षुरादीन्द्रियाणीति । ननु चक्षुरिन्द्रियमपरमार्थतोऽनीलादिस्वरूपं चक्षुरादिविज्ञानस्य न नीलादिपरमाणव
आलम्बनम्, अन्यथा विद्यमानत्वे एतस्याभासस्य विज्ञानस्य कारणत्वात्, चक्षुरादिवदिति प्रयोगमाह न च ग्राह्यस्येति ।
परमाण्वालम्बनत्वं निरस्यति । अनुमानं परमाणुः—तदसाधारणेति । तदसाधारणविषयत्वाद्वेति

साधारणविषयत्वाच्चक्षुर्विज्ञानस्य, असाधारण्य एवैको नीलपरमाणुर्विषयोऽस्येति तदसाधारणविषय-
त्वम्, तच्च सिद्धं प्रत्येकं च ते समुदिताः कारणमिति वचनात्, तस्मादसाधारणविषयत्वाद् रसज्ञा-
नवत्, यथा रसज्ञानमसाधारणविषयत्वान्नीलपरमाण्वालम्बनं न भवत्येवं चक्षुर्विज्ञानमपि, नासम्भा-
व्यनीलपरमाणुश्चक्षुर्विषयो न भवत्यसाधारणविषयत्वात्, असाधारणाश्च ते विषयाश्च, रसज्ञान-
5 वत्, रसज्ञान इव रसज्ञानवत्, यथा रसज्ञाने रसलक्षणोऽर्थोऽसाधारणविषयत्वादनन्यत्वेनैव चक्षु-
र्विज्ञानविषयो न भवत्येव नीलपरमाणुश्च इति ।

इतर आह—

ननु च प्रत्येकमेव ते समुदिताः कारणमित्युक्तमेव, तथासन्त एव समुदिताः परमाणव
आलम्बनम्, तदवस्थेष्वपि ज्ञानोत्पादनशक्त्यभिव्यक्तेः, सा हि प्रत्येकं विद्यमाना नाभिव्यज्यते,
10 चक्षुरादिपरमाणूनामिव, न ह्येक इन्द्रियपरमाणुर्विषयपरमाणुर्वा विज्ञानमुत्पादयितुमलम् न
तत्समुदायः प्रज्ञप्तिसत्त्वात्, तस्मात् प्रत्येककारणतायामणूनां समुदाये दर्शनशक्त्यभिव्यक्तिः,
शिबिकावाहकसमुदाये वहनशक्तिवत् वैधर्म्येणाभ्युपगमे प्रत्येकमदर्शनवैलक्षण्यं च ।

ननु च प्रत्येकमेव ते समुदिताः कारणमित्यादि यावदभ्युपगमे प्रत्येकादर्शनवैलक्षण्यं
चेति, ननु मया विशिष्योक्तं प्रत्येकमेव ते समुदिताः कारणमिति, किमुक्तं भवति? तथासन्त एव
15 परमाणुत्वेन परमार्थसन्त एव समुदिताः परमाणवश्चक्षुरादिज्ञानोत्पत्तिहेतुत्वादालम्बनम् । किं कारणम्?
तदवस्थेषु ज्ञानोत्पादनशक्त्यभिव्यक्तेः, सः समुदायः अवस्था येषां ते तदवस्थाः तदवस्था एव
हि ज्ञानमुत्पादयितुं शक्ताः, सा हि ज्ञानोत्पादनशक्तिः प्रत्येकं विद्यमाना नाभिव्यज्यते समुदायेऽभि-
व्यज्यते को दृष्टान्तः? चक्षुरादिपरमाणूनामिव प्रत्येकं रूपदर्शनप्रधानानामपि न सा शक्तिरभिव्य-
ज्यते समुदाये त्वभिव्यज्यते, तदालम्बनपरमाणूनामपि, विषयविषयिपरमाणूनां प्रत्येकं वस्तुसतीनाम-
20 प्यसमुदितानां शक्त्यभावं तुल्यं दर्शयति—न हीन्द्रियपरमाणुर्विषयपरमाणुर्वा विज्ञानमुत्पादयितुमलमिति,
न तत्समुदायः प्रज्ञप्तिसत्त्वात्—नापि तेषामिन्द्रियविषयपरमाणूनां समुदायो विज्ञानमुत्पादयितुमलं
प्रज्ञप्तिसत्त्वात्—परमार्थतोऽसत्त्वादित्यर्थः । तस्मात्प्रत्येकमेव प्रति कारणभावः—प्रत्येककारणता, तस्यां
सत्यामेव प्रत्येककारणतायामणूनां समुदाये दर्शनशक्त्यभिव्यक्तिः किमिव? शिबिकावाहकसमुदाये वह-
नशक्तिवत्, यथा शिबिकावाहकानां प्रत्येकं विद्यमानैव सा वहनशक्तिः समुदायेऽभिव्यज्यते तथेन्द्रिय-

---

25 तदिदमसाधारणविषयत्वादित्यर्थं स्पष्टेन चक्षुर्विज्ञानं प्राप्यको न व्यभिचरत्यत्र हेतौ एतदेव चक्षुर्विज्ञाने दर्शयति असाधा-
रण एवैकेति चक्षुर्विज्ञानस्य कर्मैव न गृह्णाति किन्तु धर्मेणापि एवैकासाधारणाद् असाधारणत्वादेवेति [illegible]
[illegible] रसज्ञानवदिति अभिप्रायं स्पष्टयति । ननु च
प्रत्येकमेवेति परस्परं भिन्नाः प्रत्येकमिमा ये परमाणवस्त एव [illegible] आलम्बनम्, न केवलं
परमाणु [illegible] अपि तेषां समुदाय तस्य परमार्थतोऽसत्त्वात् [illegible] आलम्बनमिति भावः ।
30 विषयविषयिपरमाणूनामिति । [illegible]
[illegible], न तत्समुदाय इति [illegible]

विषयपरमाणूनां दर्शनहेतुत्वशक्तिः, वैधर्म्येणाभ्युपगमे प्रत्येकदर्शनवैलक्षण्यं नेति, यथाऽन्धानां प्रत्येकम-सती दर्शनशक्तिर्व्यक्तिसद्भावेऽपि न भविष्यति यद्येन्द्रियविषयप्रभृतिदर्शनशक्तयो नाभविष्यन्, भवन्ति तु, तस्मात् प्रत्येकं विद्यमानशक्तय एवेन्द्रियविषयपरमाणवः समुदायेऽभिव्यक्तशक्तयो भवन्तीति—

अत्रोच्यते—

नन्वेवमभ्युपगतनिराकरणफलैवेयं प्रत्यक्षव्यवस्था, असञ्चितपरमाण्वालम्बनाश्रयणात्, 5
तथाभ्युपगतं निरुणद्धि प्रत्येकं दर्शनशक्तिस्थापनात् ।

(नन्वेवमिति) नन्वेवमभ्युपगतनिराकरणफलैवेयं प्रत्यक्षव्यवस्था, अभ्युपगतं सञ्चितालम्बनाः पञ्चविज्ञानकाया इति, तस्याभ्युपगतस्य निराकरणं फलमस्याः प्रत्यक्षव्यवस्थायाः, कुतः ? असञ्चितपरमाण्वालम्बनाऽऽश्रयणात्, प्रत्येकं दर्शनशक्तिमतामिन्द्रियविषयपरमाणूनां दर्शनशक्तिव्यक्ति-रिष्यते समुदाये नन्वसञ्चिताः परमाणवस्तद्विज्ञानोत्पादनशक्ताः प्रत्येकमभिन्नं भवति पञ्चानां 10
विज्ञानकायानामसञ्चितालम्बनत्वम्, तथाभ्युपगतं निरुणद्धि सञ्चितालम्बनत्वमिदं कल्पनान्तराश्रय-णम्, किं कारणम् ? प्रत्येकं दर्शनशक्तिस्थापनात्, शिबिकावाहकसाधर्म्येण एव दर्शनशक्तियुक्ताः प्रत्ये-कमिति भवन्ति ।

स्यान्मतम्—

ननु प्रत्येकमव्यक्तानामेव समुदाये तच्छक्त्यभिव्यक्तिरित्युक्तम्, सत्यमुक्तम्, एतदयुक्तम् 15
अनेकानन्यत्वात्, न हि ज्ञानस्य अनेकेभ्यः परमाणुभ्योऽन्यः समुदायोऽस्तीति प्रागेव वि-स्तरेण प्रतिपादितम् ।

(नन्विति) आचार्य आह सत्यमुक्तम् एतदयुक्तम्, किं कारणम् ? अनेकानन्यत्वात्, न हि ज्ञानस्य अनेकेभ्यः परमाणुभ्योऽन्यः समुदायोऽस्तीति प्रागेव विस्तरेण प्रतिपादितम्, तस्मादनेकान-न्यत्वात् समुदायाभावात् प्रत्येकं दर्शनशक्त्यभिव्यक्तिः प्रत्यक्षव्यवस्थाऽभ्युपगतनिराकरणफलैवेयम् । 20
अथवा अनेकानामन्यः प्रकारोऽन्यथा समुदायोऽन्यथास्य तत्प्रतिषेधो अनेकानन्यत्वात् तस्मात्, अने-कानां—परमाणूनामतीन्द्रियाणामन्यथात्वादैन्द्रियकत्वव्यवस्थानाभावात् समुदायस्यार्थान्तरभूतस्याभा-वादपि परमाण्वालम्बनाश्रयणं तदवस्थम् ।

समुदायो भिन्नः तस्यैव संचितरूपत्वात् [illegible] अणूनां समुदाय इति, भिन्नत्वमन्यत्वम् परमार्थतस्तु परमाणु विस्तरे; सञ्चितपरमाणुभिरिति यावत्, तेन पूर्वं समुदायो भिन्नसत्त्वादित्युक्तः अतोऽत्र कथं तत्समुदाये दर्शनशक्त्यभि- 25
व्यक्तिरित्याशङ्का परस्य वैधर्म्येणाभ्युपगमादिति, प्रत्येकमन्धेषु चाऽदर्शनशक्तिः [illegible] ननु [illegible]
दर्शनशक्त्यभिव्यक्तिरिति भावः । प्रत्येकं दर्शनशक्तिस्थापनादिति प्रत्येकं परमाणुषु दर्शनशक्तिस्वीकारे विज्ञा-नस्य तदालम्बनत्वमपि सञ्चितानामेवालम्बनत्वमिति योऽभ्युपगमः सञ्चितालम्बना एव विज्ञानकाया इत्येवंरूपो निराकृत एव भवतीति भावः । कल्पनान्तराश्रयणं—असञ्चितपरमाण्वालम्बनाश्रयणम् विरुध्यतीति शेषः । ननु प्रत्येकं शक्तिभावे समुदाये दर्शनशक्तिरिति प्रत्येकं समुदाये च शक्तिर्भेदोक्ता च केवलं प्रत्येकमेव समुदाये न तथाऽन्यथा प्रत्यक्षमुपगमात् 30
व्यवस्थानुपपत्तिनिराकरणस्य कल्पनैवापद्यते नन्विति । तदभिप्रायेणाऽऽह प्रत्येकमभावे समुदायेऽप्यभाव इत्यस्माद्दोषात् सूचित अनेकानन्यत्वमाह—अनेकानन्यत्वादिति भवतीति शेषः । भाष्यमाह—तस्मादिति । तथापि परमा-

अथवा युक्तैषा कल्पना त्वयाऽऽश्रयि, स्वलक्षणविषयं प्रत्यक्षमित्येतत्प्रतिज्ञातसंवादि-
त्वात्तन्निर्बोद्धुकामेन । प्रत्येकं ते समुदिताः कारणमित्येतद्धि प्रत्यक्षविषयसमर्थवचनमाद्यप्रति-
ज्ञातवत्, यस्मात्स्वलक्षणविषयत्वप्रतिसमाधानेन निर्वहणमेतत्, प्रत्यवेक्षितव्यार्थोपायसाध्य-
साधनसम्बन्धो हि वक्तव्यः, अहो साधु ! किन्तु पुनरत्र देवानां प्रिय ! भवति दोषजातम्,
5 किं तत् ? अनेकार्थजन्यस्वार्थसामान्यगोचरनिरसनम् । पूर्वापरानुमतनिगमनपरिग्रहेण वाऽऽ-
द्यप्रतिज्ञातार्थनिरसनम् ।

(अथवेति) अथवा युक्तैषा कल्पना त्वयाऽऽश्रयि स्वलक्षणविषयं प्रत्यक्षमित्येतत्प्रतिज्ञात-
संवादित्वात्तन्निर्बोद्धुकामेन । यस्मात् प्रत्येकं ते समुदिताः कारणमित्येतत् प्रत्यक्षविषयसमर्थवचनम्,
आद्यप्रतिज्ञातेन तुल्यं वर्तत इत्याद्यप्रतिज्ञातवत्—आद्यप्रतिज्ञातानुरूपम् । या हि प्रतिज्ञा स्वलक्षणं
10 प्रत्यक्षमिति सैतेन वचनेन न निरस्यते, यस्मात्स्वलक्षणविषयत्वप्रतिसमाधानेन निर्वहणमेतत् स्वलक्षण-
विषयं प्रत्यक्षमित्यस्याः प्रतिज्ञायाः प्रत्येकं ते समुदिताः कारणमिति ह्यवयवाऽभूतं स्वलक्षणत्वात् । प्रत्यवे-
क्षितव्यार्थोपायसाध्यसाधनसम्बन्धो हि वक्तव्यः । अहो साधु ! किन्तु पुनरत्र देवानाम्प्रिय ! भवति
दोषजातम्, किन्तत् ? अनेकार्थजन्यस्वार्थसामान्यगोचरनिरसनम्, तत्रानेकार्थजन्यत्वात् स्वार्थे सामा-
न्यगोचरमिति चोद्योत्तरपक्षपरिग्रहेण प्रत्यवेक्षितव्यार्थोपायप्रतिस्मार्थनिगमनवचनमात्रेण तु निरस्यते,
15 अथ मा भूदेष दोष इति पूर्वापरानुमतनिगमनपरिग्रहेण वा आद्यप्रतिज्ञातार्थनिरसनम्, वाक्यस्य
विरोधकत्वात् स्वलक्षणविषयप्रत्यक्षत्वं वा निरस्यते, अनेकार्थजन्यस्वार्थसामान्यगोचरता दोषत्वं वा
निरस्यत इति ।

किञ्चान्यत् प्रत्येकं समुदिताः कारणमिति यदभ्युपगम्यता इत्येतदभ्युपगतमिति तदेव पुनः ख्याप-
यति दोषान्तरैः —

20 अनेकान्तवद्द्वयोरन्तरयोरवस्थानात्म्यं तैः परमाणुभिरेकतः प्रत्येकसमुदितैः प्रत्येक-
तायाश्च ।

(अनेकान्तवदिति) द्वयोरन्तरयोरवस्थानात्म्यम्, द्वयन्तौ—द्वौ देशौ, द्वयोर्देशयोरवस्थानं तैः
परमाणुभिरेकतः प्रत्येकसमुदितैः, किमिव ? अनेकान्तवत्, अनेकान्तेन तुल्यं वर्तत इत्यनेकान्तवत्,
यथा द्रव्यान्तरपर्यायान्तरयोरवतिष्ठमानाः परमाणव एव तत्समुदायमेति व्यपदिश्यन्ते, तथा प्रत्ये-

---

25 कावस्थानमपि तत्समुदायमेवेति एवमाद्यनेकान्तप्रसङ्गः—अथवा अनेकान्तानामिति । परमाणूनामनेकत्वात् तीक्ष्णोऽपि दोषान्तरमाह—अथवेति प्रत्येकेषां स्वलक्षणविषयं प्रत्यक्षमिति वाक्यस्य प्रत्येकं ते समुदिताः कारणमिति अनेन तस्य निर्वाहः कृतः स्वलक्षणं परमाणुसमुदायस्वलक्षणमेव विषयत्वप्रतिपत्तेः, किन्तु पूर्वोत्तरपक्षस्य विरोधं कथितवानं अनेकार्थजन्यत्वात् स्वार्थे सामान्यगोचरं प्रत्यक्षमिति तत्तु त्वयाऽनेन वचनेन निराकृतमेव अस्य च वचनस्य परिग्रहे प्रथमं प्रतिज्ञातं प्रत्येकं ते समुदिताः कारणमिति वाक्यार्थो निराकृत एव तत्स्वीकरणात् युक्तैषा कल्पनेत्यादि वाक्यादिप्रतिज्ञाता-
30 र्थनिरसनमिति समासार्थः । प्रत्यवेक्षितव्येति प्रत्यवेक्षितव्यस्य निर्णयार्थस्योपायभूतः साध्यसाधनसम्बन्धोऽवश्यवाच्य एव चोद्य इति पूर्वपक्षाशयः । तथापि दोषमाह अहो साध्विति अहो साधु वक्तव्यं किन्तु दोषजातमत्र भवति अनेकार्थजन्यत्वादिति वाक्यविरोधः तथाऽनुपपत्तेः च प्राथमिकवाक्यविरोध इति भावः । ननु प्रत्येकं ते समुदिताः कारणं ननु यथा द्रव्यमपि द्रव्यान्तरपर्यायान्तरयोरवतिष्ठमानाः परमाणवः तत्समुदायमित्याह—अनेकान्तवदिति, त एव तत्समुदायमेति प्रत्येकत्वाच्च समुदायत्वाच्च अनेकान्तत्वात् परमाणू-

कत्वापाद्यावस्थेयमित्यनेकान्तसाधर्म्यं दर्शयति, यद्वक्ष्यः समुदये, किं समुच्चिनोति ? समुदायमुपरितनम्, प्रत्येकत्वापाद्य समुदाये चावस्थाव्यवस्थितिरिति ।

प्रत्येकत्वासत्त्वमशक्तो हि समुदाय इत्युभयथा रूपाद्यादिनो यद्भवन्ति तदेव तथाप्याप न्नम्, साक्षात्सदुक्तत्वत्वात्, अनेकैकत्वभूतागत्यर्थसमुदायपरिग्रहाच्च ।

(प्रत्येकेति) अन्यान्यसत्त्वे तदशक्यत्वात्वे समुदाये—प्रत्येकं शक्त्य यद्वनादि द्वाभ्यामेकेनापाद्य 5 त्यम्, अन्यसस्तु सेत्स्यन्यत्वादि तत्प्रसक्तत्वं यद्वनादि, तदशक्ये प्रत्येकत्वसक्त्यशक्तः प्रत्येकाशक्ये तत्कः समुदायः । वाक्यार्थस्तु छोकव्यापिनोऽपि परमाणवः संघातमेकपरिणामापेक्षा एव चाक्षुषत्वा दिभाजो भवन्ति नान्यथेत्युभयथा रूपादिमो भैना यद्भवन्ति तदेव तथाप्यापन्नम्, कुतः ? साक्षा- त्सदुक्तत्वत्वात् तथैव साक्षादुक्तत्वमेतत् परमाणूनां प्रत्येकं चक्षुर्विज्ञानोत्पादने न शक्ताः समु दिताः शक्ता इत्येवं तावत् साक्षादनेकान्ताभ्युपगमः । अथापरथा वाऽभ्युपगत एव,—अनेकैकत्वभू 10 तागत्यर्थसमुदायपरिग्रहाच्च, समित्येकीभावे, स चैकीभावोऽनेकत्व, इण् गतौ, अयन गमनं गतिरय इति पर्यायाः, एकत्व आय उदायः, संगतो भूतसमायः, समुदायशब्दस्य तत्परिग्रहात्, प्रत्येकं ते समुदिता अनेकैकीभूतत्वागतयः कृताः, तस्मात्वानेकान्तवादाभ्युपगमः ।

किञ्चान्यत्—

इतरथापि नैषा समुदाय एव न स्यात्, प्रत्येकमभूतत्वाद्वन्ध्यापुत्रवत् । 15

(इतरथापीति) न्यायतोऽप्ययमर्थः, एतत्प्रसिद्धातः समुदाय एव न स्यात्, प्रत्येकमभूतत्वात्, वन्ध्यापुत्रवदिति न्यायः, यथा प्रत्येकमभूतानां वन्ध्यापुत्राणां समुदायो नास्ति तथा परमाणूनामिति ।

अन्वयमन्यायः प्रत्येकमभूतत्वासिद्धेः परमाणूनामिति चेदुच्यते—

पौद्गलिकोक्ता त्रयातिरिक्तसंस्कृतक्षणिकमित्यस्याभ्युपगमेन तदासङ्गतिरस्य, यदुक्तं वः सिद्धान्ते 'बुद्धियोग्यं त्रयादन्यत् संस्कृतं क्षणिकञ्च तत्' इति प्रत्येकत्वमाधानान्तरमेव 20 विनष्टत्वात् क्व प्रत्येकं समुदायः, को वा देशतोऽत्यन्तं रूपादिभेदेन भावदनभिलाप्यतयाऽ- वस्थाने भिद्यमानानां प्रत्येकं भावः ? ।

(पौद्गलिकेति) आकाशप्रतिसंख्याऽप्रतिसंख्यानिरोधाख्यत्रयादन्यत् प्रत्ययजनितत्वात् संस्कृतं संस्कृतत्वाच्च क्षणिकमिदम्, क्षणोऽस्यास्तीति क्षणिकं क्षणमात्रमेवास्य कालो न परत इति क्षणिकमित्यनेन

प्रत्येकमवस्थान्यत्व सिद्धेना । एतदेव स्पष्टयति–प्रत्येकेति प्रत्येकेनापत्त्वं समुदायेन पद्यते कर्तुं यथाऽग्निनाऽन्यत्वं पद् 25 वेदनादि चक्रेणाऽत्यं यद्वनादि तदभिन्नसमुदायेन कर्तुं पद्यते तथा प्रत्येकपरमाणूनामसामर्थ्येऽपि संघातमेकपरिणामा- पेक्षायां चाक्षुषत्वं सम्भवतीति वैभाषिकास्त एव तथाप्यापन्नमीक्षा व्याधितश्च तमोमयता साक्षादर्थपरता च । तदेवाह– उभयथेति । कथं साक्षात्सिद्धिम इत्यत्राह–साक्षात्सदुक्तेति । कथमपरथाऽपि इत्यत्राह–अनेकैकत्वेति । ननु वस्तुतः परमाणूनां समुदाय एव न सम्भवतीति न्यायप्रदर्शनायाह–इतरथापीति अनुमानप्रयोगमाह–एतदिति पौद्गलिकः। परमाणूनामसत्त्वासिद्धया दुष्टोऽयं न्याय इत्याशङ्कते–अन्वयमिति । समित्यभिसन्धेनाभ्युपगतत्व सद् प्रत्येकं च समुदिताः 30 भागेनैभित्ससमुत्पन्न परमाणूनामुत्पत्त्यनन्तरविनाशितेन प्रत्येकसमुदायभावसम्भवमूलत्वसिद्धेरतःप्रयोगस्य न्याय्यत्व मित्याह–पौद्गलिकेति । आकाशेति, बौद्धमते प्रयत्नोपयोगेनिरतार्थनाशो धर्मः प्रत्ययजनकभेदेन द्विविधा तत्र तथा इत्यादि च तत्त्वतः द्वारेण चक्षुरुपपादकानि चक्षुरुपपादकाय वाच्य एते एव संस्कारावस्थाया तत्र संस्कार

न चाप्यवयवानामवयविनोऽर्थान्तरत्वं सौत्रान्तिकनयपरिस्थित्याऽभ्युपगमेन सह प्रत्यक्षे ते समुदिताः कारणमित्यभ्युपगमस्य सङ्गतिरस्ति, किं कारणं ? प्रत्येकमप्रत्यक्षत्वाभ्युपगमस्य विरोधात्, एकैकस्य परमाणोः प्रत्यक्षत्वाभ्युपगमस्यैव विरोधात् कः स्यात् समुदायः ? को वा देशेनोऽन्यस्य कस्यापि भेदेन व्यवस्थापितत्वात्ऽपरस्य भिद्यमानानां प्रत्यक्ष भाव इति सिद्धं प्रत्येकममूर्तत्वं देशतः प्रत्य-
5 क्षत्वाभावस्यान्तराभावादिति ।

प्रत्यक्षस्याप्रसिद्धिरपि धियं भेद निमूर्त्त एव परमाणूनामसत्त्वाद् व्याप्त्युपगमात् । महतोऽपि ह्यदोष इति चेत्, तुल्यत्वात्, किं मूर्त्तस्य महत्ता, अमूर्त्तस्य यदि विकल्पद्वयेऽपि यौगप द्यासिद्धः । अमूर्त्तस्य महत्त्वयुक्ता विरुद्धाः खपुष्पस्येवातो मूर्त्तस्य महत्त्वेति ब्रूमः ।

(प्रत्यक्षस्येति) प्रत्यक्षस्याप्रसिद्धिः धियं भेद निमूर्त्त एव परमाणूनाम्,—यदि प्रत्येकस्य
10 प्राप्तिः यदि समुदायेऽपि न प्राप्तिः प्रत्यक्षप्राप्तिस्वभावैकदेशस्याप्रत्यक्षत्वेनाप्रतिपत्तेः समस्तस्य, व्याप्त्युपगमात्, यथा तन्त्वाद्युपगमे महत्त्वस्य प्राप्तिरस्ति तथा परमाणुभिन्नानां समस्तत्वा भावाभावात् प्रत्यक्षत्वाप्राप्तिरिति । महतोऽप्यदोष इति चेत्—तेषां परमाणूनामसत्त्वमसिद्धं यथान्य त्वाभावात्मनि देशभेदेन स्थूलस्येव महतोऽप्यभ्युपगमात् तस्मादस्ति प्रत्येकप्रत्यक्षप्राप्तिरित्यत्र न, तुल्यत्वात् परमाणुसमस्तस्य देशकालभेदेऽप्यसत्त्वप्रसक्तेः महतोऽप्यसत्त्वस्य तुल्यत्वात् । (किमिति)
15 विकल्पद्वयेऽपि यौगपद्यासिद्धिरसिद्धं द्रष्टव्यं किं मूर्त्तस्य महत्ता, अमूर्त्तस्य वेति । विकल्पद्वयासम्भि न्नत्वेन प्रश्नः उभयथापि न घटत इत्युत्तरं वक्तुमनाः । (अमूर्त्तस्येति) यथा न युक्तममूर्त्तस्य खपुष्प स्येव महत्त्वेति, यतः स विरुद्धः पूर्वपक्षस्य, तस्मान्मूर्त्तस्य महत्त्वेति ब्रूमः ।

अत्रापाय आह—

स्वमतवद्विकल्पद्वय ‘तदवस्थाः प्रत्यक्षमुदिताः कारणं परमाणवः’ इति ब्रुवाणस्य

---

20 यत्र हेतुसमर्थने समाधायकमुक्तं अभावस्य भावान्तरस्वभावत्वा हेतुत्वमयं विशेषाभ्युपगमस्य भावप्रतिबन्धविरोध प्रतिज्ञाविरोधप्रसङ्गः तथाऽप्यनवस्थानस्वरूपं स्वाभ्युपगमेऽतिविरोध न तन्त्रान्तरापेक्षि च प्रतिसंख्यानिरोधः को विशेषोऽर्थ लक्षणधर्मेण पृथक् पृथक् विभाग । प्रतिसंख्या—प्रज्ञा तया निरोधः । यथाभ्युपगतेऽप्यसत्त्वं विरोधी लोकप्रसिद्धेरप्यभि धेय एवमस्ति हि इत्ये वा अनुमेयत्वे व्याप्त च तदात्मना यथार्थप्रतीत्यभावोऽप्य एव प्रत्युक्ता निरोधमपि बन्धि तथापि भेदा दित्यु तदेवमप्रतिसंख्यान—अप्रतीत्यैव तेषां निरोधोऽप्रतिसंख्यानिरोधः । प्रत्येकमस्येति इदं वाक्यम् प्रत्येकममूर्त्तत्वमप
25 त्यव । को वा देशत इति इदं देशत प्रत्येकममूर्त्तत्वस्य व्यापनाय । तत्र प्रत्येकममूर्त्तत्वं परमाणूनां विज्ञानाभासवत्त्वेऽपि समुदायाभाव इत्यस्मदेऽपि भावः । अथ परमाणूनां प्रत्येकमप्रतीतिरपि नास्ति समुदायापेक्षे हि प्रत्येकत्वं समुदायाभावे च प्रत्येकस्येव स्वरूपव्यवस्थानाभावात् प्रत्येकस्य भेदेन विज्ञानान् भावयन्नभिन्नत्वानपेक्षस्वरूपं भिद्यमानत्वेनाह—प्रत्येक स्याप्रसिद्धिरपीति । अनेके परमाणवः न भिद्यमानाः समुदायस्वरूपत्वात् तदपेक्षया नैकस्य स्वरूपस्य परमाणो प्रत्येकत्व- व्यवस्थितिरिति योजनीय इत्यादाह—महतोऽप्यदोषा इति । यथा परमाणूनां देशकालापेक्षयाऽप्रतिपत्तिरिति अन्यापेक्षत्वस्व-
30 रूपात् तथैव महतोऽप्यपेक्षत्वतिरपि नास्तीत्युपगतत्वात् तुल्यत्वादिति । दोषान्तरमप्याह किं मूर्त्तस्येति किं मूर्त्तस्य महत्त्वं अमूर्त्तस्य वेति विकल्पमित्यसिद्धं द्रष्टव्यम् विकल्पद्वयेऽपि यौगपद्यासिद्धेरसम्बन्धाऽपि न घटत इत्युत्तरं वक्तुमनसो विकल्प द्वयासिद्धेरेवं मम इति योजना । ननु अमूर्त्तस्य महत्त्वं खपुष्पस्येवेति ब्रूमः किन्तु तुल्यत्वात् परमाणुत्वस्येव तुल्यत्वमेव पूर्वपक्षो न मम अस्तु मूर्त्तस्य महत्त्वेति ब्रूम इति नैव अपाकृत—अमूर्त्तस्येति । अथ मम पूर्वपक्षः किन्तु यथैवाभ्युपगमोऽयं तथास्ति—स्वमतेनैवमिति । मूर्त्तस्य महत्त्वं तत्र कल्पनीयमाह—यदि तावदिति । प्रतिकल्प

स्तय कः एवमाहेति, किं नः एतेन, यो ब्रवीति स ब्रवीतु, यदि मूर्तस्य, कुतः सहता ? घटवत्, तथा तेषामसत्त्वापत्तेः, प्रतिक्षणसहत्वस्य चोत्पाद उच्यते त्वया तत्तु सहत्वम-प्रतिक्षणमसत्त्वापत्तरेव ।

(त्वमेवैतदिति) यदि तावन्मूर्तस्य सहोत्पादो भवजातन्तरविनष्टत्वात् क्षणिकपक्षे कुतः सहता ? नास्त्यत्र कारणं सहत्वे कस्मिंश्चित् केनचिदित्यर्थः । घटवदित्यविशेषादेशकालाभ्यामसम्बन्-5 भेदे निरभिसम्प्लवमावानां प्रत्येकरवमासिरेव मासीत्युक्तम्, तथा तेषामसत्त्वापत्तेः, अणूनां कुतः सहत्वेनाभिसम्बन्धः । प्रतिक्षणसहत्वस्य चोत्पाद उच्यते त्वया, तत्तु सहत्व-यौगपद्यमप्रतिक्षणमस-त्त्वापत्तेरेव, तस्मात्सहोत्पादवादोऽपि दत्तपरिहारः ।

अथामूर्तस्योत्पादो यौगपद्येनेष्यते सोऽपि सहता यो नोपपद्यते, वन्ध्यापुत्रसमुदायोऽपि स्यादित्यनिष्टप्रसङ्गात्, अमूर्तत्वादस्थितत्वादणुसमुदायवत् । अणुसमुदायोऽपि 10 न स्यादमूर्तत्वादस्थितत्वाद्वन्ध्यापुत्रसमुदायवत् ।

(अथेति) अथामूर्तस्योत्पादो यौगपद्येनेष्यते सापि सहता यो नोपपद्यतेऽनिष्टप्रसङ्गात्, किमनिष्टं ? वन्ध्यापुत्रसमुदायोऽपि स्यादित्यनिष्टम् । कुतः ? अमूर्तत्वादस्थितत्वादणुसमुदायवदिति साधारणमिष्टापादनम् । अणुसमुदायोऽपि न स्यादमूर्तत्वादस्थितत्वाद्वन्ध्यापुत्रसमुदायवत्, अमूर्तत्व-मस्थितत्वञ्च हेतुद्वयं शून्यक्षणिकवादिनोः सिद्धत्वादुक्तम् । 15

सन्तानादिति चेदेतदप्युक्तम्, सोऽपि द्वयमेव ।

(सन्तानादिति) स्यान्मतममूर्तत्वमस्थितत्वञ्चेष्यते तेषां तथापि जन्मविनाशसन्तानसा-मर्थ्यभेदात् स्थितत्वमस्त्यतः सहोत्पादवादोऽप इति, एतदप्युक्तम्, यस्मात्सोऽप्येवमेव, सोऽपि सन्तानो मूर्तो वा स्यादमूर्तो वा ? यदि मूर्तः कुतः सहता ? घटवत्, भवनानन्तरविनष्टेभ्योऽन्यस्य सन्ता-नस्याभावात्, अस्ति चेत्तद्विलक्षणो नित्यात्म इति सर्वक्षणिकप्रतिज्ञाहानिः, अथामूर्तो वन्ध्यापुत्रव 20 द्विज्ञानमितिवदोषाक्रान्तमेव ।

अथोच्येत बाह्यवस्तुप्रतिपत्तिजनितः सर्व एवैष विरोधसंक्लेशः, एवन्तु सर्वदोषविनिर्मु क्तमिदं कल्पनान्तरमाश्रयामहे विज्ञानमात्रकमिदं त्रिभुवनम्, न पुनरेतस्यां कल्पनायामेवं

सहत्वमेवेति [illegible] सहत्वावस्थं [illegible] उत्पाद इति वा [illegible] भावः । अमूर्तस्य यौगपद्येनोत्पादाभ्यु-पगमे वन्ध्यापुत्रसमुदायस्यापि प्रसङ्गेन वन्ध्यापुत्रसमुदायस्य [illegible] परमाणुसमुदायस्य [illegible] न युज्यते [illegible]—अथा 25 मूर्तस्येति । न [illegible]—अमूर्तत्वमिति । सन्तानादिति [illegible] क्षणिकपरमाणुसन्तानस्य [illegible] इति [illegible] मूर्तस्यामूर्तस्य वा [illegible] [illegible] सोऽपीति [illegible] मूर्तस्य [illegible] विनाशे [illegible] [illegible] भावः । ननु [illegible] इति [illegible] 30 [illegible] विज्ञानमेवेदं [illegible] इति [illegible]—अथोच्येतेति [illegible] [illegible] इति [illegible]

विषः संक्लेशोऽस्ति यदिदं संवृतिसदिदं परमार्थसदिदमैन्द्रियमिदमतीन्द्रियमित्यादि विकल्पमानं विज्ञानाद्व्यतिरिक्तमर्थजातमिष्यतां स्यात्, न तु तत्तो भिन्नमस्ति, तस्मादनर्थको विचार इति ।

अथोच्येत यावद्वस्तुतत्त्वेनास्ति यावच्चतो भिन्नमस्तीति, अर्थेन्द्रियविकाराम्बरे, अत्र सविकल्प-
5 ज्ञानविषयज्ञानपक्षे कल्पिताकल्पिता अपपत्तयो विफला भवन्ति सदोषत्वेति त परिश्रम्येदमुच्येत सर्वं यथैव विरोधसंक्लेशो यावद्वस्तुप्रतिपत्तिवलितः—विज्ञानमात्रं वस्तुतत्त्वमस्तीति प्रतिपत्ती सत्यां आयतेऽयं संक्लेशः, यदि परमाणव आलम्बनं ततोऽतीन्द्रियत्वसञ्चितालम्बनत्वाभ्युपगमविरोधः, अथ समुदायः, असत्त्वात् खपुष्पवदनालम्बनमेव । प्रत्येक ते समुदिता इति तत्तत्पक्षविरोधाविरोधः मोक्ष-
न्यायेनैवमादिविरोधोऽप्युपगमविरोधेन चित्तसंक्लेशेन कमर्थं वाप्स्यामहे ! यदस्तु सर्वदोषविनिर्मुक्तमिदं
10 कल्पनान्तरमाश्रयामहे विज्ञानमात्रकमिदं त्रिभुवनम् । यदुक्तम् 'यो: क्षमा वायुराकाशं सागराः सरितो दिशः । अन्तःकरणतत्त्वस्य भागा बहिरिव स्थिताः' इति, न इत्यसंवृता, न पुनरेतस्यां कल्पनायामेवं विषः संक्लेशोऽस्ति यदिदं संवृतिसदिदं परमार्थसदिदमैन्द्रियमिदमतीन्द्रियमित्यादि विकल्प्यमानं विज्ञानाद्व्यतिरिक्तमर्थजातमिष्यतां स्यात्, न तु ततो भिन्नमस्ति तस्मादनर्थको विचार इति ।

अत्रोच्यते ननु देवानां प्रिय ! तन्मतवदेव विज्ञानवादविध्वंसनार्थोऽयमारम्भः, तिष्ठतु
15 तावद्बाह्यार्थाभावे विशेषत्वाभावात्तस्य विज्ञानस्याभावः, ततश्च प्रमेयत्वाभावात् प्रमाण-
त्वाभावः प्रसज्यस्येति, इदं तावद्विज्ञानं हि लोके प्रत्यक्षादि, तत्र निर्णये कतमत्तत्र विज्ञा
नमानम् । इत्यास्त्वं प्रत्यक्षविज्ञानमात्रमिति, तच्च तस्यैवमवस्थत्वात्, नानुमानविज्ञानमात्रं,
तत्रापि तत्पूर्वकत्वात् तदसिद्धावसिद्धिरतन्त्वपरवत् ।

अत्रोच्यते ननु देवानां प्रिय ! तन्मतवदेव विज्ञानवादविध्वंसनार्थोऽयमारम्भः,—यदेवं
20 कल्पनायोगं प्रत्यक्षमित्येतस्य तन्मतस्य तत्संभाविनो बुद्धवचनस्य च विध्वंसनार्थोऽयमारम्भस्तथा विज्ञानमात्रविध्वंसनार्थोऽप्ययमेवारम्भः, तत्तीर्थकृतामिति हित्वाचत्वापि । अथवाऽपरमार्थत्वप्रतिपाद नार्थत्वाच्च सर्वविकल्पानां बौद्धानां तद्विध्वंसनार्थं यत्नायमारम्भः, यदपि प्रमाणाभावाद्युक्तमिति नाक्षम् । प्रमाणाभावश्च प्रमेयाभावादिति स दोषः किल यदेति दर्शयति-तिष्ठतु तावदित्यादि, तदो-
पायेन दर्शयिष्यन्नाह—बाह्यार्थाभावे विशेषत्वाभावात्, तस्य विज्ञानमात्रत्वाद्विशेषत्वाभावे च तत्र विज्ञा-
25 नत्वमपि नास्ति, विजानातीति विज्ञानम्, किं विजानाति विशेषाभावे, ततः प्रमेयत्वाभावात् प्रमाण-
त्वाभावः प्रसज्यस्येति ज्ञेयज्ञानं प्रमाणत्वप्रमेयत्वविपर्ययं खपुष्पवत् किं तत् प्रत्यक्षं नामेतेन दोषो

दर्शयति यदुक्तमिति यत् [illegible] न विज्ञानव्यतिरिक्तो [illegible] विषये वाक्यं दर्शयति—न पुनरेतस्यामिति तिष्ठतु तावदिति, बाह्यार्थाभावेऽपि तदेव [illegible] विशेषत्वाभावे च विजानातीति [illegible] तथा च प्रमाणप्रमेययोरभावे [illegible]
30 [illegible] विचारयेति [illegible] तु विज्ञानमेव विचार्यत इति भावः । तदेव विचारं विचारे-
दर्दं तावदिति । तन्मतवदेवेति [illegible] । तत्तीर्थकृतेति [illegible]
[illegible] भावः । न केवलं [illegible]
मारम्भ किन्तु [illegible] देवानांप्रिय—नृप वेति । यदपि—[illegible] । तदिति, प्रो-

दुर्निवारः, स तावत्तिष्ठतु, इदं तावदस्तित्वाभ्युपगमेनाऽन्यथा विचार्यते–विज्ञानं हीत्यादि, द्विधाभ्यो
दर्शयेत्, इदं हि लोके विज्ञानं प्रत्यक्षादि–प्रत्यक्षमनुमानञ्च प्रमाणे विज्ञाने, आदिग्रहणात् संशयविपर्य-
यानध्यवसायलक्षणानि च विज्ञानानि प्रमाणाभासाभिमतानि । इदमस्ति त्वं प्रष्टव्यः, तत्र निर्णीय
कतमत्तत् विज्ञानमात्रम् ? इह सर्वैकधातुकमिति नैकमपि विज्ञानमात्रं भवतीत्यभिप्रायः । ब्रूयास्त्वं
प्रत्यक्षविज्ञानमात्रमिति, तन्न तावत् प्रत्यक्षविज्ञानमात्रम् तस्यैवमवस्तुत्वात्,–तस्य–प्रत्यक्षविज्ञानस्य, 5
एवमयथा यथाऽस्माभिर्व्याख्याता 'न रूपादिविषयं न समुदायविषयं न चक्षुरादिनिमित्ता संवृत्या
परमार्थेन वा युज्यत' इति, तस्मान्न प्रत्यक्षविज्ञानमात्रम् । स्यान्मतमनुमानमात्रमिति तदपि नानुमान-
विज्ञानमात्रम्, किं कारणं ? तस्यापि तत्पूर्वकत्वात्, तस्याप्यनुमानस्य तत्पूर्वकत्वात्–प्रत्यक्षपूर्वकत्वात्,
प्रत्यक्षपूर्वकं हि स्वानुभवोत्तरमादि विकल्पात्मकम्, अविकल्पज्ञानसमनन्तरजन्मानुमानं मानसमनि-
न्द्रियमयोगिनामप्रत्यक्षपूर्वकमेवेष्यते तस्यैव प्रत्यक्षस्यासिद्धौ कुतोऽनुमानसिद्धिः, अतो नानुमानमा 10
त्रमत आह–तदसिद्धावसिद्धिरतत्स्वपदवत्, यथा तन्तुपूर्वकस्य पटस्य तन्त्वसिद्धावसिद्धिस्तत्पूर्वक-
त्वात्, तथा प्रत्यक्षासिद्धावसिद्धिरनुमानस्य, एवं तावत्प्रमाणविज्ञानमात्रत्वासिद्धिः ।

एवं तर्हि संशयभ्रान्त्यादिकल्पना विज्ञानमात्रमस्तु तदपि न, अत एव, नानध्यव-
सायमात्रम्, अग्रहणात्मकत्वात्तस्य, न हि तदव्यक्तासंवेदितं नाम ज्ञानमस्ति, तस्मात् प्रमाण
प्रमाणाभासज्ञानेष्वनन्तर्भावात् कतमद्विज्ञानमात्रमिदं सर्वमित्यप्रमतिविकाशिन्या शंकया । 15

(एवमिति) तदपि–संशयभ्रान्त्यादिकल्पनामात्रमपि न संशयमात्रं न भ्रान्तिमात्रम्,
आदिग्रहणात् स्वप्नसुखानुभूतसुखाद्यात्रं न तैमिरिककेशोण्डुकाद्याकारमात्रम्, सर्वस्यास्य कल्पना-
त्मकस्य प्रमाणाभासत्वात् एव–प्रत्यक्षपूर्वकत्वादेव तदसिद्धावसिद्धेः । स्यान्मतमनध्यवसायमात्रम-
स्त्विति तदपि नानध्यवसायमात्रं नासंवेदितं नाऽव्यक्तसुखदुःखादिस्वरूपमित्यर्थः । किं कारणं ? अग्र-
हणात्मकत्वात्तस्य, न हि तदव्यक्तासंवेदितं नाम ज्ञानमस्ति, यद्यप्यनध्यवसानमस्ति, अपटुत्वात्तद्- 20
र्थावग्रहात्मकं न भवत्यतो विज्ञानमेव न भवति, यस्माद्विजानातीति विज्ञानमिदं तत्र न किञ्चिद्वि-
जानातीति नानध्यवसायविज्ञानमात्रम्, तस्मात् प्रमाणप्रमाणाभासज्ञानेष्वनन्तर्भावात् कतमद्विज्ञान-
मात्रमिदं सर्वम्–एतेभ्यश्च विज्ञानेभ्यो व्यतिरिक्तस्यान्यविज्ञानस्याभावात् किञ्चिदेवद्विज्ञानमात्रं सर्वम-
प्रमतिविकाशिन्या शंकयेति ।

मित्यर्थः । प्रत्यक्षस्य प्रमाणस्यैव प्रमाणाभासोपलक्षणपराद–प्रत्यक्षमनुमानञ्च प्रमाणे विज्ञाने इति । इदं विज्ञानमेदे 25
लोके दृष्टे तेषु तत् विज्ञानं कतमदितीदमभिधीयते–तत्र निर्धार्यमिति । सर्वमेकधातुकमिति, सर्वैकत्वरूपमित्यर्थः ।
संशयादीनामत्र [illegible] प्रमाणाभासानामयथार्थानामध्यवसितार्थत्वाद्विज्ञानत्वाभाव इत्यभिप्रायं दर्शयति–नैकमपीति ।
अनुमानस्य विकल्परूपस्य विकल्पस्य च [illegible] प्रत्यक्षपूर्वकत्वात्तदसिद्धेः प्रत्यक्षपूर्वकमित्याह–स्वानुभवेति ।
संशयमात्रमिति एक विषयासावधारणात्मकं ज्ञानमात्रमित्यर्थः । भ्रान्त्यादिमात्रमिति तत्त्वव्यतिरिक्तान्यथाकारज्ञा-
नमित्यर्थः । स्वप्नसुखेति स्वप्नसुखानुभवरूपसुखाद्यात्मकं ज्ञानमित्यर्थः तैमिरिकेति, तिमिरदोषिणोऽभिघातादिजनितोपप्लव- 30
स्योपहतस्य वा [illegible] चक्षुषि वा [illegible] अथवा [illegible] केशपिण्ड-
वत्ता च केशोण्डुक उच्यते तद्विषयं ज्ञानमित्यर्थः [illegible] प्रतिभासमानस्यापि तेनाभेदेन बुद्ध्या । अग्रहणात्मक-
त्वादिति, ज्ञानात्मकत्वादित्यर्थः, न हि विषयस्याग्रहणात्मकं ज्ञानं भवति अन्यथा अस्यापि ज्ञानत्वापत्तेः, तस्मात्

संक्षिप्योपसंहरति—

इति प्रत्यक्षलक्षणस्य सर्वथा दूषितत्वात् तत्कल्पितं प्रत्यक्षं न घटते, स्ववचनाभ्युपेता-क्षेपदुस्तरविरोधत्वात्, अनयैव च दिशाऽविशेषैकान्तवादिनोऽपि ।

(इतीति) प्रत्यक्षलक्षणस्य सर्वथा दूषितत्वात्, इतरथापि दूषणवचनप्रपञ्चस्यानेकशाखस्य सम्भ-
5 वोऽस्तीति । एवं तावद्विशेषैकान्तवादिना कल्पितं लौकिकप्रत्यक्षलक्षणं प्रत्यक्षं न घटते स्ववचना-भ्युपेताक्षेपदुस्तरविरोधत्वात्, अनयैव च दिशा, स्ववचनाभ्युपेतैवाऽऽक्षेपो द्रष्टव्य इति वाक्यशेषः, एषोऽविशेषः कस्यचिद्विशेषैकान्तवादिनोऽपि, अपिशब्दादनन्तरोक्तस्य विक्षेपवादिनोऽसंमताद्युभय-वादिनोऽपि, तत्र प्रतिक्षेपवादिनः प्राग्युक्तदोषजातं कल्पनापोढं प्रत्यक्षमिच्छतः कल्पनात्मकत्वमेव हेतुपरम्परया परिपाट्याऽप्रत्यक्षत्वमनुमानत्वमुभयैकत्वं प्रसज्यमानो निर्देश्यत्वमलक्षणता च कारक-
10 ज्ञापकविशेषापादनादभिधानार्थव्यपदेश्यता च यथाच कल्पनापोढत्वमभ्युपेत्यापि स्वसामान्य-योर्लक्षणयोरभावप्रसङ्गो रूपस्य तद्विज्ञानस्येवाभाव इत्यादिलक्षणवाक्यमुदितं तदिदानीमुक्तेन वाच्यमिति ।

तदिदं दर्शयति—

सर्वसर्वात्मकतायां श्रोत्रादिवृत्तिः प्रत्यक्षमिति ब्रुवतो वस्तुनो निर्विकल्पत्वाद्विभागा-
15 भावात् किं श्रोत्रं चक्षुरादिभ्यो विभक्तम्? किमश्रोत्रं यच्छ्रोत्राद्विभक्तम्? क आदिः कोऽनादिः? का वृत्तिः? किं प्रति कतमोऽन्यो भावोऽन्यमपेक्ष्य तं प्रत्यक्षमित्युच्यते किम-क्षमिन्द्रियं षड्विषयव्यतिरिक्तं परस्परव्यतिरिक्तं वा? किमनक्षमिति ।

सर्वसर्वात्मकतायामित्यादि यावदनक्षमिति, एवं हि लक्षणदूषणाभिरेता, सर्वं सर्वात्मक-मित्यविशेषमिच्छतः सांख्यस्यापि, सर्वात्मकैकस्य वस्तुनो रूपरसादिभेदेन श्रोत्रादिभेदेन च विकल्पयितु

---

20 तदेतद्विस्तरप्रसाधनस्य सर्वं समस्तमिति भावः । अथ तदिदमुपसंहरति–इतीति । इतरथापीति, [illegible] [illegible] दूषितं न तु विस्तरेण तेनाऽन्यथापि दूषणवचनप्रपञ्चस्य सम्भवोऽपि न क्षतिरिति भावः । अनयैव दिशेति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति भावार्थो योज्यः । अपिशब्दात् [illegible] [illegible]–अपिशब्दादिति [illegible] [illegible] [illegible] [illegible] [illegible] भावः । प्राग्युक्तं दोषजातमिति [illegible]
25 [illegible] [illegible] सम्बन्धः । विशेषैकान्तवादे प्रोक्तम् दोषजात–कल्पनात्मकत्वमेवेत्यादिना । [illegible] भावः । [illegible] [illegible]–सर्वसर्वात्मकतायामिति । तत्र
30 [illegible]–एवं हीति । सांख्यस्य हि श्रोत्रादिवृत्ति प्रत्यक्षमिति प्रत्यक्षलक्षणम् [illegible] भावः ।

प्रत्यक्षत्वादिविशेषैकान्तवादिन इव निर्विकल्पपरमार्थपरमाणुमात्रसाधर्म्यादविकल्पकत्वम्, अविकल्पक-त्वाद्यथापूर्वं प्रत्यक्षलक्षणोदाहरणवाक्ये दोषाः प्रभुर्नैव प्रभुः, रूपं नैव रूपम्, विज्ञानं नैव विज्ञानमित्याद्य-यत्वात् श्रोत्रादिवृत्तिः प्रत्यक्ष श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां मनसाऽधिष्ठिता वृत्तिः—शब्दस्पर्शरूपरसगन्धेषु यथाक्रम ग्रहणे वर्तमाना प्रमाणं प्रत्यक्षमिति ब्रुवतः सर्वसर्वात्मकत्वे निर्विकल्पत्वाद्विभागाभावात् किं श्रोत्रं, यत्त्वगादिभ्यो विभक्तम्? किमत्र त्वगादि, यच्छ्रोत्रादिभ्यो विभक्तम्? यदोक्तं श्रोत्रादीनि तत्र च आदिः? सर्वात्मकैकवस्तुत्वे प्रथमद्वितीयाद्यपेक्षविभागाभावात्, कोऽन्यस्तेभ्योऽन्यो वा? का वृत्तिः,—तेषां श्रोत्रादीनां पूर्वप्रवृत्तानां पश्चाद्वृत्तिः? क्रमभेदेनाभ्यन्तरत्वेन च विशिष्टा काऽवृत्तिः वस्तुपरमलक्षणा, विभागाभावादेव, किं प्रति—कतमोऽन्यो भावोऽन्यमपेक्ष्य च प्रत्यक्षमित्युच्यते, नपुंसकलिङ्गसामान्यबहुप्रसर्वेन्द्रियविषयत्वात् किं प्रतीति प्रश्नः, किं प्रति सर्वसर्वात्मकत्वैकैक नापेक्ष्यते। किमयमिन्द्रिय यद्विषयव्यतिरिक्तं श्रोत्रादिपरस्परव्यतिरिक्तं वा? किमनक्षमिन्द्रियव्यतिरिक्तं विषयो रूपादि, परस्परतो वा? इति प्रश्ने, एवं विभागाभावाद्विभागेन लक्षणप्रणयन स्ववचनव्यपेक्षा-क्षेपप्रत्युत्तरविरोधम्, अविभक्तत्वात् किं रूपादि? किं मनः? किमधिष्ठेयं? केनेति?।

किञ्चान्यत्—

त्वन्मतेनैव च प्रत्यक्षलक्षणायोगः, यदुक्तं लोकशास्त्रे 'यद्धि वस्तुस्वतत्त्वसाक्षात्प्रति पत्तिः प्रत्यक्षं' इति, तन्न प्रत्यक्षं त्वन्मतस्य घटते, निर्विकल्पत्वासिद्धेः, शब्दादिविभागवि कल्पविषयत्वात्, अविभागरूपश्च सर्वसर्वात्मकं वस्तुस्वतत्त्वम्, तद्विषयश्च तन्न भवति तत्तश्च कल्पनात्मकम्, कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवत्।

(त्वन्मतेनैव चेति) वस्तुनः स्व तत्त्वमसाधारणं, आत्मीय रूपं वा, तस्य साक्षात् प्रतिपत्तिः न व्यवहिता सा प्रत्यक्ष तदेवलक्षणं प्रत्यक्षं त्वन्मतवत् त्वन्मत इव त्वन्मतवत्, यथा सर्वसर्वात्मकत्वे त्वन्मते श्रोत्रादिवृत्तेः सर्वसर्वात्मकवस्त्वेकदेशशब्दादिविषयत्वात् समुदायरूपत्वाद्वस्तुस्वतत्त्वस्य विभा गाभावाच्छ्रोत्रादिवृत्तिर्न सम्भवतीत्युक्तं तथा तस्य निर्विकल्पस्य वस्तुनो वस्तुस्वतत्त्वसाक्षात्प्रतिपत्त्य-भिमतं लौकिक सामयिकञ्च प्रत्यक्षलक्षणं न घटते निर्विकल्पत्वासिद्धेः, नैव तन्निर्विकल्पं प्रत्यक्षं शब्दा-दिविभागविकल्पविषयत्वात्, अविभागरूपञ्च सर्वसर्वात्मकं वस्तुस्वतत्त्वं तद्विषयञ्च तन्न भवति,

---

विशेषैकान्तवादिन इवाविशेषैकान्तवादिनोऽपि साधर्म्यमाह-निर्विकल्पपरमार्थपरमाणुमात्रसाधर्म्यादिति निर्वि-कल्पत्वादेव परमार्थभूतं वस्तु प्रत्यक्षं बौद्धमते तथाविधं वस्तु परमाणुः सांख्यमते सर्वसर्वात्मिका प्रकृतिरिति साधर्म्यम् [illegible] परमाणुव्यतिरिक्ताः [illegible] परस्परं [illegible] श्रोत्रादयो न सम्भवन्तीति। सर्वात्मकैकवस्तुत्वे इति [illegible] [illegible] निरूपणम्, तथा च सर्वसर्वात्मकं वस्तु तत्राऽयं प्रथमोऽयं [illegible] द्वितीयोऽयञ्च ततोऽपि [illegible] इति [illegible] विभागाभावात् च [illegible] नेति भावः। एवं [illegible] योज्या। [illegible] प्रत्यक्षमुच्यत इति भावः। नपुंसकलिङ्गस्येति [illegible] [illegible] किं प्रतीति नपुंसकलिङ्ग [illegible] प्रतिभाति। किं प्रतीति, [illegible] किं वस्तु प्रति सर्वसर्वात्मकैकं [illegible] [illegible] वस्तु [illegible] [illegible] भावः। नैव तन्निर्विकल्पं प्रत्यक्षमिति, तत्प्रत्यक्षं निर्विकल्पं [illegible] [illegible] विषयीकरणात् वस्तुस्वतत्त्वस्य सर्वसर्वात्मकस्य

ततश्च कल्पनात्मकम्, कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवत्, न प्रत्यक्षमिति वर्तते, कल्पनात्मकत्वात्, निरूपणविकल्पात्मकत्वात्, आलम्बनविपरीतमतिपर्यात्मकत्वात् अध्यारोपात्मकत्वात्, सामान्यस्य विषयत्वात्, तदतद्विषयवृत्तित्वात्, सदसद्भेदपरिग्रहात्मकत्वात्, सर्वथा साधारणार्थत्वात्, भ्रान्तिसंशयानुमानादिज्ञानवदिति ।

5 सञ्चिताऽऽलम्बनत्वात्ते चक्षुरादि तद्विपरीतं समुदायपरमार्थत्वम्, नीलादिसंवृतिसत्त्वं, संवृतिसन्तो नीलादय ऐन्द्रिया न परमार्थसत्समुदायाः, तस्याश्रयाद्यात्मकत्वात्, तदेकदेश भूतस्य रूपादेरपरमार्थसतोऽप्यविभागप्रत्ययस्यैकत्वासर्वस्याऽऽलम्बनस्यासञ्चितत्वदस्मिन् वादे लोकलोकोत्तरव्यवहारप्रसिद्धाभिमतेषु घटादिषु नीलादिषु चाभावास्त प्रत्यक्षम् ।

सञ्चिताऽऽलम्बनत्वात् चक्षुरिति यावन्नीलादिषु चाभावादित्यनेनाविशिष्टस्वार्थभावनो-
10 पायविप्रकर्षेणं करोति मा मूत्प्रसङ्ग इति यावत्सञ्चितालम्बनत्वानेऽस्माभिरुक्तं परमाणुनीलादीनां सञ्चयः—सामान्यं संवृतिसत्त्वादसदिति, इह तु तद्विपरीतं समुदायस्य परमार्थसत्त्वम्, नीलादेः संवृतिसत्त्वम्, संवृतिसन्तो हि नीलादय ऐन्द्रिया न परमार्थसत्समुदयाः, किं कारणं ? तस्यारूपाद्यात्मकत्वात्, तदेकदेशभूतस्य रूपादेरपरमार्थसतोऽपि विभागाप्रत्ययस्यैकत्वात्सर्वस्याऽऽलम्बनस्यासञ्चितत्वात्—न ह्येकोऽसर्वः कश्चिदालम्बनं रूपं रसः स्पर्शो यथाऽसञ्चिताः परमाणवः पूर्वस्मिन् वादे नैन्द्रियक
15 प्रत्यक्षसञ्चितत्वदस्मिन् वादे लोकलोकोत्तरव्यवहारप्रसिद्धाभिमतेषु घटादिषु नीलादिषु चाभावात्प्रत्यक्षम्, तद्विषयं ज्ञानमित्यभिसम्बन्धः । किमुक्तं भवति ? रूपादयः सर्वैकात्मरूपा एव सन्ति न प्रत्यक्षस्ताः, तत्तद्विषयं ज्ञानमभावविषयत्वादप्रत्यक्षं वन्ध्यासुतादिविषयज्ञानप्रत्यक्षवदिति । अन्यथा विषयं यदाभासं प्रत्यक्षं न सोऽस्ति विषयः, योऽस्ति न तदाभासं प्रत्यक्षमित्यादि विशेषैरन्यवादिभिर्मतं योऽभिहितः प्रपञ्चः स सर्वो योज्यः ।

20 तथासम्भावनेऽपि च रूपादेर्नैव तत्साम्यावस्थानं सम्भाव्यते ।

तथासम्भावनेऽपि चेत्यादि, रूपादेरेकस्य सत्त्वरजस्तमोगुणसाम्यावस्थाप्रधाना-त्मपदार्थत्वसम्भावनेऽपि, नैव तत्साम्यावस्थानं—रूपादिभेदैकसर्वात्मकत्वाभावरूपं सम्भाव्यते ।

विकल्पात्मकत्वात्, कल्पनात्मकं प्रत्यक्षमपीति भावः । [illegible]—विरूपणेति [illegible] नात्—आलम्बनविपरीतेति आलम्बनं सर्वसर्वात्मकं वस्तु तत्र रूपादिरूपेण प्रतिपत्तिर्विपरीतेति भावः एवं विपरीत-
20 रूपोपेक्षणात्—अध्यारोपात्मकत्वादिति । [illegible] इत्याह—सामान्यरूपविषयत्वादिति । [illegible] नैवाह—तदतदिति । [illegible] भावः । [illegible] माह—सदसदिति । [illegible] भावः । [illegible] सर्वे येति । [illegible] भावात्मकं सर्वं सर्वात्मेति [illegible] न प्रतीति [illegible] भावः । इह तु तद्विपरीतमिति नीलस्य हि परमाणु [illegible]
30 [illegible] परमार्थत्वं नीलादिस्यादि च संवृतिसदिति [illegible] । लोकलोकोत्तरेति प्रत्यक्षाभिमतेषु घटादिषु पटादिषु नीलादिषु च सर्वसर्वात्मकत्वे [illegible] रूपादेरपरमार्थत्वेऽपि [illegible] प्रत्यक्षाभिमतेषु घटादिषु [illegible] न हि यथा [illegible] तथा [illegible] सर्वस्य रूपादेः सर्वसर्वात्मकत्वेऽपि एतदेवाह रूपादय इति । रूपादेः पदार्थत्वसम्भावनेऽपि सर्वसर्वात्मकत्वावस्था-
35 नत्वं न सम्भाव्यते [illegible]—तथासम्भावनेऽपीति । सम्भाव्यमानेऽपि चेति [illegible]

सम्भाव्यमानेऽपि च तस्मिन्नभ्युपगमेऽतीन्द्रियत्वादालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां रूपादिसंघात आलम्बनमिति तेषां प्रत्येकं परमार्थसत्त्वाभावाच्च विषयता, तस्माद्योनिबीज प्रकृतिबहुधानक प्रधानाद्यपर्यायाख्यं यद्वस्तु तदतीन्द्रियत्वादप्रत्यक्षम्, यदिन्द्रिय विषयं रूपादि न तत्परमार्थसदित्याद्यशेषं वैशेषिकान्तवादिमते यथामार्गं तद्विपर्ययेणात्र यथात्र घटते तत्तथाऽनुसृत्य योज्यं भेदाभेदसंवृतिपरमार्थस्थानव्यवस्थापनया । 5

(सम्भाव्यमानेऽपीति) सम्भाव्यमानेऽपि च तस्मिन्नभ्युपगमे यस्मादणूनामतीन्द्रियत्वा दालम्बनत्वानुपपत्तेश्चक्षुरादिविज्ञानानां रूपादिसंघात आलम्बनमिति मतम्, ते च रूपादयः प्रत्येकं परमार्थतोऽसन्तः । इतिशब्दो हेत्वर्थे, इत्यतःकारणात् संघातालम्बनत्वात्तेषां प्रत्येकं परमार्थसत्त्वा- भावाच्च विषयता, रूपादयो न चक्षुरादिविषयाः परमार्थतोऽसत्त्वाद्गन्धर्वनगरवत्, रूपादिविषयं वा न प्रमाणं परमार्थतोऽसद्विषयत्वाद्गन्धर्वनगरज्ञानवत् । तस्माद्योनिबीजप्रकृतिबहुधानकप्रधानाद्यपर- 10 पर्यायाख्यं यद्वस्तु तदतीन्द्रियत्वादप्रत्यक्षम्, यदिन्द्रियविषयं तत्परिणाममेव संवृत्या रूपादि न तत् परमार्थसदित्याद्यशेषं वैशेषिकान्तवादिमते यथामार्गम्—यो यो मार्गो यथामार्गं तद्विपर्ययेणाविशेषैका- न्तवादेऽत्र यथात्र घटते तत्तथाऽनुसृत्य योज्यमित्यतीव अन्यार्थं स्मारयति । तद्योजनोपायविज्ञानप्रद र्शनार्थमप्याह—भेदाभेदसंवृतिपरमार्थस्थानव्यवस्थापनयेति, ये तत्र भेदरूपाः परमाणवः परमार्थसन्त- स्तेऽत्र संवृतिसन्तः सर्वसर्वात्मकपरमार्थवादे, यस्तत्राभेदः परमाणुसमुदायः संवृतिसन् सोऽत्र परमार्थ 15 सदित्यनया व्यवस्थापनया योज्यम् । पुनरुत्तरोऽपि ग्रन्थो योज्यस्तथा—सर्वसर्वात्मकैकरूपान्तरा विविक्ततरत्वे रूपादिसत्त्वादिसंघात इन्द्रियसन्निकृष्ट आलम्बनविपरीतैकरूपेयं प्रतिपत्तिः, व्यपदे श्यानेकात्मकनीलरूपविषया न च हेत्वपदेश्याप्यपदेश्यैषा यतः सर्वात्मकग्रहणापदेशेन धूमेनेवाग्नि सामान्यमनुमते नाग्निर्देश्यरूपम्, किं कारणं? ततोऽन्यत् कस्यचिदेकं रूपम् । ननु सर्वस्य कारकहेतु त्वेनापदेशः प्रत्यक्षप्रतिपत्तेर्न धूमवत्, ज्ञापकहेत्वपदेशतयाऽभेदिवार्थान्तरस्यानेकरूपत्वस्य । नन्विह 20 प्रत्येकार्थस्य प्रदर्शनार्थं प्रस्तुतमस्माभिर्यदिदं प्रत्यक्षं स्यात् कारकमेव, स्यार्थाद्यालम्बनाद्धेतोर्यथैव, ग्राह्यानुभववत् प्रमाणत्वादव्यवहितप्रतिपत्त्यात्मकत्वात् प्रत्यक्षस्य स्वलक्षणविषयत्वादनध्यारोपात्मक-

---

[illegible] सम्भाव्यमानेऽपि [illegible] रूपादिसंघात [illegible] आलम्बनता [illegible] तत्र च प्रत्येकं [illegible] । [illegible] भेदाभेदेति [illegible] विशेषैकान्तवादे, [illegible]—अविशेषैकान्तवादे । [illegible] ग्रन्थः [illegible] 25 [illegible] इति योज्यम्, [illegible] प्रतिपत्तिः [illegible] भवति [illegible], [illegible] भवति [illegible] तद्योजेति । इन्द्रियसन्निकृष्ट इति [illegible] इत्यर्थः । व्यपदेश्येति [illegible] विषयी- करणात्, तथा बौद्धमते ननु हेत्वपदेश्यापदेश्यैव वा यतः [illegible] धूमेनाग्निरिव [illegible] 30 [illegible] । ननु च [illegible] । [illegible] प्रत्यक्षं [illegible] स्यात् [illegible] ननु भवति [illegible] । [illegible] तथा [illegible] भवति [illegible], [illegible]

त्वादिति यावत्, अपि च कारकत्वापि सर्वस्य नैव, तत्र द्वितीयचन्द्रवत्परमार्थतोऽसत्त्वादुक्तवत् इत्यानुविम्बवत्सामान्यमात्रसालोकवत् सर्वसत्त्वे विशिष्टोऽपदेशो व्यपदेशो माध्यात्म्यकेन व्यपदेशेन प्रमेयं व्यपदेश्यमनुमेयं न प्रमाणम्, धूमादनुमेयाग्निवत्कारकत्वायां कारकत्वायां वा वस्तुनः, विधूमा ग्निवत्। अभिधानाव्यपदेश्यमेकात्मकत्वे अपि च नैवानुमितामिपरेषैकमेकविषयत्वाभीवस्य, तद्वि

5 नीलनिरूपण विकल्पः प्रतिपरमाणु परस्परप्रतिबिम्बकत्वस्वानकरूपैकत्वैकसामान्यारोपात् सर्वसर्वा- त्मकैकरूपवस्तुस्वरूपापनेकरूपाध्यारोपात् रूपान्तरसामान्यरूपविषयत्वात्तद्विषयत्वस्वानपोहापो- हाद्यऽनुमानवत्सामान्यात्मकत्वैव परमार्थस्थितस्याप्रमाणसिद्धीकाणुमेयपरिग्रहात्मकत्वात् साधार- णार्थविनिवृत्तकरूपसारमकत्वात प्रत्यक्षमनुमानमप्यात्मकत्वात्कल्पनाभावपरत्वमप्रमाणवत्, संवृत्त्यतीन्द्रिय त्वाभ्यां हि न नीलादिषु न च तत्त्वे कारणता तथा प्रतिपत्ति प्रति, अनुमानज्ञानमपि तत्र प्रति-

10 पूर्वत्वे, सम्यग्गृहीतसाम्यधर्मप्रतिपत्त्यर्थविकल्पनमिति समानमेतत् कल्पनात्मकत्वात्। अन्यदपि यथा सम्यक् तत्प्रतिपत्तिं मुक्त्वा अनुमयोः सामान्यं तत्सर्वं योज्यम्।

एवं तावद्विशेषाविशेषैकान्तवादयोः स्ववचनव्यपेक्षाक्षेपदुस्तरविरोधत्वादौपनिषदप्रत्यक्ष विलक्षणं कल्पितमपि न युक्तमित्युक्तम्, मानात्त्वैकान्तवादेऽपि सामान्यविशेषयोः 'आत्मे- न्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्', (वै० अ० ३ आ० १ सू० १८) आत्मा मनसा

15 मन इन्द्रियेणेन्द्रियमर्थेनेति चतुष्टयत्रयद्वयसन्निकर्षादुत्पद्यमानं प्रत्यक्षमित्येतदपि द्रव्यादि विनिर्मुक्तत्वात् किमात्मादि? इति न प्रत्यक्षम्।

(एवं तावदिति) (सामान्यविशेषयोरिति) अयुक्तं प्रत्यक्षमिति वर्तते, कीदृशं वा तत्र सर्वं व्यवधुतं वेति? आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्, आत्मा मनसा मन इन्द्रि- येणेन्द्रियमर्थेनेति चतुष्टयत्रयद्वयसन्निकर्षादुत्पद्यमानं प्रत्यक्षमित्येतदपि नानात्वैकान्तवादिनां मत द्रव्या-

20 दिविनिर्मुक्तत्वात् किमात्मादीनीति न प्रत्यक्षम्। द्रव्यसामान्यैर्विपाक्य इमे द्रव्यादयो द्रव्यगुणकर्मसामान्य विशेषसमवाया अद्रव्यत्वात् द्रव्येभ्योऽन्ये अपुष्पवत् स्युः, एवं गुणेभ्योऽन्ये न स्युरगुणत्वात्, अक- र्मत्वात्, कर्मणोऽन्येऽसामान्यत्वात्सामान्यतोऽन्येऽविशेषत्वाद्विशेषेभ्योऽन्येऽसमवायत्वात्समवायादन्ये निर्मुक्तत्वात् खपुष्पवत्सर्वे। तस्य निर्मुक्तत्वं चापरिणामित्वाद्द्रव्याद्यपृथक्त्वतोऽसत्त्वात्तस्मादीनामात्मा- द्यभावे क्रियात्मादि यत्सन्निकर्षाज्ज्ञानमुत्पद्येत? क्व तत्? आत्मद्रव्याभावात्, किं तत्?

25 गुणाभावात्। इतिहासो हेत्वर्थे राजपुरुषोऽसीति न बिभेमीति यथा तथा इति न प्रत्यक्षम्, आत्मादिद्रव्याणां ज्ञानादिगुणानामभावादात्मादि प्रत्यक्षमित्यर्थः।

योजितं योज्यम् एकत्वेऽपि। नैव—नास्तीति नैव। तेन व्यपदेशेनेति तेन व्यपदेशेन व्यपदेश्यं प्रमेयं तदभिमत- प्रत्यक्षप्रमाणमनुमेयं प्राप्नोति न प्रमाणं धूमानुमेयाग्निवदिति वस्तुनो व्यपदेश्यत्वादिति कारकत्वाभावात्कार्यं वा न प्रतिपत्तिर्योगर्थत्वमित्यत्वात्। आत्मेन्द्रियेति आत्मेन्द्रियार्थसन्निकर्षात्तदनुत्पद्यते तदन्यत् ज्ञानम्, नाभिव-

30 दितसमर्थसन्निकर्षेभ्योऽन्यत्, अन्यत्वमिति सूत्रार्थं। चतुष्टयेति चतुष्टयमेव सुखादावात्मनिकेषु आत्मनः इन्द्रियार्थसन्निकर्षेण च कर्मगुणत्वसन्निकर्षात् प्रत्यक्षमुत्पद्यते अन्यत्वमपि द्रव्ये स्यात् चतुष्टयद्वि- त्रिसन्निकर्षेण सन्निकर्षात् प्रत्यक्षम्, आत्मन योगिनिकर्षेण प्रत्यक्षम्, इन्द्रियार्थसन्निकर्षेण ज्ञानसन्निकर्षात् प्रत्यक्षं योज्यम्। मतेऽस्मिन् सामान्यविशेषयोरत्यन्तभिन्नत्वेन द्रव्यादीनां निर्मुक्तत्वादात्मनः एवेति प्रत्यक्ष मनित्यैकैकानेनानन्द द्रव्यादिविनिर्मुक्तत्वादिति। खपुष्पवत्सर्वे इति न स्युरिति नैव राजपुरुषोऽसीति

तेषामपारमार्थिनामन्यथा—परमार्थतो विद्यमानानामनेकान्तात्मकानामेकान्तात्मकतया कल्पनात् मिथ्याध्यारोपात्कल्पनात्मकत्वादिभ्यो हेतुभ्यो भ्रान्त्यादिवच्च मतमिति पूर्वोक्तं तदेव व्याचष्टे—

द्रव्यगुणभवनविशेषकारणकार्याणां सदसदनेकान्ततत्त्वानामन्यतमैकान्तकल्पनात् कल्पनात्मकत्वम्, ततः कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवदप्रत्यक्षम् ।

द्रव्यगुणेत्यादि यावत्प्रत्यक्षमिति, द्रव्यग्रहणेन पृथिव्यादीनां तत्कल्पितानां सर्वगुणानां ग्रहणेन भवनग्रहणेन सत्तायाः विशेषग्रहणेन गोत्वादीनां यावदन्त्यविशेषस्य कारणग्रहणेनावयवा द्रव्याणां संयोगादिगुणानां कर्मणाञ्च कार्यग्रहणेन द्व्यणुकावयविद्रव्याणां चित्रादिगुणानाञ्च ग्रहणम् । तत्र परमार्थतः सदसंश्च पदार्थोऽनन्तरोक्तो द्रव्यादित्वस्यानेकान्तः सततस्व—द्रव्यमपि रूपाद्यपि भवनमपि विशेषोऽपि कारणमपि कार्यमपीति, तस्य तस्यान्यतमैकान्तकल्पनात्तत्त्व—द्रव्यमेव गुण एव भवनमेव विशेष एवेति न तत्त्वतत्त्वमपीति, तस्मात्कल्पनात्मकत्व सिद्धम्, ततः कल्पनात्मकत्वादिभ्यो भ्रान्त्यादिवदप्रत्यक्षम्, कल्पनात्मकत्वादयः प्रागुक्ताध्यारोपात्मकाभ्यवनविपरीत मपरत्वादयः ।

अतः सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहवत्त्वेव सामान्यविशेषौ घटादि विषयौ नान्यथेति विधिः ।

अतः सर्वप्रमाणाविरोधीत्यादि यावद्विधिरिति, अत इत्यनन्तरोक्तसर्वोपपत्तिमपदवो त्स्याद् प्रतिज्ञार्थं यथालोकग्राह्यमेव वस्त्विति तमभिगमयति सोपपत्तिकम्, सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहवत्त्वेवेति, प्रत्यक्षानुमानागमप्रमाणैरनवधारितकारणकार्योभयानुभयात्मकं तस्य तस्य वस्तुनो भावतत्त्वमविरोधि तदभिमतस्वे तत्त्वस्य तत्त्वेन वा व्यवहारस्तस्मिन् समवस्था यस्य लोकस्य, तस्य लोकस्य परिग्रहः स सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकपरिग्रहस्तद्वत् तेन तुल्यं वर्तत इति, एवेत्यवधारणे, तादृग्लोकपरिग्रहवत्त्वेव सामान्यविशेषौ, न तु सामान्यमेव विशेष एव परस्परं भिन्नावेवाभिन्नावेवेति वा यथा शास्त्रेषु कल्पितावित्ति । अथवा सर्वप्रमाणाविरोधिनि तत्त्वव्यवहारे समवस्था यस्य स लोकः सर्वप्रमाणाविरोधितत्त्वव्यवहारसमवस्थलोकः तस्य परिग्रहवत्त्वेव सामान्य विशेषौ नान्यथेति यथा प्रतिपादित लोकवत्त्वेन घटादिविषयाविति, यथा लोके घटादिभवनमेव सामान्यं विशेषश्च द्रव्यक्षेत्रकालभावरूपभवनविशेषाविशेषाभ्यामुक्तविधिना कार्यकारणादिभेदेन वा नियतौ सर्वत्र न सर्वथैकान्तवादवत्स्वभावौ, इति विधिः, इतिः प्रदर्शने, एष विधिरित्थं विचारितो यः प्रागुदितः ।

र्थं राजपुरुषोऽस्मीति हेतोरहं न बिभेमीति भाव । अस्मीति पाठे तु अहं राजपुरुषोऽस्मि अत एव न कस्माद्बिभेमीति भावः । भवनग्रहणेन सत्ताया इति अविशेषत्वात् सत्तायाः सर्वत्र सत्त्वादिति भावः । विशेषग्रहणेन च सामान्यविशेषसमन्त्यविशेषाणां च ग्रहणम्, कारणग्रहणेनावयवादिद्रव्याणामवयविद्रव्यं प्रति समवायिकारणत्वात्, संयोगादिगुणानामवयविद्रव्यं प्रत्यसमवायि-कारणत्वात् कर्मणश्च संयोगविभागकारणत्वाद्ग्रहणम् । एतेषां पदार्थानां परमार्थत सदसद्रूपतयाऽनेकान्तात्मकत्वेन तत्त एकत्वमेकान्तात्मकत्वं कल्पितमिति तदुक्तमसत्पदार्थं कल्पनात्मकमवस्तुभूतमिति भावः । अतोऽपसंहरति सर्वप्रमाण इत्यादिना, अनवधारितकारणकार्योति यस्तु कारणत्वेनैव कार्यत्वेनैव उभयात्मकत्वेन अनुभयात्मकत्वेनैव वा अनवधारितं वस्तुतत्त्वं तत् सर्वप्रमाणाविरोधि तदभिमतस्वरूपेण लोकस्य व्यवहारप्रवृत्तेः सामान्यविशेषौ तदभिधावेव

एष च वेदनादिभिरपि लोकप्रमाणकोऽज्ञानिकवाद उपजीव्यत इति, किञ्चित् ज्ञायते को वेत्त्येव किं वाऽनेन ज्ञातेनेत्यज्ञानमात्रफलत्वाभ्यां वस्तुतत्त्वविचारो न युज्यते, क्रियावा दयोपदेशोऽतः श्रेयानिति लेशेनाभ्युपगतत्वात्तस्यैवायमन्यभेदः । सर्वमिदमज्ञानप्रतिबद्धमेव जगत् पृथिव्यादि, रूपादिमत्त्वाद् घटादिवत् ।

5 (एष इति) एष च वेदनादिभिरपि लोकप्रमाणकोऽज्ञानिकवाद उपजीव्यत इति, यथागमे चैकस्य चतुर्धा भेदात् सप्तनयशतान्यर्था व्याख्यायन्ते, तेषां पुनश्चतुर्धा संक्षेपः, क्रियाऽक्रियाऽज्ञानविनयवादसमवसरणवचनात्, तत्रोक्तं तेऽज्ञानिकवादाः—(किञ्चिदिति) तस्यैवायमन्यभेद इति, तस्यैवाज्ञानवादस्यान्योऽयं भेदः, कतमोऽसौ भेदः ? सर्वमिदमज्ञानप्रतिबद्धमेव जगत् पृथिव्यादीति, कथं ? रूपादिमत्त्वाद् घटादिवत्, आदिग्रहणात्तेजोवायवः ।

10 ननु नैते पदार्था अज्ञाना एव, किमर्थमज्ञानप्रतिबद्धं जगत् पृथिव्यादीत्युच्यते ? उच्यते, आकाशव्यतिरिक्तेन्द्रियमनःप्रभृतीनामपि तद्व्यतिरेकेणानुपलब्धेर्न सन्ति, तन्मयत्वादेव च तदचेतनानि, अत आह—

इन्द्रियाण्यपि च तन्मयान्येवाचेतनानि ।

इन्द्रियाण्यपि च तन्मयान्येवाचेतनानीति, तन्मयत्वानुमानञ्च भूतत्वाद्गन्धवत्त्वाच्च पृथिवी
15 गन्धे यथा घ्राणं तेजोवायुश्च, रसरूपस्पर्शेषु गन्धविशेषात् रसरूपस्पर्शविशेषादिति, सामर्थ्यं प्रसभिधानाद्द्वारेष्वादिविशेषलिङ्गदर्शनात्तस्या गुणगुणिव्यतिरिक्तोऽप्यचेतनगुणम्, गुणगुणिनोर्भेदाभिन्नत्वा ज्ञानारम्भकत्वसाम्यात् पृथिव्यादिगुणस्येऽपि तुल्यानुमानत्वात् ।

अभ्युपेत्याप्यात्मादिव्यतिरेकं—

तत्करणत्वाद्वा प्रकाशितं स्थूलमर्थं प्रकाश्यत्वात् प्रतिपद्येत ज्ञः, प्रदीपप्रकाशितघटवत् ।

20 (तत्करणत्वादिति) तत्करणत्वाद्वेषामिन्द्रियाणां करणत्वात्तानि चाऽस्य करणानीति तत्करणोऽज्ञः, तैः करणैः प्रकाशितं घटादिस्थूलमर्थं प्रकाश्यत्वात्, पश्यात्मप्रमेयं प्रकाश्य प्रतिप-

---

व सम्भवेति भावः । अत्र पक्षे वस्तुतत्त्वे सर्वप्रमाणानिरोधितं विवेचनम्, अत्र नैति पक्षे च वस्तुतत्त्वस्याद्वारे [illegible] मिति भेदः । एष चेति अयं विचारो लोकप्रमाणविरोऽप्यज्ञानवाद एव [illegible] [illegible] भावः । किञ्चिदिति किञ्चित् ज्ञायते को वेत्त्येत्यनेन [illegible] किं वाऽनेन ज्ञाते-
25 [illegible] वस्तुतत्त्वविचारो व्यर्थ इति भावः । लेशेनाभ्युपगतत्वादिति [illegible] [illegible] गुरोपसम्भावना । [illegible] तस्यैवायमिति । ननु पृथिव्यादयो [illegible] [illegible] [illegible] इति । तद्व्यतिरेकेणेति । पृथिव्यादिव्यतिरेकेण [illegible] तन्मयत्वादेव चेति पृथिव्यादिमयत्वादित्यर्थः । तन्मयत्वानुमानञ्चेति [illegible] पृथिव्यादिमयत्वानि [illegible]
30 [illegible], इन्द्रियाणां [illegible] इति भावः । तत्र [illegible] [illegible] [illegible] रसरूपस्पर्शेषु रसरूपस्पर्शविशेषवत्त्वात् पृथिवीगन्धे इति [illegible] इति, [illegible] । गुणगुणिनोरिति [illegible] [illegible] पृथिव्यादि- [illegible] भावः । तत्करणत्वादिति [illegible] [illegible]

मानोऽपि प्रतिपद्येत सः—सम्यग्ज्ञायमानप्रतिपत्तिरपि पुरुषः स्थूलमेवार्थं प्रतिपद्येताज्ञानात्मकम्, करणानि चाज्ञानानि, अचेतनकरणप्रकाशितमप्यचेतनम्, प्रदीपप्रकाशितघटादिवदेव स्यात् स्थूलम्।

न च परमाण्वादि सूक्ष्मं शुद्धचेतनस्वरूपपुरुषादि वा स्यादज्ञानादिप्रतिबद्धम्, तस्यापि चेन्द्रियसन्निकृष्टद्रव्यव्यतिरिक्तासाधारणस्वरूपादर्शनादिदमिदमिति न निरूपणोपायोऽस्ति, प्रत्येकं समुदाये वा तद्दृष्ट्यनुपपत्तेः, अपूर्वत्वात्। 5

न च परमाण्वादि सूक्ष्मं शुद्धचेतनस्वरूपपुरुषादि वा स्यादज्ञानप्रतिबद्धं तस्यापि चेन्द्रियसन्निकृष्टेष्वपि, सत्यपि च तस्य स्थूलस्य ग्राह्यत्वे तत्स्वरूपाज्ञानादज्ञानसम्बद्धमेव तदेवेन्द्रियसन्निकृष्टद्रव्यान्तरव्यतिरिक्तमसाधारणं यत्स्वरूपमात्मादेर्योऽतीन्द्रियस्य तस्य कश्चित् कदाचिददर्शनादिदमिदमिति न निरूपणोपायोऽस्ति, निरूपणं निर्णयज्ञानमित्यर्थः, किं कारणं न निरूपणोपायोऽस्ति इदमिदमितीति चेदुच्यते—प्रत्येकं समुदाये वा तद्दृष्ट्यनुपपत्तेः, तस्यासाधारणरूपस्यापूर्वत्वात्, अपूर्वत्वादेव 10 तद्दृष्ट्यनुपपत्तिर्निर्णयानुपपत्तिश्च, प्रत्येकं तावन्न हि घट एकैकः कृष्णादिरूपोऽपूर्वत्वाद् दृश्यते स्वरूपतः, तत एव प्रत्येकमनिरूपितस्वरूपाणां कुतो निरूपणं समुदाये? सिद्धत्वात्तु प्रत्येकमनिरूपितस्य समुदाये तैरुक्तस्य निरूपणाभाववत्, निर्णयेन रूपणं निरूपणं तदुपायाभावादज्ञानप्रतिबद्धमेव सर्वमिति चापूर्वम्।

स्यान्मतमनुभवितुर्बाह्यविषयमिदमिदमिति निरूपणं मा भूद्यदि न भवति स्वसंवेदनं किन्त्वाभ्यन्तरं सुखदुःखादिषु किं निरूपणं न भवतीति? उच्यते स्वसंवेदनेनाशनाद्यभ्यवहृतं 15 परिणमयन्न संवेतयतीति व्यभिचारश्च भवति। तथा सुखादीनां चलनकम्पस्पन्दनस्फुरणादिक्रियाः कुर्वतामसंवेतयमानानामेव ताः क्रियाः दृश्यन्ते, इत्थं कम्पिताकम्पिततया सूक्ष्मत्वादनुपपत्तेरज्ञानानुविद्धमेव सर्वं ज्ञानमिति परिच्छेदार्थश्च प्रमाणव्यापारः।

(स्यान्मतमिति) स्वसंवेदनेनाशनाद्यभ्यवहृतं परिणमयन्नित्यादि, प्राणापानाद्य संवेतयन्नेव हि वर्ततेऽस्मादि सर्वो लोकः, अभ्यवहृतमपि स्वकरसभावेन रसरुधिरादिभावेन च परिणमयन् 20 संवेतयति स्वयमेव तथा सुखादीनामिति, सुखप्रभवमूर्च्छितगर्भाः सुखादयः, तथाऽन्यमनसामव्यक्तत्वात्

अतत्स्वरूपेऽचेतनत्वेऽतीन्द्रियत्वमपि स्थूले च्यार्थस्तु प्रधानस्वरूपस्यापि प्रतिपद्यते [illegible] इन्द्रियैः प्रकाशितमिति [illegible] । ननु स्थूलं व्यादि भवतु चेतनमचेतनकरणप्रकाशितत्वात्, ननु सूक्ष्मं परमाण्वादि शुद्धचेतनस्वरूपपुरुषादि वा [illegible] परमाणोरतीन्द्रियत्वेन पुरुषस्यैव चेतनस्वरूपत्वात् [illegible]—न च परमाण्वादीति । न चेति [illegible] । उच्यते— 25 तस्यापीति [illegible] । एवं सूक्ष्मस्य परमाण्वादेः [illegible] प्रत्येकमनिरूपितस्वरूपत्वं [illegible]—प्रत्येकं तावदिति । ननु [illegible] 30 [illegible]—स्यान्मतमिति । [illegible]—स्वसंवेदनेनेति । व्यभिचारमेवाऽऽदर्शयति—प्राणापानादीति । [illegible] दर्शितोऽनेन [illegible] दर्शयति—तथा सुखादीनामिति । [illegible]—सुखेति ।

कण्डूयनमक्षकर्णभस्पर्शसंवेदनं गन्धादिग्राणे मुखादीनामाम्लद्रव्यास्वादनमसंक्लेशितं रसास्वादनमित्यर्थः । आदिमत्त्वात् मुखकुम्भितकशिवादयः, यथैताः क्रिया असङ्क्लेशितात्मा सर्वैवमपि, इत्थं कल्पिताकल्पितवदाभूतप्रलयानुपपत्तेरिति, कल्पितत्वात् कल्पितत्वादेव तथाभूतो न भवति प्रलयः । अकल्पितोऽपीश्वरमुक्तविधिना नोपपद्यते तथाभूतः प्रलयः इत्य इत्यर्थः, तस्मात् कल्पिताकल्पिततथा-
5 भूतप्रलयानुपपत्तेरज्ञानानुविद्धमेव सर्वं ज्ञानमिति । परिच्छेदार्थश्च प्रमाणव्यापार इति, प्रमार्थं हि व्याप्रियमाणं यथार्थपरिच्छेदार्थमिष्यते, न चेदं तत्परिच्छेदोऽस्तीति वैधर्म्यं दर्शयति ।

स्यान्मतमज्ञानप्रतिबद्धमित्यज्ञानशब्दोच्चारणादेव ज्ञानाभ्युपगमः कृतो भवति, प्रतिषेधस्य प्रमाणवदन्यत्र प्रसिद्धविषयत्वात्, अन्यथा प्रतिषेधानुपपत्तेः, स्ववचनविरोधाच्च, तथापि न चाज्ञानमित्युक्तिविरोधः, राधकपूर्णकमातृव्यपदेशवत्, विशेष्यभावाभ्यामनव-
10 धारणात्, तथा ज्ञानाज्ञानाभ्यां तदेव विशिष्यते वस्त्विति नोक्तिविरोधो ज्ञानाज्ञानयोर-विशेषात्, संशयविपर्ययानध्यवसायनिर्णयानामवगमाववबोधार्थत्वात् अवगमस्य बोधाबोध-पर्यायत्वात्तस्मादेतस्मिन्नयभङ्गेऽज्ञातमेव सम्यक्सार्थः ।

(स्यान्मतमिति) (नचाज्ञानमित्युक्तिविरोध इति) किमिव ? राधकपूर्णकमातृव्यपदेशवत्, कुतः ? विशेष्यभावाभ्यामनवधारणात् । का भावना ? यथा राधकस्य पूर्णकस्य चैकैव माता विवक्षिता
15 भवति तदा राधकमातेति राधकेन विशिष्यमाणा पूर्णकमातेति पूर्णकेन वा, अत राधकपूर्णकमातेत्यु-भाभ्यां वा सर्वथा राधकस्यैव पूर्णकस्यैव वा मातेत्यवधारणं नास्ति विशेष्यभावाभ्यात्, तथा ज्ञानाज्ञानाभ्यां तदेव विशिष्यते वस्त्विति विशेष्यभावाभ्यां नोक्तिविरोधो ज्ञानाज्ञानयोरविशेषात् । न तु यथा विशेषणभावाभ्यामवधारणं नीलमुत्पलमिति अतस्तेषामवबोधार्थमेवाज्ञानत्वमज्ञानत्वमविशिष्टमिति तत्प्रदर्शयन्नाह—संशयविपर्ययानध्यवसायनिर्णयानामवगमाववबोधार्थत्वात् । 'गम्लृ सृप्लृ गतौ' अवपूर्वं गमन-
20 मवगमोऽवगममात्रबोधः 'बुध अवगमने' इति वचनात् सर्वेषां संशयविपर्ययानध्यवसायनिर्णयानाम वगमार्थत्वादवगमस्य च बोधाबोधपर्यायत्वात्, तस्मादेतस्मिन्नयभङ्गेऽज्ञात एव सम्यक्सार्थः, मन्नमहत्वं

व्यवस्थानासु सर्वेषामात्मनां तत्संवेदनं नास्तीति भावः । [illegible] व्यभिचारमाह—तथाऽप्यनवस्थामिति । [illegible] इत्यनभिप्रायमाशङ्क्याह—आदिमत्त्वादिति । [illegible] प्रतिषेधप्रतिपत्तिर्भवितुमर्हति प्रतिषेधोऽपि [illegible] प्रतिषेधस्य [illegible]
25 [illegible] ज्ञानमिति [illegible] । [illegible] स्यान्मतमिति । [illegible] तथापि न चेति । अनवधारणादिति, [illegible] । नील-मुत्पलमितीति [illegible] विशेषणभावा-[illegible] भावः । तेषामिति [illegible] संशयनिर्णयानध्यव-
30 सायनिर्णयानामित्यर्थः । अवबोधार्थत्वादिति [illegible] भावः । [illegible] मन्नमहत्वमिति । [illegible] परस्परनिरपेक्षत्वात्, [illegible]

महाम्बरसूचनार्थम्, परस्परनिरपेक्षाणां भङ्गानां पृथगेवोपात्तत्वाद्विपर्यये सत्यत्वात् तेषाञ्च विधिनियमयोरेव भङ्गत्वात्प्रधानानाम्, तथाऽस्मिन्नेव नयभङ्गे शब्दस्यासत्योऽर्थो भाष्येषु, तेष्वप्यन्येऽन्येऽर्था इति ।

एतस्य दर्शनस्य ज्ञापकमाह—

यथा चाहुः 'अस्त्यर्थः सर्वशब्दानामि'ति, सत्तामात्रमर्थः सर्वशब्दानाम्, कोऽप्यस्यार्थोऽस्ति, न निरर्थकः शब्दः, स पुनरर्थो न निरूपयितुं शक्योऽयमयमिति, एतत्तत्याप्यलक्षणम्, तत्र दृष्टान्तोऽपूर्वदेवतास्वर्गशब्दानामर्थो यथा तेषामत्यन्तापरदृष्टत्वादीदृशोऽपूर्वः स्वर्गो देवता चेदृशीति न प्रतिपद्यामहे निरूपणेन तथा गवादिशब्दानामप्यर्थः तत्समरेव भवितव्यम्, न हि गमनागमनगर्जनादिव्यर्थव्यवस्था विशेषरूपेति कश्चिदस्त्यर्थ इत्येतावत्प्रतिपत्तव्यम् । एतस्मिन्नेव नयभङ्गे सर्वाणि पदानि वाक्यार्थः, तद्यथा देवदत्त ! गामभ्याज शुक्लां दण्डेनेत्यत्र परस्परादविवेकेन सङ्कीर्णरूपाणि पदान्येकार्थान्यन्वयव्यतिरेकाभ्यामनुगम्यमानं सम्पिण्डितमिवार्थं मूपुर्न पृथग्भूतम्, तस्मात् सर्वाणि पदानि वाक्यार्थः ।

(यथा चाहुरिति) अस्त्यर्थः सर्वशब्दानामिति श्लोकः । (सर्वाणीति) पदान्येव वा वाक्यार्थः, नैकैकं न तद्व्यतिरिक्तं यथोक्तम् 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (पू. मीमांसायां अ० २ पा० १ अधि० १५) इति, न तु यथाऽन्यैः कल्प्यतेऽन्यथा, 'आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी । एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि । वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥' (वाक्यप० का० २ श्लो० १–२) इति ॥ अलौकिकत्वादसत्यमात्यपक्षत्वाभ्यामेव ।

क पुनरयं नयेऽन्तर्भाव्यते ? किं द्रव्यनयभेदे ? पर्यायभेदे वा, उच्यते—

व्यवहारदेशत्वाच्चास्य द्रव्यार्थता 'लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहार इति (तत्त्वा० अ० १ सू० ३५ भाष्ये) वचनात्, द्रव्यशब्दो द्रोरवयवो द्रव्यमिति व्युत्पादितः, 20 द्रुः गतिर्भाव तस्या अवयव एकदेशः, एकदेशोऽसमस्तवृत्तिरन्वयावृत्तित्वात् ।

(व्यवहारेति) व्यवहारदेशत्वाच्चास्य द्रव्यार्थता लौकिकसम उपचारप्रायो विस्तृतार्थो व्यव

व्यवहारदिव्यतिरिक्तत्वात्सर्वकल्पोपकारकमित्युपेक्षितिमिति भावः । अस्त्यर्थः सर्वशब्दानामिति अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् । अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ॥ (वाक्यपदीये का० २ श्लो० १२१) इति पूर्णः श्लोकः । तं व्याचष्टे—सत्तामात्रमर्थ इत्यादिना । ननु प्रत्येकं पदानि वाक्यार्थमवगमयेयुः उभयं वाथ वाक्यं वा पदार्थो वेत्यत्राह—23 एतस्मिन्नेव नयभङ्ग इति । सर्वाणि पदानि वाक्यपदाभिधेयानि न हि प्रत्येकं पदेभ्यो वाक्यार्थप्रतीतिर्भवति किन्तु परस्परानुगमनेन सङ्कीर्णरूपाणि पदान्येकार्थप्रतिपादकत्वाद्वाक्यमिति भावः । न तद्व्यतिरिक्तमिति पदसमुदायव्यतिरिक्तं पदार्थसमेताद्भिन्नं न वाक्यार्थरूपमितितमित्यर्थः । तत्र प्रमाणमाह—यथोक्तमिति पूर्वमीमांसायां वाक्यार्थैकत्वं विभज्यमानसाकाङ्क्षत्व लक्षणं यदेषु वाक्यत्वं पर्याप्तं न तु वाक्यसमूहे, तथैकार्थप्रकाशकत्वाभावात् अर्थैकत्वं च भिन्नप्रतीतिविषयत्वेनावैयर्थ्यमर्थविशेष्यतादिरूपम् भिन्नत्वमाननाकाङ्क्षत्वलक्षणान्वीयमानयोः पदार्थयोरन्वयेऽभिहितार्थत्वम् शोभनमासनं 30 करोमि तस्मिन् शीघ्रमासध्वमिति सर्वार्थत्वेऽपि भिन्नपात्रकर्त्तृकतया भिन्नवाक्यमिति भावार्थः । अत्र वैयाकरणैरुक्तम्, वाक्यविकल्पान् दर्शयति—आख्यातशब्दः सङ्घात इत्यादि । आख्यातशब्दः सङ्घात संघातवर्तिनी जातिः एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः आद्यं पदं, प्रत्येकं सर्वं पदं भिन्नोऽनुसंहारेऽपि साकाङ्क्षं पदं वाक्यं प्रति न्यायदर्शिनां मतिर्बहुधा भिन्नेत्यर्थः मतिभेदे धारयाह—अलौकिकत्वादिति । लोकव्यवहारेति लोके व्यवहारक्रमोऽर्थो हि यः इति भिन्नपदरूपतया प्रतीयमानः पदार्थः प्रतीयते यतो व्यवहारः सोऽपि द्रव्यार्थनयोऽङ्गभूतः 35 हि तथामात्रं द्रव्यार्थिकस्य विषया भवन्ति व्यवहारो भिन्नाभिन्नपदार्थविषयस्य तत्सम्बन्धादिभिः तथा

द्वार इति वचनात्तस्य द्रव्यार्थभेदत्वम्, लोकव्यवहारविषयो हि व्यवहारः, तदेकदेशविषयो विधिनयः, तस्माद्द्रव्यार्थभेदः । यथा 'दव्वट्ठियनयपयडी सुद्धा संगहपरूवणाविसओ । पडिरूवं पुण वयणत्थनिच्छओ तस्स ववहारो' (संमति कां० १ गा० ४) इति । तस्य द्रव्यार्थत्वमुत्पत्तिप्रदर्शनार्थमाह-द्रव्यशब्द इति प्रोक्तवचनो द्रव्यमिति व्युत्पादितत्वात् । अथ द्रुः कः ? 'द्रु द्रु गतौ' धातुस्वार्थमनुगम्य
5 प्रातिपदिकं 'द्रुद्रुभ्यां मः' (५।२।१०८) इति निपातितत्वात् । तस्यार्थो द्रुगतिः यात्रा व्यवहारो लोकस्येति तस्या यात्राया अवयव एकदेश इत्यर्थकथनात् स एकदेशः क इति चेदुच्यते—एकदेशोऽसमस्तवृत्तिरव्यापिव्यवहारात् समस्तलोकव्यवहारविपरीतवृत्तिव्याप्तिव्याहतिरित्यर्थः ।

सा पुनरस्या विधिवृत्तेरेकदेशावृत्तिता लोकस्य एव, मृद्घटादिसामान्यविशेषाणामर्थक्रियापन्नां परित्यागमत्वात्, तस्मादन्यदवस्तु, अलौकिकत्वात् खकुसुमवत्, व्यतिरेके घटवदिति दिक् ।

10 (सा पुनरस्या इति) सा पुनरस्या विधिवृत्तेरेकदेशवृत्तिता, कुतः परिच्छिद्यत इति चेल्लोक एव परिच्छिद्यत इत्यर्थः, यस्माल्लोके तदेकदेशवृत्तिता मृद्घटादिसामान्यविशेषाणां मृत् सामान्यं घटो विशेषः मृदः सामान्यं द्रव्यत्वं घटविशेषः पृथुबुध्नोदराद्याकारोऽसम्पूर्णरक्तकृष्णतादिः सर्व एवैष परित्याज्योऽर्थक्रियापन्नः, समस्तवृत्तौ सर्वात्मनां यथार्थं प्रमाणपरिच्छेद्यत्वात्या तस्मादनादिनिधनत्वैकान्ताग्रहस्य मायाप्रपञ्चान्यथा लौकिकत्वाद्व्यक्ता मुक्तिः । इति परिसमाप्तौ, विधिनयस्य भेदो विधिरिति । तस्मात्
15 व्यस्तवस्तु अलौकिकत्वात् खकुसुमवदिति गदार्थम् । अभिप्रायार्थः—स तु मन्यते अलौकिकत्वसाधनाद्विपरीतनिर्गमवस्तित्वति, व्यतिरेके घटवदिति, वस्तु तल्लौकिकमेव यथा घटः कार्यं कारणं वा सामान्यं वा विशेषो वा यो वा स वाऽस्तु यथा लोकप्रसिद्धिः पृथुबुध्नाद्याकारसामान्यविशेषवद्मात् स च लौकिक इति व्यतिरेके—वैधर्म्ये ।

सर्वनयानां जिनवचनस्यैव निबन्धनत्वात् किमस्य निबन्धनमिति चेदुच्यते—

20 निबन्धनमस्य आया भंते नाणे अन्नाणे, गोयमा आया सिय नाणे सिय अन्नाणे णाणे पुण नियमं आया इति (भग० १२-श-३-१०)

निबन्धनमस्यति, आया भंते णाणे अन्नाणे इति स्वामी गौतमस्वामिना पृष्टो व्याकरोति गोयमा ! णाणे नियमा आया अतो ज्ञाने नियमादात्मा ज्ञानस्यात्मव्यतिरेके द्रव्यादर्शनात्, आया सिय णाणे सिय अन्नाणे आत्मा पुनः स्याज्ज्ञानं स्यादज्ञानम्, अज्ञानमप्यसौ ज्ञानावरणीयकर्मवशीकृतत्वात् संश-
25 यविपर्ययानध्यवसायभावादित्यस्मात् सूत्रादित्थमित्यर्थोऽस्य निर्गमस्तत्सामान्यविशेषसमाधिप्रवर्तितिरिति ।

विधिभङ्गारो नाम प्रथमो द्रव्यार्थभेदः समाप्तः ।

व्यवहारैकदेशवृत्तिविषयत्वादपि द्रव्यार्थत्वं बोध्यम् । द्रव्यशब्देनापि व्यवहारैकदेशवाचकता नय द्रव्य-द्रव्यशब्द इति द्रु—व्यवहारः तस्यावयवः एकदेशो द्रव्यम्, एकदेशत्वं चास्य समस्तार्थापरिच्छेदकत्वात्, अर्थो हि द्रव्यपर्यायात्मकः द्रव्यांशैकदेशमात्रं नयः परिच्छेदक इति भावः । सर्वनयानामिति विधिनयस्यैव सर्वनयानामनुगमात् [illegible]
30 [illegible] आया भंते इत्यादि अस्या व्याख्यानं [illegible] इति [illegible], [illegible] मिथ्यात्वे इति [illegible] ज्ञानं पुनर्नियमात् [illegible] न च [illegible] धर्मिणो भिद्यते इति एवमात्मा ज्ञानं व्यभिचरति ज्ञानं त्वात्मानं न व्यभिचरतीति [illegible] ज्ञानावरणीयेति [illegible] इति भावः ॥

इत्याचार्यश्रीमल्लवादिसूरिकृते द्वादशारनयचक्रे [illegible] प्रथमो विध्यरः ॥

द्वितीयो विधिविस्तरः ।

अयमपि तु विप्रतिषेधादयुक्तः ।

(अयमपीति) अयमपि तु विधिवृत्त्येकान्तोऽपि विप्रतिषेधादयुक्त इति कः पुनः सम्बन्धः ? सविषयसम्यक्त्वेनार्थानां भावभावसमर्थैर्विधिनियमवृत्तिभिरनेकान्तविहितमत्सेकव्याभिः समधिगम्या चैतन्यसत्त्वसाधनवृत्तौ विवक्षितव्याप्तावविकल्पविशेषणा यदेव वृत्तिरधिकृतेत्यनन्तरोक्तया विधिवृत्तेरपि 5 प्रत्येकवृत्ताया मिथ्यादृष्टित्वादयमपि तु विधिवृत्त्येकान्तस्तस्याम्यः, कस्मात् ? अयुक्तत्वात्, अयुक्तस्व विप्रतिषेधात्, विरुद्धः प्रतिषेधो विप्रतिषेधः सर्वमुक्तं सूपेति प्रतिषेधवत् । अपिशब्दात् सामान्य विशेषोभयपार्श्वैकान्तः प्रथमनयदूषितोऽनुमत इत्ययमभिसम्बन्धः ।

कथं विप्रतिषेध इति चेदुच्यते—

यदुक्तं त्वया सर्वमज्ञानानुविद्धमेव ज्ञानम्, न च ज्ञानाज्ञानयोः कश्चिद्विशेषोऽस्ति 10 संशयविपर्ययानध्यवसायनिर्णयानामवबोधैककार्यत्वान्न लोकतत्त्वं ज्ञातुं शक्यम्, विफलश्च विवेकयत्नः शास्त्रेष्विति, तदपि लोकतत्त्वमज्ञेयमेव सर्वशास्त्रविहितलोकतत्त्वप्रत्यावर्णनं तर्हि प्रत्ययमेव, अशक्यप्राप्त्यफलत्वाभ्याम्, प्रतिषेध्यस्वरूपज्ञानविषयत्वाच्च ।

(यदुक्तमिति) किन्त्वयैवेदं विदित्वाऽविदित्वा वा सामान्यविशेषौ स्वविषयौ परविषयौ वा स्वात्मविषयाविलोकतत्त्वं शास्त्रान्तरेषु कल्पित दूषितम् ? विदित्वा चेत् तर्हि तत्पक्ष न विदितम्, अथा 15 विदित्वा, ततः कथं दूषितमित्युभयथाऽपि न युज्यते प्रतिषेधो विरुद्धत्वात्, प्रतिषिध्यते प्रतिषेध्यश्च न ज्ञायत इति हास्यमेतत् ।

स्यान्मतम्—

प्रतिषेध्यं ज्ञायते तैस्तस्य यद्वृथा कल्पितस्यानुपपत्तेरित्येतदपि विप्रतिषिद्धम्, तेषामपि मतानां लोकतत्त्वान्तःपातिनां मिथ्याविधिकत्वं ज्ञातमज्ञातं वा स्यादिति तुल्यविकल्पत्वात् 20 ज्ञाताज्ञातयोश्च तद्दोषाविमोक्षात् । यदप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति, तत्रापि विप्रतिषेधादज्ञानमफलमेव किमिति शास्त्रविहितार्थप्रतिषेधप्रयासः ? ।

विधिविधिव [illegible] सामान्यविशेषयोः [illegible], तत्र [illegible] विधिवृत्त्येकान्तोऽपीति विधे- 25 [illegible] पूर्वोदितसामान्यविशेषविधिविस्तरा [illegible] कः पुनः सम्बन्ध इति । [illegible] परस्परसापेक्षा [illegible] अन्यथा तु मिथ्यादृष्टित्वात् [illegible] विप्रतिषेधात् सर्वमुक्तं सूपेति प्रतिषेधवदिति [illegible] प्रतिषेधो यदि [illegible] सर्वमुक्तं [illegible] तर्हि कथं सर्वमुक्तं [illegible] प्रतिषेधा- [illegible] भावः । [illegible] सर्वमिदमज्ञान [illegible]- 30 [illegible] प्रतिषेधस्य [illegible] इति । अशक्यप्राप्त्यफलत्वाभ्यामिति [illegible] प्रतिषेध्यं ज्ञायत इति, [illegible] यद्वृथा कल्पितं

(प्रतिषेध्यमिति) प्रतिषेध्यं ज्ञायते तेनास्य वस्तुनस्सत्त्वादिगुणत्रयात्मकस्यानन्तरस्यादि षट्पदार्थात्मकानित्यतया बहुधा कल्पितस्यानुपपत्तेरिति, एतदपि विप्रतिषिद्धं तेषामपि सतां लोक-तत्त्वान्तःपातिनां मिथ्याविधिकत्वं ज्ञानमज्ञानं वा स्यादिति तुल्यविकल्पत्वात्, ज्ञाताज्ञातत्वयोश्च तदो-पाधिमोक्षात्, सामान्यं स्वविषय परविषय चेत्यस्मात् न मुच्यते तथा विशेष इति प्रपञ्चितत्वात्।
5 अज्ञातत्वे तर्हि सर्वमप्रत्यक्षत्वान्न प्रतिषेध्य इत्युक्तम्, ज्ञातत्वेऽपि कथं ज्ञानस्यास्य लोकतत्त्वमित्यप्रमाणत्वेन, स्वयमसमीक्षितबाध्यबाधकसम्बन्धत्वात्, तेन च तदुक्तवचनेन तावदज्ञस्य ज्ञातुं लोकतत्त्वमित्युक्तम्, विप्रतिषेधेऽप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति तत्रापि विप्रतिषेधात्, यदप्युक्तमनर्थको विवेकयत्नः शास्त्रेष्विति तत्रापि विप्रतिषेधात्तथाप्यनफलमेव किमिति शास्त्रविहितार्थप्रतिषेधप्रयासः ? शास्त्रविहि-तार्थज्ञानं तत्प्रतिषेधोपायज्ञानाद्यापार्थं किं सफलमफलम् ? इति, यद्यफलं विज्ञानं शास्त्रविहितार्थेन
10 प्रतिषेधविषयः प्रयासोऽप्यफल एव ज्ञातत्वात् पूर्ववत्। अथ सफलम्, अफलमेव लोकतत्त्वज्ञान-मिति व्याहन्यते, अतः को वेत्त्येव किं वाऽनेन ज्ञातेनेत्येतदप्ययुक्तमुक्तम्, विप्रतिषेधात्।

यदप्युक्तं वस्तुतत्त्वासम्प्रयातेः क्रियाया यथोपदेशो व्याप्त्यवदपूर्वकत्वात् सुखावाप्तेरिसन्मोत्पत्ते-

क्रियोपदेशस्याप्यत्राभ्युपगमोऽपि नैवं विघटेत, संसेव्यविषयस्वतत्त्वानुपातिपरिणाम-विज्ञानविरहितत्वात्, अज्ञातवैविध्यवस्तुतत्त्वपरिणामवदवैद्योपयोपदेशवदग्निहोत्रं जुहुयात्
15 स्वर्गकाम इत्याद्युपदेशो बालकाग्निग्रहणवत्।

(विघटेति) विघटत एवेति कथं निपुणमुच्यते। विघटेतेति सम्भावनयोच्यते दाक्षिण्यलोक-ज्ञानाभ्याम्। को हेतुर्विघटेत ? संसेव्यविषयस्वतत्त्वानुपातिपरिणामविज्ञानविरहितत्वात्, सम्भिसेव्य-भावे, भावमसाम्प्रायेन सेव्यमानस्य विषयस्य स्वतत्त्वं आहारादेः स्पर्शरसगन्धादिरूपस्य स्वरूपं 'भावाग्निमन्दोपशमोऽपथ्यप्रकोपाद्यः। नागदादिविषाद्युत्थाः व्याधयः प्रपाचनः॥' इति तत्स्वत-
20 त्त्वानुपातिपरिणामविज्ञानं तदनुपतितं ज्ञानमस्येति। किमुक्तं भवति ? आसेव्यमानस्य वस्तुनस्तत्स्वभाव एव स्वरूपानुपातेन विपाकपरिणामस्तद्विज्ञानविरहितत्वम्, स इत्थं विपाकः सुखाय दुःखाय चेत्येत-द्विज्ञानं हिताहितप्राप्तिपरिहारार्थं यत्तु भवतां नास्त्येव तद्विरहितत्वात् क्रियोपदेशोऽपि 'अग्निहोत्रं जुहुयात्स्वर्गकामः, पशुना यजेत मोक्षकामः' इत्यादिरैक्यार्थो न घटते, अज्ञातवैविध्यवस्तुतत्त्वपरि-णामवदवैद्योपयोपदेशवत्, यथा कस्यचिद्विज्ञातरसवीर्यविपाकप्रभावद्रव्यगुणविशेषमात्रामात्राविषयो-

---

25 तदनुपपत्तेरिति प्रतिषिध्यत इति भावः। सत्त्वादिगुणत्रयात्मकेति। सांख्यमतेन षट्पदेति वैशेषिकमतेन इत्यादिकं पदार्थेति वैशेषिकमित्यर्थेन, एतदपि [illegible] हेत्वाद् सामान्यं स्वविषयमित्यादिना। स्वयमसमीक्षित-बाध्यबाधकसम्बन्धत्वादिति [illegible] [illegible] [illegible] [illegible] भवन्तं निरवस्थानं स्यात् लोकतत्त्वमित्यादिकमिति भावः। विधिवत्त्वपेक्षयं विघटेत इति पक्षमेव प्रकृतस्य सम्भावनयैव कारणमोपपत्तिरप्रमाणीकरोति विघटत एवेतीति। संसेव्यमानेति [illegible]
30 कथं [illegible] [illegible], न [illegible] [illegible] [illegible] [illegible] न हि [illegible] [illegible] एव भवेदिति भावः। संसेव्येति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] एवं हिताहितप्राप्तिपरिहारः [illegible] स इत्यमिति। अग्निहोत्रमिति [illegible] [illegible]

गस्य देशकालानुरूपप्रकृतिसाम्यवमनवमनत्रोगसमुत्थनिदानादिलक्षणानभिज्ञस्यौषधोपदेशो न घटते तथाऽग्निहोत्रं जुहुयात्स्वर्गकाम इत्याद्युपदेशः । अथवा हिताहितप्राप्तिपरिहारार्थस्यास्यार्थोपदेशानां तदभावात् प्रीतिरेवास्त्विति इव बालकादिग्रहणवत् तज्ज्ञानविरहितस्योपदेशं श्रवणग्रहणधारणतदर्थानुष्ठानादिधर्मानुबन्ध्येव स्यादितीममर्थप्रदर्शनार्थं द्वितीयमुदाहरणम् ।

उपदेशादेव न ज्ञानयोग इति चेदयुक्तम्, उभयथाऽपि पौरुषेयत्वाद्भारतरामायणादिवदप्रामाण्यम्, अग्निहोत्राद्युपदेशस्यातीन्द्रियार्थस्य प्रामाण्यवत् सांख्याद्यतीन्द्रियार्थोपदेशप्रामाण्यं वा ।

(उपदेशादेवेति) स्यान्मतम् पुरुषस्यातीन्द्रियार्थदर्शनशून्यत्वात् स्वर्गपूर्वकर्मसम्बन्धज्ञाने पूर्वविज्ञानकारणाभावादन्यथा दोषिज्वरलक्षणद्रव्यगुणरसवीर्यविपाकादिज्ञानस्यानुमानं पूर्वविज्ञानकारणं न सम्भाव्येत तस्मादुपदेशादेवाग्निहोत्रकर्म स्वर्गफलाभिसम्बन्धाविज्ञानमिति, एतच्चायुक्तम्, उभयथाऽपि पौरुषेयत्वात्, दृष्टादृष्टार्थत्वेनोपदेशज्ञानस्यापि पौरुषेयत्वात्, ज्ञानतो वचनतश्च पुरुषाधीनत्वादिति वा, यथा त्वमतीन्द्रियेष्वर्थेषु पूर्वविज्ञानकारणाभावं मन्यसे पुरुषस्य पुरुषज्ञानवचनानां तद्विपर्ययाणामप्रामाण्यं रागादियोगात्, तथाऽसर्वज्ञोपदेशस्योपदिष्टज्ञानस्य श्रोतृज्ञानवचनयोश्च ज्ञानवचनत्वाभ्यां पौरुषेयत्वानतिवृत्तेर्भारतरामायणादिवदप्रामाण्यम् । अग्निहोत्राद्युपदेशस्यातीन्द्रियार्थस्य प्रामाण्यवत् सांख्याद्यतीन्द्रियार्थोपदेशप्रामाण्यं वा ।

वानरमूत्रिकादिपरिज्ञानवत्तद्विषयं तज्ज्ञानं स्यात् सर्वापथ्यादिविषयैकपुरुषविज्ञानवदतीन्द्रियमात्रसर्वपदार्थविषयैकपुरुषविज्ञानाभ्युपगमो वाऽवश्यम्भावी, वेदवचनयोरन्यथाऽनुपपत्तेः ।

(वानरेति) वानरमूत्रिकादिपरिज्ञानवत्तद्विषयं तज्ज्ञानं स्यान्न तु सर्वौषधादिविषयैकपुरुषज्ञानम्, अतो वैद्यकादिष्वपि पूर्वज्ञानकारणाभावः । तद्विपर्ययेऽकपुरुषविज्ञानवदतीन्द्रियमात्रसर्वपदार्थविषयैकपुरुषविज्ञानाभ्युपगमो वाऽवश्यम्भावी, किं कारणम्? वेदवचनयोरन्यथाऽनुपपत्तेः, पुरुषमन्तरेण, वेदार्थं वेदो ज्ञानमिसर्पः, तेन च ज्ञानस्य वचनं—परप्रत्यायनञ्च, तदुभयं—प्रज्ञापन प्रज्ञापकञ्च

स्वार्थोपदेशः स्वर्गपूर्वकस्योपदेशस्यार्थत्वात् । तादृशोपदेशस्य न वेदकमवदितार्थत्वमपि त्वभिप्रायार्थतापीत्याह अथवेति । विज्ञानं विज्ञानपूर्वकमिति विज्ञानमात्मनाह स्वर्गेति स्वर्गः अपूर्वमर्थं धाबन्धाधारो नाधाविवर्गी वैदेषां परस्परं धर्मधारण-भावसम्बन्धसम्बन्धश्च इत्यर्थः । एतेभ्यो द्रव्यादिविपाकपरिणामेभ्यो स्वर्गादिरूप स्वर्गादिमनुमानासम्भवादुपदेशादेव तज्ज्ञान-मिति भावः उभयथापीति । स्वार्थमित्यस्वार्थमित्यमिति विज्ञाय वेदविदुपदिष्टत्वात् पौरुषेयत्वं श्रोतुर्वा दृष्टस्य चोप-देशश्रवणतदर्थाभ्यासे पौरुषेयत्वं तद्वच तथाज्ञानवचनाय पूर्वपूर्वविज्ञानाम्यां कारणे अपौरुषेयत्वं स्यादिति भावः । सर्वज्ञोपदेश उपदिष्टं ज्ञानं श्रोतृ ज्ञानं वचनत्वाप्रामाण्यम्, ज्ञानस्याप्रमाणत्वात् अतीन्द्रियार्थोपदेशकृत्सर्वज्ञोपदेशादिवत् । तदुपदे-शस्य नैदं भारतरामायणादिवत् पौरुषेयत्वमित्याशयेनाह यथेति । भारतादीनामप्यतीन्द्रियार्थेषु तत्कर्तुः रागादिसम्भवे चाप्रमाणं विशेषम् । तथाप्यग्निहोत्राद्युपदेशस्य प्रमाणत्वे सांख्यादिकृतोपदेशस्याप्यतीन्द्रियार्थोपदेशोऽपि प्रमाणं स्यादित्याह अग्निहोत्रादीति । तज्ज्ञानरतः यथा मूत्रिकादिपरिज्ञानं तथा तद्विषयोपविषयमेव वैद्योपदेशज्ञानं स्यात् न तु सर्वैव धातुविषयैकपुरुषस्यं स्यादिति तदपि पूर्वविज्ञानकारणमात्र भवतः तथा च तथाप्यपौरुषेयत्वं स्यादिति तत्र सर्वौष-धिविषयैकपुरुषस्य नापीतरोऽतीन्द्रियमात्रसर्वविषयैकपुरुषविज्ञानाभ्युपगमो वेदेऽपि स्वीकार्य इति पौरुषेयत्वमेव तत्रोक्तम्--वानरमूत्रिकादीति । हेतुमाह—वेदेति, पुरुषमन्तरेण वेदार्थं ज्ञानं पुरुषमन्तरेण च ज्ञानस्य वचनं नरं प्रतिपादयेत्-

बोधपद्यते तयोः पुरुषसमवायित्वात् । यदाह 'रूपविदन्याः सम्बन्धाः प्रामाण्यं प्रमया किल । तस्य च पुरुषाधीना प्रतीतं वा मान्यथाऽऽगमः ॥' इति, लौकिकोपदेशाज्ञानवदग्निहोत्राद्युपदेशज्ञानं यथाज्ञानवदपि वा प्रमाण्यान्तरगम्यमिति । एवं तावत्किञ्चोपदेशमभ्युपगम्य दोष उक्तः ।

अनभ्युपगम्यापि—

5 उपदेशासिद्धिरपि नैवं भवतः, सर्वस्योपदेशस्य सांख्याद्युपदेशवल्लोकतत्त्वान्वेषणादृते सम्भवाभावात् ।

(उपदेशेति) त्वन्मतेनैवेति वाक्यशेषः । उपदेशो व्याख्या, असौ च व्याख्या पदविषया वाक्यविषया प्रमाणविषया वस्तुविषया वा वैयाकरणसांख्यमीमांसाविकल्पिता प्रकारैः प्रक्रियाभिः, तत्र यथा सांख्यादिप्रक्रियाभिर्वस्तुतत्त्वे पदार्थेलौकिकतत्त्वान्वेषणपरया व्याख्यया विना नाधिगम्यतेऽर्थ 10 तथा व्याख्यायते, एवमग्निहोत्रादिसंज्ञासंज्ञिसम्बन्धानुसारेण व्याख्यायते प्रकृतिप्रत्ययादिविभागेन, पदविषयं वाक्यविषयं प्रमाणविषयञ्च प्रत्यक्षानुमानागमाद्युपलब्धविकल्पाद्भिमानविकल्पानि लोकतत्त्वान्वेषणमन्तरेण नाधिगन्तुं शक्यमित्युपदेशस्तत्त्वान्वेषणपरः सर्वः प्रवर्तते, तत्र यथा सांख्याद्युपदेशार्थेष्वतत्त्वप्राप्तिरुपदेशानर्थक्यञ्च तथा वैयाकरणमीमांसाद्युपदेशानामपीत्युपदेशासिद्धिः ।

अथ लौकिकतत्त्वान्वेषणपराणां तेषामुपदेशानां प्रामाण्यमाप्तप्रणीतोपदेशत्वादभ्युपगम्यते 15 कः पराभ्युपगमे प्रद्वेषः ? लौकिकतत्त्वान्वेषणपरत्वानतिवृत्तौ तर्कप्रायविचारविज्ञानप्राप्तत्वं वा ।

(अथेति) इहापि च यथा लौकिक एव प्रत्यक्षानुमानागमादिपदार्थतत्त्वपरिच्छेदः शक्यते कर्तुम्, एवं पदवाक्यप्रमाणपरिच्छेदोऽपि शक्यो पदादिपदार्थव्यवहारप्रमाणविषयश्च लौकिक एव यथा-नुपूर्व्यानियतवाच्यवाचकसम्बन्धाव्यभिचारस्य प्रसिद्धेः, एवं वाक्ये प्रमाणे च योज्यम् । यदाह 'प्रमाणानि प्रवर्तन्ते विषये सर्ववादिनाम् । संज्ञाभिधानभेदात्तु विवदन्ते तपस्विनः ॥' इति, तस्मात् 20 वेदानां त्वन्मतेनैव सर्वेषामप्रामाण्यसिद्धिः, लौकिकतत्त्वान्वेषणपरत्वे [illegible]भ्युपगम-

---

[illegible] इति, [illegible] । [illegible] लौकिकोपदेशेषु [illegible] 25 [illegible] उपदेशेति [illegible] । [illegible] 30 [illegible] इति । [illegible]

त्वात् सांख्यादिशास्त्रकारोपदेशवत्त्वो दृष्टादृष्टार्थक्रियोपदेशे पदवाक्यप्रमाणविषयव्याख्यादैपर्य्यप्रस ङ्गात् वेदशास्त्रोपदेशासिद्धिः । लोकतत्त्वान्वेषणपरत्वानतिवृत्तौ तर्कशास्त्रविचारविज्ञानसाफल्यं वा ।

उपदेशासिद्धौ परीक्षकत्वहानिः, पदवाक्यप्रमाणविषयाभ्यभिचारज्ञानार्थत्वात् परी क्षायाः । स च स्वमतेनैवैवं नावतिष्ठते, लोकतत्त्वान्वेषणानारम्भकत्वात् ।

(उपदेशेति) परीक्षैव चोपदेशः परीक्षाव्याख्ययोरनर्थान्तरत्वात् । स चोपदेशस्त्वन्मते- 5 नैवैवं नावतिष्ठते लोकतत्त्वान्वेषणानारम्भकत्वात् ।

स्यान्मतं पदवाक्यप्रमाणानामपि सामान्यविशेषाविपर्ययादिजगत्तत्त्वविचारवदव्यवस्थैव, प्रमाणानामपि प्रमाणान्तराधिगम्यत्वेऽनवस्थादोषप्रसङ्गादित्यभोऽभ्यते प्रमाणानवस्था ताव न्नास्ति चन्द्रार्कमणिप्रदीपादिवत् स्वपरावभासित्वात् प्रमाणानाम्, तस्यापि त्वनवस्थाने क्रियाविधाव्यपि शास्त्रं नावतिष्ठेत तस्यापि लोकतत्त्वान्वेषणात्मकत्वानतिवृत्तेरप्रमाणादिति 10 तत्त्वाप्यपुण्याद्यभावः ।

स्यान्मतमिति, पदादीनामभ्युपगम्यापि स्वमतेनानवस्थामाह तस्यापीति, जगतत्त्वस प्रमाणविचारस्य वा, इतिशब्दो हेत्वर्थे, अयं हेतुः क्रियाविधायिशास्त्रानवस्थानादिति, अतस्तत्राप्य- पुण्याद्यभावः, क्रियाविधायिशास्त्रोपदिष्टक्रियाभिव्यङ्ग्यापूर्वाभाव इत्यर्थः ।

कथमत् पुनस्तत्क्रियाविधायिशास्त्रं ? उच्यते— 15

यथाऽग्निहोत्रं जुहुयात् स्वर्गकाम इति, इदं तु पुनः किं विधिरनुवादोऽर्थवादः ? उच्यते, विधिः, अप्रसिद्धार्थविषयविधायित्वात्, अत्राप्रसिद्धमग्निसम्प्रदानं हवनं विधीयत इत्युपायस्यापूर्वत्वात्तदभिव्यङ्ग्यापूर्वाभावः, त्वन्मतादेवोक्तवत् ।

तत्त्वान्वेषणत्वे सम्यगाभासविवेको । दृष्टादृष्टार्थेति दृष्टेऽदृष्टे च क्रियोपदेशे तमुद्दिश्य यदेतदुच्यते अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिरूपे यत्तो वाक्यतः प्रयत्नो वा क्रियमाणो विचारोऽनर्थक एव स्यात् लोकतत्त्वान्वेषणत्वात्ता- 20 वाविति यदि च वेदमुखेनार्थं लोकतत्त्वान्वेषणपदवाक्याव्यभिचारित्वमिष्यते तर्हि तर्कप्रमाणादीनामपि तथात्वं स्यादित्याह— लोकतत्त्वेति । ननु पदवाक्यप्रमाणानामपि नास्ति व्यवस्था तेषां प्रमाणान्तरेण वर्तव्यत्वात् तस्यापि चाव्यवस्थितत्व [illegible] प्रमाणानवस्था स्यात्, प्रमाणार्थं परतो व्यवस्थितत्वादित्याशङ्कते-स्यान्मतमिति । प्रमाणानि स्वपरप्रकाशीनि नातोऽनवस्था व्यवस्थितत्वात् अन्यथा क्रियाविधायिशास्त्रस्याप्यव्यवस्थितत्वात्तदभिव्यङ्ग्य धर्मस्याप्यपूर्वस्यापि च सदैवस्युत्तरपक्षे प्रमाणानवस्थेति । यागादिव्यक्तिनिर्वर्त्यमपूर्वं नाम धर्ममाचक्षते दशमीमांसका, 25 यागादिरेव शाबरा तुरुते यागार्थ एव नियोग्यमाऽपूर्वशब्दवाच्यो धर्मशब्देनोच्यत इति प्राभाकराः । अग्निहोत्र मिति, अत्र मीमांसकाः विधिवाक्यानि त्रीणि यथाऽग्निहोत्रं जुहोति अग्निहोत्रं जुहुयात् स्वर्गकामः दध्ना जुहोति ... [illegible] इति प्रमाणान्तरावगतविषयत्वादेतद्विधेः ... भम् । तत्र प्रथमवाक्याग्निहोत्राग्निहोमकर्मविधानमावेदयति ... [illegible] ... द्वितीयमपि ... [illegible] ... प्रमाणान्तरेण प्राप्तिः । द्वितीयविधौ 30 त्वग्निहोत्रमग्निहोत्रकर्मविशेष ... [illegible] ... तथापि ... [illegible] ... नाधिकारे विधते । अग्निहोत्रशब्दं नामधेयं ... होमं होमकर्माग्निहोत्रमिति ... [illegible] ... वर्णितम्, न्यायानुसारता ... [illegible] ... । अतोऽगमनमपि ... होमस्य नामधेयत्वा

(यजेति) इति—एतदाक्षिपति, कथमुपपद्यते विधिरिति? अप्रसिद्धार्थविषयविधावेषा प्रवर्तते, अप्राप्तसिद्धमभिसम्प्रदान इत्येवं विधीयते, स्वर्गस्य सुखसंज्ञकस्य वस्त्वात्मावगमस्य विशिष्टरेखा-
सम्बन्ध वा तदभिलाषस्य च कर्त्तरि सिद्धत्वात् स्वर्गोपायस्तूपायोऽभिधानमित्युपायस्यापूर्वत्वात्। कथं
पुनस्तत्क्रियाभिध्यानस्यापूर्वभावः? स्वयमवगतेर्नोच्यत।

5 अतश्च तस्य विधेरर्थवत्त्वाभावात्तद्विहितक्रियाफलसम्बन्धाभावः, आरोग्यार्थिनि त्वमक्षणोक्तिवत्, एवं त्वचुकिक्रिये अशक्यमात्मनर्थे चेति सांख्याविविवेकवत्तुल्यत्व तथापि।

(अतश्चेति) अतश्च स्वर्गोत्पादकलोकस्य ज्ञानानपेक्षत्वात्तस्य विधेरर्थवत्त्वाभावात्तद्वि-
हितक्रियाफलसम्बन्धाभावः, तदानीं आरोग्यार्थिविषयमक्षणोक्तिवत्, यथाऽऽरोग्यार्थिनि पुंसि नित्यं
10 मधुपेयमुक्तिस्तत्क्रिया न सिध्येत् अप्रसिद्धत्वादेवं त्वचुकिक्रिये अशक्यमात्मनर्थे चेत्यशक्यप्रयत्नादिस-
र्वत्वाविविवेकवत्तुल्यत्वम्, तथापि।

अथोच्येत मा मंस्थाः सांख्यादितुल्यत्वमेतस्य, वैधर्म्यात् कर्तव्यतां विधायेतिकर्तव्य-
ताविधानात्, तद्यथा अग्निहोत्रादिर्यस्यामविशेषैर्द्रव्यगुणदेवताकर्तृकर्मफलदेशादिविशेषैः
'वसन्ते ब्राह्मणो यजेत ग्रीष्मे राजन्यः शरदि वा यजेत वैश्यः, होमकाले प्रातः यवागूमयाः
15 यवाग्वीर्वाभक्ष्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधा-
वति स एवैनं भूतिं गमयती'त्यादि त्वया प्रतिपत्तव्यमिति शिष्यमनुशास्ति तत उत्तरकाल-
मेवं प्रकारमेवाग्निहोत्रं नामकर्म भवति, विशेषविधानार्थप्रतिपत्तिबलेन च सुशिक्षा भवि-
ष्यति तस्य शिष्यता इत्यर्थाभिधानेनेति।

अथोच्येतेत्यादि, आह—मा मंस्थाः सांख्यादिवत्तुल्यत्वमेतस्य, किं कारणम्? वैधर्म्यात्,
20 तद्यथा—कर्तव्यतां विधायेतिकर्तव्यताविधानात्, तथाग्निहोत्रं जुहुयामिति कर्तव्यताऽग्निहोत्रं विधी-
यते ततः पुनस्तत्र विशेषेतिकर्तव्यता विधीयते तदग्निहोत्रमेवमेवात्र कर्तव्यमिति, तद्यथा—

प्रातर्होमे होम इत्यग्निहोत्रमित्याह। तत्राग्निहोत्रपदं [illegible]
[illegible], तत्र च [illegible]
[illegible]
25 [illegible]
[illegible]
[illegible]
[illegible]। [illegible] किं विधिरिति,
[illegible]। कर्तव्यतां विधायेति
30 [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

(अग्निष्टोमादीति) (तस्य ज्ञाप्यतेति) सांख्यादिविवेकप्रयत्नवैफल्यप्रसङ्गेनेतराभावविचारेण—घटपरमाणु-त्रिकार्यकारणसामान्यविशेषादिस्वरूपाविचारेणेति ।

अत्रोच्यते—

ननु नैवमप्यग्निहोत्रादिविषयकर्तव्यताप्रतिपत्तिः प्रतिपत्तित्वाल्लौकिककर्तव्यतापर्यव-सानानुसृतेरेव भवितुमर्हति, अन्यथा नारिकेलद्वीपजातस्य चेनुप्रतिपत्त्यभावप्रसङ्गः स्यात् । कर्तव्यताविधानानन्तरत्वेतिकर्तव्यतावसरः तदुभयमलौकिकत्वादग्निहोत्रसामान्यस्याग्निष्टो मादिविशेषस्य प्रत्यक्षत्वेनासाऽग्निमाधारमनपाम्प्रसिद्धेरयुक्तम् ।

ननु चैवमपीत्यादि, नन्वित्यनुज्ञापने, कर्तव्यतेति, या कर्तव्यताप्रतिपत्तिरग्निहोत्रादिविषया सा प्रतिपत्तित्वाल्लौकिककर्तव्यतापर्यवसानानुसृतेरेव, प्रत्येकं पचनं प्रतिपत्तिः, सा द्विविधा साध्या सिद्धा बाह्या च, तत्राध्यात्मिकमिदं कर्तव्यमिदं न कर्तव्यमित्यात्मिका बुद्धिरेव, बाह्या तु द्विपदचतुः- 10 पदप्रभवाप्यापर्यवसायी क्रिया, सा द्विविधापि लोकप्रसिद्धमेवार्थमनुसृत्य भवितुमर्हति नाप्रसिद्धम्, तस्मादग्निहोत्रादिप्रतिपत्तिरपि लोकत्वस्यानुसृतेरेव नान्यथा, किंविषया सा स्यात् ? नारिकेलद्वीप जातस्य चेनुप्रतिपत्त्यभाववदिति । तदर्थमपि कर्तव्यताविधानानन्तरं चेतिकर्तव्यतावसरः लौकिक-कर्तव्यतापर्यवसानानुसृतेरेवेति वर्तते, प्रसिद्धकर्तव्यताप्रतिपत्त्यनन्तरं प्रसिद्धेतिकर्तव्यताप्रतिपत्त्यवसर इति न्यायः, तदुभयमलौकिकत्वादग्निहोत्रसामान्यस्याग्निष्टोमादिविशेषस्य प्रत्यक्षत्वेनाग्निमाधारस्य 15 मनाम्प्रसिद्धेरयुक्तम् ।

क्रियोपन्यासन्यायासम्भवः, तदुपवर्णनार्थं लोकप्रसिद्धकर्तव्यतेतिकर्तव्यतावैधर्म्यं दर्शयमाह—

यथा घटादिकर्तव्यतायां विहितायां घटं कुर्विति ततः पुनरितिकर्तव्यताक्रम एवम् मृत्पिण्डं चक्रमूर्धनि संस्थाप्य दण्डेन भ्रमयित्वा द्वाभ्यां पाणिभ्यां शिवकाद्याकारविशेषान् क्रमेण निर्वर्तयेदिति प्रसिद्धकर्तव्यताविधानोत्तरकाले प्रसिद्धेतिकर्तव्यताविधानं घटादिवि 20 षयमुपपन्नम्, प्रसिद्धार्थत्वान्न त्वग्निहोत्रकर्तव्यतायाः पशुयागादीतिकर्तव्यतायाश्च प्रसिद्धिः, अप्रसिद्धार्थत्वादग्निहोत्रशब्दस्य, न तु घटवदग्निहोत्रशब्दः क्वचिदपि कर्तव्यतां ब्रवीति ।

दृष्टोऽप्यन्यर्थं प्राप्नोति तथा च द्रव्यगुणेन्यतार्थेन क्रियाद्यत इतिकर्तव्यतयैवान्वयः । एवमेवाग्निशिष्टो विधिः परिपूर्णो भवति क्वचेव तस्य व्यवस्थापकरूपकर्तव्यतासामान्यविशेषोपलक्षणविचारापेक्षा वर्तत इति भावः । सांख्यादीति सांख्यादीनां विवेक—प्रकृतिपुरुषविवेकपरं योऽयं यत्नः परस्परवस्तुतत्त्वज्ञानाय प्रयासः तद्वैफल्येनेत्यर्थः । ननु यथा 25 लोके कर्तव्यताप्रतिपत्तिर्लौकिककर्तव्यताविषयत्वानुसारेणैव भवति नान्यथा तथैवाग्निहोत्रादिकर्तव्यताप्रतिपत्तिरपि भवेत् तथा तत्कर्तव्यतेतिकर्तव्यताप्रतिपत्तिरपि न भवत्येव न सम्भवति लौकिकत्वाभावेनास्य दुरवस्थानमेवास्येत्यर्थः । तथा चाग्निहोत्रसामान्यं प्रत्यक्षादिविशेषाणामसिद्धा इति कर्तव्यतेतिकर्तव्यताप्रतिपत्त्योरनुपपत्तिमाह—ननु चैवमपीति । तदुभयं—कर्तव्यतेतिकर्तव्यताप्रतिपत्तिद्वयम् अलौकिकत्वात् सामान्यप्रमाणस्येव विवेकप्रत्यक्षादेरन्यथा सिद्ध्यवैव न स्यादिति । प्रसिद्धकर्तव्यतेति लोके हि प्रत्यक्षादिसिद्धस्य घटादेः कर्तव्यतां विधाय तदनन्तरमनुष्ठापकः 30 प्रसिद्धाया एव क्रियाया विधानं दृश्यते अग्निहोत्रकर्तव्यतादिविधानन्तु नैवम् अग्निहोत्रशब्देन प्रसिद्धस्य कस्यचिदर्थस्य कर्तव्यतेतिकर्तव्यताया बोधोपकारिसाधकः । तमेवाह यथेत्यादिना । अग्निहोत्रकर्तव्यता पशुयागादयो भवन्ति इत्यर्थस्य

(यथेति) एवमिति प्रकारनिर्देशं दर्शयति (घृतपिण्डमिति) अग्निरपीति, कर्तव्यतामिति- कर्तव्यतां वा वाक्यमप्रत्यक्षत्वादत आह—(भक्षयेति) अपिशब्दाद्विशिष्टसम्भवतामपीति ।

भाष्यम्—

जुहुयादित्ययं तर्हि ब्रवीति हवनकर्तव्यतामिति, एवमपि तदवस्थम्, विधिकार्य-
5 वाचित्वाभिमतानां शब्दानां पदार्थान्तरावृत्तेः, जुहोतेर्हि धातोरयं प्रत्ययः तत्परः स तत्क-
र्तव्यतां हित्वा पदान्तरकर्तव्यतायां कथं प्रवर्तेत ?

(जुहुयादिति) जुहुयादित्ययं तर्हि ब्रवीति, हवनादनयोरित्यस्याः प्रकृतेः क्रियावाचित्वा
विप्रत्ययविभ्रमसमान्वयात्, तत्र हवनमग्निविषयमवगतत्कर्तव्यतां जुहुयादित्येष शब्दो ब्रवीति, अथो-
च्यते एवमपि तदवस्थम्—प्रत्यय ब्रवीति तत्कर्तव्यतां, किन्तु हवनमात्रस्य, तथाप्यप्रसिद्धत्वेन, अग्नि-
10 होत्रकर्तव्यताम्, जुहुयादित्यस्यात्मनः पूर्वापरीभूतामिव्यभावयकिंभावार्थवाचित्वात्, नाग्नौ विधि
वनित्यभावार्थवाचित्वात् । किं कारणम् ? विधिकार्यवाचित्वाभिमतानां शब्दानां पदान्तरार्थावृत्तेः, तत
आह—जुहोतेर्हि धातोरयं प्रत्ययः स तत्कर्तव्यतां हित्वा पदान्तरकर्तव्यतायां कथं प्रवर्तेत ?
'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति परिभाषितत्वाच्चेति । (महाभाष्ये ३।१।६७ सूत्रे)

भाष्यम्—

15 अथ तदेव तदिति, एवञ्चावदनयोरैकार्थ्यं प्रसिद्धिविरुद्धम्, पौनरुक्त्यपरिहारार्थं जुहुयादित्येवास्तु किमग्निहोत्रमित्यनेन ?

(अथेति) अथ तदेव तत् यदेवाग्निहोत्रं तदेव हवनम्, यदेव हवनं तदेवाग्निहोत्रमिति, एवञ्चावदनयोरैकार्थ्यं प्रसिद्धिविरुद्धं नामाख्यातयोर्भिन्नार्थत्वप्रसिद्धेः । अभ्युपेत्याप्येकार्थवाचित्वमनयोः पौनरुक्त्यपरिहारं कथयाचक्ष जुहुयादित्येवास्तु, किमग्निहोत्रमित्यनेन ?

20 हवनेऽप्रसिद्धिपौनरुक्त्यपरिहारार्थमाह—

पदान्तरकर्तव्यतायां तावद्वचने पदान्तरकर्तव्यतामपेक्षते वाक्यन्यायेन, मेघपर्ज-न्ययोः परस्पराकाङ्क्षया पदान्तरार्थे वर्तते पदम्, यथा सब्रह्मचारिणा सहाधीत इत्युक्ते

हवनमग्निविषयमाह तथा च कर्तव्यता विधिरभिमत इत्यत्र—जुहुयादित्ययमिति । [illegible] विधेः [illegible] धर्मान्तरयोगेन [illegible] कर्तव्यतया एव बोध्ये न त्वग्निहोत्रपदस्य कर्तव्यताया [illegible]—एवमपीति ।
25 तदवस्थम् अग्निहोत्रहवनकर्तव्यतायाश्चाप्रत्ययस्य [illegible] । पूर्वापरीभूतेति [illegible] पूर्वापरीभूतावयवा [illegible] [illegible] न केवला एवं विधिर्भावार्थस्य [illegible] । [illegible] सत्त्वप्रधानानि नामानीत्युक्तेः । जुहोतेर्हीति हवनेर्हि विधिप्रत्ययः प्रत्यय इति [illegible] [illegible] [illegible]
30 यथा जुहुयात् इत्येव [illegible] अग्निहोत्रादीनामपि [illegible] [illegible] [illegible] [illegible] [illegible] भवति तत्र [illegible] । [illegible] [illegible] विधिकार्यवाचित्वाभिमतानां शब्दानामिति [illegible] [illegible] [illegible] इति भावः । पदान्तरकर्तव्यतायां कथं प्रवर्तेत [illegible]

येन समानो ब्रह्मचारी तेन सब्रह्मचारिणा च पठ्यते तेनैव समान इत्याकांक्षा भवति। ननु यथा पदार्थे परिच्छिन्ने न पदार्थान्तरमपेक्ष्यते पदेन तथा घटवदग्निहोत्रशब्दोऽप्यर्थवत्त्वमपेक्षते न चेदेवं ततोऽग्निहोत्रशब्दः प्रमादपाठीन आपद्येत, तत एवं वचनव्यक्तिर्भवति अग्निहोत्रार्थं हवनं कुर्यात् घटवदिति ।

पदान्तरकर्तव्यतायां तावदित्यादि, तावच्छब्दः क्रमार्थे, यथावदुक्तं 'पदान्तरकर्तव्यतायां क्व प्रवर्तेत' इत्यत्र परिहारोऽस्मिन् परिहारे चाभिहितौ पौनरुक्त्यासिद्धिदोषावपि तत्रैव तमित्येतत्प्रसङ्गतो परिहृतावेवेत्यभिप्रायः । तत्र हवन पदान्तरकर्तव्यतामपेक्षते, केन न्यायेन ? वाक्यन्यायेन, को वाक्यन्यायः ? भेदसंसर्गाभ्यां परस्पराकांक्षा सम्बन्धः, तयाऽऽकाङ्क्षया पदान्तरार्थे वर्तते पदम्, यथा सब्रह्मचारिणा सहाधीत इत्युक्ते येन समानो ब्रह्मचारी तेन सब्रह्मचारिणा च पठ्यते तेनैव समान इत्याकांक्षा भवति सामर्थ्यात्, नान्येन केनचित्सामान्यमपेक्षत इत्यर्थः । ननु यथा पदार्थे परिच्छिन्ने घट इति न पदार्थान्तरमपेक्ष्यते पदेन, सा पुनरपेक्षा घटवत्—घटशब्दवत्, अभेदनिर्देशाद्घटार्थेनैव घट इत्युक्तः, घटशब्दस्यार्थवत्त्ववदग्निहोत्रशब्दः सर्वथाप्यर्थवत्त्वमपेक्षते, अन्यथाऽग्निहोत्रशब्दोऽनर्थकः स्यात् तस्मा भूतदानर्थक्यमित्याकांक्ष्यते, न चेदेवं ततो दोष इति, यदि तु निरपेक्षोऽग्निहोत्रशब्दो हवनप्रकृत्यर्थमात्र एव वर्तते ततः को दोषः ? ततोऽग्निहोत्रशब्दः प्रमादपाठीन आपद्यते, अग्निहोत्रशब्दस्य च न पृथक् कश्चिदर्थो हवनप्रकृत्यर्थमात्रत्वात्ततश्च एष डाडिमादिवाक्यवचनवत् प्रमादपाठीन आपद्यते निराकाङ्क्षत्वात्, न पुनरेवमिष्यते, तत एवं वचनव्यक्तिर्भवति 'अग्निहोत्रार्थं हवनं कुर्यात्' अग्निहोत्रसंज्ञक्रियाकांक्षा हवनं कुर्यादिति, किमिव ? घटवत्, यथा घटं कुर्यादित्युक्ते सामान्ययोरभावः भवनादिक्षेपाभिसम्बन्धमन्तरेण नैरर्थक्यं स्यात्तस्मा भूतिति घटं कुर्यात् घटक्रियां कुर्यादिति वचनव्यक्तिवदाऽग्निहोत्रं जुहुयादिति ।

पौनरुक्त्येन इतः तस्मिन् परिहारे पौनरुक्त्यासिद्धिविरोधदोषौ समापततो तौ च 'पदान्तरकर्तव्यतायां तावदि'ति ग्रन्थेन परिहृतावित्ति भावार्थो भवेत् इत्याह—यथावदुक्तमिति । वाक्यैकवाक्यत्वमप्यस्य परिहारे प्रसङ्गः । भेदसंसर्गाभ्यामिति इतो हि प्रसन्न पैरः संसर्गे वा यदि इतौ तौ न स्यात् तदा सामर्थ्यमेव न स्यात् तत्र भेदः [illegible] [illegible] सामर्थ्यम्, संसर्गो वा भेदाभिमानानिवृत्तमेवमेव । भेदसंसर्गासेवार्थो इत्योपस्थाप्यते [illegible] यथा राज इत्युक्ते सर्वं वा प्रसक्तं [illegible], यद्वा पुरुष इत्यर्थं [illegible] प्रतिपत्तं तदा पुरुष इत्युक्ते [illegible] इदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं [illegible] पुरुषोऽपि राजानमन्येभ्यो [illegible] राजर्थसम्बन्धात्। एवं [illegible] इति बोध्यम् । [illegible] ब्रह्मचारी [illegible] समानत्वे [illegible] बोध्यम् । तदेव परस्पराकांक्ष [illegible] भवतीति यथेति । [illegible] पदार्थान्तरपरिच्छेदमन्तरेण पदार्थान्तर [illegible] ननु यथेति । [illegible] इत्याह—अभेदनिर्देशादिति, [illegible] अग्निहोत्रशब्दस्य हवनमात्रार्थत्वे [illegible] अग्निहोत्रशब्दस्य हवनार्थमात्रेण प्रमादपाठीनत्वोक्ते निरर्थको भवेदित्याह—अग्निहोत्रशब्द इति । यथा डाडिमादीनि षट् [illegible] । अग्निहोत्रार्थं हवनं कुर्यादिति [illegible] अग्निहोत्रसंज्ञके [illegible] तस्मिन् [illegible] यदि [illegible] अग्निसम्बन्धिहोमेन होमेनैव कुर्यादिति, किन्तु [illegible]-

आचार्य आह—

एतदयुक्तं दृष्टान्तवैषम्यादर्थमेवासिद्धेः, न हि किञ्चिदग्निहोत्रं नाम यदर्थं प्रसिद्धं यदनूद्येत, न हि साधर्म्येण यदग्निहोत्रसंज्ञकं हवनं तत्कुर्यादित्यग्निहोत्रहवनयोरैक्येन तद्विषयं करणमनुविधीयेत, नापि वैधर्म्येण हवनं यत्कुर्यादिति हवनक्रियामनूद्य तदग्निहोत्रा-
5 ख्यमित्यैक्येन विधानं युज्येत, परेणाग्निहोत्रस्य हवनस्य वाऽविहितत्वादत एव तूभयमप्य-
शक्यम्, विशेषणं विशेष्यं च, प्रधानमुपसर्जनञ्च, विधिरनुवादश्च, शेषः शेषी च, उत्सर्गोऽ-
पवादश्चान्यतरस्याप्यर्थाप्रतीतेः, यदि विशेष्येणैव विशेषणीय हवनं कुर्यात्तथाग्निहोत्रसंज्ञक-
मिति, अग्निहोत्रं वा हवनमिति तथा नैवं शक्यमप्रसिद्धार्थत्वात् ।

(एतदिति) एतदयुक्तं दृष्टान्तवैषम्यादर्थमेवासिद्धेः, अभ्युपेत्याप्याकाङ्क्षितमर्थमिममग्निहोत्रहव-
10 नयोरप्रसिद्धेरैक्येन प्रसिद्धेन घटेन वैषम्यमिति, तद्दर्शयति—न हि किञ्चिदग्निहोत्रं नाम हवनं यदर्थं
प्रसिद्धं यदनूद्येत, यथा घटं लोके प्रसिद्धमनूद्य तद्विषयं कर्म कुर्यादित्युच्यते, न तादृगनुवचन-
योपपन्नमप्रसिद्धत्वादग्निहोत्रहवनयो, साध्यार्थाप्यैक्यमप्रतीति तद्दर्शयति—न हि साधर्म्येण यदग्निहो-
त्रसंज्ञकं हवनं तत्कुर्यादित्यग्निहोत्रहवनयोरैक्येन प्रसिद्धौ सत्यां तद्विषयं करणमनुविधीयेत, नापि
वैधर्म्येण हवनं यत्कुर्यादिति हवनक्रियामनूद्य तदग्निहोत्राख्यमित्यैक्येन विधानं युज्यते परेणाग्निहोत्रस्य
15 हवनस्य वाऽविहितत्वात्—लोके शास्त्रान्तरेण वा प्रमाणान्तरेण वाऽप्रसिद्धत्वादग्निहोत्रहवनक्रिययोः
कथमनूद्य विधानं घटते। अत एव तूभयमप्यशक्यम्, अतः—लोकतस्त्वादर्थतरोऽत्वाल्लोकेऽन्यतरेण प्रमा-
णान्तरेण वाऽप्रतीतत्वादुभयमप्यशक्यं—विशेषणं विशेष्यञ्च, प्रधानमुपसर्जनञ्च, विधिरनुवादश्च, शेषः
शेषी च, उत्सर्गोऽपवादश्च, अन्यतरस्याप्यर्थाप्रतीतेः, किं हवनक्रियाविशेषणमग्निहोत्रं विशेष्यमग्निहोत्रं
विशेषणं हवनं विशेष्यमिति, एवं प्रधानोपसर्जनविध्यनुवादोत्सर्गापवादशेषशेषिभावाद्यपि यथायथं
20 विधानयोरित्यायुक्तमिति, दुष्प्रत्यं एवकारार्थविशेषणे योग्यत्वेन विशेषणत्वादि न भवत इति विधि-
मपि। कथमशक्यमिति चेद्दर्शयति—यदि विशेष्येणैव विशेषणीयं हवनं कुर्यात् तथाग्निहोत्रसंज्ञकमिति—
हवनक्रियाऽग्निहोत्रं विशेष्येत, अग्निहोत्रं वा हवनमिति—यदग्निहोत्रं तद्धवनं कर्मेममग्निहोत्रेण हवनं
विशेष्येत, इति प्रदर्शने, इत्थं विशेष्येत यदि विशेषेण विशेष्यतया प्रयोजनमवहदम्, तथा नैवं
शक्यमप्रसिद्धार्थत्वात् ।

---

15 [illegible]
20 [illegible]

यदप्युक्तमनूद्याग्निहोत्रं हवनक्रिया विधीयते हवनं वाऽनूद्याग्निहोत्रं विधीयत इत्येतदयुक्तम् वाक्यभेदापत्तेरित्यत आह—

अनुवादविधिविषयत्वे वाक्यभेदापत्तेः ।

अनुवादविधिविषयत्वे वाक्यभेदापत्तेरिति, तत्रैकं ह्यनुवादकमेकं विधायकम्, ततो द्वयोरप्येवं तेऽस्तु, ततो भिन्नार्थत्वाद्वाक्यभेदोऽनयोरापद्यते, यथा कुण्डलवतोऽनयोर्देवदत्तो ज्ञेय इति 5 प्रसिद्धार्थमनूद्याऽऽनयैनमित्यानयनं विधीयते । देवदत्तमानयेति देवदत्तानयनं वा विधाय कुण्डलवतोऽनयोरिति प्रसिद्धार्थानुवादविधिविषये द्वे वाक्ये, एवमेकस्यानुवादत्वेऽन्यस्य च विधित्वे वाक्यभेदापत्तिरतो नैतदपि न्याय्यतां शोभत इति ।

अस्मन्मते वाक्यभेदापत्त्यादिदोषा न सम्भवन्ति क्रियाया एव विधेयत्वात्, अत एवोक्तं 'नैतद्विज्ञा यते अनड्वाननड्वानिति क्रियापदमयं नाख्यातस्य इति', (महाभा० १-१-४१ सूत्रे) तथा 10 'समवायसिद्धं द्रव्यं क्रिया नैव हि भाष्यते (पा० महा० १-३-१)' इति, तस्मादग्निविषया हव नक्रियैव विधीयतेऽतो द्रव्यस्तवैयर्थ्यं नास्ति द्रव्यस्याविधेयत्वात् घटं कुर्यात्सा कार्यीति, किं तर्हि ? घटक्रियां कुर्यादिति तथा हवनं कुर्यादग्निहोत्रं कुर्यादिति हवनाग्निहोत्रक्रिययोरविशेषो न्याय्य इत्यत्रोच्यते—

नापि घटादिकर्तव्यतेव काचिदग्निहोत्रकर्तव्यता नाम प्रोक्षणबर्हिरास्तरणाद्यप्रक्षेपा 15 द्युपक्रमात्मिका मन्त्रपूर्वक्रिया क्रमवती प्रसिद्धा यथाऽग्निहोत्राख्यता हवनस्यातिदिश्येत, हवनाख्यता वाऽग्निहोत्रस्य ।

नापि घटादिकर्तव्यतेवेत्यादि, यथा घटादिविषया कर्तव्यता मृदानयनमर्दनाद्युपक्रमा- त्मिका लोके प्रसिद्धा न तथा काचिदग्निहवनकर्तव्यता नाम प्रोक्षणबर्हिरास्तरणाद्यप्रक्षेपाद्युपक्रमात्मिका मन्त्रपूर्वक्रिया क्रमवती प्रसिद्धा, या कर्तव्यतयाऽतिदिश्येत हवनाख्ययाऽग्निहोत्राख्यता अग्निहोत्रा- 20 ख्यया वा हवनाख्यताऽतिदिश्येतेति ।

[illegible] 'विधिविषयत्वस्यापि [illegible]' । तस्मात्[illegible] इति । अप्रसि द्धार्थत्वादिति न [illegible]; अग्निहोमयोः अग्निहोत्रेतिहवनेनाग्निहोत्रं [illegible] न [illegible] बोध्यम् । वाक्यभेदापत्तेरिति, अग्नि- होत्रं [illegible] वाक्यभेदो बोध्यः । अत्र वाक्यभेदः [illegible] 25 [illegible] इति भिन्नमानार्थत्वमेकवाक्यत्वम्, तत्रैकस्य [illegible] भावे च वाक्यमेव इति मीमांसकाभिमतो वाक्यभेदः सम्भवति । एकैकेनैव प्रमाणद्वयविधान एव हि वाक्यभेदो [illegible]। नैतद्विज्ञायते इति [illegible] [illegible] इति न विचार्यते कि- [illegible], इत्यस्तु न विधेयं न वा प्रतिषेध्यम्, अत एव न क्वचिद्विधेयो निषेध्यो वा किन्तु तत्क्रियैव [illegible] विधानं किन्तु तत्क्रिययोरैक्यमिति भावः । तथा समवायसिद्धमिति, भाष्ये 30 [illegible] क्रिया [illegible] हि भाष्यते [illegible] [illegible] [illegible] मिथो [illegible], अत एव [illegible] तथापि सा [illegible] प्रतीयते इति बोध्यमिति भूवादिसूत्रे (१-३-१) भाष्ये विस्तरम् । प्रसिद्धेति लोके प्रसिद्धेत्यर्थः [illegible] । 35

अथ पुनरुच्येत नैव हवनं कुर्यादित्युच्यते किं तर्हि ? अग्निहोत्रं कुर्यादित्याम्नायते जुहुयादित्ययं कुर्यादर्थ एव, अग्निहोत्रशब्देन तु तद्विशेषभूतो जुहोतेरर्थोऽभिहित एव तस्मादग्निहोत्रं कुर्यादित्ययमर्थ इति ।

अथ पुनरित्यादि, अथेत्यधिकारान्तरे, पक्षान्तरमधिकारान्तरम्, अनन्वयोऽभिधित्वा च 5 निर्वहति हवनं कुर्यात्—जुहुयादिति, हवनविधायमग्निहोत्रानुवाद इत्यस्मिन्नर्थेऽप्रसिद्धत्वाद्विशेषणविधे-र्व्यवायप्रमाणाप्रत्यभेदापत्तेश्च द्रव्यस्य क्रियाया वा विधाने नियोंजुमशक्ये परेणोच्येत—नैव हवनं कुर्यादितीत्यादिहवनकर्तव्यतार्थतात्यागेन परिहारं मन्यते पक्षान्तरसंश्रये चोपपत्तिं निर्दोषत्वं । एवमत्र पुनः पक्षान्तरमिदमत आह—किं तर्हि ? अग्निहोत्रं कुर्यादित्येतत्सज्ञान्तरमाम्नायते, उपपत्तिमग्निहोत्र-शब्दे जुहोतेर्धातोर्विधेयार्थत्वात् कर्तृप्रत्ययार्थेन कृत्य तद्विधेयार्थत्वात्, अयं जुहुयादिति द्रव्यार्थकस्य- 10 समाम्नाय, स च लिङ् कर्तरि विहितः, 'कर्तरि कृत्' (पा० ३।४।६७) 'तः कर्मणि च' (पा० ३।४।६९) इति । कर्तृप्रत्ययश्च कृत्प्रकृतिसम्बन्धः, कर्तरि—क्रियाया निर्वर्तकेऽभिधेये कृतो यथा-र्थाश्च भवन्तीति । यथा कर्मणि विहितोऽपि तद्धातुः कर्म नाभिवर्तते भावे विहितस्तु क्रियामात्रा-र्थत्वात् कुर्यर्थ एव, किं करोतीति सर्वक्रियाविशेषेषु पचत्यादिषु विशेषसमर्पणात्, जुहुयादित्य कुर्यादित्ययं एव । यथा भूयते देवदत्तेन भुज्यते देवदत्तेनेत्येवमादावकर्मकेष्वपि सत्यपि भवतीति । 15 अग्निहोत्रशब्देन पुनस्तद्विशेषभूतो जुहोतेरर्थोऽभिहित एव, तस्मादग्निहोत्रं कुर्यादित्ययमर्थ इति ।

अत्रोच्यते—

एवमपि कर्तृप्रत्ययान्तकृत्प्रत्ययेनेम जुहोत्यर्थस्यागोऽर्थभेदश्च, कर्तृविहितक्रियासामा-न्यमात्रवाचित्वाभ्युपगमात्, जुहोतेश्च क्रियाविशेषत्वात्, जुहुयाच्छब्दोऽपि होमशब्दार्थं होमशब्दोऽपि जुहुयाच्छब्दार्थं नयतीति नामाख्यातयोः प्रत्येकं द्व्यर्थवृत्तित्वादमेदश्चेत्येवं 20 शब्दार्थसङ्करः प्रसिद्धिविरोधश्च जुहोत्यर्थस्यागमस्वार्थपरत्वर्थविशेषत्यागस्तदभ सत्यागमपक्षेऽपि विशेषाभावे निराश्रयस्य सामान्यस्याभावात् ।

एवमपीति, कर्तृप्रत्ययान्तकृत्प्रत्ययेनेति परोक्त मनुवादयति एव—इदानीं कुर्यादग्नि-होत्रमित्येतत्पक्षान्तरे, होमशब्दस्य हवनार्थता कर्तृप्रत्ययान्तकृत्प्रत्ययता च जुहोतेरित्येतत् त्वयोक्तं मया बुध्वा सहायवारितम्, तथापि जुहोत्यर्थस्य त्यागोऽर्थभेदश्च, जुहोत्यर्थत्यागस्तावत् कर्तृविहितक्रियासामान्य-

---

[illegible] पक्षान्तरमेवैतत्—पक्षान्तरमिति । जुहुयादित्यस्य हवनं कुर्यादित्यर्थो न सम्भवति [illegible] [illegible], अतो हवनशब्दस्य क्रियाया वा विधानं न क्रियते अपि तु हवनकर्तव्यतामभिधायेत्यतोऽनेन जुहु-यादित्यस्य कुर्यादित्यर्थो लक्षितो, [illegible] अग्निहोत्रशब्दस्य [illegible] [illegible] [illegible]—अन-न्यापेक्षविधिविशेषणादि । किं करोतीति [illegible] [illegible] किं करोतीत्यस्य [illegible] [illegible] [illegible] विशेषविषयत्वेऽप्यर्थे, पचतीति [illegible] तु [illegible] । जुहुयादिति, [illegible] [illegible] 30 [illegible] [illegible] कुर्यादिति [illegible] इति भाव । जुहुयादित्यत्र [illegible] [illegible] [illegible] [illegible] विहितः [illegible] च [illegible] न लिङः कुर्यादित्यर्थः, [illegible] [illegible] केवलं कुर्यादिति क्रियासामान्यवाचक एवेति तात्पर्यम् । कर्तृप्रत्ययान्तकृत्प्रत्ययेनेति लिङ कुर्यादित्यस्य [illegible] जु-होतेरस्य कुर्यादिति कर्तृविहितक्रियासामान्यवाचित्वमुक्त्वा [illegible] विशेषक्रियायाः [illegible], अत एव च

नामधातुत्वाभ्युपगमाज्जुहोतेश्च क्रियाविशेषत्वात् । सामान्यविशेषयोश्चान्योऽन्यतो भिन्नत्वात्, कुर्याच्छब्दार्थं जुहुयाच्छब्दो ब्रवीतीति वचनात्, होत्रशब्देन दर्शितार्थत्वाज्जुहोतिरनर्थक इति त्वयैव सक्तत्वात् तच्च जुहुयाच्छब्दोऽपि होत्रशब्दार्थं होत्रशब्दोऽपि जुहुयाच्छब्दार्थं ब्रवीतीति नामाख्यातयोः प्रत्येकं द्व्यर्थवृत्तित्वादभेदश्च, होत्रशब्दः क्रियावाची नामवाची च यथा जुहुयाच्छब्दोऽपीत्येवं सत्या-र्थसङ्करः प्रसिद्धिविरोधश्च चापद्यते, यथा पूर्वापरीभूतभावमाख्यातमाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्य- 5 पवर्गपर्यवसानभूतम्, सत्त्वं नामेति तद्विरोधापत्तिरिति जुहोत्यर्थत्यागमेताभ्यां हेतुभ्यां जुहोत्यर्थ त्यागवत् सर्वधात्वर्थविशेषत्यागः, यथा जुहोतिः कर्तृप्रत्ययसामान्यलक्षसर्वप्रकृत्यर्थत्यागेन पचतिपठत्यादयः सर्वे धातवो धातुत्वादद्यभिमाः, तस्मात् सर्वधात्वर्थविशेषाः त्याज्याः, विशेषशब्दस्य भेदार्थत्वान्नामा-ख्यातद्व्यर्थवृत्तित्वात् पूर्वोक्तदोषसर्वप्रसङ्गार्थता च, ततश्च सर्वधात्वर्थविशेषत्यागात्त्यागापत्तिरपि, तस्य कृत्यर्थस्य सर्वधात्वर्थसामान्यभूतस्यापि त्याग आपद्यते । किं कारणम् ? विशेषाभावे निराश्रयस्य 10 सामान्यस्याभावात् करोतीत्युक्ते किं करोति ? जुहोति पचति पठतीत्यादिविशेषसंश्रयेण विना करोतेर र्थाभावात् । अपित्वस्मात् सङ्करप्रसिद्धिविरोधपौनरुक्त्यदोषाश्च ।

आसन्नश्रुताग्निहोत्रकर्तव्यताभेदेति चेन्न, आसन्नतरश्रुतजुहोत्यर्थत्यागात् पदान्तरार्थं कथं वर्तेत ?

(आसन्नेति) आनन्तर्यं संसर्गभेदभिन्नात्सामर्थ्याच्छब्दप्रयुक्तार्थान्तरवच्छेदो विशेषलिङ्गात् 15 भवति यथाऽऽह—'संसर्गो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृति-हेतवः ॥' (वाक्यपदीये का० २ का० ३१७) इति, तत्र पदान्तरसन्निधिसंज्ञकं सामर्थ्यं तदत्र प्रत्येकार्थमिहाभ्यधिकं, यथा—आसन्नश्रुताग्निहोत्रशब्दात् तयोरिव कर्तव्यतैवात्र सम्बध्यते, तस्मात्

सामान्यविशेषभिन्नयोः परस्परं भेद इति भावः । तच्चेति, होत्रशब्दः प्रत्ययेन [illegible] विप्रकाः [illegible] कर्त- 20 व्य इति होत्रशब्देन [illegible] जुहुयाच्छब्दमीनापि [illegible] इति जुहुयाच्छब्दः कार्यं होत्रशब्दार्थं ब्रवीति होत्रशब्दोऽपि कार्यं जुहुयाच्छब्दार्थं [illegible] नामाख्यातयोः प्रत्येकं [illegible] क्रियार्थयोर्वृत्तित्व- [illegible] क्रिया हि [illegible] सत्त्वं [illegible] तथा चाख्यातः [illegible] आपद्यत इति भावः । ननु यथा जुहुयादिति [illegible] सर्वे [illegible] पचतिपठत्यादयः सर्वे धातवः [illegible] क्रियाविशेषाः [illegible] क्रियासामान्य- 25 [illegible] जुहोत्यर्थेति । विशेषाभाव इति पचत्यादौ हि क्रियाविशेषरूपता सामान्यक्रियापत्तिश्च करोतिना [illegible] किं करोतीति क्रिया [illegible] पचतिपठतीत्यादिना निराश्रयीभावक्रिया-[illegible] पचादीनाम् । तथा च विशेषार्थं [illegible] निर्विशेषं न सामान्यमिति न्यायेन सामान्यक्रियाया अभाव इति भावः । आसन्नतरमिति [illegible] इति [illegible] विशेषलिङ्गभूताः [illegible] न विशेषोऽवगम्यत इति भावः । संसर्ग इति [illegible] शब्दार्थस्यानवच्छेदे सन्देहे [illegible] विशेष- 30 [illegible] इत्यर्थः [illegible] इति भावः । [illegible] रामलक्ष्मणाविति [illegible] युद्धादेशतः [illegible] जुहोतीत्यादौ [illegible] ईश्वरात् [illegible] प्रकरणेन यथा [illegible] इत्यत्र [illegible] यतो [illegible]

गुडहोमार्थत्वतः कर्तुंमनस्त्वात्कथमुक्तेने सत्यमग्निहोत्रं कुर्यादिति हवनविशेषस्यैव करणत्वोपादानम्, येनेमामाशङ्कामाम् यद्येवम्मन्यसे वदसि च, आसन्नतरगुडहोमार्थमागात्, यथाऽऽसन्नगुडाग्निहोत्र-साधिम्यादर्थोपादान न्याय्यं मन्यसे ततोऽप्यासन्नतरगुडहोमार्थोपादानं न्याय्यतरं किं न मन्यसे ? स चार्थसम्बन्धतया, तदुपादानेऽपि चाप्रसिद्धत्वादिदोषापत्तिरथवा, स्वपदार्थं त्यक्त्वा पदान्तरार्थे कर्म
5 वर्तेतेति ।

तदभ्युपेत्य पदान्तरार्थाभिधाने दोष उच्यते—

परपदार्थविधानेऽपि च पदान्तरपरिश्रुतहोममात्रानुवादत्वाद्गुणमात्रपर्यवसानमेवेति कुर्याद र्थोपादानमनेकम् ।

(परेति) पदान्तरे—अग्निहोत्रपदे परिश्रुतं—परिगतं ज्ञातं, किं तत् ? होत्रमात्रं न तदतिरि
10 क्तमर्थान्तरं गम्यते, अतो गुडहोमविधेयस्य तस्य योऽर्थस्तन्मात्र एव कृतः कुर्यात्कर्मः । इतिकर्तो हेत्वर्थे, अस्मादेतोर्गुडहोमार्थमात्रत्वात् कुर्यादित्यस्यार्थस्योपादानमनेकम्, नास्ति भेदोऽनेक-भेदकमभिप्रायेम् । कुतो भिन्नार्थं न भवतीति चेत् ? हवनं कुर्यादित्यस्याप्यन्यार्थत्वात्, तस्मात् एव दोषाः । स्यान्मतम्—

मात्रग्रहणासिद्धिः, अग्निपदविशिष्टसमासत्वादित्येतदप्युक्तम्, तिङन्तपदार्थेऽभिभूत-
15 प्रकृत्यर्थत्वात्, यथा मत्स्यतेऽप्यागच्छतीति ।

(मात्रेति) मात्रग्रहणासिद्धिरग्निपदविशिष्टसमासत्वात् न हि होममात्रमेव श्रूयते, किं तर्हि ? अग्नेरभावमये वा होत्रमग्निहोत्रं तत्कुर्यादिति भिन्नोऽर्थ इति, यदप्युक्तम्, तिङन्तपदार्थेऽभिभूतप्रकृ-त्यर्थत्वात् होममात्रमुक्तत्वं सिद्धमेवेत्यर्थः । यत्र तिङन्तपदार्थेनाभिभूतः प्रकृत्यर्थस्तत्र प्रकृत्यर्थमात्रश्रुतिता दृष्टा, यथा मत्स्यतेऽप्यागच्छतीति ।

20 [illegible] अग्निपदेन [illegible], अग्निहोत्रं [illegible] यथा निर्मं [illegible] [illegible] आतञ्च यत्नेवार इत्यादि [illegible] परमेश्वरत्वं [illegible], [illegible] [illegible] दर्शपूर्णमासयोः [illegible] [illegible] इत्यादि [illegible] [illegible] । [illegible] अग्निहोत्र[illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] इति
25 [illegible] । आसन्नतरेति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] परपदार्थेति [illegible] [illegible] [illegible] तथा च [illegible] कुर्यादिति [illegible] कुर्यात् [illegible], [illegible] [illegible] । [illegible] न होममात्रमेव परिश्रुतम् [illegible]
30 [illegible] कुर्यादिति हवनं कुर्यादिति [illegible] भिन्नार्थमेवेत्याह—मात्रग्रहणासिद्धिरिति । [illegible] कुर्यादित्यर्थः [illegible] [illegible] होममात्रापि यथा [illegible] [illegible] [illegible] तथा [illegible] [illegible]—तिङन्तपदार्थे-ऽभिभूतेति [illegible] [illegible] [illegible] [illegible]

वैधर्म्येण—

कुम्भकारवत् कमण्डलावयत् समासत्वात् कुम्भकारवदेव विशिष्टार्थत्वमिति चेन्न, अग्निसमासत्वात्, न ह्यस्त्यग्निशब्दस्य होत्रशब्देन तिङन्तस्यार्थाकाङ्क्षेण समासः, तिङन्तेन अस्तिक्षीरा अश्नीतपिबतादिषु समासदर्शनाददोष इति चेन्न परिगणितेभ्योऽन्यत्राभा- वात् तिङन्तप्रतिरूपकनिपातेषूपात्तत्वाच्च तेषाम् । 5

(कुम्भकारवदिति) (समास इति) 'सुप्सुपा' (पा २।१।४) समर्थेन सह समस्यत इति वचनात् । (तेषामिति) 'अस्ति नास्ति दिष्टं मतिः' (पा० ४।४।६०) इति प्रातिपदिकवत् । अन्यथा देवदत्तः पचतीत्यत्रापि समासः स्यात्, न तु भवति ।

सामर्थ्याभावाच्च समासानुपपत्तिः, 'समर्थः पदविधिः (पा० २।१।१) इत्यधिकारात् । असामर्थ्यं च सापेक्षत्वात् । ननु प्रधानत्वाद्भवति समासः, न, न ह्यत्राग्निशब्दस्य होत्रश- 10 ब्दस्य वा प्राधान्यमस्ति, कुर्यात् जुहुयादिति तिङन्तस्य क्रियावाचिनः प्राधान्यात् । अप शब्दश्चायमस्मिन्नर्थे ।

(सामर्थ्येति) सामर्थ्याभावाच्च समासानुपपत्तिः, समर्थः पदविधिरित्यधिकारात्, असाम- र्थ्यं च सापेक्षत्वात्, यथा ऋद्धस्य [illegible] ऋद्धस्य राज्ञ इति समासानुपपत्तिः, समर्थः पदविधिरित्यधिकारात्, देवदत्तस्य गुरुकुलमित्यनेन तुल्यं तत् । ननु प्रधानत्वाद्भवति समासः, उक्तं 15 हि 'भवति च प्रधानस्य सापेक्षस्यापि समासः' (महाभाष्ये २।१।१ समर्थसूत्रे) इति, न चात्राग्नि- शब्दस्य होत्रशब्दस्य वा प्राधान्यमस्ति, कुर्याज्जुहुयादिति तिङन्तस्य क्रियावाचिनः प्राधान्यात् साम- मानां साम्यसिद्धार्थमप्रवृत्तत्वात्, अपशब्दो हि नामार्थविशेषविवक्षायां तदभिधायिस्वरूपाच्च्युतात् यथा गोणीशब्दो हि सास्नादिमदर्थे, तस्याभिधाय्यपि गोशब्द एव, तथा गावीशब्दोऽपि गम्यवसेयः सास्नादिमदर्थेऽस्मिन्नर्थे, शब्द एव । तथा चोक्तम् 'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहार- 20 काले । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥' (महाभाष्ये १।१।१) तस्माद- पशब्दश्चायमस्मिन्नर्थे, कुर्यात्कुम्भकारोपादानत्वमेवकमिति साधूक्तम् ।

नयचक्रपाठस्त्वेवम्—कुम्भकारवदिति, । अग्निशब्दस्य हुताशना सुप्सुपेति न समासोऽत्र प्रसङ्गार्थे सापेक्षत्वेनासमर्थत्वात् अस्ति क्षीरा वीरसुतस्त्विपदमतिवन्यन्यास्तिक्षीरेत्यत्र अस्ति क्षीरं यस्याः सा अनेकमन्यपदार्थे इति बहुव्रीहिः । अश्नीत पिबतेत्येवं सततं यत्राभिधीयते साऽश्नीतपिबता नास्त्यस्माद्यत्र क्रियासातत्यम्' इति मयूरव्यंसकादित्वात्समास- 25 तत्पुरुषसमासः । एवमग्निहोत्रस्य न समासः उपसर्गविभक्तिस्वरप्रतिरूपकाभावात्, परिगणितेभ्यश्चान्यत्राभावाच्च । समर्थः पदविधिरिति पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्य इत्यर्थः समासो विभक्तिविधानं च पदविधिः । ऋद्धस्य राज्ञ इत्यत्र तु सामर्थ्याभावात् तृतीया तत्कृतार्थेन गुणवचनेनेति सूत्रेण समासो भवति शङ्कुलाखण्डः [illegible] इत्यर्थः । किन्तु शिष्टं तं शङ्कुला खण्डो धान्यार्थ गुणवचनेन च समासः सामर्थ्याभावात् शिष्टं तं शङ्कुलया न प्रयोक्तव्यम्, गुणवचनेन इह शब्दो वाचकोऽस्ति तदर्थत्वादिति बोध्यम् । असामर्थ्यं च सापेक्षत्वादिति इतरविशेषणानपेक्षणभित्यस्य 30 तद्विशेषणे सापेक्षमसामर्थ्यमिति । न च राजपुरुषे दर्शनीय इत्यत्र वृत्तिर्न प्राप्नोति सापेक्षत्वादिति वाच्यम्, सापेक्षत्वेऽपि प्रधानस्य समासात् । अत्र दर्शनीयत्वान्वयः केवले पुरुषे बोध्यः । भाष्ये हेतुमत् साधनानामिति क्रियाभिन्नार्थं हि सापेक्षमसमर्थं भवतीति । किन्तु प्रधानमिति भावः । अपशब्दो हीति अर्थविशेषाभिधायकोपाधं पदं यदा तदभिधायित्व-

त्यजजुहोतिकर्त्रर्थपदे तु निष्क्रियाकर्तृत्वात् कुर्वीतपर्यायाभावः ।

(त्यजेति) यथाऽऽचष्टीपा एतद्दोषमपास्यन्त्या जुहोत्यर्थं निष्क्रियं कर्त्रर्थमात्रेण ब्रूते, कुर्यादिति कर्तव्यमात्रयोगमार्थः । एवञ्च सति त्यक्त्वा जुहोतिं कर्त्रर्थपदे तु, कुर्वन्तो निषेध्ये, तत्र त्यागमात्रेणैव विशेषयसि, करोति कुर्यादित्येवमादिसम्भावना कर्त्रर्थप्रकृतीनां यागादिकर्मविशेषणत्वेन

5 किं करोति किं कुर्यादित्यनिर्णीतार्थत्वात्, कोऽर्थः स्यात् कुर्वीतभावे कर्त्रर्थस्य ? निष्क्रियाकर्तृत्वं स्यात्। कुर्यात्कर्मो निरर्थकः, सत्यस्वप्रयोजनार्थत्वात्यागविषयस्य कुर्यादिप्रकृतिरहितस्य यागादिमत्-यागस्य प्रयोगस्यादर्शनात् ।

अभ्युपेत्यापि प्रयोगम्—

जुहोतिप्रयोगासत्त्वञ्च, साम्यत्वात्, व्याधिवत् ।

10 (जुहोतीति) जुहोतिप्रयोगासत्त्वं ब्रूमः अप्रसक्तमप्रतिषेध्यम् । कुतः ? साम्यात्, साम्यत्वं त्यागे सत्यत्वात्, अप्रयोजनानामावर्तमानार्थाभावप्रयोजकविधिना सिद्ध एव । तस्मात् साम्य-त्वादसत्त्वं जुहुयादित्यस्य प्रयोगस्य । दृष्टान्तो व्याधिवत्, यथा व्याधिस्साम्यत्वादप्रवर्तकः तथा जुहो-तिप्रयोगोऽप्यप्रसक्त इति ।

क्रियान्यत्—

15 क्रियानामसम्पृक्तित्यागोपादानाभ्यां धातुप्रातिपदिकभेदोऽपि न, एवमेव एव सः यदा न्तरविषयत्वात् ।

क्रियानामसम्पृक्तीत्यादि, आख्यातस्य क्रियार्थे च त्यक्त्वा त्यागं [illegible] त्यक्त्वा निष्क्रियद्रोत्र त्यागोपादानम्, न च तमभ्युपादाय तदेवाभिधत्ते किं तर्हि ? पुनरपि सत्त्वार्थं त्यक्त्वा क्रियार्थोपादानम्, एवं नामपदस्यापि सत्त्वार्थं [illegible] त्यक्त्वा क्रियार्थोपादाने क्रियार्थं

20 त्यक्त्वा सत्त्वोपादानमिति । ताभ्यामेव च त्यागोपादानाभ्यां कुर्वीतजुहुयादित्येवयोरपि भेदयोः नाम-त्वविशेषार्थयोरितरेतरार्थत्वा भेदः समुदायविशेष विकल्पविप्रकरणात् तत्रैवमप्युक्तेनैवापि, तथा तद्धाभ्यां प्रकृत्योरपि भेदः, ताभ्यां त्यागोपादानाभ्याम्, कयोः प्रकृत्योरिति चेद्धातुप्रातिपदिकयोः,

---

[illegible]

[illegible] द्वयोर्विभागकथने हि [illegible] जुहुयो [illegible]

25 [illegible] धातुरेवेति [illegible]

[illegible]

[illegible]

[illegible] जुहोति— [illegible]

[illegible] त्यजजुहोतीति [illegible]

30 [illegible] करोति [illegible]

करोति जुहुयादित्येवमादीति । [illegible] असत्त्वमिति । [illegible] साम्यत्वात्—[illegible]

मिति । [illegible] क्रियानामेति [illegible]

[illegible] भेदो न [illegible] । [illegible] आख्यातस्येति । [illegible] जुहोतीत्यं [illegible]

तत आह–धात्वर्थप्रतिपत्तिक्रमभेदोऽपि न, पदभेद एव सः, कुतः पदभेद इति चेत्? पदान्तरविषय-
त्वात्, पदान्तरस्य विषयोऽस्येति पदान्तरविषयं तत्त्वभावस्तत्त्वं नाम वा, तद्भावात्–पदान्तरविषय
त्वात् कुर्याज्जुहुयादिति । अथवा वाक्यार्थविचारः प्रधानं मीमांसकस्य, यदुक्तं प्राक् 'अनुवादविधि-
विषयत्वे वाक्यभेदापत्ते'रिति, स तु न केवलो वाक्यभेदः पदभेद एव वा, किन्तर्हि? धातुप्रतिप
त्तिक्रमभेदोऽपीत्यभिसम्बध्यते, न त्वनुवदनात्, तत्र को हेतुरिति चेत्? अज्ञातस्याग्निहोत्रस्य क्रिया 5
विशेषणत्वेनानुवादात्, अज्ञातार्थो विधिः, ज्ञातार्थोऽनुवादः । अग्निहोत्रमज्ञातत्वाद्विधीयते तत्कृत्वा
जुहुयात्स्वर्गं कुर्यादिति जुहोतिक्रियया विशेष्य प्रसिद्धस्य विहितस्यैवानुवदनादिति धात्वर्थमर्थमुप
पत्तित्वेन दर्शयति ।

ततश्च किम्?

एवञ्च श्रुतेर्योऽसौ प्रतिपत्तिस्तस्या अप्रमाणोऽन्यथाऽर्थाधिगतेः, स्वमत्युपेक्षानुमानेन च 10
तत्त्यागात् कर्त्रर्थप्रतिपत्तिवशेन शब्दार्थव्यवस्थापनात्तु पुरुषस्य ज्ञानमेव प्रमाणीकृतमतस्ते
वादावसानं निग्रहस्थानम्, एष चेतरभाष्यार्थव्याख्याने भवति ।

एवञ्चेत्यादि, यावत्तस्या अप्रमाणः, एवञ्चेत्यनन्तरनिर्दिष्टक्रियागमकस्तुतित्यागोपादानाभ्या-
मेव श्रुतेर्योऽसौ प्रतिपत्तिः–जुहुयादित्यस्याः पदश्रुतेर्हवनक्रियाविधानमर्थो जुहुयात्स्वर्गं कुर्यादिति, तस्या
अप्रमाणः,–सा न भवति, अन्यथाऽर्थाधिगतेर्यस्मात् आह तत्र प्रमाणमिति च हीयते नास्याग्निहो-15
त्रमित्यागोपादानदोषेभ्यश्च शब्दाप्रमाण्यज्ञानात्, तदप्रमाणत्वात् पुरुषबुद्धिवशेन शब्दार्थावस्थानम्,
कुतः? स्वमत्युपेक्षानुमानेन च तत्त्यागात्–स्वयं मत्युपेक्षितोऽर्थस्त्वया, अयमस्य शब्दः, अस्यार्थ
एवं भवति न वेति, दोषवत्त्वात्पूर्व आम्नोऽप गुणवत्त्वादाश्रयणीयः इति विचार्य स्वमतिप्रमाणीकर
णेन श्रुतिप्रामाण्यत्यागः कृतः, ततस्तत्त्यागात् कर्त्रर्थप्रतिपत्तिवशेन शब्दार्थावस्थापनात्तु पुरुषस्य
ज्ञानमेव प्रमाणीकृतम्, तस्यैव विध्यर्थवदवसितत्वानुवदनात्, अतश्च ते वादावसानं निग्रहस्थानम्, 20
पुरुषज्ञानप्रामाण्याश्रयेण क्रियोपदेशवाक्यप्रमाणीकरणात् प्रतिज्ञात्यागः प्रतिज्ञान्तरगमनलक्षणः, एष

शब्दार्थं क्रियावत्त्वं कार्यत्वमूलं होमयथार्थे यथार्थे सत्यपि भवेत न केवलं [illegible] तस्यापि सामर्थ्यं [illegible] पुनः क्रियार्थं
कर्तव्ये एवं होमस्यानन्तरमपि। यदि धातुप्रतिपत्तिक्रमभेदो न तत्तर्हि किं तत्राह–पदभेद एव स इति। तत्र हेतु
माह–पदान्तरविषयत्वादिति पदान्तरस्यान्यस्य यो विषयो यस्य तत्त्वाद्विधेयोऽर्थः स एव क्रियाविषयस्यापि विषय इति
व्याख्याने। एवञ्चेति [illegible] कर्त्रर्थपरिज्ञानेन परस्परार्थप्रसङ्गेन च जुहुयात्स्वर्गं कामयमानः स्वर्गं कुर्यादिति 25
तदर्थे च शब्दो न प्रमाणमिति तेन तदर्थप्रतिपत्त्यभावः प्रत्यये मिथ्यार्थत्वाद्धेतौ तदर्थोऽपि च न तत्कारणस्य वैयर्थ्यं नामार्थवा-
त्तर्कोऽपि [illegible], क्रियाप्रत्ययमात्रस्य [illegible] प्रमाणीति वचनात् तदर्थप्रयोगेन पुनरपि त्वार्थप्रत्यक्षेण न शब्दः
शब्दार्थे व्यवस्थितः तदप्रमाणत्वात् पुरुषबुद्ध्यवरोधेन तत्र व्यवस्था कर्तव्या ततश्च [illegible] भावः । तदेवाह–
स्वमत्युपेक्षेति, विचारपूर्वकानुमानेन श्रुतार्थत्यागमस्यावधारितवान् । अयमस्येति, एतदर्थस्य वाचकोऽयं शब्दः
[illegible] न एवं भवति न वेति [illegible] दोषः अत एव त्यागोऽस्यापि अयमर्थस्तु गुणवत्त्वा- 30
दाश्रयणीय इति निश्चयदिशाप्रमाणत्वेन श्रुतेः प्रामाण्यं त्यज्यते । [illegible] कर्त्रर्थावधारणेन शब्दार्थव्यवस्थापनात्
पुरुषज्ञानमेव प्रमाणीकृतमित्यपरिच्छेदस्य [illegible] प्रतिज्ञातनिश्चयाननिश्चयस्यापरत्वात् वादावसानं वाक्यमिति भावः ।
पुरुषज्ञानेति, [illegible] स्वार्थप्रत्ययं प्रमाणमप्रामाण्यमत्प्रतिज्ञात्यागः प्रतिपद्यते

च–प्रतिज्ञासाध्याभिन्नत्वादाभासताप्रसङ्गदोषा, इत्याद्यर्थव्याख्याने–हवनं कुर्यादित्येवविधं भवति, कस्मात्? समस्तुपेयादुपायेन च तस्यागमात् कर्त्रीपर्मनियमप्रतिपत्तिविशेष स्वर्गार्थापनात्, एवमेव स प्रकृति-मत्वम् पथमग्निहोत्रशब्दो वा बोध्यत इति शब्दप्रामाण्यमार्गेण समस्तिप्रामाण्यापकल्पनात् ।

आह–न स्वर्गार्थं सकामपुरुषोपयमपात्, किं तर्हि ?—

5 एवं तर्हि यथाश्रुत्यग्निहोत्रवत्त्वनमपि प्रहीष्यते, अत्रोच्यते नन्वर्थद्वयविधानमशक्य-मेकेन वाक्येनाग्निसम्प्रदानकस्य कर्मभूतस्य हवनस्य तद्विशिष्टस्य च कर्तृफलस्य ।

(एव तर्हीति) यथा वा श्रुतिर्यथाश्रुति, यथाऽग्निहोत्रशब्दश्रवणात्स्वर्गो गृह्यते तथा हवन-मपि जुहुयाच्छब्दश्रवणाद्ग्रहीष्यते ततो न दोषोऽस्तीति, तदेकत्र हवनमग्निसम्प्रदानविशिष्टकर्मकारकम् बोध्यतेऽन्यत्र तद्विशिष्टकर्तृफलमपेति । अत्रोच्यते नन्वर्थद्वयविधानमशक्यमेकेन वाक्येनाग्निसम्प्रदान-

10 कस्य कर्मभूतस्य हवनस्य तद्विशिष्टस्य च कर्तृफलस्य, यथा ब्राह्मणसम्प्रदानकद्रव्यदानवाक्येन [illegible]-पानयनमपि ।

इतर आह—

नैव हवनं विधीयते किन्त्वग्निहोत्रशब्देन विहितं हवनमनूद्यते विध्यनुवादयोर्भिन्नल-क्षणत्वात् प्राप्तमनूद्यते वाक्यान्तरेण, अप्राप्तञ्च विधीयत इत्यत्रोच्यते, नानुवादो हवनस्य

15 युज्यते न हि प्राप्तिरस्ति हवनस्याविहितत्वात् । अस्ति प्राप्तिर्हवनस्य, अग्निहोत्रस्य हवनत्वात्, यदग्निहोत्रं हवनमेतदिति, पुनरुक्तं तर्ह्येवम्, एतच्च नानुवाद यस्मात्तदाक्यवत् ।

नैव हवनं विधीयत इत्यादि, जुहुयाच्छब्देन नैव हवनं विधीयते, किं तर्हि ? अग्निहोत्र-शब्देन विहितं हवनमनूद्यते, विध्यनुवादयोर्भिन्नलक्षणत्वात्, किं तयोर्लक्षणमिति चेदुच्यते प्राप्तमनूद्यते वाक्यान्तरेण, यथा पण्डितपत्विदतीति छात्राः पण्डित इति वाक्यान्तरविहितपाण्डित्यस्य [illegible]

20 दात् अप्राप्तञ्च विधीयते,—यद्वाक्यान्तराप्राप्तमप्रविज्ञातं प्रमाणान्तरेण तद्विधीयते, यथा स्वर्गकामो जुहुयादिति, अत्रोच्यते यथेत्थं विध्यनुवादयोर्लक्षणं नानुवादो हवनस्य युज्यते, यस्मान्न च प्राप्तिरस्ति हवनस्याविहितत्वात् । इतर आह—अस्ति प्राप्तिर्हवनस्य अग्निहोत्रस्य हवनत्वात्, तस्य तु विहितत्वा-

---

दग्निहोत्रशब्देन हवनत्वात् । अन्यत्राप्येवमेव दोषो बोध्य इत्याह–एव चेति । यथा वेति युक्तिमत्तरमिदमेवार्थं । तदेक-त्रेति [illegible] अग्निहोत्रमग्निसम्प्रदानकं कर्मभूतं हवनमित्यर्थः । अन्यत्र–जुहुयादित्यत्र हवनविशिष्टकर्तृफल-

25 मर्थं [illegible] वाक्यमेदप्रसङ्गात् । [illegible] [illegible] । जुहुयादित्यत्र हवनं न विधीयते किन्त्वनूद्यते अग्निहोत्रशब्देन हवनस्य विहितत्वादिति [illegible] [illegible]–नैव हवनमिति वाक्यान्तरेण [illegible] इत्याह–नानुवाद इति । [illegible] अग्निहोत्र-शब्देन हवनं [illegible] यदग्निहोत्रं तदेव हवनमित्यभिप्रायेणाह–अस्तीति । समाधत्ते–पुनरुक्तमिति अग्निहोत्रशब्दे-[illegible] । [illegible] [illegible] [illegible], अनुवादे त्वनु-

30 क्तं [illegible] यथा [illegible] [illegible] । [illegible] [illegible]–यथेति [illegible] । [illegible] पण्डित इति वाक्यान्तरेण [illegible] । न तु वाक्या-न्तरेण न प्राप्तं प्रमाणान्तरेण न विज्ञातं तदेव विधीयत इत्याह–यद्वाक्यान्तरेति । [illegible] न [illegible] [illegible]

त्तिमत आह यदग्निहोत्रं हवनमेतत् पुनरुक्तं तदर्थसमर्थयोरग्निहोत्रहवनयोरविशेषात्, एवञ्च—अर्थपुनरुक्तत्व नानुवादः सम्भवत्यपवत् ।

अनुवादलक्षणाभावमप्यस्य दर्शयति—

विधिविहितस्यानुवचनमनुवाद इति तदत्र न घटते अग्निहोत्रहवनविधेयत्वादनुवादायोग्यता, अथ विधानं वाऽनुवादो वा यथाकथञ्चित् स्यात् ततः पुनरुक्तदोषाभाव एव स्यात्, इष्यते च पौनरुक्त्यं शब्दतोऽर्थतश्च, उक्तार्थशब्दार्थकथनमविशेषेण पुनरुक्तमन्यत्रानुवादादित्यस्य इति पौनरुक्त्यभावादिदं जुहुयादिति पदमनुवादाक्षमं विधीयमानत्वाद्व्याख्यायमानपण्डितत्ववत् ।

विधिविहितस्यानुवचनमनुवाद इति, विधिशब्दो यज्ञार्थे, यज्ञादिविधिवाक्यविहितस्यार्थस्य यज्ञार्थविशेषप्रापणार्थोऽनुवादोऽनुवादः, तदत्र लक्षणं न घटते, अग्निहोत्रहवनविधेयत्वात्, अग्निहोत्रस्य हवनस्य चैकस्मिन्नुभयोर्विधेयत्वात्, तन्निगमयति—अनुवादायोग्यतेति । अथ विधानं वानुवादो वा यथाकथञ्चित्स्यात्, साम्प्रतं चतुर्विधविधिपूर्विका शब्दप्रतिपत्तिरित्यस्य हवनस्य विधानं विधत्स्वतेऽनुवादो वा विधत्स्वत इति, एवमपि यथाकथञ्चित् स्यादिति विवक्षाभावात्, विवक्षेच्छयोरनर्थान्तरत्वादिच्छामात्रतश्च निरुपपत्तिकस्यार्थस्यासिद्धेर्न स्यादित्यभिप्रायः, यद्यपि यथाकथञ्चित् स्यात्ततः पुनरुक्तदोषाभाव एव स्यादिष्यते च पौनरुक्त्यं शब्दतोऽर्थतश्च, उक्तार्थशब्दार्थकथनमविशेषेण पुनरुक्तमन्यत्रानुवादादित्यस्य इति पौनरुक्त्यभावः, उक्त इति पुनरुक्तापवादमर्थविशेषापेक्षं दर्शयति, अनुवादात्—पण्डितमामन्त्रयस्व पण्डितो देवदत्त इत्यनुवादो न पुनरुक्तम् । एवमादरे स्वामिन् स्वामिन्निति । वीप्सायां—ग्रामो ग्रामो रमणीयः । भृशार्थे—पूतं पूतम्, मृदु मृदु, शनैः शनैरिति । विनियोगे पटं कुरु पटं कुर्विति । हेतौ—तन्तुत्वादनित्यो घटस्तस्मात् कृतकत्वादिति । असूयायाम्—विपर्यस्ताऽऽस्य हसति हसतीति, ईर्ष्यतीतीति, शोकं शोकमिति । संभ्रमे—स्वागतं स्वागतमिति । विस्मये—विद्याधरो विद्याधर इति । गणने—एकमेकं द्वे द्वे इति । स्मरणे—आ [1] चित्रितो चित्रितः पाटलिपुत्रे दृष्टोऽसीति । एवमाद्यर्थविशेषाभावे पुनरुक्तदोषापादकत्वम्भावाच्चेदनुवादत्वमस्य पौनरुक्त्यमेव स्यात्, यौगत्वभावे नानुवादत्वं तस्माद्विधेयत्वमनुवादाक्षमम्—अयोग्यमित्यर्थः । कथमत ? जुहुयादित्येवरूपम्,

---

अतो नानुवादः अन्योन्यत्वमत्र अनुवादलक्षणमित्याह—एतदेवेति । अनुवादत्वाभावमपरमेवाह—विधिविहितस्येति विध्यनुवचन विहितानुवचनमनुवादः तत्र प्रथमः शब्दानुवादो द्वितीयोऽर्थानुवादः पुनरुक्तमपि सगतार्थमेवेन द्विविधम्, विहितं विधेयमनूद्यत इति चेदधिकारार्थम् विहितमविहितं तदिदं नोच्यते विध्या वा विधिविधेयो वाऽभिधीयते । एतादृशानुवादोऽत्र न घटते इत्याह—तदत्रेति अग्निहोत्रस्य हवनस्य चाग्निकार्यत्वैकत्वेन विधेयत्वादनुवादता संभवतीति भावः । सर्वत्र विधेयता विधेयत्वादनुपपत्तेः अस्मिन् पुनरुक्तत्वेऽपि विध्यभिधेयेन विधेयत्वस्यानुवादत्वस्य वा वापयितुं सम्बन्धेन पुनरुक्ताभाव एव स्यादित्याह—स्यान्मतमिति । यथाकथञ्चित्स्यादिति वाग्व्यवहारेण वाग्जिह्मं भवेत् तदान्तरैवोपपत्ति कस्यापि कौशलो बोधित इति भावः । शब्दतोऽर्थतश्चेति घटो घट इति शब्दतः पौनरुक्त्यम्, घटः कलशः इत्यर्थतः पौनरुक्त्यम् । अन्यत्रानुवादादर्थविशेषाभावे पुनर्वचने पौनरुक्त्यदोषस्य दुर्वारत्वेन अग्निहोत्रं जुहुयादित्यस्य यदि नानुवादत्वं तर्हि पौनरुक्त्यमेव स्यादर्थविशेषाभावात् पुनरुक्तत्वेन च नानुवादत्वमपि तस्मादनुवादत्वेनाऽयोग्यमयमेवाह—एवमाद्यर्थेति । तद्ध

कुतः ? विधीयमानत्वात्, योऽर्थो विधीयते न सोऽनूद्यते, आख्यायमानपण्डितत्ववत्, यथाऽयं पण्डितो देवदत्त इति विधीयमानपाण्डित्यो देवदत्तो नानूद्यते ।

तथा जुहुयादित्येतदपि नानुवादोऽपूर्वोपदेशत्वादनुवादधर्म्याभ्यां तल्लक्षणाभावात् विहितमेव त्वनूद्यते विशेषविधानार्थं यथा पशुर्देवदत्तः पयसैनं मोजयेति । यत्र न विशेषो 5 विधीयते मौलविधिरेव सः, एवं तर्हि विशेषविधानादनुवादोऽस्तु तन्नविति चेत्तन्न, न चात्र कश्चित् जुहोतेः पुनर्वचनेन विशेषो लभ्यते तस्मात् प्राक्तनमेव तज्ज्ञातम्। एवं यां तां गतिं गत्वा सर्वथाऽग्निहोत्रं जुहुयादित्यस्मिन् वाक्येऽग्निहोत्रकर्मण्येवान्तर्भावितत्वने जुहुयात्पदमङ्ग-स्यर्थे किमतिरिच्यते ? पौनरुक्त्यदोषप्रसक्तो विधिलिङ् कर्तव्यांशे, अग्निहोत्रं कुर्यात्, अग्नि-होत्रे जुहुयादित्येतयोर्वाक्यार्थविकल्पयोरुक्तदोषत्वात् ।

10 (तथेति) किं तल्लक्षणमिति चेत् ? विहितमेव त्वनूद्यते विशेषविधानार्थं यथा पशुर्देवदत्तः पयसैनं मोजयेति । 'तल्लक्षणाभावात्' किं तल्लक्षणाभावात् ? नानुवादः । यत्र न विशेषो विधीयते मौलविधिरेव सः । एवं तर्हि विशेषविधानादनुवादोऽस्तु तन्नविति चेत्तन्न भवति, यस्मात् न चात्र कश्चिज्जुहोतेः पुनर्वचनेन विशेषो लभ्यते—जुहुयादित्यनेन मन्त्रेणाग्निहोत्रसम्बन्धिनिर्वापस्योपलक्षणमिष्यतो विशिष्टोऽर्थोऽभिधीयते यतोऽनुवादः स्यात्, तस्मात् प्राक्तनमेव तज्ज्ञातम्, यावज्जीवमग्निहोत्रं कुर्यादिति 15 वाक्यविकल्पेऽग्निहोत्रं यावज्जीवमग्निहोत्रे जुहुयादित्यपि वाक्ये यतोऽधिकं न किञ्चिदस्ति, एवं यां तां गतिं गत्वा—कस्यचित्प्राऽपि सर्वथा—सर्वप्रकारेणाग्निहोत्रं जुहुयादित्यस्मिन् वाक्येऽग्निहोत्रकर्मण्येवान्त-र्भावितत्वने जुहुयात्पदमङ्गस्यर्थे किमतिरिच्यते ? पौनरुक्त्यदोषप्रसक्तो विधिलिङ् कर्तव्यांशे-विधौ विहितस्य क्रियमाणस्य कर्तृकारकस्य तन्मात्रोऽर्थं आस्ते, न पूर्वितः, अन्यत्रार्थं पुनरुक्ताभिधेय-त्वमेवेत्यर्थः । अग्निहोत्रं कुर्यादग्निहोत्रे जुहुयादित्येतयोर्वाक्यार्थविकल्पयोरुक्तदोषत्वादयो नानुवादः, 20 उक्तदोषसम्बन्धादित्यर्थः । कथमिति चेत् ? उत्तरविशेषासम्बन्धनाद्विधीयमानपण्डितत्ववद्विशेषणान्त-रोक्तार्थसमाहारार्थं साधनं गतार्थम् तस्मात् कर्तव्यमात्रमवशिष्यते, शेषं पुनरुक्तम् ।

अथोच्येत विधिलिङ्प्रत्ययार्थेऽव्यस्य वाक्ये प्रकृतिपरत्वप्रसक्तापा आख्यातके प्रकृतत्वा

नादिति वाक्यस्य तल्लक्षणमन्यैर्मृतैर्विहितस्यानुवादधर्म्यं तल्लक्षणमनभिप्रेत्य तथेति । यत्र यथा पशुर्देवदत्तः पयसैनं मोजयेति पयोमोजनविधानार्थं देवदत्तोऽनूद्यते तथैव विशेषविधानाय जुहुयादित्यनुवादोऽस्त्वित्याशङ्क्ते—एवं तर्हीति । 25 जुहुयादित्येव हि पुनरुच्यते न चात्र द्रव्यकर्तृमात्रपेक्षया किञ्चिद्विशेषो विधीयते यो न द्रव्यकर्तृमात्र अग्निहोत्रकर्मणैव विशिष्टस्यानुवादसम्भवात् पौनरुक्त्यमेवैतत्—न चाभेति । जुहुयादित्यत्र मन्त्रेषु होतेः पौनरुक्त्यमेवोपपत्तः—एवं यां तामिति । प्रकृतवाक्यस्य एव तु केवलं न पूर्वि इत्यत—पौनरुक्त्यदोषप्रसक्तेव इति । किंतल्लक्षणाभावादिति तल्लक्षणाभावात् किं साधितम् । अनुवादो न साधितः—नानुवाद इति । यावज्जीवेति अग्निहोत्रं कुर्यादिति वाक्येन वाक्यान्तरं यस्यमिहेदं तावज्जीवमेवाग्निहोत्रं जुहुयादिति वाक्येनाग्निहोत्रमिहिते । कथमिति चेदिति यद्-30 यतासाना कथमिति चेदित्यर्थः । विशेषविधानार्थेनानुवादस्य गौणत्वात् इत्यतिरिक्तविशेषविधानाभावादनुवाद अन्य-नहि यथाऽयं पण्डितो देवदत्त इति विधीयमानपाण्डित्यो देवदत्तोऽनतिरिक्तविशेषाभावादनूद्यत इत्यत—उत्तरविशेषा-सम्बन्धनादिति । अथ विधिलिङ्प्रत्ययार्थेऽस्यान्वयोऽस्त्वं वाक्ये तदर्थेऽस्मिन् न प्रकृतिप्रयोगमन्तरेण तत्सम्पत्ति न केवल प्रकृतिः प्रयोक्तव्या नापि प्रत्यय इति नियमात् तत्र प्रकृतिप्रयोगस्यानन्यथासिद्धत्वे पुनरुक्तत्व जुहोतिप्रकृतिरपेक्ष-त्वं वैयर्थ्यमित्यत्रापि जुहोतिप्रकृतिसापेक्षत्व इत्याशङ्क्ते—अथोच्येतेति । प्रकृतिपरत्वप्रसक्तापा इति प्रकृतिपर

दाने चरमासन्ना प्रकृतिरुपादीयते, अर्थः पुनरस्या न विवक्ष्यते गतार्थत्वादिति, एवं चेत्तर्हि वरं वरं सहायकं ददामि जुहोः, कर्मप्रत्ययार्थसमर्था प्रत्यासन्नतराऽविवक्षितार्था कृञ्प्रकृतिः किं नोपादीयते वचनस्योपादानार्थप्रत्यायनार्थत्वात् । अतोऽग्निहोत्रं कुर्यादित्येवास्तु ।

अयोच्चैरेवेति, परमतमाशङ्कते अयोच्येत विधिलिङ् कर्त्रर्थः प्रत्ययार्थोऽनुच्चारणमपेक्ष्यतेऽत्र इत्यत्र भाष्योऽसौ, तस्मिन् प्रत्ययार्थेऽपदिश्यमानेऽप्रत्ययात्मके प्रकृतिपरत्वव्यवस्थाया इति हेत्वर्थे 5 पञ्चमी, प्रकृतेः परः प्रत्ययः प्रयोक्तव्य इतीयं व्यवस्था, तस्याः व्यवस्थाया मर्यादायाः स्थितेर्हेतोः प्रकृत्युपादानमावश्यकम्, तस्मिन्नावश्यके प्रकृत्युपादाने प्राप्ते कतमा प्रकृतिरुपादीयतां योग्येत्येवं विचारयत इव मे योग्यमिति प्रतिभाति चरमासन्ना प्रकृतिरुपादेया, अर्थः पुनरस्या न विवक्ष्यते, गतार्थत्वात् तस्मादविवक्षितार्था सा, तस्यापि नान्तरीयकत्वे प्रत्यासन्नप्रकृत्युपादाने विकल्पनामन्या परित्यज्यापि विवक्षया जुहोतिप्रकृतिरेवोपादेयेत्यवसेयम् । प्रयोगोऽग्निहोत्रं जुहुयादिति चोच्यते । एवं तर्हि वरं वरमि 10 त्यादि, चेन्मन्यसे चरमासन्नप्रकृत्युपादानम्, नान्तरीयकत्वादिति । तत्राहमेव ते वरं वरं सहायकं ददामि जुहोः, कर्मप्रत्ययार्थसमर्था प्रत्यासन्नतरा पौनरुक्त्यपरिहारार्थमविवक्षितार्थाऽनुच्चार्या कृञ् प्रकृतिः किं नोपादीयते । किं कारणं ? वचनस्योपादानार्थप्रत्यायनार्थत्वात्, अर्थं प्रत्याययिष्यामीति हि शब्दः प्रयुज्यते स च कर्मप्रत्ययान्तया कृञ्प्रकृत्या प्रत्याय्यते स्फुटतरमतोऽग्निहोत्रं कुर्यादित्येवास्तु ।

इतर आह—　　　　15

त्वयैव समर्थितत्वादेवमेवास्तु, स्यादेवं यदि सापि चार्थस्थितिर्निर्दोषा स्यात् सापि चा पक्षिप्तभाष्यार्थस्थितिरुक्तवत् ।

(त्वयैवेति,) आचार्य आह—स्यादेवं यदि सापि चार्थस्थितिर्निर्दोषा स्यात् किन्तु सापि चापक्षिप्तभाष्यार्थस्थितिरुक्तवत्, तस्मादव्यवस्थितो निराकृतो भाष्योऽर्थः जुहोत्यर्थत्यागमेवाभ्यामि त्यादिग्रन्थेनोक्तवत्, यथाश्रुतार्थाभावादिदोषात् पौरुषेयत्वादिप्रसङ्गाच्च ।　　　　20

एव प्रकारः प्रयोक्तव्यः प्रकृतपरेव च प्रकृतिरिति नियमादित्यर्थः । एवं चेत्तर्हीति, वरं तव जुहोः सहायभूतं श्रेष्ठतमा- सन्नप्रकृत्युपादानं मित्रतयेत्यर्थः । तदेवाह—कर्मप्रत्ययार्थसमर्थेति कर्मप्रत्ययो विधिलिङ्प्रत्ययः तदर्थे समर्था जुहोत्य- पेक्षया प्रत्यासन्नतरा तदर्थस्यैव वाचकत्वात् तथापि पुनरुक्तिभियाऽविवक्षितस्वार्था कृञ्प्रकृतिरेव किमर्थं नोपादीयत इति भावः । कृञ्धातोः क्रियावाचिनः कर्मप्रत्ययार्थे कर्तरि समर्थता विज्ञेया । सेति उपादीयमाना प्रकृतिरित्यर्थः । तस्यापीति प्रत्यासन्नप्रकृत्युपादानस्य प्रत्ययोपादानान्तरीयकत्वे सत्यपीत्यर्थः । विकल्पनामन्यामिति जुहोत्यादिप्रकृत्यन्तरविकल्पनां 25 परित्यज्यापीत्यर्थः प्रकृतिमित्यर्थः । अविवक्षितेति पुनरुक्तत्वादिति भावः । पूर्वपक्षी तदेवास्त्विति स्वीकरोति—त्वयैवेति । कृञ्प्रकृत्युपादानस्य त्वयैव समर्थितत्वादग्निहोत्रं कुर्यादित्येवास्त्विति भावः । उत्तरयति—स्यादेवमिति । अर्थस्थिति— रर्थव्यवस्था कर्त्रैव कृञ्प्रकृतिरित्येवं स्यादिति भावः । तदर्थे तथा व्यवस्थितिः पूर्वमेव निराकृतेत्याह—सापि चेति । जुहो- त्यर्थत्यागमेवाभ्यामिति भाष्यकृतामग्निहोत्रमभ्यादधीतेत्यर्थव्यवस्था एवम् अन्यस्याजुहोत्यर्थस्य जुहोत्यर्थ- त्वमग्नौ स्थितेरुपरिहृत्य मेयः श्रुतार्थपरित्यागात् अश्रुतस्याभ्युपगमेन श्रुतिप्रामाण्यव्याघातात् कर्त्रर्थप्रतिपत्तिप्रसङ्गेन अन्यार्थ- 30 व्यवस्थानात् पौरुषेयत्वप्रसङ्गतोपायमित्यर्थः । एवं पुरुषकर्तृकव्यभिचारदर्शनादेव विधर्ममाणमग्निहोत्रं जुहुयादित्यादि वाक्यमप्रतिपादार्थमित्याह—पर्यन्तादिति । ननु कर्मपदवाच्यत्वेन पुरुषविचारोऽप्रामाण्यान्यायानां प्रवृत्तिर्न वेदे सम्भवति निरस्तपौरुषेयत्वाच्च न हि तत्र पुरुषाऽनभिप्रेतो धर्मव्याख्यानतया सम्भवति तस्मात् पुरुषपरतापत्तिदोषपरिहारार्थमाहन्

एवं तावदुपायेन परीक्ष्यमाणमेतद्वाक्यं न युज्यते पुरुषतर्कलक्षणेन, यद्यपि पुरुषतर्कलक्षणं न्यायमतिलंघ्यापौरुषेयो नित्यो वेदाख्यः क्रियोपदेशः पुरुषगतरागादिदोषाऽज्ञानहेतुविनिर्मुक्तः प्रमाणं तथापि तद्वचनादेवास्मिंस्तु न्यायेऽतिलंघ्यमाने क्रियोपदेशवादोऽपि तत्त्वचनवदेव त्यक्तः स्यात्, तत्रापि यदृच्छाभ्युपगमात्।

5 (एवं तावदिति,) (प्रमाणमिति) पुरुषकृतानि हि वाक्यान्यविद्यारागाद्यभिभूतपुरुषप्रणीतत्वादप्रमाणानि अप्रकाशज्ञत्वप्राप्तिनित्यानित्यादिवस्तुतत्त्वविचारविषयाणि, तत्कृतत्वप्राप्तिपुरुषदोषाच्च क्रियोपदेशात्तु वेदवाक्यं प्रमाणमितीष्टं तथापि तद्वचनादेवास्मिंस्तु न्यायेऽतिलंघ्यमाने क्रियोपदेशवादोऽपि तत्त्वचनवदेव त्यक्तः स्यात्, किं कारणं ? तत्रापि यदृच्छाभ्युपगमात्, अविद्यारागाद्यभियोगादेव सर्वपुरुषाणाम्, अतीन्द्रियपुरुषाधीनत्वाद्वेदोपदेशपरम्परायाः न कश्चिद् बुद्धिपूर्वं उपदेशः, अतः तुल्यतादिविप्रलापवद्यदृच्छयाऽभ्युपगतो वेदो वैदिकैः।

अत इदमापन्नं को वा तद्वेदाग्निहोत्रं जुहुयात् स्वर्गकाम इत्येतद्वाक्यं सार्थकं निरर्थकं वेति ? बालप्रलापवत्, यथा हि बालैरनियतक्रियाकारकैरसम्बद्धमुक्तं बुद्धिपूर्वत्वाभावादनर्थकं केनार्थेनार्थप्रत्यायनार्थमिदमिति, व्यवस्थापेतत्वात्, किं वाऽनेन ज्ञातेन ? यदेवाज्ञ एवमुक्तवान्ोऽग्निहोत्रं जुहुयादिति वाक्यमव्यक्तम्, अव्यक्तज्ञाना एव हि ते पुरुषत्वादविद्यायोगाच्च यथा पाक्षिमात्रिम्लेच्छभाषितवत्।

(अत इति) किमिव ज्ञायते ? बालप्रलापवत्, यथा हि बालैरनियतक्रियाकारकैरसम्बद्धमबुद्धिपूर्वत्वाद्बालप्रलापवाक्यं केनार्थेनार्थप्रत्यायनार्थमिदमिति, किं कारणं ? व्यवस्थापेतत्वात्। व्यवस्थापेतत्वमप्ययोगो वर्णप्रत्यासन्नार्थः सन्निहितार्थप्रतिपादनसमर्थनियतवर्णानुपूर्वीकः प्रत्युपेक्षितवाच्यवाचकसम्बन्ध इतीयं लोकशास्त्रव्यवस्था, ततोऽपेतम्, प्रत्ययितसर्वविद्याविवर्जनम्, अविद्यारागा-
20 द्यभियोगात्तेषामितरसम्प्रवृत्तिरविद्यमानविधानादिवाक्यार्थत्वात् तस्मात् को हि वेदोक्तं बालप्रलापवद्व्यवस्थापेतमनुतिष्ठेत्। किञ्चान्यत्, अभ्युपेत्यापि ब्रूमः—किं वाऽनेन ज्ञातेन ? यदेवमुक्ता—वेदज्ञा अग्निहोत्रकर्मका एवमुक्तवन्तोऽग्निहोत्रं जुहुयादिति वाक्यमव्यक्तमव्यक्तार्थं—अस्फुटार्थं यस्मादव्यक्तज्ञाना

परतन्त्रोपगमेन वेदनिर्णयः। तथाप्यं नापवादविद्भ अनभिलापहते—तथापीति। एतत्कथितं पुरुषकृतानीति वचनानि अविद्यारागादिदुष्टपुरुषप्रणीतत्वादप्रमाणानि अतीन्द्रियार्थेषु नित्यानित्यत्वादिविचारे तु तत्तो निर्णयाभावात्। क्रियो-
25 पदेश एव भेदात्, तत्प्रत्ययलक्षणेन ततः क्रियोपदेशाख्यो वेदः प्रमाणमित्याह—पुरुषकृतानि हीति। पुरुषतर्कलक्षणन्यायमतिलंघ्य वेदवचनैरर्थप्रत्ययाभ्युपगमात् तत्त्ववचनवदेव क्रियोपदेशवादोऽपि तु त्यक्तः स्यात् तत्त्वतो भवेत् तत्र निरूपणमुपन्यस्य यदृच्छाभ्युपगमादि—तथापीति। यदृच्छात्वमेव समर्थयति—अविद्यारागेति विविक्तम पुरुषाणामविद्यारागादिविनिर्मुक्तवेदोपदेशपरम्परया अतीन्द्रियार्थोपदेशस्यानवस्थानात् बुद्धिपूर्वक उपदेशो न स्यादिति वेदोपदेशो यदृच्छयैव प्रमाणमित्यभ्युपगत इति भावः। बालप्रलापवदग्निहोत्रादिवाक्यस्याबुद्धिपूर्वत्वात् प्रलापवत्तो-
30 नियतनिरर्थकत्वापादनमाह—अत इदमापन्नमिति। केनार्थेनेति किं प्रयोजनमुद्दिश्य वाक्यमर्थप्रत्यायनार्थमिति प्रत्युत्तरमभिमतम्। तत्र कारणमाह—व्यवस्थापेतत्वादिति व्यवस्था लोकशास्त्रव्यवस्था तयाऽपेतत्वात् रहितत्वात् वर्णवैदिकविज्ञानवत् दोषवत्पुरुषसम्भवित्वादिति भावः। एवं लोकशास्त्रव्यवस्थैव न्याय्येत्याह—व्यवस्थापेतेति।

एव ते पुरुषस्याविद्यायोगाच्च, यथा दाडिमादिश्लोकवादिवत्। अविद्यायोगं दर्शयति यथाज्ञानादिति। रागादियोगञ्च दर्शयति—यदि द्वेषादेः।

इतर आह—

विफलोऽयं प्रयासस्ते, अनभ्युपगमात्, अथवा को वाऽऽह प्रवचनमेतदिति, इत्यस्य प्रमाणभूतस्याभावात्स्वच्छन्दस्यैव च निर्दोषत्वादिति तन्न, यदि संशयादियोगान्नज्ञः प्रमाणं 5 तर्हीदमज्ञोक्तत्वादुन्मत्तवाक्यवदिति क्रियोपदेशासाफल्यवादः क्व गच्छतीति चिन्त्यताम्।

(विफल इति) विफलोऽयं प्रयासः अनिष्टापादनं तेऽनभ्युपगमात्, को वाऽऽह प्रवचनमेतदिति, ननु प्रागुक्तं संशयविपर्ययानध्यवसायसम्पृक्तत्वान्निर्णयस्याप्यज्ञानत्वमेवेति। अथवा को वाऽऽह प्रवचनमेतदिति, तस्य पुरुषस्य सर्वत्र प्रमाणभूतस्याभावात्, किं तर्हि? स्वच्छन्दस्यैव च निर्दोषत्वादिति। अत्राचार्य आह—यदि संशयादियोगान्नज्ञः प्रमाणं तर्हीदमज्ञोक्तत्वादुन्मत्तवाक्यवदिति 10 क्रियोपदेशासाफल्यवादः क्व गच्छतीति चिन्त्यताम्। एवं—तावद्बुद्धिपूर्वकमकारादिवर्णानुपूर्व्या शब्दोच्चारणं चेतनोदीरितं सकमापित पुरुषभाषितं वा तुल्यम्।

अथाऽऽचक्षीथाः काष्ठशब्दवदस्यैवमचेतनं तथाप्यचेतनत्वात् कुतोऽस्य प्रामाण्यमाक्षिपत् कुतोऽस्य वचनम्? यच्चक्तव्य आह तमः प्रमाणमितीष्टं भवताम्, अज्ञोदीरितत्वादेव च वचनत्वमस्य नास्ति, वाच्यार्थप्रतिपादनाभिसन्धिपूर्वकं हि तत्। काष्ठशब्दवदित्थं न घटते 15 वेदवाक्यप्रामाण्यम्।

(अथेति) (काष्ठशब्दवदिति) काष्ठपाषाणादिसंघट्टजनिताचेतनशब्दवत्, (आकाशवदिति) एवञ्च कृत्वाऽचेतनत्वात् कुतोऽस्य वचनम्। (भवतामिति) भवतां वचनमुक्तिः शब्दोच्चारणं भाषा वचनत्वादभ्यनुज्ञम्, अचेतनत्वात्प्रकृतमस्य नास्तीत्यर्थः। कथं? अज्ञोदीरितत्वादेव च वचनत्वमस्य

यथाज्ञानादिति अत्र मूढ च धम्मिमिदं भवतामानादतो चोद्यम्। अभिहोत्रादिवचने चोदनायाः तत्र प्रयासो व्यर्थ 20 एव बुद्धिपूर्वकं वचनमिदमित्यनभ्युपगमात् प्रमाणभूतपुरुषाभावविरोधाद्वते—विफलोऽयमिति। सर्वमिदमज्ञानप्रतिबद्धं वचनं नास्ति कश्चिज्ज्ञानाद्वाक्योविशेषः सर्वेषां संशयविपर्ययानध्यवसायनिर्णयात्मकत्वेनाविशेषादिति—ननु प्रागुक्तमिति विचारे प्राग्भागे उक्तमिदं। प्रकारान्तरेण व्याचष्टे अभ्युपगमानुरोधात्—अथवेति, अभिहोत्रादिवचनं न वाऽऽह सर्वत्र प्रमाणभूतपुरुषाभावात्, यतो वा दोषाभावात् किन्तु निर्दोषत्वेन निर्दोषत्वात्प्रमाणमेव तत प्रमाणमिति पूर्वपक्षाभिप्रायः। यदि तद्यभिहोत्रादिवचनं न तस्य वचनं तथोक्तं स्यात् तथा चोदनावाक्यवत्प्रामाण्यकत्वात् निष्फला एवोप- 25 देशः भवेत्, अन्यथापि स्वच्छन्दस्याभ्युपगमो भज्येतेत्याह—यदि संशयादीति। वर्णबुद्ध्यादिबुद्धिपूर्वकं चेतनोदीरितं शब्दोच्चारणमविशेषेण काष्ठादिभाषितमस्त्यत् न कश्चित् शब्दोच्चारणयोर्विशेषः कश्चिदित्याह—एवं तावदिति। ननु भाष्यादिवत्प्रपञ्चवत् सर्वमपि शब्दजातमचेतनं न तु चेतनोदीरितमतो चोद्योऽपि इत्याशङ्क्य— अथाचक्षीथा इति। एवं तर्हि वेदवचनस्य तथाविधत्वेऽचेतनत्वादेव प्रामाण्यं शब्दस्य च वचनत्वं न स्यात्, इत्थं भवतां प्रामाण्यं शब्दस्य कुतस्त्य बद्धम् आह तमः प्रमाणमिति तथा शब्दस्य प्रमाण वक्तृत्वयोरुदीरितत्वमितिसूत्रवति—तथापीति 0 वचनत इति वचनमिति कर्मणि क्तिः सति वचनं शब्दस्यैव स्यात् तथा चास्य वचनमिदमज्ञातार्थम्, इदं शब्देनापि शब्दस्य विवक्षितत्वात् अतो भावसाधनत्वमाह भाषणमित्यादिना। शब्दोऽयमनुमर्थं चेतनाभिसन्धिपूर्वकं हि भाषणं भवति तदभावे तु भाषणमेव न स्यात् वैदिकं वाक्यादिवनिबन्धनत्वेन ज्ञातत्वम् वेदवाक्यं न प्रमाणं भवेदित्याह—

नास्ति वाच्यार्थप्रतिपाद्यमानाभिसम्बन्धिपूर्वकं तत् । तदभावे तूक्तमित्याह—काकवत्, इत्यतो वनस्येऽपि न भवेद् वेदवाक्यप्रामाण्यम् ॥

अत्राह—

यदुक्तं प्राक् को वा द्रव्यवचनमेतदिति न ब्रूमः सर्ववक्तृवचनाप्रामाण्यमिति, किन्तर्हि ! सर्वज्ञवीतरागाद्यभावाद्गम्यस्य सर्वभावस्वभावविषयस्य कर्तुरप्रामाण्यं न तु वक्तुरनादिनिधनस्य वक्तृपरम्परागतस्य वचनस्य च, कथिरप्रामाण्यादित्यभोष्यते, मातिवक्तृवचोत्तरचर्यपि धातुकर्मत्राविचवचनानाम्यासतुल्यतेत्यतिप्रसङ्गिन्या कथया ।

(यदुक्तमिति) यदुक्त प्राक् को वाऽद्य वचनमेतदिति द्वितीये विकल्पे न ब्रूमः सर्ववक्तृवचनाप्रामाण्यमिति, स्ववचनविरोधदोषात्, किं तर्हि ! सर्वज्ञवीतरागाद्यभावाद्गम्यस्य सर्वभावस्वभावविषयस्य कर्तुरप्रामाण्यम्, न तु वक्तुरनादिनिधनस्य वक्तृपरम्परागतस्य, वचनस्य च, वक्तृवचसयोः कथिरप्रामाण्यात्, अभोष्यते मातिवक्तृवचोत्तरचर्यपीति, यथाऽऽगमवक्तारोऽप्रमाणमसर्वज्ञत्वादवीतरागत्वात्, शास्त्राणां सर्वभावस्वभावविषयाणां ते यथार्थज्ञानवचनहीनाः, तथा अनादिप्रसिद्धानां शास्त्राणां सम्प्रेतारो यथार्थज्ञानवचनहीनाः, तस्मादुभयेषां प्रामाण्यवक्तृत्वयोर्यथार्थयोरनाश्वासतुल्यता । किमिव ! धातुकर्मप्रातिवक्तृवत्, यथा धातुविषयकातिवादिकर्मणां शास्त्राणि मन्त्रवचनानि च विप्रलम्भभूयिष्ठत्वादनाश्वासानि, आविर्भावणाद्यशीकरणमन्त्रयोगादिवत्, तत आह—मातिवक्तृवचोत्तरचर्यपि धातुकर्मप्राविवचनानाश्वासतुल्यतेत्यतिप्रसङ्गिन्या कथया ।

किञ्च—

अविवक्षितार्थापि नान्तरीयकत्वात् प्रकृतेः प्रयोगो शुद्धवाक्यस्येत्येतदपि न न्याय्या कथिच सार्थकयोरेव स्वार्थाविवक्षा न्याय्या मानर्थकस्यैव, यथा नक्षत्रं दृष्ट्वा वाचो विसृजन्ति, कस्तरेपदसस्य गृहम् ! अदो यत्रासौ काक इति तथा तयोर्नार्थपरत्वेन दृष्टयोस्तदविवक्षया सार्थकत्वं दृष्टम् अयुक्तस्यानर्थकत्वाभावप्रसङ्गात् ।

(अविवक्षितार्थापि इति) यदुक्तमविवक्षितार्थोऽनर्थकापि कर्तृमसपसहायकारिणी शुद्धोक्तिप्रकृतिरुपादेयेत्येतदपि न्यायविरोधादयुक्तम् । कथं ! कथिचेत्यादि, कथिचेति सर्वत्र, यथा नक्षत्रं दृष्ट्वा वाचो विसृजन्तीति, कस्तरेपदसस्य गृह ? अदो यत्रासौ काक इति, नक्षत्रे काकपक्षिणि चोप-

---

वाच्यार्थेति । अथवा को वाऽद्य द्रव्यवचनमेतदिति पूर्वोक्तद्वितीयविकल्पमवलम्ब्य पूर्वपक्ष्याह—यदुक्तं प्रागिति । को वाऽद्य वचनेन यत् वक्तृवचनमात्रस्याप्रामाण्यं न ब्रूमः किन्तु निरस्तनिखिलदोषस्य निखिलपदार्थसाक्षात्कर्तुः पुरुषस्याभावात् निखिलमानवानामपदोषवचनविशेषस्य वैदाग्नस्य न कोऽपि कर्ता विद्यते यदि अविरुद्धस्यन्ते न तु प्रामाण्यमितुच्यते न तु तद्वद् वाक्यमीहरम्पराऽऽगतवक्तृवचनाप्रामाण्यमुच्यत इति पूर्वपक्षाभिप्रायः । वैदसारिकपरि प्रमाणिकमतेन चयाकमयाध्यायोपदचर्यपीति वक्तृवचसाम्प्रमाण्यं दुर्वारमित्याशयेनोत्तरयति—मातिवक्तृवदिति । मातिवक्तृवचनयरि वादिदेवस्य दर्शयति—यथेति । क्वचित् स्वार्थे अविवक्षयैव वाक्यसाम्यमाभिप्रायवत्त्वं न तु वाच्यप्रतिपादकस्य शब्दस्याविशिष्टार्थविशेषस्येनोत्तरयति—कथिचेति यथेति नक्षत्रप्रयुक्त काकपक्षिणि च प्रयुक्तौ दृष्टौ अत एव नक्षत्रं दृष्ट्वा वाचो विसृजन्तीत्यत्र स्वार्थविवक्षया वाक्यविशेषोपक्रमणं सम्भवति एवं अदो देवदत्तस्य गृहं यत्रासौ काक इत्यत्रापि वाक्यान्तरालेऽपवादकम् तथा अभिप्रायेऽन्तराभ्यर्थे अर्थान्तरं शब्दापि दृष्टमिति न अर्थकस्यार्थवदुपादानेन शुद्धोक्तिप्रकृतेः कार्यकारित्वे

युक्तार्थयोरेव दृष्टा नक्षत्रकाकशब्दयोः सार्थकयोः काकगृहोपलक्षणेऽर्थे सत्येव नक्षत्रदर्शनकाकार्थोऽविवक्षा न्यायानपेता—न्याय्या दृष्टा, नानर्थकस्यैवोच्चारणमपेक्षितावेक्षया, तयोरग्निहोत्रहवनयोर्नार्थवत्त्वेन दृष्टयोस्तदविवक्षया च सार्थकस्य दृष्टमतो न्यायापेतमेवयुक्तमविवक्षितार्थाया नान्तरीयकत्वात् प्रकृतेः प्रयोगो जुहुयाच्छब्दस्येति, किं कारणं? प्रयुक्तस्यानर्थकत्वाभावप्रसङ्गात् । यथेष न्यायः शब्दानां प्रयोगे नियतो न स्यात्, नान्तरीयकत्वादपि प्रयोगे साधुत्वमेव स्यात्, ततश्च प्रमादात् प्रमादाच्च प्रयुक्तस्य शब्दस्यानर्थकत्वाभाव एव स्यात्, प्रमत्ताप्रमत्ताविशेषश्च स्यात् स्वैरं भवति, इष्ट शिष्टेष्टविरुद्धत्वात् ।

स्यान्मतम्—

उपलक्षणादिप्रयोजनायां विशेषविवक्षायां किमनयाऽविवक्षाविवक्षयेत्येतदयुक्तम्, विवक्षाविवक्षयोरनियमेन शब्दप्रवृत्तौ सत्यामप्रयोजनायाश्चाविवक्षायामन्याय्यविवक्षाभावे विशेषहेतुर्वाच्यः ।

उपलक्षणादीति, उपलक्षणादिप्रयोजनायां विशेषविवक्षायां किमनया स्वार्थाविवक्षया सर्वस्य शब्दप्रयोगचतुर्विधविवक्षापूर्वकत्वात् प्रवृत्तेरविवक्षाविवक्षयेत्येतदयुक्तम्, विवक्षाविवक्षयोरनियमेन शब्दप्रवृत्तौ सत्यामप्रयोजनायाश्चाविवक्षायामन्याय्यविवक्षाभावे विशेषहेतुर्वाच्यः । अग्निशब्दस्यापि जुहोतिप्रकृत्युपादानवन्नान्तरीयकत्वात् प्रयोगोऽर्थोऽस्याविवक्षित इति प्राप्तम्, ततश्च नक्षत्रोदयं जुहुयादित्येतद्वाक्यं न साधीयः, अग्निहोत्रं जुहुयादित्येतत्साधीय इति केन हेतुना परिच्छेद्यम्?

किञ्चान्यत्—

युक्ततरी तु तदविवक्षा, वक्ष्यमाणन्यायदर्शनात्, अर्थतत्त्वतत्त्वात्तस्याः ।

(युक्ततरीति,) तदविवक्षा—अन्याय्यविवक्षा किं कारणं? वक्ष्यमाणन्यायदर्शनात्, वक्ष्यमाणो हि विधिविधिनियमेऽर्थे न्यायो दृश्यते भवता 'पुरुष एवेदं सर्व'मित्यादि, तद्दर्शनादेवमन्यादिविकल्पासत्त्वान्नाग्निहोत्रं न होतेत्यर्थाभावादेवाविवक्षा न्याय्या, किं कारणं? अर्थतत्त्वतत्त्वात्तस्याः, अर्थस्याश्च विवक्षा भवितुमर्हतीति मन्यत इति ।

थोपलक्षणं तार्थकं सम्भवतीति भावः । नानर्थकस्यैवेति यथैषा अग्निरश्वोऽसिद्धस्य शब्दस्य नियमितार्थत्वं न युज्यते शब्दस्यैतानपेक्षत्वादिति भावः । प्रयुक्तस्येति यदि शब्दस्य प्रयोगमात्रेणैव साधुता स्यात्तर्हि योऽपि शब्दोऽनर्थको न स्यात् प्रयुक्तत्वादेव, तथा चार्थं शब्दः प्रमादप्रयुक्तोऽप्यसाधुत्वाभावात् अयञ्च शब्दोऽप्रमत्तप्रयुक्तः साधुत्वादिति विशेषो न स्यात् अतश्च इष्टविरोधः शब्दानां सार्थकत्वनिरर्थकत्वयोर्दर्शनात् तथैव शिष्टानामभिमतत्वाद्विरोध एवेति भावः । ननु तयोरर्थे विधिविवक्षयैव शब्दप्रयोग न स्यात्तत्र सति प्रयोगे स्वार्थाविवक्षा विवक्षैव शब्दप्रयोगे प्रवृत्तिरिति—उपलक्षणमस्तीति, येनापि प्रयोगेनैव स्वार्थस्याविवक्षा शब्दप्रयोक्त्रा विवक्ष्यते अन्ययाऽपि [illegible] विवक्षा दृश्ये न कृता दृश्ये वा [illegible] विवक्षा न कृता तस्मात् स्वार्थाविवक्षापि प्रयोगनैरपेक्ष्येण समाप्यते—विवक्षाविवक्षयोरिति । नान्तरीयकत्वस्यैव शब्दप्रयोगमित्यत्र दोषमाह—अग्निशब्दस्यापीति । ननु विवक्षाया अन्याय्यत्वात् [illegible] अन्यादेरभावश्च पुरुष एवेदं सर्वमिति वक्ष्यमाणत्वात् पुरुषव्यतिरिक्तार्थाभावाभिप्रायेणाह—युक्ततरीति । न केवलमविवक्षितत्वार्थस्य [illegible] सर्वपक्षेष्वन्याय्यत्वमिति भावः । तदे-

तदुपसंहारः—

एवं तावद्दोषान्तराभिधानमपि, अप्रत्यायकत्वमस्य वाक्यस्य, अप्रत्ययेक्षितार्थयाथात्म्योक्तेर्वाक्प्रलापवदनुपदेशत्वम् ।

एवं तावदित्यादि, एवं—अनन्तरोक्तोपपत्तिविधिना अग्निहोत्रं कुर्यादित्येतस्मिन्नर्थे प्रदर्शित
5 दोषत्वात्, अथवा अग्निहोत्रं कुर्यादग्निहोत्र जुहुयादथवा कुर्यादग्निहोत्र हवन कुर्याज्जुहुयादित्येवमाद्यर्थेषु प्रदर्शितदोषत्वात्, तावच्छब्दः क्रमार्थः । दोषान्तराभिधानमपि—अभिधास्यमान तावद्दोष इत्यप्रत्यायकत्वमस्य वाक्यस्य । कुतः ? अप्रत्ययेक्षितार्थयाथात्म्योक्तेः वाक्प्रलापवत्, यथा तथाभावो याथात्म्यं, अप्रत्ययेक्षितस्याविचारितस्य अर्थस्य याथात्म्यमप्रत्ययेक्षितार्थयाथात्म्यम्, तस्यादप्रत्ययेक्षितार्थयाथात्म्यानुक्तिस्तस्या अप्रत्ययेक्षितार्थयाथात्म्योक्तेः । किं स्वरूपोऽयमर्थः, केन वा रूपेण प्रमाण
10 प्रमेयो येनाप्रत्ययेक्षितस्यार्थस्योक्तेः, शब्दस्यार्थस्य वा प्रत्यायकस्वरूपमप्रत्ययेक्ष्योक्तत्वात्तस्याप्रत्यायकत्वम्, अर्थत्वाच्च शब्दत्वमित्येवो वाऽप्रत्ययेक्षितार्थयाथात्म्योक्तेरेवाप्रत्यायकः प्रधानादिवत् वैधर्म्येण । तस्मादप्रत्ययेक्षितार्थयाथात्म्योक्तेः । यदि शब्दद्वारेण अर्थद्वारेणोभयथाऽप्यप्रत्यायकत्वं सिद्धमतस्तदप्रत्यायकत्वादनुपदेशत्वं वाक्प्रलापवदेव ।

किञ्चान्यत्, अग्निहोत्रं हवनं कुर्यादित्येतस्मिन्नेवान्तरोक्तेऽर्थे दोषान्तरं भूयः—

15 त्वदभिप्रायवदग्निहोत्रं हवनं कुर्यादित्येतस्मिन्नर्थे हवनानुवादेन विशिष्टेऽग्निहोत्रे तस्य कर्मणः परपरिकल्पिताऽऽत्मादिवदलौकिकत्वादप्रसिद्धस्वरूपत्वात् करणासिद्धिः ।

त्वदभिप्रायवदित्यादि, त्वदभिप्रायेण तुल्यं त्वदभिप्राय इव त्वदभिप्रायवत्, यथा त्वदभिमतेऽग्निहोत्रं हवनं कुर्यादित्येतस्मिन्नर्थे हवनानुवादेन विशिष्टेऽग्निहोत्रेऽभ्युपगम्यमानेऽग्निहोत्रस्य कर्मणः स्वविषयस्य लोकस्यापि परपरिकल्पिताऽऽत्मादिवत्तत्त्वस्यालौकिकत्वादप्रसिद्धस्य दुर्ज्ञानत्वादलौकिकत्वात्
20 अप्रसिद्धस्वरूपत्वाद्दुर्ज्ञानत्वमविज्ञातस्य च करणासिद्धिः—सा हवनक्रिया न सिद्ध्यतीत्यर्थः ।

अत्र परेणाशङ्क्येत परिहारः—

अथोच्येत विध्यन्तरविधानशैल्या तत्सिद्धिः, यथा यूपं छिनत्तीत्यादि पूर्वं विधाय पश्चात् पशुमालभतेत्यादीनीति एतदपि न, वैषम्यात्, न हि सच्छेदनक्रियाकाल एव

विध्यन्तरेणैव तथात्वमभिधास्यत्येवं दोषमाह—एवं तावदिति । एतस्मिन्नर्थे इति अग्निहोत्रं कुर्यादिति वाक्यस्य
25 ...ष्येव । अग्निहोत्रं जुहुयात् अग्निहोत्रम् इति वाक्यतोऽन्यवाक्यार्थान्तं वाक्यद्वयेऽर्थविवक्षितार्थभावस्य प्रदर्शितदोषत्वादित्यभिप्रा-येणाह—अथवेति । दोषान्तरेति अप्रत्यायकत्वमस्य वाक्यस्येत्येव तदपोषे अभिधास्यतीति दोषान्तराभिधानमपीति सम्बन्धः । अप्रत्ययेक्षितेति अर्थस्वरूपमविचार्य वाक्यस्योक्तेरप्रत्यायकं तत्, शब्दस्यापि यथा तथा यथार्थोक्तिवे विचार्यार्थे वाक्यं तत् । शब्दार्थयोरपि प्रत्ययानपेक्षयाऽऽसन्निधानाऽभिधानादप्रत्यायकं तदिति भाव । वाक्प्रलापे यथा शब्दार्थोभयद्वारे याथात्म्यानवधारणस्यापि यथाभिधान—वाक्प्रलापवदिति । ननु हवनानुवादेनाग्निहोत्रविधानेऽग्निहोत्रस्व-
30 रूपस्यैव पूर्वमसिद्धेः कथं तस्य विधानं सम्भवति यदि सर्वथाऽप्रसिद्धं विधातुं युज्यत इत्याशयेनाह—त्वदभिप्रायवदिति । कथं क्रियमाणोऽग्निहोत्रकर्मेत्येवोच्यत इति विधानात् पूर्वं विज्ञानाभावात्, परपरिकल्पितात्मादिवत्तत्त्वस्यालौकिकत्वात् अग्निहोत्रकर्म इति भाव । ननु प्रथमविधिवैकल्येन समाम्नाते विधाय तत इतिकर्तव्यता प्रदर्शिता पूर्वोक्ते यूपं छिनत्ति यथा सामान्येन प्रथमं पूर्वं छिनत्तीति पूर्वं विधाय तत् पश्चात्तत्त्वमपि निश्चितमपि वाक्यान्तरेणोक्तमभिधीयमिति कर्तव्यतां प्रदर्श्य पुनस्तत्र व्यवस्थापयेत् तथा प्रकृतेऽपीत्याशयेनाह—अथोच्येतेति । तत्रैवमाशङ्क्य प्रयोगे हि विधेयस्य-

यूपः, किं तर्हि ? संस्कृतः सन् भविष्यति यूपः इत्यस्य स्वरूपस्य तस्य काष्ठस्य तदा यूपत्वं नामतो युक्तम्, न पुनरग्निहोत्रस्य तथैव सतः संस्कारनिरपेक्षस्य ।

अथोच्येत विध्यन्तरविधानशैल्या तत्सिद्धिरिति, अग्निहोत्रं जुहुयादित्येवमादिविधेरन्यो विधिर्विध्यन्तरं यूपं छिनत्तीत्यादि, तस्य विधानं विवक्षितनिरूपणं पूर्वं, पश्चादितिकर्तव्यतानिरूपणं शैली—स्वभावः तया शैल्या दृष्टया विहितत्वात्तस्यापि विधेः सा शैलीमनुमानात् सिद्धिर्भवति, 5 कथं पुनर्विधेः विध्यन्तरविधानशैल्या सिद्धिरिष्टा ? यथा यूपं छिनत्तीत्यादि यावत् पञ्चदशसामिधेनीरिति शैल्यनुमाने दृष्टान्तमाह । यथाऽत्र पूर्वमविवक्षितनिमयावधारणारम्भिका कर्तव्यता चोदिता पश्चादग्न्यर्थं पश्वर्थं वैश्वदेव्यादीतिकर्तव्यताचोदनया स्वरूपं व्यवस्थाप्यते तथेहापि । आचार्य आह— एतदपि न वैधर्म्यात्, दृष्टान्तदार्ष्टान्तिकयोः शैलीवैधर्म्यात्, तद्वैधर्म्यं काष्ठतः प्रसिद्धितोऽवधारणतश्च । तत्र काष्ठस्यावश्यं हि स छेदनक्रियाकाल एव यूपः, भवतीति वाक्यशेषः, छेदनाद्यानर्थक्यप्रसङ्गात् । 10 किं तर्हि ? छेदनादिक्रियाभिः संस्कृतः सन् भविष्यति यूपः, इत्यस्य स्वरूपस्य तस्य काष्ठस्य तदा यूपस्य नामतो युक्तम्, यूपस्वरूपं कालान्तरसामर्थ्यापेक्षितं न पुनरग्निहोत्रस्य तथैव सतः संस्कारनिरपेक्षस्य कालान्तरसामर्थ्यापेक्षणमिति वैधर्म्यम् ।

इतर आह—

ननु यस्सो दृढक इत्यादि यावत् स्थूणेन्द्र सम्यते तादर्थ्यात्, एवं यूपार्थं दारु यूप- 15 सत्कालत्वादथोच्यते, छेदनस्य संस्कारता न सिद्धा स्यात्, यूपस्य निर्वृत्तत्वात् तस्यामसत्यामच्छित्तिरविवक्षितार्थः स्यात् तस्माद्यावदेव यूपं स्वीकरोति तावदेव छिनत्तीत्युक्तं भवति, छिनत्तेः संस्कारार्थरहितत्वात्, अदृष्टार्थो वा ।

ननु यस्सो दृढक इत्यादि, यावत् स्थूणेन्द्र इति, यथाऽत्र तादर्थ्यात्तादर्थ्यमेव यूपार्थं दारु यूप इति तत्कालत्वात्, अत्रोच्यते छेदनस्य संस्कारता न सिद्धा स्यात्, यूपस्य निर्वृत्तत्वात् तन्नि- 20 र्वर्तनार्थो हि छेदनसंस्कारः । तस्यामसत्यां संस्कारतायां छित्तिरविवक्षितार्थः स्यात्—असंस्कारार्थ-

---

तोऽनर्थक एव छिदिः स्यादिसर्थः, तस्माद्यावदेव यूपं स्वीकरोति स्वत्वेन परिग्रहीतुं भवति तावदेव छिनत्तीत्युक्तं भवति, छिनत्तेः संस्कारार्थत्वात्। मा भूदयं दोषो दृष्टविरुद्धत्वादत आह—अदृष्टार्थो वा, स्यादिति वर्तते नैवादृष्टार्थः तस्सम्भवात्। एवं तावत् भावनायाः वैरूप्यात् [illegible] विधिवाक्यस्य तत्सिद्धेः यूपं छिनत्ति पशुसमञ्जसमित्यादिवदिति ।

5 अवधारणवैरूप्येऽपि—

अत इयं या तत्र भावना यूपं छिनत्ति छेदनेन यूपं स्वीकरोतीति तत्र न छेदनमेव यवधार्यते मध्यस्यकरणादीनामसंस्कारत्वप्रसङ्गात्, किन्तु स्वीकरोत्येवेत्यवधार्यते सेह हवन विधिवाक्येन न शक्याऽवधारयितुम्, अवधारणासम्भवाद्धवनेनाग्निहोत्रं करोतीति हवनान्यस्याग्निहोत्रस्याभावात् ।

10 अत इयमित्यादि, अनन्तरोक्ता येयं भावना तयैव भावनयाऽवधारणवैरूप्यमपि मावदिष्यामि अत आह—या तत्र भावना यूपं छिनत्ति छेदनेन यूपं स्वीकरोतीति, छिदेः संस्कारभावे यूपस्वीकरणार्थतया उक्तत्वात्, तत्र च कथमवधार्यं ? उच्यते, न च छेदनमेवावधार्यते, यतः स्वीकरोतीति वर्तते, कथमत्र दोष इति चेत् ? यत एवकारवतोऽन्यत्रावधारणमध्यस्यकरणादीनामसंस्कारत्वप्रसङ्गः, यदत्र प्रसक्तम्। तत्तु नेष्यते किन्तु स्वीकरोत्येवेत्यवधार्यते स्वत्वेनापरिग्रहमतिपेधार्थमेवाऽव

15 धारणपापमा यूपे, सेह हवनविधिवाक्येन न शक्याऽवधारयितुम्। किं कारणमत्रसेति नेहावधारणा सम्भवाद्धवनेनाग्निहोत्रं करोतीति, कथं पुनरसम्भवः ? यथा हवनेनाग्निहोत्रं करोति न मन्त्रादिना, न च करोत्येवेत्यवधार्यते स्वर्गाभिधानाभावे करणाभावादित्यवधारणवैरूप्यम्, हवनेनाग्निहोत्रं करोतीति हवनादन्यस्याग्निहोत्रस्याभावात् ।

अत एव प्रसिद्धिवैरूप्यमपि—

20 तस्याग्निहोत्रस्याप्रसिद्धस्य क्रियाफलादयभिमतार्थनामधेयमात्रत्वात् प्रसिद्धयूपाद्यपेक्षेदृशादिवैरूप्यम् ।

(तस्येति,) मात्रमत्रैव नामधेयत्वसामान्यमेवाद्युमीयेत नार्थविशेषम् इदं तदग्निहोत्रं नामास्तीति, तस्मात् प्रसिद्धाप्रसिद्धिभ्यामपि वैरूप्यमिति ।

छेदनमदृष्टार्थं वा भवेदिति भावः । छिदेरदृष्टार्थत्वे न चैवा यूपसंस्कारानुपपत्तिरत आह—नैवादृष्टार्थ इति । ननु छेदन

25 संस्कारत्वाभावे यूपं छेदनेन स्वीकरोतीति भावना कथं तथा भावनायां न छेदनमेवावधार्यते स्वीकरोतीति वर्तताम्, अत [illegible] करणादीनामसंस्कारत्वप्रसङ्गात् तदेवं [illegible] वर्ण्यम् स्वीकरोत्येवेति स्वत्वेनापरिग्रहप्रतिषेधार्थम्, हवनविधिवाक्ये त्ववधारणमत्रसिद्धं न सम्भवति करोत्येवेति न शक्यतेऽवधारयितुम्, [illegible] नापि हवनम्, हवनादन्यस्याग्निहोत्रस्याभावादित्यवधारणवैरूप्यमित्याह—अत इयमित्यादिना मीमांसकमते तु यूपं छिनत्तीत्यादौ नियमविधेरेव नियमफलभावादवधारणस्याप्यत्र एव नास्ति । हवनेनाग्निहोत्रं करोतीत्यपि नाग्निहोत्रं [illegible] भावस्वरूपं हि । अत

30 एवेति [illegible] अग्निहोत्रस्य [illegible] । अग्निहोत्रमप्रसिद्धं क्रियाविशेषस्य [illegible] नामत्वात् क्रियाफलादीनां [illegible] प्रसिद्धमिति प्रसिद्धाप्रसिद्धिभ्यां वैरूप्यमिति—तस्येति । [illegible] हि यूपस्य तु [illegible] अग्निहोत्रस्य तु केवलं क्रियाफलत्वेति भावः । [illegible]

अतस्तदर्थत्रयमुपसंहृत्य हेतुत्रयनिगमनार्थमाह—

शैलीप्रामाण्ये चास्य शैल्या यूपक्रियाऽयाथार्थ्यात् तत्सिद्धिरयुक्तैव ।

(शैलीप्रामाण्य इति) शैलीप्रामाण्यमभ्युपगम्यमानस्याग्निहोत्रस्य यूपक्रियाया तत्कर्मविधि-नैवायाथार्थ्यात्, यथार्थस्य भावो याथार्थ्यं न याथार्थ्यमयाथार्थ्यं तस्मादयाथार्थ्यात् यूपक्रियाया अग्नि-होत्रक्रियायाः शैलीसाम्यं नास्ति, अतो न युक्त विध्यन्तरविधानशैल्या तत्सिद्धिर्यूपक्रियायास्तदिति । अथवा शैलीप्रामाण्य—शैल्यनुमान तस्मिन् शैलीप्रामाण्येऽभ्युपगम्यमाने चाग्निहोत्रस्य शैल्या यूपक्रि-याया अयाथार्थ्यात् कथङ्कारं विधिविध्यन्तरशैल्योस्तुल्यार्थताऽप्रसिद्धेरलौकिकत्वादनुमानानुपपत्तेः, लोके हि दृष्टमनुमीयते न तु यूपकरणमष्टाश्रादिरूपमग्निहोत्रकर्मधर्मिस्वरूपं पृथग्भूतं प्रसिद्धमस्ति यत-स्तच्छैल्याऽग्निहोत्रशैल्यनुमीयेत तस्माच्छैलीप्रामाण्ये चास्य शैल्या यूपक्रियाया अयाथार्थ्यात् तत्सि-द्धिरयुक्तैव । हवनाग्निहोत्रयोर्भेदेऽपि हवनानुवादविधिसिद्ध्यग्निहोत्रविधित्वे चोक्तन्यायेन दृष्टान्तवैधर्म्यान्न शैल्यनुमानमिति ।

आह—

ननु सेवादिवत् क्रियामात्रत्वादितिकर्तव्यताभ्यः प्रतिपत्तिरस्तु, भजनार्थसेवायाः ज्ञातत्वे तासां सेवार्थत्वात् अज्ञातत्वे तदर्थाप्रतिपादनात्, न त्वेवमग्निहोत्राद्यवयवक्रियाः ज्ञाताः अथास्यैतदेवमितरथा प्रतिक्रियं पृथक्त्वापत्तेः ।

(नन्विति) यद्यप्यग्निहोत्रक्रियामात्रत्वे यूपच्छेदादिशैलीवैधर्म्यं तथापि सेवादिक्रियावदेव भविष्यति यथाहि सेवेत्युपस्थानाञ्जलिकरणादिव्यापारानुवृत्तिसमर्थाविशेषेण मनोवाक्कायपरिस्पन्देश्वरसेवैव स्वामिचित्तानुरोधकथया, एवमग्निहोत्राख्या एका क्रिया न सा स्वावयवव्यापारव्य-तिरिक्ता काचिदस्ति, तस्मात्ता एव पयःप्रक्षेपणादिक्रिया अग्निहोत्रमित्यभेदेनोच्यन्ते, चादिग्रह-णात् कृषिवाणिज्यादिक्रियामात्रत्वम्, ताभ्य एवेतिकर्तव्यताभ्यः प्रतिपत्तिरत्रेहापि । अतोच्यते तत्र भजनार्थसेवाया ज्ञातत्वे तासां सेवार्थत्वात्, अत्रापि दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यादिसमभिसम्बन्धः । तदर्थयति—भजन भक्तिः सेवार्थः सेवाया इति भजनार्थसेवा तस्याः सेवायाः ज्ञातत्वे तासां तदवयवा-भिमतानामुपस्थानाञ्जलिकरणादीनां सेवार्थत्वात्, अज्ञातत्वे तदर्थाप्रतिपादनात् । ज्ञाता एव हि ताः

---

१ ब्रूयात्—शैलीप्रामाण्ये चेति अग्निहोत्रशैलीप्रामाण्ये चेत्यर्थः यूपक्रियाऽयाथार्थ्यात्—यूपक्रियाया अग्निहोत्रापेक्षया तात्त्विकाभावादित्यर्थः । अथाग्निहोत्रयूपक्रिययोः शैल्योः प्रमाणवस्तुत्वा सम्प्रति शैलीहेतुनाऽग्निहोत्रापेक्षया यूपक्रियाशैल्या-नुमानं न सम्भवतीत्याह—अथ चेति । अप्रसिद्धत्वादनुमानं न सम्भवतीत्याह—तस्मिन्नेति । हवनाग्निहोत्रयो-र्भेदेऽपि शैल्यनुमानसम्भवमाह—हवनाग्निहोत्रयोरिति । ननु यथोपस्थानाञ्जलिकरणादिक्रियाव्यतिरिक्ता [illegible] न्यते तथा पयःप्रक्षेपणादिक्रियाव्यतिरिक्ता [illegible] नाग्निहोत्रमुच्यते तथाभवतु इतिकर्तव्यताभिः प्रतिपत्तिः इति चेत्-तत्क्रियावदेवाग्निहोत्रमित्येतदाह—यथादीति । यदेव सेवा भजनार्था भवितुमर्हति याज्ञिका तथा तदवयवक्रिया अपि अग्निहोत्रं तदवयवक्रिया वा ज्ञाता इत्येव चेत्तदेवमभिप्रायः—अतोऽध्याह इति । इत्यत्रायमेवम्, मीमांसकैरभिमतं [illegible] निर्णयोऽस्य, निर्णयं नावगतो अज्ञातो वा पयःप्रक्षेपणादयवक्रियावत् तदवयवत्वेनाज्ञातत्वे [illegible] प्रतिपत्तिः अग्निहोत्रस्य अवयवरूपक्रियाणां नित्यक्रियादिरूपत्वं न प्रसिद्धम्, अवयवार्थत्वमग्निहोत्रस्य अर्थे वाक्यान्तरेण ज्ञा-तत्वमुच्यते इति । तासां सेवार्थत्वादिति इदं चेति सेवार्थत्वं [illegible] उपस्थानाञ्जलिकरणादीनां तदवयवानां तदर्थत्वं

सेवेति प्रतिपत्तिं मन्यन्ते नान्यथा, न त्वेवमग्निहोत्रावयवक्रियाः प्राप्ताः तस्माद्वैषम्यम्, अवश्यं चैतदेवं, इतरथा प्रतिक्रियं पृथक्त्वापत्तेः, यथा कृषिसेवयोः परस्परं तदङ्गक्रियाणाञ्च पृथक्त्वम्, तदङ्गत्वेना-प्राप्तत्वात्, एवमग्निहोत्रस्य तदङ्गक्रियाणां स्यात्—न तु भवति तदङ्गत्वेनाप्राप्तत्वादग्निहोमादीनामिति ।

आह—

5 नात्रापि हवनादीनां दानार्थत्वाद्वैषम्यम्, उत्तरक्रियामात्रत्वाच्चैतदपि न, लोकविदित दानार्थानुपपत्तेरितिकर्तव्यतामात्रार्थतापत्तेः, न चैतदिष्टं दृष्टं वा, अग्निसम्प्रदानत्वविरोधात् ।

(नात्रापीति) नात्रापि दानार्थत्वाद्वैषम्यम् किं कारणं? अत्रापि हवनादीनामिति दाना-र्थत्वाद्धवनादीनां नाप्राप्तत्वमतोऽग्निहोत्रस्यापि प्राप्तदानाङ्गक्रियात्वात् साम्यमेव सेवादिभिः । स्यादेतत्—उत्तरक्रियामात्रत्वात्, यथा सेवाया उत्तरक्रियामात्रत्वमुपस्थानादीनामेवमग्निहोत्रस्याग्नि-

10 मादीतिकर्तव्यतानामित्येतदपि न, लोकविदितदानार्थानुपपत्तेरितिकर्तव्यतामात्रार्थतापत्तेः, एवमपि लोक-विदितैर्दानार्थैरनुपपन्नाया इतिकर्तव्यताया योऽर्थस्तन्मात्रार्थत्वमापद्यतेऽग्निहोत्रस्य, लोके ह्यनुग्रहार्थं स्वस्य विसर्गो दानम्, यद्धस्य प्रीत्या दानमग्नित्वस्सम्प्रदानम्, तस्मै दानं यत्र स्वपरानुग्रहो विषये तादृशे त्यागो दानं न तु यत्र केवल मूत्रपुरीषादिविसर्गवद्द्रव्यविसर्गो भस्मनि वा सर्पिःप्रक्षेपवत्, तस्मात् स्वपरोपकाराभावे सर्पिरादिविसर्जनं सर्वं स्यात् चैतदिष्टं दृष्टं वा, किं कारणम्? अग्निसम्प्र-

15 दानत्वविरोधात्, तस्याग्नेर्हवनात्मकस्य सर्वद्रव्याणां विनाशकस्य सम्प्रदानत्वविरोधात् छिद्रपात्रे स्नानपानवत्, मुषितस्य वा चौरायप्रदानवत् ।

यदि चाग्नय इति सम्प्रदानविशेषो लौकिक एव, ननु लौकिक एव प्रक्रमाण इत्याद्युक्त-दर्शनपदनर्थकः । नैवं सा सदानत्वात् प्रदानात्मकत्वात् यथा चाऽऽरभणादिक्रियाया-

---

पुष्यत इति भावः । अवश्यमैतदेवमिति आगमेन तत्समवाये इत्युक्तमित्यर्थः जीवार्थमिति भावः ।

20 इतरथेति अवयवक्रियाणाम्पृथक्त्वे यथा कृषिसेवयोरन्योऽन्यमप्राप्तत्वं यथा च तदङ्गक्रियाणामपि भेदः सेवाग्निहोत्रस्य तदङ्गक्रियाणाञ्च भेदः स्यादिति तस्मात् सेवादेर्वैषम्यम्, तदङ्गत्वेन क्रियाणामप्राप्तत्वादिति भावः । मीमांसका अग्निहोत्रे हवनात् सर्वस्य इत्यत्र विनियोगविधित्वं वाञ्छन्ति । विनियोगे यथा प्राप्तिभावः स्वप्रयत्नापेक्षत्वे विधिविनियोगविधिरिति व्यवहारः एतत् सिद्धं सहकारिभूतानि षड् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभेदात्, एतत्सहकारेण विनियोगत्वं पदार्थानामभेदस्य परस्परपर्यालोचनावगम्यं शाब्दत्वं इत्यादि । ननु हवनार्थो दानं दान-

25 वशेन युक्ताधुना विधीयते, दानस्य लोके प्रागेव च स्वयम् तदङ्गविधानादग्निहोत्रस्य वैषम्यमित्याशङ्कते-नात्रापीति । तस्मै हेतुमाह-उत्तरक्रियेति उपस्थानादीव यथा सेवा उत्तरक्रियामात्रं तथाऽग्निहोत्रमपि अग्निहोमादीनामुत्तरक्रियामात्रमिति दुःस्थितम् । अत्र सेवादिवृत्तान्तेऽग्निहोत्रस्य लोकप्रसिद्धदानार्थक्रियात्वेन तत्स्थानीयत्व-दर्शनमित्युपपत्ति-लोकविदितेति । एवं लोके दानं प्रसिद्धमित्याह-लोके हीति, स्वपरानुग्रहाय द्रव्यादेस्त्यागो दान-मित्यर्थः । योऽपि त्यागो न तत्र कुत्रापि निष्फलत्वे स्यात् इत्याह-यद्धस्येति दानात्तदव्यानन्तरमेव दर्शितम्, नैवं

30 चतुर्थीनिमित्त सम्प्रदान सम्यक् प्रीणयेऽस्मै तत्सम्प्रदानमिति व्युत्पत्तिसिद्धत्वेन सम्प्रदानत्वात्, दानक्रियाकर्मणा कर्मणा यमभिप्रैति स सम्प्रदानं सम्यगुपेक्षते वा तथाविधकारकस्यैव सम्प्रदानत्वात् तथाचोक्तम् अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम् । प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम्' इति । महाभाष्यकृताऽप्यर्थतया अविवक्षितत्वात् अत एव सम्प्र-दानत्वात् किन्तु अयोग्यं दानमिति भावः । ननु हवनक्रियाकर्मत्वेन हविरादिकं होता सम्प्रदानेन सम्बन्धयति इत्यर्थः सम्प्रदानत्वमत्रैव लक्ष्यते-यदि चेति । एवं तर्हि पूर्वमेव लौकिक एव प्रक्रमाणेऽर्थे निष्प्रयोजनं लोकप्रमाणत्वात् ।

मन्योऽन्यदानभोजनादिक्रिया । प्रधानाविवादसाधुता वा, प्रसिद्धिविपरीततत्त्वस्थितार्थं स्यात्, वेदवादासाधुता वा तेषां स्यात् ।

(यदि चेति) अभय इति सम्प्रदायविशेषो लोकप्रसिद्धत्वाल्लौकिक एव, ननु लौकिक एव गृह्यमाणेऽर्थे इदमेवं नैव चेति विचारोऽर्थवान् न भवेत्, यदि भवेत्तथापि ते यस्तुल्यत्वं गमनाल्लोमवान् हरिणवन्मण्डूकः, तत एव वा निर्लोमा हरिणो मण्डूकवत्स्यादिति प्रसिद्धिविपरीतं सिद्धं लोकप्रमाणा- 5
नपकरणत इति तत्सत्यमित्याशङ्क्याह—ननु लौकिक एव गृह्यमाण इत्याद्युपदर्शनपरमिति । नैव तेऽस्ति, अत्राप्यभिप्रायानसाधनम्, नैवं सा तथाभूतार्थो हवनक्रिया, तदात्मत्वात्, तदात्मत्वमस्याः परमार्थे भावानात्मकाऽऽपादनात्, तत सिद्धम्, यथा वाक्यभक्ष्यादिक्रियायां स्यादृत्विगादिक्रियायामन्योऽ-
न्यदानभोजनादिक्रियास्वभावाः एवमिदमपि दानमग्नौ प्रक्षेप इति, इदमप्यभिप्रायेण प्रधानाविवादसा-
धुता च प्रसिद्धिविपरीतेत्यादि, प्रसिद्धेर्विपरीते तत्त्वे तद्भावलक्षणे प्रसिद्धिविपरीते तत्त्वे स्थितोऽर्थोऽस्य 10
वादस्य तद्भावात् प्रसिद्धिविपरीततत्त्वस्थितार्थत्वात्, वेदवादवत् साधुता स्यात् प्रधानसंसर्गलक्षण-
महाभ्यासकाविवादानां प्रधानाविवादानां वाऽसाधुताऽभ्युपगमवदुक्तदोषो वेदवादासाधुता वा स्यादिति
त्युभयथाऽप्यनिष्टापादनम् ।

अथाऽग्निहोत्रमित्यस्यापूर्वविशेषाभिधानार्थतैव कल्प्यते तथा सत्यपूर्वाभिधाने कोऽर्थः
कृतः स्यात् ? 15

अथाग्निहोत्रमित्यादि, अथेत्यधिकारान्तरे, अथ तेषु विकल्पेष्वग्निहोत्रशब्दस्य क्रियाभि-
धित्वे सर्वथा दोषोत्पादनभीतेन परेणाग्निहोत्रमित्यस्यापूर्वविशेषाभिधानार्थतैव कल्प्यते न पूर्वोऽपूर्वोऽ-
दृष्टो धर्मविशेषः, तदभिधानसमर्थः प्रयोजनं व्यापारस्तद्यथोऽपूर्वविशेषाभिधानार्थतैव कल्प्यते । विधे-
यत्वम् परस्परविशिष्टाभिर्धर्मसंज्ञानाविभिरग्निहोत्रादिभिरिष्टिभिरभिव्यक्तोऽपूर्वोऽपि विशेष्यते, द्रव्य-
भवदेवतादिविशिष्टाभिर्वा भूतसंज्ञायाः क्रियाया एव धर्मत्वमिति । यथा जैमिनिमीमांसकैरेव 20

लोकप्रमाणे वा प्रसिद्धिविपरीतविधिरित्युपदर्शयति—ननु लौकिक एवेति । अत्रापीति लौकिकत्वपक्षेऽप्यनिष्टापादन इति तत्प्रदर्शनार्थेति भावः । तामेव दर्शयति—नैवमिति सा हवनक्रिया न लोकप्रसिद्धरूपाभिधाना तदात्मत्वात्, यथा वाक्यभक्षणक्रियायामन्योऽन्यदानभोजनादिक्रिया इति प्रयोगः यथा वाक्यैः क्रीडायां क्रीडाक्रियायामन्ये क्रीडका एव परस्पर-
मन्यादिदानभोजनादिक्रिया वाक्यविशेषदानभोजनादिक्रियास्वरूपेण भावनया अपि न प्रसिद्धदानभोजनादिस्वरूपेण
हवनक्रियापीति भावः । तदात्मत्वमपि परमार्थतोऽभावात्मकत्वापादनात्, सिद्धमित्याह—तदात्मत्वमस्या इति । 25
लौकिकत्वेऽपरमप्यनिष्टापादनमाह—इदमित्यादि । प्रधानाविवादः साधुः प्रसिद्धिविपरीततत्त्वस्थितार्थत्वात् वेदवादवत् ।
अथ च वेदवादोऽसाधुः प्रसिद्धिविपरीततत्त्वस्थितार्थत्वात् प्रधानाविवादवदित्युभयथाप्यनिष्टप्रसङ्ग एव लोकप्रसिद्धिरूपार्थ-
स्वीकारेऽपीति भावः । सांख्यमतापेक्षया प्रधानेति वैशेषिकापेक्षया संसर्गेति बौद्धापेक्षया महाभूतेति । अथा-
ग्निहोत्रादिशब्दानां क्रियाभिधित्वे दोषमभिधायापूर्वविशेषाभिधायकत्वे दोषप्रदर्शनाय विकारान्तरमवतारयति—अथेति ।
नैयायिकादिभिर्विहितयागादिभिरन्यः सामर्थ्यापूर्वविशेष एव धर्मः परैरभिधीयते कर्त्रन्तरव्यापारानपेक्ष इति तत्साधनतामात्रेण यागः 30
होमादिरेव धर्मो न त्वपूर्वमिति मीमांसकाः यागादिरपूर्वमेव धार्मिकाणामपेक्ष्यत्वात्तया चाग्निहोत्रादिशब्दस्यापूर्वविशेषस्य कथं
कर्मसामिधानमेव प्रयोजनं तदभिधाने वा तत्र व्यापारः कल्प्यत इति पूर्वपक्षाभिप्रायः । विशेषयन्ति इति अपूर्व-
विशेषेषु विशेषणस्य स्वार्थं । क्रियाविशेषाः द्रव्यमन्त्रदेवतादिविशिष्टाभिरग्निहोत्रादिभिरिष्टिभिरभिव्यक्तोऽपूर्व एव धर्मशब्द-
वाच्यो भवेत्, किन्तु प्रधानभूतयागादिक्रियैव धर्मो मा भूदपूर्वं तद्वितु विशेषण इति भावः । यथा जैमिनिरिति

व्याख्यायते 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' (ऋ. १०, ९०, १६) इति, किं
कारणम्? तस्मिन्नर्थे प्रत्यक्षत एवानित्याः क्रियाया अनन्तरं फलसम्बन्धासम्भवात् क्रियावैकल्य-
दोषप्रसङ्गादग्निहोत्रमिति धर्मः क्रियाभिव्यङ्ग्यः इत्युच्यते, कार्यकारणोपचारादग्निहोत्राभिव्यङ्ग्योऽग्नि-
होत्रमिति ततोऽग्निहोत्रं धर्मं जुहुयाद्भावयेत् स्वर्गकाम इत्येष वाक्यार्थो निर्दोष इत्येतमर्थं स्वीकर्तु-
5 मिच्छुं विधिविविनयः पृच्छति—यथा सत्यपूर्वाभिधाने कोऽर्थः कृतः स्यात्? अर्थद्वयस्य प्रयोजनाभि-
धेययोरुक्तत्वात् कोऽर्थः साधितः? किं प्रयोजनम्? कथं स्यात्? कोऽभिप्रायः समर्थितः स्यात्।

विधिनयो ब्रवीति—

यः स्वर्गकामः स हवनेनेतिकर्तव्यताविशेषेण स्वर्गं भावयेदिति कृतं स्यात्, न, विधा-
पर्यायतत्त्वज्ञानोत्पादनार्थत्वाद्विधाभिराकरणार्थत्वाच्च शब्दप्रयोगः, तेन किमूनीकृतं? यत्र
10 देवोक्तं भवति यः स्वर्गं कामयते स जुहुयादिति तावदुक्तं भवत्यपूर्वं जुहुयात्स्वर्गकाम इति,
ततो भावनस्य गतार्थत्वाभावः कश्चिदग्निहोत्रमित्यनेन। प्रसिद्धिविरुद्धा चेयं कल्पना तस्य
तद्धर्माभावात्।

(य इति) यः स्वर्गकामः स हवनेनेतिकर्तव्यताविशेषेण स्वर्गं भावयेदित्ययमर्थः कृतः—
साधितः स्यादित्यर्थः। विधिविविनय आह—विधापर्यायतत्त्वज्ञानोत्पादनार्थत्वाद्विधाभिराकरणार्थ-
15 त्वाच्च शब्दप्रयोगः, तेन किमूनीकृतमपूर्वविधाया इति न किञ्चिदूनीकृतमित्यभिप्रायः, तत्समर्थयति
यावदेवेत्यादि, यावदुक्तं भवति यः स्वर्गं कामयते स जुहुयादिति तावदुक्तं भवत्यपूर्वं जुहुयात्स्वर्गकाम
इति भावपूर्वोऽर्थोऽपि कोऽग्निहोत्रमित्यनेन लभ्यते हवनेनैव तस्याभिव्यञ्जकत्वात्, जुहुयात् स्वर्गकाम इत्ये-
तावतैव गतार्थत्वात्, जुहुयात्—धर्मं भावयेत् स्वर्गकाम इत्येतस्मिन् वाक्यार्थेऽभ्युपगते कोऽग्निहोत्रमित्यनेन

जैमिनिमीमांसका आहुः य एव श्रेयस्करः स एव धर्मशब्देनोच्यते यो हि यागमनुतिष्ठति तं धार्मिकमिति समाचक्षते यश्च
20 यस्य कर्ता स तेन व्यपदिश्यते यथा पाचको लावक इति तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते न केवलं
लोके, वेदेऽपि 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इति यजतिशब्दवाच्यमेव धर्मं समामनन्तीति भाष्य।
किमर्थं यज्ञादिरेव धर्मो न भवतीत्याह—तस्मिन्नर्थ इति ननु न तावत्प्रत्यक्षेण यागस्य धर्मत्वं क्रियायाः क्षणिक-
त्वेन कालान्तरभाविफलसाधनत्वासम्भवात् विकल्पितत्वात्। किन्तु यागादिक्रियाभिव्यङ्ग्यो व्यापारविशेषो धर्मः, धर्मो
ऽग्निहोत्रादिशब्दवाच्यस्याग्निहोत्रादिक्रियाभिव्यङ्ग्यो धर्मविशेषोऽपि अग्निहोत्रादिशब्देनोच्यत इति न कश्चिद्विरोधः
25 इति भावः। मीमांसकास्तु यागादिक्रियाया एव धर्मत्वमाहुः न तदनन्तरभाव्यपूर्वस्य तत्पूर्वकत्व तदुपलब्धेः,
[illegible]
[illegible]
[illegible]
ति यत्रापि जन एव चोदनालक्षणोऽर्थो धर्म इत्युक्तम्। ननु शब्दप्रयोगस्तत्त्वज्ञानार्थमविद्याविच्छेदार्थश्च क्रियते तथा
30 यत्रैव शब्दप्रयोगस्तत्रविधेय [illegible] — विधा
पर्यायेति। तदुक्तम् [illegible] — यावदुक्तं भवतीति।
[illegible]
[illegible] इति। अत्र
[illegible]

होत्रशब्देन कार्यः ? इति । अत्र आह—यतो भावनस्य गवार्थत्वात्, भवन्त धर्मं भावयतो हेतुकर्म साधनसाध्यस्य पारम्पर्यस्य भावनस्य जुहुयाच्छब्दप्रयोगादेव गवार्थस्याभावः कश्चिदग्निहोत्रमित्यनेन, एवं यावदग्निहोत्रशब्दस्य प्रयोगो निरर्थकः । प्रसिद्धिविरुद्धा चेयं कल्पना लोके वेदे वा, तस्य तदर्थाभावात् ।

अभ्युपेत्याप्यपूर्वविशेषाभिधानमप्रत्यक्षत्वान्निरूपणं हवनेन नोपपद्यत इति ब्रूमः—

निरूपणवैधर्म्यात्, न च स प्रत्यक्षोऽपूर्वो यतस्तेन निरूपणमारभ्येत ।　5

(निरूपणवैधर्म्यादिति) इह हि मृदादिवस्तु मृदानयनमर्दनादिक्रियया निरूपणार्थं प्रत्यक्ष एव घटलक्षणेऽर्थे उपलभ्यते अनया क्रियया घटो निर्वर्त्यते, अस्यास्तत्क्रियाया इदं कारणमिति, दृष्ट-कारणकार्यसम्बन्धत्वात्, न त्वात्मदृष्टपूर्वस्य, साधर्म्यदृष्टान्ताभावेऽनुमानाभावाच्च आह—न च स प्रत्यक्षोऽपूर्वो यतस्तेन निरूपणमारभ्येत—इदमस्य कार्यं सः इदमस्य कारणमिति निरूपणं व्याख्येयर्थः, सा कथं व्याख्येति चेदुच्यते येन हवनेन दृष्टापूर्वनिर्वर्तनशक्तिना निर्वर्त्योऽग्निहोत्राख्योऽपूर्वो　10 निर्वर्त्यते तत्प्रत्यानुष्ठातव्यं हवनम्, यथा मृदानयनक्रियाघटनिर्वर्तनार्थमिति, तच्च न युज्यते, अत्यन्त मदृष्टकारणकार्यसम्बन्धत्वादनयोः सम्भावनयैवमपि कृत्वा कल्पनासिद्धयोक्तमपि न सम्भवतीति ।

येऽभिहिता दोषास्तत्परिहारसमारम्भं परेण प्रसिद्धिमात्रप्रतिपादनार्थम्—

अथोच्येत अस्यास्तावत्प्राप्तेः वाक्यान्तरप्रापिता प्रसिद्धिर्भविष्यत्यग्नये होत्रमग्निहोत्र मिति, वाक्यान्तरानुबन्धाच्चेतिकर्तव्यताप्रसिद्धेः ।　15

(अथेति) अथोच्येत—अस्यास्तावत् प्राप्तेः प्रसिद्धिर्भविष्यतीति, ततो दोषपरिहारो भविष्य तीति, प्राप्तिरिति 'स्त्रियां क्तिन्' (पा ३।३।९४) इत्यत्राऽऽप्तादीनाञ्चेति वक्तव्यम्, 'गुरोश्च हलः' (पा ३।३।१०३) इत्यप्रत्ययेनापवादेन मा भूदापेति । प्रापणात् प्राप्तेः वाक्यान्तरप्रापिता प्रसिद्धिर्भ विष्यति अग्नये होत्रमिति चतुर्थीसमासः योगविभागादर्थपाठादुपसर्जनस्यानाद्या रूपसिद्धिः । तदर्थं प्रसिद्धिश्च ततः करणं तत्फलसम्बन्धश्च कर्तुरिति सर्वमुपपन्नम्, कथमस्याप्राप्त्यात् प्रापिता प्रसिद्धि-　20 रिति चेत् ? वक्ष्यमाणे वाक्यान्तरे 'यदग्नये च प्रजापतये च सायं जुहोति घृतेन पयसा दध्ना जुहु यादिति' तदनुबन्धाच्चेतिकर्तव्यतैव कर्तव्यता तस्याः प्राप्तेः, वाक्यान्तरप्रापितया अनुबन्धात्— सम्बन्धात्तदुपरागात्तादुपरतः सर्वा इतिकर्तव्यता एव कर्तव्यतात्वात्तो चेतिकर्तव्यतानां प्रसिद्धि- रग्निहोत्रस्य प्रसिद्धितत्समर्थनोति ।

[illegible]　25 … 30

अत्रोच्यते—

न तर्हि पुनर्जुहुयादिति वाच्यं स्यात्, अग्निहोत्रवाक्येनैवाग्निप्राप्त्यापत्त्यादिसम्प्रदानजुहोतीत्यादीतिकर्तव्यतायुक्तार्थत्वात् पुनरपि स एव दोषप्रपञ्च उपस्थितः ।

(नेति) पुनरपि प्रागभिहितो यो 'न हि कश्चिज्जुहोतिपुनर्वचनेने'त्यादि ग्रन्थार्थः स एव
5 दोषप्रपञ्चोऽस्मिन्नपि व्याख्यानेऽप्युपस्थितः ।

अपि चैवमप्यपि पुरुषप्रमाणकत्वाद्यापत्तिः, उत्तरोत्तरविरोधपरिहारविचारप्राप्यार्थपरिग्रहात्तर्क आश्रितो भवति सामान्याद्यर्थैकान्तवदेव, स च दोषत्रयादप्रतिपूर्णः पौनरुक्त्यादेरसत्कार्याभ्युपगमात् पुनस्तत्त्यागाच्च ।

अपि चैवमित्यादि, किमन्यत्रापि पुरुषप्रमाणकत्वापत्तिः ? किं कारणं ? उत्तरोत्तरविरो-
10 धपरिहारविचारप्राप्यार्थपरिग्रहात्, अग्निहोत्रहवनयोः पौनरुक्त्यादिदोषाद्विरोध इत्युक्तेऽनुवादविधि-
त्वात्तत्र परिहारः पुनरप्रसिद्धत्वाद्विरोध इत्युक्ते कुर्वीतार्थे जुहुयाच्छब्द इत्येवमादिविचारः प्राप्योऽर्थ-
स्तथा परिगृहीतोऽतः स्वबुद्धिप्रामाण्यावलम्बनात् पुरुषप्रमाणकस्तर्क आश्रितो भवति, तर्कश्चायम्
'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः' (गौ० अ–१आ–१–सू. ४०) इति ।
किमिव ? सामान्याद्यर्थैकान्तवदेव यथा सामान्यमेव विशेषा एव सामान्यविशेषभेदैकान्तार्थपरि-
15 ग्रहः प्रागुक्तविधिना पूर्वोत्तरविरोधपरिहारप्राप्योऽर्थोऽध्यवसायमात्रविश्रान्तः पुरुषप्रमाणत्वापादनमपि

प्राप्तिरितीति प्रेक्षापूर्वकारी न्याय्यमिति भावे किमर्थं विधिवत्त्वापादनमुखेन ग्रहणं इत इति दोषप्रसङ्गो न प्राप्तिरिति किमर्थं
विधिरिति इत्थं नास्तीत्यादिति तत्समवायमिति भाव्ये तत्सम्बन्धः विच्छेदने प्राप्तिरपीति भावः । अशने होममिति चतुर्थी
तदर्थ्ये वक्तिद्रितगुणवदर्थिके इति सूत्रस्य चतुर्थी तदर्थानुवादितद्गुणवदर्थिकेति शेषभावं इत्य प्रथमयोगेन चतुर्थ्यन्तं समर्थेन
समस्तं इत्यर्थेऽयमने होमविकृतं स्यादिति बोध्यः । यद्वा योगविभागे न कर्तव्यः तर्हि अशने कथं समास इति चेत् पचतु-
20 र्थ्यन्तानामित्युक्तत्वात् समासः नाप्यन्यतरेऽपवादतोऽथ न चतुर्थीसमासः किन्तु षष्ठीतत्पुरुष एव । अत एव मीमांसकाः तत्र
देवो होमश्च भावे ल्युडपनाशेऽनमिति षष्ठीसमासमुक्तवान् अत्रैव सारस्वतं तत्पुरुषे चतुर्थीतत्पुरुषे तु कर्तृरूपे इत्य
चतुर्थ्यन्तविरहः चतुर्थ्यन्ततः तस्य च तदर्थत्वविशेषविचारार्थत्वाच्चतुर्थ्यन्तत्वमपि तथा समस्त इति तेन समासः कार्यः स चानन्य-
गतिकत्वादेव सारस्वतानुक्तवेति तं समासं कृतवान् पावकभावे तु यस्मिन्नशने होमं होमनमप्रिहोत्रमिति व्यधिकरण-
चतुर्थ्युभयाभिधायिन समासान्तरादसम्भवात् षष्ठीतत्पुरुषे तु देवितव्यासाधिकरण्यानुपपत्तेरेवेति । तदर्थप्रसिद्धिरिति ।
25 अग्निहोत्रशब्दार्थप्रसिद्धिरिति पक्षे च वाक्यान्तरात् । वाक्यान्तरेण च वक्तव्य कर्तुं प्रयोजनक्षम वक्ष्यते चेत्येव
वाक्यान्तरेणाभिधानतदप्रयत्नस्य इत्यनया होमेनैव च वरणस्य प्रसिद्धिः तथा च वाक्यान्तरैरिति तेषाम्
प्राप्तुपक्षिप्त सत्यं तत्तदर्थोऽयमने समास एव वाक्यवाक्यमिदोत्ताभिरेवेति तदर्थप्रसिद्धिरिति भावः । अनुमत्यैव स्वतन्त्रवि-
धायकवाक्यान्तरप्रापितार्था इति । एवं तर्हि वाक्यान्तरप्रापितेषितत्प्रमुखमितरेषामिसम्प्रदानकत्वाभिधानात् पूर्ववत् पुनरपि
प्रसङ्ग इत्याह–न तर्हि पुनरिति । अपि चैवमित्यादि पुनः एव प्रमाणं यस्य तस्मादेव पुरुषप्रमाणको यस्तर्कस्तस्य
30 पुरस्सरविचारप्राप्यार्थपरिग्रहात्तदनुसारेण वाक्यार्थनिर्णयात् वैशेषिकवैकल्पिकत्वम् सोऽपि तर्कस्तत्त्वे विपर्ययोऽयमिति
एव एकान्तैव सामान्यत्वादवस्तुत्वादिति भावः । विचारप्रकारं दर्शयति–उत्तरोत्तरेति । तत्रसत्तर्केति,
गम्यमानो इत्येव विशेषप्रमाण वस्तुनि विशेषस्य सर्वदा सम्भवेत्यादि [illegible] व्यापकधर्मनिमित्तेन किं
स्वित्स्यादित्येवं धर्मिणि संशये जायते तन्मूले वस्तुनि तत्त्वज्ञानाय कारणोपपत्तिपूर्वकं योऽयमूहो तर्कविशेष स तर्क
इति सूत्रार्थः । तर्कस्वरूपं चो एव दर्शयति–प्रागुक्तविधिनेति । अत्र तर्कस्यापि पुरुषप्रमाणकत्वेनार्थनिर्णयात्

तर्कः, स चानिष्ट इति, अपि च तर्कोऽप्रतिपूर्णो यदि न भवेत्तत्राभीयेत किमयमप्रतिपूर्णः, कस्मात्? दोष भयात्, कस्माद्दोषभयात्? पौनरुक्त्यादेरसत्कार्यवादाभ्युपगमात् पुनस्तस्यागाच्च। कुड्मलाद्युक्तेः पौनरुक्त्यादिदोषाः प्रागुक्तवत्।

असत्कार्याभ्युपगमप्रदर्शनार्थमाह—

एकावस्थामात्रविच्छिन्नपूर्वापरस्याग्न्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्च हवनक्रिया 5 नुष्ठानं तत्फलाभिमतः स्वर्गस्तयोश्च सम्बन्ध इति परस्परं विघटितत्वान्नोपपद्येत, कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात्।

एकावस्थामात्रविच्छिन्नेत्यादि, यावत्कार्यमिति कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमात्। एकावस्थामात्रविच्छिन्नपूर्वापरस्याग्न्यादिभिन्नवस्तुत्वाभिनिवेशविधानाच्चेति तच्छब्दाः कुड्मलाद्युक्तैकाव-स्थाऽवस्था एका च साऽवस्था चैकावस्था तत्परिमाणमेकावस्थामात्रं स्तिमितसरःसलिलवद्विच्छिन्नं तस्यैव 10 पुनस्तत्त्वं विच्छिन्नं पूर्वस्यापरस्येभ्यन्नादेरग्न्यादेर्भस्मादेर्घटपटादेश्च परविषयसामान्यवादिमतवत् सर्वं व्यापकस्य सतोऽग्न्यादेर्भिन्नवस्तुत्वेनाभिनिवेशः, तदभ्युपगमेऽग्निरिति परमाणुद्व्यणुकादिभूम्यादिसं योगसम्भूतवनस्पतीभूताग्निसमनुगतपरमाण्वादिविच्छिन्नावस्थामात्रत्वे सत्यग्निरिति भवति क्रमेण परि णाममेदाभ्युपगमात् तस्य विधानाच्चाग्निहोत्रं जुहुयादिति च हवनक्रियानुष्ठानं तत्फलाभिमतः स्वर्गः तयोश्च सम्बन्ध इति परस्परं विघटितत्वान्नोपपद्येत पूर्वापराभ्युपगमयोः, किं कारणं विघटितमिति 15 चेदुच्यते, कारणे कार्यस्यासत्त्वैकान्ताभ्युपगमादिति विघटनप्रदर्शनम्। यत्र हि कारणे पूर्वादौ कार्यस्याभिहवनकर्मणस्तत्कार्यस्य च स्वर्गादेरसत्त्वे सति करणमुपपद्यते, तच्च सति नोपपद्यते, सिद्धौ-दनपचनवत्।

विशिष्टैकान्त्यावस्थाभ्युपगमश्च पुरुषादिकारणात्मकसर्वैक्याभ्युपगमविरोधीति तदुपपद्यते नाभ्यपेत्याह— 20

सर्वगतसत्कार्यकारणवृत्तित्वेन भेदविधिभिर्निर्विषयत्वादतः सर्ववस्तुसन्निधिसम्भूताऽपि सा भेदसाधनसम्बन्धाभिनिर्वर्त्येति विधीयते तदन्वनुष्ठानापि तदुपदिष्टभेदसाधननिष्पाद्य-त्वेनाभ्युपगम्य यथागमकारकविन्यासात्मकेतिकर्तव्यतयाऽनुष्ठीयतेऽतोऽसौ प्रागन्नासीति

पूर्वस्याच्च पक्षमित्याह–अपि चेति। प्रागुक्तवदिति निर्देश इति शेषः। [illegible] यतोऽग्न्यादेर्भिन्नवस्तुत्वाभि-निवेशात्मिकोऽर्थ [illegible] —एकावस्थेति। तच्छब्दादिति, [illegible] 25 [illegible] इति भावः। एका च सेति, पूर्वापरावस्थापरिहारेणैकस्यावस्थानत्वाभ्युपगमे-[illegible] इति भावः। परमाण्विति [illegible] भवति तत्र [illegible] परमाणुत्वावस्था [illegible] [illegible] भावः। ननु [illegible] 30 [illegible]—विशिष्टैकेति। सर्वगतेति [illegible] [illegible] भाव। पूर्वं कार्यं [illegible] सर्वगति—मत इति।

स्यादिति, कार्यत्वेन परिगृहीतत्वात् कुर्याज्जुहुयादित्यादिवचनाद्विशेषैकान्तवस्तुवत्, एवम-
नेन सर्वैकान्तासत्कार्यवादोऽभ्युपगतस्तथा, स चाप्रतिपूर्णः, असिद्धहेतुकत्वात् प्रतितर्केण
बाध्यत्वाच्च ।

(सर्वगतेति) पुरुषपुरुषकारादिवस्त्वापन्नत्वं क्रमेणैकमेव युगपच्च सर्वगतं पुरुषार्थं कारणं
5 तत्र स्वात्मरूपं सर्वगतं च तत् स्वात्मनैकात्मना स्थितमिति विग्रहः । एकत्वमात्रविधिविधिनियमदर्शनेन
वस्तुवित्त्वेनाग्निहोत्रं जुहुयादिति भेदविधेर्निर्विषयत्वमप्याद्यमापन्नम्, यथोक्तम् 'न कर्मणा न प्रजया
धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥'
(कैवल्योपनिषत् खं १ श्लो-३) यथा 'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्, उतामृतत्वस्येशानो यदन्ने-
नातिरोहति' (ऋ० मं० १० सू० ९०) इत्यादि । तद्दर्शनं प्रतिपादयिष्यते । अतः सर्ववस्तुषु सर्व-
10 गीत्यादि, सर्ववस्तूनां अभिधो वस्त्वेव सा द्रव्यक्रिया, तथापि भेदाः साधनमात्रयाः, पूर्वेण पक्षेण
जुहुयादित्यादिभेदक्रिया यथाभिधानक्रियायाः साधनानि, तान्यन्वयेन तद्भावात्, तत्साधनसम्बन्धा-
भिनिर्वर्त्स्यैति विधीयते, तदन्वयानापि वस्तुपरिसमेदसाधननिष्पादकत्वेनाभ्युपगम्य यो यो भागो यथा
यथा स्वरूपं विन्यस्य आत्मा यथा प्रतिरूपव्यवस्थायाः सा यथाभागकारकविन्यासादिभिः सर्वेषि-
कर्मव्यवस्था गवाभ्यमनप्रक्षेपादिमयात्मकतयाऽनुष्ठीयते वागन्यथाविधोऽयं प्राक् नासीदित्यादिना, कस्मात् ?
15 कार्यत्वेन परिगृहीतत्वात्, कुर्याज्जुहुयादित्यादिवचनात् कार्यत्वेन निर्वर्त्यत्वेन परिगृहीतेन सा, दृष्टान्तो
विशेषैकान्तवस्तुवदिति, यथा विशेषैकान्तवादिना कार्यमेव न कारणमिति, प्रतिक्षणोत्पत्तिविनाशात्म-
कत्वात् प्रतिपन्नं वस्तु प्राक् नास्ति तत्र त्वयाऽभ्युपगतं क्रियाभ्युपगमादिति त्वां प्रति साध्यसाधनधर्मा-
न्वितो दृष्टान्तः, ममापि च त्वदभ्युपगमेनोक्तत्वादिति साध्यसाधनम् । एवमनेन सर्वैकान्तासत्कार्यवाद
स्त्वयाऽभ्युपगतो भवति, स चाप्रतिपूर्णस्तर्केऽसिद्धहेतुकत्वात् प्रतितर्केण बाध्यत्वाच्च ।

20 ननु तस्यैव वस्तुनोऽसत्कार्यत्वं व्यक्तत्वात्, व्यक्ता हि सा क्रिया, न कार्या, अवि-
भक्तिवमभेदकसुगुरितपूर्वादिद्रव्यधर्मत्वेनाभिव्यक्तेः पिण्डकपालघटवत्, शुक्रशोणितासत्यापा-
भिन वा देवदत्तस्वरूपत्वापि शोपन्यस्तस्य मनुष्यत्वकाभ्युपलभ्यत्वात्, कार्यत्वादेव वा प्रकाश्य
मत्वदभिव्यञ्जनस्यैव कार्यत्वाभ्युपगमात्, एवं तर्हि सत्कार्यत्वसमर्थो ह्यन्यवैयर्थ्यप्रसङ्गात्
कृता एककारणत्वस्य चाधिक्यं स्यादिति चेन्न, तस्य एवाभ्यपाभूतेर्नाभिव्यक्तता नाम काचि-
25 दस्ति घटस्यासम्भवात् ।

[illegible] –सर्वगतसित्याति [illegible]
[illegible]
[illegible]
[illegible] कार्यत्वेन परिगृहीतत्वात् [illegible]
30 [illegible] कुर्यादिति । [illegible] इति । [illegible]
[illegible]
[illegible]
[illegible] न तु तस्यैवेति [illegible]

(न स्थितमिति) न तु तस्यैव वस्तुनोऽसत्कार्यत्वं किं कारणं ? व्यक्तत्वात्, व्यक्ता हि सा क्रिया न कार्या, अविवक्षितमसेकसमुदितपुनर्निश्चयधर्मत्वेनाभिव्यक्तेः, को दृष्टान्तः ? पिण्डकालघटवत्, यथा मृत्पिण्डकाल एव घटो विद्यमानोऽपि साधनान्तरापेक्षामिव्यक्तत्वान्नोपलभ्यते, कुम्भयोनिवाक्-छायामिव वा देवदत्तरूपमणिविशेषान्तरत्वे सदुत्तरकालमुपलभ्यत्वात् । कार्यत्वादेव वा प्रकाशक-प्रदेशवदभिव्यक्तमसैव कारणत्वात्, इतरथा वन्ध्यापुत्रोऽपि क्रियतामसत्कार्यत्वात्, भवत् । एवं तर्हि सदसत्कार्यमसौ साम्येपन्यवृत्त्यन्यथात्वा एककारणत्वस्य बाधिका स्यादिति चेन्नेत्युच्यते । कुतः ? तस्य यथान्यथाभूतेः, न ह्यन्यथा नाम काचिदस्ति, किन्तर्हि ? तस्य यथान्यथाभावोऽस्ति तस्य भावस्य तस्मिंस्तस्य एव-अन्यथाभावस्यावस्थामेवान्यथाभवनात्, तदेव हि वस्तु स्वरूपावस्थामे-वान्यथा भवति, यद्यन्यदन्यथा भवेन्मृत्पिण्डोऽपि घटो भवेत्, न तु भवति, साधर्म्यदृष्टान्तश्च घट व्यासवत्, यथा घटो घटत्वासन्नेव क्रियतो नवः पुराणतयोत्पद्यते तथा स एव मृत्पिण्डोऽन्यो घटो भवति, न तु सोऽन्यामिमताऽन्यथात्वा नाम काचिदस्ति, यदि स एव घटो नवः पुराणतयाऽन्यो न भवेन्न पुराणः स्यात् नव एव स्यात्, ततोऽन्यो वा घटादिः पुराणघटः स्यात्, नैव वा कश्चिदपि भवेत्, तस्मात्तस्य एव तथाभूतेर्नान्यथात्वा नाम काचिदस्ति ।

अत्राह—

घटत्वासन्नवदित्ययं दृष्टान्त उपपद्यते, मृत्पिण्डकालघटवदिति तु न युज्यते तस्य यथा-न्यथाभावात्, पिण्डानन्तरं हि शिवको भवति न घटो न स्तूपकछत्रकस्थासककोशककुशूलका इति, अत्रोच्यते तुल्यमत्यासत्तित्वात्, मृत्पिण्डघटवद् पिण्डावस्थायामेव घटस्य भावात् ।

(घटत्वासन्नवदिति) घटत्वासन्नवदित्ययं दृष्टान्त उपपद्यते नवत्वानन्तरं पुराणत्वावस्था-नुभवात्, मृत्पिण्डकालघटवदिति तु न युज्यते तस्य यथान्यथाभावात्, पिण्डानन्तरं हि शिवको भवति न घटो न स्तूपकछत्रकस्थासककोशककुशूलका इत्यत्रोच्यते, तुल्यमत्यासत्तित्वात्, यथा घटो भवति [illegible]-

---

न लभ्यत इति भावः । अविवक्षितेति एकक्रियाया अभिव्यक्तिः किं प्रत्येकमन्यधर्मत्वेन किं वा समुदितत्वधर्मत्वेनेति विवक्षितैव [illegible] । एवञ्च व्यक्तत्वादेव वा [illegible] एव साधनान्तरापेक्षत्वा-भावात् [illegible] नोपलभ्यते तत्र दृष्टान्तमाह-पिण्डकालघटवदिति । एवञ्च पिण्डकाले वा घटस्य न घटत्वमभिव्यक्तं यतः कार्यमिति व्यक्तत्वकार्यत्वयोरेकमनुपपन्नमाह-कार्यत्वादेव वेति, एवं विद्यमान एव घटो यथा प्रतिपादितः प्रकाशसत्तामात्रवत् इत्यर्थः । ननु यथा सदसत्कार्यमसौ साम्यैपम्यवृत्त्यन्यथात्वा [illegible] धर्मादेरस्य अन्यत्वमा-शङ्क्य [illegible] बाधिके भवत इत्याशङ्क्य-एवं तर्हीति । तद्भावावस्थायामेवेति, [illegible] [illegible] परिणामस्यैव [illegible] धर्मधर्मित्वस्य नाम वस्तुनस्तस्य विषये तत्रान्यत्र [illegible] अविशेषेण प्रतीयमानत्वात्, [illegible] यदि स्यात्तर्हि मृत्पिण्डादिना घटादिरपि स्यादिति भावः । अत्रार्थे दृष्टान्तमाह घटत्वासन्नवदिति । ननु [illegible] विद्यमान एव घटः पुराणतयाऽन्यो भवति यदि पुराणतयाऽन्यो न स्यात्तर्हि नव एव स्यात् पुराणो न स्यात् घटो वा [illegible] एव घटः पुराणः स्यात् [illegible] यदि पुराणः सोऽपि न [illegible] न्यथात्वा नाम काचिदन्या [illegible]-यदि स एवेति । ननु नवपुराणावस्थायां घटस्यैवान्यथात्वं तत्कथं न एव दृष्टान्तो युज्यते तत्प्रतिपादने मृत्पिण्डकालघटवत्तु न युज्यते घटकाले पिण्डस्याभावात्, पुराणाव-स्थायामपि नवपुराणत्वेन पिण्डानन्तरं घटात्मना [illegible]-घटत्वासन्नवदिति । अत्रैव तत्प्रतिपत्तौ-[illegible] मृत्पिण्डकालघटवदिति न [illegible]-तुल्यमत्यासत्तित्वादिति । [illegible]

ग्रकात् तथा कुशूलकः कोशकात्, कोशकः स्थासकात्, स्थासकः छत्रकात्, छत्रकः स्तूपकात्, स्तूपकः शिवकात् शिवकः पिण्डात् पिण्डो मृद इति मृद एव तथा तथा भूतेः, अथवा भिन्नया साम्प्रतक्रि-यमिककथनानुमत्या ? तस्यामेव पिण्डावस्थायां घटो भवतीति प्रतिपद्यस्व तिमिततर(?)सन्निकर्षपर इत्यतस्य यथान्यथा भवनामास्त्यत्रापि क्रम इत्येतदुपदर्शनार्थमाह—मृत्पिण्डघटवदिति । अथवा
5 तस्य एव तथाभूतेरिति पाठः, तस्य एव—तद्रूप एव सति तेन तेन प्रकारेण भवनात्, पिण्ड एव मूर्तिसमानरूपात्मके शिवकात्मना नीरूपात्मना च भवनादिति ।

अत एव कारणमात्रमसौ, तदात्मत्वात्तन्निर्वृत्तत्वाच्च, घटमृत्त्ववदेव प्रागप्रतिपूर्णतर्कैः, स्वयमेव त्वया परित्यक्तत्वाच्च, एकान्तवादस्वाभाव्यात्, पूर्वोक्तमृदात्मवादवत् ।

(अत एवेति) अत एव तस्य यथान्यथाभूतेस्तथाभूतेर्वा कारणं प्रमाणमसौ-भवनक्रिया
10 धृत्यादिकारणेभ्यो न व्यतिरिक्ता, तद्धेतोरस्तस्यैवाभावात्कारणमात्रमसौ क्रियेति प्रतिपत्तव्यमवश्यम्, न केवलं क्रियैव कारणमात्रं, सह फलेनापि सा कारणमात्रम् फलमप्यस्याः—भावोऽस्य धृत्यादि, धृत्यादि कारणान्यथामवमात्रम् । अत्रोपपत्तिहेतुं प्रतिपादितार्थैव तदात्मत्वात्तन्निर्वृत्तत्वाच्चेति, तस्य भावस्य स आत्माऽस्येति वा तदात्मा तेन तन्निर्वृत्तस्य स एव वा निर्वृत्तस्तद्भावस्तन्निर्वृत्तत्वं तदात्मत्वाच्च, तदा-त्मात्मत्वात्तन्निर्वृत्तत्वात् घटमृत्त्ववत्, घटस्य मृत्त्वं घटमृत्त्वं, मृदेव घटः अत एव मृण्मया प्रति-
15 पादितं तस्य यथान्यथाभूतेस्तथाभूतेर्वेति तद्वत् तस्मात् कारणमेव क्रिया क्रियाफलञ्च । एवं तावत् प्रतिपूर्णतर्कैः प्रागासीत्तत्क्रिया, कार्यत्वेन परिगृहीतत्वादित्यसिद्धो हेतुस्त्वात् प्रतितर्केण चाप्यसत्त्वादेति प्रत्युच्यते । किञ्चान्यत् स्वयमेव त्वया परित्यक्तत्वात्प्रतिपूर्ण एव, कस्मात् ? एकान्तवादस्वाभा-व्यात्, एवंस्वभावा ह्येकान्तवादाः पूर्वोक्तमृदात्मवादवत् ।

यथोक्तं त्वया तदनुपलम्भादेवेतिकर्तव्यतेति पुनता कारणे कार्यस्य सत्त्वमभ्युपगम्य अतो भव-
20 तो मृषा—

इतिकर्तव्यताकर्तव्यताभ्युपगमात्तु पूर्वोत्तरावस्थानुपलम्भात् कारणमेव कार्यम्, सर्व-स्कन्धाटोपमुकुलप्रसारणकुम्भकीकरणवत् यज्ञोपवीतसूत्रतन्तुपटवद्वा संस्थानमात्रभिन्नस्य कारणस्यैव कार्यत्वमित्यभ्युपगम आपद्यत इति कार्यस्य त्यागः कुर्यादिति स्वाभ्युपगमार्थापत्ति विषयविपरीतार्थत्वात्प्रतिज्ञामेवव्याघातः स च त्वया तत्त्वानपेक्षणदोषाभेस्यते ।

---

25 भाव, [illegible] भवतीत्याह—अथ वेति । अत एवेति [illegible] अहनि वा येन तेन प्रकारेण भवनस्यानुरूप्य एव कार्यं प्रमाणं प्रतिपूर्णमिति चान्यथा [illegible] एवमपि च तदभिनेयी भावः । अत्रोपपत्तिहेतु इति अत्रार्थे तदनुरूपेण प्रतिपादितौ तदात्मत्वात्तन्निर्वृत्तत्वाच्चेति हेतू तस्य यथान्यथाभूते तस्य एव तथाभूतेरित्यनेन प्रतिपादितार्थैव न भिन्नार्थाविति भावः । तदात्मत्वादिति तस्य एकान्यथा-भूतेरित्यनेन तन्निर्वृत्तत्वादिति तस्य एव तथाभूतेरित्यनेन च प्रतिपादितार्थं । तदात्मत्वमिति [illegible] मृत्त्वं, घटोऽत्मा अ-
30 स्येति च तदात्म्य तस्य भावस्तदात्मत्वं यदा भवि घटो निर्वृत्तो मृदेव च भव इति तन्निर्वृत्तत्वात्तन्निर्वृत्तत्वमिति विग्रहार्थे । अथ [illegible] परिगृहीतत्वात् प्राक् सा नासीदिति [illegible] इतिकर्तव्यतैव कर्तव्यतेत्युक्तेर्भाव-त्वार्थस्य [illegible] कार्यत्वेन परिगृहीतत्वादिति हेतुरसिद्ध इत्याह—एवं तावदिति प्रतितर्केण [illegible] तस्य यथान्यथाभूतेस्तस्य एव तथाभूतेरित्येव एवो बोध्यः । [illegible] पुनरपि—इतिकर्तव्यतेति ।

इतिकर्तव्यताकर्तव्यताभ्युपगमाच्चेत्यादि, इतिशब्दस्य प्रकारार्थवाचित्वादित्थमि-त्यस्य कर्तव्यं घृतेन जुहुयात् पयसा जुहुयादित्यादि कर्तव्यताप्रकारा इतिकर्तव्यताः कारणभूताः, सैव कर्तव्यता, ता एव प्रोक्षणादिक्रिया अग्निहोत्रमित्यभ्युपगमात्। पूर्वोत्तरावस्थानुबन्धात् विच्छिन्नपूर्वो-त्तरावस्थस्य कस्यचिदभावात् कारणमेव कार्यम्, सर्पस्फटाटोपमुकुलप्रसारणकुण्डलीकरणवत्, यथोप-वीतसूत्रमभ्युपगच्छता, सूत्रमेव यथायज्ञोपवीताख्यां लभते तथा समवस्थानात्मना तन्तव एव पटलाभात् 5 संस्थानमात्रभिन्नस्य कारणस्यैव कार्यत्वमित्ययमभ्युपगम आपद्यते इतिशब्दो हेत्वर्थे, एतस्मात् संस्थान-मात्रभिन्नकारणकार्यत्वाभ्युपगमापत्तेर्हेतोः कार्यस्य त्यागः कुर्यादिति, अयं हि शब्दः कार्यार्थे समर्थनाम् भवति नान्यथा, पुनरितिशब्दो हेत्वर्थे, ततश्च कुर्यादर्थत्यागात् स्वशब्दार्थोपपत्तिविषयविपरीतार्थत्वादिव ग्रामेदव्याघातः, अग्निहोत्रं जुहुयादित्यनेन सामर्थ्येनैवासत्कार्यवादोऽभ्युपगतस्तदनुबन्धाच्चेतिकर्तव्यतैव कर्तव्यतेत्यर्थापत्त्या कारणात्मककार्यवादोऽभ्युपगतः, तयोरन्योऽन्यविपरीतार्थत्वात्—विरुद्धत्वादिव 10 ग्रामेदो व्याघातश्च। विवक्षाभेदस्त्वसत्कार्यवादिनः शब्दस्य कारणात्मककार्याभिधानाभ्युपगमात्, कारणात्मककार्यवादिनश्चासत्कार्याभिधानाभ्युपगमात्, अत एव च परस्परतो विरोधात्स्वाघातोऽनयोर-र्थयोः, अर्थद्वयस्य स्वशब्दार्थोपपत्तिविषयस्याभ्युपगमाद्विवक्षाभेदोऽयं पुरुषबुद्धिवशात्प्रामाण्यमपौरुषेयस्य व्याहन्तीति विवक्षाभेदव्याघातः, स च त्वया वस्त्वनपेक्षणदोषाभेत्स्यते। वस्तुतत्त्वविचारप्रद्वेषिणो वा कार्यकारणस्वरूपानपेक्षिणोऽपि भवतश्च कारणकार्यैकत्ववाद आपद्यतेऽनेकान्तरूपो वस्तुनस्तथा- 15 त्म्यादनपेक्षमाणोऽपि त्वमवश्यापादीति।

एवं कारणात्मकत्वेऽभ्युपगतेऽपि यदीतिकर्तव्यता जनयतीतीष्यते ततो न सा कर्त-व्यता क्वचिदस्तीति सा तज्जन्या न भवति, जनकत्वात् कारणत्वात् पूर्वत्वाद्विधायकत्वान्मा-तृवृजनवत्।

पूर्वोत्तरभावेन विवक्षभवत्यमितिकर्तव्यताक्रमेणाग्निहोत्रकर्तव्यतारूपविरन्वयविभागिपूर्वोत्तरावस्थस्य कस्यचिद्वस्तुनोऽभावात् 20 कारणभूतं वस्त्वेव सर्पस्फटाटोपादिवत् भवतीत्य इति भावः। ता एवेति, कारणभूता पूर्वोत्तरभावमापन्नाः घृतपयआदि-द्रव्यप्रोक्षणादयोऽग्निहोत्रमित्युच्यन्त इति भावः। संस्थानमात्रेति विवक्षापदवाच्याभावमिति कारणस्यैव कार्यत्वाभ्युपग-मेन कार्यं कारणमेवेति भावः। अयमभ्युपगमो विचार्य कथ्यतो न मीमांसकसिद्धान्त इतिकर्तव्यतानां कर्तव्यताया-भावात्, ध्यानविध्यादिभिर्विनाभवत्वात् कर्ममात्रार्थकानां निवृत्तानां भवतिविषये परिच्छिन्नमूल्यमानकरूप क्रियामात्रं तदेवोप-कार्यमितिकर्तव्यताविशिष्टानन्यत्वमनुमन्यतीति त्वीकारात्विति बोध्यम्। अयं हि शब्द इति, कुर्यादिति शब्दः कार्यरूपे द्रव्ये 25 तस्येव सम्भवति कारणस्यैव च तथा यथा भाव्यत् कार्याभावेन कुर्यात् पदार्थस्तत्र एवेति भावः। असत्कार्यवाद इति जुहुयाज्जुहुयादित्यादिवचनानीतिकर्तव्यताभिर्व्यभिचरिता कार्यस्यैव परिणामतयाऽसत्कार्यवादोऽभ्युपगत इति भावः। कारणा-त्मककार्यवाद इति परस्परार्थैकत्वसम्बन्धयोगादितिकर्तव्यता एव कर्तव्यतेत्यभ्युपगमेन कारणात्मककार्यवादोऽ-भ्युपगत इति भावः। एवमभ्युपगमद्वैधोत्पादने भवति—तयोरिति। स्वदाम्प्रेति जुहुयात् कुर्यादित्येनासत्कार्यवादस्य इतिकर्तव्यतैव कर्तव्यतेत्युपपत्त्यर्थापत्त्या कारणात्मककार्यवादस्य प्राप्तेः पौरुषबुद्धिवशसम्भवोऽयं विवक्षाभेदो वेदस्य प्रामा- 30 ण्यमपौरुषेयत्वाच्च व्याहन्तीति न वक्ष्यति वस्तुतत्त्वविचारप्रद्वेषित्वात्, तत्र च हेतोः तथापि त्वय वक्ष्यते वाऽप्रद्वेषित्वेति भावः। अथ कार्यस्य कारणात्मकत्वे दोषमाह—एवमिति। जनकत्वे न तज्जन्यत्वं कारणत्वात् पूर्वत्वात् विधायकत्वात् मातृवृजनवत् न हि यदेव कार्यं तदेव कार्यम् एकस्यैव कार्यत्वकारणत्वयोरसम्भवात् न च यदेव पूर्वमेवास्ति कारणत्वात्, तदेव पश्चाद्भवति नापि यदेव विधायकं तदेव विधेयमसम्भवादेवेति भावः।

(एवमिति) एवं कारणात्मकत्वेऽभ्युपगतेऽपि प्रतीतिकर्तव्यता जनयतीत्युच्यते यतो न सा कर्तव्यता पुत्रादिकरणे इतिकर्तव्यताव्यतिरिक्ता काचिदस्ति यदा सा तज्जन्या न भवति, किन्तु तत्स- मेवास्मानं जनयतीत्यर्थः । कस्मात् ? जनकत्वात् कारणत्वात्, पूर्वत्वात् विधायकत्वात् वाक्यवत् यथा मातानमस्मानं जनयति किन्तर्हि ? ततोऽन्यां बुद्धिं जनयति एवमियमितिकर्तव्यता जनिका तथी
5 तथा कारणत्वात् पूर्वत्वाद्विधायकत्वादिति व्याख्येयानि । वचनवदिति, अत्र यथा वचनमपि नात्मानं जनयति बुद्धिं तु ततोऽन्यां वाक्यविषयां जनयति तथेतिकर्तव्यतेति ।

अथ मा भूदेष दोष इति जन्यत्वमसिद्धं तस्या जन्यत्वात्, जन्या हि सेत्यत्रोच्यते—

अथ जन्या सा, एवं तर्हि न जनिका न कारणं जन्यत्वादित्यजनकत्वात् कार्यत्वात् अपूर्वत्वाद्विधेयत्वात् पुत्रादिवत् ।

10 (अथेति) पुत्रादिवत्-भाविमद्व्याक्यार्थज्ञानवत्, तस्मात् सविहितदोषत्वाज्जन्यत्वे जन- कत्वे वा दोषानतिवृत्तेरुक्तमितिकर्तव्यतैव कर्तव्यता तदनुकम्पामिति ।

किञ्चान्यत्—

कारणमात्रत्वे सति कर्तव्यता प्रतीतिकर्तव्यतां परिसमाप्ता वा स्यादपरिसमाप्ता वा ? तत्र यदि प्रत्येकमितिकर्तव्यतासु कर्तव्यता परिसमाप्ता ततः प्रतीतिकर्तव्यतासमाप्तेरितिकर्तव्य
15 तान्तरानारम्भः, अनारम्भ एव वा तस्या अपि, कारणमात्रत्वात् । कर्तव्यतायाः प्रत्येकम् समाप्तौ च कारणाभावात्तथा तावत्प्राप्नोति, समुदायस्यापि च तन्मात्रत्वादुक्तवत् ।

(कारणमात्रत्वे सतीति) तत्र तावदपि प्रत्येकमितिकर्तव्यतासु कर्तव्यता परिसमाप्ता ततः प्रतीतिकर्तव्यतासमाप्तेरितिकर्तव्यतान्तरानारम्भः—एकया ह्येव [illegible]कर्तव्यतया तन्मात्रपरिसमाप्तया कर्तव्यतायाः कृतत्वात् यथा [illegible]नामितिकर्तव्यतान्तराणामारम्भो निर्
20 र्थकः प्राप्तः । अनारम्भ एव वा तस्या अपि किं कारणं ? कारणमात्रत्वात् कर्तव्यताया इति त्वयैवाभ्यु- पगतत्वात्, व्यापकस्य पुत्रादिकारणद्रव्यमात्रत्वस्य क्रियायाः प्रतिपादितत्वात् सिद्धौदनपचनवदनारम्भ एव प्राप्तः, एवं तावत्प्रत्येकपरिसमाप्तौ दोषः । प्रत्येकमसमाप्तौ च कारणाभावात्तथा तावत् प्राप्नो ति—यदि शिबिकावाहकजनपरत्ववत् प्रत्येकमसमाप्ता च कर्तव्यतेतिकर्तव्यतासु तथाप्यकारणत्वं प्रत्येक- कारणत्वात्, सिकतातैलवत्, इतिकर्तव्यसमर्पकत्वादेवं तत्त्वं च प्रकारार्पकत्वादेवं कर्तव्यं—इतिकर्त-
25 व्यम्—पुत्रादिप्रक्षेपलक्षणकर्तव्यता । अथवा तावत्, न तथा अथवा यथार्थं न प्राप्नोति प्रत्येक- कारणत्वादिति, ननूक्तं शिबिकावाहकवहनवत्किमित् समुदाये सति कर्तव्यता कल्पितेति नाशोच्यते— समुदायस्यापि च तन्मात्रत्वात्तदवयवमात्रत्वात् उक्तवदिति, उक्तं हि यस्य एवात्यन्तासूक्ष्मतासूक्ष्मैवेति, अयथा एव समुदायीभवन्तः, नो चेत् सिकतातैलवदेव न स्यादिति समुदाये तेनापि ।

प्रतीतिकर्तव्यता [illegible] कथमनुपपत्तेः [illegible]—अथेति । कार्येषु [illegible] दोषान्तरम्—कार-
30 णमात्रत्वे सतीति अनारम्भ एवेति [illegible] [illegible] [illegible] [illegible] प्राप्तः । ननु इतिकर्तव्यतान्तरं [illegible] न तु प्रत्येकपरिसमाप्ता ततो न दोष इत्यत्राह—समुदाय- स्यापीति । अत्र मीमांसक [illegible] [illegible] न [illegible] [illegible]

किञ्चान्यत्—

अभिमतविध्यनुवादवैपरीत्यदोषप्रसङ्गश्च, अनुवादकता च घृतादेः कारणमात्रश्रुतित्वाद्धवनवत्, घृतादिवद्धवनस्य वा विधायकता, एवञ्च न विधिर्नानुवादो वाऽस्ति, अतोऽवाक्यत्वम्, अनुवादविधायकत्वाविच्छिन्नार्थपदवत्, काककृतवद्वा ।

(अभिमतेति) अभिमतविध्यनुवादवैपरीत्यदोषप्रसङ्गश्च, तत्र तावत् घृतेन जुहुयात् पयसा जुहुयादित्यादिवाक्येषु घृतादेर्विधेयत्वाभिमतस्य कारणमात्रस्य हवनप्रधानस्य तन्मात्रेतिकर्तव्यतामात्रहवनार्थत्वादग्निहोत्रं जुहुयादित्यत्र हवनस्यानुवादाभावोऽपि, हवनस्य घृतादिव्यतिरिक्तस्याभावात्, ततश्च घृतादिविधानकम् ज्ञाताज्ञाताभिमतस्य हवनस्य विधायकत्वेन स्यात्, अनुवादकता च घृतादेरज्ञातार्थविधायकाभिमतस्यापि कारणमात्रश्रुतित्वाद्धवनवदिति, कारणमात्रे श्रुतिरस्य तत् कारणमात्रश्रुति घृतादिहवनम्, मोक्षविधिना कार्याभावस्य प्रतिपादितत्वात्, तस्मात् कारणमात्रश्रुतित्वाद्धवनवद्घृतादेरनुवादकता, घृतादिवद्धवनस्य वा विधायकतेति, एवञ्चेति, विध्यनुवादयोरन्योऽन्यस्वभावसङ्करान्यतरसिद्धावस्वभावत्वान्न विधिर्नानुवादो वाऽस्ति, अतः एवमुक्तप्रकारेणावाक्यत्वम्, अनुवादविधायकत्वाविच्छिन्नार्थपदवत्, यथा विच्छिन्नार्थमेकं पदमधिकृतपदार्थान्तरसम्बन्धं गामित्येवम् वाक्यम्, अत एव विध्यनुवादत्वाकाङ्क्षार्थाभावात्, यथाऽग्निहोत्रं जुहुयात् स्वर्गकामो घृतेन पयसा जुहुयादित्यादीनि । यत्रापि पदार्थो नास्त्येव तं प्रति काककृतवदिति दृष्टान्तः, यथा काककृतमर्थान्तराकाङ्क्षारहितमवाक्यमविध्यनुवादत्वादपेक्षमपि ।

ज्ञाताज्ञातविशेषाभावेऽपि पदवाक्यसम्बन्धानां घटज्ञानवत् साधुतासाधुत्वे न घटेते, अर्थो

विद्युत्पन्ने किन्तु तामिर्निष्पाद्या स्यपि तत्र यत्किंचत्पाठेऽपि सत्त्वोऽपि वाक्यस्य इतिकर्तव्यतावाक्यसो भवन्ति महत्वेऽपि तथैव, तत्रादेरन्येतिकर्तव्यतया प्रधानविधिर्निष्पन्नतावत्परेतिकर्तव्यतया सहिता सन्नत्यनुपपत्त्यात्मनुत्पत्ते तदनुज्ञानमिति न वैयर्थ्यमितिकर्तव्यतायाः केचे तथैव [illegible] च्छित्तिरन्ये प्राहुः । अभिमतेति अभ्यासप्रधान इति प्रतिभाति यथाहि इतिकर्तव्यतया एव कर्तव्यताप्रधानमिहोत्रेनकर्तव्यतया पुनरितिकर्तव्यतया अनेन घृतेन जुहुयादित्यत्र यदि घृतादेर्विधेयत्वं तदाऽग्निहोत्रं जुहुयादित्यत्रापि तथापि हवनस्यापि विधेयत्वमेव स्यात्, न त्वनुवादत्वमित्यग्निहोत्रं जुहुयादिति वाक्यं न हवनस्यानुवादकं स्यात्, तथापि हवनस्य वाक्येऽनुवादत्वे घृतेन जुहुयादित्यत्रापि घृतादेरनुवादत्वं स्यात्, तदेवं [illegible] विधायकत्वेनाभिमतमप्यनुवादकं तथैव जुहुयादित्यादिवाक्यम् [illegible] अग्निहोत्रं जुहुयादिति वाक्यं विधायकमिति [illegible] न [illegible] यथैव [illegible] स्यादिति न कोऽपि विधिर्वा वाक्यत्वेनाग्निहोत्रं जुहुयादित्यादिवाक्यानामवाक्यत्वमेव स्यात् विधायकत्वाभावादनुवादकत्वाभावाच्च न हि [illegible] विधायकत्वानुवादकत्वाभ्यां वाक्यं भवितुमर्हतीति । कारणमात्रश्रुतित्वाद्धवनवदिति, यथा हि [illegible] अग्नौ पदार्थेन सर्वमपि हवनमनुवादकं तथैव घटमपि घृतादिवन्मिथःसाधनानुवादकमेव स्यादिति भावः । अनुवादविधायकत्वादिति, यथा समानपदेति [illegible] पृथक्पृथक् [illegible] पदार्थान्तरसम्बन्धाभावेऽपि विधिरेवानुवादत्वाकाङ्क्षार्थाभावात् वाक्यत्वं तथैवाग्निहोत्रं जुहुयादित्यत्र च घृतेन जुहुयादित्यादौ न वाक्यत्वम् विधित्वेऽप्यनुवादत्वेन वाऽर्थान्तराकाङ्क्षार्थाभावादेवेति भावः । येषां मते पदेभ्यो भिन्नं वाक्यमेव पदार्थव्यतिरिक्तं वाक्यार्थं प्रतिपादयति तन्मते पदार्थानामानुपूर्व्याद् वाक्यार्थं बुद्ध्यारोपित एव पदार्थे भुक्तिमेयैव, न हि पदार्थानामवान्तरवाक्यार्थत्वमस्ति तत्सम्भवात्, यथा च पदार्थानां [illegible] न तथा पदार्थवाक्यार्थयोरिति दृष्टान्तमाह—पदार्थानीति । ननु घटमात्रप्रत्ययानुपपत्तेः पदार्थं वाक्यार्थं प्रत्यनुपपत्तिस्तथैव साधुत्वासाधुत्वे च न सम्भवतीत्यत्र—ज्ञाताज्ञातविशेषाभावेति । वाक्यपदयोर्भेदे साधुत्व

न्तराभावात् ज्ञाताज्ञातावलम्बनविध्यनुवादार्थयुगपद्विवक्षाप्रवृत्तिवाक्यभेददोषपरिकल्पनापरिक्लि-
ष्टता, व्यर्थैव साधुत्वासाधुत्वाभ्याम्, एकार्थत्वाद्घटकुटवत् ।

(ज्ञाताज्ञातविशेषत्वादिति) एवमिति, कारणमात्रकार्यत्वाभ्युपगमे, साधुत्वासाधुत्वयोः
साधुता वाक्ययोरित्यादेः पदस्य, अग्निहोत्रं जुहुयादित्यादेर्वाक्यस्य, विधेयत्वमनुवाद्यत्वञ्च नोपपद्यते,
5 शब्दो हि ज्ञातार्थोऽज्ञातार्थो वा प्रयुज्यते ज्ञातार्थोऽनूद्याज्ञातार्थविधानार्थं प्रयुज्यते स पुनर्ज्ञातार्थः
स्वत एव प्रत्यक्षादिना प्रमाणेन ज्ञातेऽर्थे प्रयुज्यते वाक्यान्तरेण वा परेण प्रापितार्थे, यथाऽयं देवदत्त
इति अर्थसम्बन्धस्य प्रमाणान्तरप्राप्तत्वादनूद्य देवदत्तस्य विधीयते, वाक्यान्तरवेदितार्थोऽपि पदान्तरमूला-
न्यायेन विधीयते देवदत्त! गामभ्याज शुक्लामिति । ज्ञाताज्ञातार्थता पदानां वाक्यानाञ्च साधुत्वाभि-
मतानां प्रत्येकं सर्वेषां प्रसक्ता इह, को दृष्टान्तः? पदज्ञानवत्, यथा पदज्ञानत्वाविशेषेऽपि प्रमाण-
10 प्रत्युपलब्धा ज्ञाताः, परम्परानुमितिगता न ज्ञाताः ज्ञेयाः लोकप्रसिद्धाः । साधुता पदवाक्य-
रूपाणां कारणात्मकार्यवादेऽस्मिन् न घटते, सर्वस्यैकात्मकत्वे ज्ञाताज्ञातभेदानुपपत्तेः, एकस्यैव वा
वस्तुनो भावाभावाभिव्यञ्जकत्वाभावप्रसङ्गात् काकदन्तादिवदिति । नाप्यसाधुता वाक्यभेदानर्थक्यादिदोष-
सम्भवा घटते, यस्मात् कारणात्मकार्यवादेऽर्थान्तराभावात्, ज्ञाताज्ञातावलम्बनविध्यनुवादार्थयुगपद्वि-
वक्षाप्रवृत्तिवाक्यभेददोषपरिकल्पनापरिक्लिष्टता, यथाऽर्थसंस्पर्शेन ज्ञातावलम्बनोऽनुवादः, अज्ञातावलम्बो
15 विधिः, तयोरर्थयोर्युगपत्क्रमेण वा युगपद्विवक्षा, एकस्मिन्नर्थे तथाप्रवृत्तिरसौ अर्थता वाक्यभेदः । देव
दत्ताख्यानवाक्यस्यैव गवानयनचोदनायां देवदत्ताख्यानानुवादः, गवानयनविधानवाक्यस्य वा
देवदत्ताख्यानवाक्यवदेवदत्तविधानमिति । नेयमेकस्य शब्दस्य युगपदर्थद्वयाभिधानसामर्थ्याभावात्
वाक्यभेददोषपरिकल्पना तस्याः परिक्लिष्टता, अर्थभेदाभावात्, अतोऽसाधुतापि शब्दानां नास्ति सर्वे
साधवोऽसाधवो वा शब्दाः प्रसज्य इति । किञ्चान्यत् न केवलं वाक्यभेददोषो भेदाभावदोषप्रसङ्गा-
20 दीनामप्युक्तिभेदोऽपि, व्यर्थैव साधुत्वासाधुत्वाभ्याम्, एवमिति—कारणात्मककार्यवादाभ्युपगमप्रकारे-
णोक्तमतिविस्तरं संक्षिप्य साधनमाह सोदाहरणं—एकार्थत्वाद्घटकुटवदिति, यथा प्रतीतार्थयोर्घटकुटयो

न सम्भवतीत्याह—साधुत्वासाधुत्वयोरिति । पदेति गौरित्युदाहरणम्, अग्निहोत्रं जुहुयादिति वैदिकवाक्योदाहरणम् ।
ज्ञातार्थशब्दप्रयोगमाह—ज्ञातार्थ इति ज्ञातार्थमनूद्याज्ञातार्थस्य विधानार्थं ज्ञातार्थशब्दाः प्रयुज्यन्त इत्यर्थः । ज्ञाता-
र्थत्वं कथमित्याह—स पुनरिति । प्रत्यक्षादिनाऽवगतार्थस्य दृष्टान्तमाह—यथायमिति । वाक्यान्तरेणावगतार्थस्य दृष्टा-
25 न्तमाह—वाक्यान्तरेणेति । एवं साधुत्वाभिमतानां पदानां वाक्यानाञ्च ज्ञाताज्ञातार्थत्वेऽस्मिन्विषयेऽर्थबोधकत्वं दृष्टम्,
तच्च कारणात्मकार्यत्वे सर्वस्य वस्तुन एकत्वात् ज्ञातत्वम् अज्ञातत्वं वा स्यात् इत्याशयेनाह—ज्ञाताज्ञातार्थतेति ।
प्रत्यक्षस्यार्थं निरूपयन्नाह—पदज्ञानवदिति पदादेर्ज्ञातार्थत्वस्य [illegible] ज्ञाताज्ञातत्वमिति
भावः । वस्तुनो हि भिन्नात्मकत्वे पदानां वाक्यानाञ्च साधुत्वमसाधुत्वं च प्रत्यक्षमनुक्त्वा सम्भवति प्रकारेण तेनैव दृष्टान्तमाह—
एकस्यैव वेति यस्य वस्तुनः भेदेऽपि अनुपलब्धिबाधप्रत्यक्षादिसिद्धार्थत्ववत् कालदन्तादि पूर्वमन्वयो न सम्भव
30 ति भावः । अथान्यदप्याह न सम्भवतीत्याह—नाप्यसाधुतेति । एकस्यैव पदस्य वाक्यस्य वैदिक विध्यनुवादस्वरूपत्वेन-
प्रतिपन्नत्वेन वाक्यभेदप्रसङ्गाऽसाधुत्वं न घटते अर्थद्वये सति तस्मात् हि तत्र वाक्यभेदः स्यादित्यपेक्षयैवाह-
ज्ञाताज्ञातावलम्बनेति विध्यनुवादयोरेकत्रैकत्वविवक्षायां विरुद्धयोः तथा अर्थद्वयाभावे वाक्यभेदः स्यात् तत्र तेषां ते
सम्भवन्तीत्यसम्भवादिति भावः । देवदत्ताख्यानवाक्यस्यैवेति यथा देवदत्त गामभ्याजेत्यस्यैव वाक्यस्य उद्देश्य-
विधेयभावसम्बन्धानुपपत्त्या गवानयनविधानदेवदत्तानुवादयोरैक्येन वाक्यभेदविधानप्रसक्तं न सम्भवतीति तात्पर्यं नाति । परिकल्पना

द्वयोरेकार्थत्वादन्यतरप्रयोगो वृथा साधुत्वासाधुत्वाभिमतयोः असाधुत्वाभिमतस्य गोशब्दमात्रस्य गाव्यादिसाधुत्वाभिमतयोः युगपत् प्रयुक्ते चैकार्थत्वादर्थभेदेनोपपरिकल्पनापरिश्रमवद्वेति वर्तते । तस्मात् घटकुम्भशब्दयोः साधुत्वासाधुत्वाविशेषाच्छिष्टेतरलोकव्यवहाराविशेषः । एवं ते पुरुषादेः पौनरु-क्त्यवचनविरोधौ सत्कार्यस्यासत्कार्यवादत्यागः कारणात्मकसत्कार्यवादाभ्युपगमश्चेत्यप्रतिपूर्णतर्कता सदोषत्वादित्युक्तम् ।

यद्यप्येतत्त्वयाऽभ्युपगतं कारणात्मकं सत् कार्यमिति तदप्यसमीक्ष्याबुद्धिपूर्वकमेवोक्तमित्य तत्प्रदर्शनार्थमाह–

इदमज्ञातमपि सत्त्वया सत्त्वमेवैव विवेकारं प्रति प्रदर्शितं घुणाक्षरवत् ।

(इदमिति) यथा घुणः काष्ठकुट्टिकरणतयाऽऽकारमपि रेखाकुट्टिकरति यदृच्छया तथा त्वमेव तत्त्वमेवेदं कारणात्मकसत्कार्यत्वं प्रदर्शितमितिकर्तव्यतैव कर्तव्यतेति युक्ता । तत्पुनर्विवेकारं प्रति प्रद-र्शितं–इत्थमसत्कार्यं भवति, इत्थं सत्कार्यमिति यो वाच्यवाचकसाधनस्वरूपविधिविशेषः प्रत्येव दर्शितं नाऽसमनुसम्बुध्यीन् प्रति दर्शयन्नपि स्वयं तद्विवेकं नैवेच्छति ।

अथोच्येत कारणमात्रकार्यदर्शनमिदं सदपि निर्मूलापविद्धक्रियावाक्यप्रबन्धं कार्यं सत्त्वमेवात्र विवक्ष्यते, अलब्धवृत्तित्वात्, खपुष्पवत्, अतोऽसत्कार्यमाश्रित्य स्वर्गादिमात्स्यर्थं क्रियाऽऽभीप्सतेऽग्निहोत्रं कुर्यादिति । तद्द्विविधमनितिकर्तव्यतात्मकमितिकर्तव्यतात्मकं च तथा नितिकर्तव्यतात्मकं च कार्यं घटादि यूपादि लोके वेदे च इष्टमितिकर्तव्यतात्मकं न भवति तदुपरमेऽपि पृथगुपलब्धेः, इतिकर्तव्यतात्मकन्तु प्राप्तिसंभावि यथा सेवादि, तत्कार्यं न कारणमात्रं घटादियूपादिवत् । अतः कुर्यादिति प्रतिपादितासत्कार्यार्थवाक्यवत् कुर्याच्छब्दप्रति-पादितमिदमपि वाक्यं स्फुटतरासत्कार्यार्थम्, आदौ मध्येऽन्ते च कर्तव्यताभ्युपगमात् । अतोऽसत्कार्यवादस्यैवाभ्युपगतत्वादयुज्यते त्वया दोषवार्तं तद् त्वद्वचनच्छलादिति ।

अथोच्येत कारणमात्रकार्यदर्शनमिदमित्यादि यावद्वचनच्छलादिति । अथ त्वयैवमुच्येत न मया कारणमात्रकार्यदर्शनेनान्योऽभ्युपगम्यते यतस्त्वयैते दोषा मां प्रत्यापाद्यन्ते, किं तर्हि ? मयाऽभ्युपगम्यते न कारणमेव न कार्यमेव नोभयमेव न चाऽनुभयमेवेत्यविचार्यं वस्तुतत्त्वैकान्त्यपरि

प्रायः तिरस्कारो वा । अर्थाभेददोषस्यैकस्यापि व्याचिख्यासुः–द्वयोरिति अर्थभेदाभावादेव गोशब्दस्यैकस्य गाव्यादिसाधुत्वाभिमतेः युगपत्प्रयुक्तौ अर्थभेददोषो न सम्भवति अर्थैकत्वाभावेनार्थभेददोषप्रसक्त्यभावात्, [illegible] परस्य प्रयोगे एकस्यैकत्वादेकार्थाभिधायकत्वमासाद्यार्थभेददोषपरिकल्पना भवेत् तस्मादर्थभेददोषप्रसङ्गेन परस्यासाधुत्वं न सम्भवतीति भावः । निगमयति–तस्मादिति । विवेकारं प्रति प्रदर्शितमिति, यथा घुणः [illegible] तथा भवानपि इतिकर्तव्यतैव कर्तव्यतेति वदन् कारणात्मकं कार्यत्वं प्रदर्शयति तथापि प्रदर्शितं विवेकारं प्रत्येव वाक्यं प्रति तथा प्रदर्शयन्नपि तद्विवेकं त्वं नैवेच्छसीति भावः । अथोच्येतेति कारणमात्रकार्यदर्शनमपि स्वीक्रियते, निर्मूलापविद्धक्रियावाक्यप्रबन्धमपि [illegible] स्वीक्रियते [illegible] भावः । कारणमेव कार्यमिति [illegible] इत्यत्राह–अलब्धवृत्तित्वादिति [illegible] कारणे [illegible] भावः । इत्थं कारणात्मकं कार्यं कुत्र च कारणेऽसत्कार्यमिति विवेचयति–तद्द्विविधमिति । अग्निहोत्रं जुहुयादिति वाक्यं च कुर्यादिति [illegible]–

मतमकृत्वा कारणं कार्यमुभयमनुभयं वाऽभ्युपगम्यते, अग्निहोत्रं जुहुयात् स्वर्गकाम इति वाक्ये फलकारणमात्रकार्यप्रदर्शनमस्तु यतो वा परित्यक्तमिह विधिनये यदपि यन्निर्मूलापविद्धक्रियावाक्यम-नर्थं—निर्मूलमपविद्धः क्रियामन्वयो वाक्यप्रपञ्चश्च यस्मिंस्तदिव निर्मूलापविद्धक्रियावाक्यमनर्थं तस्मात् कारणमात्रप्रदर्शनस्य तद्दोषपरिहारार्थमिष्यमाणो विवक्ष्यतेऽनवधारितैकान्यदर्शनत्वात्, कारणमात्रत्वं

५ मत्वा यत्कार्यासत्त्वं तदेवाग्निहोत्रं जुहुयादिति वाक्ये कारणमात्रकार्यदर्शनमेव सदसत्कार्यमिति विवक्ष्यतेऽभ्युपगम्यते च, किं कारणं ? असम्भववृत्तित्वात्—असम्भवा वृत्तिरनेनेत्यसम्भववृत्ति कार्यं तस्मा-दसम्भववृत्तित्वात् खपुष्पवत्, यथा खपुष्पमसम्भववृत्तित्वादसत्तथा कार्यं स्वर्गापूर्वाद्यसम्भववृत्तित्वादसत् । सम्भववृत्ति चेत् कुर्यामजुहुयादिति न चोदयेत्, सिद्धेरनर्थं घटेऽस्मिन्नचोदनवत्, अतोऽसत्कार्यमागूर स्वर्गादिप्राप्त्यर्थं क्रियाऽऽधीयतेऽग्निहोत्रं कुर्यादिति । तदुक्तिवशम्—तत्र कार्यं द्विविधमितिकर्तव्यतात्मक-

10 मितिकर्तव्यतात्मकञ्च, तत्रानितिकर्तव्यतात्मकञ्च कार्यं घटादि यूपादि च लोके वेदे च दृष्टम्, यतस्तत्-समर्थैनद्रव्यमत्स्यवधमपादीतिकर्तव्यतात्मकं घटत्वं न भवति तदुपरमेऽपि पृथगुपलम्भेः, तथा तक्ष-करणादीतिकर्तव्यतात्मको न भवति यूपः । इतिकर्तव्यतात्मकं पुनः कार्यं प्राप्तिसंधानि, प्राप्त्या संधानं भीमसेवेति प्राप्तिसंधानि यथा सेवादि, उपस्थानाञ्जलिकरणादिरूपैव सेवा ताभ्यः पृथगनुपलम्भे । तत्कार्यं न कारणमात्रं—नैतिकर्तव्यतात्मकं घटादियूपादिवत् । यद् कुर्यादिति प्रतिपादितवानसत्कार्य-

15 वादात् कुर्यादित्यप्रतिपादितमग्निहोत्रं कुर्यादित्यत्र कुर्यादित्यनेन प्रतिपादितं यद् कुर्यादिति प्रतिपादित-वतासत्कार्यवाक्यवदिदमपि वाक्यं स्फुटतरासत्कार्यार्थम्, किं कारणं ? यतो सर्वेऽन्ये च कर्तव्य-ताभ्युपगमात् । अतोऽसत्कार्यवादस्योपक्रमप्रभृत्यपवर्गपर्यवसानेषु क्रियाविशेषेष्वभ्युपगतत्वादुक्ते स्वप्न दोषजातं तद् त्वदुक्तत्वात् प्राप्तिप्रापितेतिकर्तव्यतैव कर्तव्यतेति वचनक्रमात् कारणमात्रकार्यत्वाप-त्तिद्वारो विध्यनुपपत्तिरित्यादिदोषजातं सर्वं नास्तीति ।

२० एतदपि नोपपद्यते विधिविधिनयदर्शनोपपादयिष्यमाणकारणमात्रत्ववादात् । अभ्युपेत्यापि नैवास्य वाक्यता इतिकर्तव्यतावाक्यासिद्धौ तदसिद्धेः तद्वाक्यत्वे तद्रूपमतिप्राप्य कर्तव्यतावाक्यमप्यवाक्यम्, जुहुयादित्यस्योक्तवदेवेतिकर्तव्यतावाक्यमसत्यापि न कर्त-व्यतावगतिः ।

(एतदपि नोपपद्यत इति) विधिविधिनयदर्शनोपपादयिष्यमाणकारणमात्रत्ववादात्,

२५ अभ्युपेत्यापि—असत्कार्यवादोऽभ्युपेत्यापि नैवास्य वाक्यता—प्राप्त्यनुबन्धप्रापितेतिकर्तव्यताकर्तव्यतार्थता

यद् कुर्यादिति । वादादिति [illegible] कर्तव्यताऽभ्युपगम्यते । तत्कार्यमिति [illegible] कार्यं नैतिकर्तव्यता [illegible] । अग्निहोत्रं कुर्यादिति [illegible] यद् कुर्यादिति [illegible]—यद् कुर्यादिति । वचनक्रमादिति [illegible] [illegible], प्राप्तिप्रापितेतिकर्तव्यतैव कर्तव्यतेति [illegible] वचनम्, [illegible]

३० [illegible] दोष [illegible] भाव । विधिविधीति [illegible] न [illegible] इति भावः । प्राप्त्यनुबन्धेति अग्निहोत्र [illegible] इतिकर्तव्यता [illegible], [illegible] । [illegible] इतिकर्तव्यता [illegible] एव कर्तव्यता तथा [illegible] न [illegible] इतिकर्तव्यता [illegible] भावः । इति-

ग्निहोत्रहवनकरणार्थस्य वाक्यस्य वाक्यता, कुतः? इतिकर्तव्यतावाक्यासिद्धौ तदसिद्धेः, तत्सिद्धौ तत्सिद्धेः, तत् पुनरितिकर्तव्यतावाक्यम्, तदवाक्यत्वे तदुपक्रमविहितान्यकर्तव्यतावाक्यमप्यवाक्यम्, तत्र तावदनेन जुहुयादित्येतदितिकर्तव्यतावाक्यमवाक्यं, प्रसिद्धार्थानुवादत्वादुन्मत्तप्रलापवत्, यथा कामोन्मत्तस्य 'पश्यसि वर्तमानान्वेः हा प्रिये' इत्यादि प्रलापो न वाक्यं प्रसिद्धार्थानुवादाभावात्, एवं घृतेन जुहुयादित्यस्यापि तदभावादितिकर्तव्यतावाक्याभावः । अननुवादत्वञ्चास्य घृतसम्प्रदानक-हवनविधानविशिष्टवाक्यस्य विध्यनुवादयोरन्योन्यनिराकाङ्क्षयोरन्वयाभावात् । स्यान्मतं विधिमात्रस्य द्वारमित्युपायमात्रस्योपेक्षात्मतामिति द्वारत्वात्सापेक्षतेति चेन्न, तथापि बहिरङ्गस्येतिकरणादिभ्यस्त-सिद्धेरनपेक्षैव । तस्मादिह इतिकर्तव्यतैव कर्तव्यतेति वचनात् कर्तव्यतावाक्यस्यैवासिद्धेर्घृतेन जुहुयादि-त्यस्य प्रसिद्धार्थत्वादनुवादत्वाभावादवाक्यत्वम् । तदवाक्यत्वात्तदुपक्रमविहिताग्निहोत्रहवनकर्तव्यतावि-धिवाक्यासिद्धिः । अत आह—जुहुयादित्यस्योक्तपर्यवसानि, जुहुयात्, अग्निहोत्रं कुर्यात्, हवनं कुर्यात्, अग्निहोत्रं हवनं कुर्यात्, मात्रानुपपन्नापादितघृतादीतिकर्तव्यतासम्बन्धकर्तव्यतामग्निहोत्रं कुर्यात्, अग्निहोत्रमपूर्वं कुर्यादित्युक्तविकल्पेषु प्रागभिहितदोषसम्बन्धादेतैः सर्वैः प्रकारैः प्रयोगैः परीक्षायां निर्मूलार्थत्वमविपर्यस्तत्वात्, अविपर्यस्तत्वमपूर्वार्थत्वात्, अपूर्वार्थत्वमज्ञातार्थत्वात्, अज्ञातार्थत्वं प्रमाणा-न्तरेण प्रागविदितत्वादिति, तदुपसंहरन्नाह—इतिकर्तव्यतावाक्यप्रत्ययापि न कर्तव्यतागतिः ।

केयमग्निहोत्रं जुहुयादिति हवनमनूद्य घृतादिना तद्विधानं क्रियत इति, तद्धि न प्रसिद्धम्, कथं न प्रसिद्धमग्निहोत्रं जुहुयादित्यत्र हवनस्योक्तत्वादिति चेन्न तस्यैव सर्वप्रयोग परीक्षासामर्थ्याभावात् तत्र तावद्धवनापूर्वकरणार्थतायां प्रधानाग्निहोत्रश्रुतित्यागापत्तिः ।

(केयमिति) केयमग्निहोत्रं जुहुयादिति पदद्वये त्वया यज्जुहुयाद्घृतादिनेति हवनमनूद्य घृतादिना तद्विधानं क्रियते यथा पटं कुर्यादिति प्रसिद्धं पटमनूद्य तत्करणविधानम्, तत्तु न प्रसिद्धम् ।

कर्तव्यतावाक्यासिद्धिमाह—तत्र तावदिति, घृतेन जुहुयादितीतिकर्तव्यतावाक्येन हवनानुवादेन घृते विधेया न च न [illegible] सम्भवति हवनस्याप्रसिद्धार्थत्वात् प्रसिद्धो ह्यनूद्यते तत्र चोन्मत्तप्रलापवदेतद्वाक्यम् अप्रसिद्धार्थत्वाद्, यथा हि कामान्धः पश्यति [illegible] प्रिये । इति प्रलपति तत्र वाक्यं न प्रसिद्धार्थानुवादकमेवमिदमपि वाक्यमिति भावः । अननुवादत्वं कथमित्याह—अननुवादत्वञ्चेति । घृतसम्प्रदानकेति [illegible] सम्प्रदाने तृतीयाभावात्, हवनानुवादेन हवनस्य विधानं घृतेन जुहुयादिति वाक्येनैकवाक्यत्वे तत्र हवनघृतयोर्विध्यनुवादयोः परस्परमाकाङ्क्षाभावात् न हि हवनविधान-स्याग्निहोत्रं जुहुयादिति वाक्यस्य हवनानुवादेन घृतेन जुहुयादित्यनेनाकाङ्क्षाप्रति [illegible] निराकाङ्क्षत्वात्, यतो [illegible] विधानं प्र [illegible] परस्परं सम्बन्धः [illegible], न वा [illegible] सम्बन्धः [illegible] [illegible] तथा च [illegible] [illegible] परस्पराकाङ्क्षाप्रति निराकाङ्क्षत्वं [illegible] परस्परसम्बन्धः [illegible] नेति भावः । ननु द्वारमित्युक्ते [illegible] द्वारमित्युक्ते वा द्वारमित्यपेक्षा-पेक्षणीयस्य [illegible] विध्यनुवादयोर्निराकाङ्क्षत्वेऽप्याकाङ्क्षे—स्यान्मतमिति । द्वारमित्युक्ते [illegible] [illegible] [illegible]—तथापीति । घृतेन जुहुयादिति वाक्यं नाग्निहोत्रं जुहुयादिति वाक्यमित्युक्त्वा [illegible] इतिकर्तव्यता एव कर्तव्यतैव [illegible] न हवनस्य प्रसिद्धार्थत्व [illegible] [illegible]—तस्मादिति । तदवाक्यत्वादिति घृतेन जुहुयादित्यस्यावाक्यत्व [illegible] [illegible] जुहुयादित्यपि वाक्यं न वाक्यम्, इतिकर्तव्यतावाक्यासिद्धेरित्यर्थः । अग्निहोत्रपदस्य हवनस्य विहितस्यैव प्रसिद्धत्व [illegible] [illegible]—

कर्म न प्रसिद्धम्, अग्निहोत्रं जुहुयादित्यत्र हवनस्योत्पत्त्यादिविध्यनुवादत्वं समुपपन्नमिति चेन्न, तथैव सर्वप्रयोगपरीक्षायामसंभवात् । तत्र तावद्धवनापूर्वकरणार्थतायां प्रधानाग्निहोत्रस्तुतित्यागापत्तिः, अर्थाभावादित्यथ प्रसिद्धसम्प्रदाये, उभयोरर्थमन्तरेण विकल्पस्योपन्यासः तुल्योत्तरत्वात्, हवनं कुर्यात्, अग्निहोत्रस्यापूर्वं कुर्यादित्येतयोरर्थविकल्पयोः प्रधानस्याग्निहोत्रस्तुत्यस्य तदर्थस्य च त्याग आपद्येत,
5 पूर्वेण जुहुयादित्यादिविध्यनुवादस्पष्टीकरणार्थमग्निहोत्रं जुहुयादित्यत्र जुहुयाच्छब्दस्य स्वमहत्त्वार्थस्य सार्थक्येऽग्निहोत्रशब्दः पौनरुक्त्यादिनिरर्थक आपद्यते । अथ प्रधानत्वादग्निहोत्रस्य मा भूदग्निहोत्रशब्दो निरर्थक इति सार्थकतोच्यते ततो जुहुयाच्छब्दस्यानैरर्थक्यात् प्रयोगो नोपपद्यते, विधित्वार्थाभावेऽनुवादत्वाभावात्, प्रधानत्वाच्चास्याग्निहोत्रस्य साक्षात् स्वर्गादिकाम्यपुरुषार्थसाधनत्वेन विधानाज्जुहोतिविधानाभ्यां च तदनुपपत्तिः । अत्र च न तु यदग्निहोत्रशब्दः कश्चिदपि कर्मण्यत्र प्रतीतीत्यादि सर्वो ग्रन्थः पूर्वो-
10 त्तरपक्षप्रसङ्गतो योज्यो यावन्नापि घटादिकर्तव्यतायामिव कापि क्रिया प्रसिद्धा यथाऽग्निहोत्रशब्दस्य हवनस्यातिनिरपेक्ष हवनाख्यता वाऽग्निहोत्रस्येति हवनं कुर्यादित्यमुख्योत्तरार्थविकल्पः । अपूर्वार्थपक्षेऽप्यग्निहोत्रशब्दस्य जुहुयाच्छब्दस्यैवार्थत्वात् प्रधानापूर्वताप्याग्निहोत्रशब्दस्य सारार्थत्वेन, विधेयत्वस्तु अथाग्निहोत्रमित्यपूर्वविशेषाभिधानार्थत्वेन कल्प्यते तथासत्यपूर्वाभिधानेन कोऽर्थ इत्यपि यावदनुग्राह्यमिति ग्रन्थस्य योज्यः । आदिग्रहणात् पुरुषप्रमाणकवाक्यस्य प्रामाण्यत्याग इत्यादिदोषः, तथा
15 प्रधानाग्निहोत्रस्तुतित्यागापत्तिपरिहाराभावात्, केवलमिति वसित्यादि ।

अग्निहोत्रोभयकरणार्थतयोरपि विकल्पयोस्तुल्योत्तरत्वात् ।

(अग्निहोत्रेति) अग्निहोत्रोभयकरणार्थतयोरपि जुहोतित्यागापत्तेरग्निहोत्रं कुर्यादग्निहोत्रहवनं कुर्यादित्येतयोरपि विकल्पयोस्तुल्योत्तरत्वादिति उभयार्थविकल्पस्याग्निहोत्रं कुर्याद्धवनं कुर्यादिति तयोः पक्षयोरुक्तदोषयुक्तत्वात् समानोत्तरत्वादिति । अत्रापि अथ पुनरेवं न निर्वहतीत्यादिर्ग्रन्थो योज्यः

---

20 कर्म न प्रसिद्धमिति । अग्निहोत्रं जुहुयादित्यत्र [illegible]

25 [illegible]

30 [illegible]

समयश्चो यावत्स्वगमिप्रापयद्धनानुवादविसिद्धाग्निहोत्राभ्युपगमेऽपि चाग्निहोत्रस्वात्मानियतस्ववचन-प्रसिद्धरूपत्वात् करणासिद्धिः ।

लौकीप्रसिद्धौ छिदिवदनग्निहोत्रत्वं प्रसक्तं तदत्र यदग्नये होत्रं तदग्निहोत्रमिति ताद-र्थ्यमात्रार्थत्वात् प्रधानस्य स्वर्गसाधनतामिमतस्यानग्निहोत्रत्वाद् घृतेन जुहुयादित्यनेन प्रधानस्व-र्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनमितिकर्तव्यताकर्तव्यतया ? 5

लौकीप्रसिद्धौ छिदिवदित्यादि, छिदिरिव छिदिवत्, यथा छिदो द्वैधं लौकिकयूपमात्रफलस्य न्याय्याल्लौकिकदहनात्मकाग्निहोत्रत्वं तथानग्निहोत्रत्वं—यथाग्निहोत्रं जुहुयादित्यस्यापि तच्छेदस्यैवाग्निहोत्र-त्वप्रमाणसप्रमाणकाग्निहोत्रत्वाभावानग्निहोत्रत्वं प्रसक्तं छिदिनिर्वर्त्यंयूपवत्, अत्र चेदपि न चेद् न्यायविज्ञानिभ्यो योऽन्यो यावल्लौकीप्रामाण्ये चास्य लेश्या यूपक्रियाऽप्याप्त्योरिति, तदत्र—अनग्निहो-त्रत्वमत्रापद्यदग्नये होत्रं तदग्निहोत्रमिति तादर्थ्यमात्रार्थत्वात् प्रधानस्य स्वर्गसाधनतामिमतस्यानग्निहो- 10 त्रत्वाद् घृतेन जुहुयादित्यनेनानुवादेन प्रधानस्वर्गकामानभिसम्बद्धजुहोत्यर्थानुवादेन किं प्रयोजनमिति कर्तव्यताकर्तव्यतया ? प्रधानेन स्वर्गकामेन विना किं तया ? यथोक्तम् 'कावरसतेन सूरं सूरसहस्सेण पहिअं मरउ । अक्कसं जेण व तेण व णवर कज्जं परिहराहि' इति । प्रधानार्थमप्रधानत्यागदर्शनात् ।

प्राप्तिप्रतिपाद्यप्रसिद्धावग्निहोत्रे जुहोतिप्रयोगो दानादिप्रसिद्ध्युपरोधेन दाहने एव तावद्विधेय इति परिभाष्य पश्चात् प्रसिद्धे दाहने घृतेन जुहुयादितीतिकर्तव्यताविधिर्योज्यते, 15 अन्यथा तु तथाऽप्रसिद्धेरविधायक एव कुतस्तदनुवादः ?

(प्राप्तिप्रतिपाद्यप्रसिद्धावग्निहोत्र इति) प्राप्त्या प्रतिपाद्या प्रसिद्धिरस्य तस्मिन् प्राप्ति-प्रतिपाद्यप्रसिद्धौ, क ? अग्निहोत्रे, यदग्नये च प्रजापतये च सायं जुहोती'त्यनया प्राप्त्या प्रतिपाद्य-सिद्धौ तु तस्मिन् जुहोतिप्रयोगो दानादिप्रसिद्ध्युपरोधेन दाहन एव तावद्विधेयः । तावच्छब्दः क्रमार्थे, जुहोतीत्यस्य धातुर्लोकप्रसिद्धदानाद्यर्थो न भवति, किं तर्हि ? दहनेनाग्निना दाहयेद्घृतादि 20 द्रव्यमित्युक्तं भवति, अग्निहोत्रं जुहुयादित्येवमिति परिभाष्य पश्चात् प्रसिद्धे दाहने घृतेन जुहुयाद् घृतं दाहयेदग्निना, घृत दाहयेत्, अग्निपूर्वं दहेदिति प्रावार्थमनूद्येतिकर्तव्यताविधिर्योज्यते लोक-प्रसिद्धिविपरीतेन व्युत्पादनेन, अन्यथा तु लोके दहनाद्यव्यवहृतत्वात् कथं दहनमनूद्य घृतादीतिकर्त-

र्वोऽग्निहोत्रमप्यस्य एके इत्यभिप्रायस्यापि न्यायत्वाच्च युक्तः । अग्निहोत्रहवनं कुर्यादिति विकल्पं दर्शयति—स्वर्गमभिप्रायवदिति । यूपं छिनत्तीति विध्यन्तरविधानपेक्षमग्निहोत्रलौकीप्रसिद्ध्यभ्युपगमे दोषमाह—लौकीप्रसिद्धाविति यथा यूपं छिनत्तीति 25 छिदिः केवलं यूपस्य ... यदग्निहोत्रमप्यग्नये होत्रमित्येतावन्मात्रकं भवेत्तु स्वर्गादिफलम्, तथा च स्वर्गसाधनत्वाऽभिमतमग्निहोत्रमनग्निहोत्रमेव स्यात् ... एवम् घृतेन जुहुयादित्यनुवादोऽपि व्यर्थ एव प्रधाना-ग्निहोत्राभावादिति भावः । अत्रापि पक्षे पूर्वोक्तन्यायमतिदिशति—अत्र चेति । यथोक्तमिति कावरसतेन सूरं सूरस-हस्सेण पहिअं मर । अक्कसं जेण वा तेण व णवरं कज्जं परिहर इ इति छाया । अनया कारिकया प्रधानार्थमप्रधानत्यागो दर्शितः । दाहन एवेति अग्निहोत्रं जुहुयादिति वाक्येनाग्निहोत्राख्यं दहेदिति विहितं प्रसिद्ध्यर्थं दहनमनूद्य घृतेन 30 जुहुयादिति दहनमिष्य दाहयेदितीतिकर्तव्यता विधीयत इत्यर्थः । अग्निहोत्रस्य च प्रसिद्धिर्नेदमग्नये नेति वाक्येन तथा च घृतेन जुहुयादित्यत्र जुहोतिर्धात्वर्थमुपेत्य दाहने वर्तते तथा च घृतेन जुहुयादिति वाक्यस्य दहनेनाग्निना दाहयेद् घृतद्रव्यमित्यर्थ इति प्रतिभाति सम्प्रदायादिति लोकप्रसिद्धिविपरीतव्युत्पादनमाश्रित्य विचार्यं तथा च हुधातोर्यज्ञार्थ

न्यत्वा विधीयेत ? तथाऽप्रसिद्धेरविधायक एव, कुतस्तदनुवादः ? इत्यभिप्रायो हेत्वर्थे, तथा—देव प्रयोगे
वाक्यार्थत्वेनाप्रसिद्धेरग्निहोत्रं जुहुयादित्यत्रैव तावज्जुहुयाच्छब्दो वाक्यस्याविधायकत्वे प्राप्त एवानुवादः ।
अत्रैव ननु वेदाविवत् कर्तव्यताप्रतिपत्तिरिति कर्तव्यतायाम् इत्युपक्रम्य यस्यो योऽन्यो वाक्येऽन्यता-
साधुता वा तद्वदिति । एवं तावज्जुहुयाच्छब्दस्य वाक्यार्थत्वाभावात्तुल्यम् होमशब्दस्य च ।

5 तथाभूतार्थाभ्युपगमे च प्राप्तेरभ्युदासः, घृतेन जुहुयादित्यत्र जुहोतिप्रयोगात् । यदा चाऽयं घृतेन जुहुयादिति प्रयुज्यते तदा अयमगतार्थ इति विज्ञायेत, अप्रमत्तप्रयुक्तत्वात्, इषे त्वादिवत्, अथवाऽक्षरविघातात् ।

तथाभूतार्थाभ्युपगमे चेति, अभ्युपेत्यापि वाक्यात्मकमेव दानमिति दोषं ब्रूमः, कोऽसौ ? प्राप्तेरभ्युदासः, येयं प्राप्तिर्धर्मरूपे च प्रमापयते च सायं जुहोतीति यथा प्राप्तिरसौ प्रक्षेपो दानमिति तस्याः
10 प्राप्तेरभ्युदासः, कस्मात् ? घृतेन जुहुयादित्यत्र जुहोतिपदप्रयोगात् । अन्यथाप्राप्तो घृतेन जुहोतिनोक्तत्वा-त्तदर्थस्य गतत्वात्प्रयोगानर्हत्वात् पौनरुक्त्यमस्य स्यात्, प्रयुक्तत्वमतो ज्ञायते प्राप्तिरनुवादजुहोतिरनर्थक इति तस्मात् प्राप्तेरभ्युदासो जुहोतिप्रयोगात् । यदा चायं घृतेन जुहुयादिति प्रयुज्यते तदा अयमगतार्थ इति विज्ञायेत यथान्येन शब्देनाप्राप्तोऽर्थोऽभिहितः स्यात्, किं कारणं ? अप्रमत्तप्रयुक्तत्वात्, अप्रमत्तेन हि वेदेन प्रमत्तत्वात् पुरुषादिप्रयत्नेन रागाद्यविद्यादियोगरहितेन प्रयुक्तोऽयं त्वन्मतेन, अकिञ्चिज्ज्ञेनैव पुरुषे-
15 णाप्रमत्तेन विदुषा प्रयुक्तत्वादस्मन्मतेन मा भूत् सर्वपुरुषाप्रामाण्ये अज्ञानाच्च पुरुषाणामेनोपलम्भित्वात् प्रामाण्यमेवेति । अथ हि घृतेन जुहुयादित्यत्र जुहोतिशब्दोऽप्रमत्तप्रयुक्तो न येनकेनचिद्भ्रान्त्योपात्तप्रति-युक्तस्येव तुल्यः काकदन्तादिवस्येव तुल्यः । क इव ? इषे त्वादिवत्, यथा—'इषे त्वोर्जे त्वा वायवः स्थोपा-यवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इत्यादिशब्दा अगतार्था इति विज्ञायन्ते तथायं घृतेन जुहुयादिति वाक्ये जुहोतिरप्रमत्तप्रयुक्तत्वादगतार्थ इति विज्ञायेत नान्यथा, अथवाऽक्षरविघातात्,

---

20 एवं लोके प्रसिद्धेरप्रसिद्धेस्तावत्स्येव विधायकं न भवतीति नवं घृतेन जुहुयादित्यनुवादकं भवतीत्यर्थः । [illegible] वाक्यात्मको दानं येन प्रक्षेपः स च देवे आधारे हविषोऽधीति तत्कालाकारस्य इत्युक्तम्, [illegible] एव नवं [illegible] जुहोतीति [illegible] जुहोतीति च न प्राप्तिरप्रयोग इत्युक्तमिति निगमनम् । अत्रापि ननु वेदाविवत् नियमात्[illegible] प्रतिपत्तिरित्यादिभिन्नो [illegible] इत्याह—अत्रैव [illegible] । ननु भवतु [illegible] दोषं ब्रूम इत्याह—तथाभूतार्थेति [illegible] प्रमापयते [illegible]
25 [illegible] घृतेन जुहुयादित्यत्रापि जुहोतेः पौनरुक्त्यं [illegible] स्यात्, [illegible] घृतेन जुहुयादित्यत्र जुहोतिप्रयोगो न स्यात् अन्यथा पुनरुक्तिमेव [illegible] जुहोतिरनर्थक [illegible] भाषा । [illegible] पुनः [illegible]—यदा चाऽयमिति, यदा घृतेन जुहुयादित्यत्र जुहोतेः प्रयोगः क्रियते तदा विज्ञायते-ऽन्यगतार्थ इति [illegible] अप्रमत्तप्रयुक्त इति । [illegible]—अप्रमत्तेन हीति त्वन्मतेन—अपौरुषेयत्वाभिमतमीमांसकमतेन अस्मन्मतेन—तीर्थकराभिमतमतेन । ननु सर्वपुरुषाणामप्रामाण्ये
30 [illegible] पुरुषाणामेकत्वात् [illegible] कोऽपि प्रमाणं न [illegible] पुरुषो विदुषः प्रयुक्तत्वादित्यु-क्तिमात्—मा भूदिति । अप्रमत्तप्रयुक्तत्वादेव घृतेन जुहुयादित्यत्र जुहुयाच्छब्दो [illegible] वा न [illegible]—[illegible] हीति । घृतेन जुहुयादित्यत्र जुहोतिशब्दो न गतार्थः अप्रमत्तप्रयुक्तत्वादिति प्रयोगस्य दृष्टान्त-माह—इषे त्वादिवदिति । [illegible]—अथ वाऽक्षरविघातादिति अक्षरभिदा-अक्षरभिदा । एवं [illegible] [illegible] घृतेन जुहुयादिति [illegible] वा [illegible] नेति [illegible]

यथा द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुण्डक० १ मु० १ खं० ४-५ ६ सू०) इतीयमक्षरविद्या कथिद्गतार्थेति विज्ञायते अनन्यथोपपन्नत्वात्, तथाऽयमपि जुहोतिप्रयोगो नान्यथा, यदि प्राप्तिमात्रविधानार्थोऽग्निहोत्रं जुहुयादित्यत्र होत्रशब्दो जुहोतिशब्दो वा ततोऽयं स्रुवेण जुहुयादिति 5
पुनर्जुहोतिर्न प्रयुज्येत, प्रयुक्तस्तु तस्मात् प्राप्तिर्मुख्यैवेति।

एवं तर्हि—

प्राप्तिवाक्यप्रवृत्तजुहोत्यनुवाद इति चेन्न तस्य विधिलिङ्विषयस्याप्रवृत्तेरज्ञातत्वात्। विध्यनुवादस्य तद्विषयतेति चेन्न, अज्ञातत्वादेवाननुवादत्वात्, कुत एवं ज्ञायते जुहोत्यर्थे जुहुयाच्छब्दः प्रयुक्तो न स्वार्थे इति। 10

(प्राप्तीति) स्यान्मतं प्राप्तिवाक्येऽग्नये जुहोतीति श्रुतस्याग्निसम्प्रदानकस्य दानार्थस्य जुहोतेः अनुवादोऽयं स्रुवेण जुहुयादिति जुहोतिरित्येतच्च न, तत्र विधिलिङ्विषयस्याप्रवृत्तेरज्ञातत्वात्,—नैतदप्युपपद्यते तत्र—प्राप्तिवाक्ये जुहोतीत्यव्यापारार्थमात्रकर्तृसाधनतामात्रार्थजुहोतिधातुप्रयोगस्य विधिलिङो विषये व्यापारार्थे वृत्त्यभावात्, अस्य च जुहुयाच्छब्दस्य विधिलिङ्विषयस्य नियोगार्थस्य नियोगवाचिते जुहोतिशब्दार्थे तत्राप्रवृत्तेरयं विधानार्थो न विदित एव, तस्मादज्ञातत्वात् प्राप्तिवाक्यप्रवृत्तजुहोत्यर्थानु- 15
वादायोग्यता, ज्ञातमनूद्यते, अज्ञातश्च विधीयत इति वचनात्, तस्मादनुवादायोग्यत्वादयुक्तमुक्तं प्राप्ति-
वाक्यप्रवृत्तजुहोत्यनुवाद इति। विध्यनुवादस्य तद्विषयतेति चेत्—स्यान्मतं व्याकरणभाष्येऽभिहितं 'व्यत्ययो बहुलम्' (पा० ३।१।८५) 'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन॥' (पा० म० भा० ३।१।८५ सूत्रे) तस्माज्जुहोत्यर्थे जुहुयाच्छब्दस्य प्रयोगात् प्राप्तमेवानूद्यते तद्विषयत्वादेवास्यापीति। एतदपि न, अज्ञातत्वादेवाननुवा- 20
दत्वात्, सव्यापारणार्थव्यवस्थेमाभिव्यापारणार्थत्वात्, इदं त्वया सन्निहितविधिवाक्योपपादनेन प्रमाण्य

प्रयुज्येत प्रयुक्तश्चायो विज्ञायते यत्पत्रान्तरप्राप्तस्वार्थं परित्यज्य इति विवृणोति—तत्रापीति। ननु स्रुवेण जुहुयादिति यत्पत्रान्तरे जुहोतिः प्राप्तिवाक्यजुहोत्यर्थे वेदानुवाद इत्याशङ्कते—प्राप्तीति। प्राप्तिवाक्ये जुहोतिपदं श्रूयते न तु जुहुयात्पदम्, तस्मात्तु तदर्थं विधायकमिनुवादिति—तत्रेति। यदग्नये च प्रजापतये च सायं जुहोति इति प्राप्तिवाक्ये केवलं जुहोतिपदमव्यापारार्थमात्रकर्तृके दानार्थ एव वर्तते ननु विधिलिङ्विषये व्यापारार्थकर्तृके स्रुवेण जुहुयादित्यत्र जुहुयाच्छ- 25
ब्दस्य व्यापारार्थकर्तृके वर्तते, न तु जुहोत्यर्थे एवम् प्राप्तिवाक्येन निरोपाक्षणत्वात् जुहुयाच्छब्दस्यानुवादक इत्याह—प्राप्ति वाक्य इति। प्राप्तिवाक्यस्थजुहोतेर्व्यापारमात्रेण व्यापारार्थकर्तृकेऽर्थे वृत्तिर्न विज्ञायत इत्याशङ्क्य—स्यान्मतमिति व्याकरणे—भाष्यकारपतञ्जलिपादैः वार्त्ते। सुप्तिङुपग्रहेति अस्यति शास्त्रकृत सुप तिङ् परस्मैपदात्मनेपदानां लिङ्ग पुरुष काल वर्णादेः व्यत्ययमिच्छन्ति स च बाहुलकेनादृष्टं सिद्ध्यतीति तदर्थः। तद्विषयत्वादेवेति, यदग्नये चेति वाक्यस्थजुहोतिविषयत्वात्स्रुवेण जुहुयादिति वाक्यस्थजुहुयात्पदस्यैतज्जोऽनुवादत्वं युज्यत इति भावः। 30
तदेतन्दपेति—एतदपि नेति जुहोतीत्यस्य जुहुयाच्छब्दस्यानुवादायोग्यत्वात् यत्रैव विधत्वं न त्वनुवाद-
मित्याह—अज्ञातत्वादेवेति। सव्यापारणेति स्रुवेण जुहुयादिति व्यापारार्थकजुहोतेर्वर्तमानात् यदग्नये च प्रजापतये च सायं जुहोतीति निर्व्यापारार्थकजुहोतिप्रयोगस्य व्यावृत्तेरर्थः। तथा च जुहुयाच्छब्दो जुहोत्यर्थे जुहोतिशब्दो वा जुहुयादर्थे

विशेषसिद्ध्यभावात् इत एवं ज्ञायते जुहोत्यर्थे जुहुयाच्छब्दः प्रयुक्तो न स्वार्थं एव—जुहोतिर्वा जुहुयादर्थे प्रयुक्त इति, तस्मादविदितार्थत्वाद्विधित्वं विधित्वात् प्रागुक्तादोऽनुवादत्वात्त्वेवमपि न युक्तम् ।

अभ्युपेत्यापि जुहोत्यर्थे जुहुयाच्छब्दस्य इमं दोषं ब्रूमः—

हवनाद्य भावनमेवमनवगमितमेवाभिप्रेतस्य स्यात् ।

5 (हवनाद्येति,) विध्यर्थाभावात् पुरुषो हवनकर्मण्यनियोजित एव, ततो भावनं स्वर्गोत्पत्त्य विशिष्टसुखफलस्य दैवविशेषस्य विशिष्टसुखसाधनमूलतयाऽभिप्रेतस्यार्थस्य भावनोपायं स्यात्, यदर्थमभिहितमिदं वाक्यं स्वर्गकामस्त्वामहमग्निहोत्रकर्मणि पुरुष नियोक्ष्यामीति, तदर्थं हि वाक्यमभि-होम जुहुयादित्येवमुक्तमनेनैव कर्मणा स्वर्गो भाव्यते तस्मादिदं कुर्विति, तदर्थज्ञापनाभावे विधानेन वाक्येन जुहोतीत्युक्तेन ।

10 अत्राह भागमिष्टिवाग्निहोत्रकरणवाक्यार्थविकल्पगतदोषपरिहारार्थमियमर्थव्याख्याऽऽश्रीयते—

प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्य स्वर्गकामकर्मत्वाभिधानादवगमितकामानुरूपकर्मण एकत्वादेव तद्विषयक्रियाविशेषगतेः क्रियाप्राप्यत्वाच्च कामस्य अलकावगमितभ्रमरटनवत् कुर्यादित्यर्थापन्नो विध्यर्थ इति जुहुयादित्यर्थापत्त्यर्थोऽनुवाद इतीयं व्याख्या व्याख्या, व्यवकार्योपपत्तित्वात् प्राप्तिवाक्ये प्रधानस्तुत्यत्यागगुणकृत्यपीति चेत्,

15 प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्येत्यादि, इदं तावत्स्वकल्पितं यदग्नये च प्रजापतये च सायं जुहोतीत्यनया प्राप्त्या विहितमग्निहोत्रस्य स्वरूपं सिद्धम्, अतः प्राप्तिविहितस्वरूपसिद्धेरग्निहोत्रस्य कर्मत्वेन च प्रकृतात् कस्य ? कर्तुः स्वर्गकामस्य कर्मत्वाभिधानात्, ततः किमिति चेत् ? स्वर्गफला-भिहितविशिष्टकर्मविषयकामाभिधानविध्यभवनात् कर्मापि तदग्निहोत्राख्यं तदनुरूपं विशिष्टमेवेत्युक्तं भवति अतः स्वर्गकामकर्मत्वाभिधानादवगमितकामानुरूपकर्मोक्तस्वर्गकामकल्पावबोधनेन कामानुरू-
20 पस्यैव कर्मण एकत्वादेव तद्विषयक्रियाविशेषगतेर्विशिष्टफलविषयकामः पुरुषः कर्ता कर्मापि तदनुरूप-त्वाद्विशिष्टमेव तद्विषयैव क्रियापि कामसिद्धफलविषयकामसम्बन्धिकर्मा, कामस्येदं यथावत्सावनुगम

प्रयुक्त इत्यत्र विधिरूपत्वाभिधानं इति भावः । यदि जुहुयाच्छब्दस्य जुहोत्यर्थतास्वीकारो न दोषमावर्तयति—हवनाद्येति अग्निहोत्रं जुहुयादित्यत्रापि यदि जुहुयाच्छब्दो जुहोत्यर्थे तदा विध्यर्थाभावात्तेन स्वर्गं न विदितं बोधयेत्, अतो यं तेन वाक्येन विधित्सुमुद्दिश्य [illegible] किमनेन वाक्येनेति भावः । भावनमिति । वाक्यं इत्यर्थं न तु प्रेरणाविषये भावना-
25 त्वोपलब्धिसमाभावात्, एवमेवाग्निहोत्रं हुतविशेषस्य स्वर्गस्य दैवविशेषस्य स्वर्गस्य वा विशिष्टसुखसाधनस्य [illegible] तस्यैव तु पुरुषस्याग्निहोत्रादिकर्मणि प्रयोक्तव्येति नार्थेन [illegible] भावः । अथवा तु भावनं पुरुषस्य [illegible] व्यापारविशेषः [illegible] निश्चयेन प्रतीतेः एवम् [illegible] पुरुषं न [illegible] ततो विधेयकमिति । अग्निहोत्रं जुहुयात् स्वर्गकाम [illegible] स्वर्गकाम [illegible] बोध्यते येन जुहोत्यर्थत्वाविरोधः प्रयुक्त मतेषु किन्तु [illegible] जुहुयाच्छब्दस्य [illegible] इत्यनेन पूर्वपक्षी
30 आह—प्राप्तिविहितेत्यादिना । अग्निहोत्रं स्वर्गकाम [illegible] यदग्नये च प्रजापतये चेति प्राप्ति-वाक्येन सिद्धं तच्च स्वर्गकामपुरुषस्य कर्मत्वेनाभिहितम् [illegible] कम्बलवत् तदग्निहोत्रं कर्मविशिष्टमेव स्वर्गकाम [illegible] तदभिधं विशिष्टं कर्म न विशिष्टं क्रिया-मन्तरेणेति क्रियाविशेषस्य गमनम्, क्रिया विना [illegible], सापि क्रिया [illegible]

व्यापारविशेषोऽपि विशिष्टोऽप्रसिद्ध एवेति गम्यते । किं कारणम् ? तत एव शब्दात् तस्य क्रियावि-
शेषस्य गतेर्वाक्यान्तराभावात्तद्विशेषगतिरतः क्रियाविशेषगतः क्रियासाध्यत्वाच्च कामस्य, न ह्यन्यः
कश्चिदुपायोऽस्ति कामप्राप्तौ क्रियातः, क्रियया शब्देन वा तद्भावगमनात् । यथा स्वभक्ष्य वीथी
मध्यपतितस्य हस्तं प्रसार्य कपर्दिकां देहि कपर्दिकां देहि भो ! इति वा याचमानस्य कामोऽवग-
तः क्रियया शब्देन वा प्रकरणविशेषसम्बन्धात्, सा च क्रिया नोपदेशमन्तरेण सिद्ध्यति, अतस्त्का- 5
मावगमितकामस्याग्निहोत्रं स्वर्गकाम इत्युक्ते जुहुयादित्यर्थोऽवगम्यो विध्यर्थोऽवगमितकामत्वात्, तस्मा-
त्तस्य यो वाऽर्थः स च विशेषसम्बन्धो वाक्यन्यायेन भवति । यथा समब्रह्मचारिणा सहाधीत इति
समानेन ब्रह्मचारिणाऽधीते, केन सामान्येन समानेन ? प्रकृतविशेषपरत्वात्, प्रकृताध्ययनक्रिययेति
गम्यते, एवमिदमपि वाक्यम्, अनेन वाक्यन्यायेन प्रकृतस्वर्गकामाग्निहोत्रकर्मानुरूपविध्यर्थक्रियोपदे-
शताऽस्येति गम्यते, अतो हेतुहेतुमद्भावः प्रतिपादितः । नाभिविहितस्वरूपसिद्धेरग्निहोत्रस्येतत्रापि 10
भावजुहुयादित्यर्थापत्त्यर्थोऽनुवादोऽग्निहोत्रं स्वर्गकाम इत्येतावता कुर्यादध्याक्षेपेण वाक्येन गतार्थत्वात्,
तदेव जुहुयादित्यनुवादो न विधिरितीयं व्याख्या न्याय्या, अन्यार्थोपपत्तित्वात्, यागविहितव्याख्यावि-
कल्पसमुच्चयोपाभावाच्च न्याय्येति मन्तव्या, यस्मादविवाक्ये प्रधानगुणत्यागगुणकल्पनीति, यदग्निहोत्रं
यागमग्निहोत्रं जुहुयादित्यस्य वाक्यस्याग्निहोत्रं कुर्यादित्यर्थव्याख्याविकल्पे विध्यर्थवाचित्वाभिमतस्य
तत्प्रधानजुहोत्यर्थत्यागस्तत्र गुणप्रमाणत्वात्, तत्त्यागे वाक्यमेवार्थापत्तिः पौनरुक्त्यादिदोषजात तत् 15
त्यत्र नास्ति, जुहुयादित्यस्यानुवादत्वादेव हवनं कुर्यादित्यत्राप्यग्निहोत्रप्रधानत्याग इत्यादि यद्दोषजात
तदपि नास्ति, तस्मादियं व्याख्याऽविवाक्ये प्रधानगुणत्यागगुणकल्पनीति, तस्य जुहोतेरनुवादत्वेन
पौनरुक्त्यत्यागमेवाप्यभावात्, चेदिमाशङ्कयाम्, एवं चेन्मन्यसे ।

इत्येवं ब्रुवन्तं परं दृष्ट्वाऽऽचार्य उत्तरमाह—

तन्न, अर्थापत्तेः पौनरुक्त्यादनुवादत्वासम्भवात् । 20

तस्यार्थापत्तेरित्यादि, एषाऽपि व्याख्या नोपपद्यते, किं कारणम् ? पौनरुक्त्यात् प्रयोगायोग्यत्वं

गम्यते तदर्थमेव च जुहुयात्कल्पोऽनुपपत्तौ अभिमतमाचष्टे–इदं तावदिति । क्रियया शब्देन वेति, क्वचित्
क्रियैवमवगम्यते क्वचिच्च शब्दात् यथा मार्गमध्यपतितस्य हस्तप्रसारणक्रियया कपर्दिकां देहीति शब्देन प्रकरण-
विशेषविशिष्टेन च तदिच्छावगम्यते तथेति भावः । वाक्यन्यायेनेति [illegible]
स्वार्थस्य पदार्थतत्पदार्थसंसर्गबोधे वाक्यात्मकता यथा चैत्र ! गामभ्याज शुक्लां दण्डेनेत्यादि [illegible] कर्ता निर्दिष्टः 25
कर्मक्रियागुणा अनिर्दिष्टाः गामित्युक्ते कर्म निर्दिष्टं कर्तृक्रियागुणा अनिर्दिष्टाः अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्तृकर्मगुणा अनिर्दिष्टाः
शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मक्रिया अनिर्दिष्टाः । चैत्र गामभ्याजेत्युक्ते तु चैत्र एव कर्ता नान्यः गामेव कर्म
नान्यत् अभ्याजेव क्रिया नान्या शुक्ल एव गुणो न कृष्णादिः एवं पदानां सामान्ये वर्तमानानां वाक्ये विशेषेऽवस्थानं स वाक्यार्थ
इति वाक्यन्यायः । केन सामान्येनेति, [illegible]
[illegible] ब्रह्मचारिणी [illegible] 30
[illegible]
[illegible] इति भावः । [illegible] तदर्थापत्ते-
[illegible] । अर्थापत्तेरिति, [illegible]

तथाभ्यासानुवादस्यासम्भवात्वभ्यासानुवादासम्भवात्वमेत्यभिसम्बन्धः । इदञ्च पुनरुक्तमर्थापन्नस्य पुनर्वचन लक्षणः पुनरुक्तविभागस्थानविकल्पः । द्विविधं पुनरुक्तं निग्रहस्थानम्, यथा 'शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्' 'अर्थादापन्नस्य स्वशब्देन पुनर्वचनम्' (गौ अ ५ आ २ सू १४—१५) इति, तस्मादिदमर्थादापन्नस्य पुनर्वचनं विशेषविधानमन्तरेणार्थापन्नार्थस्य स्वशब्देनोच्चारणात् । एतेन जुहु

5 यादित्यत्र न स्यात् पुनरुक्तम्, एतद्विशिष्टवचनविधानात् । इह तु स्वर्गकामानुरूपकर्मानुरूपक्रियाविशेष-विध्यर्थतायाः उपदेशान्तरेण गतार्थतयाऽभ्युपगतत्वात् । एतद्विशिष्टवचनविधानाज्जुहोतेरनुवादतायाम् मूलवाक्यगतजुहोतेर्नासिद्धेरननुवादत्वेन ।

किञ्चान्यत्—

जघन्यतरा चेयं व्याख्या, साक्षाच्छ्रुतविधेर्जुहुयात्त्यागेन चार्थापन्नार्थाश्रुतानूदितजुहु

10 यादिकल्पनात् स एव पुरुषप्रमाणकत्वदोषः शब्दाप्रामाण्यदोषश्च ।

(जघन्यतरेति) जघन्यतरा चेयं व्याख्या, कस्मात् ? साक्षाच्छ्रुतविधेर्जुहुयात्त्यागेन चार्था-पन्नार्थाश्रुतानूदितजुहुयादिकल्पनात् स एव पुरुषप्रमाणकत्वदोषः शब्दाप्रामाण्यदोषश्च । जुहुयादित्यस्य क्रियाक्रमस्य विध्यर्थस्य साक्षाच्छ्रुतस्य सतस्तस्य त्यागं कृत्वाऽर्थापन्नार्थस्य—अर्थादापन्नोऽर्थोऽस्येत्यर्थापन्नार्थः, कोऽसौ ? स एव जुहुयाच्छब्दोऽनुवादाभिमतः, तस्माच्छ्रुतस्यार्थापन्नार्थस्यानूदितविकल्पनात्—

15 अनुवादकल्पनाद्यभावविपर्यये ।

किञ्चान्यत्—

विधीयमानवाक्यार्थविषयानुपपत्तेश्च वाक्यभेदस्य पुनरुक्तस्य चाङ्गीकरणात् ।

(विधीयमानेति) विधीयमानो वाक्यार्थो विधीयमानवाक्यार्थः स विषयोऽस्येति विधीय-मानवाक्यार्थविषयः स एव जुहुयाच्छब्दस्तस्यैवानुवचनं स एवानुवादस्तस्मात् विधीयमानवाक्या-

---

20 विकल्पयतो नानुवादत्वमिति भावः। द्विविधमिति वचनं पुनर्वचनमर्थादापन्नस्य पुनरभिधानमपरमिति द्विविधमर्थं अन्यथा [illegible] पुनर्वचनमेकं पूर्वं येन शब्देन योऽर्थः [illegible], अर्थादापन्न-स्याभिधानमन्यदिति द्विविधं पुनरुक्तं स्यादिति । शब्दार्थयोरिति शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादा-दिति गौतमसूत्रम् [illegible] पुनरुक्तं वा भवति [illegible] इति [illegible] पुनरुक्तम् अनुवादो न पुनरुक्तम् [illegible]

25 [illegible] इत्यर्थः । अर्थादापन्नस्येति [illegible] पुनर्वचनं [illegible] इत्यर्थः । एतेन जुहुयादिति [illegible] इह त्विति [illegible]

30 [illegible] इति भावः । [illegible] जघन्यतरा चेय-मिति । [illegible] स एवेति । तस्माद्विपर्यये इति [illegible]

35 [illegible] इत्यर्थः । [illegible] विधी

र्थविधानानुवदनाय, किं संपूर्णं ? वाक्यमेतस्य पुनरुक्तस्य चाङ्गीकरणम्, न हीदमेव वा स्वर्गकामा-
भिसम्बद्धाग्निहोत्रं विधानं तदनुवदनञ्च कर्तुं शक्नोति स्वर्गकामकर्तृकस्याग्निहोत्रकर्मणो वाक्यान्तरेणा
भाषितत्वात्, यथाऽसौ देवदत्त इत्यत्र तु देवदत्त एवानूद्यते विधीयते च, प्रत्यक्षप्रसिद्धस्त्वयसौ विध
योऽनूद्यते, एवमिह प्रसिद्धार्थापेक्षया स तु नास्ति, तस्मादुभयार्थकल्पनादेकस्य तदसम्भवाच्च वाक्य
भेददोषः, पौनरुक्त्यमतु विशेषविधानाभावात्। विशेषविध्यर्थो ह्यनुवादो युक्तो यथाऽयं देवदत्त 5
इत्यपशब्देन सामान्यप्रसिद्धार्थमनूद्य देवदत्तविधानम्, न तु तथाऽत्र कश्चिद्विशेषो विधीयते तस्माद्-
विशेषाभिधानात् पौनरुक्त्यम्। तस्मादग्निहोत्रं जुहुयादित्यस्य वाक्यस्य प्रथमत्वादेकवाक्यगतत्वाच्चान
योर्विध्यनुवादयोरर्थोपमाग्निहोत्रकर्मविधिरेव जुहोतेरनुवादे च वाक्यभेदपुनरुक्तदोषाङ्गीकरणमेवेत्य-
भिसम्बध्यते। एवं तावदग्निहोत्रं जुहुयादित्यत्र जुहुयाच्छब्दो नानुवादो घटते, न चाऽग्निहोत्रं स्वर्ग-
काम इति विधिः। 10

किञ्चान्यत्—

अनुवादस्य च प्राप्तविशेषणपरार्थविपर्यासाद्नुवादत्वाभावः।

(अनुवादस्य चेति) अनुवादत्वं हि प्राप्तविषयार्थम्, यथाऽयं देवदत्त इत्यर्थसम्प्रार्थः
प्राप्यर्थप्राप्तो देवदत्तार्थोऽधुना प्राप्यणीयः। एव प्रसिद्धाप्रसिद्धिभ्यां विशेषणविशेष्यौ, तावेवोपकार
कोपकार्यत्वाभ्यां परार्थस्वार्थौ, न तथाऽग्निहोत्रं जुहुयादित्यत्र प्राप्तविशेषणपरार्थविषयत्वमग्निहोत्र- 15
जुहुयाच्छब्दयोः, अतोऽप्राप्ताविशेषणापरार्थत्वसाम्यादनुवादत्वाभावः।

अभ्युपगम्यापि प्राप्तावि दोष उच्यते—

यदप्यनुच्यते कर्तव्यताप्रसिद्ध्यर्थमितिकर्तव्यतावाक्य घृतेन जुहुयादिति, तस्य
विधिविषयविप्रकृष्टीभूतत्वाच्च कर्तव्यताविषयत्वम्।

(यदिति) यदप्यनुच्यते कर्तव्यताप्रसिद्ध्यर्थमितिकर्तव्यतावाक्य घृतेन जुहुयादिति, 20
तस्य विधिविषयविप्रकृष्टीभूतत्व जुहुयाच्छब्दस्यानुवादाभिमतस्य, किं कारणम् ? प्राप्तविशेषणपरार्थ

यत्वाभावेति। पौनरुक्त्यं तावदाह—न हीदमेवेति, अग्निहोत्रं जुहुयादिति वाक्यमेव कर्मस्वरूपाग्निहोत्राभिधानं तस्यैव चानु-
वदनं कर्तुं शक्नोति अग्निहोत्रविधेर्वाक्यान्तरेणाभासत्वात्, अप्राप्ते हि शास्त्रार्थे प्राप्तव न विधीयत इति नियमः। ननु देव-
दत्त इत्यत्र तु प्रत्यक्षसिद्धमेवावाच्येनानूद्य देवदत्तत्वं विधीयते इत्येकस्यैव वाक्यस्योभयमुपपद्यते प्रकृतस्यानन्तरं तु
अनूद्य किञ्चित् कश्चिद्विशेषसामान्याधोभयवत्त्वस्येतुमवदत्त्वाङ्गीकारे च वाक्यभेद एवेति भावः। तथा वाक्यभेदाङ्गीकारेऽपि 25
विशेषस्य कस्यचिदभावात् पुनरुक्तमेवाह—पौनरुक्त्यमित्यादि। विधिविहितस्य पुनरनुवादः स्वरूपं विध्यार्थप्रतिषेध-
विध्यार्थत्वमस्त्येवमप्राप्तार्थं अनुवादः क्रियते यथाऽयमेवैष यजेतेति विधाय तदिति यत्तु तदिति पाप्मानं योऽयमेवैष
यजेतेति स्वरूपं क्रियते इत्येवोक्तविधान स्यातोऽयमनुनिमन्त्रणादि च क्रियते जुहोतीति निन्दार्थं अग्निहोत्रं जुहोतीति
विधाय तत्र जुहोतीति इत्यादावविशेषविधानार्थं दर्शपूर्णमासाभ्यां यजेत सोमेन यजेतेति पृथक् पृथक् विधाय दर्शपूर्णमा
साभ्यामिष्ट्वा सोमेन यजेतेति क्रमस्वरूपप्रयोजनार्थं तत्र तथानुवादः क्रियते प्रयोजनमन्तरेणैव च पुनर्वचनेऽनुवाद एव न स्यात् 30
पुनरुक्तिरेव स्यादित्यभिप्रायेणाह—अनुवादस्य चेति। अनुवादः प्राप्तविषयो विशेषणविषयः परार्थविषयश्च भवति प्रसिद्धत्वात्,
अग्निहोत्रजुहुयाच्छब्दयोश्च न तथेत्यनुपपत्त्यम्बन इति भावः। अथ प्राप्तविशेषणपरार्थविषयत्वमभ्युपगम्यापि दोष आह—यदप्य-
नुच्यत इति। विधिविषयेति, तत्र जुहुयादित्यत्र जुहुयाच्छब्दो विधेयं विषयतयासम्बन्धं विप्रकृष्टत्वाज्जुहुयात्स-

विषयत्वादनुवादस्य, अप्राप्तविशेष्यस्यार्थविषयत्वादि वेदादिवाक्यगत एव तावदनुवादकल्पोऽनुपपन्नो भवते प्राप्तस्यापभावात्, तस्मादनुवादस्तु पूर्वेण जुहुयादित्यत्र जुहुयादित्यस्य दृष्टः स्यात्, तत्परिच्छेपकत्वस्यार्थप्रतिबन्धकस्यैवेत्यापन्नोऽप्राप्तविशेषणापरत्वात् विधेर्विषयविप्रकृष्टीभूतार्थत्वेति तत्र विधिविषयविप्रकृष्टीभूतार्थत्वाच्च कर्तव्यताविषयत्वमितिकर्तव्यतायाः, यथा इह शाकिमादि
5 श्लोकाद्यपानाम् ।

किञ्चान्यत्—

इति घटितमघटितमितिकर्तव्यस्यैव कर्तव्यतेति । तत्रश्च प्रतिसमाधेये विरुद्धतरदोषापादनं विधिविषयविप्रकृष्टीभूतार्थत्वादिति गण्डस्योपरि स्फोट आपादितः, ततोऽहमेव ते बुद्धिसंविभागं करोमि श्रूयताम् । लौकिकजुहोत्यर्थानुष्ठानप्रवृत्तोपदेश एव स्वयं परमनुवादः
10 स्यात् । स चानुपपन्ननियमार्थं उपदेशस्त्वदिष्टविरुद्धार्थः ।

(इति घटितविघटितमित्यादि) गण्डस्योपरि स्फोट आपादित इति, इतिशब्दो हेत्वर्थे, यस्मादित्थं कर्तव्यविषयविप्रकृष्टत्वमितिकर्तव्यताया इत्यादिदोषपरिहाराय विध्यनुवादभावाभावात्, तस्माद्घटितविघटित मागीयघटितमासीत् येनादिमितीतिकर्तव्यतैव कर्तव्यतेति तदन्यतया प्राप्तिविधि तत्स्वरूपसिद्धेरित्यादिकया कल्पनया विघटितमुक्तविधिनैव, तत्र प्रतिसमाधेये विरुद्धतरदोषापादनं
15 विधिविषयविप्रकृष्टीभूतार्थत्वादिति, तत्र प्रतिसमाधेये तस्मिन्नेव वाक्येऽनुवादत्वाभावाद्वाक्यस्य मिति दोषयुक्ते तत्प्रतिसमाधानार्थमुच्यते त्वया नहो । परमविदुषा विधित्सयैनामपेक्षितपूर्वापरक्रियाविधिविधानेन विधित्सयैव गण्डस्योपरि स्फोट आपादितः, तस्मादप्रसिद्धार्थत्वाच्च लौको जुहोतिर्नोच्यते वाऽनुवादो भवते । यदि भवतो पूर्वेण जुहुयादित्यस्यानुवादत्वमिष्टं ततोऽहमेव ते बुद्धिसंविभागं करोमि श्रूयताम् लौकिकजुहोत्यर्थानुष्ठानप्रवृत्तोपदेश एव स्वयं परमनुवादः स्यात्, लौकिको
20 हि तावदनार्थो जुहोतिः तदनुष्ठानप्रवृत्तोपदेशो यदस्य विषयः कादाचित्कादिति तदर्थप्रसिद्धेयाद्विपयोऽनुवादो युज्यते विधिर्वा यक्षे कस्मैचित्, यदि विधिरिदयाद्यथा पूर्वं दद्यात्, तेन जुहुयात्, यदि जुहुति पूर्वेण जुहुयादित्येतस्मिन्नर्थेऽनुवादो भवते स चानुपपन्ननियमार्थं उपदेशः, समीहम व्याख्यातोऽर्थोऽस्य सम्यक् ते यथा, तथापि पुनस्त्वदिष्टविरुद्धार्थमितरापद्यते, लोकेऽनुपपन्ननियमो परेशार्थदर्शनात्, विधित्रयोर्धानभोजनयोः स्वपरप्रीतिहेतुत्वात्, यथोपपत्तिपूर्वेण पयसा दद्य

25 मानिमार्गं विधिविहितस्यैवानुवादत्वाऽनुपपन्नमेव कर्तव्यताकार्योपपत्तेन विधिविहितत्वाभावात्त एव चाप्रसिद्धत्वं विशेषि तत्र प्रातस्यवचनापाय कर्तव्यताविषयत्वमितिकर्तव्यतया इति स्वार्थभिप्राय इति भाव्ये । ननु विध्यनुवादस्वरूपत्वेन कर्तव्यताविषयविप्रकृष्टत्वादितिकर्तव्यताया इत्यादिदोषप्रसक्तेन एतत्कल्पना विधित्सयघटितार्थपूर्वकत्वापेक्षयाऽनिवार्यमेवाप-तदीति । यथा जुहुयादित्यत्र जुहुयादित्यस्य न भवतु विधिवाक्यस्य किन्त्वर्थं प्रतिपादयामि तत्रानुवादत्वमित्यादि यदि भवत इति । लोके हि जुहोतिः [illegible] न वर्तते तदनुष्ठाने प्राप्ते यदि कश्चिदनुपदेशेन स्यादयम् अप्राप्तिरिति तदा तदर्थस्य प्राप्ति-
30 कालाऽस्य यथा जुहुयादित्यस्यानुवादत्वं विधानं वा युज्यते यथा यदि भवान् यत्र कस्मैचित् विधित्सयादि पूर्वं दद्यादिति यथा पूर्वेण जुहुयादिति भवतु तथा यदि विधित्सुरेव तु हि पूर्वं जुहोतीति तस्मै पूर्वेण जुहुयादिति भवतु तथा च जुहुयादित्यनुवाद स्यादिति भावः । न चैतदपि कर्तुं शक्यते अपरोक्ताद—तथापि पुनरिति । अदृष्टार्थ—लोके इति । लोके जुहोतेर्न नियमितार्थो भवति पयसैव जुहोतीति । किन्तु जुहुयात् येनकेनचिदपि पयसा दध्ना घृतेन वा जुहोतेरनुरोधः । एतच्च

गुडेन च भुञ्जीत तान्येव च भुञ्जानो येदपायादिति, न तु यथा हि वैद्यके त्रिफला घृतेनैव मधुनैव गुडेन, गुडस्य चाक्षुष्यत्वात्, यथोक्तम् 'प्रभूतकृमिमज्जासृङ्मेदोमांसकरो गुडः । चक्षुष्योऽमय तस्य विशेषाच्छ्लेष्मणो भयम् ॥' इति ।

क्रियान्यम्—

इदं चाग्निहोत्रं जुहुयाद्यदग्नये च प्रजापतये च सायं जुहोति घृतेन जुहुयात्, शूर्पेण ५ जुहोति तेन ह्यन्नं क्रियते इत्येवमादिविध्यनुवादार्थवादवाक्यगतो जुहोतिः श्रूयमाणः प्राप्ति विहितेतिकर्तव्यतानतिरिक्तद्रव्यनक्रियानामसामान्यार्थो विप्रकीर्णावयवकलापापरा क्रियैव वाऽ-स्यार्थोऽसिद्धरूपो यथा घटपूपादि, स मात्रत्वात्तु तस्याः प्रकरणानुबन्धनात् हित्वा जुहोतिप्र योगबाहुल्यं कृत्स्नप्रकृतिसिद्धिर्दर्शिता च दर्शयितव्येति यदग्नये च प्रजापतये च सायं जुहोति तद्भूतादिना स्वर्गकामः कुर्यादिति । तत्प्रतिपादनार्थमभिमतवाक्यार्थताऽस्यैव स्यात् । 10

(इदं चेति) इद चाग्निहोत्र जुहुयाद्यदग्नये च प्रजापतये च साय जुहोति घृतेन जुहुयात् शूर्पेण जुहोति तेन ह्यन्न क्रियत इत्येवमादिविध्यनुवादार्थवादवाक्यगतो जुहोतिः श्रूयमाण उपस्थापनार्थाति कर्तव्यतानतिरिक्तसेवनक्रियानामधेयमात्रार्थस्तथा प्राप्तिविहितेतिकर्तव्यतानतिरिक्तद्रव्यनक्रियानामसामान्यार्थो विप्रकीर्णावयवकलापात्मिका क्रियैव चाऽस्यार्थोऽसिद्धरूपो—न सिद्धरूपो यथा घटपूपादि, तन्मा त्रत्वात्तु तस्याः क्रियायाः प्रकरणानुबन्धनात्, प्रकरणेनानुबध्यते यस्य श्रुते श्रोता च प्रतिपद्यते 15 क्रियामात्रमवद्यमनेन क्रमेण कर्तव्यमितिस्ताववोधव इति, तस्मात् क्रियामात्रत्वात् प्रकरणानुबन्धनात् हित्वा—त्यक्त्वा जुहोतिप्रयोगबाहुल्य—सर्वान् जुहोतिपदप्रयोगान् क्रियामात्र प्रतिपाद्ये नान्तरीयकत्वात् कृत्स्नप्रकृतिसिद्धिर्दर्शिता च दर्शयितव्येति, तत्प्रतिपादनार्थमभिमतवाक्यार्थताऽस्य स्यादेव वक्ष्यमाणे । तमिदमाह यदग्नये च प्रजापतये च सायं जुहोति तद्भूतादिना स्वर्गकामः कुर्यादिति । एतावता तदर्थस्य सुगमत्वाज्जुहोतिप्रयोगबाहुल्यमप्रत्ययार्थितमेव पुनरन्यत्रान्यत्र जुहुयात् जुहोतीत्यादि । 20

क्रियान्यत्—

तद्वचनस्यप्रमाणनियमागमोऽनुपदेशाकथ्य विवेकुरपीति सम्भाव्यते, अप्रत्यवेक्षितार्थ स्यात् पौर्वापर्ययोगाप्रतिसम्बद्धार्थत्वात्, घटितानुमतविध्वंसनाद्य सम्मतप्रलापवत् ।

विध्यर्थमात्रत्वे प्रत्ययः श्लोक इत्यानुगमादिति भावः । न तावदुर्वराणी यथा निदमोपदेशान्यथा श्लोकेप्वीमार—न स्थिति । अथ विध्यनुवादादिवाक्येषु सर्वत्र विध्यमात्रप्रतीतेः क्रियामात्रार्थत्वं क्रियेत विप्रकीर्णावयवकलापैकात्मिकताम् । स एव 25 क्रियाः प्रकरणेनैव तथा क्रियामात्रमवदर्थ कर्तव्यमिमेलातरेव निर्णीयते इत्युक्तत्व श्रोता च स्वैव प्रतिपद्यत तथा च क्रियामात्रे प्रतीयमाने तत्कारणत्व इत्यादिसिद्धरवेव प्रयोज्यं तदितरानेकधा जुहुयादिप्रयोगे निरर्थक एवेत्यार- तन्माकरणादिप्रति । अत्र मीमांसका जुहोतिरनुरूपं सर्वमन्यत्रात्मान कर्मभेदे एकान्तात्मापि निमित्तवात् तत्र एकाग्निहोत्रे जुहोति अग्निहोत्रं जुहुयात् स्वर्गकामो यदा जुहोति दोष जुहोतीत्यादीनां न कर्मभेदकत्वम्, न च तत्र क्रिया-स्वर्थविधानत्वे नन्वर्थनो विरुद्धा इन् प्रदेशस्य इति वाच्यम्, भावनायोगवशादिव तत्पर्यन्तं इत्येऽपवर्गवदे 30 जुहोति कर्मस्वरूपात् जुहोतिमन्त्रस्य वाजुवाजि विदस्य निभिन्नः । एतदर्शितस्य मूल एव इष्टात्मना क्रियते तत्कार्यत्व-कार्यमिति चेत्प्रमु । अत निवेशार्थ प्रतीत चार्थ न कर्तव्यं बोधविनुपर्यन्त एतावदोषप्रसिद्धम्-तद्यथानित्यादि ।

(तद्वचनमिति) योऽप्याप्तमनुपलब्धार्थोपलम्भसमर्थो विवेकः पुरुषः पदवाक्यप्रमाणज्ञं मत्यन्यं वाक्यप्रयोगोऽप्रमाणमिथ्यागमोऽनुपदेशकश्च । अप्रमाणमिथ्यागमः प्रत्यक्षानुमानागमार्थासंवादात्, अनुपदेशकत्वागमकत्वात्, तत्पुनः संभावयामि, भवदेवं मा भवत्पा मिथ्याप्रमाणमिथ्यागमोऽनुपदेशकस्याप्रयोजकत्वमर्थ इति, कुतः ? अप्रत्यपेक्षितार्थत्वात् पादापयोगाभिसम्बन्धार्थत्वात् घटितानुमतविभ्रंसनाय अप्रत्यपेक्षित पुरोडाशानुपयोगनिर्विषयत्वादिभिः पूर्वापरसम्बन्धरहितत्वा पृथगवाभिमतानां विध्यादिक्षेपाभावात् घटितविध्वंसनमित्यकर्त्तव्यतैव कर्त्तव्यतेति, घटितसाक्षित्वागतपुरोडाशानुपाशाभ्युपगमात् घटितानुमतविध्वंसनमिति, एतेभ्यो हेतुभ्योऽप्रमाणमिथ्यागमोऽनुपदेशकश्च वाक्यप्रयोगः । दृष्टान्त उन्मत्तप्रलपनवत्, यद्यप्युन्मत्तादिप्रलपित पुरुषोच्चारितत्वसामान्यात् तद्वाक्यं यदतोऽप्रमाणमिथ्यागमगमकञ्च यथा 'भद्रः पयस्यां कदली च मेर्वां दमाज मेर्वां सुमद्रिमानम् । उच्छृङ्खभेरीकदलीविमाना उन्मत्तगङ्गाप्रतिबन्धभूताः ॥' इति, तथेदमपि विवेकुरुणर्थप्रतिपादनसमर्थं न भवतीति ।

एव विचार्यमाणमिदं वाक्यं दोषेभ्यो न मुच्यते, अथवा नैवायं दोषो न च विचारयोग्योऽप्युपद्रवः प्रत्यपेक्षाप्रामाण्ययोर्निर्विषयत्वात्, त्वन्मताच्च ज्ञानवद्वचनम् ।

(एवमिति) (निर्विषयत्वादिति) ज्ञानं हि प्रमाणमप्रमाणं वेति विचार्यते प्रत्यपेक्ष्यते च, तत्र प्रामाण्यस्य मुख्यत्वात् न तत्र रूपादिप्रामाण्यवत् प्रामाण्यमङ्गीक्रियते, तस्मात् प्रत्यपेक्षाया प्रामाण्यस्य च ज्ञानविषयत्वादन्यत्रादेव वेदस्याज्ञानाभिमतत्वान्न विचारो न प्रमाणभावो वाऽस्ति अज्ञानत्वादेवम् । त्वया हि प्रागेवोक्तवतोक्तम् न हि किञ्चिज्ज्ञानं निश्चितं विशुद्धमस्ति, सर्वस्य संशयाद्यज्ञानानुविद्धत्वादि'ति तदर्थमाह—त्वन्मताच्च ज्ञानवद्वचनमिति । यथा ज्ञानकार्यत्वाज्ज्ञानमात्मप्रयुक्तशब्दोऽप्येतद्यमपि, कार्ये कारणोपचारात्, अप्रमाणप्रमाणत्ववदिति वा, ततः किमिति-

येन ? अप्रमाणमिममागमोऽनुपदेशकश्च वेदः, अचेतनत्वादाकाशवत्, यथाऽऽकाशमचेतनत्वादप्रमाणम्, कूटस्थनित्यत्वाच न ज्ञानवञ्चनमेवं वेदोऽपीति प्रामाण्योपदेशाभावः ।

यदपि च प्रसह्य परमाक्रम्य कारणेषु घृतादिष्वेवंविधेषु स्वर्गादिफलस्य खपुष्पवद् सत्त्वमुच्यते तदपि चान्याय्यमेव यदेतदसत्त्वं नाम त्वया कल्पितमभ्युच्यते, न्यायेन बाध्यत्वात्, ततोऽन्यत् कार्यम्, तदसमर्थविकल्पत्वात्, घटपटवत् । 5

यदपि च प्रसह्येत्यादि, प्रसह्य–बलात्कारेण परं कञ्चित् पुरुषमगणयता एवमीरंसम्येनाऽऽक्रम्य परिभूयाऽसन्मत, यदपि चाग्निहोत्रं जुहुयादित्यत्र कारणेषु घृतादिष्वितिकर्तव्यतासु स्वर्गादिफलस्य खपुष्पवदसत्त्वमुच्यते, एवंविधेष्विति, सर्वेतिकर्तव्यतानामादिमध्यावसानेषु तदुत्तरसत्त्वमेकान्तेन, न कथञ्चित् कार्योत्पत्तिरपि सत्त्वनिरपेक्ष सर्वथा नास्त्येवेति त्वयेष्टं तदपि चान्याय्यमेव, यतो यदेतदसत्त्वं नाम त्वया कल्पितमभ्युच्यते, नामेति मिथ्याकल्पितनाममात्रमेव तत्, 10 यत्त्वया कल्पितत्वनिरपेक्षमसदिति चिन्त्यते, कथं पुनरन्याय्यं तदसत्त्वमिति चेदुच्यते–न्यायेन बाध्यत्वात्, कतमो न्याय इति चेदेवं तर्हि ब्रूमः–ततोऽन्यत्कार्यं–असतोऽन्यदित्यर्थः, कुतः ? तदसमर्थविकल्पत्वात्, असद्भूतार्थोऽसमर्थोऽसम्बद्धो विकल्पतः, तेन–असता सहासम्बद्धो विकल्पोऽस्येति तदसमर्थविकल्पं कार्यं तस्य कार्यस्याऽसमर्थविकल्पत्वात् ततोऽन्यत्वम्, किमिव ? घटपटवत्, यथा घटविकल्पाः पृथुबुध्नोदराकारादयो मृदुचतुरस्रादिभिः पटविकल्पैरसद्भूताः पटविकल्पाश्च तैरित्यसद्भूतौ 15 घटपटौ परस्परतः, एवमसद्विकल्पैरसद्भूतं कार्यं तस्मात्ततोऽन्यदिति ।

साम्प्रतम्—

असद्विकल्पासद्भूतत्वं कार्यस्यासिद्धम्, तच्च, प्रसिद्धमेव हि विकल्पासामर्थ्यमसत्कार्ययोरसतः कार्यस्य च, असत्कार्ययोर्विकल्पाश्चत्वारः खपुष्पमसत्कार्यमप्यसत्, खपुष्पं सत् कार्यमसत्, खपुष्पमसत् कार्यं सत्, खपुष्पं सत् कार्यमपि सदित्येतेषु कार्यखपुष्पयोरुभयोः 20 सत्त्वं कार्यासत्त्वमेवेत्येतद्विकल्पद्वयं स्यात्, उभयसत्त्वकार्यसत्त्वयोः प्रतिपक्षाभ्युपगम एव सत्कार्यवाद इति वादाभावात् । सतश्च तयोर्यदि तावदुभयासत्त्वं ततोऽसत्त्वाविशेषादेव कार्याविर्भाववत् खपुष्पाविर्भावोऽप्यापत्स्यते स्यात्, असत्कार्यवत्, न चैतद् दृष्टमिष्टं वा ।

इत्याचष्टेऽसद्–कूटस्थेति । अचेतनत्वात्तत्त्वात् कारणेषु घृतादिषु कार्यस्य स्वर्गादेरत्यन्तासत्त्वं यत्त्वयाऽभ्युपगम्यते सोऽप्यनुपपन्नो न्यायविरुद्ध इत्याह–यदपि चेति । [illegible] न्यायबाधितत्वात् [illegible] 25 [illegible]–यदेतदसत्त्वमिति । न्यायबाध्यत्वमाविष्करोति एवं तर्हि ब्रूम इति । ततोऽन्यत् कार्यम् तदसमर्थविकल्पत्वात् घटपटवदिति प्रयोगः असत्कार्ययोर्विकल्पैरसम्बद्धत्वादिति हेत्वर्थः । इदानीं सूत्रमवतारयतीति । हेत्वसिद्धिमाशङ्क्य निराकरोति–असद्विकल्पेति असत्कार्ययोर्विकल्पैरसम्बद्धत्वं तस्य कार्ये चाऽसिद्धत्वमिति शङ्कित्वा तस्य निराकरणाय सूत्रमित्याह–प्रसिद्धमेवेति । अयं भावः असत्कार्यमसत् खपुष्पमित्येको विकल्पः सत् खपुष्पमसत्कार्यमिति द्वितीयः असत् खपुष्पं सत्कार्यमिति तृतीयः सत् खपुष्पं सत्कार्यमिति चतुर्थः तत्र कार्यस्य सत्त्वपक्षावुभौ विकल्पौ 30 सत्कार्यवाद एव सम्भवेताम् कार्यस्यासत्त्वपक्षावुभौ तु असत्कार्यवाद एव सम्भवेताम् तौ च विकल्पावत्र [illegible] असत्कार्यवादप्रतिपक्षभूतविकल्पद्वयमपि च सत्कार्यवादाभ्युपगमे [illegible] [illegible] [illegible], अतो नासिद्धत्वं

(असदिति) असद्विकल्पासद्भावस्य कार्यस्यासिद्धम्, यस्मात्, प्रसिद्धमेव यस्मात्सधीकल्पसामर्थ्यमसत्कार्ययोरसतः कार्यस्य च सिद्धमेवेति एताभ विकल्पचतुष्टये द्वयोरेव सम्भवात्, असत्-खपुष्पं कार्यमङ्कुरादि, तयोर्विकल्पाभावात्, खपुष्पमसत्कार्यमप्यसत्। खपुष्प सत्कार्यमसत्। खपुष्पमसत्कार्यं सत्। खपुष्प सत्कार्यमपि सदिस्मरेषु चतुर्षु विकल्पेषु कार्यखपुष्पयोरुभयोरसत्त्वं

5 कार्यासत्त्वमेवेत्यद्विकल्पाद्वयं स्यात्—सम्भवेत्, किं कारणं? उभयस्यत्वकार्यसत्त्वयोः प्रतिपक्षाणु-पपत्त एव सत्कार्यवादः, प्रतिपक्षोऽसत्कार्यवादस्य, इतिसम्भो हेत्वर्थे, इत्यस्माद्धेतोर्वाभावः तस्याप्रामाण्यमुभयाभावकार्याभावविकल्पावेव सम्भवेताम्, नेतरौ। ततश्च तयोः उभयासत्त्वकार्यासत्त्व-विकल्पयोः, तयोरपि यावदुभयासत्त्वं ततोऽसत्त्वाविशेषादविशेषः खपुष्पकार्ययोः असत्त्वाविशेषादेवा-विशेषे कार्याविर्भाववत् खपुष्पाविर्भावोऽप्यायत्तो स्यात्—पश्यति कालान्तरेऽप्याद्यर्थमानमप्यारम्भ-

10 स्निर् मते भवेत्, दृष्टान्तः असत्कार्यवद्धीजाङ्कुरवत् न चैतद् दृष्टमिष्टं वा खपुष्पप्रादुर्भाव इति।

अथ न कार्यप्रादुर्भाववत् खपुष्पप्रादुर्भाव इष्यते, असच्च कार्यमिति निश्चितम्, तद्वैलक्षण्याच्च तर्हि सत् खपुष्पम्, सदेव, असद्विलक्षणत्वात्, घटवत्, इतरे वन्ध्यापुत्र-पुष्पवत्।

(अथेति) अथैतस्मादनिष्टापत्तिदोषात् दृष्टेष्टविरोधादपसर्पन् भूयास्त्वं न कार्यप्रादुर्भाववत्

15 खपुष्पप्रादुर्भाव इष्यते, असच्च कार्यमिति निश्चितम्। ततः को दोष इति चेदुच्यते तद्वैलक्षण्याच्च तर्हि सत् खपुष्पम्, असत्कार्यवैलक्षण्यादिदानीमसत् खपुष्पं किन्तु सदिति प्राप्तमसत्कार्यवैलक्षण्यं खपुष्पस्य, असत्कार्यवैलक्षण्यादसत्त्वामप्रादुर्भावात् तदसत् खपुष्पम्, किं तर्हि? सत्प्रसङ्गः, तस्मात्सत्कार्यवैलक्षण्यादसत्त्वाममप्रादुर्भावात् तद् सत्, कोऽत्र हेतुः? असद्विलक्षणत्वात्, असता कार्येण सह विलक्षणत्वात्, दृष्टान्तो घटवत्, यथा घटोऽसद्विलक्षणत्वात् सत् असत्कार्यविलक्षणत्वात्, प्रादुर्भवता कार्येण वैलक्षण्यात् सत् मसत्यम्। इतर इति वैधर्म्यदृष्टान्तो यदसत् तदसद्विलक्षणं न भवति यथोदुम्बरपुष्पमिति वन्ध्यापुत्रपुष्पवत्, इतर इति वैधर्म्यदृष्टान्तो अनुमसेति।

… असद्विलक्षणम्, न, सतो वैलक्षण्यात्। अथवा सदसद्विलक्षण-
… घटवत्, इतर उदुम्बरपुष्पवत्।

… खपुष्पमसत्कार्यमिति … वा विकल्पद्वीपादौ तत्र … तयोर्विकल्पा इति चतुर्थेन … कार्यमपि नेत्यपवेदि भावः। भावस्यामिति … नु कार्येऽसत्त्वमिष्टेऽपि न … हेतोः कार्यकारणभावनियमोऽनाकदटे—मर्धितत्वादिति। … भाष्यम्, अथवा … न … एवं खपुष्पमपि स्यात्, … इति। ननु … दृष्टे … इति चेत्तम्। … वैलक्षण्यमपि …

(नन्विति) व्याख्यातम्। घटस्यासत्त्वं पटात्मना, पटासत्त्वं घटात्मनेति तयोरितरेतराभाव-लक्षणासत्त्वं वैलक्षण्यं च परस्परतः, दृष्टान्तौ च घटपटावसन्तौ, तस्मादसद्वैलक्षण्यस्यासत्त्वपि दृष्टेस्मा-दनेकान्तिकत्वेति चेदुच्यते—न, सतो वैलक्षण्यात् नानैकान्तिकताऽस्य हेतोः, सतो वैलक्षण्यात्, सत एव वैलक्षण्य—यदीतरेतराभावात्मकं वैलक्षण्यं सत एव, नासतः, तस्मादसतो वैलक्षण्यं न भवति, किन्तर्हि ? सद्वैलक्षण्यमपि तत्, सत एवेतरापेक्षया तद्रूपेणासत्त्वात्, अयन्तु कार्यसामर्थ्या 5 प्रादुर्भावोऽसता खपुष्पेणात्यन्तविलक्षणः, अप्रादुर्भावश्च खपुष्पस्य कार्येणासतेति नास्ति सतो वैलक्षण्यं सता, तद्विशेषधर्मस्याग्रूपादिविशेषधर्मेणावैलक्षण्यवत्। अथवा सतोऽवैलक्षण्यात्, सतः अवैलक्षण्यात्, सतस्तु घटादेः पटादिना सह वैलक्षण्यं नास्त्येव सत्त्वान्वयाविशेषात्, देशकालाकारादिमात्रविशेष स्याविशेषत्वात्तुल्यादिविशिष्टकालाविशेषवत्। अथवा न तर्ह्यसत् खपुष्पम्, कस्माद्धेतोः ? सदसद्वि-लक्षणत्वात्, सताऽसता च विलक्षणत्वात्, सच द्विविधम्, तुल्यजातीयं घटस्य घट एव, अतुल्य 10 जातीयं पटादि, असच्च कार्यं आयत्यां भावाङ्कुरादि, खपुष्पमत्यन्ताप्रादुर्भावात् कार्येणासता विलक्षणं सता च घटपटादिना, स्वमतेनेतरेतराभाववैलक्षण्येन तुल्यजातीयेन च भावानां परस्परवैलक्षण्यम्। दृष्टान्तो घटवदिति, यथा घटस्तुल्यजातीयेभ्यो घटान्तरेभ्योऽतुल्यजातीयेभ्यश्च पटादिभ्यः सन्नसो विलक्षणोऽसतश्च खपुष्पादेः सोऽयं दृष्टः, तथा खपुष्पं घटवत् सदसद्विलक्षणत्वाभावात्, सदैवेत्यर्थः, द्विःप्रतिषेधः प्रकृतं गमयतीति कृत्वा, इतर उदुम्बरपुष्पवत्, यदसत् न तत्सदसद्विलक्षणं यथोदुम्बर- 15 पुष्पं स्वमतेनात्रापि वैधर्म्यदृष्टान्तः। खपुष्पखरविषाणोदुम्बरपुष्पादीनामसत्त्वाविशेषादभिधानभेद-साम्यात् साध्याभावादित्यत्र वैधर्म्यदृष्टान्तेन नार्थः। अस्तु तत् सदसद्विलक्षणमितरेतराभावा-पेक्षत्वात् कथमसद्विलक्षणं खपुष्पमिति चेत् ? आयत्यां प्रादुर्भवता कार्येणासता वैलक्षण्यस्य स्वये-नाभ्युपगतत्वात्, स्वमतनिवारणार्थत्वादस्य प्रयासस्य, नास्माकं दोष इति।

अथैवमप्यसदेव खपुष्पमिति निश्चयो न निवर्तते, अप्रादुर्भावात्मकं च तदिति 20

[illegible] पृथिव्यादि [illegible] एव न तु तत्र पर्यायो विकारो वा धर्मान्तरं वा [illegible]
[illegible] भूम्यादीति यथा [illegible] व्रीहि[illegible]
[illegible] यथा व्रीहि[illegible] पृथिवी [illegible] आत्मरूप[illegible]
[illegible]
30 [illegible]
[illegible] तत्कार्यत्वादिति तद्व्यतिरेकेणेति यथा तन्तुसंस्थाने [illegible]
[illegible]

चैतन्यादात्मेत्यादि यावद्विपरिवर्तानन्त्यमत, चेतनस्य भावश्चैतन्यं तस्माच्चैतन्यादात्मा पृथि-
व्यादिसुखप्रधानतया विपर्ययेण वृत्तः, तत ईषद्विशुद्धावस्थ इत्यर्थः, चैतन्यस्य रागादिविपरिणामात्,
रागादेर्बन्धकारणत्वात्, तदुपयुक्तः, उपयोगस्वातन्त्र्येण, उपयोगो हि चेतना, तस्य स्वातन्त्र्यं कर्तृत्वात्,
'मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः' (तत्त्वार्थ ८।१) इति वचनात्। रागाद्यात्मक-
कषायविकल्पात्मकत्वान्मिथ्यादर्शनादीनां, तेन स्वातन्त्र्येण बद्ध्वाऽऽत्मनाऽऽत्मानमस्वतन्त्रीकरोति तेनैव 5
च स्वयंकृतेन बन्धनाऽस्वतन्त्रीक्रियते, मद्येनेव स्वयं पीतेन मद्यपः, स्वयं पूरितवेगया डोलयेव वा
पुरुषो भ्राम्यते, कर्मडोलया कर्मबन्धेन रूपादिभवनमनाद्यनन्तत्वम् आपद्यते, एवमेतदुभयं सन्तत्याऽना-
द्यनन्तञ्च द्रष्टव्यं यथोक्तं 'पुव्विं भंते ! कुक्कुडी पच्छा अंडए, पुव्विं अंडए पच्छा कुक्कुडी ? रोहा !
जा सा कुक्कुडी सा कुओ ? अंडगाओ, जे से अंडए से कुओ ? कुक्कुडीओ, एवं रोहा ! पुव्विंपि एते
पच्छावि एते सासया भावा । अणाणुपुव्वी एसा रोहा !' (भग श १ उ ६ सू ५३) इति । तथा— 10
'सव्वजीवाण भंते ! एकमेक्कस्स मायत्ताए भज्जत्ताए पुत्तत्ताए दुहित्ताए गोयमा ! असति अदुवा अणंतखुत्तो'
(भग श १२ उ ७) इत्यादि । तत्र द्विविधं रूपादि सूक्ष्मं स्थूलञ्च, कर्मादि सूक्ष्मम्, आदिग्रहणाद्भाषा-
मनःश्वासमानमनस्त्वादिकार्मणतैजसाहारकशरीरादि च तदात्मकत्वगत्या, स्थूलं पृथिव्याद्यौदारिकवैक्रि-
यशरीरात्मकत्वगत्या तदात्मत्वात्, एतत् प्रक्रियैव प्रतिपादितमपि सुखग्रहणार्थं प्रतिज्ञायते, अनाद्यन-
न्तः सूक्ष्मस्थूलशरीरादिरूपादिभवस्य प्रतिपत्ता चैतन्यमिति । कुतः ? कार्यात्मत्वात्, कार्यात्मत्वञ्च तस्य 15
सिद्धं रूपादिप्रभृत्यादिमेवरूपेण विपरिवृत्तेः साधितत्वात्, इह त्वनाद्यनन्तता सेति साध्यते, यो यः
कार्यात्मा स सोऽनाद्यनन्तशो विपरिवर्तमानो दृश्यते, यथा—मृद्द्रव्यादि, द्रव्यं मृद्रूपवति मृद्वतो
भवति घटः कपालानि, ततः, क्रमेण शकलशर्करापांसुपांसुप्रतिपरमाणवः, ततो रूपादयः, रूपादिभ्यः
पुनरुत्क्रमेण परमाण्वादयो यावद्घटादित्वविपरिवर्तानन्त्यम् । आदिग्रहणाद्गुणकर्मसत्त्वादित्वेन विप

भवभावस्य भवाभावव्यतिरेकेणाभावत्वात् तदात्मे भिन्नमिति भावः । चैतन्यस्य रागादिविपरिणामत्वादिति, ग्रन्थ 20
सुखदुःखाद्यनुगतमचैतन्यं न संसारिभिरनुभूयते चाननुभूयते प्रमाणम् तत्तु चैतन्यं मिथ्यादर्शनाद्यनुगतम् तथाविध
रागादिभावपरिणामिमिव चैतन्यमात्मनः स्वाभाविकमथं संसारित्वमात्मन इति भावः । तत्र प्रमाणमाहाँ—मिथ्यादर्श-
नेति । तथाविधजन्तुरैव सुखं दुःखं च त्वमस्य आत्मन एव आत्मनि कर्तृत्वे [illegible] कर्तृत्वादिभिरेव
इति न पुरुषार्थसिद्धिरेव, न च निमित्तपरिहारात् कर्तृत्वमीश इति वाच्यम्, निमित्तानामनन्तपरिहारासम्भवादिति विना-
चैतन्यादेरात्मनः कर्तृत्वमिति भावः । स एव बन्धमेव पापोत्पादिदोषमनुभूय [illegible] कर्तृत्वमनुभवतोत्याह—तेन 25
स्वातन्त्र्येणेति । एतदुभयमिति, मूर्तामूर्तत्वेन जगत् जीवाजीवसंसर्गं चैतन्यं । ननु यदि प्रमाणोऽभिप्रायकृतः संसारः
प्रभवति तदाऽभिप्रायनिवृत्तौ सर्वमुक्तिः [illegible] मुक्तानामपि पुनरपि संसारस्यावश्यम्भावित्वमाशङ्कायामाह—सन्तत्येति ।
न हि सर्वजीवैर्युगपदेकीभाव किन्तु प्रतिजीवं भिन्ना तेन यत्रैव जीवस्य वियोगस्तत्रैव [illegible] न जीवान्तरस्यापि न
संसारानुच्छेद इति [illegible] च [illegible] जीवभेद [illegible]
[illegible] । [illegible]—यथोक्तमिति, पूर्वं भदन्त ! कुक्कुटी पश्चादण्डकम् ! पूर्वम् 30
अण्डं पश्चात् कुक्कुटी ! रोह ! या सा कुक्कुटी सा कुतः ! अण्डकात् यदण्डकं तत्कुतः ! कुक्कुटीतः एवं रोह ! पूर्वमप्येते
पश्चादप्येते शाश्वता भावाः अनानुपूर्वीषा रोह ! । इति छाया । तथेति । सर्वजीवानां भगवन् ! एक एकस्य मातृत्वेन
पितृत्वेन भ्रातृत्वेन भार्यात्वेन पुत्रत्वेन दुहितृत्वेन गौतम ! असकृत् अथवा अनन्तकृत्वः इति छाया । तदेवं [illegible]-

रिचैवम् । एवंप्रकारस्य भवनस्य सत्तात्मपरिणामरूपस्य देशकालभेदैरन्यानुवृत्तावेऽनन्यत्वस्वभा-
वतोऽवत्वात्, नान्यथैवमिति प्रतिपत्तव्यम् ।

अत्राह—

नन्वेवमनाद्यनन्तत्वे सति कुक्कुट्यण्डकयोरिव मुक्तस्यापि चैतन्यरूपादिमत्त्वयोस्तुल्ये-
⁵ऽविवेके किमर्थं ज्ञानात्मकमित्युच्यते ? किं वा कारणं रूपादिमदात्मकमिति नोच्यते सर्वम् ?
नैवं परिग्रहेऽपि कश्चिद्दोषः, अस्यैवार्थस्य विवक्षयिषितत्वात्, चतुरवस्थत्वात्तस्य, तत एव
रूपादिद्रव्येन्द्रियपृथिव्यादिरूपः स एवोच्यते । चेतनाचेतनयोरैक्यापादनप्रस्तुतेः, ज्ञमयमेव
स एव स्वतन्त्रो भवतीति विशिष्य ग्रहणं स्वतन्त्रग्रहणञ्च किमर्थमिति चेदुच्यते, तथाहि,
भावस्वरूपदर्शनार्थन्तु यो भवति स वाच्य इति ग्रहणम्, तदपि भवनं ज्ञस्यैव सर्वदेशका-
¹⁰लात्मकस्य देशकालाभ्यां सिद्ध्यति, तथाहि वस्तु भवतीति वक्तुं शक्यम्, तद्भिन्नपृथि-
व्यादिभेदभूतपदार्थपरिग्रहे तु घटमानं न सिद्ध्यति ।

नन्वेवमित्यादि, नन्वेवमनादित्वात् कुक्कुट्यण्डकयोरिवानन्तत्वाच, कुत्सिता कुटिः कुक्कुटिरि
सर्वे कुकुटित्वस्य शरीरार्थप्याख्यानात्, मुक्तस्यापि रूपाद्यर्थज्ञानपरिणामाविवेके चैतन्यरूपादि
मत्त्वयोस्तुल्ये किमर्थं ज्ञानात्मकमित्युच्यते ? किं वा कारणं रूपादिमदात्मकमिति नोच्यते सर्वम् ?
¹⁵विशेषहेतुर्वा वाच्य इति चोद्यपक्षात् परः—नन्वेवमनाद्यनन्तत्वे सतीति, गतार्थम् । आचार्य आह—नैवं
परिग्रहेऽपि कश्चिद्दोषः, किं कारणम् ? अस्यैवार्थस्य विवक्षयिषितत्वात्, चतुरवस्थत्वात्तस्य, तत
एव रूपादिद्रव्येन्द्रियपृथिव्यादिरूपः स एवोच्यते, यथा च सूत्रे पूर्वसूत्रत्वात् । आह—चेतनाचेत
नयोरैक्यापादनप्रस्तुतेः ज्ञः पुरुषस्तत्प्रयोगेण, स एव स्वतन्त्रो भवतीति च विशिष्य ग्रहणं स्वतन्त्र-
ग्रहणञ्च किमर्थमिति, आचार्य आह—तथाहीत्यादि, भावविषये, भवतीति भाव इत्युक्तम्, भावस्व-
²⁰रूपदर्शनार्थन्तु यो भवति स वाच्य इति ग्रहणम् । तदपि तथाहीत्यादि, एवञ्च कृत्वा यत्प्रागुक्तं
देशकालभेदेन भवनाभावदोषे वक्ष्यमाणे इति तत्परिहारेण ज्ञस्यैव भवनस्योपपद्यमानत्वात् सर्व
देशकालात्मकस्य देशकालाभ्यां भवनं सिद्ध्यति, तथाहि वस्तु भवतीति वक्तुं शक्यम् । तद्भिन्नेत्यादि,

एवंप्रकारस्य भवनस्य देशभेदेन कालभेदेन चैकत्वेन भेदेऽप्यनुपपन्नत्वाद् वक्ष्यमाणे दोषः स्यादतस्तदाह—एवंप्रका-
रस्येति । वक्ष्यमाणे दोषश्च भवनादिविरुद्धधर्माध्यासत्वाद्भेद इति । अमुमेव दोषमपाकर्तुं—नन्वेवमिति, चैतन्यस्या-
²⁵नन्तत्वात् [illegible] । मुक्तस्यापीति मुक्तस्यापि देहे मुक्तस्यापीत्यर्थः । नैवं परिग्र
हेऽपीति, [illegible] भाव । ननु चेतना-
चेतनयोरैक्य[illegible] न एव सर्वे भवतीति [illegible]
[illegible]—चेतनाचेतनयोरिति [illegible]
[illegible] न एव ज्ञः [illegible]
³⁰[illegible] तथा च मूर्तामूर्तानि [illegible]
[illegible]
[illegible]—तथाहीति । एवं यो भवतीति [illegible]
[illegible] तथाहि वस्त्विति । [illegible]—देशभेदेति

देशकालभिन्नपृथिव्यादिभेदभूतपदार्थपरिमाणे तु—अन्यथा तु घटभवनं यदेतत् भवदसंमतसिद्धं तदपि न सिद्ध्यति ।

तत्कथम् ?

देशभेदप्रत्ययेन तावद्ग्रीवापृष्ठकुक्षिबुध्नौष्ठादीनां देशभिन्नानां कपालशकलादीनाञ्च यावत् परमाणुशो रूपादिशो निरुपाख्यत्वशश्च भेदादभावे । एवं च श्वेतिकापीतिकाद्येक- 5
देशभेदान्मृत्, अश्मादिभेदाच्च पृथिवी, पृथिव्यप्तेजोवाय्वादिभेदाच्च द्रव्यं गुणकर्मभेदाच्च द्रव्यादिभेदाच्चैक सत्त्वमिति । कालभेदप्रत्ययेनापि प्रतिक्षणमन्यपदेऽन्यभवनात् कतरत् घट भवनम् ? मृद्भूतग्रीवाद्यन्यादिकालभिन्नभावभेदे मृद्भावात् को घटः ? भवनं वा किं स्यात् ? असम्मतेन मृद्भूतो ग्रीवादिरन्यादिरेक एव, कालान्तरावस्थाने सति तत्परिणामोपपत्तेः सामान्यान्वयाद्ग्रीवादय एकादय एव वा मृद्भवती घटो भवतीत्यादि युज्यते, परतोऽपि 10
कपालादिपांशुग्रीवादिभूतेः, तस्माद्यादि सर्वात्मकमेव भवति । न चैतदिष्यते तत एवं सर्वात्मकस्यैकस्य सत्त्वस्याभावात् प्रत्येकं सत्त्वस्य च देशतः कालत इतरेतरासत्त्वात्मक- त्वात् कुतो भवनं भवितुर्घटादेः ।

देशभेदप्रत्ययेन तावदित्यादि, ग्रीवापृष्ठकुक्षिबुध्नौष्ठादीनां देशभिन्नानां कपालशकला- दीनाञ्च यावत् परमाणुशो रूपादिशो निरुपाख्यत्वशश्च भेदादभावे, घटभवनं न सिद्ध्यतीति वर्तते, 15
एवं च श्वेतिकापीतिकाद्येकदेशभेदान्मृत्, अश्मादिभेदाच्च पृथिवी, पृथिव्यप्तेजोवाय्वादिभेदाच्च द्रव्यम्, गुणकर्मभेदाद्धि तदेव हि द्रव्यं रूपरसादिगुणकर्मभेदात् यावन्निरुपाख्यत्वभेदात् समुदाया- भावादसम्भवान्नाम द्रव्यम्, द्रव्यादिभेदात्—द्रव्यगुणकर्मणामनात्मकमेकं सत्त्वम्, एवं तावद्देशभेदे घटभवनं न स्यात्, द्रव्यादीनामनुपपत्तेः । कालभेदप्रत्ययेनापि प्रतिक्षणमन्यपदेऽन्यभवनात् कतरत् घटभवनम् ? क्षणे क्षणेऽन्यान्यसम्भवानामपायाद्भ्यकत्वस्वभावात्मकत्वानुपपत्तेः । किं कारणं ? 20
मृद्भूतग्रीवाद्यन्यादिकालभिन्नभावभेदे मृद्भावात् । असम्मतेन मृद्भूतो ग्रीवादिरन्यादिरेक एव, कालान्तरावस्थाने सति तत्परिणामोपपत्तेः, त्वन्मतेन तु कालभिन्नभावभेदे—क्षणे नवनवाद्यन्यान्या- द्यभेदे ग्रीवादेश्च विनष्टो यत्र भवति न चोपमाति विनष्ट मृद्भवतीति निर्विशेषत्वान्मृदभावः, घट- भावाच्च को घटः ? भवनं वा किं स्यात् ? अस्माकन्तु सामान्यान्वयाद्ग्रीवादय एकादय एव वा मृद्भवति

देशभेदेन देशिभेदे निरवयवः परमाणुरेव स्यादिति तथापि रूपादिभेदेन भेदे रूपादिव्यतिरिक्तस्य द्रव्यस्य पृथगनुप- 25
लभ्याऽभावे रूपमात्रमेव स्यादिति तथापि व्यवहारकालावयवत्वेन विषयाभावे च निरवयवाभावे निरुपाख्यमेव स्यादिति भवनं क्व स्यादिति भावः । इदमेवोपपादयति श्वेतिकाद्-ग्रीवापृष्ठस्यादिना । कालभेदेन भेदे त्वाह- कालभेदेऽपि । अभवत भवनं कुत्रापि इत्याह असम्मतेनेति । अनुवर्तमानस्यैकस्य वस्तुनोऽभावे न कस्यापि सर्वात्म- कत्वं देशकालभेदेन प्रतिवस्तु भिन्नत्वमित्याह—न चैतदिति । एकपीतद्रव्यादिविषयगुणभेदाच्च तदाकारत्वेन सामान्य- भवनि असमासिद्धत्वात् एकभेदत्वेन पृथिवी पृथिवीजलादिभेदादिद्रव्यगुणकर्मभेदाच्च भेदे द्रव्यम् पृथिव्यादि 20
समुदायकल्पि पृथिव्यादिविशेषस्याभावात् परमाणूनां परस्परं सम्बन्धाभावात् न द्रव्यमेकम् तथा द्रव्यगुणकर्म- भेदभेदे सत्त्वमपीत्याह—एवं देशादिना । अन्यपदेऽन्यभवनादिति व्यवहारोपयोगमेव वस्तुनो भवनात्, तस्मात् स्यादिति पदार्थ इति भावः । अन्यानाम्नवान्तिरात्मकस्य वस्तुनो न कस्यापि निरवयवत्वात्मकत्वात्, ग्रीवादेः प्रति-

घटो भवतीत्यादि युज्यते घटोऽपि कपालादिपांसुग्रीवादिमूर्तेः—घटभवनात् घटोऽपि घट एव कपाला-
दिर्भवति, कपालादेरपि घटो यावच्छर्कराभवनात्, पांस्वादेरपि घटो ग्रीवादेर्भवनात्, तस्माद्घटादि
सर्वात्मकमेव भवति। न चेदेवमिष्यते—एवं भवतां भवनम्, तत एव घटादिसर्वात्मकस्यैकस्य देशका-
लस्वभावादिभिः सत्त्वसामान्यात्, सामान्येनैव प्रत्येकं सत्त्वस्य इतरेतरासत्त्वात्मकत्वात् कुतो भवनं भवि
5 तुर्भवतो वा? घटः पटात्मना नास्ति पटोऽपि घटात्मनेति देशतः, कालतश्च प्राक् पश्चाच्च न स घटेति
न पटोऽस्ति न वा घट इति प्रत्येकं भिन्नत्वे भावानामभावात् को घटः? किं भवनम्? ।

यथा तु यैः रूपादिभेदेन घटो देशभेदाद्यावन्निरुपाख्यता कालभेदेन च परमनिरुद्ध
क्षणोत्पत्तिनिरुपाख्यतो भिद्यत इति सर्वभेदपर्यन्तं भेदं विधायापि विज्ञानमात्रमेवेति व्यव-
स्थाप्यते तैरप्यनुपवर्णनवदेषामिष्टं भवति, रूपादिपरस्परविविक्तत्वे तु तद्विज्ञानान्वयाभा-
10 वाद्रूपरसादिभेदपरिकल्पनाभावस्तद्देशकल्पनाभावो निरुपाख्यत्वकल्पनाभाव इति विज्ञान
मात्रता न भवति ।

यथा तु यैः रूपादीत्यादि यावदप्यनुपवर्णनवदेषामिष्टं भवति। येन वर्ण्यते विज्ञानमात्रत्वं
देशभेदप्रक्रो भिद्यमानो रूपादिभेदेन भिद्यते यावन्निरुपाख्यतः, कालभेदेन च भिद्यमानः परमनि-
रुद्धक्षणोत्पत्तिविनाशनिरुपाख्यतो भिद्यत इति, तैः सर्वभेदपर्यन्तं भेदं विधायापि विज्ञानमात्रमेव
15 नान्यत् किञ्चिदिति व्यवस्थाप्यते यथा तु तद्व्यवस्थाप्यते तथाऽप्यनुपवर्णितमभिन्नमेकं विज्ञान-
मित्युक्तं भवति, तदपि रूपरसादिघटपटादिभिन्नभेदात्मकत्वात्तस्य, रूपादेः परस्परविविक्तत्वे तु तद्वि
ज्ञानान्वयाभावाद्रूपरसादिभेदपरिकल्पनाभावस्तद्देशकल्पनाभावो निरुपाख्यत्वकल्पनाभाव इति विज्ञा
नमात्रता न भवति ।

अत्र कश्चिद् ब्रूयाद्यदपि विज्ञानमसत्, सर्वभावशून्यत्वादित्येतदायुक्तम्—

20 ज्ञानस्यापि स्वभावाभ्युपगमे रूपाद्यपलापवीक्षणनिरूपणादिविनिर्मुक्तत्वात् प्रत्यक्षादिविरोधः,
तस्मादयमस्मदात्मा ज्ञानस्वभाव एकः सर्वभावव्यापी विपरिवर्तमानोऽवस्थित कारणमिति
सिद्धम्, अत्र यथोक्तवत् रूपादीनां तत्त्वात् ज्ञानस्वभावात्मावस्थाविशेषमात्रत्वात् सर्वत्र
सन्निपत्याराद्धुपकारित्वेभ्यो हेतुभ्य आत्मबुद्धीन्द्रियमनःप्रकाशरूपप्रदीपघाहारादिषु ज्ञानवृत्ति
र्भवतीत्येष विशेषः ।

---

25 [illegible]

30 [illegible]

(ज्ञानस्यापीति) रूपादयो न सन्तीति यदुपलब्धिपर्यायं निरूपणं तदपि नास्तीति रूपादिप्रतिषेधो न सिद्ध्यति, प्रत्यक्षतश्च स्वानुभवेन रूपस्य निरूपणमुपलभ्यते प्रतिक्षणम्। आदिग्रहणाद्रसास्वादनघ्राणस्पर्शनश्रवणानुभवा उपलभ्यन्तेऽतः प्रत्यक्षविरोधः, तदनुस्मरणदर्शनात्तदनुमानविरोधः, आदिग्रहणात्, अनुस्मरणं हि स्वयमनुभूतस्यार्थस्य, नाननुभूतस्य। तस्मादयमात्मा ज्ञानस्वभाव एकः सर्वभावव्यापी विपरिवर्तमानोऽवस्थितः कारणमिति सिद्धम्। अत एवोक्तमित्यादि, एतस्मादेवारम्भात्तिविपरिवृत्तिव्यवस्थितत्वाद्वैलोक्येन तुल्यमुक्तवत्, रूपादीनां तस्मात्—रूपाद्यात्मकत्वात् ज्ञानस्वभावात्मावस्थाविशेषमात्रत्वात्। सर्वत्र—सर्वभावेषु एष विशेषः तस्यैव कारणपदार्थस्योपकारविशेषेभ्योऽपरो द्रष्टव्यः, सन्निपत्योपकारिणी बुद्धिरात्मनः सान्निध्यमपेक्ष्य वा भावानां स्वपरिवर्तविशेषाणामुपभोगे, भोक्ता तु स्वयमेव स्वपरयोरतीन्द्रियाणि करणत्वात्, दूरात् प्रकाशादयोऽनुग्राहकाः इन्द्रियाणाम्, समीपोऽस्तु रूपादयः दृष्टा घटादयः, औपधात्म्यञ्जनादीभिरिन्द्रियाणां पाटवजननात्तु पदार्थोपकारित्वेन तदुपयोगकराभ्याऽऽहाराः सर्वभावगतासु ज्ञानवृत्तिष्विति, अत आह—सर्वत्र सन्निपत्यारादुपकारित्वेभ्यो हेतुभ्य आत्मबुद्धीन्द्रियप्रकाशरूपघटौषधाहारादिषु ज्ञानवृत्तिर्भवतीति।

अत्र—

आह च पुरुष एवेदमित्यादि।

आह चेति ज्ञापकमेतदभिमर्थे पूर्वोक्तस्यैव जैनैर्वक्ष्यमाणज्ञापकार्थमेकोऽहमनेकोऽप्यहमित्यादिकम्, अतोऽपि लौकिकस्तदनुसारेणाह न स्वमतिप्रेक्षेति, पुरुष एवेदमित्यादि, एवेत्यवधारणे, अविद्युरम्यस्याभावात्, एकत्वस्यैव च भवनात्। इदमिति इदमपत्यक्षरूपादीन्द्रियगोचरं लिङ्गगम्यं च निर्दि

अथ न कश्चिदभावार्थस्याभावोऽध्यवसातुं शक्यते विज्ञानाभावे रूपादयो न सन्तीति निरूपणोपायाभावात्, न वा स्वरूपतो वर्तमान एव उपलम्भे सति तदभावो वक्तुं शक्यः यथा हि चक्षुष्मतो बुद्धिनिर्वर्तकमूर्ति स्वयमनुभूयमानस्य भावं मुखे न वा दुःखादीनि सुखदुःखादेरवचनो भवति प्रत्यक्षविरुद्धत्वात्, तदतीन्द्रियमतिरूपेण स्वयमुपलभ्यमान एव रूपादयोऽर्थ आह सुखाभे न च लोकोऽप्यस्तीति सुखं कथमुपालम्भनम्। व्यतिरेकाभावेनाह—रूपादय इति। आदिग्रहणादिति, रूपादेस्स्वभाविकत्वाद्विस्तरः। प्रत्यक्षतोऽस्याभिमतस्यानुमानस्य प्रदर्शनमिदमाह—तदनुस्मरणेति। तदनुस्मरणमिति स्वानुभवपूर्वं मद् ज्ञानं तदपि न भिन्नमनुस्मरणमुपपत्तेः तत्र स्वयमनुभूतस्यैव नान्येनानुभूतस्येति सर्वभावव्यापी ज्ञानस्वरूपः स्वरूपपरिवर्तमानस्वभावतया विपरिवर्तमान एक आत्मा सर्वकारणं सिद्ध्यतीति भावः। एतस्मादेवेति सर्वभावव्यापकत्वे सति विपरिवर्तमानत्वादेव हेतोरित्यर्थः। रूपादयो रूपाद्यात्मकत्वे सति ज्ञानस्वभावात्मावस्थाविशेषा एव। चेतनस्यैवैकस्य भोग्यभोक्तृभेदभागेऽरस्थानिरपि सर्वत्र प्रवर्तते—सर्वत्रेति। सन्निपत्येति, चेतनस्य स्वपरिवर्तविशेषाणामुपभोगे बुद्धिः सन्निपत्योपकारिणी भवति आन्तरं साधनमिति भावः। भोक्ता चात्मस्वभावेन इन्द्रियाणि करणतादारात्मोपकाराणि प्रकाशादय इन्द्रियेषु विप्रकर्षोपकारकाः रूपादयश्च तदुपयोगतोऽपि विप्रकृष्टोऽपि घटादयः औषधादीनि चेन्द्रियपाटवकारणानि आहारादयोऽपीन्द्रियाणामुपष्टम्भका इति विवेक इति भावः। तत्र प्रमाणमाह—आह चेति—पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्, उतामृतत्वस्येशानो यदन्नेनातिरोहति इति (ऋग्वेद पुरुषसूक्त) एव कश्चित् लोकप्रसिद्धः पुरुषवादिना वादं तमनुसृत्य शास्त्रं सूत्रयति—जैनरित्यादि हे लोकाः। एकोऽप्यहं ज्ञानदर्शनयोरप्यहमनन्तपर्यायोऽप्यहमक्षयोऽप्यहमव्ययोऽप्यहमिति निर्दिश्यमानस्य कारणमनेकरूपं चाप्यम्। पुरुष एवेदमिति चर्च व्याख्याते—पुरुष एवेद-मित्यादीति, अविद्युरितीति, पुरुषातिरिक्तस्य सत्त्वस्य प्रतिषेधात् पुरुषैकत्वस्य अपरिहार्यत्वे तस्यैव प्रवृत्तिरूपत्वेन चेतनाचेतनभेदेन भवत्यादिति भावः। इदमादेव व्याख्याने प्रत्यक्षानुमानगम्यं दर्शयन्नाह—इदमितीति। निर्दि-

इति, सर्वमिमक्षेपम्, तस्यैव सामान्यविशेषभेदमभेदानन्येऽपि सङ्गृहीतं पुरुषा, इदं च देवता प्रदर्शनमिदं सर्वमिति । कालतस्तु भूतं भाव्यमिति अतीतानागतवर्तमानानां प्रदर्शनम्, भूतभव्य वर्तमानातीतव्यापित्वात्, उत-अपरम्, भेदाभेदमर्थः, अमृतत्वस्य-अमृतत्वस्य ईशानः-प्रभविता, स च एषोऽजरोऽमरः पुरुषः, ज्ञानस्याविनाशित्वात्, सोऽमृतत्वमनुभवतीत्यर्थः । यथोक्तम्-'अक्खरस्स
5 अणंतभागो णिच्चुग्घाडिओ सव्वजीवाणं (नन्दी सूत्रे १९५२) इति, तच्चाख्यानमिदमेवाह-'जति पुण सो वि आवरिज्जेज्ज तेण जीवो अजीवत्तं पावे' (नन्दी १९५२) 'सुट्ठु वि मेहसमुदए होइ पभा चंदसूराणं' (नन्दी सू १९५२) इति । यदिति, यस्मात् कारणात्, अन्नेनातिरोहति, अपरे तुष्यतेऽन्नवत इममर्थं पुरुषस्य तेनैवात्मनाऽन्नादनन्यत्वेऽपि विपरिवर्तितत्वात् तेनाभेदमात्मावतिरो-हति वर्धते-उपचीयते, तस्मादन्नाद्यात्मक एव भवनीयाहारेण, तेन ज्ञानक्रिययोरुपष्टम्भोपलम्भात्
10 करणकायविवृद्धेश्च, यथोक्तं-'अन्नं वै प्राणाः' 'अन्नमयो ह्ययं पुरुषः,' पुरि शयनात् पुरुषः, नाडके-वलस्सर्वं भवते, अतिरोहति मूर्धं रोहतीति ।

किञ्चान्यत्—

अत एव सर्वत्वसिद्धिस्तस्य, तथा चाऽऽत्मा सत्त्वं भूतः पुरुषः पुद्गलो जन्तुः प्राणी जीव इत्याद्यभिख्या घटन्ते मृदनुत्तीर्णघटपिठरादिवत् व्यवस्थाविभ्यः सर्वस्यानुपरात
15 यावदेव किञ्चिदुत्पद्यते विनश्यति व्यवस्थितं वा तस्य सर्वस्यासावात्मा ।

अत एवेत्यादि, यस्मादेव कारणात् सर्वत्वसिद्धिः तस्य-तत्त्वज्ञानात्मकस्य, तथा च पुनः सर्वत्वसम्प्रसिद्धाः आत्माद्याख्याताः, सततमतति गच्छति जानीते परिणमतीति चात्मा, सतो भावः सत्त्वं स एव सन् भवति चैत्यर्थः, भूतवान् सदा भवतीति वा, पुरि शयनात् पुरुषः शरीरे जगति वा कविजम्मितविकल्पात्मके, पूरणाद्गलनाच्च पुद्गलः पुमांसं गिलतीति वा पुद्गलः, जीवशरीरस्य
20 विभज्य भोगभोग्यभावप्राप्तिवादिभ्यामुत्पत्तिविनाशाभ्यां पूरणगलनाभ्यामित्यर्थः । जायते तैस्तैर्भावैरिति जन्तुः । पञ्चेन्द्रियमनोवाक्कायबलत्रयोच्छ्वासनिःश्वासायुष्कलक्षणप्राणधारणात् प्राणी जीव इति चोच्यते । इत्येवमाद्यभिख्याः सर्वत्वे सति घटन्ते तस्य तेन धर्मेण व्यपदेशाविरोधात् । मृदनुत्तीर्ण-घटपिठरादिवत्, यथा मृदोऽनुत्तीर्णाः घटपिठरादयो भवन्ति सन्ति वर्तन्ते इत्यादिभ्यो व्यवस्थायर्थेभ्यो

मप्रमत्तार्थं सर्वतमित्याह-सर्वमितीति । अक्खरस्स इति न कदाचिदपि चैतन्य भवति यत्र चैतन्यमभावे
25 ज्ञानपरिणामो वा नानुपयोगेऽप्यप्रमत्तत्वात् तत्र सर्वजीवानामक्षरानन्तभागो नित्योद्घाटित । सोऽपि यद्यावियते तेन जीवोऽजीवत्वं प्राप्नुयात् । [illegible]

[illegible]

30 [illegible]
[illegible]

भोक्तरन्ति, भवनानुगमात् सर्वधातूनां भवत्यर्थत्वात्, एवं ज्ञानस्वरूपः कर्ता भवत्यपि यतो ज्ञानस्व-रूपभवनानुगमात्, अत आह—स्वस्वभावनियमात् सर्वस्यानुगमात्, अखिलभवविविधविषयविवर्तनयः सन्निपातपरः सत्तार्थः, स्यात्मयम सर्वभावस्वरूपं भावितवन्त इति, यावदेव किञ्चिदुत्पद्यते विनश्यति व्यवतिष्ठते वा तस्य सर्वस्यासावात्मा स्वरूपं तत्त्वमित्यर्थः, इति पर्यायैः स्वरूपोपनयनम् । 5

व्याख्यानम्—

स्वात्मनि वृत्तिविरोधात् कथमात्मनाऽऽत्मानं सृजत्युपसंहरति च, बध्यते मुच्यते च? न ह्यङ्गुल्यग्रं स्पृशति, नासिरात्मानं छिनत्तीत्येतदयुक्तम्, शक्तिभेदात् कारकभेदोपपत्तेः, तन्तुनाभकोशकारकीटवच्च तदात्मका एवैते संसारविसर्गबन्धमोक्षाः । यथा च 'सुदीप्तात् पावकाद्विस्फुलिङ्गाः प्रभवन्ते सरूपाः', एवं पुरुष एवं सर्वम्, स एवोच्यते कालोऽपि शक्त्यात्, प्रकरणात् प्रकृतिः, रूपणान्नियमनान्नियतिः, स्वो भाव आत्मनैव स्वेन रूपेण भवनात्स्वभावः । 10

(स्वात्मनीति) (संसारविसर्गबन्धमोक्षा इति) यथा तन्तुनाभकीटः स्वशरीरजमेव तन्तुं प्रसारयत्युपसंहरति च, न चान्यतः कुतश्चिदात्मन एव संहारविसर्गौ । उक्तं हि—'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम् (मुण्ड १।१।७) इति । यथा वा 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः (मुण्ड २।१।१) इति । बन्धमोक्षावपि, यथा कोशकारकीटकः आत्मानं 15 वेष्टयति स्वशरीरविनिर्गतेन कोशेन पुनश्च तत्रैव प्रलीयते कश्चिच्च कोशकं छिद्रीकृत्य निर्गच्छत्येवमात्मनो बन्धमोक्षौ नान्यत इति । किञ्चान्यत्—यथा च सुदीप्तादित्यादि, अयमपि दृष्टान्तोऽभिव्यक्तस्यात्मनि-रूपस्याऽविरूपसम्भवात् पुरुषस्य तत्साधर्म्यमवसेयम्, यथा त्वाह—यथा सुदीप्तात् पावकादित्यादि ।

यद्यपि पुरुष एव नानन्तो भवति प्रभवविभवविविधविकर्मोपयोगो वर्णयामप्यत्कस्य इत्यत आह—स्वात्मपरिश्रेति । स्वात्मनाऽऽत्मान-मेव तावन्मात्रनिरपेक्षं आत्मैव सृजति उपसंहरति चेति न सम्भवयुक्तिकम्, कर्तृत्वकरणत्वकर्मत्वानां परस्परविरुद्धानामेकत्र 20 विरोधादित्याशयः—स्वात्मनीति । न ह्यङ्गुली स्वाग्रं स्पृशति नाप्यसिः स्वात्मानं छिनत्ति तथात्मनाऽऽत्मनाऽऽत्मानं सृज-तीत्यादिकमपि न युक्तमिति भावः । उच्यते—शक्तिभेदादिति शक्तिभेदाच्छक्तिमत्कारकोपाध्यायमित्यव्यवस्थया भेदेन कर्तृत्वाद्युपपत्तिः अत्र दृष्टान्तमाह—तन्तुनाभेति तन्तवो हि तन्तुनाभस्य न बहिरुपादानकारणं न वा सह-कारिणः किन्तु तेन स्वनिर्मितमुखलालामिः स्वशरीरे एव तस्य योनिः एवं पुरुषशरीरे केशलोमानि, अत एवाऽऽत्मा स्वकारणोऽ-कर्तृ अविकल्पमितस्तु निमित्तविशेषोपादानकारणमुक्तं परिणामात् मूर्तिविशेषोऽपि यथात्मा स्वस्वात्मरूप विशेषेण विकार- 25 रूपतां परिणमत्यात्मानम् । अत्र प्रमाणमाह—यथोर्णनाभिरिति तथैव मूलस्रोतः पुरुषात् एवं विश्वं सम्भवतीत्यर्थः । यथा सुदीप्तादिति यथाहि पावकात् मुक्तो विस्फुलिङ्गः न भोगार्थं भिद्यन्ते तद्रूपनिरूपणात् अपि तत्प्रभवाः भिन्नाः सोऽपि परस्परव्यावृत्तरूपत्वात्, तथा जीवात्मानोऽपि प्रत्यभिन्नाः न प्रत्येकमन्यत्र भिद्यन्ते चिद्रूपत्वावि-शेषात् नापरत्वं न भिद्यन्ते परस्परं व्यावृत्तरूपत्वात् तत्समस्तपरिच्छेदी जीवात्मसमभेदेन जीवात्मता इति व्यवस्थितावपि गुरुत्वानुपाधिविशिष्टतत् व्यापकत्वेन व्याप्तिस्वरूपविशिष्टात् इतरे परमात्मांश एव जीवोऽप्येव विस्फुलिङ्गः 30 तत्र ज्ञानपि जीवेश्वरयोरुपाधिभेदेऽभिन्नाभिन्नत्वभावपरस्परात्मकत्वं विद्यमानमपि तिरोहितम् तत्तु परमेश्वराभिव्य-क्तौ भवात्मकस्य अन्तर्विभूतपात्मत्वस्य तिमिरतिरस्कृतेव स्वरूपाभिव्यक्तिपरत्वात् तदितरस्य स्वरूपविशेषाभिव्यक्ति न तन्मात्र एव सर्वेषां अनुग्रहम्, एतत्सर्वेश्वरस्यापरिणामात्मकत्वस्य तत्सद्भावात्प्रमेय इति 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति श्रुतेर्मतः । एवं च पुरुष-

एवं तावत् पुरुष एव सर्वमित्युक्तम्, स एवोच्यते कालोऽपि सत्त्वात्, कलनात् कालः, कल संख्याने, कलनं ज्ञानं संख्यानमित्यर्थः । यथा चायुर्वेदे 'कालः पचति भूतानी'ति श्लोकः । प्रकरणात् प्रकृतिः, स एवेति वर्तते, सत्त्वरजस्तमःसत्त्वात् प्रकाशप्रवृत्तिनियमार्थागुणात्मकत्वतत्त्वविकल्पनेन च भोक्ता । प्रकुरुत इति प्रकृतिः । यदाहुः—'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां 5 सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' (श्वेताश्व ४।१।५) इति । रूपणाभिमननाभिपत्तिः, रूपणाच्चक्षुषो विषयो रूपमेव न रसादयः, रसनाद्रसो रसनविषयो न रूपादय इत्यादिनियमनाभिपत्तिः । को भावः आत्मनैव तेन रूपेण भवनात् स्वभावः 'का कष्टकाना'मित्यादि ।

येन यत्र यथा यस्माद्यदा यदर्थं प्रवर्तितव्यं तेन तत्र तथा तस्मात्तदा तदर्थं प्रवृत्ति- रन्तरवीतस्य, स एव हीदं सकलं जगत् वृतमविवृतञ्च बहुधानकं चेतनाचेतनप्रभेदरूप- 10 मिति । आह च—'तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः' (ईशा० १-५) इति । स एवार्हन् बुद्धः ब्रह्मा विष्णुः ईश्वर इति ।

(येनेति) येन—हेतुना यत्र—क्षेत्रे यथा—येन प्रकारेण यस्मात्—अपादानात् यदा—यस्मिन् काले यदर्थं—भक्तभोजनमुद्दिश्य प्रवर्तितव्यं तेन तत्र तथा तस्मात्तदा तदर्थं प्रवृत्तिः, यथा राज्ञाऽऽज्ञप्तः सूपकारः स्वास्थ्यं इष्टकालाद्यनुमानात्कृत्वा मृदु विशदभोजनं प्रेक्षापूर्वकं सुलभमनार्यञ्च 15 पचतीति, तस्मिन् प्रवर्तन तदन्तरात्मेतस्य न ततो व्यतिरिक्तं बहिर्भूतम्, स एव हीदं, स एव पुरुषो यस्मादिदं सकलं जगद्वृतं—ततः प्रवृत्त नामाभेदेन विवर्तमानम्, अविवृतञ्च तत्स्वरूपापरित्यागात्, बहुधानकं—बहुधानामयं, चेतनाचेतनप्रभेदा रूपमस्येति चेतनाचेतनप्रभेदरूपं—पश्वेतनं मरुतोऽयं गमरमारकादि तत्सर्वस्यास्य रूपमस्य, अप्रकृतरूपमपरत्वापेक्षमात्र सममेवमस्य रूपमिति, आह चेति, वैषमतानुसारेणैवेत्यर्थः तदेजति—चलति स्पन्दते, नैजति—न चलति न स्पन्दते तद्दूरे—तिर्यग्लोकेऽधो 20 लोकेऽथोर्ध्वे च, तद्वन्तिके—एकस्मिन् प्रदेशे इत्यस्त्रयादि तदन्तरस्य—घटपटादेः सर्वस्य—वस्तुनः साकाराकारोपयोगमयस्वभावस्य स्वपरिणतेरप्रतिघातात् तदु सर्वस्यास्य बाह्यतः—तदेवालोकेऽपि सद्भावात् सर्वव्यापीति लोकालोकव्यापिनिर्देशात्तस्य बाह्यमलोक इति । अर्हन् बोधने इत्यादेः विशुद्धि-

---

सैव सर्वगतिर्यस्मिन् तन्मयो वै नैति स एव जन्मरूपेण परीक्ष्यत इति विवक्षितम्—एवं तावदिति । स एव कालकृति विविधिकालामिकल्पनस्य इत्याह—स एवोच्यत इति काल इति काल पचति भूतानि काल संहरते प्रजाः । काल 25 सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ इति कारिका कालवादिनो बोध्य प्रधानवादिसम्मतं मन्त्रमाह—अजामेकामिति, अजामजन्या परमेश्वराधुरूपायां ज्योतिःप्रमुखा तेजोबलकमनी चतुर्विधम् भूतग्रामम् प्रकृतिमुक्तां सृति च गुणत्रयात्मकां विकारशालामिति साङ्ख्यमते निरूपितम् । रूपं हि निरूपणं तत्त्वं निरूपयत इत्याह—रूपणा चक्षुष इति । का कष्टकानामिति का कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रतां वा मृगपक्षिणाम् । स्वभावतः सर्वमिदं प्रवृत्त न कामचारोऽस्ति कुतः प्रयत्नः ॥ इति स्वभाववादिनः कारिका बोध्या । प्रत्याभेदवाद्भावपक्षेण सर्वमिदं प्रवृत्ति- 30 यत्र पुरुषात्मकत्वेन च सर्वत्र ततो व्यतिरिक्तं प्रतिरुन्धीति पुरुषादवसृतार्थरूपं—येनेति । यत्सूत्रम्—यथेति प्रकारत्वम् इति हेतुमर्थम्, आत्मनियामकमूर्त्तेर्मत्वम्, तदाशितत्वार्थं इत्यसम्भवेनोक्ता पदार्थेवयागाः तत्प्रवृत्तानामित्यर्थः तस्येष प्रत्येकम् । बहिर्भूतत्वाभावे हेतुमाह—स एव हीदमिति । वैनमतानुसारेणैवेति तदेजती- त्यादिमन्त्रस्य जैनमतमिश्रणेन व्याख्यानमस्त्यावीति भावः । तथाहि पुरुष एवार्हदादिरूपेण स्यादित्याह—अर्हन्निति ।

प्रकर्षविशेषारेकता अपि स एव, अर्हति सकललोकातिशयपूजामित्यर्हन्, पुरुषान् इति पुरुः, वर्धना-नुवृत्त्या [illegible] वर्धमानो वा, व्याप्नोतीति विष्णुः ज्ञानात्मनैव सर्वानर्थान्, ईशनादीश्वरः । एतेभ्यश्च ज्ञानविशुद्ध्युत्कर्षभेदेभ्यस्तत्पर्यन्तमात्रेयो वरदेऽस्मि भवतीति सम्भाव्यते दुःप्रापत्वात्तदर्थमस्य सम्भाव्यतेऽभ्यते, शेषपदव्याख्यानिस्तु सुकरमेवेति । तामपि दुरापां सर्वज्ञावस्थां परमविशुद्धां परमार्थात्मा स एव प्रादुर्भवतीति । एवं विधिविधिनयविकल्पः पुरुषवादः ॥ 5

अथ नियतिवादः

अधुना नियतिवादो विधिविधिनयदर्शनाश्रयोऽभिधीयते—

सत्यम्, भवनकर्तुः स्वातन्त्र्यं न शक्यमपह्नोतुम्, भवनस्य क्रियात्वात्, या क्रिया सा भवितुरेव घटादेः परमाण्वादेर्वा यथा पचिक्रिया पक्तुरेव स्वतन्त्रस्य, भवनमपि च क्रियात्वात् भवित्रा विना न भवति पचिवत्, यत्तु स ज्ञ इति, सम्यगर्थमेतत्, सर्वज्ञस्यैव भवनाभ्युपगमे 10 दोषदर्शनात्, स यदि ज्ञः स्वतन्त्रश्चेत्सुभगगुणसम्पन्न इष्यते नात्मनोऽनर्थमापादयेत्, ज्ञत्वे सति स्वतन्त्रत्वात्, [illegible]वत् ।

(सत्यमिति) सत्यं–युक्तमेतदुच्यते त्वया, तत्र भवनस्वातन्त्र्यमुपलभ्यमानं यत्प्रकारं शक्यम-पह्नोतुम्, किं कारणम्? भवनस्य क्रियात्वात्, या क्रिया सा भवितुरेव घटादेः परमाण्वादेर्वा, यथा पचिक्रिया पक्तुरेव भवति स्वतन्त्रस्य, भवनमपि च क्रिया क्रियात्वाद्भवित्रा विना न भवति, पचिवत्, 15 भविता च कर्ता स्वतन्त्रः कर्तृत्वादेव न केनचिदसौ भाव्यते कार्यते क्रियते वा स्वातन्त्र्यात् कर्तृत्वात् । यत्तु स ज्ञ इति, सम्यगर्थमेतत्, यत्पुनरुच्यते स्वातन्त्र्यात् कर्ता ज्ञ एवेत्यत्रार्थे तत्र त्वया सोऽस्वस-म्यगर्थ–विचार्यमस्ति, सर्वज्ञ एवेत्ययुक्तमित्यभिप्रायः । किं कारणमयुक्तम्? सर्वज्ञस्यैव भवनाभ्युपगमे दोषदर्शनात्, कर्तृत्वात् स्वातन्त्र्यमस्ति, को वारयति । स यदि ज्ञः स्वतन्त्रश्चेत्सुभगगुणसम्पन्न इष्यते–यदि वा स स्वतन्त्रोऽपि स्वात्मात्मनोऽनर्थमनिष्टमापादयेत्, ज्ञत्वे सति स्वतन्त्रत्वात् । को दृष्टान्तः? विद्-20 ग्धावत्, यथा हि दैवपुरुषगतिज्ञो देशकालसहायसाधनसम्पन्नः पराक्रमवान् राजा नात्मनोऽनर्थमनिष्टं मरणपराजयादिकमापादयति, एवमसावपि नात्मनोऽनर्थमनिष्टमापादयेत्, दृष्टस्त्वयमनर्थोऽनिष्टो जन्म-जरामरणरोगशीतोष्णादिः शारीरः, मानसश्च शोकभयविषादेर्ष्यासूयादिः, तस्मादयुक्तमस्य ज्ञत्वमिति ।

ज्ञानविशुद्धिविशेषाभिप्रायेण [illegible] परमो[illegible]ऽपीत्यत–[illegible]ति । [illegible] दुःप्रापत्वादिति । दोषेति [illegible] 25 [illegible]–तामपीति । अथ नियतिवादस्य विधिविधिनयः [illegible] –अधुनेति । पुरुषमुक्त्वा [illegible]–भवनकर्तुरिति । [illegible] [illegible] एव [illegible] किन्तु भवनक्रियायाः [illegible] [illegible] । किञ्च [illegible]–यथेति । भवि-[illegible]–भवनमपि चेति । भवितुरेव [illegible]–कर्तृत्वादेवेति । [illegible]–यत्त्विति । अथवा 30 [illegible] यदि ज्ञ इति । [illegible] [illegible] किन्तु यथा न [illegible] [illegible]–दैवपुरुषेति । दैवतो [illegible]

एतच्च न, निद्रावदवस्थावृत्तेरस्वातन्त्र्यात्, आहितवेगविकटपातवत् । ननु तत्कृताव-
पुरुषस्यैव, असत्त्वात्, पुरुषस्याभिमतत्वेऽपि नायमेव नियमः कर्मेतरत्वापादनाय ।

एतच्च न, निद्रावदवस्थावृत्तेरित्यादि, नैतदुपपद्यतेऽनर्थानिष्टापादनानुपपत्तिप्रसङ्ग इति, कस्मात्? निद्रावदवस्थावृत्तेः, निद्रावस्थया निद्रावदवस्था तया वृत्तिर्निद्रावदवस्थावृत्तिस्तस्य
5 वृत्तेः पुरुषस्यैवास्वातन्त्र्यात्, तस्यापि स्वकृतनिद्रावस्थावृत्तिवशादस्वातन्त्र्यम्, आहितवेगविकट
पातवत्, यथा कश्चित् पुरुषः स्वयमेव पूरितवेगात्तं वेगं निवर्तयितुमशक्तो विकटे पतति तथा स्वतन्त्र-
मपि क्रमपि तत्परं कारणमात्मनोऽनिष्टमनर्थमापादयेत् को दोषः? इति, अत्र कुत्सुकस्य दोषं ब्रूमः—
यत्तु तत्स्वैवासि, सम्येवं त्वया निद्रावदवस्थावृत्तिवशादाहितवेगविकटपातवदस्वातन्त्र्यादनर्थानिष्टा-
पादनमिति ब्रुवता तत्कृतत्वापुरुषस्यैवैषा समर्थ्यते, येनात्मना पूरितवेगया शीघ्रगमनक्रियया विकटपातो
10 भविष्यतीत्यज्ञानात्, अतस्ते विकटपातः स्ववशस्य नोपपद्यत इति स एव दोषप्रसङ्गस्तदवस्थ-
पुरुषस्य । पुरुषस्याभिमतत्वेऽपि चेत्यादि, यद्यपि स्वतन्त्रकर्तृत्वाविनाभाविसकलकोपबृंहितमात्मभव
त्वमेवास्य सर्वस्य मन्यसे तथापि नायमेव नियमः कर्मेतरत्वापादनाय, भवतीति वाक्यशेषः ।

कथं कृत्वा तद्वाच्यत इति चेदुच्यते—

भवति कर्ता स एवावस्थाविशेषाच्चेतनोऽपीति कारणान्तरास्तित्वं भवतैव समर्पितम्,
15 शास्त्रस्वतन्त्रास्वतन्त्रस्वविषयनियतकर्तृकरणाधिकरणकर्मादिनियतक्रियादर्शनात् देवदत्तकाष्ठ-
स्थालीतण्डुलोदकादीनां तन्नियमकारिणा कारणेनावश्यं भवितव्यम्, तेषां तथाभावान्यथा
भावाभावाविति नियतिरेवैका कर्त्री ।

भवति कर्तेति प्रागभिहितास्वातन्त्र्यान्त्याय तदीयमेवोच्चारयति यावच्चेतनोऽपि भवतीति,
त्वयैव कारणान्तरास्तित्वमेव ब्रुवता समर्पितं भवति किञ्चिदसामर्थ्यानां शास्त्रतन्त्रास्वतन्त्र-
20 विषयनियतकर्तृकरणाधिकरणकर्मादिनियतक्रियदर्शनादेवदत्तकाष्ठस्थालीतण्डुलोदकादीनाम्, तन्नियमका-
रिणा कारणेनावश्यं भवितव्यम्, किं कारणम्? तेषां तथाभावान्यथाभावाभावात्, देवदत्तोऽपि तद
भोक्तृकर्तृत्वतण्डुलाऽऽवपनेनोपकर्तृमात्रव्यापारत्वाच्च एव नियतो न स्वतन्त्रस्तन्त्रकारणविशेषादि

एव दर्शयति—देवदत्तेति । पुरुषादी व्याचष्टे—एतच्च नेति । आत्मनोऽनर्थमनिष्टं चापादयेदिति चेदुक्तं तत्रोत्तरः ।
निद्रावस्थासमानतया तत्त्वदेव वाचनामत .... [illegible]—निद्रावदिति । तत्र दृष्टान्तं व्याचष्टे-
30 यथेति । निगमयति—तस्मिन्निति अनर्थमहमनिष्टमापादयाम .... न युज्यते इति भावः । यदि तु भवन्तं
तदि .... [illegible]
.... [illegible]—पद्यतीति । स एव चेतनोऽपि .... [illegible]
.... [illegible]—त्वयैवेति । सोऽपि च
.... [illegible]
30 .... [illegible]—कर्तेति । यथा च .... न नियमकारिणी किन्तु .... [illegible]
मिति भावः । .... [illegible]—तेषां तथाभावेति ।
.... [illegible]
.... [illegible]—देवदत्त इति । .... [illegible]—तोरिति । .... [illegible]

व्यापारसातत्ये, एवं तेषामपि कालादीनां करणादिस्वव्यापारविषयसातत्यनियमः तथाभावः, तेषामेव कारणानां स्वव्यापारविपरीतत्वक्षणिकः परस्परतोऽन्यथाभावः, तयोस्तथाभावान्यथाभावयोरभावात्, अभावभावसद्भावादिति यावत्, इत्थौ नेमौ तथाभावान्यथाभावौ, तस्मान्नियतत्वान्नियमकारिकारणापेक्षनियमावेव भावाभावौ, तत्र कारणं नान्यदतो भवितुमर्हतीति नियतेरित्यत आह—इति नियतिरेवैका कर्त्री। इतिशब्दो हेत्वर्थे, अस्माद्धेतोर्नियमकारिकारणाविनाभावभावाभावनियमात् नियतिरेवैका कर्त्रीत्यस्तु निर्दोषा कल्पना।

कथं ? यस्मात्—

न हि तस्याः कदाचित्कथञ्चित्कार्यानुरूपमेकत्वं व्याहन्ति, ज्ञानात्मैककारणवादे पृथिव्याद्यचेतनं न कारणानुरूपम्। आह च—'प्राप्तव्यो नियतिबले'त्यादि, (सू० श्रु० १ अ० १ उ० २)।

(न हीति) अस्ति च व्याघातावस्थासु भवत्स्वपि कल्पितासु, कारणपूर्वत्वाभ्युपगमात् कार्याणाम्, न हि नियतेर्नियममात्रस्य कर्त्र्याः भावानां सारूप्यवैरूप्यभेदेऽपि व्याघातोऽस्ति, कदाचिदिति, अवस्थान्तरेऽपि, कथञ्चिदिति प्रकारान्तरेणापि, तस्मात् कारणैकत्वेऽपि वैरूप्यदोषपरिहारसमर्थत्वान्नियतिकारणकल्पना श्रेयसीति, आह चेति, जिनवचनोपजीविनमेतदपि ज्ञापकं पूर्ववत्, प्राप्तव्यो नियतिबलेत्यादि, कृतेऽपि यत्ने कार्यविपर्यासभावकृतेऽपि नियमात्तत्सम्पत्तिदर्शनात् कार्यस्य कारणानुरूपगुणत्ववैरूप्यविरोधपरिहारसमर्थोऽस्ति।

किमयमेव गुणोऽन्योऽप्यस्ति वा ? अस्तीत्युच्यते, कतमोऽसौ ? अयमभिप्रायतो गुणः, स च मूर्तामूर्तोपयुक्तविरुद्धधर्मोपपत्तिपरिहारेणेति तद्दर्शयति—

न च मूर्तामूर्तचेतनाचेतनत्वादिवस्तुनो यत्प्रतिपाद्यमस्ति, उभयथा यथा तथा प्रविभक्ताप्रविभक्तसर्वार्थपर्यायात्म्यस्याप्यनेकरूपस्य नियतेः।

नियमयत्र नियमकृन्नत्वोऽन्यथासम्भवत्वनियमकारी यः सैव नियतिः कर्त्रीत्युच्यत इति भावः। तथा एकत्वकल्पनायां दोषाभावमाह—न हीति। ज्ञानात्मपुरुषस्यैकस्यैव कर्तृत्वे कल्पितेऽचेतनयोर्भूतत्वतया सारूप्येऽपि पृथिव्याद्यचेतनयोरसम्भव एव स्यात्, तदव्यामोहात् कार्यानुरूपं हि कारणं भवति कार्यस्याचेतनत्वे कारणस्याप्यचेतनत्वं स्यात्, कारणस्य चैतन्ये च कार्यमपि चेतनमेव भवेत्, एतस्य व्याघातोऽस्ति पुरुषवादे। नियतिवादपक्षे तु तस्याः नियममात्रकर्तृत्वात् भावानां सारूप्यवैरूप्ये अपेक्षिते अतो नियतेरेकत्वे दोषाभाव एवेति न भावानां तथा इति भावः। व्याघातावस्थास्विति परस्परविरोधिविधु कार्यकारणभावविघटनात्मकव्यवस्थास्वित्यर्थः। अत्र यदि प्रश्नस्यार्थकल्पनीयत्व—आह चेतीति। एतदपि ज्ञापकं जिनवचनानुसार्येव सर्वावस्थं तत्रैव सूत्रप्रस्तावेऽस्या—जिनवचनेति। 'प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः सोऽवश्यं भवति नृणां शुभोऽशुभो वा। भूतानां महति कृतेऽपि हि प्रयत्ने नाभाव्यं भवति न भाविनोऽस्ति नाशः॥' पूर्वं व्याख्यातं तस्याः सर्वेऽपि नार्थमाह—कृतेऽपीति महति प्रयत्न कृतेऽपि फलानुत्पत्तिदर्शनादित्यर्थः। अकृतेऽपीति प्रयत्नाभावेऽपि नियतिवशात् कार्यसम्पत्तिदर्शनादित्यर्थः। तथा च नियतावुक्ते कार्यं कारणानुरूपमित्येव गुणः सम्पद्यते कारणैकत्वप्रयुक्तवैरूप्यविरोधोऽपि परिहृतो भवतीत्याह—कार्यस्येति। गुणान्तरमप्यत्र सम्भवतीत्याह—किमयमिति। पुरुषस्यैव कारणत्वे तस्यामूर्तत्वेन पृथिव्यादिमूर्तकार्यं भवेत् ततो न भवेत् मूर्तस्यामूर्तोपादानकत्वविरोधात्, नियतिकारणत्वे सोऽपि विरोधः परिहृतो भवति तथा च कल्पनान्तरेण मूर्तत्वस्य प्रतिपत्त्या तदचेतनत्वप्रतिपादनं गुणोऽप्यस्तीत्याह—अयमेवेति। तमेव गुणं प्रदर्शयति—न चेति। वस्तुनो मूर्तत्वममूर्तत्वं चेतनत्वमचेतनत्वं शुभत्वं स्थूलत्वं च पुरुषादिष्विव इत्यत्रापि

न च मूर्तामूर्तत्वादि वाच्यमप्रतिपाद्यमस्तीति, तत्रोपपत्तिः तमयथा तदात्मकमविभक्ते- व्यादि यावन्नियतेः, तेन तेन प्रकारेण—यथायथा मूर्तत्वेनामूर्तत्वेन चेतनत्वेनाचेतनत्वेन सौख्येन दौःख्येन च ऐश्वर्येण दारिद्र्येण चेत्यादिना प्रतिनियतमात्मलाभार्थं सर्वं वस्तु ज्ञेयं स्वरूपं इत्यादिना चामति- पन्नानां सर्वेषामर्थानां यथावद्भावो याथात्म्यं तेन याथात्म्येन तत्र तदात्मकं सर्वस्य नियतस्य 5 नियमेन स्थितः प्रयोजकत्वं हेतुत्वैकं ज्ञापनं तथैकरूपमेव सर्वत्र तस्या नियतेः, तस्मात्तेषां तथा- तथाप्रविभक्ताप्रविभक्तसर्वार्थयाथात्म्यज्ञापनैकरूपत्वात् नियतेर्नेदानीं नियमनमात्रैकव्यापारस्य नियते- र्हेतुत्वमवपादयमानं यत्नः कश्चिदास्थेयः ।

प्रयत्नसाध्येष्वर्थेषु कृतकेष्वपि च तद्विषयक्रियाफलस्य तथानियतेर्व्यापिता नियतिश्च रम्यत्वस्य ।

10 (प्रयत्नेति) सामर्थ्यं नियतिनिबद्धत्वात् सर्वभावानां क्रियाक्रियाफलयोरनियम इति, यत्र भवति, तद्विषयस्य—घटादिविषयस्य मृत्पिण्डदण्डचक्रादिसाधनस्य प्रयत्नसाध्यस्य घटास्तनिर्वृत्तिलक्षण- क्रियाफलस्य तेन प्रकारेण नियतेः नियतिरेवात्र कारणमिति ।

इदानीं तस्याः नियतेः स्वरूपं निरूप्यते—

किं त्वा तेषामेव भावानां प्रतिस्वं भिन्ना नियतिस्तदभेदा सा? परमार्थतोऽभेदाऽसौ 15 कारणं जगतः, भेदबुद्ध्युत्पत्तावपि परमार्थतोऽभेदात्, बालादिभेदपुरुषत्ववत् ।

(किमिति) किं तावत्तेषामेव भावानां स्वं स्वं रूपं प्रति प्रतिभावं भिन्ना नियतिरिष्यते? तदभेदा सेयम्? परमार्थतोऽभेदाऽसौ कारणं जगतः, भावाः भेद इत्यभेदा । कस्मात्? भेदबुद्ध्युत्पत्ता- वपि परमार्थतोऽभेदात् । अथवा कोऽसौ भेदो नाम नियतेरपि, क्रियाक्रियासाध्यार्थस्वरूपत्वा- द्भावानां नियमस्येति । नैवमचेतनत्वादिबुद्ध्युत्पत्तौ सत्यां परमार्थतो नियतिरिति भेदानभिन्नत्वादभेदा, 20 भेदबुद्धिस्तु तद्विकल्पमात्रभावापेक्षा । किमिव? बालादिभेदपुरुषत्ववत्, यथा बाल्यकौमारयौवनम- ध्यमावस्थाभेदबुद्ध्युत्पत्तावपि पुरुषत्वमभिन्नमेव नियतिरपि क्रियाविषयकभेदबुद्ध्युत्पत्तावप्यभिन्नेति ।

न मूर्त्या प्रयोजनं प्रतिपाद्यं भवतीति भावः । तत्रोपपत्तिमाह—तत्रोपपत्तिरिति । तमयथेति मूर्तत्वामूर्तत्वादि तेन तेन प्रकारेणेत्यर्थः । सर्वमिति सर्वं वस्तु ज्ञेयं यत् सर्वं इत्येतत्प्रतिनियतार्थं पदार्थानभिज्ञार्थः । तथा तथेति प्रविभक्ता- प्रविभक्तत्वात् सर्वेषां वस्तूनां स्वरूपेण नियतत्वं तेन तेन प्रकारेण व्यवस्थात्मकं स्वरूपं एकरूपमपि नियतिरिति भावः । 25 सर्वभावेषु नियतिनियतत्वे क्रियाक्रियायत्नविस्तरता कथं भवेत् क्रियापि नियत्यैव नियतत्वे क्रिया कृता न भवेत् नियतेरभिनिहितत्वविरोधादित्यत्र—आत्ममतमिति । यतिः क्रियायत एव क्रियानिवृत्त्या कस्यचन एव क्रियात्मकमिति तेनैव प्रकारेण नियतेः तत्प्रयत्नस्य तदात्मेन तेनैव प्रकारेण व्याप्तत्वादित्युपपत्ति—तद्विषयस्येति । इदानीमिति, नियतेरेव स्वरूपं कथितं भेदाभेदं आत्मापेक्षा नियतेरेव स्वरूपं भावः तदात्मन तत्स्वरूपं निरूप्यते स एव प्रति- वस्तु भेदेन नेति योज्यम् । नियतिः परमार्थतोऽभिन्ना भेदबुद्ध्युत्पत्तावपि परमार्थतोऽभेदात्, बालादिभेदपुरुषत्ववत्, 30 बाल्याद्यवस्थाभेदेऽपि पुरुषत्वस्याभेदवत् पुरुषो यथा वस्तुतोऽभिन्नः तथैव नियतेः नियतेरुभयथोऽपि तदात्मकत्वमिति भेदबुद्ध्युत- त्तावपि नियतेर्भेदाभावमाह—भेदबुद्ध्युत्पत्तावपीति । क्रियाक्रियात्मकवस्तुस्वरूपस्य नियतेः कोऽसौ भेदः नैवम- चेतनत्वादिभेदबुद्धौ तदात्मकत्वाद्यविकल्पाया नियतेरभेदात्, भेदबुद्धिरपि विकल्पबुद्धिविषयभेदाविभक्तत्वापेक्षात्—यथा नेति ।

आह—

कथं परमार्थतो नास्ति भेदो भेदबुद्ध्याभासभावेऽस्याः? अथवा परमार्थतस्तु भेद एवास्तु सत्यप्यभेदबुद्ध्याभासभावे? इति, कथं परमार्थतोऽभेदः? अभेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानात्, कथमभेदः? भेदबुद्ध्याभासभावेऽप्यभेदाभ्यनुज्ञानादेव । द्विधापि चाभेदस्याभ्यनुज्ञानादेवाभेदा सेति गृह्यताम्, व्यवच्छिन्नस्थाणुपुरुषत्ववत् ।　5

(कथमिति) कथं परमार्थतो नास्ति भेदो भेदबुद्ध्याभासभावेऽस्याः? दृश्यते हि भेदबुद्ध्याभासभावः, किञ्चित् क्रियया साध्यं किञ्चिन्नेति, किञ्चित्स्वत एव किञ्चित् परत इति, अथवा परमार्थं वस्तु भेद एवास्तु सत्यप्यभेदबुद्ध्याभासभावे इति । आचार्यो द्विधापि चोदिते परिहारमाह—कथमित्यादि, यदि भेदोऽभिमतस्तत्र कथं परमार्थतोऽभेदः? भेदबुद्ध्याभासभावेऽपि अभेदाभ्यनुज्ञानात् तथैव भेदवदाभासतेऽभेद एवेति । अथाभेद इष्टः कथमभेदः? अभेदबुद्ध्याभासभावेऽप्यभेदा- 10 भ्यनुज्ञानादेव । यथैकान्तबुद्धिरुत्पद्यते परमार्थविषयत्वे तथा तदाभासा द्विधापि चाभेदस्याभ्यनुज्ञानादेवाभेदा सेति गृह्यताम् । किमिव? व्यवच्छिन्नस्थाणुपुरुषत्ववत्, परमार्थतः स्थाणुरेव वा पुरुष एवेति व्यवच्छिन्ने वस्तुनि यथोर्ध्वतासामान्यस्याभेदस्य धर्ममात्रमेव एवं सर्वनियतिषु क्रियाक्रियाफलरूपास्विति ।

सा पुनर्नियतिर्भेदाभेदरूपा कस्मादिति सकारणं स्वरूपनिरूपणमस्याः उच्यते—　15

सा च नियतिरसा च, इह च स्वर्गादिषु च तथानियतेरासन्नानासन्ना च, तस्या एव तत्तथासमानासन्ननानावस्थद्रव्यदेशादिप्रतिबन्धभेदात्, मेघगर्भवत्, 'यस्माभावाभावविभावो न च भाविनाशः' इति ।

सा चेत्यादि, सा च नियतिः सैव, सर्वनियतिषु तथा एवाविशेषात् । असा च, क्रियाक्रियाफलनियमादिवैलक्षण्यात् । आसन्ना, प्रत्यक्षोपलभ्येष्वर्थेषु प्रत्यासत्त्या नियतत्वात् । अनासन्ना, 20 अर्वाग्दृष्टानागमगम्येषु दूरत्वात्, इह च स्वर्गादिषु च तथा नियतेरासन्नानासन्ना च । किं कारणम्? तस्या एव तत्तथासमानासन्ननानावस्थद्रव्यदेशादिप्रतिबन्धभेदात्—सा चासा चासन्ना चानासन्ना च

ननु कथं नियतेर्भेदबुद्धिविषयभावस्यभावात् अपि वस्तुतो भेदो नास्ति इत्याशङ्कते—कथमिति । भेदबुद्धिविषयत्वेऽप्यभेदबुद्धिविषयत्वाभेदाङ्गीकारे भिन्निम्नत्वादिरूपभेदबुद्धिविषयत्वेऽपि भेदबुद्धिविषयत्वात्तस्य भेद एवास्तित्वमाह—अथ वेति । द्विविधबुद्धिविषयत्वेऽप्यभेदरूपत्वमेव तस्य व्यवस्थापयति—कथमिति । भेदबुद्धिविषयत्वमादर्शयति—दृश्यते हीति । भेद 25 बुद्ध्या तस्य भेदेऽभेदः कथमित्याशङ्कते—यदि भेद इति । उत्तरमाह—अभेदबुद्धीति । तथैवाभिन्नैव भेदवदाभासत इति परमार्थतोऽभेदाभ्यनुज्ञानमित्यर्थः । यदि नियतिर्भेदबुद्धिविषयत्वादि तथाप्यभेदः कथं किन्तु भेद एव स्यादित्याशङ्कते—अथाभेद इति अभेदबुद्धिविषयतया तथाप्यभेद इत्युत्तरयति—अभेदेति । द्विधापीति—भेदबुद्धिविषयत्वेऽभेदबुद्धिविषयत्वेऽपि चाभेदस्याभ्यनुज्ञानादेवाभेदा नियतिरित्यर्थः । व्यवच्छिन्नेऽपि वस्तुनि ऊर्ध्वतासामान्यस्याभेद धर्ममात्र पुरुषत्वस्थाणुत्वभेदे सत्यपि यथा तदभिन्नं तथा नियतिरपीति दृष्टान्तमुपपादयति—किमिवेति । सा नियतिः 30 क्रियाक्रियाफलादिभेदेऽपि नियतेरनुवर्तमानत्वात् इयं क्रियानियतिर्नेयं फलनियतिरिति च फलनियतिर्नेयं क्रियानियतिरिति विशेषाभावात् नियतिः तथा प्रत्यक्षयोग्याः पदार्थाः अयुक्ता एव प्रत्यक्षीभवन्तीति नियमादासन्नत्वात् अदृष्टाश्च अर्थाः आगमापेक्षधर्मादिसिद्धरूपा इति नियतिरनासन्नापीत्याह—सा च नियतिरिति । अत्र हेतुमाह—तस्या एवेति, द्रव्यदेशकालभावाः केचिदभिन्नरूपाः केचिद्भिन्नरूपाः केचिदासन्नाः केचिदनासन्ना इति तथा

मानात्मका येषां ते घटपटादिसमवायासमवायिकारणात्मद्रव्यदेशादयः, तैः प्रतिबद्धा या एव नियतिर्भवति, द्रव्यदेशादिरूपैर्नैकान्तिकत्वात् कालभावाभ्यां च । सैव नियतिर्द्रव्यतो घटरूपेण सा भवति, पटरूपेण सा, घटान्तरस्यासत्त्वाऽऽकारम्भकत्वासत्ता, पटान्तरेणाप्रत्यासत्ता । क्षेत्रतो यस्मिन्नकर्मभूमि क्षेत्रे तस्मिन्नेव, यत्र वा भूप्रदेशे तिष्ठति भीमादिदेशे वा तत्रैव नान्यत्रेति, कालतो यावत्कालेन निर्वर्त्ये

5 यावन्तं कालं वा तिष्ठति सा कालनियतिः, भावतो वैवर्णैः कृष्णादिभिर्यथा भवति तथैवेति नियतिरेवं द्रव्यदेशादिप्रतिबद्धमेतदात्मविरचना नियतेरस्त्येऽपि, किमिव ? मेघगर्भवत्, यथा मेघा गर्भं गृह्णन्तो यादृक् यावच्च कालं गृह्णन्ति यथा च यादृक् तावत्तथैव विसृजन्ति द्रव्यतः, क्षेत्रतो यत्र गृह्णन्ति तत्रैव विसृजन्ति, कालतो मार्गशिरे मासे गृहीत वैशाखे विसृजन्तीत्यादि, भावतो यथा गृहीत क्षार मधुरादि तथैव विसृजन्ति सत्त्वौपघातमरणविशोषपोषकत्वादीति । तदुपसंहरति—'नाभाविभावो न च

10 भाविभावः' इति, प्राक्तनेन सूत्रेण गतार्थम् ।

साम्प्रतमयं नियमः कालात् कालस्य क्रमात्मकत्वात् पूर्वोत्तरादिकालक्रमनियतपरिणामत्वात्मकत्वादिति एतत्—

न कालवदयं विधिविधो नियमः, वर्षारात्रादिष्वपि क्वचिदनियतप्रवृत्तेः, दृश्यते ह्यङ्कुरकिसलयपत्रपुष्पफलगर्भप्रसवादिष्वव्यभिचारो वनस्पतिसत्त्वादिनां स्वतः प्रयोगतश्च । नच

15 स्वभावात्, बालादिकाल एव युवत्वादियुगपद्भावे भेदक्रमनियतावस्थोत्पत्तिस्थितिच्युतिदर्शनात्, तथा नियतिरस्तु, तदनभ्युपगमे सर्वाविवेके अवस्थास्वभावाद्यभावादभ्युपगमविरोधश्चैव जायते, तर्हि नियमो न नियतेरन्यतोऽवतिष्ठते ।

(नेति) न कालवदयं विधिविधो नियमः, कस्मात् ? वर्षारात्रादिष्वपि क्वचिदनियतप्रवृत्तेः, दृश्यते ह्यङ्कुरकिसलयपत्रपुष्पफलगर्भप्रसवादिष्वव्यभिचारो वनस्पत्यादीनां सत्त्वानाञ्च स्वतःप्रयोगतश्च—

20 वर्षाशरद्धेमन्तशिशिरवसन्तनिदाघेषु स्वपरिणामकालेष्वप्रवृत्तिदर्शनादस्वकालेषु च क्वचित् प्रवृत्तिदर्शनात् । यदपि स्वभावेन समाचारेति तत्र च समाचारितादि यावदभ्युपगमविरोधः, वनस्पतिसत्त्वादेर्बालकौमारयौवनस्थविरादयः सर्वोऽप्यस्य स्वो भावः स्वभाव इति अतो बालादिकाल एव

तत्स्वरूपनियतत्वा अपि नियतेर्मागाद्यपत्यमिति भावः । द्रव्यदेशकालभावैर्नियतेः प्रतिबन्धं व्याचष्ट नियतिरेवेति—सैव नियतिरिति, यथा यदा घटस्याऽरम्भकत्वात् तत् पटाम्भोऽम्भकत्वमेव, तथा तत्स्थित्या नियतिरपि एवं

25 कालस्य नियतिर्यथाऽऽस्या पटाम्भादिमिरप्रत्यासत्तत्वा तत्प्रतिबद्धनियतिरपीति भावः । मेघगर्भवदित्यस्य व्याख्या यथा मेघा इति । प्राक्तनसूत्रेण पूर्वमस्यार्थस्योक्तत्वात् [illegible] । ननु भाववत्तु ये विविधा नियमाः [illegible] इत्यत्र प्रतिवचने विविधकालभावस्य वक्तव्येन भवन्ति, कालेन हि [illegible] ततो भवन्ति कार्यकाल [illegible] स्तत्र कालाद्य[illegible] नियतकालत्वात् [illegible] नियतकाल[illegible] सामर्थ्यात्मना [illegible] सर्वं कालनियतत्वात् [illegible] साम्प्रतमिति । [illegible] व्यभिचारस्वरूपमेव [illegible] काल-

30 द्वयमिति । [illegible] नियतमेवेति—न येति । तदपेति [illegible] तथा—[illegible] [illegible] भेदक्रमनियमेन नियतिरेव का नियामिका न स्वभाव इति भावः । तदनभ्युपगमे—नियतिनियतत्वस्यानभ्युपगमे सर्वाविवेके—सर्वस्य [illegible] [illegible] नियामकत्वे [illegible] [illegible] सर्वं [illegible] युगपदेव [illegible] च यावन्त इति स्वभाव एव [illegible] एव प्रमाणता भवन्त्विति भावः । स्वो भाव इति [illegible] भाव इत्यर्थं तथा च तत्र [illegible]

युक्तावयवस्था युगपत्स्युर्न च भवन्ति, तस्माद्भावकाङ्क्ष एव युवादियुगपद्भावे भेदक्रमेण नियतानी तासामेवावस्थानामुत्पत्तेः स्थितेर्भ्युतेश्च वक्ष्यनाम स्वभावः कारणम्, किं तर्हि ? नियतिरेव कारणम भ्युपगन्तव्यम् । तथा तु—तेन इत्थुना तेन प्रकारेण दृष्टोत्पत्त्यायवस्थामेवक्रमनियमेन, यतमा नियति वस्तु, तदनभ्युपगमे सर्वाविभेदे—सर्वावस्थानामविवेकेऽभ्युपगम्यमाने स्वभावाद्यभ्युपगमे सति वा अवस्था न स्युः । न वाऽवस्थारूपाः स्वभावाः, न स्युर्वैवस्वतादिर्भोत्स्यादयः युवादया वा । ततोऽवस्था 5 स्वभावाद्यभावादभ्युपगत एव स्वभावो न स्यात् । ततोऽभ्युपगमविरोधश्चैव जायते स्वभाववादिनः । आदिग्रहणात्तदवस्थासहवर्तिनः पाण्डवत्वयवस्वभावस्य रूपादिकाद्गुणस्वभावस्य पटुककशायाम्बर-गुणस्वभावस्य वाऽभावादभ्युपगमविरोधः । अथवाऽऽदिग्रहणात् कालस्यापि पूर्वोक्तन्यायेन युगपद् भावेन वाऽभावादभ्युपगमविरोधः कालकारणिनोऽपि । तस्मादिदं प्राप्तमभ्युपगन्तुम्—तदि नियमो न नियतेरन्यतोऽवतिष्ठत इति । 10

तस्या एव नियतेरेकत्वानेकत्वविरोधपरिहारार्थं दृष्टान्तमाह—

यथा लोक एकस्य एव पर्वतायाकाराग्रहो भिद्यते यथा वा ज्ञानमेकत्वेऽप्यनेकघो-ध्याकारं भवति, अन्यथा घटपटाद्याकारमन्तरेण ज्ञानात्मलाभाभावात्, एवं भेदाभेदक्रमेण नियतिः । तथा नियमात्मकत्वात् सा नियतिर्व्रीह्यादिरित्येकस्मिन् वस्तुन्येका मूलादिभेदे च भिन्नाऽङ्कुरादिर्भवति । 15

(यथेति) यथा लोक इत्येकस्य एव पर्वताद्याकाराग्रहः—एक एव लोकः सरित्समुद्रमहीप्रमा णाद्यनेकैरभिराकारैरवगृह्यमाणो भिद्यते, एव भेदाभेदरूपेण नियतिः, एतद्व्याख्यं निदर्शनम् । आन्तरमपि यथा ज्ञानमेकत्वेऽप्यनेकघोध्याकारं भवति, किं कारणं ? अन्यथा घटपटाद्याकारमन्तरेण ज्ञानात्मलाभा भावात् । एतयोर्दृष्टान्तयोरर्थस्य भेदाभेदस्वरूपमावनेपयुज्यते—तथा नियमात्मकत्वादिमानि यावदङ्कु-रादिर्भवतीति, सा नियतिर्व्रीह्यादिरित्येकस्मिन् वस्तुन्येका मूलादिभेदे चाङ्कुर इत्येवं भिन्ना अङ्कुरादिस्कन्ध-20 पत्रकाण्डादित्वापयन्मामेवादिभिन्ना, रूपरसादिभेदाच्च भिन्ना ।

अनेकस्मिंश्च पृथिव्यम्बुतेजोवाय्वादिस्वरूपेऽर्थे पृथिव्यादीनामेव तथातथाभवतोर्व्रीह्यादिरि त्येकत्वादभेदा । तथातथाऽनियतार्थवशादनियतिकारणत्वं, दृष्टं हि प्रसवादिवैकृतं नरति

कक्रायाद् नर्मो अवस्था युगपद् स्युः न तु क्रमेण तस्मात्र कारणमिति भावः । एकैकस्मैकस्या एतावस्थानाः स्वभावोऽभ्यु-पगम्यमाने दोषमाह—न स्युरिति । अवस्थास्वभावपर्यायादिस्वन्यायमाह—आदिग्रहणादिति । तदवस्थेति—तदन्वय 25 वस्त्वर्थः । यद्वाऽऽदिग्रहणेन कालस्य ग्रहणमित्याह—अथ वेति । युगपद्भावेनेति कार्यैककालस्यैव एककालस्यैव वा क्रमेण नानात्वादिनानावस्थाप्रमोक्षलक्षणानां क्रमणां वा युगपद्भावेन तासामवस्थानामभावादित्यभिप्रायः प्रतिभाति । ननु नियते एकस्या अनेकस्वभावावस्थानेकरूपत्वं विरुद्धमिति परिहारार्थमाह—यथेति । अनुमानाभिमतस्य तावदेकस्य ज्ञानस्य स्वस्मानस्य बोधं प्रतिनियतं पदार्थाः स्वभावानं युगपद्ज्ञानं मक्षानं घट-ज्ञानमिति भाव्ये ज्ञानाभिप्रेक्षमन्तरेणोपपद्यते इत्येकत्वं निरवकाशत्वं ज्ञानस्याभिमतम्, नहि युक्त्यस्यैव रूपेण भिन्ना 30 प्रत्याकारिन्यपरार्थे वर्तते तस्मात्तत्राकारमपि ज्ञानमिदानीमाह—यथा वा ज्ञानमिति । नियतिरेकाऽपि क्वचि भिन्ना भवति अनेकाऽपि एकेका भवति यथा क्षितिजलिज्ञानबहुनिरपेक्षेण व्रीहेरेकस्यैव पृथिव्यादिकमभ्योत्पत्तिरर्थस्तत्र एक एवाऽपि भवति भावेन एको भवतीति न नियम तथा च तथाऽनियतार्थवशाच्च नियति कारणमित्याशयेऽ—अनेकस्मिन्निति,

रूपौ इति चेन्न । अत्रापि यथानियतिवशेनैव प्रसवादिधर्मव्यतिक्रमो वस्तुस्वभावव्यतिक्रम श्चोपलभ्यते ।

(अनेकस्मिन्नेति) अनेकस्मिन्न पृथिव्यप्तेजोवाय्वादिस्वरूपेऽर्थे पृथिव्यादीनामेव तत्त्वापत्तेर्मीमांसितिरनेकत्वादभेदा, एकापि सती भिन्ना, अनेकाऽपि समभिन्ना तथातथाऽभिव्यक्तार्थवशात्-
5 द्रव्यत्वैकत्वाभावानामुत्पादादिष्वनियमदर्शनान्नियतिकारणत्वम्, एवं हि प्रसवादिवैकृत्यम्, नाभिमत-
पात् निजचाऽऽकारक्रियाप्रकृतिवैकृत्यानि मरुस्थिरत्वौ विपर्ययेण संवत्सरविपर्यायपर्यायादिकस्मानि प्राम-
रम्यकमकमकमकमतां तथाविधाश्च प्रसवादिविपर्ययाः, अमरत्वमभिर्व्यं रोगप्रमादिलीलाविपर्ययः,
पतितस्यैवोत्पत्तिरित्यादयश्चाविपर्यय इत्येवमादिवैकृतदर्शनात् नियतिरेव कारणमिति चेदेतदुच्यते-
अत्रापि यथानियतिवशेनैतानि धातुप्रतिक्रम उपलभ्यत इति, अत्रापि तादृशी नियतिरेव कारण-
10 मिति, क्रियात्मात् न केवलं प्रसवादिधर्मव्यतिक्रम एव, किं तर्हि ? वस्तुस्वभावव्यतिक्रमश्च ।

नियतिवशादेव किञ्चित्सत्साध्यं, असत्साध्यं, असत्साध्यं सत्साध्यञ्च प्रतिपद्यते, सदपि चाकाशं मृगतृष्णादिनमिमर्थं सलिलक्षेपणेन सन्तमसस्थघटवत्प्रदीपेन चासाध्यम् ।

(नियतीति) नियतिवशादेव किञ्चित् सत्साध्यमित्यादिचतुर्भेदी स्वकार्यत्वात् विभिन्ने, सा चोदिता निर्दिश्यमाना च । यथा च पुरुषो नियतेरेव तथाभूतत्वात्सत्साध्यासाध्यत्वे प्रतिपद्यते ।
15 तत्र सत्साध्यत्वे निदर्शन—सदपि चाकाशं मृगतृष्णादिनमित्यम्, नाकाशमिन्द्रियोऽप्यनीकमभिमर्थं सलिलक्षेपणेन न साध्यमित्यर्थः, तथा सन्तमसस्थघटवत् प्रदीपाभिना चासाध्यम्, किं तत् ? आका-शादि, सत्त्वात् साध्यं मृगतृष्णादिति प्राप्तेऽप्यसाध्यमेव ।

वन्ध्यापुत्रादि असत्साध्यम् इत्यन्तु नियतिवशादेवासत्त्वात्, नियत्यैव नासत् साध्य तामर्हति, साधनादिप्रक्रियासाध्यत्वात्साध्यानाम्, क्रिया हि साधनेषु वर्तमाना सन्तमर्थं
20 साध्यमासिद्धति प्रत्ययनियतत्वात् साधनानुपपन्नस्य, साध्याभावात्तु सा क्रियासिद्धु ? ।

(वन्ध्येति,) इत्यन्तु स्त्रीपुंसयोगात्वन्ध्यापुत्रवत् साध्यमिति प्राप्ते तद्रूपकार्यविपरीतनियमा वन्ध्यापुत्रादि असाध्यमेव, नियतिवशादेवासत्त्वात्, तत्र नियत्या सत्, नियत्यैव नासत्साध्यतामर्हति ।

पृथ्व्येति नैयायिकादिवद्युत्पत्त्यादिषु द्रव्यत्वेनाकस्मिकत्वाभावं व्यतिक्रमदर्शनात् नियतिकारणत्वे तु व्यतिक्रमे न मयैव तत्राह नियतिः कारणमिति भावः । अनियममेव दर्शयति—एवं हीति नास्ति नियतेरकारणत्वम्, तत्सम्भवे प्रत्यर्थ्यं
20 तथात्वनियमादेव व्याप्तः न केवलं भयैवैतदुक्तमेव किन्तु केचित् समावेशापि अन्यथा भवन्ति तथाविधनियतिवशात् सुतरामिति—अन्यापीति । तमेव व्यतिक्रमं मुखरयति—नियतिवशादेवेति यदि साध्यं तं यथ्य प्रतिलब्ध एव यतो भवति तथा नियतो तथा नियतिनियतेरेव च सदपि यथायथं भवतीत्यत्र—सदपि चाकाशमिति । व्यतिरेकनिदर्शनमाह मृगतृष्णादिति यथा भूमि जलेन यत्नो वाप्यैवैतामिभूयते—प्रत्यते यथा वा अन्धकारे स्थितस्य एव घटः प्रदीपेनाभिभू-यते—अभिव्यज्यते न तथाऽऽकाशमिति नियतैवमिदमिति भावः । एवमेव नियतिनियमेनैव पुरुषे देवदत्तादि तत्रकोऽ-
30 साध्योऽपि सन् यत्नैवैवादिना साध्यवत्वस्याविनाभूतस्यावकाशत्वादुपलब्धायैव साध्यमपि स्वतोऽसाध्यतया-तया च पुरुष इति आकाशं साध्यं तत्पद्मुखवादिमुखेनोपलब्ध उपलभ्यते अतोऽपि तथाविधनियतेरेवासाध्यत्वमि-त्याह—चाकाशादीति । द्वितीयमुदाहरति—वन्ध्येति । स्त्रीपुंसयोगाद्वन्ध्यायां यथा पुत्रः सम्भवेत् तथा वन्ध्यापुत्रोऽपि सम्भवो भाव्यः किन्तु स्त्रीपुंसयोगात् पुत्रो भवतीति व्याप्तत्वविरोधिनियमश्च न भवत्य एव वन्ध्यायां नियतिवशादेव-

किं कारणं ? साधनाविशिष्टक्रियासाध्यत्वादसाध्यानाम्, साधनाविशिष्टायाः क्रियायास्तत्राविशेषाभावः, तत्सा-
धनानां साधनशक्तिशून्यत्वात्, तस्माद्वन्ध्यापुत्रादीनामसाध्यत्वं स्त्रीपुंसंयोगक्रिययाऽप्यसाध्यत्वेन
नियतत्वात्। साध्याभावे च साधनानां साधनत्वाभाव इति तदर्शयति–क्रिया हीत्यादि, हिशब्दो
यस्मादर्थे, यस्मात् क्रियासाधनेषु काष्ठादिषु वर्तमाना सत्यर्थं साध्य विशेषयत्युत्तरपरिणामात्म-
कमोदनादिकमर्थं साधयति, स्वसर्वेनियतत्वात्–वन्ध्यापुत्रविधानार्थेषु मन्त्रेषु नियतत्वात् काष्ठादिसाध 5
नानुपदस्य। साध्याभावाद्वन्ध्यासुतादेः सा स्त्रीपुंसम्प्रयोगक्रिया क्रियाविशिष्टा ? तस्मात्तद्विपरीतनियत-
साध्यं वन्ध्यापुत्रादि।

इदं पुनरसत्साध्यं यद्यपि, यद्यसत् कथं साध्यं खपुष्पवत् ? तत्रासदसाध्यविकल्पान
तिवृत्तेरेवेति, नैष दोषः, सतोऽन्यदसदित्यतोऽन्यत्र विधानप्रतिषेधाश्रयणात्, प्राक् तथाऽवृत्तं
तत्काले व्यक्त्या नियतं साध्यम्। 10

इदं पुनरित्यादि, असत् साध्यं घटादि, इतर आह–यद्यसत् कथं साध्यं खपुष्पवत्,
तत्रासदसाध्यविकल्पानतिवृत्तेरेवेति, अत्रोच्यते–नैष दोषः, सतोऽन्यदसदित्यतोऽन्यत्र विधानप्रतिषेध-
योराश्रयणादन्यार्थविवक्षत्वादभिधेयस्यासत्ताभावादित्यत आह–प्राक् तथाऽवृत्त–तेन घटत्वप्रकारेणावृत्तं
सत्कार्यस्य इत्यर्थत्वात्, 'अविभक्तविविधविषयविवर्तस्तयः सन्निपातपदाः सदादयः' इति वचनात्
सन्निपातमित्यर्थः, प्राक्–मृत्पिण्डावस्थानकाले, तत्काले व्यक्त्या नियतं साध्यम्, व्यक्तिग्रहणात् 15
घटव्यक्तीति। यतत्काल एवैनोपलभ्यानुपलब्धिभ्यां नियतम्।

इदमन्यत् सततोपलब्धिनियतमेव सत् यदिसाधनव्यञ्जकत्वेन साध्यते मृद्व्यमूर्त्यादि
त्वक्रमापाद्यघटत्वेन वा, कर्त्रादिरूपं घटत्वस्य भेदेनैव वा सत्साध्यम्। अथवा भेदेनैव सत्सा-
ध्यम्, यद्भूतैव साध्यते न क्रियया, पुरुषादि किन्तु विद्यमानं अवस्थापरिग्रहापनयनेन।

(इदमन्यदिति) इदमन्यत्सततोपलब्धिनियतमित्यादि, इतरस्य तथाऽभ्यधिकमियति सत् 20
साध्यमित्यभिसम्बन्धः, किम्वत् ? यदिसाधनव्यञ्जकत्वेन, यदिर्हि विद्यमानैरेवावयवैः सदाऽभ्यक्ता
संस्थानविशेषेण साध्यते सती साध्यते–व्यज्यते, इदमन्यत् सततोपलभ्यमेव सत्साध्यं पूज्य-

---

यत्वात् नियतोपलब्धेऽप्यसत्वमित्याह–इदमित्यादि। अथ नियताऽसाध्यमित्यभिप्रायः–साधनानीति, तत्साधनानि
साधनानि सदेव धर्मस्वभावेन साधयन्ति वन्ध्यापुत्रस्य च साधकत्वेनाभिमतेषु साध्यत्वाभावस्य क्रियाया अभावादसाध्य-
त्वम् नियता वन्ध्यापुत्रस्यैवासत्वात् इत्थं साधकक्रियाऽऽश्रितेति भावः। तृतीयं भङ्गमाह–इदं पुनरिति यदि 25
घटादयस्तत् स्वतः सन्ती साध्यं भवति तथाविधत्वेनैति भावः। ननु पूर्वैवात्र नियतम् असत् तच्च साध्यम्, साधनाविशिष्टया
क्रियया असत्साध्यमिति अतोऽसत् खपुष्पवत्साध्यमेव तथा चायं भङ्गो द्वितीयभङ्गान्तर्गत इत्याशङ्कते–यद्य-
सदिति। मृत्पिण्डकाले घटत्वप्रकारेणासत्–आद्ये भङ्गोऽपुष्प प्रकाराणां सत इति साध्यत्वमभिमतमित्याह–प्राक् तथेति।
असदिति नैव सत्साधीति न विशेषो वैष खपुष्पवत् कथं साध्यमित्याशङ्कते किन्तु सतोऽन्यदसदिति नियमिता विव-
क्षिताऽऽदि इत्यर्थकमेवासाध्यते असत्वाभावो यत्त्वेनात्र खपुष्पस्य इत्यमन्येव इति पूर्वं प्रकारान्तरेण विद्यमानं यत्नैरनुपा- 30
दीयमानत्वात् इत्येतत्साध्यमिति भङ्गसारं दर्शयन्नाह–सतोऽन्यदिति। सन्निपातपदेति अविभक्त सन्निपातपदे-
त्यर्थः। अथ सत्साध्यमिति चतुर्थं भङ्गमाह–इदमन्यदिति, यदीति, यदिर्हि पूर्वप्रकारान्तरेण प्रत्येकप्रकारान्तरेण व्यक्त्या

मूर्खोनिस्तब्धमापापचटस्येन । पूर्वस्मिन्नुदाहरणे मनागाप्यन्तरमेदेन इह त्वत्यन्तमिन्नाकरभेदेनेति विशेषः, तदर्शयन्नाह—मूर्खोनिस्त घटस्तस्य मेदेनैव वा तत्साध्यमिति । अथवा भेदेनैव तत्साध्यमि-त्यन्नाम्नयिति वर्ण्यते मद्गुरुत्वेव साध्यते न क्रियया परिसम्भारिमकया, किन्तु विषमार्गं पुरुषानि अपवादापरिमाहापनयनेन—तद्विपर्यसंक्षयविपर्ययपरिमाहापनयनेन । नात्र क्रियाभिर्वर्त्यते पुरुषानि, किन्तु-
5 विषमानमेवाशुपक्रम्यानुपसम्पया साध्यते, एषा नियतिर्नामरूपेति पूर्वविलक्षणा ।

एतासां क्रियाणां तत्साध्यानामात्र नियतिरूपत्वप्रतिपादनार्थमाह—

एतच्च साध्यमानमप्यन्यविषयक्रियाविलक्षणयानयैव क्रियया साध्यते, एतस्यैवा-न्येव कारकाणीति साध्यसाधनार्थनियतिः । एवमार्थगतप्रतिविशिष्टसाध्यसाधननियमाभिव्य-क्तनियतिस्थितेरेव कारणगुणपूर्वकत्वं कार्यस्य प्रतिपद्य कारकान्तरसमवस्थितितुल्यतायामपि
10 क्रियासमवस्थित्या सह नियतिप्रसिद्धेरेव पुरुषस्तया प्रतिपद्य प्रत्यर्थं कारकाणि प्रयुङ्क्ते, तानि च यथाप्रयोगनियमं स्वे स्वे विषये नियतानि नैकविमर्दप्रवृत्तानि परस्परनियतानुग्रहोपायन-वृत्तानि स्वविषयक्रियाप्रसाध्यमर्थमभिनिर्वर्तयन्ति, तेषां वृत्तिस्तानि तत्फलञ्च सर्वं नियतमेव, ततो नियतिरेव सर्वस्य कारणम्, न तु तदुपायसिद्धेरन्यथा तत्सिद्धिरस्ति ।

एतच्च साध्यमानमित्यादि, ओदनविषयेयं पचिक्रिया पटादिविषयक्रियाविलक्षणा,
15 एतच्चौदनादि साध्यमानमप्यन्यविषयगमनादिक्रियाविलक्षणयाऽनयैव पचिक्रियया साध्यते नान्ययेति क्रियानियमः साध्यते, एतस्याश्च पचिक्रियाया एतान्येव काष्ठादीनि कारकाणि, न मृत्पिण्डदण्डा-दीनीति साध्यसाधनार्थनियतिः । एवमित्यादि, एवञ्च कृत्वा यथा अर्थगतप्रतिविशिष्टसाध्यसाधन नियमाभिव्यक्तायाः नियतेः स्थितिः—व्यवस्था तस्याः—स्थितेर्हेतोः कारणगुणपूर्वकत्वमनुमानप्रसिद्धं कार्यस्य प्रतिपद्य—बुद्ध्वा कारकान्तरसमवस्थितितुल्यतायामपि—तन्तुवेमादिकारकान्तराणां साम्यनिर्दे-
20 शसमवस्थितेस्तुल्यतायामपि सतां पचिक्रियासमवस्थित्या सह नियतिप्रसिद्धेरेव यतः पुरुषस्तया प्रतिपद्य प्रत्यर्थं कारकाणि प्रयुङ्क्ते यथा तत्साध्यार्थोऽपनिर्वर्त्यः । तानि च कारकाणि नियतानि तथा एव नियतायाः क्रियाया यथाप्रयोगनियमं—पौर्वः प्रयोगनियम इति, स्वे स्वे विषये—नैकविमर्द-

---

साध्यते [illegible] एवोऽप्रयासपरिश्रमेण [illegible] [illegible] हेत्वाह—पूर्वस्मिन्निति । [illegible] च [illegible] [illegible] [illegible] [illegible] इति मेदः । [illegible]
25 [illegible] वैति एवं [illegible] एव पुरुषाः [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] न तु क्रिया [illegible] [illegible] साध्यते [illegible] एषा [illegible] [illegible] नाह । [illegible] [illegible] [illegible]—एतच्चेति ओदनादि [illegible] [illegible] [illegible] [illegible] [illegible] कारकाणि [illegible] न [illegible] [illegible] [illegible] [illegible] एव [illegible] एव [illegible] [illegible]
30 [illegible] [illegible] [illegible] [illegible] पचिक्रिया [illegible] [illegible] प्रयुङ्क्ते [illegible] ओदनमित्येवेति । [illegible] [illegible] स्वे स्वे [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तानि च कारकाणीति । [illegible] [illegible] [illegible]—न तिष्ठति । [illegible]

विशिष्टे प्रवृत्तानीत्यर्थः, नैकविमर्दप्रवृत्तानि नैकमप्यात्मलाभायोऽन्यापेक्षेण व्यापारेण प्रवृत्तानि परस्परा-
पेक्षं नियतं परस्परानुग्रहमुत्पादयन्ति प्रवर्तन्तेऽत उच्यते—परस्परनियतानुग्रहोत्पादनप्रवृत्तानीति, सवि-
षयक्रियया प्रसाध्यमर्थमभिनिर्वर्तयन्ति, तेषां वृत्तिः विषयः तानि तत्फलञ्च सर्वं नियतमेव,
ततो नियतिरेव सर्वस्य कारणम्, न तु तदुपायसिद्धमन्यथा तत्सिद्धिरस्ति—काष्ठमथनादिसाधन-
परिक्रियाभिर्वर्तनस्योदनस्य न दण्डचक्रभ्रमणादिसाधनात्सिद्धिर्न वा घटादेरर्थस्य काष्ठमथनादि- 5
साध्यताऽस्तीति ।

का सिद्धिर्नामेति चेत् ? उच्यते—

सिद्धिर्हि नियमेनानुप्रवृत्तानां रूपादीनां साद्गुण्येन स्थितानां स्वनियतेरेवाऽभिव्यक्तिर्नि-
र्वौ, तत्र मिथ्याभिमान इदं मया कृतमिति पुरुषस्य । तच्च स च तानि च नियतेरेव प्रवर्तन्ते,
तत्प्रवृत्त्यप्रवृत्त्योः सिद्ध्यसिद्ध्योश्च व्यभिचारदर्शनात्, तथा च दृश्यन्ते क्रियाणां विपर्ययोऽ- 10
प्रवृत्तयश्चातस्तत् कृतमपि पूर्वनियतिस्थत्वादकृतम्, विनष्टमप्यविनष्टं तथानियत्योत्तरकाले
कपालादित्वेनावस्थितत्वात् ।

सिद्धिर्हीत्यादि, नियमेनोक्तलक्षणेनानुप्रवृत्तानां—अनभिव्यक्तव्यापाराणां बीजावस्थायामङ्कुरा-
दित्वेन रूपादीनां सम्मूर्च्छितानां साद्गुण्येन—समुदेत्य स्थितानां स्वनियतेरेवाभिव्यक्तिः—यथोद्भूतानि नि-
यत्या चनितो पूर्वमनभिव्यक्तानामभिव्यक्तिः सा सिद्धिरित्युच्यते, तत्र—तस्मिन्, मिथ्याभिमान 15
इदं मया कृतमिति पुरुषस्य । आह—किं कारणं मिथ्याभिमानो ननु मया कृतो घट इति ? तत्क्रियाऽवि-
नाभावात् सिद्धमन्यस्याप्यदृष्टस्य पुरुषेऽभिमान इत्यत्रोच्यते तच्च स चेत्यादि, तत्प्रवृत्त्यप्रवृत्त्योः सिद्ध्य-
सिद्ध्योश्च व्यभिचारदर्शनात्, तच्च—कार्यं घटादि, स च—कर्ता कुलालः, तानि च—कारकाणि दण्डा-
दीनि, नियतेरेव प्रवर्तन्ते, तथा तस्य चिकीर्षा कदाचिदुत्पद्यते कदाचिन्न, चिकीर्षुरप्यास्तामादिभिः
प्रवर्तते न वा, प्रवृत्तोऽप्यन्यथैव घटं विनिवर्तयतेऽन्यद्वा करोति, विघ्नो वाऽस्य भवति, तथाऽन्यकारका- 20
ण्यपि वाच्यानि । तच्च कार्यं कदाचित् सिद्ध्यति कदाचिन्न, अन्यार्थप्रवृत्तावन्यत् सिद्ध्येत्, न वा
सिद्ध्येत् । तथा च दृश्यन्ते क्रियाणां विपर्ययोऽप्रवृत्तयश्चेति लोकप्रसिद्धं व्यभिचारं दर्शयति । अतस्तत्

सिद्धिर्हीति [illegible] अभिव्यक्त[illegible] कार्यस्यैवाभ्युपगतस्य [illegible] नियमावस्थैव
[illegible] नियतिरेव [illegible]
[illegible] मया कृतमिदमिति मिथ्या [illegible] इति भावः । ननु मया कृतमिदमित्यभिमानस्य कथं मिथ्यात्वम्, 25
[illegible] मिथ्याभिमान [illegible]—आहेति । [illegible]
[illegible] तच्च स चेति । ननु कथं नियतेरेव [illegible]
[illegible] कदाचिदेव [illegible] कदाचिदेव प्रवर्तते [illegible] कारणम्,
[illegible]
[illegible] कारणत्वम्, एवं [illegible] व्यभिचारो विशेषः तथा कार्यमपि 30
[illegible] कदाचिदेव [illegible]
[illegible] भावः । [illegible] व्यभिचारे [illegible]
[illegible]
[illegible] । [illegible]

फलमपि लोकप्रतीता पूर्वनियतिकृतत्वादकृतं—पूर्वमेव नियत्या तथाकृतत्वात्, विनष्टमप्यविनष्टं तथा नियतोत्तरकाले कपालादित्वेनावस्थितत्वात्, कपालादित्वेनैव घटस्य विनाशात् ।

एवन्तु विनश्येत्, यदि प्रविशीर्णस्तां नापद्यते खरविषाणवदत्यन्ताभावी भवेन्न वा विनश्येत् घटत्वेनैव तिष्ठेत्, न त्वेवम्, तस्मान्नाविनाशः, कथञ्चतो ह्यन्यथाभावो विनाशः, 5 स च नियतेरलङ्घ्यत्वात्, एवमुत्पत्तिरपि ।

एवन्तु विनश्येदित्यादि, यदि प्रविशीर्णः—विशीर्यमाणो विशीर्णो वा, तां—नियतिं कपालादिकमापत्तिरूपघटविनाशं नापद्यते खरविषाणवदत्यन्ताभावी भवेन्न वा विनश्येत्, घटत्वेनैव तिष्ठेत् ततो न विनश्येत्, न त्वेवमस्ति तस्मान्नाविनाशः, कथञ्चतो ह्यन्यथाभावो विनाशः, स च नियतेरलङ्घ्यत्वात्,—कपालपर्यायानरूपायाः । एवमुत्पत्तिरपि ।

10 तथा चाऽऽम्रबीजे तथानियत्या लीनानां मूलाङ्कुरादीनां फलस्य वर्णानां रसानाञ्च तेषां तेषां व्यवस्थितपूर्वक्रमैव प्रवृत्तिर्मायाकारपत्राङ्किकावत्, यावदाम्रं नियतिप्रवृत्तिफलावस्थामनुभूय पुनर्बीजमेव तस्मादपि पुनरपि तथेति, सेयं व्यवस्थिता नियतिसन्ततिरनाद्यनन्ता ।

तथा चाम्रबीज इत्यादि, द्रष्टव इति वर्तते, तथा नियत्या लीनानां मूलाङ्कुरपत्रनालकाण्डप्रशाखाशाखास्कन्धपुष्पादीनां व्यवस्थापकक्रमेण व्यवस्थितपूर्वक्रमेणैव प्रवृत्तिः, रक्तश्यामादिवर्णा-15 नामाम्रफलस्य तुवराम्लमधुरादीनाञ्च रसानां तेषां तेषामिति,—अवस्थापायमवस्थायां ये ये भवन्त्यन्ये तेषां तेषां नियमानामामेव नियतानाम् । किमिव ? मायाकारपत्राङ्किकावत् यथा मायाकारः पत्राङ्किका गुलिकादिकमीक्षस्य पूर्वमलाः क्रमेण सवर्णाभिव्यक्तयति नानावर्णनामाकारांस्तथेहाप्याम्रबीजे । यावदाम्रं नियतिप्रवृत्तिफलावस्थामनुभूय पुनर्बीजमेव, तस्मादपि बीजात् पुनरपि तथैवाङ्कुरादिप्रवृत्तिं नागमिष्यतीं दर्शयति—सेयं व्यवस्थिता नियतिसन्ततिरनाद्यनन्ता ।

20 स्यान्मतं ननु दृष्टे बीजेऽङ्कुराद्यनभ्युत्पादात् प्रादुर्भावाभिव्यक्तिरूपप्रादुर्भावतिरोभावव्यभिचार इत्यत्रोच्यते—

दाहनियमसुदयेऽपि यवतिलमसूरादीनां ताडलया तथा प्रादुर्भावतिरोभावप्रवृत्तयः प्रतिनियता एवान्यथा च । ताश्च पुरुषकारमप्युल्लंघ्य तमन्तरेण सिद्धाः, पाकफलस्यापि नियतिदर्शनात्, यथा षष्टिकाः षष्टिरात्रेण पच्यन्त इत्यादि । एवञ्च व्यवस्थितनियतार्थव्यक्तेर्व्यतिरिक्त-25 मतिः पुरुषस्य मिथ्याभिमान एव, न तु नियती हि किञ्चिदस्ति ।

लोकप्रद-एवन्तु विनश्येदिति एवन्तु कपालादित्वेन घटो विनश्येदन्यथा कपालादिकमापत्तिरूपत्वेन विशीर्णवतीत्यपार यदि तथाविनष्टिमपि नाभिवेत तर्हि घटो विशीर्यमाणोऽत्यन्ताभावरूप एव स्यात् खरविषाणवत्, अथवा घटत्वेनैव तथा स्यात् नैव विनश्येत् घटत्वेऽपि न चैवं दृश्यते तस्माद्विपत्तिमत्त्वादेव घटोऽन्यथाभावलक्षणं विनाशमवाप्नोतीति भावः । आम्रे बीजादौ नियत्यैव वृत्त्या लीनानां मूलाङ्कुरादीनां वर्णरसादीनाञ्च व्यवस्थितक्रमेण नियमानामेव तथा 10 नियतस्य क्रमेणाभिव्यक्तेः दृश्यत—तथा चेति । आम्ररसं प्रथमं कषायरसं तथाऽम्लरसं तथा मधुररसं भवतीत्यत तुवरेति तुवरः—कषायः । मधुरं रसमक्रमात् मायाकारेति मायां करोतीति मायाकारः । व्यवस्थापूर्वकमेव नियत्या निवेशनं दर्शयति—यावदाम्रमिति आम्रबीजं यावदाम्रम् नियत्या प्राप्त अवस्था अनुभूय पुनर्बीजमेव भवति पुनश्च भूयस्तथा भवतीति तत्रोऽपि बीजादभिव्यक्तिर्भवतिरोभावपरा प्रवर्तन्ते नियतेरेवेति भावः । ननु दृष्टे बीजे कदाचिदङ्कुराद्यनुत्पत्त्या नियतिरनाद्यभिव्यक्तितिरोभावाभावेन व्यभिचार इत्यत्राह—दाहनियमसुदयेऽपीति ।

(यादृशेति) यादृग्नियत्युदयेऽपि ताः प्रतिनियता एवान्यथा च, इत्यन्त इति वर्तते, कस्मात्? यथा तथा प्रादुर्भावतिरोभाववृत्तयः केषां? पयस्तिलमस्यादीनां, अन्यादृग्यवतिलमस्यैतत्रापि प्रादु-र्भावतिरोभाववृत्तयो नियता एव। ताश्च पुरुषकारमभ्युपगम्य तमन्तरेण सिद्धाः—पुरुषकारमन्तरेण सिद्धाः। किं कारणं? पाकफलस्यापि नियतिदर्शनात्, षष्टिकाः षष्टिरात्रेण पच्यन्त इत्याद्युदाहर-णानि गतार्थानि, देशकालकर्तृकरणादिनियत्यैव पाकाभिदर्शनात्। एवमेतदुपनयति—अनेनोक्तविधिना 5 व्यवस्थित एवार्थे—अभ्युपगम्यैवार्थस्य तत्र व्यक्तेः, सर्वं नियतमेव तथा तथा, तस्माच्च व्यक्तेर्व्यतिरिक्तमतिः पुरुषस्य,—सर्वकालं व्यवस्थितमियत्तापर्यायमन्यो मृद्व्यादेर्घटो मया कृत इति मिथ्याभिमान एव, षष्टि-कारयो वा केदारादिसंस्कारविधिना पाचिता इति, यस्मान्न तु नियतौ किञ्चिदस्ति, सर्वं विद्यमानमेव तिरोभूतं क्रिययाऽभिव्यज्यते कालादिनिमित्तानुगृहीतम्।

10

अत्राह—

कथमस्ति सर्वं नियतौ? यथा भूम्यम्ब्वादेर्विना न भवति केवलाया एव बीजनियतेः शालिफलपाकादि, कालातपवातादिभ्यो हि पाकः, तथाऽकालेऽपि भूमिखननादिभ्यः काले चापि न भवति पाको द्रव्यान्तरसंयोगाद्विना खनित्रायां शालायाम्, ब्राह्मणादिवा। अन्यथा तथातथा तस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिवैपरीत्यमिति नियमाभावात् कृतकत्वानित्यत्वं साम्याच्च नियत्यभाव इति। 15

कथमस्तीत्यादि यावन्नियत्यभाव इति, यदुक्तं त्वया नियतौ सर्वमस्तीति तत्कथमस्ति? यथा भूम्यम्ब्वादेर्विना न भवति केवलाया एव बीजनियतेराम्रफलपाकादि, रूपरसगन्धस्पर्शसंस्थानसा-मान्याभिव्यक्त्यात्। भूमिरम्बु वायुरातपः काल इत्येतानि भूम्यम्ब्वादीनि, तद्व्याचष्टे—कालातपवाता-दिभ्यः पाकस्तस्माद्भूम्यम्बुकालवातातपापेक्षस्तान्न बीजनियताङ्कुरादि। तत्फलपाकादिवच्चयाऽका-लेऽपि कालनियतेर्व्यभिचारो दृश्यते भूमिखननादिभ्यः फलादीनामप्राप्तेऽपि काले पाकदर्शनात्, व्यापि 20 महत्यात् कोद्रवपलालवेष्टनप्रणकरणादिभिः। काले चापीति, प्राप्तेऽपि पाककाले न भवति पाको द्रव्या-

---

दतोऽपि नियत्यैव भवति तथा च बीजार्थं ताहे पूर्वनियतिनिर्भासतिरोभावकालीनामभावेऽप्यन्यादृशा एव ता नियतिवशेनैव तथाप्रतिनियता इति यानिर्भावतिरोभावव्यभिचारो न वा तत्र पुरुषकार एव कारणम् तमन्तरेणापि नियतिवशेनैव तत्र तथा सिद्धेरिति भावः। कथं पुरुषकारमन्तरेण भीयादिफलनिर्भासः पुरुषप्रयत्नपूर्वकादिव्यापाराद् व्यपदेशे—किं कारण-मिति पाकफलनियतेरव्यापारवत्त्वात्, न हि तमन्तरेण पुरुषकारस्याभावात् कार्यसिद्धिरस्यते इति भावः। उदाहरति— 25 षष्टिका इति षष्टिरात्र्या व्रीहिविशेष इत्यर्थं उदाहरणान्तराण्यपि मुद्गादीनि हरितानीति सम्भाव्यते तान्यप्य-नुपलभ्यावोद्धृतानि। एवं च कार्यसिद्धौ देशकालकर्तृकरणादिनियत्यैव भासितया यदाशितो व्यादिरयं मया कृतमिदमिति केदारादिसंस्कारेण मया परिपाचय पाचित इति वा पुरुषस्याभिमानो मिथ्याभूत एवेति निगमयति—अनेनोक्तविधिनेति। अभ्युपगम्यैवेति नियमानम्यैवान्यनिम्यकम्यापेक्ष तत्तन्निमित्ताभिव्यक्तेरित्यर्थः। न त्विति न हि नियतिः किञ्चित् प्रकल्पयन्ती यैनान्यापेक्ष्य पुरुषादेरेव तस्याः व्याप्तिरिति भावः। अत्र नियत सर्वमपेक्ष्यया व्यभिचारमुद्भावयति—कथमिति, 30 नियतिस्वभावेऽपि बीजादेर्न भूम्यादिव्यतिरेके भावात् प्राभावसंभवात् भूम्यादिसम्पर्केण तस्या व्यक्ति पाके हि कालवर वायुरिभ्यो भवत्येव न नियतिः सर्वमित्येति भावः। ननु कालनियमत्वाद्यर्थान्य वा करोतीत्याशङ्क्याह—तथाऽकालेऽपीति, इत्यादि आम्रकालपुष्पिस्य खनित्वा भूमिं तत्र निक्षिप्य धान्यादिनाऽऽच्छाद्य पाकेऽपि धान्यैर्विवेचनात् कालनियतेरपि व्यतिरेकव्यभिचारः। अन्वयव्यभिचारोऽप्याह—काले चापीति प्राप्तेऽपि पाककाले पाको न दृश्यत इत्यर्थः

न्तरसंयोगेन समभिव्यक्तौ—यथा शालायां पाककाले आयुर्वेदविधानेन द्रव्यान्तरसंयोगेनैव, द्राक्षा—सहकारादेरभ्यवहारार्थं कोमलस्य मांसगन्धपावकस्य द्रवीभावार्थमस्वेन, आमिमद्यत् पचिकपरी-तादिभक्षणात् । अन्यथेत्यादि, न केवलमात्मस्वरूपापरित्यागेनैव पाकभावः किन्तर्हि ? अन्यथ तथा-तथा—यथायथा पुरुषो ज्ञाता स्वयमिच्छति तथातथा तस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिमतीत्य पुष्पा-

5 दीनां वर्णसंस्थानादिवैपरीत्यम्, यथोत्पलस्य पार्श्वे रक्तता पार्श्वे नीलता, मातुलिङ्गफलस्य रक्तादिवर्णता तद्रसितबीजस्य, तथा कूष्माण्डफलस्य घटवर्धितस्य घटाकारता । योनिप्राभृतादिग्रन्थप्रामाण्येन सर्वयो-न्युत्पत्तयः, द्विविधा योनिर्योनिप्राभृतेऽभिहिता, सचित्ताऽचित्ता च, तत्र सचित्तयोनिर्द्रव्याणि संयोज्य भूमौ निखाते वृश्चिकमनुष्यसर्पादीनामुत्पत्तिः, अचित्तयोनिर्द्रव्ययोगे च यथाविधि सुवर्णरजतमुक्ता-मणिप्रभृत्युत्पत्तिरिति, इति नियमाभावः,—इत्थं काले व्यापारकाले च पाकादर्शनान्यथापेक्षत्वात् पुरुषे-

10 च्छाप्रयत्नानुविधानाच्च नियमाभावः, नियमाभावात् कृतकस्य पाकादेः कृतकत्वानित्यत्व—अभूतस्य भावो भूतस्य चाभाव इत्यर्थः, ताभ्यां च नियमाभावः, इति परिसमाप्त्यर्थः, एष पूर्वपक्षः ।

अत्रोच्यते—

न, तथानियतित्वात्, बीजादिनियतिरेव उदकादिषु वर्तते उदकादिनियतिश्च बीजादि-ष्वन्योऽन्यव्यतिहारेण, तन्नियमानुरोधेन हि तेषां सर्वेषां नित्यप्रवृत्तिरन्योऽन्याविनाभावात्,

15 तथा ह्याह—उदकं पतितं समावकं निर्भावकञ्च, यदा हि बीजनियतिरङ्कुरादिभिव्यक्तेरभिमुखी-भूता तदा तस्या देश उदकस्य यथाङ्कुरोद्भावने प्रवर्तमानः समावक इत्युच्यते, अन्यथा तु विपर्ययः ।

(नेति) न, तथानियतित्वात्, यदोक्तं त्वया कालाप्रवृत्तिनियतित्वात्कालप्रवृत्तिनियतित्वाच्च नियमाभाव इति तन्न, तथानियतित्वात्—सापेक्षनियतित्वात्, तदर्शयति —बीजादिनियतिरेव बीजादि,

20 द्विरूपो यस्मादर्थे, यस्मात् सैव हि बीजादिनियतिरेवोदकादिषु वर्तते काले व्यापारकाले पुरुषे वा इच्छाप्रयत्नयोः वर्तते आमिमद्यत् । उदकादिनियतिश्च बीजादिषु वर्ततेऽन्योऽन्यव्यतिहारेण, तन्नियमानुरोधेन हि—परस्परनियमानुरोधेन, हिशब्दो यस्मादर्थे, यस्मादेवंरूपा तेषां सर्वेषां नियति-

---

नियतिस्वभावा तथानियत्यव्यावृत्तेन तदात्मानं तदात्मना नियत्यैव स्वनिष्पत्तेः कालाभावस्य वा दर्शनात्, कोमलस्य मातु-लुङ्गादिफलस्य तथाभावस्य आयुर्वेदविहितविधिना प्रयत्नादिना पाकाभिव्यक्तेः मध्य एव रसस्य पाकादिभिर्नियतावा

25 व्यभिचार इति भावः । अथ नियतेव यदि कालप्रयत्नादिनैरपेक्ष्येण कालस्वभावनियत्यैव भवेत् न चैवमस्ति पुरुषेच्छानुरूप-पाकस्य वस्तुनियतिमतीत्यापि व्यापारित्वात्—न चैवमस्तीति । वैपरीत्ये दृष्टान्त उच्यते—यथेत्यादि । मयान्तरापेक्षत्वात्—नियतिव्यतिरिक्तापेक्षत्वादित्यर्थः । कृतकत्वं—अथ कृतमिदमिति बुद्धिविषयत्वम्—अनित्यत्वं—सत्वेऽप्य ध्वंसोऽपि निर्-न्वयत्व नियम इत्यर्थः । ताभ्यां च नियमाभावेत्यर्थः । ननु भवता सापेक्षं व्यभिचारि यत् तत् तथानियतिनियम-नैव सर्वमुत्पत्तिः—न तथानियतिरप्यादिति । कालेति, काले च्छाप्रयत्नादिनैव हि व्यापारकाले प्रवर्तेत नियतिर्व्य-

30 वर्थः । तथा तथा परस्परापेक्षयैव नियते तुल्यादिस्याद—सापेक्षनियतित्वादिति । तथा च बीजमूलाङ्कुरादौ नियति-फलादिषु यथा उत्पद्यते अन्यैव नियतेः सहकारणके पवनेन्धनादिनियतस्य सामर्थ्यमध्ये तावत् सम्यगेव नियते बहुकारेण यथानियत इति न व्यभिचारः, तथा काले पाकादर्शनमपि तथानियतिनियमस्यादेवेति भावः, परस्पर-व्यतिहारः । परस्परापेक्षाः बीजादिन्यायस्तथा नियतत्वं तत्र कार्यनिर्वृत्तौ न तेषां भवने कार्यसिद्धिरेव

तस्मात्तेषां सर्वेषामितरेतरमियत्ता नित्यप्रवृत्तिरन्योऽन्याविनाभावात्, तथैव प्रवर्तेत इत्यर्थः । तथा वादेषि, लोकसिद्धं ज्ञापकं दर्शयति—सद्भावेन वर्तेत इति समापकम्, निर्गतो भावोऽस्मादिति निभावकम्, किं तत् ? यदुक्तं पतितमिति, तद्भावना—यदा हि बीजमियतिरिति, अङ्कुरादपभिव्यक्त्यर्थ-द्राऽभिमुखीभूता बीजनियतिर्भवति तदा तस्या नियतेर्देशः—अंशो भागोऽवयवः स तदङ्कस्य एव सम-ङ्कुरोत्पादने प्रवर्तमानः समापक इत्युच्यते, तद्भावांशापेक्षयोक्तमपि समापकमित्युच्यते भेदविव- 5
क्षायां बहुव्रीहिसमासाश्रयणात्, मतुब्लोपाद्वा अभेदोपचाराद्वा भाव एवोक्तमिति, स च भावोऽङ्कुरादिर्धनस्योपण्यादेः, मतुप्प्रत्ययनिर्देशोऽपि भेदेनोपपद्यते तद्यथा—अस्त्यस्मिन्नस्य वा भावोऽङ्कुरस्याभिमुखके तस्मात् समापकमिति । अन्यथा तु विपर्ययः—आराम्भपुरकेऽङ्कुरादयो न सन्तीति नियत-त्वाद्विपर्ययः, तस्मान्निभावकमुच्यते तत्तदमिति ।

एवं भूमिवायुकालप्रभृतिष्वपि समापकनिभावकत्वे । यदुक्तं पुरुषस्य ज्ञातुरिच्छानुविधा- 10
नेन वस्तुनियतिर्विपरीतमिति तन्न, तत्रापि नियतेरेव कारणत्वात् पुरुषो न्यग्रोऽन्यग्र इत्यादि हि नियतेरेव, सापि तादृशी, यथाप्रयुक्तेषु स्वातन्त्र्यादेव नियतिः प्रयुक्तेष्वपि करणादीनां क्षमत्वाक्षमत्वमात्स्यमात्स्यादौ तथा नियतत्वात्, एतेन पाकादिदोषाः प्रत्युक्ताः ।

(एवमिति) ऊषरभूभावाभावः सस्यादेः, पाषाणेऽङ्कुराद्यभावः शुष्के केदारादौ वा सर्वेषामङ्कुरादिभावः । पूर्वपापाभावोऽङ्कुरादेः भावस्तु महिषीकार्पासप्रसूत्यादेरन्यस्य पुष्पादेरन्यस्य 15
फलादेः । मनुष्याणाञ्च पूर्वपापाभावः, तथोक्तं 'दिवास्वप्नमवश्यायं प्राग्वातं वा तु वर्जयेत् ।' तस्मा-दामुत्तरे वायौ न भावः । मायूर्मयुरानां भावः, वैशाखादिष्वभावः । प्रभूतिमहणेनाऽऽतपेऽतिमूत्रा सति तीक्ष्णे धामाभावः, सम भावः, आतपाभावेऽप्यभाव एवेति । एव तावदबुद्धिपूर्वप्रवृत्तेषु शाल्यङ्कुरादिष्वचेतनेषु नियतिरुक्ता, बुद्धिमत्स्वपि नियतिरेव, यदुक्तं प्राक् त्वया पुरुषस्य ज्ञातुरिच्छानुविधानेन वस्तुनियतिर्विपरीतमिति, तन्नोपपद्यते, तत्रापि नियतेरेव कारणत्वात्, कुतः ? पुरुषो न्यग्रोऽन्यग्र इत्यादि नियतेरेव 20

तमन्य इत्याह—परस्परेति इदं नियतेरनेकत्वमभ्युपेत्य इतरेतरनियत्ता नित्यप्रवृत्त्युक्ता । यदा नियतिरेकैव नैव बीजनियतिः वैपरीत्यमिति वैशेष्यनियतिः वैव बीजमिति । एकनियत्याश्रयात्सर्वेषां बीजोदकादीनामन्योन्याविनाभावेन प्रवृ-त्त्याऽङ्कुराद्यभिव्यक्त्यन्वयेति भाव । समापकमिति कार्यनिर्वर्त्यकत्वेनाभिमुखायनिकते [illegible] समापकत्वं तद्विपरीतं निर्भावकत्वमित्यर्थः । एतद्भावयति—अङ्कुराद्यभिव्यक्तेरिति । इदम् नियतिरेकैव बीजभूमि[illegible]-ष्विव वर्तत इत्यभिप्रायेणोक्तमिति प्रतिभाति बीजनियतेरेव भागोऽवयवो देशत्वात् भावस्य [illegible] 25
विभ्राट एव यथाऽऽ बीजनियतेरवयवो हीनं भाग्यभिन् यस्यांशो अवयवो यत्र वकारो [illegible] नियतेः स्वार्थं तदंशेनया तदभावेऽपि समापक उच्यते भावो विद्यते यस्मिन्निति मेदविवक्षायां बहुव्रीह्याश्रयणमर्थ भावः । मतुब्लोपा-द्वेति भाव एवोक्तमित्यत्र भावशब्दस्य गुणवाचित्वेन गुणवचनेभ्यो मतुपो लुगिष्ट' इति लोपो बोध्यः मतुप्प्रत्ययं विनाव तदोपनिधाने वैरलक्षण्य—अभेदोपचाराद्वेति । भावस्तदभावयोरस्मात्—स चेति । बहुव्रीहिरनन्तर-प्रत्ययेन निर्देशोऽपि भेदे सम्भव इत्यभिप्रायेणाह—मतुपिति । भूम्यादीनां समापकनिभावकत्वे दर्शयति—ऊषरेति । 30
ऊषरादेः सस्याभावकत्वं पाषाणेऽङ्कुराद्यभावकत्वम् । शुष्कक्षेत्रादौ सर्वेषामङ्कुरादिनिभावकत्वमिति भूमेरेव विशेषे । अङ्कुराभावस्य पूर्ववायोः महिषीप्रसूत्यादिसमापकत्वं मनुष्याणामभावकत्वम् [illegible] प्रागवातस्या-तथायोक्तमिति । भयस्यास्तु मेघादि । तथाऽऽतपयोः [illegible], [illegible] वैशाखे सम्भावकत्वमिति । इत्थमचेतनस्य समापकनिभावकत्वे प्रतिपाद्य चेतनस्य प्रतिपादयितुमाह—बुद्धिमत्स्वपीति । पुरुषस्य न्यग्रत्वमन्यग्रत्वमपि नियतेरेवेत्याह—तत्रापीति । पुरुषेण नियतिपरितत्त्वं च चेतनाचेतनात्मसु तत्त्वेषु प्रतिपादि 35

ष्टो भवति, साप्यपेक्षिकी तादृशी नियतिरेव, आदिमदृष्टाद्यभावोऽदृष्टः पुरुष इत्याद्यपि नियते
प्रथममधुकेषु—स्वातन्त्र्येण परनियोगानपेक्षप्रवृत्तिषु नियतिः प्रयुक्तेष्वपि नियतिरेव ।
दीनां—करणाधिकरणकर्तृकर्मसम्प्रदानापादानानां समत्व—तत्तत्क्रियासाधनसमर्थत्वसमानत्व
त्वम्, यथोक्तम्—'एतत् परस्य सामर्थ्यं यदनुग्रहः' इत्यादि । तेषामेव कर्तृसान्निध्यं प्राप्तिः, असं
5 प्राप्तिः, आदिमत्त्वात् प्राप्तानामपि करणादीनामन्तरे विघ्ना इत्येवमादेः करणानुग्रहप्रत्युप
नियतिरेव कारणम्, तथानियतत्वादिति, यदेव पाकादिदोषाः प्रयुक्ताः—प्रतिषिद्धाः, यथा
काले न पाकोऽकाले पाक इत्यादयो दोषा इति तदपि तथानियतत्वादिभेदेनैव न दोषाय,
कालयोरपाकेन पाकेन च तेषां तेषां भावानां नियतत्वात् सैव नियतिस्तथा नियता भवतीति

किञ्चान्यत्—

10 सर्वज्ञोऽपि च न नियतिमन्तरेण, तामेवासौ नियतिमखिलां पश्यन् सर्वज्ञो
स हि भव्याभव्यसिद्धादिभेदेषु पुरुषेषु गतिस्थित्यवगाहवर्तनारूपरसादिशरीरवा
प्राणादिपरिणतिरूपामसङ्कीर्णामनादिमध्यान्तां वस्तुनियतिमेकामनेकरूपां बन्धमोक्षमकि
यतिसूक्ष्मां पश्यन्ननन्तकालमव्याबाधसुखं तिष्ठतीति ।

सर्वज्ञोऽपि चेत्यादि, यदपि च सम्यग्दर्शनज्ञानचारित्रतपोभिर्ज्ञानावरणाद्यशेषकर्मक्षया
15 त्सर्वज्ञत्वप्राप्तिः सार्वज्ञ्यं पौरुषेणेति मन्यसे तदपि मा मंस्था नियतिमन्तरेणेति, कथं तर्हि मन्तव्यम् ? इ
नियतेरेव भवतीति तामेवासौ नियतिमखिलां पश्यन् सर्वज्ञो भवतीति, तथैव च नियमो नान्य
स हि भव्याभव्यसिद्धादिभेदेषु पुरुषेषु गतिस्थित्यवगाहवर्तनारूपरसादिशरीरवाङ्मनःप्राणादि
विरूपामसङ्कीर्णामनादिमध्यान्तां—कालत्रयेऽपि अनुत्पत्तिमविनाशां केन रूपेणादिपरिणामां कोऽपि
विक्रमेणाप्रच्युतस्वरूपां वस्तुनियतिं—जीवादिनियताङ्गादिवस्त्वादिमध्यमेकां—सर्वभेदव्यतिभा
20 रूपां—तेषु भेदेषु तद्रूपनियतित्वादनेकां बन्धमोक्षमविपर्ययनियतिसूक्ष्मां—जीवकर्मयोरभावेन सम

नियतेरेव महिमा चाम्यस्य इत्याह—यत्रमिति । नियतिरेव प्रयोजिकेति भावः । करणादीन्यपि तथैवेत्याह—कर्त्रं
यतदिति यदेतत् कस्ये उपमयविषये परद्युना [illegible] न द्रुतेन न वा पत्रेण [illegible] ऐरते समर्थ्येन्यथा
भ्रातारेवेति भावः। तेषामेवेति करणादीनामित्यर्थः करणादीनां यथानुकूलनिमित्तप्राप्तौ [illegible]
हर्षेति भाव । [illegible] इत्याह—यथुक्तमिति । सार्वत्वमपि पुरुषस्य निय
25 तैवेत्याह—सर्वज्ञोऽपीति । सर्व—समस्तं [illegible] वस्तु जानाति [illegible]
निर्मूलोच्छेदेनानुपम [illegible] इति सर्वज्ञ । न तु पुरुषकारमात्रेणेत्याह—यदपि चेति ।
भव्येति भ—यथा पुरुषविशेषा भव्या अभव्याः सिद्धादयः [illegible] भव्याः
नियतिमन्तोऽभव्याः सिद्धाश्च न भव्या भव्यभव्याः सिद्धास्तेषु [illegible] एवं विभेदेषु पुरुषेषु
गतीत्यादि गतिस्थिती धर्मे [illegible] [illegible] [illegible]
30 पुद्गल [illegible] प्राणादिभेदेन [illegible] परिणता नियतिरेवेत्यर्थः [illegible] इत्याह—यथा
दर्शिता [illegible] वस्तुनियतिमिति [illegible] एकामनेकरूपामिति [illegible]
[illegible] नियतिरुक्तं [illegible] बन्धमोक्षादि [illegible] जीवकर्मयोरिति जीवस्य
[illegible] [illegible] [illegible]
पूर्वं [illegible] कर्म [illegible]

सम्यक्त्वयोः कार्यकारणभूतैर्मिथ्यादर्शनादिभिर्नियतिवशात् सम्बन्धाऽभावो बन्धः । सत्स्वेषु बन्धोद्धर्तनस-मर्थसम्यग्दर्शनादिभावनियतिविवर्तो मोक्षहेतोरमूर्तस्यात्मनः ज्ञानदर्शनवीर्यसुखादिस्वात्मनः स्वात्मस्व-रूपात् मोक्ष इत्येवं बन्धबन्धकबन्धनीयबन्धविधानापनेकभेदप्रभेदबन्धप्रक्रियां प्रवसमितिगुप्ति[यति]-धर्मानुप्रेक्षापरीषहजयचारित्रसंवरं द्वादशविधतपोऽनुष्ठाननिर्जरं क्षेत्रकालगतिलिङ्गतीर्थप्रत्येकबुद्धबुद्धबो-धितज्ञानावगाहनान्तरसंख्याऽल्पबहुत्वानुयोगद्वारैश्च एकाकमकषायाभ्यामाभासत्वैकान्तसुखात्मिकाञ्च 5 मोक्षप्रक्रियां परमसूक्ष्मां गमनागमनकालमव्याबाधसुखं तिष्ठति, एषा च बन्धमोक्षप्रक्रिया विस्तारेणोप-दर्शिता, अतिसूक्ष्मत्वाद् दुरवगम्यत्वाच्च नात्र परीक्षाकाले उक्ता ग्रन्थगौरवभयात् । यथोक्तम्—'लोगम्मि जीवचिंता पवयणकोसिया दुरोगाहा । एत्तो वि कोडिपवरी चिंता बन्धे य मुक्खे य ॥' इति परिसमाप्यसर्वा, इत्थं नियतिवादः परिसमाप्तः ॥

अथ कालवाद 10

अपरो द्रव्यार्थो विधिविधिनयविकल्प आह—

नायमपि नियतिवादः परीक्षोपक्रम॰, एवं तर्हि भावनयाऽनयैव स्वयुक्त्या युगपदयुग-पन्नियतार्थवृत्तेन नियतिरेव, किन्तर्हि ? काल एव भवतीति भावितं भवति ।

(नायमपीति) एवं तर्हीत्यादि, येयमुक्ता भावनार्थशास्त्रस्याभ स एव भवितुमर्हति, किं तर्हि ? नियत्यैव युगपदयुगपच्चानेकरूपा क्रियानिकायकारणभावनियतमेतदिति भावनयाऽनयैव 15 स्वयोक्त्या युगपदयुगपन्नियतस्वपानिपीनाङ्कुराद्यर्थवृत्तेर्न नियतिरेव भवति, किं तर्हि ? काल एव भव-तीति भावितं भवति 'अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि' (वै० द० २।२।६) इति वचनात्, युगपदयुगपन्नियतार्थानां वृत्तेर्वचनार्थत्वात्, वचनस्य कालप्रमाणत्वादिति ।

[illegible] तत्र मिथ्यादर्शनम् [illegible] … मोक्षस्वरूपमाह—अव्ययमिति, … 20

[illegible] … 25

[illegible] … 30

तद्व्याख्यानार्थमाह—

इह युगपदवस्थायिनो घटरूपादयः किं परस्परं प्रविभक्तिकाः स्वेनैव भवन्ति उत कालसामर्थ्यात्? तत्र तावन्न केचिदपि वस्तुप्रविभक्तिकाः, तेषां सहोपलभ्यमानानामपि व्यतिरेकेणाभावात्, भिन्नेन्द्रियग्राह्यत्वादेव च तेषामैक्याभावाद्यौगपद्यमतो युगपद्वृत्तिमत्त्वा-
5 द्यारम्भकं कल्पनात्मानं च कालमन्तरेण न ते युगपद्भवितुमर्हन्तीति रूपादयो युगपदिति तत् कालसामर्थ्यात्, एवं घटो ग्रीवादयो मृत्पिण्डादयः पृथिवी मृदादयो द्रव्यं पृथिव्यादयो द्रव्यादयो भाव एव तथाप्युक्तयाभवमात् ।

(इहेति) इह युगपद्भाविनो ये घटरूपादयस्ते किं परस्परं प्रविभक्तिकाः स्वेनैव भवन्त्युत कालसामर्थ्यादिति वस्तुरूपेण विचार्यन्ते । तत्र तावन्न केचिदपि वस्तुप्रविभक्तिकाः, भवन्तीति
10 वाक्यशेषः—रूपरसगन्धस्पर्शधर्मेभ्यः प्रविभक्त्या—प्रविभागेन स्वरूपेण प्रविभक्तिको वा कारणान्न भवन्ति ते; सहोपलभ्यमानानामपि तद्व्यतिरेकेणाभावात्, भिन्नेन्द्रियग्राह्यत्वादेव च तेषामैक्या-
भावाद्यौगपद्यं—भावात्वं नियतम् न प्रभिन्नस्य यौगपद्यम् युगपत्—समम्भवो। यतश्च युगपत्, एव मन्यत्रापि । अनेकस्य च यौगपद्यमतो रूपादयो युगपद्वर्तन्त इत्येषा वृत्तिरस्त्यात्मिकाऽवर्तता, अत्र
तेऽपि वर्तनं कर्म संस्थान भवन युक्ता क्रमेण वा निरूपणमिति वृत्तिरेव, तस्मात् कल्पनं काल
15 इत्यवयवार्थानुसारेण वर्तनं कालत्वं कल्पनात्मानं युगपद्वृत्तिमत्त्वानारम्भकमन्तरेण न ते रूपादयो युगपद्भवितुमर्हन्ति, तस्माद्रूपादयो युगपदित्येतत् कालसामर्थ्यात्, एवं सूक्ष्मा रूपादय उक्ताः । स्थूला अप्येवं घटो ग्रीवादयः, तथावृत्तेः—युगपद्वृत्तेः, कस्य ? कालात्मनः । एवं वृत्तिश्च भवनमित्यत आह—
तथाभवनादिति मृत्पिण्डादयः—मृदिति छोटादय एव युगपद्वृत्तेः पृथिवी मृदादय एव तथावृत्तेरेव
मृत्पिण्डत् भस्मसिकतादयः, एवं द्रव्यं पृथिव्यादयः—पृथिव्यप्तेजोवाय्वाकाशादयो युगपद्भवनो

---

20 प्रवेशमाह–युगपदिति । अत्र युगपदवस्थायित्वापेक्षया कालवादमाह–इह युगपदिति । परस्परमिति, [illegible] रूपादेः रूपापेक्षया रसादेः रसापेक्षया परस्परमित्यर्थं तथा च परस्परतः किं स्वेनैव भिन्ना भवन्ति, उत केनचित् कारणेनेति तदर्थः । तत्र केचिदपि परस्परतः पदार्था न स्वेनैव प्रविभक्ता भवन्ति किन्तु केनचित्कारणेन, तत्र कारणं तावत्कालमाह नाम एवेत्याह–तत्र तावदिति । रूपादिभ्यो रूपादेः सहोपलभ्यमानत्वेऽपि रूपादिभ्यतिरेकेण रूपादेरभा-
वात्, यदि हि स्वरूपेण भेदो भवति तर्हि रूपादिभिन्नतया उपलभ्येत न चैवम्, तस्मात् स्वेनैव प्रविभक्तिकाः–स्वरूप-
25 भेदेति । ननु परस्परतो भेदाभावे भेदमविभक्तत्वमेव स्यादित्यत आह–भिन्नेन्द्रियेति रूपस्य चाक्षुषत्वमित्यादेः रूपादिभि-
वैषयि ग्राह्यत्वादेव तयोरैक्यं भिन्नत्वं यौगपद्यं सम्भवति तस्मादेकावस्थत्वाद्युगपद्भावस्यैकत्वमेवेत्यस्य । तथा च तेषां
युगपद्वृत्तित्वं कालमन्तरेण न भवितुमर्हन्तीति काल एवैते भवने कारणमिति भाव । समवायी—कार्येति । एवं यौगपद्यान्-
वीक्षिततया सम्बन्धेऽपि वर्तनमाह–कालतोऽपीति कल सम्बन्धधात्वर्थेति ननु कल्पनं कल—संख्याने धातुरूपं च
यदि कल्प्यते स च नद्युत्पन्नत्वेन च वर्तनस्य कलनरूपत्वं भवन्ति । तस्मादिति युक्ताः वाचिनोऽपि सङ्ख्यादिभेदभिन्नाद-
30 रूपा वस्तु निरूप्यन्ते तस्मात् तदिति काल नैयायिकानामभ्युपगमः वर्तनं पर्यायवाच्यं काल इति तस्यार्थनिर्णयः ।
एवं रूपादयो युगपदिति प्रयोजनात् कालस्य युगपद्भावितेषामभिव्यक्त्यं युगपत्त्वान्वय भवनं कालसामर्थ्यादित्यत्र—
स्थूलस्य आपीति । ग्रीवादीनां युगपद्वर्तने काल तथाभवनात्, भेदादिरूपत्वाभावे काल मृत्पिण्डादय एव पृथिवी, पृथिव्यादे-
रेकाभ्युपगम एव द्रव्यं द्रव्यानुगमस्यैव भाव एतेन युगपद्भवनम् सम्बन्धात्मकत्व भवन्ति एवं वर्तनं काल एवेति भाव ।

इत्यर्थः । द्रव्यादयो भावाः, द्रव्यगुणकर्मणां समभेदानां भाव इत्यात्मा, युगपद्भवनात्, एवं तावद्युग-पद्वृत्तिः काल एव भवतीति भावितम् ।

क्रमवृत्तिनियतिरपि काल एव भवतीति भाव्यते तत्र आह—

अयुगपद्भाविनोऽपि भवितुक्रमस्य वस्तुनो वृत्त्यात्मककालाभावेऽनुपपत्त्यापत्तेः वर्तनाभावाद्वन्ध्यासुतवत् सति च तदुपपत्तेः कालात्मकता । 5

अयुगपद्भाविनोऽपीत्यादि यावदापत्तेः । अयुगपद्भवितुं शीलमस्येत्ययुगपद्भावी, तस्य अयुगपद्भाविनो भवितुकामस्य—भवनाभिमुखस्य बीजाङ्कुरादेर्वस्तुनो यदि वृत्त्यात्मककालाभावो नाभ्यु-पगम्यते तदा वर्तनातिरिक्तस्य कस्यचिदप्यनुपपत्तिरापद्यते वर्तनाभावाद्वन्ध्यासुतवत्, तदभावानु-पपत्त्यापत्तेः, सति वर्तमानात्मके काले तदुपपत्तेः कालात्मकता । एवं तावन्नियतावभ्युपगमः काल-मन्तरेण न भवतीति युगपदयुगपद्वृत्त्यात्मकः, काल एव भवतीत्युक्तम् । 10

इदानीं नियतिवादिनो दोषोऽभिधीयते—

नियतेस्तु सर्वात्मकत्वात्स्वभावोपालम्भवन्नियत्युपालम्भोऽपि त्वामपि प्रति समानः, सदा सर्वस्यातीतानागतानाकारतावद्वर्तमानानाकारता स्यात् वर्तमानाकारतावदतीतानागता-कारताऽपि स्यात् ।

नियतेस्त्वित्यादि यावत्सदा सर्वस्य, यत उक्तस्त्वया स्वभाववादिनो प्रति बाल्यकौमार- 15 यौवनमध्यमावस्था युगपत् स्युः, सर्वाकारस्वभावत्वादेकत्वात्, अङ्कुरपत्रकाण्डादयश्चास्य युगपत् स्यु-रित्यादिरित्युपालम्भः, स एव नियतेः सर्वात्मकत्वात् कस्मात्सर्वात्मना नियतमेव न भवतीति स्वभा-वोपालम्भवन्नियत्युपालम्भोऽपि त्वामपि प्रति नियतिवादिनं प्रति समानः सदा—सर्वकालं सर्वस्य वस्तुजातस्य तस्येति कालाभावेऽतीतानागतवर्तमानाविशेषात्, यथा चातीतानागतानाकारता वर्तमाना-कारता च, वृत्त्यात्मककालाभावान्नियतेश्चाविशेषादतीतानागतानाकारतावद्वर्तमानानाकारता स्यात्, 20 वर्तमानाकारतावदतीतानागताकारतापि स्यात्, न च दृष्टाऽतीतानागताकारता वर्तमानानाकारता वा ।

अयुगपदिति [illegible] ते बीजाङ्कुरादयः [illegible] अन्योऽपि [illegible] न [illegible] भवन्ति, किन्तु [illegible] नियतः स काल एव [illegible] हि वर्तनाया [illegible] [illegible] इति [illegible] इति भावः । नियतावेति [illegible] [illegible] तेषामभ्युपगम इत्यर्थः । ननु 'नच [illegible] एव [illegible] 25 [illegible] तदनभ्युपगमे [illegible] [illegible] इति [illegible] प्रति नियतिवादिनोऽप्युपालम्भ [illegible] नियतेस्त्विति, नियतिरपि हि [illegible] स एव नियतिवादिनोऽपि [illegible] सर्वात्मकत्वे हि [illegible] वस्तु न [illegible] सर्वकालमिति । [illegible] [illegible] न वा भवेत्, न चैवम् वर्तमानाकारतया [illegible] वर्तमानाकारतया हि प्रत्यक्षं दर्शनम् [illegible] 30 [illegible] इति [illegible] [illegible]

अस्मन्मतमतीतानागताकारता वर्तमानाकारताबभिमता विद्यमानैव तिरोभूतत्वान्नोपलभ्यते, वर्तमानाकारता त्वाविर्भूतत्वादुपलभ्यत इत्युक्तत्वादुत्तरमिदमुच्यते—

अपि च तथापि नैव कालातिक्रम इति स्वीक्षितमपि कललादेर्नान्यत् कारणमवस्थानां क्रमेण रूपादीनां वा युगपदवस्थापकमालक्ष्यते, यस्मात् कललार्बुदपेशीघनादिक्रमेण नियतानन्तराभिव्यक्त्यैवाऽभ्युपगतमपि कालं नियतिमात्रग्राहदोषेण स्वपक्षरागान्धनिष्फलता त्वयाऽऽत्मा तेभ्यो गुणेभ्योऽपनीयते ।

अपि च तथापि नैव कालातिक्रम इति, एवमपि व्याकारतया युगपद्भूताः क्रमेणाविर्भावतिरोभावावतीतमनागतमिति चैतत्सर्वं वाक्यार्थविज्ञप्त्यर्थसामर्थ्यप्रतिपादितं वचनं वचनं यथा-समनन्तरेण न स्यात्; कालस्यानतिक्रमणीयत्वेति स्वीक्षितमपीत्यादि एतेन प्रकारेण सुष्ठु परीक्षितमपि कललादेर्नान्यत् कारणमवस्थानां बाल्यादीनामङ्कुरादीनां च क्रमेणावस्थापकं रूपादीनां वा युगपदवस्थापकमालक्ष्यते, यस्मात् त्वया नियतानन्तरव्यक्त्यैवाभ्युपगमतः कालः—सप्ताहं कललं भवति, ततः सप्ताहमर्बुदं, एवं पेशी घनमित्येवमादिक्रमेण गर्भादिषु पूर्वोत्तरावस्थानां पूर्वस्यानन्तरावस्थाऽभिव्यक्त्यैव इत्यनयैव नियतानन्तराभिव्यक्त्या कालमभ्युपगतमपि नियतिमात्रग्राहदोषेण स्वपक्षरागान्धनिष्फलता त्वयाऽऽत्मा तेभ्यो गुणवत्कालपक्षपातकृत्गुणेभ्योऽपनीयते । मा भूद्ग्राह इत्युक्तेऽस्ति विनिश्चित्त्वा-विपरीतेति ग्राहपक्षग्राह इति ग्राम्यवाक्यातत्पैपक्षमेवोच्यते, यथा ग्राहोऽभिमानः, ग्राहयतीति ग्राहकस्याभिमानस्य दोषेण स्ववचनाभ्युपगतमपि कालमपश्यन् कालस्वरूपस्वभावाभावतोऽवभासि गुणगणादात्मानमपनयसि ।

यदि नियतिकृतैवार्थप्रवृत्तिस्तथापीदं पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते, सर्वेषां तेषां बीजादौ नियतेः सन्निहितत्वात् ।

यदि नियतिकृतेत्यादि यावन्न युज्यते नैवमभ्युपगन्तुं शक्यं नियतिकृतैवार्थानां प्रवृत्तिरिति, अनन्तराभिहितदोषसम्बन्धात् कालस्यलोपत्वात्, अभ्युपेत्यापि नियतिकृतत्वं दोषं ब्रूमः, इदं

भूतत्वेति न कश्चे नास्ति किञ्चित् प्रयोजनमित्याशङ्कते—अस्मन्मतमिति । युगपदाकारतास्वभावेऽपि । पर्यायेणाविर्भावतिरोभावौ तथाभीत्यमपत्यामिव्यक्त्या न कालेन विना सम्भवतीत्युत्तरयति—अपि चेति । अभिव्यक्तकारणमपि कालेन प्रयुक्तमेवाभिव्यञ्जयति अन्यथा व्यवस्थापयितुं इति भावः । नियतेरनन्तरमवस्थानामभिव्यक्ति युगपत् त्वयाऽपि कालोऽभ्युपगत एवेत्याह—यस्मात्त्वयेति पूर्वोत्तरावस्थानां कललार्बुदपेशीघनादयवस्थानाम्, पूर्वं तथा नियमस्य नियन्तृत्वा एतनन्तरावस्थाना नियतोत्तरमभिव्यक्तिरिति पूर्वोत्तरभावमभ्युपगच्छन्नपि कालमभ्युपगन्तुं त्वं न ब्रूषे तत्र कैवल्यं कारणम् एव कार्यं तथाभ्युपगच्छे गुणवत्कालपक्षपातत्वं नाभ्युपैषीति भावः । अत्र प्रकृतमन्यो न कालवादस्य कालवादेन नियतिवादिनोऽभिप्रायेऽप्रतिपत्तिरेव तत्र विपरीतम् भवतीति तस्य भूतिरिति भवता ग्राह इव ग्राह इति योजनम् एव प्रयुक्ते ग्राहपक्षाद्—मा भूदिति योजनम् एवात्र प्रयुक्त इत्यत्र विवादप्रकार इति नैतदाशङ्क्य यथा नैति । कालेति कालस्यरूपस्वभावस्यापो यो गतो धर्मस्तद्गुणगणस्यातिरेकं । ननु बाल्यादिरूपादीनां नियतिकृतत्वं प्रयोजयेत किं कालकारणेन युगपत्त्वेन विपरीतप्रतिपत्तिकारणमनेकार्थविवक्षायामाह—यदीति बीजादीनामवस्थानामपि नियतिकृतत्वमपि तत्त्वाभिव्यक्तिकारणम् नियमस्य निर्वर्तयितुमशक्यत्वात् कालव्यवहारः सर्वकारणस्य कालत्वस्य विधिविधित्सुरुत्तरयति—तथापीदमिति यदि पश्चे न कालादि बीजादौ युगपदुत्पन्नं तत्तद्विवक्षाय कालेन क्रमेण मूलादीनामुत्पत्तिः प्रसज्येत, कालीभवनपर्यायसम-

पूर्वमिदं पश्चादिदमिदानीमिदं युगपदिति न युज्यते—पूर्वादयः क्रमत्रयवाचिनः, युगपदित्यभिन्न-कालवाची शब्दः, तत्तु कालमन्तरेण लोकप्रसिद्धव्यवहारजातं न युज्यते । कारणान्तरमप्याह—सर्वेषां तेषां बीजादौ नियतेः सन्निहितत्वात्,—बीजे मूलाङ्कुरपत्रनालादीनां नियतेः सन्निहितत्वात्, शुक्र-शोणितावस्थायामेव कललार्बुदगर्भार्भकादीनां नियतेः सन्निहितत्वात् पूर्वादिक्रमवृत्तिता युगपद् वृत्तिता वेति न युज्यते । 5

नियतेरेवेति चेन्न, आनर्थक्यात्, इह तु नियत्यानर्थक्यमेव, पूर्वादिभिरेव कृतप्रयोजनत्वात् किं नियत्या? यत्पूर्वं तद्बीजादि यत्पश्चात्तदङ्कुरादीत्येवमादिविविक्तव्यवहारेषु काल एव भवतीति भावितम् ।

(नियतेरिति) स्यान्मतमेतदपि नियतेरेव युगपद्वर्त्तनं पूर्वादिक्रमवर्त्तनञ्चेत्यादि, एवकारात् कालादिनिराकरणमित्येतदायुक्तं आनर्थक्यात्—नियतेः पूर्वादीनां वा नैरर्थक्यात् । यदि नियतिरेव 10 कारणं पूर्वं पश्चादिदानीं युगपदिति कालादिसम्बन्धोपादानं तदुभयमप्यानर्थक्यम्, तदभावे सति नियत्यैव कृतप्रयोजनत्वात् । तदुपादाने वा नियत्यानर्थक्यम् । इह तु नियत्यानर्थक्यमेवेति मन्यस्व कालमतैककार्यव्यापारयोर्नां पूर्वादीनामवश्याभ्युपगम्यत्वात्तैरेव कृतप्रयोजनत्वात् किं नियत्या प्रयोजनम् ? इह पूर्वादिभिरित्यापत्तरैर्मोपिवार्थत्वात्, यथैवं नियत्यादीयेव एवमाद्यभिप्रायः, तत्तु पूर्वादिभिः कृतमेव, यत्पूर्वं तद्बीजादि यत्पश्चात्तदङ्कुरादीत्येतयोः पूर्वापरसम्बन्धयोः क्रमात्मककालवाचि- 15 त्वादिति तन्निदर्शयति—एवमादिविविक्तव्यवहारेषु काल एव भवतीति भावितम् ।

किञ्चान्यत्—

सर्वसङ्ग्रहेणैव वा पूर्वापरयोः कारणकार्यत्वात् कालस्यैव नियतेरेवासिद्धेर्व्यवहार-सिद्धिरन्यथा, पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते ।

(सर्वेति) सर्वसङ्ग्रहेणैव वा यत्कारणं तत्पूर्वं यत्कार्यं तत्पश्चादिति क्रमवर्त्तिनां भावानां 20 कारणकार्यत्वेन सङ्ग्रहात् पूर्वापरयोः कारणकार्यत्वात् कालस्यैव काल एव भवतीति, एतस्य काल-व्यवहारस्य सिद्ध्यर्थं तथाऽनुक्रमार्थं पुनर्ये समाश्रयमप्यद्य कारणं तत्कार्यञ्चाभिलाष्यवश्यं पूर्वादय

भाष्यादिकमाह—सर्वेषामिति । पूर्वादिक्रमवृत्तित्वं युगपद्वृत्तिता च तथाविधनियतेरेव भवतीत्याशङ्कते—नियतेरेवेति, तथा-त्वे [illegible]—आनर्थक्यादिति एवकारव्यावर्त्यमाह—एवकारादिति । अन्यतरानर्थक्यमेव स्फुटयति—यदीति । तदभावे सति—कालादिसम्बन्धाभावे सतीत्यर्थः । तदुपादाने वा कालादिपूर्वादिसम्बन्धोपादाने वेत्यर्थः । 25 [illegible] इह त्विति [illegible] । हेतुमाह—कालेति [illegible] [illegible] [illegible] इति भावः । [illegible] सर्वसङ्ग्रहेणैव वेति, क्रम-वर्त्तिनो हि भावाः [illegible] [illegible] 30 [illegible] [illegible] इति भावः । [illegible]

सम्यग्ज्ञानीता एव, नियत्यादिमात्रेण पूर्वापरपेक्षेण व्यवहारसिद्धेः, नियतेरेवासिद्धेर्व्यवहारासिद्धिरि-त्यपेक्षि, पूर्वादिभिर्विना जीवाजीवादिनियतत्वात् स्वभावनियतस्वभावो नियतमात्राद्व्यवहारसिद्धि-रिति । यत्र पुनः कारणादिनः पूर्वादिषु तु समाश्रितेषु नियत्या किं क्रियते ? सिद्धत्वेन नियत्या विनापि सम्यग्व्यवहारः पूर्वादिभिरेव कृतत्वादित्यर्थः ।

5 विध्यन्यनियमविचारे—

स्वन्यायेन तु हिताहितप्राप्तिप्रतिषेधार्थाचारोपदेशावनर्थकौ, चक्षूरूपग्रहणनियतिवत्, नियत्या सिद्धस्वसिद्धस्तु वा किं यत्नोपदेशाभ्याम् ? अयत्नत एव तथा सिद्धेः ।

(स्वन्विति) स्वन्यायेन तु—स्वकीयेनैव न्यायेन विदुषां हिताहितेप्सावि, हितप्राप्त्यर्थं आचारो लौकिकः—कृषिवाणिज्यसेवाविरोधनपचनभोजनादिश्च इत्यर्थः, तदुपदेशश्च—यतस्व, इदं ते श्रेय 10 इति, लोकोत्तरश्चाष्टाङ्गो यमनियमादिः, अहितप्रतिषेधार्थश्च लौकिकः सारविषकण्टकादिहानादि परिहारार्थः, तदुपदेशश्च मारणादीनां मा कार्षीरिति । लोकोत्तरश्चाष्टाङ्गो हिंसानृतस्तेयाब्रह्मादिभ्यो विरतिः श्रेयसीति, तावेतावाचारोपदेशावनर्थकौ स्याताम्, नियत्यैव तदनन्यसाध्यत्वोऽनर्थौ पैति किमाचारोपदेशाभ्याम् । किमिव ? चक्षूरूपग्रहणनियतिवत्, यथा चक्षुषा रूपं पश्यन्तं पुरुषं नियत्या समागतोऽन्येन वा केनचित्कारणेन स्वयमितरेण सिद्धत्वात्, पुरुषान्तरादरो यो ब्रूयात् चक्षुषा रूपं 15 पश्य मा घ्राणीर्जिह्वयेति किं तेन कृतं स्यात् ? तथा नियत्या सिद्धस्त्वसिद्धस्तु वा किं यत्नोपदेशाभ्याम् ? किं कार्यं ? अयत्नत एव तथा सिद्धेः, योऽयमसम्भावनासमर्थेऽपि यत्नोपदेशादेवं स्वयमेव सिद्धेत, जमदग्नेः कपटे मुखदीक्षाः कालिमापि योग्यम् ।

यत्नोऽपि नियतित एव चेत् सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानर्थक्याल्लोकागमवि रोधौ, भावसाम्यप्रमाणाभावात् ।

20 (यत्नोऽपीति) स्यान्मतं योऽप्यसौ यत्नो नियतित एव, तथोऽप्याचारोपदेशकरणत्वासि-प्रयोजनमौद्गलपचनासमर्थेपादिरूपश्च, तथा तथा नियतित्वाविशेषं वैयर्थ्यमसे तदा सर्वलोकशास्त्रार-म्भप्रयोजनाभिधानानर्थक्याल्लोकागमविरोधौ—यथासंख्यं लोकविरोध आगमविरोधश्च सर्वलोकस्य सर्वशास्त्राणामारम्भप्रयोजनयोरभिधानस्य चानर्थक्यम् । मुमुक्षुप्रवृत्त्यारम्भप्रयोजनं योऽयमपवर्गारम्भः स प्रयोजनेन तत्स्वामिना तदुपदेशवचनारम्भप्रयोजनमपि चानर्थक्यमपि लोके, शास्त्रेषु च पर्यायै-

---

25 यथाप्रमाणमिदं ... न व्यवहारसिद्धिरिति—मम पुनरिति । नियतिपक्षेऽनुपपत्तिमभिप्रेत्य—[illegible] हिताहित, तत्र एतावे हितप्राप्तिकामो योऽयमाचारो लौकिकोऽलौकिको वा [illegible] [illegible] सति ... हितप्राप्तिः ... सिद्धेः स्यादयमर्थः । [illegible] [illegible] इति, एतदेव व्याचष्टे—यथेति । एवं [illegible] अपि न नियतिमतेन [illegible]—यत्नोऽपीति तथा सति लोकविरोध आगमविरोधश्च प्रसज्यते यत्नो निरोधासम्भवात्, [illegible] [illegible] 30 [illegible] विरोधद्वयमाह—सर्वलोकेति । तदेवस्पष्टयन्नाह—यत्नोऽपीति । [illegible] [illegible] [illegible] [illegible] [illegible] लोके इत्यते तत्र विरोधः । [illegible] च [illegible] [illegible] [illegible] [illegible] [illegible] तत्र विरोध इति [illegible]—[illegible] ॥ [illegible]—[illegible]

कालमोक्षादयपर्यायाश्च ज्ञानारम्भाद्युपदेशाश्चानर्थका आपद्यन्ते । किं कारणं ? भावसामान्यभावाभा-भावात्, यस्मात्तेनैव भाविनोऽभावः, अभाविनश्च भावः, तस्मात्तावत्सामान्यभावाभावाभावात् सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानर्थक्यम्, तस्माच्च लोकागमविरोधौ, लोके सर्वागमेषु चारम्भप्रयो-जनाभिधानानां प्रसिद्धत्वात् ।

किञ्चान्यत्— 5

क्रियात एवौदनतृप्त्यादिफलप्रसूतेश्च प्रत्यक्षविरोधः, एवं नियतेरेवैयमिति चेत्, कालानर्थान्तरक्रियाया एवैषं क्रियानियतिरिति संज्ञामात्रे विसंवादात्, एवमपि क्रियासिद्धौ कालासिद्धिरिति, न कालानर्थान्तरत्वात् क्रियायाः ।

(क्रियात इति) क्रियात एवौदनसिद्धिः, नोदासीनस्यैवासिद्धः कदाचिन्नियतेरेव केवलायाः । सिद्धस्य चौदनस्य फलं तृप्तिः, सापि भुक्ते कवलप्रक्षेपणसमाप्तिक्रियात एव भवन्ती दृष्टा, 10 चौदनसम्पर्कसेवनपर्यालोचनादिफलप्रान्तर्गतास्वरसरुधिरादिविभागपरिणमनक्रियातः, तस्माच्च क्रिया-प्रसाध्यतृप्त्यादिहेतोरोदनसिद्धिसिद्धौदनजन्यतृप्तिबलवर्णारोग्यादिफलप्रसूतेः प्रत्यक्षसमधिगतत्वात् एवेति वादे प्रत्यक्षविरोधः । एवं नियतेरेवैयमिति चेत्—एवंविधैषा नियतिः क्रियानियतिरित्युच्यते, अस्याः क्रियानियतेरोदनतृप्त्यादिफलप्रसूतिनियतिरित्येतदायुक्तम्, कालानर्थान्तरक्रियाया एवैषा क्रियानियति-रिति संज्ञामात्रे विसंवादात्—अभ्युपगतं तावत्त्वया एवं नियतेरेवैयमिति ब्रुवता कालादिसाधनसम्बन्धेन 15 लौकिक्या यथाक्रियमैवौदनसिद्धितृप्त्यादिफलप्रसूतिर्नियतिरिति, एवमस्य तदर्थत्वात्, सा च क्रिया नियतिः कालक्रियापर्यायत्वात् कालनियतिः, नियतेः क्रियायाश्चैकार्थत्वात् तस्मात्तयोः संज्ञामात्रे विप्रतिपत्तिर्नौ । अत्राह—एवमपि क्रियासिद्धौ कालासिद्धिरित्युच्यते, न, कालानर्थान्तरत्वात् क्रियायाः, क्रिया काल इत्यनर्थान्तरम्, कालेनैव क्रियात्वेनैव नियतिरिति ब्रुवता स एव काल इत्युक्तं भवति, कालक्रिययोरनर्थान्तरत्वात् कालनियतिः क्रियानियतिरिति संज्ञामात्रे विसंवादात् पूर्ववदिति । 20

येति, यदि नियत्या भवत्वं क्वचित् लोकशास्त्रारम्भप्रयासम्भवात् कर्तुं यतन्ते अभाविनं वा तत्प्राप्तये कर्तुं यतन्त इति व्यवहारानुपपत्तेः [illegible] शास्त्रारम्भौ व्यर्थाविति भावः । किञ्च लोके ओदनपचनादिक्रियैव तृप्त्यादिफलं ददाति न तु नियत्या तथाप्यकर्तुरपि ओदनतृप्त्यादिफलं भवेन्न चैवं भवति न नियतिप्रत्यक्षत्वमित्याह—क्रियात एवेति, एव-कारव्यवच्छेद्यमाह [illegible] इति भावः । पक्वस्य ओदनस्य फलं तृप्तिः सा च न भुक्तवतः [illegible] तदपि [illegible] रसरुधिरादिपरिणमनक्रियात एव भवति 25 एवेति भावः । क्रियात एवौदनादेर्दृष्टत्वात् प्रत्यक्षविरोध इत्याह—तस्माच्चेति । ओदनतृप्त्यादिफलप्रसूतिरपि नियतिकृतै-[illegible] भवति एवं च नियतिक्रियानियतिरित्युच्यत इत्याशङ्कते—एवं नियतेरेवेति एवं वदता भवता क्रियाया एव नियतित्वमुक्तं न क्रियैव काल उच्यते [illegible] एवं च विशेषणत्वोपादाने तर्ह्यविशिष्टं पूर्वपक्षिणा एव आरम्भप्रयोजनापगमः, पूर्वस्मात्तस्य क्रियैवेति [illegible] नियतित्वोक्ता कालः [illegible] परन्तु तां क्रियां काल इत्युक्तवता नियतिरिति नाम क्रियते [illegible] पर्यवसितो न वस्तुनीति भावः । ननु क्रियायाः सिद्धिरस्तु नाम कालस्य कथं 30 सिद्धिः [illegible] नामनि विसंवाद इत्याशङ्कते—एवमपीति, क्रियात एवौदनतृप्त्यादिरसदेऽपीत्यर्थः । क्रियैव काल इत्युक्त-त्वात्तदर्थे—कालानर्थान्तरत्वादिति भावार्थ इ [illegible] क्रियाविशेषः कालपर्यायत्वात् काल एवाऽत्र व्यवह्रियते, [illegible] सिद्धिप्रतिपादनसाधु [illegible] व्यवहारसाधनाभिधानत्वात्, [illegible] एकमेवैव काल उच्यते, तथा क्रियासिद्धौ कालः सिद्ध एवेति नाम मात्र एव विसंवाद इति भावः । अत्र [illegible] क्रियाया एव नियतित्वमभ्युपगम्य

किञ्चान्यत्—

नियतिप्रतिपादनपरिक्लेशाभ्युपगमाच्च नावश्यम्भावाव्यभिचारिदर्शनविपर्ययार्थप्रवृत्तेरभ्युपगमविरोधः, स्ववचनपक्षधर्मत्वादीनां प्रवृत्त्यैव निराकरणं प्रमाणमन्तरेणापीति ।

(नियतीति) पुरुषकालस्वभावादिरूपाणां नियत्येवाव्यभिचारिणां—यदविनाभावितानामव्यभिचारादेव त्वयाऽभ्युपगतानां परस्मिंश्चिम्म स स पक्षेऽभ्युपगतानां त्वया पुनस्तद्विपर्ययेणाच—नियतिरेव कारणं न कालादय इति प्रतिपादनार्थं प्रवृत्तिरङ्गीकृता । यदि तानि दर्शनान्यन्यथा प्रवृत्त्याऽपनीयन्ते नावश्यम्भावीनि तानि, अथावश्यम्भावीन्येव नापनीयन्तेऽन्यथापि प्रवृत्त्या ततो नियमश्च परप्रमतविपर्ययमापादयामीत्ययमभ्युपगमो निवर्तेत इत्युभयथाऽभ्युपगमविरोधः । स्ववचनपक्षधर्मत्वादीनां प्रवृत्त्यैव निराकरणं—येयं पक्षहेतुदृष्टान्तावयववचोवारणे प्रवृत्तिस्तया स्ववचनं परमतनिराकरणसमर्थमिति मत्वा प्रवृत्युपलम्भं स्वत एव नावश्यम्भवतीति नीक्रियते, तदा नियतभावः, अथावश्यं स्वत एव भवति प्रवृत्तिरनर्थिका प्रतिपादनासमर्थवचनिका, प्रवृत्तिवचनयोरनिवार्यत्वात्, हेतुः पक्षधर्मो हेत्वर्थप्रतिपत्तिनियतोऽवश्यंभावी प्रवृत्तिमन्तरेण चेत् प्रवृत्तिरनर्थिका, नावश्यंभावी चेन्नियतभावः, एवं दृष्टान्तोऽपीति व्याख्येयम् । अतः प्रवृत्त्यैवाभ्युपगतया स्ववचनहेतुदृष्टान्तानां निराकरणं प्रमाणमन्तरेणापीति ।

15 कथं पुनरध्यारोपरूपेणानर्थक्यदोषाभावः ? लोकागमादिविरोधाभावश्चेत्येतत्प्रतिपादनार्थमाह—

अतः इष्ट भावनोच्यते, धर्मार्थकाममोक्षाः कालकृताः एवं चतुर्वर्गसाध्यसाधनसम्बन्धार्थाः सर्वशास्त्रारम्भाः कालसामर्थ्यादेव सफलाः, तत्फलभावनायत् ।

अत इत्यादि, अतः—आगमसिद्धकालकारणत्वतः सर्वलोकशास्त्रारम्भप्रयोजनाभिधानानां सर्वशास्त्रार्थरचायेयं पुनर्भावनोच्यते, धर्मार्थकाममोक्षाः कालकृताः, एवं चतुर्वर्गसाध्यसाधनसम्ब

---

20 [illegible] नियतीति । पुरुषेति स स पक्षेति [illegible]

[illegible]

25 [illegible]

30 [illegible] इति ।

न्यायौः सर्वशास्त्रारम्भाः कालसामर्थ्यादेव सफला नान्यथेति प्रतिपत्तव्य, कथं ? उक्तभावनावत्, तच्च भावना रूपादिघटादियुगपद्भूत्यात्मककालरूपं बीजाङ्कुरादिपूर्वोत्तरक्रमभूत्यात्मककालरूपञ्च क्रमनियतपरिणतत्वेति, तस्मादुक्तभावनावन्नियतधर्मोपायानामाचार्याणां पूर्वापरीभूतक्रियात्वात् क्रियार्थत्वाच्चोपदेशानां कालस्य च पूर्वापरीभूतस्य क्रियात्मत्वात् सार्थकाः शास्त्रारम्भाः ।

यथा ब्राह्मणस्य वसन्तेऽग्न्याधानं, वणिजां मधस्य, ईश्वराणां क्रीडादीनाम्, निष्क्रमणमित्यादि यावद्विमोक्ष यतीनाम् । 5

यथा ब्राह्मणस्येत्यादि, एवञ्च कृत्वा कालकृतत्वात् क्रियाक्रियाफलानां धर्माधर्मभोगार्थैः शास्त्रैरेव विहिताः क्रियाः, तद्यथा यथाक्रमं धर्मादिषु—ब्राह्मणस्य वसन्तेऽग्न्याधानम्, 'वसन्ते ब्राह्मणो यजेत ग्रीष्मे राजन्यः, शरदि वा यजेत वैश्यः' इत्यादिवचनात् । तथा वणिजां मधस्य, आपानमिति वर्तते । ईश्वराणां क्रीडादीनाम्, उद्यानगमनवासस्त्रिकमाल्याहारमास्यगन्धमोक्षणादिसेवन 10 रमणमिति, आदीनामित्यादिग्रहणात् सन्धिविग्रहासनयानादिगुणानुष्ठानमित्यादि । निष्क्रमणमित्यादि यावद्यतीनाम्, निष्क्रमणकालादारभ्य यावद्विमोक्षं, विमोक्षणस्याष्टकर्मवियोगफलस्य मोक्षस्य कालो यतीनां निष्क्रमणादिः कालः, यथोक्तं 'अप्पणो निक्खमणकाले आमोएत्ता चउत्था रज्जं (कल्पसूत्रे)' इत्यादि । तथा दण्डकपाटमन्थानलोकपूरणक्रियाभिः तत्काले कर्मत्रिकस्याऽऽयुषा समीकरणमित्यादि ।

अनियतचेतनाचेतनत्वपरिणतिवद्धात्वोषधपुरुषाणामनाद्यनन्तवर्तनात्मस्वतत्त्वाना वृत्तेः 15 कलनात्मकं रूपं भूयो भूयो विपरिवर्तितेऽतीतानागतवर्तमानवर्तनात्मकमेक कूटस्थमविचाल्यनपायोपजनविकारं पदुत्पत्स्यपद्भूतसम्भवयोगीत्यादिनिरुक्तलक्षणं कलनं कालस्वरूपतदात्मकत्वभावेनैव वर्तते ।

अनियतचेतनाचेतनत्वेत्यादि यावत् कलनं कालस्वरूपतदात्मकत्वभावेनैव वर्तते, अनियतं चैतन्येनोपयोगलक्षणेन रूपे चेतनाया उपयुक्तत्वात्, अचेतनत्वेनाप्यनियतं, चैतन्योपयो- 20 गापरत्वोपयुक्तत्वात्, अथवा तस्मादेकार्थपर्यायस्य सुप्तजाग्रदादिचैतन्यापचेर्तस्य मानाद्यापचेर्

[illegible] तद्विवेकमित्याह—तत्कमापन्नावदिति । धर्माधर्मार्थामिति [illegible] पूर्वापरीभूतक्रियात्मना [illegible] पूर्वापरीभूतक्रियात्मकतया सार्थक्यं शास्त्रारम्भाणां [illegible] मिति भावः । धर्मार्थं शास्त्रविहिता क्रिया [illegible]—यजेतेति [illegible] अग्न्याधानं [illegible] [illegible] [illegible] निष्क्रमणादिक्रियाः मोक्षार्थेति भावः । क्रीडारम्भमाह—उद्या- 25 नगमनेति । [illegible]—सन्धिविग्रहेति [illegible] [illegible] इति [illegible] । अप्पणो इति [illegible] [illegible] [illegible]—तथा दण्डेति [illegible] [illegible] [illegible] । [illegible]—अनियतेति, [illegible] 30 [illegible] [illegible] । अनियतमिति [illegible] [illegible] [illegible] [illegible] । [illegible]

न्यमाणाविभागाविभागा, कालक्रमागतपरिणतिवशादुपशमक्षयक्षयोपशमोदयपरिणामसमावेश जीवपुद्ग-
लयोरनाद्यनन्तयो वर्तनात्। न केवलं चेतनाचेतनयोः परस्परस्वरूपापत्तिवृत्तिवर्तनम् किं तर्हि?
अचेतनस्यापि पृथिव्यादित्वेनापि तथा, तद्यथा—एकद्रव्यत्वात् पुद्गलानां पृथिव्युदकज्वलनपवनव
स्पत्यादित्वेन विपरिवर्तमानपरिणतीनामनाद्यनन्तस्य एवंवृत्तिवर्तन तथाऽऽत्मा एवं तत्त्वं येषां पर
5 माणूनां ते परमाणवः, तेषामनाद्यनन्तवर्तनात्मकत्वात्तत्त्वानां वृत्तेः कलनात्मकं रूपं भूयो भूयो विपरि
वर्तते ऽन्यावर्तते च, रूपरसादिभेदेन विपरिवर्तते, तद्गुणभेदेनापि एकद्वित्रिसंख्येयानन्तगुणभागहीन-
वृद्ध्या कृष्णशुक्लत्वादिना वाऽन्यावृत्तिः, एकस्यापि परमसूक्ष्मरूपादिभावपरमाणोरप्यनाद्यनन्त-
योऽन्यावृत्तिः, अतस्तदतीतानागतवर्तमानात्मकमेकं कूटस्थमविनाश्यनपायोपजननिर्विकार्यमुत्पत्तिविगम
व्ययवोगीत्यादि (सूत्रा० १ १ १) आविर्भवनात् गुणादिसर्वमिदमवगमम्, एतदेव कलनात्मकं सत्
10 कारणमुपपद्यते, न तु पुद्गलनियत्यादि, नित्यत्व पूर्वापरीभूतभावात्मकविपरिवर्तकलनत्वादिभ्याम
सामान्यवर्तनात्वेन कालस्य नित्यस्य तस्मात्विविधवर्तनावर्तनायाः कलन, काल इत्यभिसम्बध्यते ।

तच्च त्रिविधमसदाद्यसर्वज्ञं प्रत्यनुमानमात्रगम्यमविविक्तमुद्देशतोऽतीतानागतवर्तमान
वर्तनाकलनम्, अमितपूर्णकोष्ठागारधान्यकलनवत्, सर्वज्ञं प्रति परमनिरुद्धे काले समये
समये पृथग्विविक्तवर्तनासंख्यानं कालः ।

15 (तच्चेति) तच्च कलनं त्रिविधम्, असदाद्यसर्वज्ञं प्रत्यनुमानमात्रगम्यमविविक्तम्—सर्ववस्तुसामा-
न्यमात्रमहणम् अमितपूर्णकोष्ठागारधान्यकलनवत्, यथा धान्यममितं कोष्ठागारे पूरितं कुम्भद्रोणखार-
धान्यतमपरिमाणमित्युद्देशतो गृह्यते तथोद्देशतोऽतीतानागतवर्तमानवर्तनाकलनमसदादिभिः । सर्वज्ञं
प्रति परमनिरुद्धे काले समये समये पृथग् विविक्ताया वर्तनायाः संख्यान कलनं तत् कालः, कलसंख्याने
इति प्रतीतेः । यथोक्तं 'जं जं जे जे भावे परिणमति पयोगवीससादव्वं । तं तह जाणाति जिणो
20 अपज्जवे जाणणा भणिया ॥' (आव नि गा० ११६७) इत्येतद्वर्तनात्मकत्वरकालनिरूपणम् ।

स तथाभूतेन कलनार्थेन तां वर्तनामेव सामान्यामत्यजन् भूतो भवति भविष्यतीति वि
शेषव्यपदेशं लभते नान्यः कश्चिन्नियत्यादिः, असत्त्वात्, अन्यथाऽन्यस्याभावात्, यथा कुसुमं

परिणामवर्तनमित्याह—कालक्रमागतेति । नियतीपरिणामवत् समादीनामित्याह—न केवलमिति चेतनाचेतन-
योः परमाणवो भिन्नजातीया नियता किं तेजआदीनां पुद्गला एव वाचिकविविधपरिणामवत्त्वात् पृथिव्यादित्वेन भवन्त
25 इत्याह—एकद्रव्यत्वादिति । तथा तथा वर्तनस्वभावपरिणामा जीवपुद्गलपरमाणव एव न व्यतिरिक्तः इत्याह—एवं वृत्ति
रिति । वस्तुतो विकारमनेकेन कालेन प्राप्यमाणस्य भावस्य तेन तेन परिणामेन प्रवर्तमान् कलयति भूतमपीति कल
नम् इति भावः । रूपरसादिभेदेन भिन्नजातीयेन परिणतं विपरिणम तज्जातीयेनैव पृथिव्यादिविशेषाणां वर्तनमन्य-
थेत्याह—रूपरसादीति । स च काल एकैकस्यापि परमाणोर्वर्तनामात्रोऽन्यो नित्य इत्याह—अतस्तदतीतेति ।
ननु पूर्वापरीभूतभावपरिणामकलनमात्रत्व कालस्य कथं नित्यत्वमुत्पादविनाशादिमत्त्वात् प्रत्युतत्वात् नित्यत्वम्
30 आदिमत्त्वानन्तत्वादिनित्युक्तमेवनित्यत्वमिति । कालस्य सर्वज्ञासर्वज्ञापेक्षया त्रैविध्येन वर्णनं भवतीत्याह—तच्चेति ।
असदादिभिरसर्वज्ञैः काल समाद्यवस्थानमनुमानेन गृह्यते यथा धान्यागारे परिपूर्णधान्यराशे कुम्भद्रोणखार्यादिपरिमित-
त्वेन सामान्येन ग्रहणमित्याह—अविविक्तमिति धान्यानेकत्वया मोहादुपलक्षणमित्यर्थः । सर्वज्ञस्तु प्रतिक्षणवर्तिनं
पुद्गलमपि सामान्यतयैव गृह्णातीत्याह—सर्वज्ञं प्रतीति । सर्वज्ञ एवं यथावस्थितात्मीयं प्रतिपादितं भवतीत्याह—जं
जं इति । वर्तनात्मा काल एव भूतभविष्यद्वर्तमानत्वे भवतीत्याह—स तथाभूतेनेति, विविक्तः परिणतो भवति

खपुष्पं न भवति घटो वा पटतया, तदेव तद्भवति तदेव चान्यथाऽपि भवति, कारणभेदेनापि स एव तथा कल्पयन् वर्तनेन कल्प्यते तेन च तस्मै चेत्यादि ।

स तथेत्यादि, स एव—भवत्तयाभूतेन—वर्तमानरूपेण कल्पनार्थेन सामानाधिकरण्येन तां वर्तनामेव सामान्यामभिन्नामत्यजन् भूतो भवति भविष्यंश्चेति विशेषव्यपदेशं लभते, नान्यः कश्चित्कल्पनात्मकपदार्थो भिन्नत्वादिः, असत्त्वात् । स एव कल्पनालक्षणो भावस्त्रिधा भिद्यते, तत्समानाधिकरण- 5 त्वात् सत्त्वात्मकत्वात्, घटवत्, न व्यधिकरणो भूतो भवति भविष्यंश्चाकाश एव व्यधिकरणोऽसद्रूप एव, किं कारणम्? अन्यथाऽन्यत्वाभावात्, अन्यो ह्यन्यथा न भवति, यथा कुसुमं खपुष्पं न भवति, खपुष्पं वा कुसुमं न भवति, घटो वा पटतया न भवति पटो वा घटतया न भवति, किं तर्हि? तदेव तद्भवति, कुसुममेव कुसुमम् । तदेव चान्यथापि भवति, यथा कुसुममेव मुकुलितावस्थविकसितलक्षणविकसितजरन्म्लानत्वादिना । एवं तावत् काल एव भाव इत्यभेदेन भवन व्याख्यातम् । कार- 10 णभेदेनापि स एव तथा कल्पयन् वर्तनेन कल्प्यत इति, कल्पनस्य कर्तृत्वमनुभवतीति कल्पयन् भवतीत्यर्थः, स एव कल्प्यते—क्रियते कर्म भवतीत्यर्थः, पूर्वापरतया कार्यकारणभावात्, तेन च तस्मै चेत्यादि, तस्यैव कल्पनस्य शक्तिभेदात् तेन क्रियते इति करणता, तस्मै क्रियत इति सम्प्रदानता, आदिग्रहणात् तस्मात्तस्मिन्निति अपादानाधिकरणभावोऽपि तस्यैव ।

इदानीं कालस्य त्रिधा भिन्नस्याप्यभेदोपदर्शनार्थं ज्ञानेन क्रियया चैक्यमुच्यते— 15

एवमेव च स वर्तमानातीतयोः कारणावस्थयोरेव कार्यस्याभिमुख्येन गृह्यते, यथास्त्यस्मिन्नेकत्र घटादिरेकत्र मेघादिः,

एवमेव चेत्यादि, यावदेकत्र मेघादिरिति, ज्ञानेन तावदैक्यं दर्शयते, एवमेवेति, यथैव कर्तृकर्मकरणादिशक्तिभेदेऽप्यभिन्नः कालस्तथा स वर्तमानातीतयोः कारणावस्थयोरेव—सम्बन्धनिर्देशोऽ-

---

साधनं साध्यञ्च तथा भवनमेवासाध्यव्यतिरिक्तं साधनं साध्यञ्चैकमेव, तथाऽद्वैतमपरित्यज्य भवनमेव
व्रीह्यादिविकल्पानन्त्येऽपि तत्तत्त्वमेवाभ्युपगमात्मकरूपानुगमात् सदा—सर्वकालम्। को दृष्टान्तः?
पुरुषवत् हस्त्यादि यावदनुगमवत्। यथा यन्त्रैरभिमतया पुरुषो हस्त्यश्वपर्वतसरित्समुद्रादिमय-
मात्मानं दर्शयति स्वतः सुखदुःखे संहरति च तथा तथा भवनात्, चेतनहस्त्यादयो न ततः केचिद्भेदेन
10 भवन्ति हस्त्यादिरूपत्वेन तु पुरुष एव हस्त्यादिर्मृदादिश्च भवति, आदिग्रहणाद्विकल्पकार्यपुरुषादिर्भ-
वति तथा भवनमेव पृथिव्यम्बुमृदादिर्भवति न भेदः कल्पितभवनादेर्घटादेः। किं कारणम्? एकत्रैवो-
पयुक्तार्थत्वात्। घटादिरभवनत्वस्य—भवनाद् भेदेऽसत्त्वमेव, भावाद्भिन्नत्वात्, खरविषाणवत्।

भावाद्भिन्नोऽपि घटो भवत्येव चेत्तस्य भवने वन्ध्यापुत्रोऽपि भवेदघटत्वात्।

(भावादिति) भावाद्भिन्नोऽपि घटो भवत्येव चेत्? तस्य भवने वन्ध्यापुत्रोऽपि भवेत्।
15 घटस्य विकल्पमात्रत्वादघटत्वादात्मनाऽभावात्, पटवत्, घटभवन हि घटात्मभावोऽघटस्य भावः।
तस्मादघटत्वात्—घटात्मनाऽभावात्।

एतमेवार्थं व्याचष्टे—

आत्मनाऽभावात् पटवत्, घटवदेव वा तत्प्राग्भेदाभावाच्च भाव एव विकल्पोऽत्र
न सत्यः।

20 आत्मनाऽभावादिति, साधनान्तरमेव वा अन्यात्मनाऽभावादिति यावत् पटवत्, यथा घटो
घटात्मनाऽभवन् घटो न भवत्येवं घटोऽपि घटात्मनाऽभवनाद् घटो मा भूत्, घटात्मनाऽभवनञ्च भावा-
द्भिन्नत्वाभ्युपगमात् सिद्धम् न चेदेवं वन्ध्यापुत्रोऽपि भवेत्, घटात्मनाऽभवनात् घटवत्। घटवदेव
वा तत्प्राग्भेदाभावाच्च घटादिभेदाभावाच्च भाव एव विकल्पो न सत्यः।

तथा तथा भवनादिति पुरुषस्येव हस्त्यादिचेतनरूपतया घटादचेतनरूपतया भवनात् न हि पुरुषाद् हस्त्यादयो पृथ-
25 ग्भूता वा पार्थक्येन भवन्ति एवं भवनमपि चेतनाचेतनरूपेण भवतीति भावः। घटादीनां भवनात्मकत्वाभावे दोषमाह—घटा-
दिरभवन इति। घटोऽसन् भावाद्भिन्नत्वात् खरविषाणवदिति। एवमसत्त्वमापाद्य असत्कार्यवादिदूषणमाह—भावादिति।
वन्ध्यापुत्रः स्यात् भावाद्भिन्नत्वात् घटवदिति भावः। भावाद्भिन्नत्वं हेतु [illegible] हेतवे बोध्या
इत्याह—घटत्वेति घटत्वं [illegible] घटमभवमिति। अघटात्मनाऽभावादिति हेतौ घटत्वं निर्दे-
शात् [illegible] व्याचष्टे—आत्मनाऽभावादिति। हेत्वन्तरमेव वार्थं हेतुरित्याह—अन्यात्मनाऽभावादिति यथा
30 [illegible] अघटात्मना घटो न भवति तथा घटोऽपि घटात्मनाऽभवनाद्घटो न स्यात् न च घटस्य
घटात्मनाऽभवनमसिद्धम् भावाभिन्नत्वेन [illegible] भावः। यदि घटो घटात्मनाऽभवनपि भवतीत्यभ्युपगम्यते
तर्हि घटवदेव वन्ध्यापुत्रोऽपि भवेदित्याह—न चेदेवमिति उपसंहरति—तस्मादिति [illegible]
[illegible] एव सर्वं घट पट इत्यादि विकल्पस्तु न सत्य इति भावः। विधिविधारेव भवनं धारणं दर्शयति

इदानीं भेदकारणविकल्पासम्भवं दर्शयिष्यन्नाह—

विकल्पो हि भेदसंसर्गपरिणामैर्भवेत्, न चास्य भेदः संसर्गः विपरिणामो वा एकत्व-स्वात्मकत्वात् प्रतिस्वात्मवत् ।

विकल्पो हीत्यादि, विकल्पो न सत्यः, स तु भवन्नेभिस्त्रिभिः कारणैर्भवेत् भेदसंसर्गपरिणामैः, तत्र भेदेन—घटादिभ्यमानान् कपालानि परस्परतो भिन्नानीति गृह्यन्ते । संसर्गेण—तन्तूनां संघातेन पट- 5 स्तन्तुभ्योऽन्य उत्पन्न इति । परिणामेन—क्षीरं दधित्वेन परिणतं दधि क्षीरादन्यत्, एतेषां त्रयाणामपि प्रयोजनाभिनानात्वाल्लोके प्रसिद्धेति । एते भेदादयस्त्रयो भवेयुः, तत्र न चास्य भेदो न संसर्गो न विपरिणाम इत्येवाश्रित्य प्रतिज्ञा एकहेतुसाध्याः, कोऽसौ हेतुः ? उच्यते—एकत्वस्वात्मकत्वात् तस्य भावस्यैव तत्त्वमनन्यत् स एवाऽऽत्मा स्वभाव इत्येकत्वस्वात्मा तद्भावादेकत्वस्वात्मकत्वात्, प्रतिस्वात्मवत्, यथा स्वं स्वं प्रति प्रतिस्वम्, स्वात्मतेन भिन्नानामसाधारणः स्वात्मा वा स तु भाव 10 इत्येवैकत्वस्वात्मकत्वान्न भेदसंसर्गपरिणामात्मकः तथा भावोऽपीति नास्ति विकल्पो भावस्य ।

अथापि स्याद्विकल्पः सोऽभ्युपगमेनैव, न भेदाभ्युपगमेनेत्याह—

विकल्प्येत च भाव एव नाभावः, खपुष्पादिरसत्त्वादिति भावस्यैव घटपटादिना भवनं नास्य भेदः कश्चित्, तस्यापि सत्त्वादेव कुतोऽत्र विकल्पः ।

(विकल्प्येत चेति) विकल्प्येत च भाव एव नाभावः खपुष्पादिरसत्त्वादिति भावस्य 15 चासौ, भाव एकनित्यसर्वगतत्वादिधर्मा तस्यैव घटपटादिना भवनं नान्यो भेदः कश्चित्, भेदस्याभाव मात्मकत्वादित्युक्तम् । तस्मादसत्त्वादसौ न विकल्प्येत भेदः खपुष्पवत् अतः सम्भाव्यमानश्च स्वभाव एव विकल्पितत्वमतेऽपि, तस्यापि भावस्यापि सत्त्वादेव—प्रागुक्तहेतुप्रकारेण सत्त्वादेकत्वादेव कुतोऽत्र भावे विकल्पः ?

इतर आह— 20

ननु भेदः प्रत्यक्षत एव पूर्वोत्तरादुत्पत्तिविनाशवस्तुप्रविभक्तत्वाद् गृह्यते अभेदश्च न गृह्यते ।

ननु भेदः प्रत्यक्षत इत्यादि यावदभेदश्च न गृह्यते, पूर्वोऽयमुत्तरोऽयं घट इति दिग्भेदेन, कालभेदेन पूर्वापरोदयविनाशपरभेदेन च गृह्यते घटादिः, तयोरुभयो विनाश इत्युत्पत्तिविनाशाभ्याम्, वस्तुतोऽपि घटपटादि, रूपरसादि स्वरूपभेदेन—कृष्णो रक्तः पाण्डुः शुक्ल इत्यादि, एभिः कारणैः 25

विकल्पो हीति । एवं भेदप्रपञ्चमुपन्यस्य निराचष्टे-तत्र न चास्येति भावस्य भेदो नास्ति संसर्गो नास्ति परिणामो नास्ति इति पृथक् पृथक् प्रतिज्ञात्रयम्, हेतुस्तु सर्वत्र एकत्वस्वात्मकत्वादित्येक एव दृष्टान्तः प्रतिस्वात्मवदिति प्रतिस्वं विद्यमानो योऽसाधारणो धर्मो भावस्यैकस्वात्मक एव सर्वे भेदसंसर्गपरिणामा नाभेदात्मका इति नास्ति विकल्पो भावस्येति भावः । विकल्प्येतेति भाव एव स्वरूपेण विविधप्रकारेण कल्पितुमर्हति अभावो निःस्वभावत्वात् सोऽपि विकल्पो न भेदरूपोऽन- भ्युपगमात् खपुष्पवदिति भावः । ननु भेदस्य प्रत्यक्षेण [illegible] विभक्तत्वात् [illegible] तदा तथा भवन न [illegible]—ननु भेद इति । [illegible] पूर्वोऽयमित्यादिना पूर्वो घट इत्यादौ [illegible] प्रतीयमानाः पूर्वघटः [illegible] अन्यथा पूर्वघटो प्रतीयमा-

अविभक्तस्वात्मनां भेदेन गृह्यमाणानां कथं भेदाभावः ? पूर्वोत्तरक्षणाभ्यां देशकालपरिमाणरूपा अपि गृहीताः, एव मध्यमतो मध्यमम्, अभेदश्च न गृह्यते, मध्यमत एवेति वर्तते ।

अत्रोच्यते, नास्ति किञ्चिद्भावव्यतिरेकेण पूर्वमुत्तरं वा, ततः किं तदपूर्वं यदुत्पद्यते पूर्वं वा विनश्यतीति पूर्वोत्तरादिदिक्कालोत्पत्तिविनाशवस्तुप्रविभागाभावात् किं तद् प्रविभक्तं
5 प्रविभज्यत प्रविभक्ष्यते वा ? अतो नाभावो भेदो भवति ।

अत्रोच्यत इति, पूर्वोत्तरविभेदाभावं प्रतिपाद्य मध्यमस्याभावञ्च प्रतिपादयिष्यन् भेदाभावप्रतिपादनाय तावदाह—नास्ति किञ्चिदिति । भावव्यतिरेकेण किञ्चित् पूर्वमुत्तरं वा नास्त्येव भावस्यैव कारणत्वात्, ततः किं तदपूर्वं यदुत्पद्यते, पूर्वं वा विनश्यति ? इति, पूर्वोत्तरयोरभावादेवोत्पत्ति नाशौ न स्तः, तत एव वस्तुप्रविभागोऽपि, तस्मात् पूर्वोत्तरादिदिक्कालोत्पत्तिविनाशवस्तुप्रविभागाभा-
10 वात् किं तत् प्रविभक्तं प्रविभज्यते प्रविभक्ष्यते वा ? यत्तदेवमपूर्वं तदेव नास्तीति नापूर्वं भावान्यत्वात् पूर्वोत्तरापन्नस्ततो नाभावो भेदो भवति ।

कथं तर्हि भेदप्रत्यया इति चेदुच्यते—

स एव ह्युत्पादाद्युदकाभिव्यक्तितिरोधिधर्मोपस्थाऽन्यथा वर्तमानोऽन्यथापि वर्तत एव । भिद्यमानं हि वस्त्वेवं भिद्यते स्वरूपाद्विपर्ययगत्या, यथाऽभावो भावो भवेत् स तु न भिद्येत
15 कथञ्चित् । उपचितापचितभवनो वा स एव भावो न भिद्यत इति न क्वचिदवस्था दधिघटादिरादिनिधनविभागवती, क्षीरदध्याद्यवस्थास्वेकरूपत्वात्प्रभवस्य ।

स एव ह्युत्पादाद्युदकाभिव्यक्तिरिति, यावदन्यथापि वर्तत एव, यथोत्पादे स्वरूपमुदकक्षीरादिगुणस्य सतोऽपि तत्तिरोभ्याविर्भावस्था ह्यो भेदोऽन्यथा वर्तमानस्यान्यथावर्तनम्, आविर्भावाभिमुखत्वेन भूम्यादिवर्तन भेदेन । तथोक्तं महाकाव्ये 'रूपमा सहस्रसंख्ये
20 धूमे स्थिते स्वरूपं कोटौ' इति । तथा विकर्मादौ हसनरोदनस्नानसंक्रान्त्यादिभेदरूपेण स एव भावो भवतीति तस्माभावि भेदः । भिद्यमानं हि वस्त्वेवं भिद्यते स्वरूपाद्विपर्ययगत्या, यथाभावो भावो

तत्र निर्विषयत्वप्रसङ्गः, ततः पूर्वविभागविभागवमेव भेदप्रतिभासत्वमिति भेदस्य प्रमाणभावेति भावः । पूर्वोत्तरक्षणेत्यौप-पत्तिकमाह—पूर्वोत्तरेति देशकालेन शुक्लादयो मध्यादेरपवा माया । कालभेदेन यथा नातिकोऽयं संवत्सरोऽयं वा इत्यादि परिमाणभेदेन यथा—महानयं पीनोऽयं ह्रस्वोऽयमित्यादि । अथ पूर्वक्षणे न मध्यक्षणेऽपि, मध्यमस्थितिरपि
25 हि मध्यमक्षणस्वभावप्रत्यक्षप्रमाणभेदमात्रस्वेयामतो न तेऽपि च भेदोऽस्तु इत्यतो मध्यमादि नेति भेदाभावादिति कथं प्रमाणप्र-स्तावमित्युत्तरयति—नास्ति किञ्चिदिति । यत्तदेवमिति । अतोऽयमभाव पूर्वोत्तरादिरूपो भावे चेत् तत् ततुत्पन्नवर्ति भावपूर्वोत्तरादिभिर्निर्वक्तुं याति मा अभावविरतेऽपि पूर्वोत्तरादि न विषयेऽत्र एव अभिमानमात्ररूपत्वाद्भेदो नहि गुणवदिति भावः । ननु तर्हि भेदाभावे कथं पूर्वोऽयमुत्तरोऽयमूर्ध्वोऽयमधरोऽयमित्यादिभेदस्य प्रत्ययमित्यत आह—स एवेति । यथोत्पाद इति यथा हि स्वात्मनि क्षीरत्वस्वत्वादिगुणविशिष्टो लोकः तत्तिरोभ्याविर्भावत्वा स्वरूपतया
30 भवति च इत्यन्यथा वर्तमानतान्यथा वर्तनरूपो भेदः तथा निष्पादितः भूम्यादीनामविविधतया वर्तनमेव भेद इति भावः । तत्र प्रमाणभूतं श्लोकमाह—रूपेति हस्ते सहस्रसंख्यायां प्रथमे रूपे भवति अयसंख्यायाः प्रथमे पूर्वे यावते गोरिसंख्यायाः प्रथमे पोडशस्य स्वरूपं यावत इति तदर्थः । [illegible]माह—तथा विकेति । भेदप्रतीतिमुपपत्तिभि-भिद्यमानं हीति, वस्तु स्वरूपमध्येन भिद्यते इत्यर्थं, यथाभावोऽपि भावः स्यात् अभावमात्रोऽपि न स्यात्,

भवेत् भावस्ततो न भिद्येत कश्चिन्निरुपमावो न भवति । भावाद्भावो हि भिन्नः, उपचितापचितभवनो वेति स एव भावो न भिद्यत इति, कश्चिदुपचितापचितभवनो वेति सम्बन्धः, यावन्नूविद्म्य यावदेव न न्यूनो नाधिको वा भवति स भावः । इत्यतो हेत्वर्थे, उपचितापचितभवनाभावे दधिघटाद्यव स्थानानामादिनिधनविभागाभावदर्शनादिति हेतुः, तं दर्शयितुमाह—इति न कादाचित्कावस्था दधिघटादिरा- दिनिधनविभागवती—आदिः प्रागविद्यमानस्योत्पत्तिः, निधनं—विद्यमानस्य विनाशः, विभागोऽन्य 5 त्वम्, एते आदिनिधनविभागा दधिघटाद्यवस्थानां न सन्ति, पूर्वोत्तरोत्पत्तिविनाशवस्तुभेदविभागा- भावस्य प्रतिपादितत्वात् तदवस्थाभावात् नोपचीयते नापचीयते चाऽसौ भावः क्षीरदध्याद्यवस्थासेक- रूपत्वात्कूपनस्य मृत्पिण्डघटाद्यवस्थासु वेति ।

एतस्य हेतोरसिद्धिं परिहरन् परपक्षेऽनिष्टापादनेन तत् साधयति—

*यदि स्यात् सा खपुष्पादस्यापि तद्रूपधर्मा स्यात् सर्वतो व्यावृत्तत्वात् दधिघटवत् ।*10 महापृथिवीवियद्वत्ये सादिनिधनविभागे स्याताम्, इतरेतरासत्त्वात् घटवत्, घटोऽपि वाऽनादिः अत एव, आकाशमहापृथिवीवदिति ।

यदि स्यादित्यादि, आदिनिधनविभागवती यदि स्यात् सा दधिघटाद्यवस्था खपुष्पादस्यापि तद्धर्मा स्यात्, सर्वतो व्यावृत्तत्वात्, दधिघटवत् । सर्वतो व्यावृत्तत्वं च सिद्धं घटस्य, दधिघटा- द्यवस्थानां च भेदाभ्युपगमात् । यथानिष्टत्वात्तद्विपर्ययेण खपुष्पधर्मापादनं घटस्य, गगनार्थं साधनद्वयम्15 महापृथिवीवियद्वत्ये सादिनिधनविभागे स्यातामितरेतरासत्त्वात्, घटवत्, घटोऽपि वाऽनादिः— अनादिरनिधनो निर्विभागश्च स्यात एव—इतरेतरासत्त्वादेव आकाशमहापृथिवीवदिति, घटभेदाभ्युप गमेनैवैतत्साधनमनिष्टापादनमिति । एष तावदुपचितापचितभेदाभावः ।

यदप्युक्तं प्रत्यक्ष एव भेदो गृह्यत इति—

तद्ग्रहणमपि नैव भेदस्याभावादेव, अभावः कल्पनात्मकत्वात्, कल्पनात्मकत्वमसत्, 20 वस्तुनोऽन्यथात्वात्, सा च कल्पना देशतः कालतो वा स्वरूपत एव भिन्नेष्वर्थेष्वभेदकल्पना

भवतस्तु कल्पनासत्त्वेऽप्यन्योन्याभावत्वात्, भवान्निवो अभावः तदवस्थाभावो भवतीति भावः । न न्यून इति अपचयमात्र इत्यर्थः । नाधिको वेति न चोपचयमात्र इत्यर्थः न हि भावस्योपचयापचयभावो भवतीति भावः । अभावे हेतुमाह—उपचितापचितेति । इत आदिनिधनविभागा दध्यादीनां न सन्तीत्यत्राह—पूर्वोत्तरेति । तदभावादिति पूर्वोत्तरोत्पत्तिविनाशवस्तुभेदविभागाभावादित्यर्थः । उपचयापचयौ भावस्य क्षीरदध्यादीति, तद्रूपधर्मेति आदिनि- 25 धनविभागवदित्यर्थः तत्र हेतुमाह—सर्वतो व्यावृत्तत्वादिति, सर्वस्माद्व्यावृत्तत्वादित्यर्थः । तथाप्यनिष्टं दर्शयति—सर्वत इति । ननु तथापि खपुष्पस्यासतः तद्रूपधर्मत्वं नाप्नोति यदि तद्रूपद्यवस्थानामपि तद्रूपधर्मत्वं न स्यादित्याह— तथानिष्टत इति । आदिनिधनविभागाभावे भवनस्यैकरूपत्वं सर्वतो व्यावृत्तत्व हेतुत्वं [illegible] गगनार्थ मिति । सर्वतो व्यावृत्तत्वाभ्युपगमे दोषान्तरमाह महापृथिवीति, एतयोर्नित्यत्वाभ्युपगमादनिष्टप्रसञ्जनं चेत्याह तथाप्येतयोरनादिनिधनविभागवत्त्वे घटोऽपि तथा स्यादित्याह—घटोऽपि वेति । इतरेतरासत्त्वं—भेदस्य वस्तु- 30 ताभ्युपगम्यैवासत्त्वमपि [illegible] इत्याह—घटभेदेति । भेदस्य प्रत्यक्षेण ग्रहणं प्रत्यक्षमिति तदपि न युक्तं भेद स्यैव प्रत्यक्षविषयत्वाऽसिद्धत्वम्, अन्यथा तदपि प्रत्यक्षतो ग्रहणं भवेदित्याह—तद्ग्रहणमपीति । कथं भेदस्याभावः प्रत्यक्षतो ग्रहणमत्र अन्यथा भावस्यापि अभावत्वात् [illegible] इत्याह—अभाव इति । भावस्ये-

स्यात्, एककालत्वमपि वा भेदकल्पना स्यात्, उभयथाप्यसद्रूपत्वं कल्पनायाः, इह तु देशकालाभ्याममेदो नास्ति, घटादेः रूपाद्यादित्वेन भिद्यमानस्य वस्तुनो यावत् परमाणुशो रूपादिशोऽनभिलाप्यस्वलक्षण भेदात्, कालतश्च क्षणे क्षणेऽन्यत्वात्, तस्मादनभिलाप्य परमार्थस्य च वस्तुनो घट इति रूपादिरिति ग्रहणमसदध्यारोपात्मकम्, देशकालाभेदा भावात्, खपुष्पवत् ।

(तद्ग्रहणमपीति) तद्ग्रहणमपि भेद भेदस्याभावादेव खपुष्पग्रहणवत्, अभावः कल्पनात्मकत्वात्, तस्य भावैक्यस्य साधितत्वादेवः कल्पनात्मकः, कल्पनात्मकाभासम्, वस्तुनोऽन्यत्वात्, सा च कल्पना देशतः कालतो वा स्वरूपत एव वा भिन्नेष्वर्थेष्वभेदकल्पनाद्य स्यात् देशकालाद्यभेदे वा भेदकल्पना स्यात् उभयथाऽप्यसद्रूपत्वं कल्पनायाः । इह तु स्वमतेन देशकालाभ्याममेदो नास्ति भेद एव, घटादेः रूपाद्यादित्वेन भिद्यमानस्य वस्तुनो यावत् परमाणुशो रूपादिशोऽनभिलाप्यस्वलक्षण भेदाद्भेदाभावः, कालतश्च क्षणे क्षणेऽन्यत्वात्, तस्मादनभिलाप्यपरमार्थस्य च वस्तुनो घट इति रूपादिरिति वा ग्रहणमसदध्यारोपात्मकं देशकालाभेदाभावात् खपुष्पवत्, खपुष्पे इव खपुष्पवत्, वत् प्रथमाभासमेवेत्यर्थः ।

यदपुष्पवदे अभेदश्च न गृह्यते प्रमाणत इति तदपि न यस्मात्—

अभेद एव तु गृह्यते प्रत्यक्षतः भावस्याभिन्नत्वाद्गृह्यमाणस्य च भावत्वात् ।

(अभेद इति) अभेद एव तु गृह्यते प्रत्यक्षतः किं कारणं ? भावस्याभिन्नत्वात्, गृह्यमाणस्य च भावत्वात्, नाभावो गृह्यते, यथा खपुष्पादि ।

यदि भूयात्त्वम्—

अथ समस्त एव कस्माद्भावो न गृह्यते ? अत्र तु समस्तग्रहणं वक्ष्यामः, त्वां तु किञ्चित् पृच्छामः पश्यता त्वया घटं किं समस्त एव घटो न गृह्यते ? परान्तरादिभागाः किं न प्रत्यक्षाः ? आराद्भागा एव किं प्रत्यक्षाः ? इति किञ्च समानदोषत्वादचोद्यमेतत्—भावस्य सर्वगतस्याप्रत्यक्षत्वदोषो मम नास्तीति विशेषं पश्यत एव युज्येत वक्तुमित्यं भवति तथा न भवतीति, न तु सर्वत्रैवादर्शनभाक् पक्षो यस्य तस्य ।

[illegible] च [illegible] भिद्यमानस्वभावा प्रतिभासनात्—[illegible] तस्य भावैक्य-
20 [illegible] देशतः कालतः स्वरूपतो वा भिन्नेष्वर्थेषु अभेदस्य देशकालाद्यभिन्नेषु भेदस्य वा कल्पना भवेत् [illegible]—सा चेति । [illegible] देशकालादितोऽभेदो [illegible], [illegible], [illegible] भिद्यमानं वस्तु यावत् परमाणुशो रूपादिशोऽनभिलाप्यलक्षणं भिद्यते, एवमनभिलाप्यस्य [illegible] भेदस्य घटोऽयमिति रूपमिदमिति चाभिलप्यतया [illegible] अध्यारोपात्मकमेव अभेदाभावात्—इह स्थितिः । तथा च भेदग्रहणं [illegible] एवैतत् मत । [illegible] प्रत्यक्षेण गृह्यत इति [illegible] च
30 [illegible]—अभेद एव स्थितिः भावो हि गृह्यते स चाभिन्नस्य [illegible] एव [illegible] । ननु यदि भेदो न गृह्यते [illegible] एव, तर्हि पूर्वोक्ता भावस्य ग्रहणं [illegible] गृह्यते यदि भूया इति [illegible] प्रमाणान्तरेण [illegible] स्थितिः । [illegible] किञ्चित् पृच्छामः [illegible]—

अथ समस्त एव कस्मात्प्रायो न गृह्यत इति, अत्र तु समस्तग्रहणे वक्ष्यामः सकारणम्, स्वग्राहविनिवृत्त्यर्थत्वात्तावत्त्वां किञ्चित् पृच्छामो नानाइवभुक्तो मूकत्वितस्तिष्ठति, अथ भेदपक्षे पश्यता त्वया घट किं समस्त एव घटो न गृह्यते ? इति, परान्त्यावृत्तिभागाः किं न प्रमत्ताः ? आराद्भागा एव किं प्रमत्ताः ? इति, अत्र विशेषकारणं कथयेति । किञ्चान्यत्—समानदोषत्वादभयो- पमेतत् । उभयोः समानो दोषो नासावेकस्योपः, भावस्य सर्वगतत्वाप्रत्यक्षत्वदोषो मम नास्तीति [5] स्वपक्षे भेदस्य प्रमत्तत्वादिति विशेष एव पश्यत एव पुंस्येव चाक्षुषत्वं भवति तथा न भवतीति, एतदपि सम्भावयामोच्यते, न तु सर्वत्रैवादर्शनमाह पश्यो यस्य तत्र तस्य, न तु पुंस्यव एवेत्यर्थः, सर्व त्रैव न घटे न रूपादौ वा न कश्चित् प्रत्यक्षता पुंस्यस इत्यर्थः, अथवा स्वपरपक्षयोः सर्वत्रैव, एतदुक्तं भवति—एवं हि स्वपक्षरागाविष्टो भवान् परमत्सरेण स्वदोषं नैव पश्यति, स्वपरपक्षमपाशावदर्शी भयो- पमानमिवामिषगृद्धीव शकुनिः, स्वपक्षेऽप्यस्वदर्शनासम्भवादेव घटादेः प्रत्यक्षत्वाभावः । [10]

इदानीमभेदपक्ष एव दर्शनं सम्भवति नान्यत्रेति वक्ष्याम इति यदुक्तं तद्दर्शयिष्यन्नाह—

तत्तु दर्शनमभेद एव निर्वर्त्यते न भेदपक्षे, इह यदेतत् सर्वं तद्भाव एव, तस्य च एकदेशः तस्य ग्रहणे तस्यैव ग्रहणं ततोऽभिन्नत्वात्, तद्भावत्वात् देशस्वात्मवत्, तस्य ह्येकोऽपि प्रयत्नं प्रतिदेशः सर्वाविभक्तभयनवृत्त्यारम्भकत्वात् सार्वरूप्यमनतिक्रान्तः ततोऽभेदपक्ष एव दर्श नम् । नन्वेकदेशश्च स एव चेति विप्रतिषिद्धमिति चेन्न ज्ञायमानस्यापेक्षयोक्तत्वात् तन्मतया [15] सावयवदर्शनं नान्यस्येति ।

तत्तु दर्शनमिति, तत्पुनर्दर्शनं, तुर्विशेषे, विशेषयत्येव—अभेदपक्ष एव निर्वर्त्यते नान्य- त्रेति—न भेदपक्षे, यावभिर्दर्शयास्यत्वतो भेदादित्युक्तम् । दर्शनं तर्हि कथमिति तत्समर्थयति—इह—अभेदे भावे यदेतत्सर्वं तद्भाव एवाभिन्नत्वात्, तस्य—अभिन्नस्य भावस्य एकदेशो घटः, तस्य ग्रहणे—घटस्य ग्रहणे तस्यैव ग्रहणं—भावस्यैव ग्रहणं समस्तस्य । किं कारणं ? ततोऽभिन्नत्वात्—ततो भावाद्घटस्याभि- [20] न्नत्वात्, घटाद्य भावस्याभिन्नत्वात्, तद्भावत्वे—तद्भावत्वात्—तस्यापि भावस्य तद्भावत्वात्, पर्या-

मूक इव तिष्ठतीत्याह—स्वग्राहेति । पृच्छामः प्रकाशयति—अथेति । यदोभयोः समो दोषः परिहारोऽपि तादृशः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ इति न्यायं दर्शयति—किञ्चान्यदिति । भेदपक्षेऽभेदपक्षे च समस्तग्रहणविषये चोद्यदोषौ तुल्याविति मन्यसे भेदस्य सर्वतः प्रसङ्गं भवति न त्वभेदपक्षे भावस्य सर्वत्र इति न पर्यनुयोज्य इति भावः । तथा भवतु न वाच्यं यन्मते भेदपक्षेऽभिन्नावयवपरमार्थस्य वस्तुनोऽतीन्द्रियत्वेन सर्वस्यैवादर्शनविषयत्वेन एव- [25] भवतेः सम्भावनयैव प्रमत्तस्य एकस्यापि नाभेदपक्षं दूषयितुं समर्थो भवानिति निरूपयति—एतदपि सम्भावय- योच्यत इति । सर्वत्रैवस्य व्याख्यान्तरमाह—अथ वेति । तात्पर्यमाख्याति—एतदुक्तमिति । अथाभेदपक्ष एव दर्शनं सम्भवतीत्यभिप्रायमुपक्रमते—इदानीमिति । भेदपक्षे प्रमत्तासम्भवे हेतुं पूर्वमुक्तमेव दर्शयति—यावदिति । अभेदपक्षे च सर्वत्रैव भावतादात्म्येनैकदेशतादात्म्येन प्रकाशते ग्रहणे तदभिन्नोऽपि भावस्समस्ततया गृहीत एवे- त्याह—इहाभेदे भाव इति । हेतुमाह—ततोऽभिन्नत्वादिति गृह्यमाणस्य घटादेरभिन्नत्वमित्यर्थः एकस्यापि [30] भावस्य भेदेऽपि भावस्य विभागाभिन्नतामाह—घटाद्येति, तथा च भावस्याभिन्नत्वात् सोऽपि गृहीत एवेति भावः । उभयत्र भावस्यापि—तद्भावत्वादिति घटस्यापि भावपर्यायत्वं । ततोऽभिन्नत्वतद्भावत्वयोर्व्याख्यानान्तरमेव- माथोऽपि तयोः पर्यायविशेषत्वादेतत्त्वरमेवाह—पर्यायान्तरेणेति तस्य भावादभिन्नत्वादेव घटोऽपि भाव एव स भावो भावश्च तद्भावत्वादिति विग्रहः तद्भावत्वादेव समस्तो भावोऽपि गृहीत एवेत्यर्थः । तत्र न्यायविभागदर्शनमि

भावान्तरेण देशान्तरं वा घटोऽपि भाव एव भावाभिन्नत्वात्, यो यो भावः स स तद्रूपेण युज्यते, दृष्टान्तो देशाकाशवत्–यस्य देशस्य आत्मा–देशस्य भावः स्वं तत्त्वं भावान्तराभिन्नत्वात् तद्भावत्वाद्युज्यते भाववत्, तथा देशग्रहणे समस्तो भावः तद्भावत्वाद्युज्यते, एतद्भावनार्थमाह–यस्य लेशोऽपि प्रथमं प्रति देशः, हि यस्मात् तस्मात्सर्वे, यस्मात्तस्यैकोऽपि देशः प्रथमान् सर्वाविभक्तप्रथमद्रव्यात्मक-
त्वात्–सर्वेण समस्तेन भावेन अविभक्तो भवनमित्येषैका वृत्तिमनुभवत्यात्मरूपामिति सोऽपि देशः सर्वभावात्मा, प्राग्रूपपाण्याद्यवयवपुरुषात्मत्ववत्, अत आह–यस्य लेशोऽपि प्रथमं प्रति देशः सर्वाविभक्तप्रथमद्रव्यात्मकत्वात् सार्वरूप्यमनतिक्रान्तः, ततोऽनेन न्यायेन देशग्रहणे समस्तग्रहणमित्यभेद पक्ष एव दर्शनं नान्यत्रेति । यन्मेकदेशश्च स एव चेति विप्रतिषिद्धमिति चेन्न ज्ञायमानत्वापेक्षयोक्त-
त्वात्, त्वन्मता सावयवदर्शनं नान्यत्रेति, यन्मेकदेशः सावयव इव निरवयवोऽपि प्रख्यातीति यथा तथोक्तम्, परमार्थतस्तु निर्विभाग एवासावुक्तो वक्ष्यते च । अथवा प्रथमं विचारो विस्तीर्णत्वात्तस्य भावस्य, प्रथमं देशं प्रतीत्य देशः, तस्मात्तदविभक्त इत्युक्तम् ।

अथ आह—

न चास्योर्ध्वाधस्तिर्यग्दिक्षु मूर्तिविवर्तप्रत्ययज्ञानानामेकत्वाभिन्नत्वमेवदेशकत्वात् कश्चिदव-
च्छेदो विद्यते दक्षिणोत्तरयोरपि किन्तु घटपटयोर्भवनैकमूर्तिविवर्तानवच्छेदात् इति स भावो ध्रुवः कूटस्थोऽविनाशी अनपायोपजनोऽविकार्यनुत्पत्तिरवृद्धिरव्ययः । एतानि हि नित्यविशेषणानि नासत्यैव घटन्ते न पुरुषादीनाम्, तद्वत् ।

(न चेति) चैकत्वाभिन्नत्वस्य भेदस्य–घटादेर्मूर्तेः–शरीरस्य विवर्तानां–विभागानामूर्ध्वाधस्तिर्यग्दिक्ष्वभाऽज्ञायमानतया न परम्, किन्तु प्रसङ्गतया च पुरुषपाण्यादिवत् कपालादित्वेनाभाव भावानामेकान्तावमेवः, चक्षुरादिभिर्ग्राह्यमितः एकत्वान्निर्विभागस्तथा भावविवर्तप्रत्ययज्ञानानां तदेकत्वा-
न्निर्विभागा, तस्मात्तस्य न कश्चिदभिन्नभेदस्यैकत्वादवच्छेदो विद्यते यथा वा घटादित्वेन यथा

यो य इति । यत्र यत्र प्रख्यानं तत्र तत्र तद्रूपेण तत्प्राप्तत्वमिति भावः । देशाकाशवदिति, देशः एकदेशः तस्य आत्मा–भावः स्वतत्त्वम् । स च यथा घटोऽभिन्नत्वात्[illegible] समस्तो भावो गृह्यते [illegible] यथा घटस्य पुरोभागे [illegible] एव इति भावः । [illegible] भावमति–तस्य दीप्ति भावस्य हि [illegible] एकोऽपि देशः प्रथमाः [illegible] सर्वस्य [illegible] अभेद एव समये प्रसङ्गात इति भावः । ननु यद एकदेशमेव, सर्वं स एव स एव [illegible]–दर्शितमिति । [illegible]–ज्ञायमानत्वेति । यथा त्वया [illegible] इत्युच्यते तदेव नन्वपि निरवयवोऽपि [illegible] इति [illegible] स चैवैतदेवोक्तम्, [illegible] तत्त्वेन निर्विभागस्य [illegible]–यन्मेकदेश इति । [illegible] निर्विभागस्य [illegible] एव [illegible]–यत्र चेति । [illegible] भिन्नत्वे [illegible] यथा पुरुषस्य [illegible] देशो नास्ति यथा वा घटादेरेकदेशस्य [illegible] न देशः तथा [illegible] नास्ति विभाग [illegible]–[illegible] अभिन्नत्वेनेति । [illegible] इति यत् [illegible] न किन्तु [illegible] अपि [illegible] । यथा घटादित्वेनेति यथा घटादित्वेन घटस्य [illegible] घटादित्वेन वा [illegible] भावः । नव

यदि रूपादित्वेन सत्त्विष्टमेवमपरेण । इतिशब्दो हेत्वर्थे, यस्मादविभागावच्छेदाभावाद्धेतोः स भावो ध्रुवः त्रिष्वपि कालेषु, कूटस्थो भावराशिसमायतन् सर्वैरेकीभूत एव, अविचाली—न स्थानात् स्थानान्तरं संक्रामति, अनपायोपजनः—कोष्ठागारधान्यवदभिगमप्रवेशापायोपजनौ भावस्य न स्तः, अविकार्यपि—स्थानान्यस्थापि मर्दनाभिघूर्णनादिविकारकाभावात्, अनुत्पत्तिः—प्रागभूत्वा घटादिवदुत्पत्त्यभावात्, अवृद्धिः—अङ्कुरपत्रवदुपचयाभावात्, अव्ययः—वृक्षादिपत्रापचयवदपक्षयाद्यभावात् । एतानि हि 5 नित्यविशेषणानि भावस्यैव घटन्ते न पुरुषादीनाम्, अत्र भावे ध्रुवादिनित्यविशेषणयोगः परपरिकल्पितपुरुषादीनामसम्भवविपर्ययत्वेन व्याख्यातः, स्वरूपतो निदर्शनाभावादुक्तमिति च पूर्वोत्तरोत्पत्तिविभागवस्तु-मविभागाभावादुक्तो नित्यैकसर्वात्मकत्वादिदोषः ।

किञ्चान्यत्—

अस्य प्रत्यक्षप्रमाणसिद्धिरियं, यथार्थवस्तुविषयत्वात्, अन्यत्रानुमानतैव भावे, सम्ब- 10 न्ध्येकदेशप्रत्यक्षस्य शेषसिद्ध्यात्मकत्वात् ।

(अस्येति) अस्य प्रत्यक्षप्रमाणसिद्धिरियमेव—अविभागभावपक्षे प्रत्यक्षत्वमनुमानस्य प्रत्यक्षं प्रमाणं सिद्ध्यति, यद्यपरिति वक्ष्यते । यथोक्तम् 'तस्य द्वेकोऽपि प्रधानं प्रतिदेशः सर्वाभिमतभवनरूपत्वात्मकत्वात् सार्वरूप्यमविकल्प्यः, ततश्चानुमानत्वात्तोऽविभक्तत्वात्तस्य च एकदेशग्रहणे ग्रहणे तस्यैव ग्रहणम्, देशत्वात्मकमि'ति उक्तं भावप्रत्यक्षत्वम्, ततः सर्वप्रमाणमेवमत्र प्रत्यक्षप्रमाणसिद्धिरियमेव, यथार्थवस्तुवि- 15 षयत्वात् । अन्यत्रानुमानतैव भावे—वस्तुपक्षादन्यत्र भेदपक्षेऽनुमानतैव प्रत्यक्षाभिमतस्यापि, किं कारणं ? सम्बन्ध्येकदेशप्रत्यक्षस्य शेषसिद्ध्यात्मकत्वात्—द्वयोः सम्बद्धयोः सम्बन्धे तदेकदेशप्रत्यक्षत्वे तच्छेषस्य परोक्षस्य शेषसिद्धिरस्या—अनुमानस्येव तदात्मकं तत् । सम्बद्धैकदेश इति वा पाठः, यथोक्तम्—'सम्बद्धैकदेशात् प्रत्यक्षाच्छेषसिद्धिरनुमानम्', सम्बद्धानां भावानां समवायेन येनाविना भावविधेन कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति, तस्मादिन्द्रियासन्निकृष्टप्रत्यक्षात् शेषस्याप्रत्यक्षस्यार्थस्य या सिद्धिरनुमान 20

एवमस्मै भावो ध्रुवादिलक्षणो नित्य इत्याह—स भाव इति । एते ध्रुवादिलक्षणा धर्माः भावस्यैव सम्भवन्ति न तु परपरिकल्पितेषु चैतन्यादिषु, अत एते परपरिकल्पितपुरुषादिव्यवच्छेदकाः धर्माः अत एवमेव व्याख्याताः स्वरूप-सामान्यत्वं सम्भवतः यथा च ध्रुवादिलक्षणवत्त्वं भावोऽपीति अनुमानसाधकत्वात आह—अत्र भावे इति । स्वरूपतो निदर्शनाभावे हेतुं दर्शयति—उक्तमपरिति, पूर्वोत्तरयोरभावादेवोत्पत्तिविनाशौ न स्तः तत एव वस्तुविभागेऽपि न तथात्वं पूर्वोत्तराभिव्यक्तिविभागवस्तुविभागाभावात्, किं तत् अविभक्तं प्रविभज्यते प्रविभाज्यते नैयुक्त- 25 त्वाभावात् तस्मात् योऽपि भावोऽत्र एकत्वमेव ध्रुवादित्वं सर्वात्मकत्वेति भावः । अविभागभावेऽभेदपक्षे एवैव प्रत्यक्षं प्रमाणं भवति प्रत्यक्षस्य निर्विकल्पकत्वात्मकत्वात् अर्थस्य निर्विभागत्वात्तस्य यथार्थवस्तुविषयत्वम् । वस्तुभेदपक्षे त्वभावान्तु तत्प्रत्यक्षमपि परोक्षमेव इन्द्रियासन्निकृष्टस्यैकस्य अपरेषामनुमानविषयत्वात् सम्बन्ध्येकदेशप्रत्यक्षस्य शेषसिद्ध्यात्मकत्वात् अनुमानमेव स्यादित्याह—अन्यत्रेति । तदपि तद्वक्ष्येण प्रकटयति—यथोक्तमिति, पूर्वसमुपपत्तिमुपदर्शितं । वस्तुवृत्ता—अभिमतस्तूक्त इत्यर्थः । सम्बन्ध्येकदेशेति सम्बन्धिनः संयोगसमवायादिसम्बन्धविशेषवन्तः अवयवावयविनौ 30 संयोगसम्बन्धौ वा तत्र च एकदेशे एकदेशस्य प्रत्यक्षात् अदृष्टस्य शेषस्य परोक्षस्य अवयविनो वा या सिद्धिः निश्चितरूपा सा यत् उभयतः प्रत्यक्षेति मन्यते सोऽनुमानमेवेत्यर्थः । सम्बद्धानां भावानामिति अविनाभावसम्बन्धेन समवायसम्बन्धेन प्रत्यक्षपूर्वकत्वादनुमानस्य सम्बद्धार्थं बन्धे सम्बन्धिरर्थस्य इन्द्रियेण

यत् यथा धूमदर्शनादग्निरिति ज्ञानम्, तथाऽऽत्मेन्द्रियमनोऽर्थसन्निकर्षपूर्वकं त्रिविधं पूर्ववदित्यादि प्रत्यक्षमेव तत्र संभवति, देशग्रहणस्याऽऽसन्नागविषयस्याक्षेपवद्वस्त्वसंस्पर्शादिकस्यैकस्य ग्रहणेन शेषग्रहण-मनुमानमेव ।

तस्यानुमानत्वेऽपि मा स्थिरां बुद्धिं कार्षीरित्यत आह—

5 कुतोऽनुमानताऽपि ? प्रत्यक्षस्यासिद्धेः, सम्बन्धयोः कदाचिदप्यग्रहणात्, प्रत्यक्षपूर्वत्वे तत्सम्भवात्, तदभावे तदसिद्धेः ।

(कुत इति) कुतोऽनुमानताऽपि ? मोक्तन्यायेन प्रत्यक्षत्वासिद्धेः, कथमिति चेत् ? सम्बन्धयोः कदाचिदप्यग्रहणात्, प्रत्यक्षत्वे हि सम्बन्धयोर्युगपद्ग्रहणादुत्तरकालमेकदेशग्रहणाद्विशेषणादवगम्यमानमनुमानं स्यात्, यदेव तु प्रत्यक्षदर्शनं नाद्यापि सिद्धम्, प्रत्यक्षपूर्वत्वे तत्सम्भवात् प्रत्यक्षासिद्धौ तद्धे-10 नानुमानसिद्धिः सम्भाव्यते, तदभावे तदसिद्धेः, प्रत्यक्षत्वासिद्धेरनन्तरोक्तत्वादेव कुतोऽनुमानताऽपि ? ।

इतरो निराशीभूत आह—

तत् किमज्ञानमेवापद्यते ?, कुतोऽज्ञानमपि तत्प्रत्यक्षम् ?, प्रत्यक्षपूर्वकाज्ञानत्रयेऽनन्तर्भावात्, संशयविपर्ययानध्यवसाया अज्ञानविकल्पाः प्रत्यक्षपूर्वकाः तत्र संशयनीयविपर्ययितव्य-विषयप्रत्यक्षत्वस्याभावात् कुतः संशयविपर्ययौ, अनध्यवसायोऽप्यध्यवसायपूर्वः, स चाधिकोऽ-15 वसायोऽध्यवसायस्याप्रवृत्तिविषयाध्यवसायासम्भवात् कुतोऽनध्यवसायः ? ।

(तत्किमिति) तत्किमज्ञानमेवापद्यते ? आचार्य आह—कुतोऽज्ञानमपीति, न भवति त्वद-भिमतं तत् प्रत्यक्षम्, कुतः ? प्रत्यक्षपूर्वकाज्ञानत्रयेऽनन्तर्भावात्, संशयविपर्ययानध्यवसाया अज्ञान-विकल्पास्ते च प्रत्यक्षज्ञानपूर्वकाः, संशयस्तावत् 'सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः' (वै० अ० २ आ० २ सू० १७) तथा 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशे-20 षापेक्षो विमर्शः संशयः' (गौ० अ० १ आ० २३ सू.) इति, सामान्यविशेषयोः प्रत्यक्षपूर्वकत्वे

प्रसङ्गात् ततोऽपरस्याप्यनुमानस्य वा विविधस्यानुमानविभजनं । तथाऽऽत्मेन्द्रियेति अत्र अथ तत्पूर्वकं त्रिवि-धमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च' (गौ० अ० १ आ० १ सू० ५) इति अत्र तत्पूर्वकमित्यनेन त्रिप्रकि-यो [illegible] एकदेशग्रहणेन [illegible] विशिष्टविधमिति शेषवच्छेष-[illegible] अनुमीयत इति तदनुमानं त्रिविधम्, तत्र पूर्ववत् यत्र कारणेन कार्यमनुमीयते यथा—मेघोन्नत्या 25 भविष्यति वृष्टिरिति । शेषवत् यत्र कार्येण कारणमनुमीयते यथा पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति । सामान्यतो दृष्टं—व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति यथा चादित्यस्य तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति (वात्स्यायनभाष्यम्) इत्यनुमानमनेन वैरस्ये प्रत्यक्षाभिमतस्य सम्भवति । तत्र हेतुमाह—देशग्रहणस्येति इत्यनेन हि भवति पुरोवर्तिनि एव वृक्षे इति न प्रत्यक्षस्य अव्यक्तस्य यदेव सिद्धम् । प्रत्यक्षेण वैरस्येऽसम्भवात्[illegible] प्रसिद्धोऽनुमानस्यापि न सम्भव इत्याह—कुतोऽनु-30 मानतापीति । हेतुमाह—प्रत्यक्षत्वासिद्धेरिति तथापि हेत्वन्तरं—सम्बन्धयोरिति अविनाभावसम्बन्धेन सम्बन्धयोर्धर्मधर्मिणोर्ग्रहणं कदाचिदपि—अविनाभावग्रहणकाले अनुमेयकाले वैकल्यं । कदाचित् यदि ग्रहणमपि प्रत्यक्षकाले इति [illegible] हि पुनरपि धूमाग्न्योर्युगपद्ग्रहणं तस्य पर्वतादौ व्याप्य-व्यापकभावेनैकस्मिन्नवगतेऽपरस्यानुमानेनोऽनुमानात्मकं ज्ञानं भवति तत्र वैरस्ये प्रत्यक्षस्याप्यसम्भवेन कथं तदनु-मानं स्यादिति भावः । अथ नैरात्म्ये प्रत्यक्षेऽपि निराशीभूत इत्यपरं वाक्यं प्रत्यक्षमज्ञानमेवेति इच्छति—तत् किमिति तत् प्रत्यक्षमिदं । तत्र संशयलक्षणं वैशेषिकन्यायोक्तमनुसन्धत्ते—सामान्यप्रत्यक्षादिति

समानानेकधर्मत्वादीनि विशेषणानि स्थाणुर्नान्यथा स्थाणुपुरुषादिष्विति संशयनीयार्थाभावान्न संशयः, तत एव विपर्ययितव्याभावान्न विपर्ययस्तस्मादेतेनैवेत्यत आह—संशयनीयविपर्ययितव्यविषयप्रत्यक्षा-न्याभावात्। अनध्यवसायोऽध्यवसायपूर्वः, स चाधिकोऽवसायोऽध्यवसायः प्रत्यक्षज्ञानं, एतदभावस्तो-त्वात्, नाध्यवसायोऽनध्यवसाय इत्यधिकावसायासम्भवात् तद्दृष्टानुवृत्तिविषयाध्यवसायासम्भवात् कुतोऽनध्यवसायः ?। तस्मात् यदुक्तं 'पुढवीआयिकातिजीवा अजामूढसमविपविट्ठंति' इत्यादि तदसत्यम्। 5

अन्याह च यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः। सङ्कीर्णमिव मात्राभिश्चित्राभि-रभिमन्यते॥ तथेदममृतं ब्रह्म निर्विकारमविद्यया। कलुषत्वमिवापन्नं भेदरूपं विवर्तते॥

अन्याह चेति, यस्मिन् जिनप्रवचनप्रसिद्धामेवमादिनिर्विकल्पविधिविधिनयदर्शने भेदाभावं प्रत्यक्षानुमानसंशयविपर्ययानध्यवसायासम्भवमनुवदमानोऽन्योऽप्याह—यथा विशुद्धमाकाशमिति दृष्टा-न्तसमर्थनं तिमिरोपप्लुतदृष्टेर्विशुद्धे नभसि केशोण्डुकमशकमक्षिकामयूरचन्द्रिकाऽऽदिमात्राभिरवयवैर्वि- 10 ततमिति निरवयवेऽप्यसङ्कीर्णे सङ्कीर्णदर्शनं भवति तथेदमिति दार्ष्टान्तिको भावकपरमार्थः, अमरणा-दमृतमविनाशात्, बृहत्त्वाद् ब्रह्म निर्विकारं वितिमिरं व्योमवदवस्थितम्, नपुंसकनिर्देशः सर्वमेवा-विभक्तसदविकारसाधारणत्वात्, अन्यत्र गुणसन्देहे नपुंसकलिङ्गप्रयोगवचनात्, भवभावापेक्षया वा नपुंसकम्। अकलुषमपि सदविद्यया ज्ञानाभावेन कलुषत्वमिवापन्नमनापन्नमप्यभेदरूपमपि सभेद-रूपमाभाति। एवं तावदमृतं मर्त्यरूपेणाभातीत्युक्तम्। 15

इदानीमेकं सदनेकधा प्रविभज्यत इति ब्रूमः—

तदेकमपि चैतन्यं बहुधा प्रविभज्यते। भङ्गाद्यङ्कितमुत्सारे वारिराशेरिवोदकम्॥

संशयविषये पुरोवर्तिवस्तुनि स्थाणुपुरुषसाधारणधर्मदर्शने सति। प्रत्यक्षात् स्थाणुत्वपुरुषत्व[illegible]विशेषधर्म[illegible]प्रत्यक्षात् उभयो-रेकस्य [illegible] स्थाणुर्वा पुरुषो वेति संशयो भवतीति तदर्थः। अनेकत्रापि एवं संशय उक्तः। न्यायसूत्रे तु पञ्चविधः संशय उक्तः तदेव गौतमसूत्रोपन्यासेन दर्शयति—समानानेकेति, [illegible] 10 [illegible] इति न्यायसूत्रार्थः। तत्र [illegible] दर्शनात् सामान्यविशेषयोरिति [illegible]—अनध्यवसाय इति [illegible] इत्यर्थः। स चाधिकोऽवसाय इति, [illegible] प्रत्यक्षज्ञानमिति [illegible] 15 [illegible] इति भावः। [illegible] इत्यर्थः। अत एव [illegible] तस्मादयुक्तमिति। यस्मिन् जिनप्रवचनेति [illegible] अनुमानं च नास्ति तथा संशयो विपर्ययोऽन-ध्यवसायो वा न सम्भवतीति [illegible]। [illegible] 20 [illegible] समासेन च [illegible] दृष्टान्तेनाह—यथा विशुद्धमिति। [illegible] इदानीं [illegible] एकमपि [illegible] तदेकमपीति [illegible]

प्रकृतिस्वमनापन्नाम् विकारतानाक्रोति सः । ऋतुपामेव ग्रीष्मान्ते महतो मेघसंप्लवात् ॥ इति विधिविविधिनयः समाप्तः ।

तस्यैकमपीत्यादि, यथोदन्वतो लोममुत्पादेऽङ्गारराशिवत् प्रचलदुपलभ्यते तथाऽऽत्मनेकरूपता मिथ्यैव प्रकृतिस्वमिति, प्रकर्षेण कृतिः प्रकृतिः, यत्पदार्थपरो मेघः, तत्स्वमनापन्नामेव विकार-
5 त्वोत्थानेव यत्पदार्थीन् आत्ममायावमभ्युपात् सर्वप्रकारमूलोपाधिस्वात्मानाक्रोति सः, तथा व्यासानां मायाकाररूपेण ग्रहसुपसंहरति च, को दृष्टान्तः ? ऋतुपामेव, ऋतूनां धामा—इन्द्र इव, निर्मलमाकाशं दृष्ट्वा पदार्थे भवन्ति महापर्वस्य गर्भ इति कुतो निर्मले नभसि वर्षसम्भवः ? तथापि सोऽमर्यस्यापि मासनेनैव शक्रः शक्रकार्मुकसंवदनमहामनसमिवपर्णिवकरकाधारापर्णीन् ग्रहसुपसंहरति मेघ-
प्यादे, यथैवैव पुनस्तादनैमस्यपर्वनामसः । यथेमतुपामः सृष्टिः सुरगणगमापृथग्भूतस्तमकति
10 स्वामिमवसेयाभिरूपा तथा सर्वपदार्थगमाभिरूपा सृष्टिर्मायावैवोपसंहारमेति मायविधिविधिनयः समाप्तः । एवं तावत्सर्वतो विधिविविधिनयविकल्पाः पुरुषमिषतिकालक्रमायमाया व्यासपाताः अनया दिशा सम्यगविविधिविधिनयमसहायेकारणपाता उन्नेतव्याः ।

इदानीं तेषु शब्दार्थो वक्तव्यः, स च सामान्येनोच्यते सर्वेषां तुल्यत्वात्, स च द्विविधः पदार्थो वाक्यार्थश्च, तत्र पदार्थस्तावत्—

15 एषु विधिविविधिषु विकल्पः शब्दार्थः, यतेषु पुरुषादिष्ववस्थास्मुपचरितप्रक्रियामेव कल्पितविकल्पसत्त्वात्तद्वस्तुनिर्विकल्पत्वात्, विद्या तु तत्त्वज्ञानं साऽऽगमविकल्परूपा न भवितुमर्हति आगोचरातिक्रान्तत्वात्तत्त्वज्ञानविषयानन्यात्मकैकपरमार्थस्य ।

(एष्विति) एषु विधिविविधिषु विकल्पः शब्दार्थः, यतेषु पुरुषादिष्ववस्थास्मुपचरितप्रक्रि-यामेवकल्पितविकल्पसत्त्वात् तद्वस्तुनिर्विकल्पत्वात् । वस्तुत्वादिमा ज्ञानतः सर्वसैकत्वापत्त
20 विज्ञाने सर्वस्य भावत्वात् । एतेन वस्तूत्वापत्तसम्बन्धो व्याख्यातो दृष्टान्ताभावात्, सर्वस्य सर्व-

---

भूमो भवे व्यालं मेघैः' इति यरैवद् पूर्व व्याख्येय । तत्र—अनन्तानेकरूपस्य अव्यक्तूलस्यमात्रिकस्य । तथाऽमेदरसं यदपि भवत्यादिरूपेण मेघमवात्मयेव ताद् ताद् वजति वर्षर्हत्ति मेघेति भाव । दृष्टान्तमाह—ऋतुपामेवेति ऋतुपामा-
मकः शक्रकार्मुक—इन्द्रधनुः अप्यत—तडित महाकाल—नीरूप कर्षिते—वर्षितम्, वर्षित—इति करका—हिमो-
पलादि: धारा:—अवस्थित्वा इति: । दृष्टान्तदार्ष्टान्तिकयो: साम्यमाह—यथैवमिति विधिविविधनयविवेकसमुपसंहर-
25 एवं—इति विधीति । अथ प्रोक्तेषु पुरुषादिवादेषु को शब्दस्य वाच्योऽर्थ इति विचार्य स च शब्दार्थ पुरुषादिवादार्थ
सर्वेषां तत्परिक्त तुल्यैव वस्तुतोऽभिमतः अन्यथा सर्वमतवादात्मैव विचार्यते न तु पृथग्वेत्याह—इदानीमिति । निवि-
कल्पवस्तुन एव परमार्थिकस्य तस्य च निर्विकल्पस्य तत्त्वमत्वेन अन्यादिमत्त्वादविकल्पोपचितः कल्पनिकल्पेतराल्पितो
विकल्प एव शब्दार्थ इत्याशयेनाह—एष्विति । ननु निर्विकल्पवस्तुन एव पारमार्थिकत्वे विकल्पस्यावश्येव तत्र कथं शब्दार्थ
वैकल्पाकल्पमात्—यतेषु पुरुषादिष्विति । नामरूपप्रपञ्चादिः अविद्यामूलनिर्मेयस्वस्तसादात्म्यार्थविकल्पमुपलब्ध
30 वीव इति भाव. मेघपुरमेर्यन्तादिपकल्पनयोपपादिति भावः । मतेऽन सर्वावस्थैकत्वं दर्शयति—वस्तुत्वादिमिति
तथा च वस्तुतत्त्वैरपल भवनिरुपणात्वेन ज्ञानात्मतैव सर्वेषां न तु भवितव्यम् इति भावः । सर्वज्ञानापत्तेश्च
च वस्तुप्याद् अनिर्वचनीयतात्मत्वं न सम्भवति व्याप्तिग्रहप्रसङ्गाभावात्मकादाह—एतेनेति । विकल्पत्वमाह—

गत्वात् भेदाभावात् । एतमर्थमन्योऽप्याह 'शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । अनागमविकल्पा तु स्वयं विद्योपवर्तते ॥' (वाक्य० कां० २ श्लो० २३५) शास्त्रेषु सांख्ययोगवैशेषिकवेदशिरःप्रभृतिषु प्रकृतिपुरुषद्रव्यगुणादिनित्यानित्याद्वैतद्वैतत्रैतादिपदार्थप्रक्रियाभेदैः विकल्पात्मकपदार्थप्रणयने यथाप्रक्रियमविद्यैवोपवर्ण्यते विकल्पस्यावस्तुत्वात् । विद्या तु तत्त्वज्ञानं साऽऽगमविकल्परूपा न भवितुमर्हति वाग्गोचरातिक्रान्तत्वात् तत्त्वज्ञानविषयानन्यात्मकैकपरमार्थत्वात् । यथोक्तं 'पण्णवणिज्जा भावा' (आव० नि० ४८८) इत्यादि, आगमाभ्यासात्तु सम्यग्दर्शनज्ञानचारित्रतपोविशेषविशेषितविधस्य सर्वभावविषया विद्या स्वयमेव आत्मन्येवोपवर्तते, साविद्यमाना तु कुतश्चिदानीयते सा चानागमविकल्पेत्यत आह—'अनागमविकल्पा तु स्वयं विद्योपवर्तते' इति । तथा चान्यः 'विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः । तेषामन्योन्यसम्बन्धो नार्थं शब्दाः स्पृशन्त्यमी ॥' (न्यायमञ्जर्यां जयन्तभट्टेनोद्धृतेयम्) शब्दा इति शब्दानुमानप्रतिपत्तिहेतव इति । 10

अत्र आह—

ये त्वेते घटादिशब्दा भेदाभिनिवेशवन्तस्ते शब्दा एव केवलाः श्रोत्रग्राह्यत्वादर्थस्वरूपस्य वाचकाः, नन्विदं प्रसिद्धिप्रसृतव्यवहारविरुद्धम्, अत्रोच्यते न ब्रूमः प्रतिपादका इति, किं तर्हि ? वाचका इति ब्रूमः प्रतिपत्तृसङ्केतवशात्तदुपलक्षणत्वेन प्रतिपादकत्वं न विरुध्यते, मयूरविरुतवद्धि सङ्केताद्व्यवहारानुपातेन । 15

मार्थैकत्वं तदाम्नायेऽप्यभ्युपगतमिति दर्शयति—एतमर्थमिति भेदकल्पितमिदं प्रमाणादिप्रकरणमर्थमित्यर्थः । सांख्यमते हि नित्यौ प्रकृतिपुरुषावभिमतौ तत्संयोगाद् व्यक्तं प्रकृतेर्भेदमहदादिविपरिणामक्रमेण यदि तत्त्वाभिमानात् प्रकृतेः सर्वं सम्भवति पुरुषस्य अन्यत्वख्यातेन तत्प्रामान्युपपन्नात् । एवं योगदर्शनेऽपि । वैशेषिकमते तु ईश्वरस्य अनन्तशक्तेः योगीश्वरस्य निमित्तत्वात् द्रव्यादिविषयासूत्रणेन तत्सर्जनम् । वेदशिरःशास्त्रे—वेदान्तदर्शनेऽद्वैतवादिनस्सूत्राणेन परमार्थैकत्वस्य भेदसर्गप्रतिपादकस्येति विज्ञेयम् । विद्यास्वरूपमभिधत्ते—विद्या त्विति तत्त्वज्ञानं विशेष्यते तत्त्व 10 न शब्दार्थः वाग्गोचरत्वात् तत्त्वज्ञानविषयीभूतस्य परमार्थस्यानन्त्यस्यावस्तुत्वाद्विकल्पस्य अतो विद्या वाग्गोचरविकल्परूपा न भवतीति भावः । तत्र भाष्यमाह—पण्णवणिज्जा भावा इति 'प्रज्ञापनीया भावा अनन्तभागस्तु अनभिलाप्यानाम् । प्रज्ञापनीयानां पुनरनन्तभागः श्रुतनिबद्धः' इत्यावश्यकनिर्युक्तिगाथा । आगमाभ्यासात् कोपयोगीत्यत आह आगमाभ्यासात्त्विति सम्यग्दर्शनज्ञानचारित्रतपोविशेषसमन्वितत्वाद्विद्यायाः पुनरस्य भावाभ्यासात् स्वात्मनि निरूपणैव तत्त्वस्वरूपा विद्या सर्वभावविषया आत्मन्येव प्रकाशतामुपयातीति भावः अनागमेति, शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यत इति पूर्वार्धे । अन्यदपीदं विकल्पात्मकत्वे प्रमाणयति—विकल्पयोनय इति शब्दा हि पूर्वानुभवसंस्कारजन्यविकल्पजन्यत्वात् विकल्पप्रभवाः प्रत्यक्षानुत्पादकाश्चेति इत्यन्ये अनुमाने इतिवृत्तकमात्र इति यथार्थं एव तेषामर्थावबोधकत्वमित्यर्थः । योगिभ्यस्तु शब्दविकल्पयोः कार्यकारणभावः प्रकल्पितशब्दा इत्यनेन केनोऽपि निवर्तित इत्याह—शब्दा इतीति । अथैते घटादिशब्दा वार्थस्य प्रतिपादकाः श्रोत्रग्राह्यत्वात् भेदकाभिनिवेशकत्वे—ये त्वेते इति अर्थप्रतिपादकत्वमर्थस्यैवाभिमतत्वाच्छब्दस्य प्रतिपत्तेश्च न तु शब्दमात्रम् विरुद्धव्यवहारविरुद्धत्वाभिप्रायेण व्याचष्टे—घटादीति वाचका इति मूलस्वपरसाभिप्रायसमाधानपुरस्सरमाह प्रतिपादका इति प्रतिपत्तिपक्षं दूषयति । अत्र प्रतिभाति तत्र विवक्षा यथाऽर्थे वर्तते परिस्फुटं प्रतिभासमानपुरस्सरा श्रोत्रविज्ञानपरा शब्दे लिङ्गे च वर्तते बहिरर्थसत्त्वप्रतिभासनादिर्थं तस्यैव बाधितम् अतः श्रोत्रप्रत्यक्षविरुद्धत्वात् शब्दस्वरूपेण तत्र विवक्षा न तु बहिरर्थः शब्दलिङ्गयोर्विषयः यदि विवक्षा भवेत् तदा शब्दस्वरूपं विना तदर्थप्रतीतिः स्यात् न च सम्भवति शब्दलिङ्गयोरर्थे सम्बन्धवैकल्यम्, सम्बन्धप्रतीतेश्चाकाङ्क्षासन्निधियोग्यतादेः तथैव तत्र एकत्वप्रतीति- 25 वाच्यवाचकत्वाभ्युपगमस्य निष्फलत्वात् प्रमाणान्तरानुमानव्यवहाराच । एतच्छब्दलिङ्गाभ्यां बहिरर्थावबोधसिद्धिः शब्दाः प्रयुक्ते

(ये त्वेत इति) ये त्वेते घटादिशब्दा भेदमभिदधते शब्दा एव केवलं नार्थस्वरूपस्य वाचकाः, घटादिप्रतिपादनसमर्थाभिमता न प्रतिपादका इत्यर्थः। ननु इदं प्रसिद्धिमनुवर्तमानव्यवहारवि- रुद्धं त्वयोक्तम्, अर्थस्याप्रतिपादका घटादिशब्दा भेदमभिदधत श्रोत्रमात्रग्राह्यत्वादिति, घटादिशब्दा इति च व्यवहारादेव तेषां घटाद्यर्थप्रतिपादकत्वसमर्थनादिति, अत्रोच्यते न ब्रूमः प्रतिपादका इति, किं तर्हि? वाचका इति ब्रूमः प्रतिपत्तृसङ्केतवशादुपलक्षणत्वेन प्रतिपादकत्वं विकल्पात्मनोऽर्थविषयस्य न विरु- ध्यते, यस्मात् मयूरविरुतं सङ्केताद्व्यवहारानुपातेन, यथा मयूरविरुतं ग्रामसमवर्षस्थानगमनाद्यन्यतमा- वस्थाविशेषसहचरं सुचरं तयोस्तत्काले इत्यसङ्गतेः पुरुषस्य तादृग् विज्ञानमादधाति, एवं पुरु- षोऽपि घटपटादिशब्दोच्चारणेन पूर्वसङ्केतवशात् पुरुषान्तराय स्वाभिप्रायमर्पयतीति न प्रसिद्धिव्यवहा- रविरोधौ, तथैवाचेतनशब्देष्वपि काकरुतश्येनपतनादिषु सङ्केतादेव शुभाशुभादिपरिज्ञानं दृश्यते।

अथवा ते सर्व एव शब्दास्तस्यैव चैकस्य ब्रह्मणो लक्षणार्थाः तदेकदेशत्वात् प्रागभिहि- तमत्यन्तप्रसिद्धिवत्, यथा गौर्विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति, एवं च कृत्वाऽऽ- हुः—सर्वधातवो भुवोऽर्थमभिदधतीति।

(अथ वेति) अथवा किमनेन प्रसिद्धिव्यवहारविरोधपरिहारपरिक्लेशेन? अयमेव सुशिष्टः परिहारो न्यायी च तद्यथा—ते सर्व एव शब्दास्तस्यैव चैकस्य ब्रह्मणः—पुरुषार्थ्यत्वमविधिविधिविषयवि- कल्पस्य यथोपपादितस्य स्वभावस्थितस्याप्यतमस्य लक्षणार्थाः, तदेकदेशत्वात्, प्रागभिहितमत्यन्तप्रसिद्धिवत् यथा गौर्विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति, यथैते विषाण्यादिशब्दाः गोरेकदेशवाचित्वा- ल्लक्षणार्थाः प्रसिद्धाः सङ्केतवशात् गोरेव वाचकाः, तदवयवानां तस्मादभिन्नत्वात्, एवं सर्वशब्दा- स्तदवयवानां तदोऽभिन्नत्वात् तस्यैव ब्रह्मणो वाचका इति वाचकत्वेऽप्युपपन्नः प्रसिद्धिव्यवहारावि-

---

रान्यथ शब्दा इति तर्कानारम्भमाश्रयेत तत्त्वं न पश्यतामव इति भावः। ननु घटादिशब्दा इत्येव घट- घटार्थप्रतिपादकाः शब्दा निरूपणीयाः अन्यथा धर्मिग्रहमेव न स्यात् तथा च व्याघातप्रतिपादकः शब्दा अर्थ- प्रतिपादका इति पक्षनिर्देशो व्याहतार्थः तथा लोके घटादिशब्दा घटार्थप्रतिपादका इति व्यवहारस्य प्रसिद्धः तद्विरोधश्च कथं समाधेयमिति घटादिशब्दा नार्थस्य वाचका इति प्रतिज्ञाभिमतार्थः। भाष्योऽपि न वयं घटादिशब्दा नार्थस्य प्रतिपादका इति ब्रूमः किन्तु नार्थस्य वाचका इति तथा प्रतिपादकत्वमेकेनापि शक्यं न निषेधाम अपि तु शब्दार्थयोर्वाच्यवाचकभावमेव तेन शब्दात्मा शक्तिग्रहणसहकारेण प्रतिपत्ता इत्यतोऽर्थ- प्रतिपादकत्वविषयव्यवहारोपपत्त्या प्रतिपादकत्वं न विरुद्धमित्याशयेनाह—न ब्रूमः प्रतिपादका इतीति। अथ किं तदन्यद् व्याख्याति—यथेति वाचकवाचकभावव्यतिरेकेणापि तद्दृष्टं वाचकत्वमयूरविरुतं प्रतिपत्ता पुरुष च एव प्रतिपद्य यदा कालान्तरे तादृशकालमयूरविरुतं शृणोति तदा स्वस्य तादृशकालज्ञानस्यापरिज्ञानं तत्काले तत्तदवस्थाविशेषेण तद्विशेषस्य पूर्वं तेन प्रतिपन्ना सङ्केतस्य स्मृतत्वादिति भाव। एवं शब्देष्वपि सम- विता विशेषज्ञत्वादाह—एवं पुरुषोऽपीति। एवमेव सङ्केतवशादेव चेतनचेष्टायाः कर्तृत्वं शकुनस्य शुभाशुभ- प्रज्ञानं पुरुषस्य भवतीत्याह—तथैवेति। अथ प्रसिद्धिव्यवहारविरोधपरिहारार्थं शब्दानामवाचकत्वपक्षे क्लेशस्य महत्त्व आरोपणम् अन्यत्र वाचकत्वेऽङ्गीकृतेऽपि न विरोधः सम्भवतीति स्पष्टयितुमाह—अथवेति यथा उप- वाचका श्रौतविशेषप्रयोगेण पुनर्विशेषं बोधयन्ति यथा चैतन्यादिशब्दाः तत्तदवयवद्वारेण तत्तदवयविनिकाय्येन चेतनाधिष्ठानात् पदार्थविषयानुसारेण तदात्मनो ब्रह्मणो बोधकत्वादित्यत आह—ते सर्वे एव शब्दा इति 'विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम्' (वैशे अ २ आ १ सू ८) इति सूत्रोक्तविषाणादिशब्दा- विषाण्यवयवावयविनामभेदाद्वारेण गोर्बोधक अवयवावयविनोरभेदात् तथा सर्वे शब्दा इत्याह—यथा गौर्विषाणीति।

शेषः, अभिधेयमवनलक्षणोपलक्षणार्थत्वे सर्वशब्दानां सम्यग्लक्षणविनिश्चितिसंचारित्वापत्तेराह—यच्च कृत्वाऽऽहुः, सम्यग्लक्षणविद् इति वाक्यशेषः । सर्वधातवो भुवोऽर्थमभिदधतीति, तेषामप्यस्तित्वेन दर्शने करोत्यादिधातूनां सत्तार्थानतिक्रमेण स्वार्थभवनमुपपाद्य भुवं वदन्तीति भूवादयो धातवोऽस्मदीयाः सौगातिके-भ्यश्चैतस्माद्भूवादिसम्यग्व्याख्यानात्मान्तराणामिति, उक्तः पदार्थः ।

इदानीं वाक्यार्थ उच्यते—

एकोऽनवयवः शब्दो वाक्यार्थः, भवनस्यानवयवत्वात्, एष द्रव्यार्थो विधिविधिनयः, सङ्ग्रहदेशत्वादस्य द्रव्यार्थता, इह तु द्रवति भवतीति द्रव्यं भवनं भावः, निबन्धनमस्य सोमिलब्राह्मणप्रश्ने 'किं भवं ? एके भवमित्यादिके व्याकरणे 'सोमिला ! एगे वि अहं दुवे वि अहं, अक्खए वि अहं अव्वए वि अहं, अवट्ठिए वि अहं, अणेगभूयभावभविए वि अहं' (भग० श० १८ उ० १० सू० ६४७) इत्यादि ॥

(एक इति) स एकोऽनवयवः शब्दो वाक्यार्थः, वाक्यस्यार्थश्च वाक्यार्थः वाक्येन युक्तोऽर्थो वाक्यार्थः, वाक्यसम्बन्धाद्वाक्याद्वाक्यस्यैवार्थः । यथाहुः—आख्यातशब्दः संघातो जातिः संघातवर्तिनी । एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि । वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥ (वाक्यपदीये का० २ श्लो० १ २) तत्र येरेकोऽनवयवः शब्द इत्युक्तं तैर्भिन्नोऽभिप्रेतः भवनस्यानवयवत्वात्तथैव पदवाक्यशब्दस्वरूपायाः मतत्वादिति, न तु

अभिधेयं धातुभिरुक्तं तत्प्रतिपादयितुमाह—एकश्चेति का च तत्प्रतिपत्तिरित्याह—सर्वधातव इति, न्यायस्य सर्वे धातवो भुवोऽर्थमाहुरिति अत आतवन्तो धातुः न तु क्रियावचना पचादीनां सामान्यविशेषभावेन करोतिना किं करोति ? पचति पाकं करोतीत्येवं सामानाधिकरण्येऽपि अस्तिभवतिविषयीणां करोतिना सामानाधिकरण्याभावादतुल्यतापत्तेः यदि भवति 'किं करोति ? अस्ति' इति । एवं भवति पचति भवति पठति भवत्यस्तीति सामान्यवचनभावेन भवतिनैवाधिकरणेन सामानाधिकरण्याद्भवनवचनत्वैव धातुत्वम्, भवतीति भावः पचादयस्य क्रियाः भवतिक्रियायाः कर्म भवन्तीति भावा वक्तव्ये व्यपेयमरणमध्यो भवति अत्यन्तमरणस्य सत्ताक्रमादिविपरिणामापत्तेर्भवस्यापत्त्यभावविकारेषु भावात्वं षड् भावविकारं भवतीत्यत्र पदमनुसृत्य इतीति भगवत्येव वचनम् । न च एका इव इत्यादिप्रतिपत्तिकानामपि भाववचनत्वाद-धुर्ल प्राप्तमिति वाच्यम्, तत्रैतावन्मात्रप्रदर्शनपरात्त मान्यते का सा भावः क्रिया हि मान्यते सामान्यमेतत्तु द्रव्यम् । न च भावा भावेनाभिधानविरुद्धत्वादपि बहुत्वमथवा भावत्वं हि पुत्रजन्मना मान्यते इति वाच्यम्, भाववचना ये भूवादयः ते धातव इत्यर्थाच्छब्दादेव एवैतेनाभिहितं सूत्रेण भूवादयो धातवः (पा. १-३ १) इति भवतीति भुः भुवं वदन्तीति भूवादयः भवेदर्थान्तरेऽपि इत्युत्पत्तिः । आत्मलाभमर्थं भावयन्ति ये धातवः तेन क्रियार्थाभिधायिनो न धातुत्वाः अथवा भवस्य सत्ता एवाक्रियमाणाभिप्रायतः भवत्येवानेकक्रियाभिवर्तनात्मिका प्रत्येकं सम्यग्भावस्थी भावस्वभावरूपा धात्वादिरूपता भाव इति । अथ वाक्यस्यार्थप्रदर्शनायाह एकोऽनवयव इति वाक्यार्थोऽयं स्फोट-वादिनां मतेन पैलोपादितैव प्रकाशमुपलभ्यमानस्वरूपं प्रतिपद्यते स शब्दः स्फोटः ध्वनिः शब्दगुण इति स्फोटो द्विविधः वाच्यः वाचकश्चेति वाचकोऽपि जातिव्यक्तिभेदेन द्विविधः तत्र व्यक्तिस्फोटस्य जातिः संघातवर्तिनीति व्यक्ति-समष्टिरेकोऽनवयवः शब्द इति व्याख्यान्तरस्य तु बुद्ध्यनुसंहृतिरित्यनेनोक्तेः । तत्र वर्णोऽस्य शब्दो वा निर्विभागः एकार्थ-प्रदो बोधकभावः शब्दः स्फोटस्वरूपमेव वाक्यम् यथा चित्रज्ञानं नीलाद्याकारमेकमेव प्रतिभासमानं नीलादिभेदेनैव भिद्यते नीलपीताद्यनेकाकारमेव विज्ञानमुपजायते वस्तुतस्तत्र ज्ञाने आकारभेदो नास्ति तथा शब्दपदयोर्वर्णयोः सदृशम् । वाक्यस्यार्थभेदस्वरूपं च वाचकस्वरूपवत्कल्पितत्वात्पदवर्णविभागाभावात् यथा वाक्यं निर्विभागं स्फोटरूपं वाचकं तथा वाक्यार्थोऽपि अत एव वाक्यस्यार्थश्च वाक्यार्थ इति उभयोरेकत्वमिति भावः । देवदत्त ! गामभ्याजेत्यादौ वाक्ये देवदत्तादिपदानां पृथगर्थाभावात् । अत्र स्फोटे—भवनस्यानवयवत्वादिति स्फोटस्वरूपस्य नि

सर्वो ह्येकस्यैव सर्वत्वादिति । परिहार्यं मया द्रव्यार्थो विधिविधिनयः । द्वेधोऽस्मात्—सङ्ग्रहैकत्वा-त्मक द्रव्यार्थ इति सङ्ग्रहो द्रव्यार्थः । स पुनर्द्विविधः सङ्ग्रहो देशसङ्ग्रहः सर्वसङ्ग्रहश्चेत्येवमादिश्चत्वप्रकारो ऽसौ । भार्ये सर्वभेदसङ्ग्रहैर्नयानाम्, यथोक्तं 'एक्केको य सयविहो सत्तनयसया हवंति एमेव' इति, (आ० भा० २२६ नियु० २२६४) सङ्ग्रहस्यापि द्रव्यार्थता 'तित्थयरवयणसंगहविसेसपत्थारमूल-

5 वागरणी । दव्वट्ठिओ य पज्जवणओ य सेसा वियप्पासिं' ॥ इति (संमति० कां० १ गा० ३) अत्र नात् द्रव्यार्थसमासत्वादिनये व्याख्याता, तस्मात् सङ्ग्रहैकत्वात्यन्तव्यवहारस्य द्रव्यार्थत्वमिति । द्रव्य-शब्दस्य कोऽर्थः ? द्रवतीति द्रव्यम्, गुणसन्द्रावो द्रव्यम्, द्रव्यं भव्यं योग्यम्, भूमादौ इति भावि-योग्यमित्यर्थमासियोग्यं दारु, क्रियावदादिलक्षणं द्रव्यमित्येवमादि यथासम्भवं व्याख्येयम् । इह तु भवतीति भावः, भाव्यचतुष्टये पुरुषादिसमावान्ते, भवन भावोऽस्ये पूर्वोक्तवत् पूर्वविसृष्टा-

10 नपायाम् । द्रवति भवति गच्छति सततमिति द्रव्यम्, गत्यर्थत्वात्, 'द्रव्यञ्च भव्ये' इति वचनात्, न विकारापत्तौ विधिविधिनयानुपपत्त्यात्मार्थम् । किमेतत् सामान्यवादिना त्वमनीषिकयोच्यते तथा, भाद्दोत्तिसार्पेऽपि नियमनमस्य पर्यवसानादि पद पदनिर्गतमिति ? अत्राचार्यैरुच्यते—नियमनमत्र सोमिलब्राह्मणप्रश्ने 'किं भवं ? एगे भवमिसादिके व्याकरणे' 'सोमिला ! एगोवि अहं दुवे वि अहं, अक्खए वि अहं, अव्वए वि अहं, अवट्ठिए वि अहं, अणेगभूयभावभविए वि अहं' (भग० श० १८ उ०

15 १० सू० ६४७) इत्यादि नियमनमिति ।

एवं द्वितीयो विधिविध्यरः सविकल्पो नयचक्रस्य समाप्तः ॥

स्याद्, यथा [illegible] विभागे नास्ति [illegible] प्रमाणपदार्थस्य विभागः ? । मूल एव विभागेन [illegible] प्रविभागेऽपि [illegible] प्रतिपद्यत इति भाव । तित्थयर इति 'तीर्थंकरवचनसङ्ग्रहविशेषप्रस्तारमूलव्याकरणी । द्रव्यार्थिकश्च पर्यवनयश्च शेषा विकल्पाश्च' इति छाया । तदर्थश्च तीर्थं द्वादशाङ्गं तदाधारो वा सङ्घः तत्करणात् तीर्थंकर

20 [illegible] तीर्थंकर [illegible] येषां [illegible] तस्मिन् [illegible] सङ्ग्रहविशेषौ द्रव्यपर्यायौ तयोः प्रस्तारो विस्तारः [illegible] सङ्ग्रहव्यवहारस्य विशेषप्रस्तारस्य [illegible] मूलव्याकरणी आद्यवक्तारौ द्रव्यार्थिकः पर्यायनय शेषा [illegible] विकल्पा भेदा इति । एतेन सङ्ग्रहस्य द्रव्यार्थत्वं सिद्धम् [illegible] पुरुषादिपदाः [illegible] एकमपि द्रव्यार्थत्वमिति भावः । द्रव्यार्थशब्दस्य यथावत् विविनक्ति [illegible] प्रदर्शय एवमत्र द्रव्यार्थ-समासस्येति द्रव्यस्य [illegible] द्रव्यशब्दार्थं व्याचष्टे—द्रव्यशब्दस्येति । [illegible]

25 [illegible] द्रव्यमिति [illegible] तस्य [illegible], विधिविधिनयस्य च सङ्ग्रहैकत्वात् [illegible] द्रव्यार्थता [illegible] देशसामान्यविशेषस्य-इह [illegible] । विधिविधिनये [illegible] तत्र पुरुषादि [illegible] भवतीति [illegible] द्रव्यशब्दार्थं [illegible] न भावार्थे भवनं भाव इति [illegible] भेदेन इति भावः । [illegible] द्रव्यशब्दार्थं [illegible] —न विकारापत्तावित्ति । एतेन [illegible] पृच्छति—किमेतदिति । सोमिला एगो इति हे सोमिल ! एकोऽप्यहम्, द्वावप्यहम्, अक्षयोऽप्यहम्, अव्ययोऽप्यहम्, अवस्थितोऽप्यहम् अनेकभूतभावभविकोऽप्यहमिति छाया ॥

30 इति विजयलब्धिसूरिविरचिते विषमपदविवेचने नयचक्रस्य
द्वितीयो विधिविध्यरः समाप्तः ॥